।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमद्वाल्मीकीयरामायणम्

THE VALMIKIYARAMAYANA

[श्री-गोविन्दराजीय-रामानुजीय-तनिश्लोकी-महेश्वरतीर्थीयाख्यव्याख्या चतुष्टयालङ्कृतं
मुनिभावप्रकाशिका-सत्यतीर्थीयाविव्याख्योद्धृत टिप्पणी संवलितम् च]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महापुराणम्

१. ब्रह्म महापुराणम्
२. पद्म महापुराणम्
३. विष्णु महापुराणम्
४. शिव महापुराणम्
५. नारदीय महापुराणम्
६. मार्कण्डेय महापुराणम्
७. अग्नि महापुराणम्
८. भागवत महापुराणम्
९. भविष्य महापुराणम्
१०. ब्रह्मवैवर्त महापुराणम्
११. लिंग महापुराणम्
१२. वाराह महापुराणम्
१३. स्कन्द महापुराणम्
१४. वामन महापुराणम्
१५. कूर्म महापुराणम्
१६. मत्स्य महापुराणम्
१७ गरुड महापुराणम्
१८. ब्रह्माण्ड महापुराणम्
१९. वायु महापुराणम्
२०. विष्णुधर्मोत्तरपुराणम्

हरिवंश पुराणम् : देवीभागवतम्
वासुकि पुराणम् : कालिका पुराणम्
कल्किपुराणम् : एकाम्रपुराणम्
सौर पुराणम् : नरसिंह पुराणम्

[महाभारत-नीलकंठी टीका सहित]

वाल्मीकीय-रामायण—

[श्री-गोविन्दराजीय-तनिश्लोकीमहेश्वरी तीर्थ व्याख्याव्यायों सहित]

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीमद्वाल्मीकीयरामायणम्

THE VALMIKIYARAMAYANA

[श्री गोविन्दराजीय-रामानुजीय-तनिश्लोकी-महेश्वरतीर्थीयाख्यव्याख्याचतुष्टयालङ्कृतं
मुनिभावप्रकाशिका-सत्यतीर्थीयादिव्याख्योद्धृत टिप्पणी संवलितं च]

पञ्चम खण्ड :: युद्ध काण्डम्

AMAR PUBLICATION
VARANASI (INDIA)

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

1500 00

Published by :
M/s. Amar Publication
Satti Chautra Varanasi (U.P.)

Printed by :
Jain Amar Printing Press
Delhi-7

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ श्रीमद्वाल्मीकिरामायणे युद्धकाण्डम् ॥

श्रीभूषणादिव्याख्याचतुष्टयालंकृतं मुनिभावप्रकाशिका-सत्यतीर्थीयादिव्याख्योद्धृतटिप्पणीसंवलितं च ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युद्धकाण्डम् ॥ ६ ॥



For Private And Personal Use Only

श्रीरङ्गेशाय नमः ॥ आचार्यं शठकोपदेशिकवरं प्राचार्यपारम्परीमप्यानम्य सनारदं कुशलवाचार्यं मुनीनां वरम् ।
पूर्वाचार्यकृता विलोक्य बहुधा व्याख्याः सतां प्रीतये कुर्वे संप्रति युद्धकाण्डविवृतिं श्रीमत्किरीटाभिधाम् ॥
उक्तं पुरुषकारभूताया लक्ष्म्याः कृत्यं सुन्दरकाण्डे । अथोपायकृत्यं वक्तुं षष्ठः काण्ड आरभ्यते। तत्र स्वामिना कृतकार्ये भृत्ये एवं वर्तितव्यमित्यमु मर्थमुपदेष्टुं सुग्रीवादीनामुत्साहं वर्धयन् समाहृतसीतावृत्तान्तं हनुमन्तं रामः सत्करोति प्रथमे सर्गे–श्रुत्वेति । अत्र गायत्र्यक्षरं मकारः । यथावत्

श्रीरामचन्द्राय नमः ॥ श्रुत्वा हनुमतो वाक्यं यथावदभिभाषितम् । रामः प्रीतिसमायुक्तो वाक्यमुत्तरमब्रवीत् ॥ १ ॥
कृतं हनुमता कार्यं सुमहद्भुवि दुर्लभम् । मनसाऽपि यदन्येन न शक्यं धरणीतले ॥ २ ॥

यथावस्थितप्रकारेण । अभिभाषितम् उक्तम् । उत्तरं प्रियश्रवणोत्तरकालार्हम् ॥ १ ॥ अथ "प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः । कर्मान्ते दास भृत्याश्च न कदाचन पुत्रकाः ॥" इति वचनात्कर्मान्ते दासं स्तौति–कृतमित्यादिना। अत्र महदित्यनेन सागरतरणमुच्यते। सुमहदित्यनेन लङ्काप्रवेशः। दुर्लभमित्यनेन लङ्काधर्षणम् । मनसापि न शक्यमित्यनेन पुनर्निर्गमः । प्रथमं सागर एव न तर्तुं शक्यः । तीर्त्वापि तं लङ्का न प्रवेष्टुम् । प्रविश्यापि न धर्षयितुम्। धर्षयित्वापि न ततो निर्गन्तुमिति भावः ॥ २ ॥ रामानु०–सीतावृत्तान्तश्रवणजनितहर्षातिशयाद्भुतमदूतलक्षणवैशिष्ट्यकथनेन सुग्रीवादीनां पुरतो हनुमन्तं स्तौति–

अथ श्रीमद्युद्धकाण्डे व्याख्येयानि व्याक्रियन्ते । एवमपारं पारावारं गोवत्सपदवत्समुत्तीर्य निरातङ्कं लङ्कां प्रविश्य सीतान्वेषणपूर्वकमशोकवनभङ्गादिकर्माति मानुषं पौरुषं कृत्वा प्रतिनिवृत्तेन हनुमता प्रत्यभिज्ञानपूर्वकमभिभाषितं सीतावृत्तान्तं श्रुत्वा रामस्तदाकर्णनमुदितमनाः कृतकार्ये भृत्यजने स्वामिना एवं भवितव्यमिति सदाचारमुपदेष्टुं सुग्रीवादिहरिवीराणामुत्साहमुत्पादयितुं च समाहृतप्रेयसीवृत्तान्तं हनुमन्तमस्तौषीदित्याह–श्रुत्वेति । गायत्र्याः म इति पञ्चदशा क्षरं श्रुत्वा हनुमत इत्यस्य श्लोकस्य पञ्चमाक्षरेण म इत्यनेन संगृह्णाति । उत्तरं प्रियश्रवणोत्तरकालार्हम् ॥ १ ॥ भुवि दुर्लभं सुमहत् यत्कार्यं हनुमतः कार्यं

स०–मारुतेरीरितं श्रुत्वा राघवः श्लाघापूर्वकमन्यत्तस्मै दातुमपश्यन् स्वात्मानमेव ददावित्याह–श्रुत्वेत्यादिना । रामः हनुमतो यथावत्सम्यगभिभाषितं वचनम् अवाक्यं निश्शब्दं यथा भवति तथा श्रुत्वा उत्तरं प्रत्युत्तररूपं तत्कालोचिततयोत्तमं वाक्यमब्रवीत् ॥ १ ॥ सुमहतां महात्मनां देवानां या भूः स्वर्गादिरूपं स्थानम् तस्यामपि दुर्लभम् असाध्यं यत्कार्यं सीतासन्दर्शनरूपं तत् धरणीतले हनुमता कृतम् । अन्येन हनुमतो भिन्नेन । न शक्यम्, कर्तुमिति शेषः ॥ २ ॥

कृतमित्यादिना ॥ २ ॥ महत्त्वमुपपादयति—न हीति । गरुडवायू मिलित्वा तरेताम् । अयं त्वेक एवातरदित्यर्थः ॥ ३ ॥ सुमहत् मनसापि न शक्यमित्येत दयमप्युपपादयति—देवदानवेत्यादिना सार्द्धश्लोकेन । सत्त्वं बलम् आश्रित्य । श्वसन् जीवन् । निष्क्रमेत् निष्कामेत् । लङ्कां प्रविश्य स्वबलेन पुनर्निर्गच्छन् हनुमतोऽन्यः कोपि नास्तीत्यर्थः ॥ ४ ॥ दुर्लभत्वमुपपादयति—को विशेदिति ॥५॥ न केवलं स्वामिनियुक्तकार्यकरणेन भृत्यकार्यं निर्व्यूढमनेन,

न हि तं परिपश्यामि यस्तरेत महार्णवम् । अन्यत्र गरुडाद्वायोरन्यत्र च हनूमतः ॥३॥ देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् । अप्रधृष्यां पुरीं लङ्कां रावणेन सुरक्षिताम् । [यो वीर्यबलसम्पन्नो द्विषद्भिरनिवारितः ।] प्रविष्टः सत्त्वमाश्रित्य श्वसन् को नाम निष्क्रमेत् ॥ ४ ॥ को विशेत् सुदुराधर्षां राक्षसैश्च सुरक्षिताम् । यो वीर्यबलसम्पन्नो न समः स्याद्धनूमतः ॥ ५ ॥ भृत्यकार्यं हनुमता सुग्रीवस्य कृतं महत् । स्वयं विधाय स्वबलं सदृशं विक्रमस्य च ॥ ६ ॥ यो हि भृत्यो नियुक्तस्सन् भर्त्रा कर्मणि दुष्करे । कुर्यात्तदनुरागेण तमाहुः पुरुषोत्तमम् ॥ ७ ॥

किन्त्वनियुक्तप्रकृतकार्यानुकूलकार्यान्तरकरणेनापि महत्कार्यं संसाधितमित्याह—भृत्येति । विक्रमः अतिशक्तिः । "विक्रमस्त्वतिशक्तिता" इत्यमरः । विक्रमस्य सदृशं स्वबलम् अशोकवनिकाभङ्गादिकं पौरुषम् । स्वयम् आत्मनः स्वामिनियोगं विना विधाय । सुग्रीवस्य भृत्यकार्यं भृत्येन कर्तव्यं महत् अधिकं कृतमित्यर्थः ॥ ६ ॥ हनुमत उत्तमभृत्यत्वं दर्शयितुमुत्तममध्यमाधमभृत्यानां क्रमेण लक्षणमाह—यो हीत्यादिना । यो भृत्यः भर्त्रा स्वामिना । दुष्करे कर्मणि नियुक्तः तत् कृत्वा । अनुरागेण स्वामिभक्त्यातिशयेन । तदपेक्षितमनियुक्तमपि कार्यं कुर्यात् । तं पुरुषोत्तमम् उत्तमभृत्यम् आहुः ॥ ७ ॥ रामानु०-कुर्यात्तदनुरागेणेति पाठः । धातूनामनेकार्थत्वादत्रानुरागशब्दोऽनुबन्धवचनः । तदनुबन्धेन प्रकृतकार्यानुबन्धेन अनियुक्तमपि कार्यं यः कुर्यादित्यर्थः । भृत्यस्तु यः परं कार्यं न कुर्यादित्यधिककार्याकर्तुर्मध्यमभृत्यत्वाभिधानादेवं व्याख्यातम् । तदनुयुर्य इति पाठे यच्छब्दोऽतिरिच्यते ॥ ७ ॥

तद्धरणीतले अन्येन मनसाऽपि न शक्यम्, कर्तुमिति शेषः ॥ २ ॥ ३ ॥ देवदानवयक्षाणामित्यत्र तृतीयार्थे षष्ठी । निष्क्रमेत् निष्क्रामेत् ॥४॥ यो वीर्यबलसम्पन्नोऽपि हनुमतः समो न स्यात् स को वा लङ्कां विशेदित्यन्वयः ॥५॥ हनुमता सुग्रीवस्य महद्भृत्यकार्यं समुद्रलङ्घनलङ्काप्रवेशसीतादर्शनरूपं कृतम् । एवं विधाय इति पाठे उक्तप्रकारेण भृत्यकार्यं कृत्वा विक्रमस्य सदृशं स्वबलं च कृतम्, स्वविक्रमानुरूपम् अशोकवनभङ्गादिकं कृतमित्यर्थः ॥६॥ हनुमतो भृत्योत्तमत्वं दर्शयितुमुत्तम

स०-तरेत तरेत् । अन्यत्र अन्यम् ॥ ३ ॥ देवदानवयक्षाणामिति कर्तरि षष्ठी ॥ ४ ॥

नियुक्तो य इति । भर्त्रा नियुक्तः यो भृत्यः युक्तः उत्साहयुक्तः समर्थश्च । नृपतेः स्वामिनः प्रियं परं कार्यं स्वामिनिर्दिष्टादधिकं कार्यं न कुर्यात् त मध्यम नरं मध्यमभृत्यम् आहुः । भृत्यस्तु यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्योऽभृत्यस्समर्थोऽपि तमाहुर्मध्यमं नरम् ॥ इति पाठान्तरम् । तत्र त्वयमर्थः--यस्तु भृत्यस्समर्थोऽपि परं कार्यं न कुर्यात् उक्तमात्रमेव कुर्यात्स भृत्योऽभृत्यः उक्तानुष्ठानात् भृत्यः, अधिकाकरणादभृत्यः । ततस्तं

नियुक्तो यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्यो युक्तः समर्थश्च तमाहुर्मध्यमं नरम् ॥ ८ ॥
नियुक्तो नृपतेः कार्यं न कुर्याद्यः समाहितः । भृत्यो युक्तः समर्थश्च तमाहुः पुरुषाधमम् ॥ ९ ॥
तन्नियोगे नियुक्तेन कृतं कृत्यं हनूमता । न चात्मा लघुतां नीतः सुग्रीवश्चापि तोषितः ॥ १० ॥

मध्यममाहुरिति ॥ ८ ॥ समाहितः कार्यान्तराव्यग्रः । युक्तः समर्थश्च यो भृत्यो नियुक्तोऽपि नृपतेः कार्यं नृपतेः उक्तमात्रमपि कार्यं सम्यङ्न कुर्यात् तं पुरुषाधमम् अधमभृत्यम् आहुः ॥९॥ उक्तेषु त्रिविधभृत्येषूत्तमभृत्योऽयमित्याह–तदिति । तत् उत्तमभृत्यलक्षणलक्षितत्वात् । नियुज्यतेऽस्मिन्निति नियोगः कार्यं तस्मिन्नियुक्तेन उत्तमभृत्येन कृत्यं कर्तव्यं कार्यं हनुमता कृतम् । किंचात्मा स्वयं लघुतां न नीतः, राक्षसैरपराजितत्वात् । सुग्रीवश्चापि तोषितः उक्तकार्यातिरिक्तकार्यकरणात् ॥ १० ॥

मध्यमाधमभृत्यानां लक्षणमाह–यो हीत्यादिश्लोकत्रयेण । यो हि भृत्यो भर्त्रा दुष्करे कर्मणि नियुक्तस्तदनुरागेण नियुक्तकार्यानुकूल्येनोपलक्षितम् अनियुक्तमपि कार्यान्तरं कुर्यात् तं पुरुषोत्तममाहुः ॥ ७ ॥ यो भृत्यः नियुक्तः समर्थस्तत्रापि युक्तः उत्साही सन् नृपतेः प्रियं परं कार्यं स्वामिसन्दिष्टात्कार्यादधिकं कार्यं न कुर्यात् किन्तु नियुक्तमेव कुर्यात् तं भृत्यं मध्यममाहुः । भृत्यस्तु यः परं कार्यं न कुर्यान्नृपतेः प्रियम् । भृत्योऽभृत्यः समर्थोऽपि तमाहुर्मध्यमं नरम् ॥ इत्यपि पाठः क्वचित् । अस्यार्थः–यस्तु भृत्यः समर्थोऽपि परं कार्यं न कुर्यात्, उक्तमात्रमेव कुर्यात् सः भृत्योऽभृत्यः, उक्तानुष्ठानात् भृत्यः, मकृतकार्यानुकूलकार्यान्तराननुष्ठानादभृत्यः । ततस्तं मध्यममाहुः ॥ ८ ॥ यो भृत्यः नियुक्तोऽपि नृपतेः कार्यं न कुर्यात् नियुक्तमपि कार्यं न कुर्यादित्यर्थः ॥ ९ ॥ उत्तमोत्तमभृत्यलक्षणं हनुमति प्रदर्शयति– तन्नियोग इति । तदिति छेदः । नियोगे सीतान्वेषणमात्रे नियुक्तेन हनुमता तत् नियुक्तमपि कृत्यं कृतम् । न चात्मा लघुतां नीतः रक्षोभिरपराजितत्वात् ।

न केवलं सुग्रीवतोषणम्, धर्मपरिरक्षणं चास्माकमासीदित्याह–अहमिति। धर्मतः धर्मे। सप्तम्यर्थे तसिः। धर्मतः परिरक्षिताः धर्मे स्थापिताः। धर्मस्थापनं चात्राधर्मान्मोचनम्। यदि हनुमता सीता न दृश्येत तदाऽहं तावदात्मानं जह्याम्, ततो लक्ष्मणादयश्च। तत आत्महानिरूपोऽधर्मस्सर्वेषां स्यादिति भावः। यद्वा वैदेहीदर्शनरूपेण धर्मेण उपकारेण सर्वे वयं परिरक्षिताः निरपवादाः कृताः स्मेति भावः ॥ ११ ॥ एवं निरतिशयानन्दकरं वचनं

अहं च रघुवंशश्च लक्ष्मणश्च महाबलः। वैदेह्या दर्शनेनाद्य धर्मतः परिरक्षिताः ॥ ११ ॥
इदं तु मम दीनस्य मनो भूयः प्रकर्षति। यदिहास्य प्रियाख्यातुर्न कुर्मि सदृशं प्रियम् ॥ १२ ॥
एष सर्वस्वभूतस्तु परिष्वङ्गो हनूमतः। मया कालमिमं प्राप्य दत्तश्चास्तु महात्मनः ॥ १३ ॥

कथयतो हनुमतः तत्सदृशप्रत्युपकारालाभात् खिद्यते–इदं त्विति। प्रकर्षति व्याकुलयति सन्तापयति वा। कुर्मि करोमि ॥१२॥ स च सन्तापस्सर्वस्वदानरूपेण प्रत्युपकारेण विना न शाम्यति। तस्य सर्वस्वदानस्य मया क्रियमाणः परिष्वङ्ग एव प्रतिनिधिर्भवत्वित्याह–एष इति। तुशब्दोऽवधारणे। इमं प्रत्युपकारार्हं कालं प्राप्य मया दत्तोऽयं परिष्वङ्ग एव सर्वस्वभूतोऽस्तु, सर्वस्वदानसदृशोऽस्त्विति सम्बन्धः। एषः स्वानुभवसिद्धः, इच्छागृहीताभिमतोरुदेहत्वेन स्वस्य निरवधिकभोग्यतया स्थितः। लोके स्वस्य रस्यं हि स्वाभिमताय दिशति। सर्वस्वभूतः एतद्व्यतिरिक्तप्रदाने इदं न दत्तमिति न्यूनता स्यात्, एतत्प्रदाने तु सर्वं दत्तम्, एतद्विग्रहस्य सर्वाश्रयत्वात्। परिष्वङ्गो हनूमतः अमृताशिनो हि तृणकवलादिकं न देयम्। " स्नेहो मे

सुग्रीवश्चापि तोषितः नियुक्तकार्यानुकूलकार्यान्तरकरणादिति भावः ॥ १० ॥ अहमिति। धर्मतः। सार्वविभक्तिकस्तसिः। धर्मतः परिरक्षिताः धर्मे स्थापिताः अधर्मान्निवर्तिता इति यावत्। यदि हनुमान् वैदेहीं नाद्राक्षीत् तदाऽहं जीवितं जह्याम्, मद्वियोगासहिष्णवो लक्ष्मणादयश्च तथा कुर्युः। तथाचात्महननरूपाधर्मः सर्वेषां सम्भवेदिति भावः॥११॥एवं हनुमत्कर्म मां सुखयत्येव, किन्तु तस्य प्रत्युपकाराकरणजनितविषादः प्रेयसीवृत्तान्तश्रवणानन्दमपि तिरोधाय मां सन्तापयतीत्याह–इदं त्वित्यादिना। कुर्मि करोमि ॥ १२॥ स सन्तापः सर्वस्वदानरूपेण प्रत्युपकारेण विना न शाम्यति तस्य चेदानीमसम्भवान्मदीयः परिष्वङ्ग एव प्रतिनिधि

स०–एतत्कालोचितमिदमित्यालोच्य दत्तवान्वानरेन्द्राय राघवेन्द्र इत्याह–एष इत्यादिना। सर्वस्वभूतः सहभोगहेतुत्वात्कृतोपकारसमफलरूपः। एषः परिष्वङ्गः आलिङ्गनरूपः। इमं कालम् एतदर्शनसमयं प्राप्य। महात्मनः तस्य हनुमतो दत्तः। मया त्वया महात्मनो मम च सर्वस्वभूतः एषोपि इमम् अकाले सायुज्यसूचकस्य तस्येदानीमयोग्यत्वात्तत्कालभिन्नं कालं प्राप्यापि मया दत्त इति वा। तुशब्दस्तु राममारुत्योर्विशेषद्योतकः। अनेन कृपापारवश्यं द्योत्यते ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परमो राजन् " इत्येतद्धियहे प्रेमवतः स एव दातव्यः । मया कालमिमं प्राप्य दत्तः । अयं किञ्चिदपि मत्तोऽनपेक्षमाणो वर्त्तते । कदा मयाऽस्मै किञ्चिद्दत्तं स्यादिति सोत्कण्ठेन मया स्थितं संप्रत्यप्रतिषेधसमयलाभाद्दत्तवानस्मि । तस्य महात्मनः महास्वभावस्य, महोदारस्येत्यर्थः । देहद्वयमुपकृतवतः किमेकदेहप्रदानमुचितमिति भावः । वेण्युद्ग्रथनसमये सीतां संरक्ष्य दत्त्वा ' अवगाह्यार्णवं स्वप्स्ये ' इति दशायां रामदेहं च सीतासन्देशवचनेनाजी

इत्युक्त्वा प्रीतिहृष्टाङ्गो रामस्तं परिषस्वजे । हनूमन्तं महात्मानं कृतकार्यमुपागतम् ॥ १४ ॥ ध्यात्वा पुनरुवाचेदं वचनं रघुनन्दनः । हरीणामीश्वरस्यैव सुग्रीवस्योपशृण्वतः ॥ १५ ॥ सर्वथा सुकृतं तावत् सीतायाः परिमार्गणम् । सागरं तु समासाद्य पुनर्नष्टं मनो मम ॥ १६ ॥ कथं नाम समुद्रस्य दुष्पारस्य महाम्भसः । हरयो दक्षिणं पारं गमिष्यन्ति समाहिताः ॥ १७ ॥ यद्यप्येष तु वृत्तान्तो वैदेह्या गदितो मम । समुद्रपारगमने हरीणां किमिवोत्तरम् ॥ १८ ॥

वयद्धि । एवं देहद्वयं दत्तवतः किमेकदेहदानमुचितमिति भावः ॥ १३ ॥ रामानु०–मया कालमिमं प्राप्य दत्तश्चास्तु महात्मनः इति पाठः ॥ १३ ॥ प्रीतिहृष्टाङ्गः प्रीत्या पुलकितगात्रः । महात्मानमित्यादिविशेषणानि परिष्वङ्गहेतवः ॥ १४ ॥ एवं हनुमन्तं स्तुत्वा सागरस्य दुस्तरत्वं विचार्य विषण्णस्सन् प्रयासकृतं सीतान्वेषणं निरर्थकमिति मन्वान आह–ध्यात्वेति । एवकारो भिन्नक्रमः । ध्यात्वा दुस्तरं सागरं सर्ववानरवाहिनीसहितोऽहं कथं सन्तरिष्यामीति सञ्चिन्त्य । सुग्रीवस्योपशृण्वतः सुग्रीवे उपशृण्वत्येव । व्यत्ययेन सप्तम्यर्थे षष्ठी ॥ १५ ॥ सर्वथा सर्वप्रकारेण समुद्रतरणान्तःपुरप्रवेशादिना । सुकृतं तावत् सुष्ठु कृतमेव । परिमार्गणम् अन्वेषणम् । किंतु सागरं समासाद्य सागरस्य दुस्तरत्वमालोच्य । पुनर्नष्टं मनो मम, सीतावृत्तान्तश्रवणेन हृष्टमपि मे मनः पुनर्नष्टं प्रकृतं विषादं पुनः प्राप्तमित्यर्थः ॥ १६ ॥ विषादमेव प्रकटयति–कथमिति । दुष्पारस्य दुष्प्रापतीरस्य । " पार तीर कर्मसमाप्तौ " इत्यस्माद्धातोः खच्प्रत्ययः । महाम्भसः अगाधजलस्य । समाहिताः सङ्गताः ॥ १७ ॥ सर्वथेति श्लोकोक्तं विवृणोति–यदीति । वैदेह्याः

भवतीत्याह–एष इत्यादि ॥ १३ ॥ प्रीतिहृष्टाङ्गः प्रीत्या पुलकितगात्रः ॥ १४ ॥ ध्यात्वा सर्ववानरसहितोऽहं कथं सिन्धुं तरिष्यामीति सञ्चिन्त्येत्यर्थः । सुग्रीवस्योपशृण्वतः । सप्तम्यर्थे षष्ठी ॥ १५ ॥ सागरं तु समासाद्य, दुस्तरतामालोच्येत्यर्थः । पुनर्नष्टं मनो मम सीतावृत्तान्तश्रवणेन हृष्टं मे मनः प्रकृतविषादं पुनरपि प्राप्तमित्यर्थः ॥ १६ ॥ समाहिताः मिलिताः ॥ १७ ॥ वैदेह्या वृत्तान्तो गदितो यद्यपि गदित एव, हरीणां समुद्रपारगमने उत्तरं किम् उत्तरकालोचितं साधनं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वृत्तान्तः गदितो यद्यपि गदित एव । हरीणां समुद्रपारगमने उत्तरं किम् उत्तरकालोचितं साधकं किम् ? न किमपीत्यर्थः । इवशब्दो वाक्यालङ्कारे ॥१८॥ इत्युक्त्वेति । ध्यानमुपागमत् सागरतरणोपायचिन्तामकरोदित्यर्थः । शत्रुनिबर्हणमहाबाहुपदाभ्यां सागरशोषणादिकमेवोपायमचिन्तयदिति द्योत्यते ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने प्रथमः सर्गः ॥ १ ॥

इत्युक्त्वा शोकसम्भ्रान्तो रामः शत्रुनिबर्हणः । हनुमन्तं महाबाहुस्ततो ध्यानमुपागमत् ॥ १९ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे प्रथमः सर्गः ॥ १ ॥

तं तु शोकपरिद्यूनं रामं दशरथात्मजम् । उवाच वचनं श्रीमान् सुग्रीवः शोकनाशनम् ॥ १ ॥
किं त्वं सन्तप्यसे वीर यथाऽन्यः प्राकृतस्तथा । मैवं भूस्त्यज सन्तापं कृतघ्न इव सौहृदम् ॥ २ ॥
सन्तापस्य च ते स्थानं न हि पश्यामि राघव । प्रवृत्तावुपलब्धायां ज्ञाते च निलये रिपोः ॥ ३ ॥

एवं शोकसम्भ्रान्तं राममवलोक्य समदुःखतया तच्छोकमसहमानः सुग्रीवः “ आपद्युन्मार्गगमने कार्यकालात्ययेषु च । अपृष्टोऽपि हितान्वेषी ब्रूयात् कल्याणभाषितम् ॥ ” इति नीतिशास्त्रमनुस्मरन् शोकनिवारकं वचनमुवाचेत्याह—तं त्विति । तुशब्दः पूर्वस्माद्वैलक्षण्यपरः । तं तु शोकपरिद्यूनम् रामः प्रीतिसमायुक्त इति प्रीतियुक्तत्वदशायामेव शोकपरिद्यूनं शोकपरितप्तम् । दशरथात्मजं महाराजपुत्रत्वेन शोकलेशानर्हं रामम् । श्रीमान् “ शुचिता त्यागिता शौर्यं समानसुखदुःखता । अनुरागश्च दाक्षिण्यं सत्यता च सुहृद्गुणाः ॥ ” इति कामन्दकोक्तरीत्या मित्रगुणसम्पन्न इत्यर्थः । शोकनाशनं रामहृदयान्तर्गतशोकनिवर्तनक्षमं वचनमुवाच ॥ १ ॥ प्राकृतः क्षुद्रः । मैवं भूः प्राकृत इव मा भूः ॥ २ ॥ निमित्ताभावमुपपादयति—संतापस्य चेति । चोऽवधारणे । सन्तापस्य स्थानमेव निमित्तमेव न पश्यामि । एतावत्पर्यन्तं सीतानुपलम्भनरूपं निमित्तमासीत् इदानीं तु नास्तीत्यर्थः ।

किमित्यर्थः ॥ १८ ॥ शोकसम्भ्रान्तः विदितेऽपि सीतावृत्तान्ते तत्प्राप्तिप्रतिबन्धकसद्भावात्कलुषितान्तःकरण इत्यर्थः ॥ १९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां प्रथमः सर्गः ॥ १ ॥ तमिति । शोकपरिद्यूनं शोकपरितप्तम् ॥ १ ॥ २ ॥ चोऽवधारणे । स्थानं च निमित्त

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानम् अवकाशः । "अवकाशे स्थितौ स्थानम्" इत्यमरः । प्रवृत्तौ सीतावृत्तान्ते । "वार्ता प्रवृत्तिर्वृत्तान्तः" इत्यमरः ॥३॥ त्वद्गुणपर्यालोचनायामपि न शोकावकाश इत्याह–मतिमानित्यादिना । मतिमान् आगामिगोचरज्ञानवान् । शास्त्रवित् नीतिशास्त्रज्ञः । प्रज्ञाऽस्यास्तीति प्राज्ञः । "प्रज्ञादिभ्यश्च" इत्यण्प्रत्ययः । ऊहापोहज्ञ इत्यर्थः । पण्डा निर्णयात्मकं ज्ञानं साऽस्य सञ्जातेति पण्डितः, परिच्छेत्तेत्यर्थः । पापिकां पापयुक्ताम् । अनुत्साहकारिणीमिति यावत् । इमां बुद्धिं त्यज । कृतात्मा योगी । अर्थदूषणीं मोक्षरूपपुरुषार्थनिवर्तिकां बुद्धिमिव ॥ ४ ॥ नापि सागरदुस्तरत्वं सन्तापनिमित्त

मतिमाञ्छास्त्रवित् प्राज्ञः पण्डितश्चासि राघव । त्यजेमां पापिकां बुद्धिं कृतात्मेवार्थदूषणीम् ॥४॥ समुद्रं लङ्घयित्वा तु महानक्रसमाकुलम् । लङ्कामारोहयिष्यामो हनिष्यामश्च ते रिपुम् ॥ ५ ॥ निरुत्साहस्य दीनस्य शोकपर्याकुलात्मनः । सर्वथा व्यवसीदन्ति व्यसनं चाधिगच्छति ॥ ६ ॥ इमे शूराः समर्थाश्च सर्वे नो हरियूथपाः । त्वत्प्रियार्थं कृतोत्साहाः प्रवेष्टुमपि पावकम् ॥ ७ ॥ एषां हर्षेण जानामि तर्कश्चास्मिन् दृढो मम ॥ ८ ॥

मित्याह–समुद्रमिति । न क्रमन्त इति नक्राः गजग्राहिमत्स्याः । महानक्रसमाकीर्णमपि समुद्रं लङ्घयित्वा लङ्कामारोहयिष्यामः, सेनामिति शेषः । ते रिपुं रावणं हनिष्यामश्च, समुद्रलङ्घनलङ्कारोहणशत्रुवधार्थं न सन्तापः कार्य इत्यर्थः ॥ ५ ॥ एवं कारणाभावाच्छोकस्य नावकाश इत्युक्तम् । सत्यपि कारणे स त्याज्य इत्याह–निरुत्साहस्येति । शोकपर्याकुलात्मनः शोकव्याकुलमनसः, अत एव निरुत्साहस्य । सर्वार्थाः सर्वप्रयोजनानि । व्यवसीदन्ति नश्यन्ति । सः शोकं व्यसनं चाप्नोति । शोकादनुत्साहः, अनुत्साहाद्दैन्यम्, दैन्यादर्थनाशः, अर्थनाशाच्चापत्प्राप्यत इत्यर्थः । तस्माच्छोकस्त्याज्य इति भावः ॥ ६ ॥ नापि सहायानुपपत्तिश्शोकनिमित्तमित्याह–इम इति । शूराः पराक्रमशालिनः । समर्थाः उपायकुशलाः । नः अस्माकं सम्बन्धिनः । सर्वे इमे हरियूथपाः त्वत्प्रियार्थं पावकमपि प्रवेष्टुं कृतोत्साहाः । किमुतान्यत्कर्तुमिति भावः ॥ ७ ॥ कुत एषामुत्साहस्त्वया

मेव न पश्यामि ॥ ३ ॥ त्वदीयगुणविचारणायामपि शोकोऽनुचितस्तत्रेत्याह–मतिमानित्यादि । शास्त्रवित् नीतिशास्त्रज्ञः । मतिमान् आगामिगोचरार्थज्ञः । प्राज्ञः ऊहापोहकुशलः । पण्डितः परिच्छेत्ता अर्थतत्त्वज्ञो वा । कृतात्मा ज्ञातात्मस्वरूपो योगी । अर्थदूषणीम् अपवर्गदूषणीम् । बुद्धिमिव विषयेषूपादेयत्वबुद्धिमिव । यद्वा अर्थदूषणीं प्रयोजनहानिकरीम् । पापिकाम् अशुभात्मिकाम् । कलुषितां बुद्धिं त्यजेत्यर्थः ॥ ४ ॥ समुद्रतरणेऽपि चिन्ता न कार्येत्याह–समुद्रमिति । आरोहयिष्यामः आरोक्ष्यामः ॥ ५ ॥ शोकस्यानर्थमूलत्वं दर्शयति–निरुत्साहस्येत्यादि । व्यसनं कर्तृ ॥ ६ ॥ ७ ॥ कुतोऽयं निश्चय इत्यत्राह–एषामित्यादि । हर्षेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवगत इत्याह–एषामिति अर्धमेकं वाक्यम् । एषां यूथपानां हर्षेण मुखप्रसादानुमानेन जानामि, एषाम् उत्साहमिति शेषः । अस्मिन्नुत्साहे मम दृढः अप्रशिथिलः तर्कश्चास्ति ॥ ८ ॥ फलितमाह–विक्रमेणेति । पापकर्माणं सीताहरणरूपपापकर्मयुक्तं ते रिपुं रावणं हत्वा सीतां विक्रमेण यथा समानेष्ये तथा त्वमुत्साहं कर्तुमर्हसि ॥ ९ ॥ रामानु०–शोकाक्रान्तस्य तव दर्शनेन ममाप्युत्तरकर्तव्यं न स्फुरति । तस्माच्छोकं परित्यज्य यथा ममोत्साहो भवेत्तथा यत्नं कुर्विति भावः ॥ ९ ॥

विक्रमेण समानेष्ये सीतां हत्वा यथा रिपुम् । रावणं पापकर्माणं तथा त्वं कर्तुमर्हसि ॥ ९ ॥ सेतुरत्र यथा बद्धयेद्यथा पश्येम तां पुरीम् । तस्य राक्षसराजस्य तथा त्वं कुरु राघव ॥ १० ॥ दृष्ट्वा तां तु पुरीं लङ्कां त्रिकूटशिखरे स्थिताम् । हतं च रावणं युद्धे दर्शनादुपधारय ॥ ११ ॥ अबद्ध्वा सागरे सेतुं घोरे तु वरुणालये । लङ्का न मर्दितुं शक्या सेन्द्रैरपि सुरासुरैः ॥ १२ ॥ सेतुर्बद्धः समुद्रे च यावल्लङ्कासमीपतः । सर्वं तीर्णं च वै सैन्यं जितमित्युपधारय ॥ १३ ॥ इमे हि समरे शूरा हरयः कामरूपिणः ॥ १४ ॥ [शक्ता लङ्कां समानेतुं समुत्पाट्य सराक्षसाम् ।]

तथा त्वं कर्तुमर्हसीत्युक्तं विशिनष्टि–सेतुरिति । अत्र समुद्रे सेतुर्यथा बद्धयेत यथा तां पुरीं पश्येम तथा त्वं कुरु, तथोपायं चिन्तयेत्यर्थः ॥ १० ॥ दर्शनमात्रेण किं सेत्स्यति ? तत्राह–दृष्ट्वेति । तां पुरीं दृष्ट्वा दर्शनादेव हेतोः रावणं हतमवधारय ॥ ११ ॥ सेतुर्बध्य इति कोऽयं निर्बन्ध इत्याशङ्क्य अन्यथा अशक्यत्वमन्वयव्यतिरेकाभ्यामाह–अबद्ध्वेत्यादिश्लोकद्वयेन । अबद्ध्वा सागर इत्यादि स्पष्टम् । सेतुरिति । लङ्कासमीपतः लङ्कासमीपे । यावत् यावत्काले सेतुर्बद्धो भवति तावत्काले सर्वं सैन्यं तीर्णं जितं चेत्युपधारय । कर्तरि निष्ठा ॥ १२ ॥ १३ ॥ तरणमात्रेण जयित्वे हेतुमाह–

हर्षकार्येण मुखविकासादिना अस्मिन् एषां पावकप्रवेशाद्युत्साहे मम तर्क ऊहापोहबुद्धिः । दृढः अव्यभिचरितः । अत्र विक्रमेण रावणं हत्वा सीतां यथा समानये समानेष्यामि तथा त्वं कर्तुमर्हसीति सम्बन्धः ॥ ८ ॥ ९ ॥ अत्र समुद्रे । बध्येत बध्येत ॥ १० ॥ त्रिकूटशिखरे स्थितां लङ्कां तां पुरीं दृष्ट्वा तस्मादेव दर्शनात् रावणं हतमुपधारयेति योजना ॥ ११ ॥ सेतुबन्धनस्यावश्यकरणीयत्वं व्यतिरेकेणान्वयेन चाह–अबद्ध्वेत्यादिश्लोकद्वयेन । लङ्कासमीपतः लङ्काभमीपाभिव्याप्तसमुद्रे सेतुर्यावद् बद्धो भवति तावदेव सर्वं सैन्यं तीर्णं वै तीर्णमेव । जितमिति चावधार्यताम् । तीर्णं जितमिति कर्तरि निष्ठा । अत्रावधारणचकाराभ्यां राक्षससैन्य कृतविघ्नबाहुल्ये सत्यपि अप्रतिहतं तरिष्यति जेष्यति चेत्युक्तं भवति ॥ १२ ॥ १३ ॥ सैन्यस्य जेतृत्वोपयोगिशक्तिमाह–इमे हीति । अस्योत्तरार्धं–शक्ता लङ्कां समानेतुं

स०–यथा रिपुं हत्वा सीतां विक्रमेण पराक्रमेण । वेः गरुडस्य क्रम इव क्रमस्तेन समानेष्ये । तथेत्युत्साहं कर्तुमर्हसि । यथाऽहं समानेष्ये तथा त्वमुत्साहं मम प्रोत्साहनं कर्तुमर्हसीति वा ॥ ९ ॥

॥ ४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इमे हीति । अर्धमेकं वाक्यम् ॥ १४ ॥ उपसंहरति–तदिति । तत् उक्तरीत्या शोकनिमित्तासम्भवात् । विक्लवा शोकपरवशा । अत एव सर्वार्थ नाशिनी बुद्धिः । अलं मा भूत् । "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्" इत्यमरः । तत्र हेतुमाह--पुरुषस्येति । शौर्यापकर्षणः शौर्यनाशनः ॥ १५ ॥

रामानु०--शोकस्यानर्थकारित्वप्रदर्शनेन प्रसक्तं शोकं निवारयति–तदलमित्यादिना ॥ १५ ॥ न केवलं शोकत्यागः सत्त्वावलम्बनं च कार्यमित्याह–यत्त्विति । शौण्डीर्यं

तदलं विक्लवा बुद्धी राजन् सर्वार्थनाशिनी । पुरुषस्य हि लोकेऽस्मिन् शोकः शौर्यापकर्षणः ॥ १५ ॥ यत्तु कार्यं मनुष्येण शौण्डीर्यमवलम्बता । अस्मिन् काले महाप्राज्ञ सत्त्वमातिष्ठ तेजसा ॥ १६ ॥ शूराणां हि मनुष्याणां त्वद्विधानां महात्मनाम् । विनष्टे वा प्रनष्टे वा शोकः सर्वार्थनाशनः ॥ १७ ॥ त्वं तु बुद्धिमतां श्रेष्ठः सर्वशास्त्रार्थ कोविदः । मद्विधैः सचिवैः सार्धमरिं जेतुमिहार्हसि ॥ १८॥ न हि पश्याम्यहं कंचित्त्रिषु लोकेषु राघव । गृहीतधनुषो यस्ते तिष्ठेदभिमुखो रणे ॥ १९॥ वानरेषु समासक्तं न ते कार्यं विपत्स्यते । अचिराद्द्रक्ष्यसे सीतां तीर्त्वा सागरमक्षयम् ॥ २० ॥ तदलं शोकमालम्ब्य क्रोधमालम्ब भूपते । निश्चेष्टाः क्षत्रिया मन्दाः सर्वे चण्डस्य बिभ्यति ॥ २१ ॥

शौर्यम् । " शौण्डी गर्वे " इति धातोरौणादिके ईरन्प्रत्यये शौण्डीरश्शूरः अस्य भावश्शौण्डीर्यं तत् अवलम्बता अवलम्बमानेन । शौर्यप्रधानेने त्यर्थः । मनुष्येण पुरुषेण । यत्कार्यं सम्पाद्यं तत्सत्त्वं धैर्यम् बलं वा । तेजसा पराक्रमेण सह अस्मिन्काले आतिष्ठ अवलम्बस्व ॥ १६ ॥ ननु नायं शोकस्सागरतरणादिनिमित्तकः किंतु सीतानवलोकनादिनिमित्त इत्यत्राह--शूराणामिति । विनष्टे अन्तर्हिते । "णश अदर्शने" इति धातोर्निष्ठा ॥१७॥ पुनश्च रामं प्रोत्साहयति--त्वमिति । इह इदानीम् ॥ १८ ॥ न हि तिष्ठेत् स्थातुं न शक्नुयात् ॥ १९ ॥ वानरेषु समासक्तं वानरमूलमित्यर्थः । न विपत्स्यते न विनङ्क्ष्यति ॥ २० ॥ उपसंहरति--तदिति । आलम्ब्यालम् नालम्बस्वेत्यर्थः । "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः ।

समुत्पाट्य सराक्षसाम् इति॥१४॥ उक्तमर्थमुपसंहरति--तदलमिति । विक्लवा बुद्धिरलं माऽस्तु । रामस्य हृदयस्थशोकं निराकर्तुमुक्तमेवार्थं पुनरप्याह पुरुषस्येति॥१५॥ शौण्डीर्यं शौर्यम् अवलम्बता मनुष्येण पुरुषेण यत्सत्त्वं यद्धैर्यं तदातिष्ठेत्यन्वयः ॥ १६ ॥ विनष्टे तिरोहिते । प्रनष्टे प्रध्वस्ते वा, वस्तुनि विषये ॥ १७ ॥ १८ ॥ त्वच्छौर्यपर्यालोचनयाऽपि शोको न कार्यं इत्याह्–न हीति । तिष्ठेत् स्थातुं शक्नुयात् ॥ १९ ॥ न विपत्स्यते न विनङ्क्ष्यति ॥२० ॥ शोकमालम्ब्यालं नालम्बस्व ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कोपस्यालम्ब्यत्वे हेतुमाह–निश्चेष्टा इति । निश्चेष्टाः निरुद्योगाः क्षत्रियाः मन्दाः मन्दभाग्याः । चण्डस्य चण्डात् । "चण्डस्त्वत्यन्तकोपनः" इत्यमरः ॥ २१ ॥ एवं सेतुबन्धेन सर्वार्थसिद्धेः शोको न कार्य इत्युक्त्वा सेतुबन्धोपायो विचार्यतामित्याह–लङ्घनार्थमिति । लङ्घनार्थं लङ्घनहेतुम् । "अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धनुश्शास्त्रे वस्तुहेतुनिवृत्तिषु ॥" इति वैजयन्ती ॥२२॥ सेतुबन्धोपाये निर्णीते ततः परं सुकरमित्याह–

लङ्घनार्थं च घोरस्य समुद्रस्य नदीपतेः । सहास्माभिरिहोपेतः सूक्ष्मबुद्धिर्विचारय ॥ २२ ॥ सर्वं तीर्णं च मे सैन्यं जितमित्युपधारय ॥ २३ ॥ इमे हि हरयः शूराः समरे कामरूपिणः । तानरीन् विधमिष्यन्ति शिलापादपवृष्टिभिः ॥ २४ ॥ कथंचित् सन्तरिष्यामस्ते वयं वरुणालयम् । हतमित्येव तं मन्ये युद्धे समितिनन्दन ॥ २५ ॥ किमुक्त्वा बहुधा चापि सर्वथा विजयी भवान् । निमित्तानि च पश्यामि मनो मे संप्रहृष्यति ॥ २६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्वितीयः सर्गः ॥ २ ॥

सर्वमिति । अर्धमेकं वाक्यम् ॥ २३ ॥ उक्तेऽर्थे पूर्वोक्तं हेतुमनुवदति–इमे हीति । विधमिष्यन्ति धक्ष्यन्ति ॥ २४ ॥ मा भूत्सेतुबन्धः प्रकारान्तरेणापि समुद्रं तीर्त्वा शत्रून् हनिष्यामीत्याह–कथंचिदिति । कथंचित् केनाप्युपायेन । नन्दतीति नन्दनः । नन्द्यादित्वात् ल्युः । समित्यां युद्धे नन्दन युद्धोत्सुकेति यावत् ॥ २५ ॥ निमित्तानुसारेणापि भवतो जयसिद्धिरित्याह–किमुक्त्वेति । सर्वथा सेतुं बद्ध्वा अबद्ध्वा वा । निमित्तानि नेत्रस्फुरणादीनि । मनो मे संप्रहृष्यतीति । मनःसंप्रहर्षश्च कार्यसिद्धिनिमित्तमिति भावः॥२६॥ इति श्रीगोवि० श्रीरामा० रत्नकिरीटा० युद्धकाण्डव्याख्याने द्वितीयः सर्गः॥२॥

क्रोधालम्बने हेतुमाह निश्चेष्टा इति । निश्चेष्टाः निरुद्योगाः क्षत्रियाः । मन्दा मन्दभाग्याः । सर्वे जनाः चण्डस्य चण्डात् अतिकोपनात् बिभ्यति ॥ २१ ॥ तदुक्तप्रकारेण वा प्रकारान्तरेण वा सागरतरणे हेतुं विचारयेत्याह–लङ्घनार्थमित्यादि । लङ्घनार्थं लङ्घनहेतुम् । "अर्थः स्याद्विषये मोक्षे वस्तुहेतुनिवृत्तिषु" इति वैजयन्ती ॥ २२ ॥ सर्वमित्यर्धमेकं वाक्यम् । अत्र यावत्तावच्छब्दावध्याहार्यौ । जितमिति भावे निष्ठा । मे सैन्यं यावत्तीर्णं तावत्तेन जितमित्युपधारय । लङ्घिते तस्य तैस्सैन्यम् इति क्वचित्पाठः । तस्यार्थः–समुद्रे लङ्घिते तैर्वानरैः तस्य रावणस्य सैन्यं जितमित्युपधारयेत्यर्थः ॥२३॥ जेतृत्वशक्तिमाह–इमे हीत्यादि ॥२४॥ कथञ्चित्सन्तरिष्यामः येनकेनाप्युपायेनेत्यर्थः ॥ २५ ॥ निमित्तमेवाह मन इति ॥ २६ ॥ इति श्रीमहेश्वर० श्रीरामायण० युद्धकाण्डव्याख्यायां द्वितीयः सर्गः ॥ २ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं मानुषभावनानुसारेण समुद्रस्य दुस्तरत्वेन शोकापन्नोऽपि सुहृदुपदेशेन प्रतिपन्नधैर्यो रामः नीतिशास्त्रानुसारेण संहार्यशत्रुदुर्गस्वरूपशोधनाय पृच्छति–सुग्रीवस्येत्यादिना । सारग्राहित्वमाह परमार्थविदिति । हेतुमत् युक्तियुक्तम् । वचः श्रुत्वा प्रतिजग्राह ॥ १ ॥ तपसा तपःप्रभावेन । तरसेति पाठे तरसा वेगेन । लङ्घने तरणे ॥ २॥ एवमुपायचिन्तनेन समुद्रस्य दुस्तरत्वमविगणय्य दुर्गस्वरूपं पृच्छति--कतीति । दुर्गायाः दुष्प्रापायाः लङ्कायाः कति

सुग्रीवस्य वचः श्रुत्वा हेतुमत् परमार्थवित् । प्रतिजग्राह काकुत्स्थो हनुमन्तमथाब्रवीत् ॥ १ ॥ तपसा सेतुबन्धेन सागरोच्छोषणेन वा । सर्वथा सुसमर्थोऽस्मि सागरस्यास्य लङ्घने ॥ २ ॥ कति दुर्गाणि दुर्गाया लङ्काया ब्रूहि तानि मे । ज्ञातुमिच्छामि तत्सर्वं दर्शनादिव वानर ॥ ३ ॥ बलस्य परिमाणं च द्वारदुर्गक्रियामपि । गुप्तिकर्म च लङ्कायां रक्षसां सदनानि च ॥ ४ ॥ यथासुखं यथावच्च लङ्कायामसि दृष्टवान् । सर्वमाचक्ष्व तत्त्वेन सर्वथा कुशलो ह्यसि ॥५॥ श्रुत्वा रामस्य वचनं हनूमान् मारुतात्मजः । वाक्यं वाक्यविदां श्रेष्ठो रामं पुनरथाब्रवीत् ॥ ६ ॥

दुर्गाणि कति दुर्गप्राकाराः सन्तीत्यर्थः । जलगिरिवनस्थलात्मकानि दुर्गाणि। तत् दुर्गविशेषवत्त्वं मे ब्रूहि । पूर्वमेवोक्तमित्यत्राह ज्ञातुमिति । तत्पूर्वं श्रुतं सर्वम् । दर्शनादिव प्रत्यक्षत इव । विशदं ज्ञातुमिच्छामि । बलस्य सेनायाः । परिमाणम् इयत्ताम् । द्वारदुर्गक्रियां द्वारेषु दुर्गक्रियाम् कीलखनन जलौघप्लवनकरणादिभिः दुर्गमत्वकरणम् । गुप्तिकर्म प्राकारपरिखादिनिर्माणम् । सदनानि गृहाणि । ज्ञातुमिच्छामीति पूर्वेणान्वयः ॥३॥ ४ ॥ यथेति । यथासुखं निश्शङ्कम् । यथावत्तत्त्वेन । लङ्कायां पूर्वोक्तं सर्वं दृष्टवानसि । तत्त्वेन दृष्टप्रकारेणैव आचक्ष्व व्यक्तं वद । सर्वथा द्रष्टुं वक्तुं च ॥ ५॥ अथाब्रवीत्

॥ १ ॥ २ ॥ कतीत्यादि । दुर्गाया गन्तुमशक्यायाः लङ्कायाः कति दुर्गाणि जलगिरिवनस्थलात्मकेषु दुर्गेषु कति दुर्गप्राकाराः तानित्यर्थः । ब्रूहि तानीति सम्यक् । दर्शनादिव प्रत्यक्षत इव । बलस्येत्यादि । परिमाणमियत्ताम् । द्वारदुर्गक्रियां द्वारेषु दुर्गक्रियाम् कीलखननपरिघयन्त्रविशेषकरणादिकाम् । गुप्तिकर्म प्राकाराट्टालकादि निर्माणम् ॥ ३ ॥ ४ ॥ यथासुखं विस्रब्धम्, निश्शङ्कमिति यावत् । यथा येन प्रकारेण सर्वथा कुशलोऽसि, वक्तुं द्रष्टुं चेति शेषः ॥ ५ ॥ ६ ॥

स०–परमार्थवत् परमार्थः अवतारमुख्यार्थः रावणमारणादिः तद्वत् । तद्दृष्टकमिति यावत् ॥ १ ॥ ति०–तपसा नरःकार्यसङ्कल्पसिद्ध्या, अत एव सकलजगत्पुरवर्तिप्राणिनां सकलोकनयनं वक्ष्यमाणं सन्नुच्छते । सेतुबन्धेन गङ्गायां गाङ्गेयेन शरैरिव । सागरोच्छोषणेन, दिव्यास्त्रबलेनः इति शेषः ॥ २ ॥

For Private And Personal Use Only

कार्त्स्न्येनाब्रवीत् । "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः ॥ ६ ॥ दुर्गकर्मविधानतः दुर्गकर्म प्राकारपरिखाखननादि, तद्विधानतः तन्निर्माणेन गुप्तेति सम्बन्धः । राक्षसाः स्निग्धाः स्वामिनि भक्ताः । तेजसा, संपादितामिति शेषः । विभागं तत्र तत्र विभज्य स्थापनम् । बलौ

श्रूयतां सर्वमाख्यास्ये दुर्गकर्मविधानतः । गुप्ता पुरी यथा लङ्का रक्षिता च यथा बलैः ॥७॥ राक्षसाश्च यथा स्निग्धा रावणस्य च तेजसा । परां समृद्धिं लङ्कायाः सागरस्य च भीमताम् । विभागं च बलौघस्य निर्देशं वाहनस्य च ॥ ८ ॥ एवमुक्त्वा कपिश्रेष्ठः कथयामास तत्त्वतः ॥ ९ ॥ हृष्टप्रमुदिता लङ्का मत्तद्विपसमाकुला । महती रथसम्पूर्णा रक्षोगणसमाकुला । वाजिभिश्च सुसम्पूर्णा सा पुरी दुर्गमा परैः ॥ १० ॥ दृढबद्धकवाटानि महापरिघवन्ति च । द्वाराणि विपुलान्यस्याश्चत्वारि सुमहान्ति च ॥ ११ ॥ तत्रेषूपलयन्त्राणि बलवन्ति महान्ति च । आगतं परसैन्यं तु तत्र तैः प्रतिहन्यते ॥ १२ ॥ द्वारेषु संस्कृता भीमाः कालायसमयाः शिताः । शतशो रचिता वीरैः शतघ्न्यो रक्षसां गणैः ॥ १३ ॥

घस्य चतुरङ्गबलसमूहस्य । निर्दिश्यते इयत्तया परिच्छिद्यतेऽनेनेति निर्देशः सङ्ख्या ताम् ॥ ७॥ ८ ॥ एवमित्यर्धम् । एवमुक्त्वा उक्तरीत्या वक्ष्यमाणं संग्रहेण प्रतिज्ञाय ॥ ९ ॥ हृष्टप्रमुदिता अत्यन्तहृष्टजना ॥१०॥ दृढेति । आयसकीलादिभिर्दृढघटितकवाटानि । महापरिघवन्ति महार्गलवन्ति । "अर्गले काचके वंशे योगे प्राकारगोपुरे । अस्त्रे घटे मुद्गरे च परिघः परिपठ्यते" इति निघण्टुः । सुमहान्ति उन्नतानि ॥ ११ ॥ तत्र तेषु द्वारेषु । इषूपलयन्त्राणि शरशिलाक्षेपकयन्त्राणि । बलवन्ति दृढानि । महान्ति विपुलानि, सन्तीति शेषः । तैः यन्त्रैः तत्र द्वारेषु प्रतिहन्यते प्रतिबध्यते ॥१२॥ संस्कृताः

दुर्गकर्मविधानतः लङ्का यथा गुप्तेति सम्बन्धः ॥ ७ ॥ तेजसा, सम्पादितामिति शेषः । विभागमिति । बलौघस्य चतुरङ्गबलसमूहस्य विभागं हस्त्यश्वाद्यवान्तरभेदं तत्र तत्र विभज्य स्थापनम् । निर्देशं निर्दिश्यते इयत्तया अनेनेति निर्देशः सङ्ख्या ताम् ॥ ८ ॥९॥ हृष्टप्रमुदिता मुदितोद्धतराक्षसेत्यर्थः ॥१०॥ महापरिघवन्ति महार्गलवन्ति । "परिघो योगभेदे स्यान्मुद्गरेऽर्गलघातयोः" इति विश्वः । द्वाराणि, सन्तीति शेषः ॥ ११ ॥ तत्र तेषु इषूपलयन्त्राणि बाणशिलामोचनयन्त्राणि ॥ १२ ॥ द्वारेषु द्वारप्रदेशेषु । संस्कृताः सज्जीकृताः । कालायसमयाः अयस्सारमयाः । शतघ्नी नाम सकृत्प्रयोगाच्छतमारकाः चतुर्वितस्ति ॥ ९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सज्जीकृताः । शिताः तीक्ष्णाः । कालायसमया अयस्सारमयाः । ङीबभाव आर्षः । " अनोऽश्मायस्सरसां जातिसंज्ञयोः " इति समासान्तः । शतं घ्नन्तीति शतघ्न्यः मुद्गरविशेषाः । " अमनुष्यकर्तृके च " इति ठक् । शतशः बहुशः । रचिताः स्थापिताः ॥ १३ ॥ सौवर्ण इति । तस्याः प्राकारो

सौवर्णश्च महांस्तस्याः प्राकारो दुष्प्रधर्षणः । मणिविद्रुमवैडूर्यमुक्ताविरचितान्तरः ॥ १४ ॥
सर्वतश्च महाभीमाः शीततोयवहाः शुभाः । अगाधा ग्राहवत्यश्च परिखा मीनसेविताः ॥ १५ ॥
द्वारेषु तासां चत्वारः सङ्क्रमाः परमायताः । यन्त्रैरुपेता बहुभिर्महद्भिर्गृहपंक्तिभिः ॥ १६ ॥
त्रायन्ते सङ्क्रमास्तत्र परसैन्यागमे सति । यन्त्रैस्तैरवकीर्यन्ते परिखासु समन्ततः ॥ १७ ॥
एकस्त्वकम्प्यो बलवान् सङ्क्रमः सुमहादृढः । काञ्चनैर्बहुभिस्स्तम्भैर्वेदिकाभिश्च शोभितः ॥ १८ ॥

दुष्प्रधर्षणः, दुरारोह इत्यर्थः । मणयः पद्मरागाः ॥ १४ ॥ सर्वतः प्राकारमभितः । परिखाः, सन्तीति शेषः । शीततोयत्वेन दुष्प्रवेशत्वमुक्तम् ॥ १५ ॥ द्वारेषु द्वारसमीपप्रदेशेषु । सामीप्ये सप्तमी । तासां परिखाणां सम्बन्धिनः परिखोपरिक्लृप्ता इत्यर्थः । संक्रमाः दारुफलकानिर्मितसञ्चारमार्गाः । " संक्रमः क्रमणे सम्यक् द्वारसञ्चारयन्त्रके " इति विश्वः । परमायताः अतिविपुलाः । यन्त्रैरिति । यन्त्रैः संक्रमावकीर्यकैः । महद्भिरिति यन्त्रविशेषणम् । गृह पङ्क्तिभिः रक्षिजनावासस्थानपङ्क्तिभिः । उपेताः, सन्तीति शेषः ॥ १६ ॥ संक्रमाणामुपयोगमाह--त्रायन्त इति । तत्र द्वारप्रदेशेषु । परसैन्यागमे सति संकमाः त्रायन्ते, पुरीमिति शेषः । कथमित्यत्राह यन्त्रैरिति । यन्त्रैः संक्रमफलकविक्षेपयन्त्रैः । परिखासु परिखोपरि । समन्ततः अवकीर्यन्ते क्षिप्यन्ते । सर्वथा परिखाजलोपरि फलका निक्षिप्यन्ते । शत्रुसैन्यागमे तु ता उत्क्षिप्यन्ते । तेन दुर्गपरिखाजलेन प्राकारसमीपगमनं न शक्यत इति श्लोकतात्पर्यम् ॥ १७ ॥ एक इति । तेषु संक्रमेषु । एकः उत्तरद्वारस्थः । बलवान् स्थौल्यवान् । सुमहादृढः अत्यन्तवृद्धसङ्घटनः । अत एवाकम्प्यः । स्तम्भैः

प्रमाणा मुद्गरविशेषाः । " शतघ्नी च चतुर्हस्ता कथिता लोहकण्टकी " इति वैजयन्ती ॥ १३-१५ ॥ द्वारेषु द्वारप्रदेशेषु तासां संक्रमाः परिखाणां सम्बन्धिनः संक्रमाः, सन्तीति शेषः । संक्रमो नाम पुरद्वारप्रदेशेषु परिखोपरि सञ्चरणार्थं मञ्चरूपेण बद्धो मार्गविशेषः । " संक्रमः क्रमणे सम्यग्द्वारसञ्चारयन्त्रके " इति विश्वः ॥ १६ ॥ संक्रमाणामुपयोगमाह—त्रायन्त इति । तत्र तेषु द्वारप्रदेशेषु परसैन्यागमे सति तानि परसैन्यानि तैः स्वनिष्ठैर्यन्त्रैः परिखासु समन्ततः अवकीर्यन्ते

For Private And Personal Use Only

संक्रमाधारार्थं परिखासु स्थापितैः स्तम्भैः वेदिकाभिः रक्षिजनाधाराथाभिर्वितर्दिकाभिः ॥ १८ ॥ प्रकृतिसम्पन्नः द्यूतादिव्यसनरूपविचाररहितः। अप्रमत्तः सावधानः। बलानां सैन्यानाम्। अनुदर्शने प्रतिदिनमवलोकननिमित्तम्। उत्थितः जागरूकः। स्वयं युयुत्सुः सर्वदा युद्धोद्यतः, तिष्ठतीति शेषः ॥ १९ ॥ लङ्का पुनः लङ्का नु. निरालम्बा टङ्कच्छेदमसृणीकृतत्रिकूटशिखरस्थितत्वादारोहणालम्बनरहिता। देवदुर्गा देवैरपि दुष्प्रापा। लङ्का

स्वयं प्रकृतिसम्पन्नो युयुत्सू राम रावणः। उत्थितश्चाप्रमत्तश्च बलानामनुदर्शने ॥ १९ ॥ लङ्का पुनर्निरालम्बा देवदुर्गा भयावहा। नादेयं पार्वतं वान्यं कृत्रिमं च चतुर्विधम् ॥ २० ॥ स्थिता पारे समुद्रस्य दूरपारस्य राघव। नौपथोऽपि च नास्त्यत्र निरादेशश्च सर्वतः ॥ २१ ॥ शैलाग्रे रचिता दुर्गा सा पूर्देवपुरोपमा। वाजिवारणसम्पूर्णा लङ्का परमदुर्जया ॥ २२ ॥ परिखाश्च शतघ्न्यश्च यन्त्राणि विविधानि च। शोभयन्ति पुरीं लङ्कां रावणस्य दुरात्मनः ॥ २३ ॥

नादेयादिरूपेण चतुर्विधं दुर्गं च चतुर्विधदुर्गप्राकारवतीत्यर्थः। नादेयं नद्यां भवम्, जलदुर्गमित्यर्थः। पार्वतं पर्वतस्थम्। वनानां समूहो वन्या तत्स म्बन्धि वान्यम्। कृत्रिमं क्रियया निर्वृत्तम्। प्राकारपरिखादिमत् स्थलमित्यक्षरार्थः ॥ २० ॥ दूरं पारं यस्य सः दूरपारः तस्य, विशालस्येत्यर्थः। पारे दक्षिणतीरे स्थिता। अत्र समुद्रे। नौपथः नौसञ्चारश्च नास्ति। अत एव सर्वतः निरादेशश्च, आदेशो वार्तासञ्चारः तद्रहितः अयं देश इत्यर्थः ॥ २१ ॥ वनगिरिदुर्गवत्त्वमाह--शैलाग्र इति ॥ २२ ॥ कृत्रिमदुर्गवत्त्वमाह--परिखा इति ॥ २३ ॥

क्षिप्यन्ते, ततस्त्रायन्ते पुरीं रक्षन्तीत्यर्थः। यद्वा तैर्यन्त्रैः परिखासु समन्ततः अवकीर्यन्ते। परेषां परिखामुखेन प्राकारसमीपप्राप्तिनिवारणार्थं शिलादयो विक्षिप्यन्ते अतस्तत्र द्वारेषु संक्रमास्त्रायन्ते, पुरीं रक्षन्तीत्यर्थः ॥ १७ ॥ १८ ॥ प्रकृतिमापन्नः स्वभावस्थः अक्षोभ्यान्तःकरण इत्यर्थः। उत्थितः जागरूकः। अप्रमत्तः प्रमादरहितः, सावधान इत्यर्थः। यदा रावणो युयुत्सुर्भवति तदा तस्मिन् संक्रमे सेनादर्शनार्थं तिष्ठतीति भावः ॥ १९ ॥ निरालम्बा अतिश्लक्ष्णोत्तुङ्गत्रिकूटस्थितत्वादारोहणालम्बनरहितेत्यर्थः। देवदुर्गा देवैरपि दुष्प्रापा। चतुर्विधदुर्गमत्रास्तीत्याह--नादेयमिति ॥ २० ॥ दूरपारस्य दूरस्थितपरतीरस्य समुद्रस्य पारे स्थिता। नौपथश्चापि नास्ति नौसञ्चारमार्गोऽपि नास्ति, अत एव सर्वशो निरादेशश्च सर्वदिग्वार्तासञ्चाररहितप्रदेश इत्यर्थः। अनेन जलदुर्गवत्त्वं सूचितम् ॥ २१ ॥ शैलाग्रे रचितेत्यनेन वनगिरिदुर्गवत्त्वं सूचितं भवति ॥ २२ ॥ परिखाश्चेत्यादिना कृत्रिमदुर्गवत्त्वं सूच्यते ॥ २३ ॥

स०--निरालम्बा अम्बरलम्बिनीति निरालम्बेव निरालम्बा नितरां दृढा इति यावत्। आलम्बः पर्वतशिखरादिरूप आश्रयो यस्याः सा। देवदुर्गा देवानामपि दुस्साधगमना। निरालम्बादेव प्रतीयमाना ऽऽश्रयाभावादेव दुर्गेति वा। दुर्गो दुष्प्रा गतिमार्गो दुःखं प्राप्यो वा तत्प्रापकत्वहेति वा ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभागं च बलौघस्येति रामप्रश्नस्योत्तरमाह--अयुतमिति । अत्र लङ्कायां सर्वे पूर्वद्वारस्थाः । अयुतं दशसहस्रम् । अग्रे सेनाग्रे युद्ध्यन्त इत्यग्रयोधिनः । खड्गैरग्रयोधिनः सर्वे अयुतसङ्ख्याकाः । सर्वेऽपि तथाविधा इत्यर्थः ॥२४॥ नियुतमिति । अत्र लङ्कायाम् । चतुरङ्गेण सैन्येन सह रक्षसां नियुतं दक्षिणद्वारमाश्रितम् । तत्र चतुरङ्गबलेषु । योधाः पदातयः । अनुत्तमाः अत्यन्तशूराः । भवन्तीत्यर्थः ॥ २५ ॥ सर्वे पश्चिमद्वारवासिनः । सर्वास्त्रकोविदाः

अयुतं रक्षसामत्र पूर्वद्वारं समाश्रितम् । शूलहस्ता दुराधर्षा सर्वे खड्गाग्रयोधिनः ॥ २४ ॥ नियुतं रक्षसामत्र दक्षिणद्वारमाश्रितम् । चतुरङ्गेण सैन्येन योधास्तत्राप्यनुत्तमाः ॥ २५ ॥ प्रयुतं रक्षसामत्र पश्चिमद्वारमाश्रितम् । चर्मखड्गधराः सर्वे तथा सर्वास्त्रकोविदाः ॥ २६ ॥ न्यर्बुदं रक्षसामत्र उत्तरद्वारमाश्रितम् । रथिनश्चाश्ववाहाश्च कुलपुत्राः सुपूजिताः ॥ २७ ॥ शतशोऽथ सहस्राणि मध्यमं स्कन्धमाश्रिताः । यातुधाना दुराधर्षाः साग्रकोटिश्च रक्षसाम् ॥ २८ ॥ ते मया सङ्क्रमा भग्नाः परिखाश्चावपूरिताः । दग्धा च नगरी लङ्का प्राकाराश्चावसादिताः ॥२९॥ बलैकदेशः क्षपितो राक्षसानां महात्मनाम् ॥ ३० ॥

समस्तास्त्रज्ञाः ॥२६ ॥ अश्ववाहाश्चेति चकारेण गजवाहास्समुच्चीयन्ते । कुलपुत्राः सत्कुलप्रसूताः, विश्वसनीया इति यावत् । सुपूजिताः रावणेन बहुमताः, किङ्करा इति शेषः ॥२७॥ रामानु०–कुलपुत्राः कुलोद्भूताः पुत्राः । सत्कुलप्रसूता इत्यर्थः ॥ २७ ॥ अथेति कार्त्स्न्ये । शतशः सहस्राणि अनेकसहस्राणि । दुराधर्षाः यातुधानाः राक्षसाः । मध्यमं स्कन्धं नगरमध्यमस्थानम् आश्रिताः। सर्वसङ्ख्यामाह–साग्रेति । रक्षसां साग्रकोटिः पूर्णकोटिः । अत्र लङ्कायाम्, अस्तीति शेषः ॥ २८ ॥ एवं दुर्गप्राकारवर्णनेन लघूनां भीतिर्मा भूदिति स्वकृतं दर्शयति–ते मयेति । परिखा इत्यादावपि तच्छब्दोऽनुसन्धेयः ॥२९॥ बलैकदेश इत्यर्धमेकान्वयम् । बलैकदेशः, सेनाचतुर्थांश इत्यर्थः । महात्मनां महाकायानाम् ॥ ३० ॥

खड्गाग्रयोधिनः खड्गैरग्रयोधिनः ॥ २४ ॥ नियुतमिति । अत्र सैन्येनेति इत्थम्भूतलक्षणे तृतीया । चतुरङ्गसैन्यप्रकारेण योधा इत्यर्थः ॥ २५ ॥ २६ ॥ कुलपुत्राः किङ्कराः । यद्वा कुले जाताः पुत्राः किङ्कराः, सत्कुलप्रसूताः इत्यर्थः ॥ २७ ॥ स्कन्धं सैन्यस्थानम् ॥ २८ ॥ यद्येवं दुर्गा लङ्का कथमस्मद्बलसाध्येति शङ्कां निराचष्टे–ते मयेति । ते संक्रमाः परिखामार्गा मया भग्नाः । परिखाश्चावपूरिताः, शिलेष्टकादिभिरिति शेषः ॥ २९ ॥ महात्मनां महाधृतीनाम् ॥ ३० ॥

For Private And Personal Use Only

तपसा सेतुबन्धेनेत्येवं रामोक्तमेव सम्यगित्याह–येनेति । मार्गेण उपायेन । तराम तरिष्यामः । व्यत्ययेन लोट् । वरुणालयं समुद्रम् ॥ ३१ ॥ पक्षान्तरमाह–अङ्गद इत्यादिसार्द्धश्लोकद्वयेन । अङ्गदादयः प्लवमानाः समुद्रं लङ्घितवन्तः । सखातां सपरिखाम् । सप्रतोरणां सबहिर्द्वाराम् । आनयिष्यन्ति, बलशेषेण किम् उक्ताङ्गदादिव्यतिरिक्तबलशेषेण किं प्रयोजनमिति योजना ॥ ३२ ॥ ३३ ॥ एवमिति । सर्वसंग्रहम् संगृह्यत इति

येन केन च मार्गेण तराम वरुणालयम् । हतेति नगरी लङ्का वानरैरवधार्यताम् ॥ ३१ ॥ अङ्गदो द्विविदो मैन्दो जाम्बवान् पनसो नलः । नीलः सेनापतिश्चैव बलशेषेण किं तव ॥ ३२ ॥ प्लवमाना हि गत्वा तां रावणस्य महापुरीम् । सपर्वतवनां भित्त्वा सखातां सप्रतोरणाम् । सप्राकारां सभवनामानयिष्यन्ति राघव ॥ ३३ ॥ एवमाज्ञापय क्षिप्रं बलानां सर्वसंग्रहम् । मुहूर्तेन तु युक्तेन प्रस्थानमभिरोचय ॥ ३४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे तृतीयः सर्गः ॥ ३ ॥

श्रुत्वा हनुमतो वाक्यं यथावदनुपूर्वशः । ततोऽब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ १ ॥

यां निवेदयसे लङ्कां पुरीं भीमस्य रक्षसः । क्षिप्रमेनां मथिष्यामि सत्यमेतद् ब्रवीमि ते ॥ २ ॥

संग्रहः, बलानां मध्ये सर्वसारभूतं बलम् अङ्गदादिकम् आज्ञापय । एवं प्लवमाना इत्याद्युक्तरीत्या आज्ञापयेत्यर्थः । युक्तेन यात्रायोग्येन ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने तृतीयः सर्गः ॥ ३ ॥ एवं लङ्काया दुर्गकर्मबलपरिमाणादौ हनुमता कथिते रामः कियन्मात्रमिदमिति न्यक्कृत्य तदानीमेव दण्डयात्रामाज्ञापयति–श्रुत्वेति । महातेजाः महाबलः । सत्यपराक्रमः अमोघविक्रमः । आभ्यां निर्भयत्वे हेतुरुक्तः । अब्रवीत्, सुग्रीवमिति शेषः ॥ १ ॥ यामिति । निवेदयसे हनुमन्मुखेन निवेदयासि । मथिष्यामि शरैर्ध्वंसयिष्यामि ॥ २ ॥

मार्गेण उपायेन तराम तरिष्यामः ॥ ३१ ॥ सर्वसैन्यतरणोपायचिन्तया किम् ? कतिपययूथपा एव समुद्रं लङ्घयित्वा पर्वतवनादिविशिष्टां लङ्कामुत्पाट्यानेष्यन्तीत्याह–अङ्गद इत्यादिना । आनयिष्यन्ति आनेष्यन्ति बलशेषेण किं तवेत्यन्वयः ॥ ३२ ॥ ३३ ॥ बलानां सर्वसंग्रहं सङ्गृह्यत इति सङ्ग्रहः सारः सर्वसारभूतमाज्ञापय, बलानां मध्ये सर्वसारभूतानेवं कुरुतेत्याज्ञापयेत्यर्थः ॥ ३४ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां तृतीयः सर्गः ॥ ३ ॥ ॥ १ ॥ हनुमतोक्तमङ्गदादिमुखेन कार्यनिर्वहणमङ्गीकुर्वन्नाह–यामिति ॥ २ ॥ ॥ ८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुत इत्यत्राह—युक्त इति । युक्तः यात्रार्हः । तत्र हेतुः । विजयः विजयावहः । विजयावहत्वे हेतुमाह दिवाकरः । मध्यं दिने मध्यं प्राप्तः । अभिजिन्मुहूर्त इत्यर्थः । तदुक्तं विद्यामाधवीये—"आर्द्रोरगमित्रमखावभुजलविश्वाभिजिद्विधिरिन्द्रेन्द्राः । ऐन्द्राग्निमूलवरुणार्यमभगतारा दिवा मुहूर्ताः स्युः" इति । नन्वभिजिन्मुहूर्ता दक्षिणयात्रासु निषिद्धाः । यथा ज्योतिष्करत्नाकरे—"भुक्तो दक्षिणयात्रायां प्रतिष्ठायां द्विजन्मनि । आधाने च ध्वजारोहे मृत्युदः स्यात्सदाऽभिजित् ॥" इति । उच्यते—लङ्का हि दक्षिणपूर्वस्यां किष्किन्धायाः, अतो नेयं दक्षिणयात्रेति नोक्तदोषः ॥ ३ ॥ मुहूर्तविशेषे प्रयाणस्य फलं

अस्मिन् मुहूर्ते सुग्रीव प्रयाणमभिरोचये । युक्तो मुहूर्तो विजयः प्राप्तो मध्यं दिवाकरः ॥ ३ ॥ अस्मिन् मुहूर्ते विजये प्राप्ते मध्यं दिवाकरे । सीतां हृत्वा तु मे जातु क्वासौ यास्यति यास्यतः ॥ ४ ॥ सीता श्रुत्वाऽभियानं मे आशामेष्यति जीविते । जीवितान्तेऽमृतं स्पृष्ट्वा पीत्वा विषमिवातुरः ॥ ५ ॥

दर्शयति—अस्मिन्निति । दिवाकरे मध्यं प्राप्ते विजयाख्ये अस्मिन्मुहूर्ते यास्यतो मे यास्यति मयि । असौ रावणः । सीतां हृत्वा जातु कदाचित् क्व यास्यति, यत्र कुत्रापि यान्तं तं हनिष्यामीत्यर्थः । सीतां हृत्वा तु मे यात्विति पाठे यातु राक्षसः । "नैर्ऋतो यातुरक्षसी" इत्यमरः । यद्वा यातु गच्छतु । क्व यास्यतीत्यन्वयः ॥ ४ ॥ अद्यैव सागरतरणोपायचिन्तां विना निर्गमस्य फलमाह—सीतेति । मे अभियानं प्रस्थानं सीता श्रुत्वा जीविते आशामेष्यति । श्रवणं च त्रिजटादिभ्य इति ज्ञेयम् । निर्गमं विना केवलं विचाराकुलेष्वस्मासु जीविते सा निराशा स्यादिति भावः । कथमिव ? विषं पीत्वा आतुरः पीडितः पुरुषः जीवितान्ते प्राणात्यये प्राप्ते अमृतं स्पृष्ट्वेव ॥ ५ ॥

अस्मिन्नेव मुहूर्ते प्रयाणमभिरोचय । कुतः ? युक्त इति । यतो दिवाकरो मध्यं मध्यन्दिनं प्राप्तः अतो मुहूर्तो विजयावहः अभिजित्संज्ञको युक्तः प्राप्तः ॥ ३ ॥ तत्र प्रयाणस्य फलमाह—अस्मिन्निति । अस्मिन्मुहूर्ते यास्यतो मे मयि यात्रां कुर्वति सति, असौ रावणः सीतां हृत्वा जातु क्व यास्यति कदाचिदपि कुत्रापि न यास्यतीत्यर्थः ॥ ४ ॥ तदानीमेव यात्रायाः फलमाह—सीतेति । आतुरो व्याधितः जीवितान्ते जीवितान्तसमये । अमृतं स्पृष्ट्वेत्यन्वयः ॥ ५ ॥

स०—राजत्वात्सुग्रीवं कटाक्षीकृत्याह—**अस्मिन्निति** । अस्मिन् अभिजिन्नामके मुहूर्ते प्रयाणमितोऽस्मन्निर्गममभिरोचये । अभिरोचयेति पाठे—अनुमोदस्वेत्यर्थः । सुग्रीवप्रयाणमित्यैकपद्येन हनुमदाभिमुख्येन वचनमित्यङ्गीकारे "अभिप्रयाम सुग्रीव सर्वानीकसमावृताः" इत्यग्रिमग्रन्थानानुगुण्यं स्फुटम् । मध्यं नभोमध्यम् । दिवाकरो यतः प्राप्तः तस्मात् विजये विजयप्रदे मुहूर्ते । युक्तः, निर्गम इति शेषः । युक्तो मुहूर्तो विजयः इति प्रथमान्तपाठः स्फुटार्थः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तर्हि कदाऽस्माभिः प्रस्थातव्यम् ? तत्राह–उत्तरेति । अद्य दिने उत्तराफल्गुनीनक्षत्रं वर्तते । श्वः उत्तरदिने हस्तेन योक्ष्यते, चन्द्र इति शेषः । हस्तो रामस्य निधनतारा । उत्तराफल्गुनी तु साधनतारा । अतोऽद्यैव सर्वानीकसमावृतास्सन्तः अभिप्रयाम गच्छेम । अत्रोत्तराफल्गुनीत्यनेन स दिवसः फाल्गुन पौर्णमासीत्यवगम्यते । इदमुत्तरत्र प्रतिपादयिष्यते ॥६॥ यानि निमित्तानि धन्यानि तानि प्रादुर्भवन्ति । अतो रावणं निहत्य सीतामानयिष्यामि । जानकीमिति विशेषणेन जनकप्रीत्यर्थं चावश्यं सा अनेतव्येति यज्यते ॥ ७ ॥ उपरिष्टादुपरि स्फुरमाणमिदं मम नयनम् । मनोरथं मनोरथविषयभूतं जयम् ।

उत्तराफल्गुनी ह्यद्य श्वस्तु हस्तेन योक्ष्यते । अभिप्रयाम सुग्रीव सर्वानीकसमावृताः ॥ ६ ॥ निमित्तानि च धन्यानि यानि प्रादुर्भवन्ति च । निहत्य रावणं सीतामानयिष्यामि जानकीम् ॥७॥ उपरिष्टाद्धि नयनं स्फुरमाणमिदं मम । विजयं समनुप्राप्तं शंसतीव मनोरथम् ॥ ८ ॥ ततो वानरराजेन लक्ष्मणेन च पूजितः । उवाच रामो धर्मात्मा पुनरप्यर्थकोविदः ॥ ९ ॥ अग्रे यातु बलस्यास्य नीलो मार्गमवेक्षितुम् । वृतः शतसहस्रेण वानराणां तरस्विनाम् ॥ १० ॥ फलमूलवता नील शीतकाननवारिणा । पथा मधुमता चाशु सेनां सेनापते नय ॥ ११ ॥ दूषयेयुर्दुरात्मानः पथि मूलफलोदकम् । राक्षसाः परिरक्षेथास्तेभ्यस्त्वं नित्यमुद्यतः ॥ १२ ॥

समनुप्राप्तं सम्यक् समीपे प्राप्तम् । शंसतीव स्पष्टं बोधयतीत्यर्थः । तथोक्तं जोतिःशास्त्रे–"नेत्रस्याधः स्फुरणमसकृत्सङ्गरे भङ्गहेतुर्नेत्रोपान्ते हरति नयनं नेत्रमूले च मृत्युः । नेत्रस्योर्ध्वे हरति सकलं मानसं दुःखजातं वामे चैवं फलमविकलं दक्षिणे वैपरीत्यम्॥" इति । एवं वचने विद्यमाने दक्षिणनयनमिति व्याख्यानं चिन्त्यम् ॥ ८ ॥ पूजितः युक्तमिति श्लाघितः । अर्थकोविदः नीतिशास्त्रनिपुणः ॥ ९ ॥ नीतिशास्त्रमनुस्मरन् सेनासंविधानं दर्शयति–अग्र इति । स्पष्टम् ॥ १० ॥ मार्गमवेक्षितुं यात्विति सुग्रीवं प्रत्युक्तमात्रेण सन्निहितं नीलं प्रत्याह–फलेति ॥ ११ ॥ मार्गशोधनप्रकारमाह–दूषयेयुरिति ।

पुनर्वसौ जातस्य मम श्वस्तु नैधनतारा, अद्य साधनतारा, अतोऽद्यैव प्रयाणं कर्तव्यमित्याशयेनाह–उत्तरेत्यादि । हस्तेन योक्ष्यते, चन्द्रमा इति शेषः ॥ ६ ॥ यानि निमित्तानि धन्यानि शुभसूचकानि तानि प्रादुर्भवन्ति अतो रावणं निहत्य सीतामानयिष्यामि आनेष्यामीति सम्बन्धः ॥ ७ ॥ नयनम्, दक्षिणमिति शेषः । मनोरथं मनोरथविषयम् ॥ ८–११ ॥ दूषयेयुः, विषादिनेति शेषः । मूलफलोदकमित्येकवद्भावः । परिरक्षेथाः रक्षेः ॥ १२ ॥

For Private And Personal Use Only

दूषयेयुः, विषादिनेति शेषः। परिरक्षेथा इत्यात्मनेपदमार्षम्। उद्यतः सावधान इत्यर्थः ॥ १२ ॥ शोधनान्तरमाह—निम्नेष्विति। निम्नेषु गर्तप्रदेशेषु। वनदुर्गेषु वनैः जलैः दुर्गेषु दुर्गमप्रदेशेषु। "जीवनं भुवनं वनम्" इत्यमरः। वनेषु काननेषु च। निहितं रन्ध्रे प्रहारार्थं स्थापितम्। बलं परसैन्यम्। वनौकसः वानराः। अभिप्लुत्य अभित उत्प्लुत्य पश्येयुः ॥ १३ ॥ शोधनान्तरमाह—यदिति। यत्किंचिद्बलं फल्गु असारम् तत् अत्रैव किष्किन्धाया

निम्नेषु वनदुर्गेषु वनेषु च वनौकसः। अभिप्लुत्याभिपश्येयुः परेषां निहितं बलम् ॥ १३ ॥ यच्च फल्गु बलं किंचित् तदत्रैवोपयुज्यताम्। एतद्धि कृत्यं घोरं नो विक्रमेण प्रयुध्यताम् ॥ १४ ॥ सागरौघनिभं भीममग्रानीकं महाबलाः। कपिसिंहाः प्रकर्षन्तु शतशोऽथ सहस्रशः ॥ १५ ॥ गजश्च गिरिसङ्काशो गवयश्च महाबलः। गवाक्षश्चाग्रतो यान्तु गवां दृप्ता इवर्षभाः ॥ १६ ॥ यातु वानरवाहिन्या वानरः प्लवतां वरः। पालयन् दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १७ ॥ गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः। यातु वानरवाहिन्याः सव्यं पार्श्वमधिष्ठितः ॥ १८ ॥

मेव उपयुज्यतां स्थाप्यताम्। किंचिदित्यनेन तादृशं बलमत्र दुर्लभमिति सूचितम्। अत्र युक्तिं वक्ति एतदिति। एतत् घोरं कृत्यं विक्रमेण प्रयुध्यताम्। आर्षः शतृप्रत्ययः। विक्रमेण शक्त्या ये युध्यन्ते तेषामेव नान्येषामित्यर्थः। विक्रमेणोपयुज्यतामिति पाठे विक्रमेणोपयुज्यमानानाम्, विक्रमयुक्तानामित्यर्थः। क्रियापदत्वे संप्रधारणायां लोट् वेदितव्यः ॥ १४ ॥ अथ "यतश्च बलमाशङ्की ततो विस्तारयेद्बलम्" इत्युक्तरीत्या बहवो बलिनोऽग्रे सेनां कर्षन्त्वित्याह—सागरेति। सागरौघनिभं सागरस्य प्रवाहो यदि भवेत्तत्तुल्यमित्यर्थः। शतशोऽथ सहस्रशः शतशस्सहस्रशश्च सङ्घीभूये त्यर्थः ॥ १५ ॥ "अथ सेनाबलाध्यक्षौ सर्वदिक्षु निवेशयेत्" इत्युक्तरीत्या निवेशयति—गज इति। गवामिति गवामग्रे दृप्ताः वृषभा इवेति संबन्धः ॥ १६ ॥ यात्विति। दक्षिणं पश्चिमपार्श्वमित्यर्थः। "यतश्च भयमाशङ्कि तां प्राचीं परिकल्पयेत्" इति कामन्दकोक्तेः। प्लवतां वानराणाम् ॥ १७ ॥ गन्धेति।

निम्नादिषु निहितं रन्ध्रे प्रहारार्थं लीनम् ॥१३॥ फल्गु बलं निस्सारं सैन्यम्। अत्रैवोपयुज्यतां किष्किन्धायामेव स्थाप्यताम्। अत्र हेतुमाह एतदिति। घोरं भयावहं नः एतद्युद्धरूपं कृत्यम्। विक्रमेण प्रयुज्यतां विक्रमेण प्रयुज्यमानानाम्, विक्रमेण युक्तानामिति नान्येषामित्यर्थः। विक्रमेण प्रयुध्यतामिति पाठे विक्रमेण शक्त्या ये युद्ध्यन्ते तेषामेव एतद्युद्धरूपं कृत्यं नान्येषामित्यर्थः ॥ १४–१७ ॥ गन्धेति। यस्य मदगन्धादितरे हस्तिनो द्रवन्ति स गन्धहस्ती ॥ १८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गन्धहस्ती मत्तगजः । तरस्वी बलवान् । सव्यं प्राचीभागम् । अधिष्ठितः अधिष्ठाता । कर्तरि क्तः ॥ १८ ॥ यास्यामीति । मध्यगमनप्रयो जनमाह अभिहर्षयन्निति । 'प्रहर्षयेद्बलं व्यूह्य' इत्युक्तेः । ईश्वरः इन्द्रः, तथैवौचित्यात् । गवां पतिमिवेश्वर इति वा पाठः ॥ १९ ॥ अङ्गदेनेति । अङ्गदेन संयातु अङ्गदमारुह्य संयात्वित्यर्थः । सार्वभौमेन उत्तरदिग्गजेन । भूतेशः यक्षेशः । द्रविणाधिपतिः धनाधिपतिः । अत्र त्वं च शिबिका

यास्यामि बलमध्येऽहं बलौघमभिहर्षयन् । अधिरुह्य हनूमन्तमैरावतमिवेश्वरः ॥ १९ ॥ अङ्गदेनैष संयातु लक्ष्मण श्चान्तकोपमः । सार्वभौमेन भूतेशो द्रविणाधिपतिर्यथा ॥ २० ॥ जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः । ऋक्ष राजो महासत्त्वः कुक्षिं रक्षन्तु ते त्रयः ॥ २१ ॥ राघवस्य वचः श्रुत्वा सुग्रीवो वाहिनीपतिः । व्यादिदेश महा वीर्यान् वानरान् वानरर्षभः ॥ २२ ॥ ते वानरगणाः सर्वे समुत्पत्य युयुत्सवः । गुहाभ्यः शिखरेभ्यश्च आशु पुप्लुविरे तदा ॥ २३ ॥ ततो वानरराजेन लक्ष्मणेन च पूजितः । जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥ २४ ॥ शतैः शतसहस्रैश्च कोटीभिरयुतैरपि । वारणाभैश्च हरिभिर्ययौ परिवृतस्तदा ॥ २५ ॥ तं यान्तमनुयाति स्म महती हरिवाहिनी ॥ २६ ॥ हृष्टाः प्रमुदिताः सर्वे सुग्रीवेणाभिपालिताः । आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः । क्ष्वेलन्तो निनदन्तस्ते जग्मुर्वै दक्षिणां दिशम् ॥ २७ ॥

मारुह्य आवाभ्यामागच्छेति सिद्धम् ॥ २० ॥ जाम्बवानिति । ऋक्षराजः जाम्बवद्भ्राता । कुक्षिं पश्चाद्भागम् । जाम्बवान् सुषेणः वेगदर्शी चेति त्रयः महासत्त्वः ऋक्षराजश्च कुक्षिं रक्षन्त्वित्यन्वयः ॥ २१ ॥ राघवस्येति । व्यादिदेश रामोक्तं सर्वं कुरुतेत्याज्ञापयामास ॥ २२ ॥ त इति । पुप्लुविरे प्लुत गतिं चक्रिरे ॥ २३ ॥ तत इति । पूजितः पुरस्कृत इत्यर्थः । धर्मात्मा नीतिरूपधर्मज्ञ इत्यर्थः ॥ २४ ॥ शतैरिति । ययौ, राम इति शेषः ॥ २५ ॥ तमिति । हरिवाहिनी पूर्वोक्तबलवानरभिन्ना ॥ २६ ॥ गच्छतामवस्थाविशेषान् दर्शयति—हृष्टाः इत्यादिना । हृष्टा गर्विताः । आप्लवन्तः मण्डलाकारं

ईश्वरः इन्द्रः ॥ १९ ॥ सार्वभौमेन उत्तरदिग्गजेन । भूतेशो यक्षेशः ॥ २० ॥ जाम्बवानित्यस्य विशेषणम् ऋक्षराज इति ॥२१--२५॥ तं यान्तमित्यर्धमेकं वाक्यम् ॥२६॥ आप्लवन्तः आ समन्तात् प्लवमानाः, दूरं पतन्त इत्यर्थः । प्लवन्तः केवलं लङ्घयन्तः । क्ष्वेलन्तः सिंहनादान् कुर्वन्तः । "क्ष्वेला तु सिंहनादः स्यात्" इति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रमन्त इत्यर्थः। गर्जन्तः मेघध्वनिं कुर्वन्तः। घनगर्जितमिति प्रसिद्धिः। क्ष्वेलन्तः सिंहनादं कुर्वन्तः। "क्ष्वेला तु सिंहनादः स्यात्" इत्यमरः। निनदन्तः अव्यक्तं शब्दायमानाः "णद अव्यक्ते शब्दे" इति धातुः ॥ २७ ॥ भक्षयन्तः पिबन्तः। उद्वहन्तः विलासार्थं हस्ते धारयन्तः ॥ २८ ॥ अन्योन्य मिति। सहसा तरसा। निर्वहन्ति उद्वहन्ति। क्षिपन्ति पातयन्ति। अन्ये पतन्तः सन्तः। परान् पातयितॄन्। आक्षिपन्ति प्रतीकारकरणासामर्थ्येन

भक्षयन्तः सुगन्धीनि मधूनि च फलानि च। उद्वहन्तो महावृक्षान् मञ्जरीपुञ्जधारिणः ॥ २८ ॥ अन्योन्यं सहसा दृप्ता निर्वहन्ति क्षिपन्ति च। पततश्चाक्षिपन्त्यन्ये पातयन्त्यपरे परान् ॥२९॥ रावणो नो निहन्तव्यः सर्वे च रजनीचराः। इति गर्जन्ति हरयो राघवस्य समीपतः ॥३०॥ पुरस्तादृषभो वीरो नीलः कुमुद एव च। पन्थानं शोधयन्ति स्म वानरैर्बहुभिः सह ॥ ३१ ॥ मध्ये तु राजा सुग्रीवो रामो लक्ष्मण एव च। बहुभिर्बलिभिर्भीमैर्वृताः शत्रुनिवर्हणाः ॥ ३२ ॥ हरिः शतवलिर्वीरः कोटीभिर्दशभिर्वृतः। सर्वामेको ह्यवष्टभ्य ररक्ष हरिवाहिनीम् ॥ ३३ ॥ कोटीशतपरीवारः केसरी पनसो गजः। अर्कश्चातिबलः पार्श्वमेकं तस्याभिरक्षति ॥ ३४ ॥

परिभाषणं कुर्वन्तीत्यर्थः। अपरे शक्ताः। परान् पातयितॄन् पातयन्ति ॥ २९ ॥ रावण इति। नः अस्माभिरित्यर्थः ॥ ३० ॥ पुरस्तादिति। अत्र पूर्वं रामेण मार्गरक्षणाय ये नीलादयो नियुक्ताः ततोऽन्ये कुमुदादयस्तु रामभक्त्युत्साहेन स्वयमेव प्रवृत्ता इति ज्ञेयम्। ऋषभो दक्षिणपार्श्वरक्षणाय नियुक्तो भक्त्या पराक्रमातिशयेन च अत्रापि रक्षणं कृतवानिति ज्ञेयम् ॥ ३१ ॥ मध्ये त्विति। जग्मुरिति शेषः ॥ ३२ ॥ अवष्टभ्य अधिष्ठाय ॥३३॥ गजस्याग्रभागनियुक्तस्यापि पार्श्वरक्षणं भक्त्यतिशयात्। अत्र कार्यकरणात्केसर्यादयश्च पूर्वं नियुक्ता एवेत्याहुः। अत्र पूर्वनियुक्तानां गन्धमादनादीना

निघण्टुः ॥ २७ ॥ उद्वहन्तः जग्मुरित्यन्वयः ॥ २८ ॥ सहसा बलेन निर्वहन्ति उद्वहन्ति ॥ २९ ॥ ३० ॥ पुरस्तादित्यत्र मार्गशोधकत्वेन कुमुदऋषभयोरप्युपादानात प्रागपि नीलेन सहैतावपि मार्गशोधने नियुक्ताविति मन्तव्यम्। अत्र ऋषभशब्देन दक्षिणपार्श्वनियुक्तादृषभादन्य उच्यते ॥ ३१ ॥ मध्य इति। बहुभिर्वृताः, जग्मुरिति शेषः ॥ ३२ ॥ ३३ ॥ गजः पूर्वभागनियुक्तादन्यः। पार्श्वमेकं पश्चाद्भागम् ऋषभगन्धमादनयोः पूर्वमेव दक्षिणसव्यपार्श्वयोर्विनियोगात। तस्य बलस्य। अभि

For Private And Personal Use Only

मप्युपलक्षणम् । एकं पार्श्वं सव्यं पार्श्वम् । अभिरक्षतीत्यस्य प्रत्येकमभिसम्बन्धः । व्यत्ययेन लट् ॥ ३४ ॥ ऋक्षैरावृतत्वं जाम्बवत एव । तत्सं बन्धात् सुषेणस्यापि । जघनं पश्चाद्भागम् ॥ ३५ ॥ संपतन् । मार्गशोधनाय पुरो गच्छन्नपि पर्यपालयत् सेनापतित्वात् सर्वतो ररक्षेत्यर्थः ॥ ३६ ॥

सुषेणो जाम्बवांश्चैव ऋक्षैश्च बहुभिर्वृतौ । सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुः ॥ ३५ ॥ तेषां सेनापतिर्वीरो नीलो वानरपुङ्गवः । सम्पतन् पततां श्रेष्ठस्तद्बलं पर्यपालयत् ॥ ३६ ॥ दरीमुखः प्रजङ्घश्च रम्भोऽथ रभसः कपिः । सर्वतश्च ययुर्वीरास्त्वरयन्तः प्लवङ्गमान् ॥३७॥ एवं ते हरिशार्दूला गच्छन्तो बलदर्पिताः । अपश्यंस्ते गिरिश्रेष्ठं सह्यं द्रुमलतायुतम् । सरांसि च सुफुल्लानि तटाकानि वनानि च ॥ ३८ ॥ रामस्य शासनं ज्ञात्वा भीमकोपस्य भीतवत् । वर्जयन्नगराभ्याशांस्तथा जनपदानपि ॥३९॥ सागरौघनिभं भीमं तद्वानरबलं महत् । उत्ससर्प महाघोषं भीमघोष इवार्णवः ॥ ४० ॥ तस्य दाशरथेः पार्श्वे शूरास्ते कपिकुञ्जराः । तूर्णमापुप्लुवुः सर्वे सदश्वा इव चोदिताः ॥ ४१ ॥ कपिभ्यामुह्यमानौ तौ शुशुभाते नरोत्तमौ । महद्भ्यामिव संस्पृष्टौ ग्रहाभ्यां चन्द्रभास्करौ ॥ ४२ ॥

दरीमुख इति । स्पष्टम् ॥३७॥ अपश्यन्, दूरादिति शेषः । सुफुल्लानि सुफुल्लपद्मकह्लाराणि ॥३८॥ भीतवत् भीतम् । कर्तरि क्त(वतु)प्रत्ययः । वर्जयत् दूरतः परिहरत् उत्ससर्प जगामेति सम्बन्धः । सागरौघनिभमिति विपुलतायां साम्यम् । भीमघोष इवार्णव इति घोषे ॥ ३९ ॥ ४० ॥ दाशरथेः पार्श्वे इति । तन्मुखोल्लासायेति भावः ॥ ४१ ॥ हनुमदङ्गदाभ्यामुह्यमानौ रामलक्ष्मणौ । महाग्रहाभ्यां शुक्रबृहस्पतिभ्याम् । संस्पृष्टौ संयुक्तौ । चन्द्रसूर्यौ

रक्षति अभ्यरक्षत ॥ ३४ ॥ सुषेण इत्यादि । जाम्बवदादीनां पूर्वं कुक्षिरक्षणे नियुक्तत्वात् सुग्रीवं पुरतः कृत्वा जघनं संररक्षतुरित्यस्य सुग्रीवस्य पृष्ठतः कुक्षिं पश्चिमभागं ररक्षतुरित्यर्थः ॥ ३५ ॥ नीलः पुरोमार्गशोधकस्सन्नपि प्लवनवेगातिशयवत्तया परितः सर्वतो ररक्षेत्यर्थः ॥ ३६ ॥ ३७ ॥ एवमित्यादिसार्धश्लोक मेकं वाक्यम् ॥ ३८ ॥ भीतवत् भीतार्हम् ॥ ३९–४१ ॥ महाभ्यां राहुकेतुभ्याम् ॥ ४२ ॥ ४३ ॥

स०–महाभ्यां शुक्रबृहस्पतिभ्याम् । " कविकाव्ययुतज्योत्स्नाकान्तवत् स व्यरोचत । " इत्युक्तेः । लक्ष्मणपक्षे चन्द्रो निदर्शनम् । रामपक्षे भास्करः । ततश्च कविकाव्याभ्यां सकान्तिश्चन्द्र इव वाहनसाहित्येन सकान्तिर्लक्ष्मणः । सूर्यप्रकाशाभिभूतप्रकाशस्तयोरिव रामप्रकाशाभिभवो वाहनयोरिति निदर्शनविवेको द्रष्टव्यः ॥ ४२ ॥

For Private And Personal Use Only

विव शुशुभाते । अत्र उपमाने चतुर्ग्रहसंयोगस्य बहुजनविनाशहेतुत्वात् हनुमदङ्गदाभ्यां रामलक्ष्मणयोगस्य महासेनाविनाशकत्वं गम्यत इत्यलङ्कारेण वस्तुध्वनिः । संस्पृष्टपदेन हनुमदङ्गदयोर्लाघवातिशयकथनात् पदगतवस्तुना वस्तुध्वनिः ॥ ४२ ॥ रामाङ्गु०-प्रह्वाभ्यां चन्द्रभास्कराविति पाठः ॥ ४२ ॥ पुनः सुदूरगमनसूचनायाह—तत इति । स्पष्टम् ॥ ४३ ॥ परिपूर्णार्थः परिपूर्णमनोरथः । स्मृतिमान् निमित्तशास्त्रार्थस्मरणवान् । प्रतिभानवान् तात्का

ततो वानरराजेन लक्ष्मणेन च पूजितः । जगाम रामो धर्मात्मा ससैन्यो दक्षिणां दिशम् ॥ ४३ ॥ तमङ्गदगतो रामं लक्ष्मणः शुभया गिरा । उवाच परिपूर्णार्थः स्मृतिमान् प्रतिभानवान् ॥ ४४ ॥ हृतामवाप्य वैदेहीं क्षिप्रं हत्वा च रावणम् । समृद्धार्थस्समृद्धार्थामयोध्यां प्रतियास्यसि ॥ ४५ ॥ महान्ति च निमित्तानि दिवि भूमौ च राघव । शुभानि तव पश्यामि सर्वाण्येवार्थसिद्धये ॥४६॥ अनुवाति शुभो वायुः सेनां मृदुहितः सुखः । पूर्णवल्गुस्वराश्चेमे प्रवदन्ति मृगद्विजाः॥४७॥ प्रसन्नाश्च दिशः सर्वा विमलश्च दिवाकरः । उशनाश्च प्रसन्नार्चिरनु त्वां भार्गवो गतः॥४८॥

लिकबुद्धिमान् ॥ ४४ ॥ वक्ष्यमाणनिमित्तश्रवणे श्रद्धामुत्पादयितुं प्रथमं तत्फलं दर्शयति—हृतामिति । रावणं हत्वा वैदेहीमवाप्स्यसीति क्रमः ॥ ४५॥ कुतोऽयं निश्चय इत्यत्राह—महान्तीति । महान्ति दुर्लभानि । दिवि भूमौ च यानि शुभानि निमित्तानि सर्वाणि तवार्थसिद्धये पश्यामि, अर्थसिद्धिकराणि पश्यामीत्यर्थः ॥ ४६॥ अनुवातीति । सुखः सुखकरः, शीत इत्यर्थः । मृदुहितः मृदुः मार्दवयुक्तः, हितः अनुकूल इत्यर्थः । शुभः भाविशुभसूचकः वायुः सेनाम् अनुवाति अनुसृत्य वाति । पूर्णवल्गुस्वराः अन्यूनापरुषस्वराः सन्तः प्रवदन्ति ॥ ४७ ॥ भौमनिमित्तान्युक्त्वा दिव्यनिमित्तान्याह—प्रसन्ना इत्यादि । त्वामनुगतः तवानुकूलदिशि स्थित इत्यर्थः । यद्वा अनुगतः पश्चाद्भागं गतः । पुरः शुक्रस्य यात्रासु प्रतिषेधादिति भावः । तथोक्तम् ज्यौतिषे—"प्रतिशुक्रं प्रतिबुधं प्रतिभौमं गतो नृपः । अपि शक्रेण सदृशो हतसैन्यो निवर्तते ॥" इति । उशनाश्च प्रसन्नार्चिरनु त्वां भार्गवो गतः

स्मृतिमान् अनुभूतार्थाविस्मरणशीलः । प्रतिभानवान् तत्कालोचितप्रज्ञः ॥ ४४ ॥ ४५ ॥ कुतोऽयं निश्चय इत्यत्राह—महान्तीति । तवार्थसिद्धये कार्यसिद्धये ॥४६॥ निमित्तान्येवाह—अनुवातीति । शिवः शुभसूचकः । अध्वश्रान्तिहरणात् हितश्च । सुखः सुखस्पर्शो वायुः मृदु मन्दं यथा तथा सेनामनुवाति अनुसृत्य वाति । मृदुहितसुखपदैः क्रमेण शैत्यमान्द्यसौरभ्याण्युच्यन्ते ॥४७॥ भौमानि निमित्तान्युक्त्वा दिव्यान्याह—प्रसन्न इत्यादि । उत्तरश्लोकप्रथमपादोऽप्युशनसो विशेषणम्॥४८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यनेनावतारकाले जातकफलसूचनवद्रामस्यानुकूलं गोचारफलं दर्शयति विपरीतफलं राक्षसानां च । तथाहि–किष्किन्धातः आग्नेयदिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्यानुकूलः शुक इत्युच्यते । सूर्यस्यराशेः पुरोराशिस्थो हि भवति शुकः । सूर्यश्च तदानीं मीनस्थः । उत्तराफल्गुनी ह्यद्येति प्रयाणदिन कथनात् फाल्गुनपौर्णमास्यां हि रामस्य दण्डयात्रेति पूर्वमुक्तम् । तदाच शुको मेषस्थः । अतो रामस्य कर्कटराशेर्मेषो हि दशमोऽनुकूलः । पूर्वोक्त दिग्वर्तिनीं लङ्कां प्रति गच्छतो रामस्य पश्चात् स्थितत्वाच्च शुकोऽनुकूल एव । शुकानुकूल्योक्तिर्बृहस्पत्याद्यानुकूल्योपलक्षणम् । स ह्यवतारकाले कर्कट कस्थः । तदपेक्षयाऽष्टात्रिंशद्वर्षयुद्धयात्राकालः । तथा च त्रिरावृत्त्या षट्त्रिंशद्वर्षेषु गतेषु रामस्याष्टात्रिंशद्वर्षे युद्धारम्भे गुरोः सिंहस्थितिः सिद्धा । गुरु द्वितीयता रामस्यानुकूला । शनिश्चावतारकाले तुलावर्गोत्तमस्थः । द्वितीयावृत्तौ तुलावृश्चिकयोः पञ्चवर्षेण गतयोः सार्द्धवर्षद्वयेनातीतेन धनुरतीत्य तदानीं

ब्रह्मराशिर्विशुद्धश्च शुद्धाश्च परमर्षयः । अर्चिष्मन्तः प्रकाशन्ते ध्रुवं सर्वे प्रदक्षिणम् ॥ ४९ ॥

मकरस्थितियोग्योऽपि कथंचिद्धनुर्वर्गोत्तमस्थ एव शनिः । राहुस्तु अवतारकाले सिंहस्थः । ततोऽष्टात्रिंशद्वर्षेऽस्मिन् कटकस्थितियोग्योप्यतिचारादिभि र्मिथुनस्थः । तत्सप्तमे धनुषि केतुः । उक्तं चात्रापि–"मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना" इति । धूमाकारः केतुर्धूमकेतुः । तथाच धनुषि शनि केतू रामस्य षष्ठस्थावनुकूलौ । अङ्गारकस्तु रामरावणयुद्धप्रसङ्गे "आक्रम्याङ्गारकस्तस्थौ विशाखे अपि चाम्बरे" इत्युक्त्या विशाखाचतुर्थपादे वृश्चिक राशौ तिष्ठति । रामस्य पञ्चमाङ्गारकत्वफलमिदम्, यदेतद्ब्रह्मास्त्रबन्धरुधिरमांहादि । बुधस्य प्रतिमासं रोहिणीस्थत्वयोगेऽपि रामरावणयुद्धप्रसङ्गे–"प्राजा
४ पत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥" इत्युक्तं प्रजानामशुभावहत्वमतिचारवशादेव । स च रामस्य दशमस्थोऽनुकूलः । चन्द्रश्च उत्तराफल्गुनीस्थत्वात् कन्यास्थः । अतस्तृतीयचन्द्रो रामस्यानुकूलः । सूर्यो नवमस्थो रामस्यानुकूलः । राहुस्तु मिथुन स्थत्वाद् द्वादशस्थ इति किंचिद्बाधकः । राक्षसानामिदं सर्वं विपरीतम् । तथाहि–राक्षसानां हि नक्षत्रं मूलम् । तथाच धनू राशिः । तदपेक्षया पञ्चमस्थः शुकः प्रतिकूलः । जन्मराशिस्थौ शनिकेतू च प्रतिकूलौ । राहुस्तु सप्तमस्थः किंचिदनुकूलः । द्वादशस्थाङ्गारकश्च प्रतिकूलः । गुरुस्तु नवमस्थोऽनुकूलः । चतुर्थस्थः सूर्यः पञ्चमस्थो बुधश्च नानुकूलौ । दशमस्थश्चन्द्रः किंचिदनुकूलः । एवं प्रायेण ग्रहगोचारफलं राक्षसानां विपरीतमेवेति ॥ ४८ ॥ ब्रह्मराशिः

ब्रह्मराशिः वेदानां राशिभूतः, अधीतसर्ववेद इत्यर्थः । अत एव विशुद्धः उशनाश्च त्वामनुगतः, अनेन प्रतिशुक्रता नास्तीत्युक्तम् । ब्रह्मराशिरित्यस्य पादस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधीतसर्ववेद इत्यर्थः। विशुद्धः पापग्रहासंयुक्तः। इदं द्वयमपि भार्गवविशेषणम्। परमर्षयः सप्तर्षयः। दक्षिणां दिशं प्रति गताः। प्रदक्षिणम् तिष्ठद्गुप्रभृतित्वात्साधुः। आवर्तमाना इति शेषः ॥४९॥ त्रिशङ्कुरिति। पुरोहितः विश्वामित्रः। "सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः।" इति बालकाण्डोक्तरीत्या विश्वामित्रसृष्टसप्तर्ष्यन्तर्गतवसिष्ठो वा। पितामहवरः पितामहेषु कूटस्थेषु श्रेष्ठः। इक्ष्वाकूणां प्रधानकूटस्थ

त्रिशङ्कुर्विमलो भाति राजर्षिः सपुरोहितः। पितामहवरोऽस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५० ॥

विमले च प्रकाशेते विशाखे निरुपद्रवे। नक्षत्रवरमस्माकमिक्ष्वाकूणां महात्मनाम् ॥ ५१ ॥

नैर्ऋतं नैर्ऋतानां च नक्षत्रमभिपीड्यते। मूलो मूलवता स्पृष्टो धूप्यते धूमकेतुना ॥ ५२ ॥

इत्यर्थः ॥५०॥ विमले चेति। निरुपप्लवे क्रूरग्रहानाक्रान्ते। विशाखे इति द्विवचनं नक्षत्रद्वयात्मकत्वात्। विशाखाख्यं नक्षत्रवरमित्यर्थः। विशाखाया इक्ष्वाकुनक्षत्रत्वं ज्योतिषदर्पणे दर्शितम्—"अश्विन्यां यदि केतुः" इत्यारभ्य "इक्ष्वाकुकुलनाथस्तु ह्यन्यतो यदि भवेद्विशाखास्थस्तु" इति ॥ ५१ ॥ स्वानुकूल्यमुक्त्वा परप्रातिकूल्यमाह—नैर्ऋतमिति। नैर्ऋतं नैर्ऋतदैवतम्। नैर्ऋतानां राक्षसानाम्। किं तन्नैर्ऋतं तस्य पीडा केनेत्याकाङ्क्षायामाह—मूल इति। मूलवता अन्तिकवता। "मूलं वशीकृतौ स्वीये शीर्षे तारान्तिकादिषु" इति वैजयन्ती। तेन धूमकेतुना स्पृष्टो मूलः मूलनक्षत्रं धूप्यते सन्ताप्यते। "धूप सन्तापे" इति धातुः ॥ ५२ ॥

पूर्वशेषं विहायान्योऽर्थ उच्यते। ब्रह्मराशिरित्यत्र ब्रह्मराशिशब्देन "तत्रासते महात्मान ऋषयो येऽग्निहोत्रिणः। भूतारम्भकृतं ब्रह्म शंसन्तो ऋत्विगुद्यताः॥ प्रारभन्ते लोककामास्तेषां पन्थास्स दक्षिणः।" इति श्रीविष्णुपुराणोक्ताः पितृयाणमार्गस्था लोकाभिवृद्धिकामा महर्षय उच्यन्ते। तेषां राशिः सङ्घः विशुद्धः प्रसन्नः। परमर्षयः सप्तर्षयः। ध्रुवम् औत्तानपादिम् प्रदक्षिणं यथा तथा, आवर्तमाना इति शेषः। प्रकाशन्त इति सम्बन्धः। सप्तर्षिसन्निवेशप्रकारस्तु—"पूर्वभागे तु भगवान् मरीचिरुपरि स्थितः। वसिष्ठश्च सभार्योऽस्मात्पुरस्तादङ्गिरा मुनिः। ततोऽत्रिस्तस्य चासन्नः पुलस्त्यः पुलहः क्रतुः॥" इति ॥ ४९ ॥ सपुरोहितः सवसिष्ठः। "सृजन् दक्षिणमार्गस्थान् सप्तर्षीनपरान् पुनः" इत्युक्तविश्वामित्रसृष्टसप्तर्षिमण्डलस्थवसिष्ठेन सहित इत्यर्थः। मे पितामहवरः पितामहश्रेष्ठः ॥ ५० ॥ विमले निरुपद्रवे अङ्गारकादिदुष्टग्रहाक्रमणरहिते ॥ ५१ ॥ नैर्ऋतं नैर्ऋतदैवत्यम्। किं तन्नक्षत्रं केन वा पीड्यत इत्याशङ्कायामाह—मूल इति। मूलवता अन्तिकवता। "मूलं वशीकृतौ स्वीये शीर्षे तारान्तिकादिषु" इति वैजयन्ती। तेन सामीप्यवता धूमकेतुना उत्पातग्रहेण स्पृष्टो मूलो मूलनक्षत्रं धूप्यते सन्ताप्यते "अग्न्युत्पातौ धूमकेतू" इत्यमरः ॥ ५२ ॥

For Private And Personal Use Only

ततः किमित्यत्राह–सर्वमिति । एतन्नक्षत्रपीडनमेव राक्षसानां विनाशाय सर्वम् अशुभसूचकनिमित्तजातं समुपस्थितमित्यर्थः । तदेवोपपादयति–काल इति । कालगृहीतानां मृत्युगृहीतानां नक्षत्रं काले अन्तकाले ग्रहपीडितं भवति ॥ ५३ ॥ पुनरपि विजयसूचकान्याह–प्रसन्ना इत्यादिना । द्रुमाः यथर्तुकुसुमाः ऋतुमनतिक्रम्य जातानि कुसुमानि येषां ते तथोक्ताः । अकालकुसुमोत्पत्तिर्ह्युत्पातः । स इदानीं नास्तीत्यर्थः । तथोक्तं वराह

सर्वं चैतद्विनाशाय राक्षसानामुपस्थितम् । काले कालगृहीतानां नक्षत्रं ग्रहपीडितम् ॥ ५३ ॥
प्रसन्नाः सुरसाश्चापो वनानि फलवन्ति च । प्रवान्त्यभ्यधिकं गन्धान् यथर्तुकुसुमा द्रुमाः ॥ ५४ ॥
व्यूढानि कपिसैन्यानि प्रकाशन्तेऽधिकं प्रभो । देवानामिव सैन्यानि सङ्ग्रामे तारकामये ॥ ५५ ॥
एवमार्य समीक्ष्यैतान् प्रीतो भवितुमर्हसि । इति भ्रातरमाश्वास्य हृष्टः सौमित्रिरब्रवीत् ॥ ५६ ॥
अथावृत्य महीं कृत्स्नां जगाम महती चमूः । ऋक्षवानरशार्दूलैर्नखदंष्ट्रायुधैर्वृता ॥ ५७ ॥

मिहिरेण–"शीतोष्णानां विपर्यासः फलपुष्पमकालजम् । अशो[illegible] विशेषश्च फलं षाण्मासिकं भवेत् ॥" इति ॥ ५४ ॥ व्यूढानीति । व्यूढानि कृतव्यूहानि । तारकस्य तारकासुरस्य आमयो वधो यस्मिन् सः तारकामयः तस्मिन् । यद्वा तारकाया बृहस्पतिपत्न्याः आमयो मनोव्याधिः यस्मिन् । तादृशसङ्ग्रामसंज्ञेयम् । तथोक्तं श्रीविष्णुपुराणे–"एवं च तयोरतिविोग्रः सङ्ग्रामस्तारकानिमित्तस्तारकामयो नामाभवत्" इति ॥ ५५ ॥ एवमिति । आश्वास्याब्रवीत् आश्वासनपूर्वकमब्रवीत् । अनेन प्रथमसर्गान्तोक्तः श्लोकोऽनुसृत इति ज्ञायते ॥ ५६ ॥ पुनरपि सेनायाः दूरगमनमाह–अथेति । ऋक्षवानरशार्दूलैः ऋक्षशार्दूलैः वानरशार्दूलैश्च । शार्दूलशब्दः श्रेष्ठवाची ॥ ५७ ॥

ततः किमित्यत आह–सर्वमिति । काले अन्तकाले प्राप्ते कालगृहीतानां मृत्युगृहीतानां नक्षत्रं ग्रहपीडितं धूमकेतुग्रहसन्ततं भवतीति यत् एतच्च एतत् नैर्ऋतनक्षत्रपीडनमेव राक्षसानां विनाशाय सर्वमुपस्थितम् राक्षसविनाशसूचकानेकनिमित्तजातं समुपस्थितमित्यर्थः । यद्वा एतत् नैर्ऋतनक्षत्रपीडनं सर्वम् अस्मत्कुलनक्षत्रविशाखौज्ज्वल्यादिकं पूर्वोक्तं सर्वं च राक्षसनाशायोपस्थितमित्यन्वयः ॥ ५३ ॥ पुनरपि विजयसूचकान्याह–प्रसन्ना इति ॥ ५४ ॥ तारकामये आमयशब्देन बाधकत्वाद्वधो लक्ष्यते । तारकस्य तारकासुरस्य आमयो वधो यस्मिन् स तथोक्तः तस्मिन् । यद्वा तारकानाम बृहस्पतिपत्नी, तन्निमित्तत्वात्सङ्ग्रामस्य तारकामय इति संज्ञा । तथाऽऽह श्रीविष्णुपुराणे–"एवं च तयोरतीवोग्रः सङ्ग्रामस्तारकानिमित्तस्तारकामयो नामाभवत्" इति ॥ ५५ ॥ एवमिति । एवमुक्तप्रकारेण भ्रातरमाश्वास्य ॥ १३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कराग्रैरिति । अन्तर्दधे आच्छादयामास ॥ ५८ ॥ सपर्वतेति । हरिवाहिनी दक्षिणां महीम् अम्बुदसन्ततिर्द्यामिव छादयन्ती ययाविति संबन्धः ॥५९ ॥ उत्तरन्त्यामिति । सन्ततं निरन्तरं यथा भवति तथा उत्तरन्त्याम् । विपरीतवत् वैपरीत्यवत् । भावप्रधानो निर्देशः । बहुयोजनं च यथा भवति तथा।

कराग्रैश्चरणाग्रैश्च वानरैरुत्थितं रजः । भीममन्तर्दधे लोकं निवार्य सवितुः प्रभाम् ॥ ५८ ॥ सपर्वतवनाकाशां दक्षिणां हरिवाहिनी । छादयन्ती ययौ भीमा द्यामिवाम्बुदसन्ततिः ॥ ५९ ॥ उत्तरन्त्यां च सेनायां सततं बहु योजनम् । नदीस्रोतांसि सर्वाणि सस्यन्दुर्विपरीतवत् ॥ ६० ॥ सरांसि विमलाम्भांसि द्रुमाकीर्णांश्च पर्वतान् । समान् भूमिप्रदेशांश्च वनानि फलवन्ति च । मध्येन च समन्ताच्च तिर्यक्चाधश्च साऽविशत् ॥६१॥ समावृत्य महीं कृत्स्नां जगाम महती चमूः ॥६२॥ ते हृष्टमनसः सर्वे जग्मुर्मारुतरंहसः । हरयो राघवस्यार्थे समारोपितविक्रमाः ॥ ६३ ॥ हर्षवीर्यबलोद्रेकान् दर्शयन्तः परस्परम् । यौवनोत्सेकजान् दर्पान् विविधांश्चक्रुरध्वनि ॥६४॥ तत्र केचिद् द्रुतं जग्मुरुत्पेतुश्च तथाऽपरे । केचित् किलकिलां चक्रुर्वानरा वनगोचराः ॥६५॥ प्रास्फोटयंश्च पुच्छानि सन्निजघ्नुः पदान्यपि । भुजान् विक्षिप्य शैलांश्च द्रुमानन्ये बभञ्जिरे ॥ ६६ ॥

सस्यन्दुः ॥ ६० ॥ सरांसीत्यादिसार्द्धश्लोक एकान्वयः । यथायोग्यं च संबन्धः । सरांसि शीतलसलिलतया मध्येनाविशत् । पर्वतान् द्रुमाकीर्णतया तिर्यगाविशत् । समान् भूमिप्रदेशान् समन्तादाविशत् । वनानि फलवत्तया अध आविशत् ॥ ६१ ॥ समावृत्येत्यर्धम् ॥ ६२ ॥ त इत्यादि । मारुतरंहसः वायुवेगाः । समारोपितविक्रमाः, अभिवृद्धविक्रमा इत्यर्थः । उद्रेकशब्दोऽतिशयवाची । दर्पान् दर्पजव्यापारान् ॥६३॥ ६४ ॥ तान् विवृणोति–तत्रेत्यादिना । किलकिलेति वानरशब्दानुकरणम् ॥ ६५ ॥ प्रास्फोटयन् भूमाववास्फालयन् सन्निजघ्नुः, भूमाविति शेषः । भुजानिति । भुजान्

हे आर्य ! एतान् समीक्ष्य भीतो भवितुमर्हसीति सौमित्रिरब्रवीदिति सम्बन्धः ॥५६॥५७॥ कराग्रैरिति । अन्तर्दधे अन्तर्धापयत् ॥५८॥५९॥ बहुयोजनमिति क्रियाविशेषणम् । विपरीतवत् वैपरीत्यवत् बहुयोजनं यथा तथा नदीस्रोतांसि सस्यन्दुरिति सम्बन्धः ॥ ६० ॥ सरांसीत्यादिसार्धमेकं वाक्यम् ॥ ६१ ॥ समावृत्येत्यर्धमेकं वाक्यम् ॥ ६२ ॥ त इति । असाध्यमपि साहसवशात् साधयिष्याम इति समारोपितविक्रमाः ॥ ६३–६५ ॥ प्रास्फोटयन् पुच्छानि भूमावताडयन् । विक्षिप्य

For Private And Personal Use Only

विक्षिप्य प्रसार्य द्रुमान् शैलांश्च बभञ्जिरे ॥ ६६ ॥ गिरिगोचराः गिरिचराः । क्ष्वेलां सिंहनादम् ॥ ६७ ॥ ऊरुवेगैरिति । ममृदुः मर्दनं चक्रुः ॥ ६८ ॥ शतैरिति । श्रीमद्यथा भवति तया परिवृता आसीदिति सम्बन्धः ॥ ६९ ॥ सा स्मेति । सेना इनेन स्वामिना सहिता, स्वस्वस्थानियुक्तेत्यर्थः ॥ ७० ॥

आरोहन्तश्च शृङ्गाणि गिरीणां गिरिगोचराः । महानादान् विमुञ्चन्ति क्ष्वेलामन्ये प्रचक्रिरे ॥ ६७ ॥ ऊरुवेगैश्च ममृदुर्लताजालान्यनेकशः । जृम्भमाणाश्च विक्रान्ता विचिक्रीडुः शिलाद्रुमैः ॥६८॥ शतैः शतसहस्रैश्च कोटीभिश्च सहस्रशः । वानराणां तु घोराणां श्रीमत्परिवृता मही ॥ ६९ ॥ सा स्म याति दिवारात्रं महती हरिवाहिनी । हृष्टा प्रमुदिता सेना सुग्रीवेणाभिरक्षिता ॥ ७० ॥ वानरास्त्वरितं यान्ति सर्वे युद्धाभिनन्दिनः । प्रमोक्षयिषवः सीतां मुहूर्तं क्वापि नासत ॥७१॥ ततः पादपसम्बाधं नानामृगसमायुतम् । सह्यपर्वतमासेदुर्मलयं च महीधरम् ॥ ७२ ॥ काननानि विचित्राणि नदीप्रस्रवणानि च । पश्यन्नतिययौ रामः सह्यस्य मलयस्य च ॥ ७३ ॥ वकुलांस्तिलकांश्चूतानशोकान् सिन्धुवारकान् । करवीरांश्च तिमिशान् भञ्जन्ति स्म प्लवङ्गमाः ॥ ७४ ॥ अङ्कोलांश्च करञ्जांश्च प्लक्षन्यग्रोधतिन्दुकान् । जम्बूकामलकान्नीपान् भञ्जन्ति स्म प्लवङ्गमाः ॥ ७५ ॥

प्रमोक्षयिषवः मोचयितुमिच्छवः । सनि द्विर्वचनाभाव आर्षः । "मोक्ष निरसने" इत्यस्माद्धातोः सन् ॥ ७१ ॥ ततः दिवारात्रान्ते ॥ ७२ ॥ सह्यस्य मलयस्य च काननानीत्यन्वयः । सह्यमलयौ नाम मार्गवर्तिनौ कौचित्पर्वतौ ॥ ७३ ॥ वकुलान् केसरवृक्षान् । तिलकान् क्षुरकवृक्षान् । चूताः प्रसिद्धाः, अशोकाश्च । सिन्धुवारकान् निर्गुण्डीवृक्षान् । करवीराः प्रसिद्धाः । तिमिशान् नेमिवृक्षान् ॥ ७४ ॥ अङ्कोलान् निकोचकवृक्षान् । करञ्जान् नक्तमालवृक्षान् । प्लक्षान् जटीवृक्षान् । न्यग्रोधान् वटान् । तिन्दुकान् स्फूर्जकवृक्षान् । जम्बूकामलकाः प्रसिद्धाः । नीपाः कदम्बाः ॥ ७५ ॥

प्रसार्य ॥ ६६–६९ ॥ सा स्मेति । सेना इनेन स्वामिना सहिता ॥ ७० ॥ ७१ ॥ सह्यपर्वतमासेदुर्मलयं च महीधरम् इति पाठः ॥ ७२–८३ ॥

स०–श्रीमत्परिवृता श्रीमद्भिः सुघोराणां वानराणां मध्ये श्रीमद्भिः परिवृता । श्रीमत्परिवृता श्रियं राक्षससम्पदं मथ्नन्तीति श्रीमथः तैः परिवृतेति सुघोराणां वानराणां मही जातेति वा ॥ ६९ ॥ दिवारात्रम् अहोरात्रम्, याममात्रवास इत्याशयः । उत्तरत्र दिवेति शेष इति च नागोजिभट्टः । अखण्डाहोरात्रमित्यर्थः स्वरसः । 'मुहूर्तं क्वापि नावसन्' इत्युत्तरग्रन्थस्वारस्यात् । शेषं विनाऽन्वयसम्भवाच्च ॥७०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रस्तरेषु शिलासु, स्थिताः इति शेषः । वायुवेगः वानरसेनावेगजवायुवेगः ॥ ७६ ॥ ७७ ॥ वानराणां धातुरेणुरूपितत्वं वक्तुं पर्वतस्य धातुमत्तामाह– अधिकमिति । अर्धमेकं वाक्यम् । शैलराजः सह्यः ॥ ७८ ॥ विघट्टितः उत्थापितः ॥ ७९ ॥ गिरिप्रस्थेत्यादिसार्द्धपञ्चश्लोक्येकान्वया । पुष्पिताः

प्रस्तरेषु च रम्येषु विविधाः काननद्रुमाः । वायुवेगप्रचलिताः पुष्पैरवकिरन्ति तान् ॥ ७६ ॥ मारुतः सुखसंस्पर्शो वाति चन्दनशीतलः । षट्पदैरनुकूजद्भिर्वनेषु मधुगन्धिषु ॥ ७७ ॥ अधिकं शैलराजस्तु धातुभिः सुविभूषितः ॥ ७८ ॥ धातुभ्यः प्रसृतो रेणुर्वायुवेगविघट्टितः । सुमहद्वानरानीकं छादयामास सर्वतः ॥ ७९ ॥ गिरिप्रस्थेषु रम्येषु सर्वतः संप्रपुष्पिताः । केतक्यः सिन्धुवाराश्च वासन्त्यश्च मनोरमाः ॥ ८० ॥ माधव्यो गन्धपूर्णाश्च कुन्दगुल्माश्च पुष्पिताः । चिरिबिल्वा मधूकाश्च वकुलाः प्रियकास्तथा ॥ ८१ ॥ स्फूर्जकास्तिलकाश्चैव नागवृक्षाश्च पुष्पिताः । चूताः पाटलयश्चैव कोविदाराश्च पुष्पिताः ॥ ८२ ॥ मुचुलिन्दार्जुनाश्चैव शिंशुपाः कुटजास्तथा । धवाः शाल्मलयश्चैव रक्ताः कुरबकास्तथा ॥ ८३ ॥ हिन्तालास्तिमिशाश्चैव चूर्णका नीपकास्तथा । नीलाशोकाश्च वरणा अङ्कोलाः पद्मकास्तथा । प्लवमानैः प्लवङ्गैस्तु सर्वे पर्याकुलीकृताः ॥ ८४ ॥

इत्येतत्सर्वविशेषणम् । अतस्तस्य बहुशः प्रयोगः । वसन्ते पुष्प्यन्तीति वासन्त्यः । इदं माधवीविशेषणम् । "कालात्साधुपुष्प्यत्पच्यमानेषु" इत्यण् । गन्धैः पूर्णाः गन्धपूर्णाः, कुन्दाः । चिरिबिल्वाः नक्तमालाः । मधूकाः गुडपुष्पाः । वञ्जुलाः वानीराः । प्रियकाः बन्धूकाः । स्फूर्जकाः तिन्दुकवृक्षाः । नागवृक्षाः नागकेसराः । पाटलयः पाटलाः । कोविदाराः चमरिकाः । मुचुलिन्दाः खर्जूरविशेषाः । अर्जुनाः ककुभाः । शिंशुपाः पिच्छिलाः । कुटजाः जयवृक्षाः । धवाः धुन्धुरवृक्षाः । शाल्मलयः मोचाः । " पिच्छिला पूरणी मोचा चिरायुः शाल्मलिर्द्वयोः " इत्यमरः । हिन्तालाः तालविशेषाः । चूर्णकाः आमलकविशेषाः । नीपकाः कदम्बाः । वरणाः वारुणाः । पद्मकाः सुगन्धिपुष्पा वृक्षविशेषाः । एवम्भुता वृक्षाः प्लवमानैः प्लवङ्गैः पर्याकुलीप्लवमानैरित्यर्धं भिन्नं वाक्यम् ॥ ८४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृता इत्यन्वयः ॥ ८०–८४ ॥ वाप्य इत्यादि जलाशया इत्यन्तमेकं वाक्यम् । जलाशयाः जलपूर्णा इति वापीविशेषणम् । अत्रापि पर्याकुलीकृता इत्यनुषज्यते । कारण्डवाः जलकुक्कुटाः । प्लवैः जलकाकैः । क्रौञ्चैः प्रसिद्धैः । तीरवनमृगानाह–वराहेत्यादिना । तरक्षुभिः मृगादनैः । व्यालैः दुष्टगजैः ।

वाप्यस्तस्मिन् गिरौ शीताः पल्वलानि तथैव च । चक्रवाकानुचरिताः कारण्डवनिषेविताः । प्लवैः क्रौञ्चैश्च सङ्कीर्णा वराहमृगसेविताः ॥ ८५ ॥ ऋक्षैस्तरक्षुभिः सिंहैः शार्दूलैश्च भयावहैः । व्यालैश्च बहुभिर्भीमैः सेव्यमानाः समन्ततः ॥ ८६ ॥ पद्मैः सौगन्धिकैः फुल्लैः कुमुदैश्चोत्पलैस्तथा । वारिजैर्विविधैः पुष्पै रम्यास्तत्र जलाशयाः ॥ ८७ ॥ तस्य सानुषु कूजन्ति नानाद्विजगणास्तथा ॥ ८८ ॥ स्नात्वा पीत्वोदकान्यत्र जले क्रीडन्ति वानराः । अन्योन्यं प्लावयन्ति स्म शैलमारुह्य वानराः ॥ ८९ ॥ फलान्यमृतगन्धीनि मूलानि कुसुमानि च । बुभुजुर्वानरास्तत्र पादपानां मदोत्कटाः ॥ ९० ॥ द्रोणमात्रप्रमाणानि लम्बमानानि वानराः । ययुः पिबन्तो हृष्टास्ते मधूनि मधुपिङ्गलाः ॥ ९१ ॥ पादपानवभञ्जन्तो विकर्षन्तस्तथा लताः । विधमन्तो गिरिवरान् प्रययुः प्लवगर्षभाः ॥९२॥ वृक्षेभ्योऽन्ये तु कपयो नर्दन्तो मधुदर्पिताः । अन्ये वृक्षान् प्रपद्यन्ते प्रपतन्त्यपि चापरे ॥ ९३ ॥

सौगन्धिकैः कह्लारैः । वारिजैरिति । एवमिति शेषः ॥ ८५–८७ ॥ तस्य सानुष्वित्यर्धमेकं वाक्यम् । कूजन्ति चुकूजुः । तत्सैन्यदर्शनादिति भावः ॥ ८८ ॥ स्नात्वेति । अत्र जले वापीजले । प्लावयन्ति सिञ्चन्ति ॥ ८९ ॥ शैलमारुह्येत्युत्तरशेषः । अमृतगन्धीनि अमृतस्वादूनि । मदोत्कटाः मदमत्ताः ॥ ९० ॥ द्रोणमात्रेति । द्रोणमात्रप्रमाणानि द्रोणं शिवद्वयम्, तत्प्रमाणमधुपूर्णानि । मधूनि मधुपटलानि । मधुपिङ्गलाः मधुवत्पिङ्गलवर्णाः ॥ ९१ ॥ पादपानिति । विधमन्तः दहन्तः । "ध्मा शब्दाग्निसंयोगयोः" इति धातुः ॥ ९२ ॥ वृक्षेभ्य इति । अन्ये वृक्षेभ्यः वृक्षेभ्योऽन्यत्र । अत्रापि ययु

वाप्य इत्यादि सार्धमेकं वाक्यम् । तस्मिन् गिरौ सह्यपर्वते वाप्यः चक्रवाकानुचरितत्वविशिष्टा इत्यर्थः । कारण्डवः जलकुक्कुटः । प्लवः बकविशेषः ॥ ८५ ॥ तरक्षुः मृगादनः । ऋक्षादिभिस्सेव्यमानं तदीयं वनं सह्यगिरावासीदिति शेषः ॥ ८६ ॥ ८७ ॥ तस्येति । तस्य सानुषु सह्यगिरिसानुषु ॥ ८८–९० ॥ मधूनि मधुपटलानि ॥ ९१ ॥ ९२ ॥ अन्ये वृक्षेभ्यः, अन्यत्र ययुरिति शेषः ॥ ९३ ॥

For Private And Personal Use Only

रित्यनुषज्यते ॥ ९३ ॥ बभूवेति । इवशब्दो वाक्यालङ्कारे । अन्ये तु-तत्र तदानीम् पक्वैः कलमकेदारैः पक्वशालिक्षेत्रैः सम्पूर्णा वसुन्धरेव यथा भवेत् तथा तैर्हरिपुङ्गवैः संपूर्णा वसुधा बभूवेति योजयन्ति । अपरे तु-कलमकेदारैर्यथा कलमकेदारसदृशैः हरिपुङ्गवैः संपूर्णा वसुधा वसुन्धरेव कलमकेदारभूरिव बभूवेत्याहुः । उपमानद्वित्वं व्यञ्जयितुमुपमावाचकद्वयं प्रयुञ्जते कवयः । यथा-" उद्धृत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव

बभूव वसुधा तैस्तु सम्पूर्णा हरियूथपैः । यथा कलमकेदारैः पक्वैरिव वसुन्धरा ॥ ९४ ॥ महेन्द्रमथ सम्प्राप्य रामो राजीवलोचनः । अध्यारोहन्महाबाहुः शिखरं द्रुमभूषितम् ॥९५॥ ततः शिखरमारुह्य रामो दशरथात्मजः । कूर्ममीनसमाकीर्णमपश्यत् सलिलाकरम् ॥ ९६ ॥ ते सह्यं समतिक्रम्य मलयञ्च महागिरिम् । आसेदुरानुपूर्व्येण समुद्रं भीमनिस्वनम् ॥ ९७ ॥ अवरुह्य जगामाशु वेलावनमनुत्तमम् । रामो रमयतां श्रेष्ठः ससुग्रीवः सलक्ष्मणः ॥ ९८ ॥ अथ धौतोपलतलां तोयौघैः सहसोत्थितैः । वेलामासाद्य विपुलां रामो वचनमब्रवीत् ॥ ९९ ॥ एते वयमनुप्राप्ताः सुग्रीव वरुणालयम् । इहेदानीं विचिन्ता सा या नः पूर्वं समुत्थिता ॥ १०० ॥ अतः परमतीरोऽयं सागरः सरितां पतिः । न चायमनुपायेन शक्यस्तरितुमर्णवः ॥ १०१ ॥

संप्रणीताः । आलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवाम्बुराशिम् ॥" इति ॥ ९४ ॥ महेन्द्रमिति । अथ सह्यमलयातिक्रमणानन्तरम् । राजीवलोचन इति समुद्रदर्शनाय महेन्द्रशिखरारोहणकुतूहलित्वमुक्तम् ॥ ९५ ॥ तत इति । स्पष्टम् ॥ ९६ ॥ ९७ ॥ वेलावनस्योन्नतत्वादवरुह्येत्युक्तम् । रमयतां श्रेष्ठ इत्यनेन समुद्रसम्भ्रमप्रदर्शनेन लक्ष्मणादिरञ्जकत्वं व्यञ्जितम् ॥ ९८ ॥ अथेति । स्पष्टम् ॥ ९९ ॥ एत इति । विचिन्ता समुद्रतरणोपायचिन्ता ॥ १०० ॥ अत इति । अतीरः अविद्यमानतीरः । जलप्राय इति यावत् । अनुपायेन उपायं विनेत्यर्थः । प्रसज्यप्रतिषेधे नञ्समासः ॥१०१॥

कलमकेदारैः पक्वशालिक्षेत्रैः सम्पूर्णा वसुन्धरेव यथा भवेत तथा तैर्हरिपुङ्गवैः सम्पूर्णा वसुधा बभूवेत्यन्वयः । यद्वा पक्वैः कलमकेदारैर्यथा पक्वकलमकेदारसदृशैः हरिपुङ्गवैः संपूर्णा वसुधा वसुन्धरेव कलमकेदारभूमिरिव बभूवेत्यन्वयः । यद्वा इवशब्दस्तथार्थे । पक्वैः कलमकेदारैः वसुन्धरा यथा पूर्णा तथा हरिपुङ्गवैः वसुधा पूर्णा बभूवेति योजना ॥ ९४-९६ ॥ अत्रानुक्तमपि वामत्रयमन्यद्बोध्यम्, अग्निवेश्योक्तेः । ते सर्वे वानराः आनुपूर्व्येण सेनासन्निवेशक्रमेण ॥ ९७ ॥ अवरुह्य, महेन्द्रादित्यर्थः ॥ ९८ ॥ तोयौघैः तरङ्गैः ॥ ९९ ॥ विचिन्ता समुद्रतरणोपायचिन्ता ॥ १०० ॥ अतीरः अविद्यमानप्रत्यासन्नतीरः । अनुपायेन उपायाभावेन, उपायं विनेत्यर्थः ॥ १०१ ॥ १०२ ॥

मन्त्रः कार्यविचारः । प्रस्तूयताम् आरभ्यताम् । इति वक्ष्यमाणप्रकारेण ॥ १०२ ॥ इतीति । इतीवेत्यनेन सेनानिवेशनियोगे सागरतरणोपायविचारः अहृदयो हेतुः । वस्तुतस्तु सीताहरणक्लेश एव हेतुरिति व्यज्यते ॥ १०३ ॥ सर्वा इति । स्पष्टम् ॥ १०४ ॥ कुतः कुतश्चिद्धेतोः । शूराः वानराः ।

तदिहैव निवेशोऽस्तु मन्त्रः प्रस्तूयतामिति । यथेदं वानरबलं परं पारमवाप्नुयात् ॥ १०२ ॥ इतीव स महाबाहुः सीताहरणकर्शितः । रामः सागरमासाद्य वासमाज्ञापयत्तदा ॥ १०३ ॥ सर्वाः सेना निवेश्यन्तां वेलायां हरिपुङ्गव । सम्प्राप्तो मन्त्रकालो नः सागरस्यास्य लङ्घने ॥ १०४ ॥ स्वां स्वां सेनां समुत्सृज्य मा च कश्चित् कुतो व्रजेत् । गच्छन्तु वानराः शूरा ज्ञेयं छन्नं बलं च नः ॥ १०५ ॥ रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः । सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते ॥ १०६ ॥ विरराज समीपस्थं सागरस्य च तद्बलम् । मधुपाण्डुजलः श्रीमान् द्वितीय इव सागरः ॥ १०७ ॥ वेलावनमुपागम्य ततस्ते हरिपुङ्गवाः । विनिविष्टाः परं पारं काङ्क्षमाणा महोदधेः ॥ १०८ ॥ तेषां निविशमानानां सैन्यसन्नाहनिःस्वनः । अन्तर्धाय महानादमर्णवस्य प्रशुश्रुवे ॥ १०९ ॥

गच्छन्तु सर्वतः सञ्चरन्तु । किमर्थमित्यत्राह–ज्ञेयमिति । नः अस्माकम् भयं भयनिमित्तम् छन्नं ज्ञेयम्, तत्र तत्र निलीनैः शत्रुभिः प्रायशः प्रहारसम्भवादिति भावः ॥ १०५ ॥ रामस्येति । द्रुमायुते द्रुमैर्युक्ते । मिश्रणार्थाद्यौतेर्निष्ठा ॥ १०६ ॥ सागरस्य समीपस्थं तद्बलम् मधुपाण्डुजलः मधुवत्पिङ्गलजलः द्वितीयः सागर इव विरराजेत्युत्प्रेक्षा ॥ १०७ ॥ वेलेति । स्पष्टम् ॥ १०८ ॥ तेषामिति । अन्तर्धाय, स्थित इति शेषः ॥ १०९ ॥

वासमाज्ञापयदित्यस्य इहैव निवेशोऽस्त्वित्युक्तनिवेशनप्रकारविशेषविधानार्थत्वान्न पुनरुक्तिः ॥ १०३ ॥ १०४ ॥ स्वां स्वामिति । शूराः वानराः गच्छन्तु, बलनिवेशनार्थं गच्छन्त्वित्यर्थः । स्वां स्वां सेनां वानरो वानरसेनाम् ऋक्षः ऋक्षसेनां समुत्सृज्य कश्चिदपि कुतोपि मा व्रजेत् । कुतः ? अस्माकं भयनिमित्तं छन्नं ज्ञेयं शङ्कनीयम् । तत्रतत्र लीनैः शत्रुभिः प्रायशः प्रहरणसम्भवादिति भावः ॥ १०५ ॥ १०६ ॥ विरराजेति । सागरस्य समीपस्थं तद्बलम् । मधुपाण्डुजलः मधुवत्पिङ्गलवर्णजलः द्वितीयः सागर इवेत्युत्प्रेक्षा । "हरिणः पाण्डुरः पाण्डुः" इत्यमरः । मधुपानोत्कटं श्रीमद्विनीय इव सागरः । इति वा पाठः ॥ १०७ ॥ १०८ ॥ सैन्यसन्नाहनिस्वनः सैन्यसञ्चारध्वनिः ॥ १०९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेति । त्रेधा त्रिप्रकारैः । वलयत्रयाकारेणेति यावत् । वानरगोपुच्छभल्लूकभेदेन त्रेधेति वा ॥ ११० ॥ पश्यमाना पश्यन्ती सती । हृष्टा, अभूदिति शेषः ॥ १११ ॥ दूरं पारं यस्य दूरपारम्, विशालमित्यर्थः । असंबाधं संबाधरहितम्, अक्षोभ्यमित्यर्थः । रक्षोगणनिषेवितं समुद्रे रक्षांसि वसन्तीति प्रसिद्धिः ॥ ११२ ॥ चण्डनक्रैः क्रूरैः ग्रहः ग्रहणं यस्य स तथोक्तः तम् । " सूर्यादौ ग्रहणे युद्धे पूतनादावनुग्रहे । उपरागे च निर्बन्धे स्वर्भानौ च

सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता । त्रिधा निविष्टा महती रामस्यार्थपराऽभवत् ॥ ११० ॥ सा महार्णवमासाद्य हृष्टा वानरवाहिनी । वायुवेगसमाधूतं पश्यमाना महार्णवम् ॥ १११ ॥ दूरपारमसम्बाधं रक्षोगणनिषेवितम् । पश्यन्तो वरुणावासं निषेदुर्हरियूथपाः ॥ ११२ ॥ चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये । हसन्तमिव फेनौघैर्नृत्यन्तमिव चोर्मिभिः ॥ ११३ ॥ चन्द्रोदयसमुद्भूतं प्रतिचन्द्रसमाकुलम् ॥ ११४ ॥ [पिनष्टीव तरङ्गाग्रैरर्णवः फेनचन्दनम् । तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः॥] चण्डानिलमहाग्राहैः कीर्णं तिमितिमिङ्गिलैः ॥ ११५ ॥

ग्रहः स्मृतः ॥" इति निघण्टुः । दिवसक्षये क्षपादौ, सन्ध्यायामित्यर्थः । घोरं वर्धमानत्वाद्भयङ्करम् ॥ ११३ ॥ समुद्भूतम् उच्छलितम् । प्रतिवीचि प्रतिबिम्बितचन्द्रत्वात् प्रतिचन्द्रैः समाकुलम् । चण्डानिलमहाग्राहैः चण्डानिलसदृशवेगमहाग्राहैरित्यर्थः । तिमयः शतयोजनायता महामत्स्याः । तानपि भक्षयितुं क्षमास्तिमिङ्गिलाः । तिमीन्निगिरन्तीति व्युत्पत्तेः । " गॄ निगरणे " इति धातुः । "ग्रोऽचि" इति लत्वम् । तदुक्तं पुराणे–" अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः । तिमिङ्गिलगिलोऽप्यास्ति तद्गिलोऽप्यस्ति सागरे ॥" इति ॥ ११४ ॥ ११५ ॥

वानराणां ध्वजिनी, ऋक्षगोलाङ्गूलानामपि वानरावान्तरजातीयत्वात्सर्वेषामपि वानरत्वोक्तिः । त्रिधा निविष्टा ऋक्षवानरगोलाङ्गूलभेदेन त्रिधा निविष्टेत्यर्थः ॥ ११० ॥ पश्यमाना पश्यन्ती । हृष्टा, अभूदिति शेषः । दूरपारमित्यादि सार्धचतुष्टयमेकं वाक्यम् । अगाधमसुरालयमित्यन्तस्य पश्यन्तो निषेदुरित्यनेनान्वयः । असम्बाधं सम्बाधरहितम्, अक्षोभ्यमित्यर्थः । चण्डनक्रग्रहं चण्डनक्रैः क्रूरैः ग्रहः ग्रहणं यस्य स तथोक्तम् । दिवसक्षये सति क्षपादौ निशामुखे घोरं वर्धमानत्वाद्भयङ्करमित्यर्थः । प्रतिचन्द्रसमाकुलं प्रतिबिम्बितचन्द्रत्वात् प्रतिबिम्बसमाकुलत्वम् । चण्डानिलमहाग्राहैः चण्डानिलसदृशमहाग्राहैरित्यर्थः । तिमितिमिङ्गिलैः तिमयः शतयोजनायामा महामत्स्याः । "अस्ति मत्स्यस्तिमिर्नाम शतयोजनमायतः " इति वचनात् । तिमिङ्गिलाः तन्निगरणशीलाः मत्स्यविशेषाः ॥११–१५॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीप्तभोगैः शिरोरत्नकान्त्या प्रकाशितफणैरिव स्थितैः । महासत्त्वैः जलगजशिंशुमारादिभिः । सुदुर्गं यादोभिः । दुर्गमार्गं दुर्गमम्, नौपथसञ्चारायोग्य मित्यर्थः । योगरूढिभ्यां वरुणावासवरुणालयपदद्वयनिर्वाहः ॥११६॥ रामानु०–अगाधमसुरालयमित्येसदन्तं पश्यन्त इत्यस्य कर्म ॥११६॥ तदानीं सागरमुत्प्रेक्षते– मकरैरिति । नागभोगैः सर्पकायैः । विगाढाः प्रविष्टाः । वातलोलिताः वायुचलिताः । अत एव प्रवृद्धाः जलराशयः तरङ्गाः । उत्पेतुश्च निपेतुश्च, उत्पत्य

दीप्तभोगैरिवाकीर्णं भुजङ्गैर्वरुणालयम् । अवगाढं महासत्त्वैर्नानाशैलसमाकुलम् । सुदुर्गं दुर्गमार्गं तमगाधमसुरालयम् ॥ ११६ ॥ मकरैर्नागभोगैश्च विगाढा वातलोलिताः । उत्पेतुश्च निपेतुश्च प्रवृद्धा जलराशयः ॥ ११७ ॥ अग्निचूर्णमिवाविद्धं भास्वराम्बु महोरगम् । सुरारिविषयं घोरं पातालविषमं सदा ॥ ११८ ॥ सागरं चाम्बरप्रख्यमम्बरं सागरोपमम् । सागरं चाम्बरं चेति निर्विशेषमदृश्यत ॥ ११९ ॥

निपेतुरिति भावः ॥ ११७ ॥ अथ सागराम्बरयोः सर्वथा साम्यं वर्णयति–अग्निचूर्णमित्यादिना । रात्रौ सागरस्य सलिलशीकराः अग्निचूर्णा इव दृश्यन्त इति प्रसिद्धिः, अतो भास्वराण्यम्बूनि शीकररूपाणि यस्य तथोक्तम् । अत एवाविद्धम् आकीर्णम् अग्निचूर्णमिव सागरे दृश्यते । अम्बरं च कीर्णैर्नक्षत्रैस्तथा दृश्यते । भास्वराम्बु विमलतुहिनं च । महान्त उरगा यस्मिन् तन्महोरगम् । इदमप्युभयत्रापि समानम् । आकाशे गन्धर्वादीनामिव नागानामपि सञ्चार सम्भवात्, राह्वादिरूपोरगसम्भवाद्वा । सुरारयः असुरा राक्षसाश्च तेषां विषयम् आवासभूतम् । इदमप्युभयत्र तुल्यम् । पातालविषमं पातालवत् गम्भीरम् । इदमप्युभयत्र तुल्यम् । घोरं भयङ्करम् । इदमप्युभयत्र तुल्यम् । एवमुक्तविशेषणविशिष्टं सागरं सागरः अम्बरप्रख्यम् अम्बराभम्, उक्तविशेषण विशिष्टमम्बरं च सागरोपमममदृश्यतेत्याकृष्य योजना ॥ ११८ ॥ न केवलं साम्यम्, सर्वथा साम्यं चेत्याह–सागरमिति । क्लीबत्वमार्षम् ॥ ११९ ॥

दीप्तभोगैरिव तेजोतिशयेनोज्ज्वलदेहैरिव स्थितैः भुजङ्गैराकीर्णं वरुणालयमित्यस्य रूढत्वाद्वरुणावासमित्यनेन न पुनरुक्तिः ॥ ११६ ॥ जलराशयः ऊर्मयः ॥ ११७ ॥ अग्निचूर्णमित्यादिना द्वयेन सागराम्बरयोस्साम्यं प्रतिपाद्यते । भास्वराम्बु चन्द्रकिरणसम्पर्कात् भास्वराणि शीकररूपाम्बूनि यस्य तत् । अतः आविद्धम् आकीर्णम् अग्निचूर्णमिव अग्निकणसमूह इव स्थितम् । अम्बरं तु नक्षत्रगणैस्तथा । महोरगं महान्तः उरगा यस्मिन् तत् इत्येतदुभयत्र समानम् । सुरारिविषयम्, सुरारयोऽसुरा राक्षसाश्च तेषां विषयमावासभूतम्, इदमप्युभयत्र समानम् । पातालविषयमिति पाठः । पातालस्य विषय इव विषयो यस्य तत्, पातालवदतिगम्भीरमित्यर्थः । इदमप्युभयत्रापि समानम् । एवमुक्तविशेषणविशिष्टं सागरमम्बरप्रख्यम् उक्तविशेषणविशिष्टमम्बरं च सागरोपमम् अतः सागरं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रकारान्तरेणापि उक्तं साम्यं दर्शयति–संपृक्तमिति । संपृक्तं संसृष्टम्, तुल्यवर्णमिति यावत् । हिशब्दो हेतौ । तादृग्रूपे अन्योन्यतुल्यरूपे । तारारत्नसमाकुले सागराम्बरे दृश्येते स्म ॥ १२० ॥ मेघवीचिमालयोर्बिम्बप्रतिबिम्बभावेनोपमानत्वम् ॥ १२१ ॥ अन्योन्यमिति । प्रथमं सक्ताः अथ आहता इत्यन्वयः ॥१२२॥ रत्नौघेत्यादिश्लोकद्वयम् । रत्नौघजलयोः सन्नादो यस्मिन् । अनेन वेगवद्वायुजनितक्षोभातिशयादन्तर्गतरत्नानामुद्गमनमवगम्यते ।

सम्पृक्तं नभसाप्यम्भः सम्पृक्तं च नभोऽम्भसा । तादृग्रूपे स्म दृश्येते तारारत्नसमाकुले ॥ १२० ॥ समुत्पतित मेघस्य वीचिमालाकुलस्य च । विशेषो न द्वयोरासीत् सागरस्याम्बरस्य च ॥ १२१ ॥ अन्योन्यमाहताः सक्ताः सस्वनुर्भीमनिस्वनाः । ऊर्मयः सिन्धुराजस्य महाभेर्य इवाहवे ॥ १२२ ॥ रत्नौघजलसन्नादं विषक्तमिव वायुना । उत्पतन्तमिव क्रुद्धं यादोगणसमाकुलम् ॥१२३॥ ददृशुस्ते महोत्साहा वाताहतजलाशयम् । अनिलोद्धूतमाकाशे प्रवलगन्तमिवोर्मिभिः ॥ १२४ ॥

वायुना विषक्तमिव वायुना एकीभूतमिव । यादोगणसमाकुलं यादांसि जलजन्तवः, तेषां गणेन समाकुलम् । वाताहतजलाशयं जलाशयः समुद्रः वाताहतश्चासौ जलाशयश्चेति कर्मधारयः तम् । ऊर्मिभिः आकाशे वलगन्तमिव स्थितम् । एतन्निरूपणार्थमेव अनिलोद्धूतमिति पुनरुक्तिः ॥१२३॥१२४॥

चाम्बरं च निर्विशेषं निर्भेदमदृश्यत । सागरमिति लिङ्गव्यत्यय आर्षः ॥ ११८ ॥ ११९ ॥ निर्विशेषत्वमेव प्रकारान्तरेणाह–सम्पृक्तमित्यादिद्वाभ्याम् । संपृक्तं संसृष्टम्, तुल्यमिति यावत । हिर्हेतौ । हि यस्मात् नभसा तुल्यवर्णमम्भः, अम्भसा तुल्यवर्णं नभश्च यतश्चाम्भोनभसी यथायोगं तारारत्नसमाकुले तस्मात्तादृग्रूपे अन्योन्यतुल्यरूपे दृश्येते ॥ १२० ॥ समुत्पतितमेघस्याम्बरस्य वीचिमालाकुलस्य सागरस्य चेत्यन्वयः ॥ १२१ ॥ सक्ताः निरन्तराः अन्योन्यैः परस्परमाहताः सस्वनुः ॥ १२२ ॥ रत्नौघेत्यादि श्लोकद्वयमेकं वाक्यम् । अनिलोद्धूतम् अत एव रत्नौघजलसन्नादं रत्नौघजलौघयोः सन्नादो यस्मिन् तम्, अनेन वेगवद्वायुजनितक्षोभातिशयात्तदन्तर्गतरत्नानामुद्गमनमवगम्यते । वायुना विषक्तमिव मिश्रीभूतमिव एकीभूतमिति यावत् । क्रुद्धं यादोगणसमाकुलमित्यनेन क्रूरयादोगणसमाकुलत्वात् क्रुद्धमिव स्थितम् । वाताहतजलाशयं वातोद्धूतह्रदम्, सागरमिति शेषः ॥ १२३ ॥ १२४ ॥

स०–तारारत्नसमाकुले एकं नक्षत्रतारासमाकुलम्, अपरं रत्नसमाकुलमिति ते । तारारत्नैः नक्षत्रश्रेष्ठैः तथा तारारत्नैः मुक्ताश्रेष्ठैरिति नागोजिभट्टः । तत्पक्षे " तारः शुद्धमौक्तिके " इति विश्वोक्तेः स्त्रीलिङ्गस्ताराशब्दस्तद्वाची मृग्यः । तारेषु मुक्तासु आरत्नैः अतिश्रेष्ठैरिति तद्विनेयैः क्लिष्टकल्पनया समाधेयम् ॥ १२० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत इति । विशेषाभिधानार्थत्वान्न पुनरुक्तिः । भ्रान्तोर्मिजलसन्नादमिति । घूर्णिततरङ्गजलसन्नादो यस्मिन् तम् । प्रलोलमिव उद्भ्रान्तमिव ॥ १२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्थः सर्गः ॥ ४ ॥

ततो विस्मयमापन्ना ददृशुर्हरयस्तदा। भ्रान्तोर्मिजलसन्नादं प्रलोलमिव सागरम् ॥ १२५ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुर्थः सर्गः ॥ ४ ॥
सा तु नीलेन विधिवत् स्वारक्षा सुसमाहिता। सागरस्योत्तरे तीरे साधु सेना निवेशिता ॥ १ ॥
मैन्दश्च द्विविदश्चोभौ तत्र वानरपुङ्गवौ। विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशम् ॥ २ ॥
निविष्टायां तु सेनायां तीरे नदनदीपतेः। पार्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ ३ ॥
शोकश्च किल कालेन गच्छता ह्यपगच्छति। मम चापश्यतः कान्तामहन्यहनि वर्धते ॥ ४ ॥

एवं कृतज्ञत्वमित्रानुरोधित्वपरीक्ष्यकारित्वमहोत्साहत्वादिशरण्यत्वौपयिका रामगुणा दर्शिताः । अथ रामस्य कारुण्यरूपं प्रधानगुणं दर्शयितुं सर्गान्तरमारभते–सा त्विति । स्वारक्षा आ समन्ताद्रक्षन्तीत्यारक्षाः, शोभनाः आरक्षाः यस्याः सा तथोक्ता। विधिवत् नीतिशास्त्रोक्तरीत्या । सुसमाहिता निराकुला निवेशिता ॥ १ ॥ मैन्द इति । दिशमिति जात्येकवचनम् । दिश इत्यर्थः । 'उभसर्वतसोः' इत्यादिना द्वितीया । सर्वत इति सप्तम्यर्थे तसिः। दिशां सर्वेषु प्रदेशेष्वित्यर्थः ॥ २ ॥ ३ ॥ समुद्रवेलावनाद्युद्दीपकदर्शनादुद्भूतं विरहशोकं सोढुमशक्नुवन् सौमित्रिं प्रत्याह–शोकश्चेत्यादिना । प्रथमश्चकारोऽवधारणे द्वितीयस्त्वर्थः । शोकः इष्टवस्त्वन्तरवियोगजनितः शोकः । गच्छता कालेन अपगच्छति, किलेत्यैतिह्ये । गच्छत्येवेति प्रसिद्धमिति

प्रलोलमिव उद्भ्रान्तमिव ॥ १२५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुर्थः सर्गः ॥४॥ सा त्विति । स्वारक्षा आ समन्ताद्रक्षन्तीत्यारक्षाः, शोभना आरक्षा यस्यास्सा ॥ १ ॥ मैन्दश्चेति । दिशमिति जात्येकवचनम् । षष्ठ्यर्थे द्वितीया । दिशां सर्वतः दिशां सर्वेषु प्रदेशे ष्वित्यर्थः ॥ २ ॥ ३॥ समुद्रवेलावनाद्युद्दीपकवस्तुदर्शनादुद्बुद्धविरहवेगं सोढुमशक्नुवन् वाचा विवृणोति–शोकश्चेत्यादि । मम चेत्यत्र चस्त्वर्थे । इष्टवस्त्वन्तर वियोगजनितः शोकः कालेनापगच्छति । प्रियाविरहजनितस्तु न तथेत्यर्थः ॥ ४ ॥ ॥१८॥

For Private And Personal Use Only

लौकिका वदन्ति । कान्तामपश्यतो मम तु शोकः अहन्यहनि वर्धते । लौकिकशोकविलक्षणो मम शोक इति भावः ॥ ४ ॥ ननु शत्रुहृताया दूरे स्थितायास्तस्याः प्रत्याहरणसमर्थस्य तव किं शोकेनेत्याशङ्क्य न तद्विषयोऽयं शोकः किंतूपभोगयोग्यस्य प्रियावयसो वैफल्यानुस्मरणादित्याह— न म इति । दुःखमिति । प्रिया दूरे स्थितेति मे न दुःखम्, सुग्रीवेण प्रस्थानेन तस्य निवर्त्यत्वात् । प्रबलरक्षसा हृतेति मे दुःखं नास्ति, तस्य तच्छिरः

न मे दुःखं प्रिया दूरे न मे दुःखं हृतेति वा । एतदेवानुशोचामि वयोऽस्या ह्यतिवर्तते ॥ ५ ॥
वाहि वात यतः कान्ता तां स्पृष्ट्वा मामपि स्पृश । त्वयि मे गात्रसंस्पर्शश्चन्द्रे दृष्टिसमागमः ॥ ६ ॥
तन्मे दहति गात्राणि विषं पीतमिवाशये । हा नाथेति प्रिया सा मां ह्रियमाणा यदब्रवीत् ॥ ७ ॥

कृन्तनापनोद्यत्वात् । एतदेवानुशोचामि इदमेकमेव शोकनिमित्तम् । वयोऽस्या ह्यतिवर्तते, गतं यौवनं न प्रत्याहर्तुं शक्यमिति भावः । अत्र यौवनमतिवर्तत इति नार्थः, नित्ययौवनत्वात्तस्याः । किंतु वयोऽतिवर्तते, व्यर्थतयैव यातीति भावः । मानुषभावानुसारेण चेदं वचनम् ॥ ५ ॥ प्रियास्पृष्टद्रव्यस्पर्शस्य विनोदहेतुत्वात्तत्सम्पादनार्थं वायुं प्रार्थयते—वाहीति । हे वात ! मे कान्ता यतः यत्र वसति तत्र वाहि गच्छ । तत्र गत्वा किं करणीयमित्यत्राह तामिति । न चैतदन्यतः सेत्स्यतीति सदृष्टान्तं दर्शयति—दृष्टिसमागमः चन्द्रे यथा चन्द्राधीनः, तथा मे तद्गात्रसंस्पर्शोऽपि त्वयि त्वदधीनः । यथा तदवलोकितं चन्द्रं पश्यन् तत्प्रणालिकया तां दृष्टवानस्मि तद्वत् तदङ्गस्पृष्टं त्वां स्पृशन् तामेव स्पृष्टवान् भवेयमित्यर्थः ॥६॥ न केवलं वयोतिवर्तनस्मरणमेव व्यथाहेतुः, किंतु कारणान्तरमप्यस्तीत्याह—तदिति । तद्वचनं मे आशये हृदये स्थितं सत्, सदा स्मर्यमाणं तदित्यर्थः । पीतं विषमिव गात्राणि

वयोऽस्या ह्यतिवर्तते मद्भोगसाधनमस्या वयोऽतिवर्तत इत्येतदेवानुशोचामि ॥ ५ ॥ इदानीं प्रियजनस्पृष्टद्रव्यस्पर्शस्य कालविनोदहेतुत्वात्तत्सम्पादनार्थं वायुं प्रार्थयते—वाहीति । हे वात ! कान्ता यतो यत्र वर्तते तं देशं वाहि गच्छ । गत्वा किं करणीयम् ? तत्राह तां स्पृष्ट्वेति । यद्वा यतो यत्र कान्ता वर्तते तत्र वाहि सञ्चर स्वात्मानं स्पृशन्तं वायुं प्रत्येवमुक्तम्, मद्गात्रसंस्पर्शस्तस्यास्सिद्ध्येदिति भावः । तां स्पृष्ट्वा मामपि स्पृशेत्यनेन तस्याः स्पर्शस्सिद्ध्यतीत्युक्तम् । न चैतदन्यतः सेत्स्यतीति सदृष्टान्तं दर्शयति त्वयीति । दृष्टिसमागमः चन्द्रे चन्द्राधीनो यथा तथा मे तद्गात्रसंस्पर्शोऽपि त्वयि त्वदधीनः । यथा चन्द्रं पश्यन् तत्प्रणालिकया तां दृष्टवानस्मि, तद्वत्तदङ्गस्पृष्टं त्वां स्पृशन् तामेव स्पृष्टवान् भवेयमित्यर्थः ॥ ६॥ आशये उदरे, स्थितमिति शेषः । यद्वा आशये हृदये स्थितं हा नाथेति तद्वचनमित्यन्वयः ॥७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्यवयवं दहति। किं तद्वचनम्? तत्राह हा नाथेति। सा सर्वान् भोगान् परित्यज्य मया सहागता। ह्रियमाणा सती रावणेन हरणसमये "न त्वां कुर्मि दशग्रीव भस्म भस्मार्ह तेजसा" इत्युक्तरीत्या पातिव्रत्याग्निना भस्मीकर्तुं समर्थापि "तत्तस्य सदृशं भवेत्" इत्युक्तरीत्या हा नाथेति मन्नाथत्वमेव पुरस्कृत्य मां यदब्रवीत् तन्मे गात्राणि दहति। एतेन रामशोकः सीताविषयकारुण्यमित्यवगम्यते। परदुःखदुःखित्वं हि कारुण्यम्॥ ७॥ अथ सन्तापो जलप्रवेशं विना न शाम्यतीति वक्तुं तस्याग्नित्वं सावयवं रूपयति–तद्वियोगेति। मदनाग्निवर्धकत्वेन वियोगस्येन्धनरूपत्वम्। सन्ततत्वेन

तद्वियोगेन्धनवता तच्चिन्ताविपुलार्चिषा। रात्रिंदिवं शरीरं मे दह्यते मदनाग्निना॥ ८॥
अवगाह्यार्णवं स्वप्स्ये सौमित्रे भवता विना। कथंचित् प्रज्वलन् कामः स मा सुप्तं जले दहेत्॥ ९॥
बह्वेतत्कामयानस्य शक्यमेतेन जीवितुम्। यदहं सा च वामोरूरेकां धरणिमाश्रितौ॥ १०॥

चिन्ताया ज्वालात्वरूपणम्। रात्रिंदिवमिति। "अचतुर–" इत्यादिना सूत्रेण साधुत्वम्। शीतलाशीतलकालाविशेषेण दह्यत इत्यर्थः॥ ८॥ अवगाह्येति। सौमित्रे! कान्तास्मारकेण भवता विना अर्णवमवगाह्य स्वप्स्ये। अनेन लक्ष्मणस्य शेषावतारत्वमुक्तम्। अर्णवशयनं हि शेषिणैव। किं प्रयोजनमित्यत्राह–कथंचिदिति। इदानीं प्रज्वलन् स कामः जले सुप्तं मां कथंचिद्दहेत् कृच्छ्राद्दहेत्। मन्दीभवेदित्यर्थः॥ ९॥ एवं दुःसहदुःखाक्रान्तस्यापि मम जीवनधारणशक्तिस्तया सह एकधरण्याश्रयणात्तज्जीवनप्रवृत्त्युपलम्भाच्च जायत इत्याह–बह्वित्यादिना श्लोकद्वयेन। अहं सा वामोरूश्च एकां धरणिमाश्रिताविति यत् एतद्बहु भूरि जीवनसाधनम्। अतः एतेन कामयानस्य विरहिणो मम जीवितुं शक्यम्। एकशय्याश्रयणन्यायेन कामिनोरेकधरण्याश्रयणमपि जीवनसाधनं भवतीत्यभिप्रायः॥ १०॥ रामानु०–कामयानस्येत्यत्र "ताच्छील्य–" इत्यादिना शानच्॥ १०॥

रात्रिंदिवं रात्रौ च दिवा चेत्यर्थः॥८॥ प्रज्वलन् कामो जले सुप्तं मां कथञ्चिद्दहेत् मन्दीभवेत्। कथञ्चित्प्रज्वलन् कामः स मा सुप्ते जने दहेदिति पाठे–जने सुप्ते सति कथञ्चित्प्रज्वलन् कामः स मा दहेत् स कामः तं जनं न बाधेदित्यर्थः। तस्माद्भवता विना त्वां विहाय अर्णवमवगाह्य स्वप्स्य इति सम्बन्धः॥ ९॥ जीवनहारिहेतुसद्भावेऽपि मज्जीवनकारणमस्तीति चित्तसमाधानं करोति–बह्विति। सा वामोरूरहं च एकां धरणिमाश्रिताविति यत् एतत् बहु भूरिजीवनसाधनम् अत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

केदारस्येति । जीवन्तीं तां शृणोमीति यत् तेन । निरूदकः निरुदकः । केदारः वप्रम् । सोदकस्य केदारस्य उपस्नेहेन उपक्लेदेनेव जीवामि ॥ ११ ॥ कदेति । स्पष्टम् ॥१२॥ रसायनं शरीरसिद्धिकरमौषधविशेषम् । आतुरः रोगी । "आतुरोऽभ्यमितोऽभ्यान्तः" इत्यमरः ॥१३॥ संहतौ श्लिष्टौ ॥१४॥

केदारस्येव केदारः सोदकस्य निरूदकः । उपस्नेहेन जीवामि जीवन्तीं यच्छृणोमि ताम् ॥ ११ ॥ कदा नु खलु सुश्रोणीं शतपत्रायतेक्षणाम् । विजित्य शत्रून् द्रक्ष्यामि सीतां स्फीतामिव श्रियम् ॥ १२ ॥ कदा नु चारु बिम्बोष्ठं तस्याः पद्ममिवाननम् । ईषदुन्नम्य पास्यामि रसायनमिवातुरः ॥ १३ ॥ तस्यास्तु संहतौ पीनौ स्तनौ ताल फलोपमौ । कदा नु खलु सोत्कम्पौ श्लिष्यन्त्या मां भजिष्यतः ॥ १४ ॥ सा नूनमसितापाङ्गी रक्षोमध्यगता सती । मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति ॥ १५ ॥ कथं जनकराजस्य दुहिता सा मम प्रिया । राक्षसीमध्यगा शेते स्नुषा दशरथस्य च ॥ १६ ॥ कदाऽविक्षोभ्यरक्षांसि सा विधूयोत्पतिष्यति । विधूय जलदान्नीलान् शशि रेखा शरत्स्विव ॥ १७ ॥ स्वभावतनुका नूनं शोकेनानशनेन च । भूयस्तनुतरा सीता देशकालविपर्ययात् ॥१८॥ कदा नु राक्षसेन्द्रस्य निधायोरसि सायकान् । सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य मानसम् ॥ १९ ॥

सेति । स्पष्टम् ॥ १५ ॥ कथमिति । स्पष्टम् ॥ १६ ॥ कदेति । अविक्षोभ्यरक्षांसीत्येकं पदम् । अविक्षोभ्याणि दुराधर्षाणि रक्षांसि ॥१७॥ स्वभावेति । देशकालविपर्ययात् देशकालयोर्व्यत्यासात् । सुखावहयोर्देशकालयोरपगमात्तद्विरुद्धयोरुपगमाच्चेत्यर्थः ॥ १८ ॥ सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य मानसमिति । सीतां प्रत्याहृत्य कदा नु शोकमुत्स्रक्ष्यामीत्यर्थः । आस्यं व्यादाय स्वपितीतिवत्साधुः ॥ १९ ॥

एतत्कामयानस्य कामिनो ममैतेन जीवितुं शक्यम् कामिनोरेकशय्याश्रयणवत् एकचरण्याश्रयणमपि जीवनसाधनमिति भावः ॥ १० ॥ जीवनहेत्वन्तरमाह– केदारस्येति । निरूदकः निरुदकः । उपस्नेहेन उपक्लेदेन ॥ ११ ॥ स्फीतां श्रियमिव समृद्धां राज्यलक्ष्मीमिव ॥ १२ ॥ रसायनं शरीरसिद्धिकरमौषधम् । आतुरो रोगी ॥ १३ ॥ संहतौ श्लिष्टौ ॥ १४–१६ ॥ अविक्षोभ्यरक्षांसि इत्येकं पदम् । अविक्षोभ्याणि दुराधर्षाणि रक्षांसि विधूय उत्पतिष्यतीति सम्बन्धः ॥ १७ ॥ स्वभाव तनुका प्रकृत्या कृशशरीरा । देशकालविपर्ययात देशकालव्यत्यासात, सुखसाधनभूतदेशकालयोरभावादित्यर्थः ॥ १८ ॥ सीतां प्रत्याहरिष्यामि शोकमुत्सृज्य

For Private And Personal Use Only

कदा न्विति । स्पष्टम् ॥ २० ॥ शुक्लेतरं मलिनम् ॥ २१ ॥ एवमिति । विलपतः विलपति सति ॥ २२ ॥ आश्वासित इत्यर्धम् । उपासत उपास्त । भ्रातुरपि लक्ष्मणस्य पुरतो रघुनाथस्यैवंविधवचनप्रयोगस्तस्य सर्वविधसेवकत्वात् । अतो नानौचित्यम् ॥ २३॥२४ ॥ रामानु०–आश्वासित इति । उपासत उपास्त । वचनव्यत्यय आर्षः । उपागमदिति वा पाठः ॥ २३ ॥ इति श्रीगोविन्द० श्रीरामायण० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चमः सर्गः ॥ ५ ॥

कदा नु खलु मां साध्वी सीता सुरसुतोपमा । सोत्कण्ठा कण्ठमालम्ब्य मोक्ष्यत्यानन्दजं पयः ॥ २० ॥ कदा शोकमिमं घोरं मैथिलीविप्रयोगजम् । सहसा विप्रमोक्ष्यामि वासः शुक्लेतरं यथा ॥ २१ ॥ एवं विलपतस्तस्य तत्र रामस्य धीमतः । दिनक्षयान्मन्दरुचिर्भास्करोऽस्तमुपागमत् ॥ २२ ॥ आश्वासितो लक्ष्मणेन रामः सन्ध्यामुपासत ॥ २३ ॥ स्मरन् कमलपत्राक्षीं सीतां शोकाकुलीकृतः ॥ २४ ॥ इत्यार्षे० श्रीमद्युद्धकाण्डे पञ्चमः सर्गः ॥ ५ ॥

लङ्कायां तु कृतं कर्म घोरं दृष्ट्वा भयावहम् । राक्षसेन्द्रो हनुमता शक्रेणेव महात्मना । अब्रवीद्राक्षसान् सर्वान् ह्रिया किंचिदवाङ्मुखः ॥ १ ॥ धर्षिता च प्रविष्टा च लङ्का दुष्प्रसहा पुरी । तेन वानरमात्रेण दृष्टा सीता च जानकी ॥ २ ॥

एवं रामवृत्तान्तमुक्त्वा हनुमन्निर्गमकालानन्तरकालिकं रावणवृत्तान्तं वक्तुमुपक्रमते–लङ्कायामिति । घोरं दुर्दर्शम् । शक्रेणेव शक्रतुल्येन । "इवेन सह नित्यसमासो विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्" इति विभक्तेरलोपः ॥ १ ॥ वानरमात्रेण वानरजातीयेन । वानरेष्वल्पेनेति यावत् ॥ २ ॥

मानसमिति सीतां मत्याहृत्य कदानु शोकमुत्स्रक्ष्यामीत्यर्थः । एतत् मुखं व्यादाय स्वपितीतिवदपूर्वकालेऽपि क्त्वाप्रत्ययस्साधुः॥१९॥२०॥ शुक्लेतरं मलिनम् ॥२१॥ एवमिति । विलपतः सतः ॥ २२ ॥ आश्वासित इत्यस्य श्लोकस्योत्तरार्धं तु–स्मरन् कमलपत्राक्षीं सीतां शोकाकुलीकृतः इत्येतत् । स्मरन्निति हेतौ शतृप्रत्ययः । सीतास्मरणाद्धेतोः शोकाकुलीकृतो रामो लक्ष्मणेनाश्वासितः सन्ध्यामुपासत । उपागमदिति वा पाठः ॥ २३ ॥ २४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चमः सर्गः ॥५॥ लङ्कायामिति । हनुमता शक्रेणेव कृतं घोरं कर्म दृष्ट्वा राक्षसानब्रवीत् ॥ १॥ ह्रीबीजमाह–धर्षितेति ।

स०–महात्मना शक्रेणेवेत्यनेन हनुमत्कृतकर्मणः "इन्द्रो वृत्रं हत्वा महानास" इत्युक्तरीत्या महेन्द्रकृतिसाध्यत्वेपि रावणसुतजितेन्द्रप्रयत्नाविषयत्वं सूचयति ॥ १ ॥

For Private And Personal Use Only

चैत्यः प्रासादः नगरप्रधानभूतः प्रासादः । आविला दाहेन आकुला ॥ ३ ॥ अनन्तरं किं वा युक्तं यन्नः समर्थं हितम् । "समर्थस्त्रिषु शक्तिस्थे सम्बन्धार्थे हितेऽपि च" इत्यमरः । यत् कृतम् अनुष्ठितम् । सुकृतं स्वनुष्ठितम् । भवेत्फलवद्भवेत् । तादृशं किम् उच्यतां करिष्यामि । वो भद्र मस्त्वित्यन्वयः ॥ ४ ॥ बलवतस्तव किं मन्त्रेणेत्याशङ्क्य सर्वेषामपि विजयस्य मन्त्रमूलत्वान्मयाऽपि मन्त्रः करणीय इत्याह–मन्त्रमूलमिति ॥ ५ ॥

प्रासादो धर्षितश्चैत्यः प्रवरा राक्षसा हताः । आविला च पुरी लङ्का सर्वा हनुमता कृता ॥ ३ ॥ किं करिष्यामि भद्रं वः किं वा युक्तमनन्तरम् । उच्यतां नः समर्थं यत् कृतं च सुकृतं भवेत् ॥४॥ मन्त्रमूलं हि विजयं प्राहुरार्या मनस्विनः । तस्माद्वै रोचये मन्त्रं रामं प्रति महाबलाः ॥ ५ ॥ त्रिविधाः पुरुषा लोके उत्तमाधममध्यमाः । तेषां तु समवेतानां गुणदोषौ वदाम्यहम् ॥ ६ ॥ मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये । मित्रैर्वापि समानार्थैर्बान्धवैरपि वा हितैः॥७॥ सहितो मन्त्रयित्वा यः कर्मारम्भान् प्रवर्तयेत् । दैवे च कुरुते यत्नं तमाहुः पुरुषोत्तमम् ॥८॥ एकोऽर्थं विमृशेदेको धर्मे प्रकुरुते मनः । एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम् ॥ ९ ॥ गुणदोषावनिश्चित्य त्यक्त्वा धर्मं व्यपाश्रयम् । करिष्यामीति यः कार्यमुपेक्षेत् स नराधमः ॥ १० ॥

मन्त्रस्य करणीयत्वेऽपि स्वयमेव संमन्त्र्यताम्, किं बहुभिरित्याशङ्क्य बहुभिः सह मन्त्रयितुरेवोत्तमत्वं वक्तुं प्रतिज्ञापूर्वकं क्रमेण मन्त्रयितृभेदानाह–त्रिविधा इत्यादिना । समवेतानां सङ्कीर्णस्वरूपाणाम्, लक्षणज्ञानं विना विवेक्तुमशक्यानामित्यर्थः । गुणदोषौ उत्तमलक्षणं गुणम् । अधमलक्षणं दोषम् । मध्यमलक्षणं मिश्रणम् ॥ ६ ॥ हितसंयुक्तैः हितपरैः । समानार्थैः समानसुखदुःखैः । कर्मारम्भान् आरम्भणीयकर्माणि । दैवे दैवसमाश्रयणे कुरुते ॥ ७ ॥ ८ ॥ धर्मे पूर्वोक्तदैवसमाश्रयणे । मनः मनःपूर्वं यत्नम् ॥ ९ ॥ गुणदोषौ हिताहिते । अनिश्चित्य दैवव्यपाश्रयं त्यक्त्वा करिष्यामी

आक्रान्तेत्यर्थः । वानरमात्रेण एकेन निरायुधेन चेत्यर्थः ॥ २ ॥ ३ ॥ किं करिष्यामीति । अनन्तरं किं वा युक्तम् अर्हम् यत् नः समर्थं हितं यत्कृतमनुष्ठितं साधु कृतं स्वनुष्ठितं भवेत् तादृशं किम् उच्यतां करिष्यामि वो भद्रमस्त्वित्यर्थः ॥ ४ ॥ ५ ॥ त्रिविधा इति । समवेतानां सङ्कीर्णस्वरूपाणां लक्षणज्ञानं विना विवेक्तु मशक्यानामित्यर्थः । गुणदोषौ उत्तमलक्षणं गुणम् । अधमलक्षणं दोषम् । मध्यमलक्षणं मिश्रणम् ॥ ६ ॥ मन्त्रिभिरित्यादि । हितसंयुक्तैः हितपरैः । समानार्थैः समान सुखदुःखैः । कर्मारम्भान् आरम्भणीयकर्माणि ॥ ७ ॥ ८ ॥ एक इति । धर्मे प्रकुरुते मन इत्यनेन दैवाश्रयणमुक्तम् ॥ ९ ॥ गुणदोषौ हिताहिते अनिश्चित्य धर्म

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्युपक्रम्य यः कार्यमुपेक्षेत् उपेक्षेत न समाप्नुयात् ॥ १० ॥ यथेति । स्पष्टम् ॥ ११ ॥ उक्तत्रैविध्यं मन्त्रेऽप्यतिदिशति–ऐकमत्यमिति । ऐकमत्यम् एकां मतिमुपागम्य । शास्त्रदृष्टेन स्वभ्यस्तशास्त्रेण । राजदन्तादित्वात्परनिपातः । तद्रूपेण चक्षुषा उपलक्षिताः मन्त्रिणः यत्र मन्त्रे निरताः तम् उत्तममन्त्रमाहुः ॥ १२ ॥ बह्व्य इति । यत्र मन्त्रे । मन्त्रिणां मतयः बह्व्यः बहुधा भूत्वापि अर्थनिर्णये अर्थनिर्णयरूपफलविषये एकतां प्राप्ता भवन्ति

यथेमे पुरुषा नित्यमुत्तमाधममध्यमाः । एवं मन्त्रा हि विज्ञेया उत्तमाधममध्यमाः ॥ ११ ॥ ऐकमत्यमुपागम्य शास्त्रदृष्टेन चक्षुषा । मन्त्रिणो यत्र निरतास्तमाहुर्मन्त्रमुत्तमम् ॥ १२ ॥ बह्व्योऽपि मतयो भूत्वा मन्त्रिणामर्थनिर्णये । पुनर्यत्रैकतां प्राप्ताः स मन्त्रो मध्यमः स्मृतः ॥ १३ ॥ अन्योन्यं मतिमास्थाय यत्र सम्प्रतिभाष्यते । न चैकमत्ये श्रेयोऽस्ति मन्त्रः सोऽधम उच्यते ॥ १४ ॥ तस्मात् सुमन्त्रितं साधु भवन्तो मतिमत्तमाः । कार्यं सम्प्रतिपद्यन्तामेतत् कृत्यं मतं मम ॥ १५ ॥

स मन्त्रो मध्यमः स्मृतः, नीतिज्ञैरिति शेषः ॥ १३ ॥ यत्र मन्त्रे । मन्त्रिभिः अन्योन्यं मतिं स्वां स्वां बुद्धिम् । आस्थाय प्रधानीकृत्य । संप्रतिभाष्यते व्यवह्रियते । अनेनोत्तममन्त्रव्यावृत्तिरुक्ता । मध्यममन्त्रव्यावृत्त्यर्थमाह–न चेति । ऐकमत्ये तेषां मन्त्रिणां श्रेयश्च प्रीतिश्च नास्ति, स मन्त्रोऽधम उच्यते ॥ १४ ॥ सुमन्त्रितं सुनिश्चितम् । साधु समीचीनम् । कार्यं संप्रतिपद्यन्ताम् ऐकमत्येन जानन्तु । एतत् ऐकमत्येन सुनिश्चितं कार्यम् । मम कृत्यम्

व्यपाश्रयश्च त्यक्त्वा करिष्यामीत्युपक्रम्य यः कार्यमुपेक्षेत उपेक्षेत न समाप्नुयात स नराधमः ॥ १० ॥ ११ ॥ शास्त्रदृष्टेन स्वदृष्टशास्त्रेण तद्रूपेण चक्षुषा उपलक्षिताः मन्त्रिणः ऐकमत्यम् एकमतित्वं प्राप्य यत्र मन्त्रे निरताः तं मन्त्रमुत्तममाहुरिति सम्बन्धः ॥ १२ ॥ बह्व्योऽपीति । यत्र मन्त्रे मन्त्रिणां मतयो बह्व्योऽपि बहुमार्गा भूत्वाऽपि पुनः पश्चादर्थनिर्णये अर्थनिश्चयरूपफले एकतामविरोधं प्राप्ताः स मध्यमः । बह्व्योऽपि मतयो गत्वेति पाठे मन्त्रिणो ह्यर्थनिर्णये इति पाठः । तदा यत्र मन्त्रे मन्त्रिणो बह्व्यो मतयः बह्वीर्मतीर्गत्वा प्राप्य अर्थनिर्णये पुनरैकमत्यं प्राप्ताः स मध्यम इति सम्बन्धः ॥ १३ ॥ अन्योन्यमिति । यत्र मन्त्रे अन्योन्यं मतिमास्थाय परस्परं भिन्नमतत्वं प्राप्य सम्प्रतिभाष्यते विरुद्धभाषणं क्रियते न चैकमत्ये श्रेयोऽस्ति ऐकमत्यविषयं श्रेयो नास्ति ऐकमत्यजनकप्रतिपादनं नास्तीति यावत । स मन्त्रोऽधम इति योजना ॥ १४ ॥ उपसंहरति–तस्मादिति । सुमन्त्रितं यथा तथा भवन्तः कार्यं संप्रतिपद्यन्ताम् एतन्मन्त्रणमेव कृत्यं मम मतमिति सम्बन्धः ॥ १५ ॥ ॥ २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतिशयेन कर्तव्यम् ॥ १५ ॥ गतं तु गतमेव, किं मन्त्रकरणे इतः किं नश्छिन्नमित्यत आह—वानराणामिति । अभ्येति अभ्येष्यति । "वर्तमानसामीप्ये वर्तमानवद्वा" इति वर्तमाननिर्देशः । उपरोधकः उपरोद्धुम् । क्रियार्थायां क्रियायां ण्वुल् ॥१६॥ सागरे विद्यमाने कथमस्मानुपरोत्स्यति ? तत्राह—

वानराणां हि वीराणां सहस्रैः परिवारितः । रामोऽभ्येति पुरीं लङ्कामस्माकमुपरोधकः ॥१६॥ तरिष्यति च सुव्यक्तं राघवः सागरं सुखम् ॥ १७ ॥ तरसा युक्तरूपेण सानुजः सबलानुगः । समुद्रमुच्छोषयति वीर्येणान्यत् करोति वा ॥ १८ ॥ अस्मिन्नेवङ्गते कार्ये विरुद्धे वानरैः सह । हितं पुरे च सैन्ये च सर्वं सम्मन्त्र्यतां मम ॥ १९ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षष्ठः सर्गः ॥ ६ ॥

इत्युक्ता राक्षसेन्द्रेण राक्षसास्ते महाबलाः । ऊचुः प्राञ्जलयः सर्वे रावणं राक्षसेश्वरम् । द्विषत्पक्षमविज्ञाय नीतिबाह्यास्त्वबुद्धयः । [अविज्ञायात्मपक्षं च राजानं भीषयन्ति हि] ॥ १ ॥ राजन् परिघशक्त्यृष्टिशूलपट्टिशसङ्कुलम् । सुमहन्नो बलं कस्माद्विषादं भजते भवान् ॥ २ ॥

तरिष्यतीति सार्द्धश्लोकः । उच्छोषयति उच्छोषयिष्यति । अन्यत् सेतुबन्धादिकं वा करोति करिष्यति ॥ १७ ॥ १८ ॥ अस्मिन् लङ्कानिरोधनरूपे कार्ये । एवंगते उक्तरीत्या प्रवृत्ते । वानरैः सह विरुद्धे विरोधे च प्राप्ते । भावे निष्ठा । पुरादिषु हितं यत्तत्सर्वं संमन्त्र्यतामित्यर्थः ॥ १९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्ठः सर्गः ॥ ६ ॥

एवं रावणवचनमाकर्ण्य अविदितरघुनाथप्रभावा मदोद्धता राक्षसास्तद्बलवर्णनपूर्वकं रावणं प्रशंसन्ति—इत्युक्ता इत्यादिना । सार्धश्लोक एकान्वयः । द्विषत्पक्षं द्विषद्बलम् । "पक्षो मासार्धके पार्श्वे गृहे सूर्यविरोधयोः । केशादेः परितो वृन्दे बले सखिसहाययोः ॥" इति विश्वः ॥ १ ॥ परिघः परितो

मन्त्रस्य को विषय इत्याकाङ्क्षायामाह—वानराणामिति । अभ्येति अचिरादेष्यति । उपरोधकः उपरोद्धुम् ॥ १६ ॥ तरसा बलेन युक्तरूपेण अत्यन्तमुचितेन सबलानुगः बलोपेतानुचरसहितः ॥ १७ ॥ सागरं कथं तरिष्यतीत्यत्राह—समुद्रमिति । उच्छोषयति उच्छोषयिष्यति । अन्यत् सेतुबन्धादिकं करिष्यति ॥ १८ ॥ अस्मिन् लङ्कानिरोधरूपे कार्ये एवङ्गते मदुक्तरीत्या प्रवृत्ते वानरैः सह विरुद्धे विरोधे च प्राप्ते मम पुरादिषु हितं यत् तत्सर्वं सम्मन्त्र्यतामित्यन्वयः ॥ १९ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षष्ठः सर्गः ॥ ६ ॥ इत्युक्ता इत्यादिसार्धश्लोकमेकं वाक्यम् । द्विषत्पक्षं द्विषद्बलम् ॥ १ ॥ परिघ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हननक्षमो गदाविशेषः। "परिघः परिघातनः" इत्यमरः। शक्तिः दीर्घयष्टिः। ऋष्टिः असिः। "खड्गे तु निस्त्रिंशचन्द्रहासासिऋष्टयः" इत्यमरः। शूलं प्रसिद्धम्। पट्टिशः खड्गविशेषः। तैः सङ्कुलं व्याप्तं बलमस्ति। समग्रबले एवं विद्यमाने कस्माद्धेतोः भवान् विषादं भजत इति योजना। अत्र सुमहन्नो बलमित्यत्र बलं नास्तीति प्रामादिका भाव्यनर्थसूचिकाखिलोक्तिः ॥ २ ॥ रामानु०–एवं रावणवचः श्रुत्वा अविदितरामबला राक्षसाः सुरासुरविदितं भवदीयबलं विस्मृत्य मानुषमात्राच्छत्रोः किमर्थं शङ्कस इति प्रशंसापूर्वकं रावणं प्रोत्साहयन्ति–राजन्नित्यादिना ॥ २ ॥ तिष्ठतु सैन्यम्, त्वमेक एव समस्तशत्रुविद्रावणक्षम इत्याशये

त्वया भोगवतीं गत्वा निर्जिताः पन्नगा युधि ॥ ३ ॥ कैलासशिखरावासी यक्षैर्बहुभिरावृतः। सुमहत् कदनं कृत्वा वश्यस्ते धनदः कृतः॥४॥ स महेश्वरसख्येन श्लाघमानस्त्वया विभो। निर्जितः समरे रोषाल्लोकपालो महाबलः ॥५॥ विनिहत्य च यक्षौघान् विक्षोभ्य च विगृह्य च। त्वया कैलासशिखराद्विमानमिदमाहृतम् ॥ ६ ॥ मयेन दानवेन्द्रेण त्वद्भयात् सख्यमिच्छता। दुहिता तव भार्यार्थे दत्ता राक्षसपुङ्गव ॥७॥ दानवेन्द्रो मधुर्नाम वीर्योत्सिक्तो दुरासदः। विगृह्य वशमानीतः कुम्भीनस्याः सुखावहः ॥ ८ ॥ निर्जितास्ते महाबाहो नागा गत्वा रसातलम् । वासुकिस्तक्षकः शङ्खो जटी च वशमाहृताः ॥ ९ ॥ अक्षया बलवन्तश्च शूरा लब्धवराः पुनः। त्वया संवत्सरं युद्ध्वा समरे दानवा विभो ॥ १० ॥ स्वबलं समुपाश्रित्य नीता वशमरिन्दम। मायाश्चाधिगतास्तत्र बहवो रक्षसाधिप। [निर्जिताः समरे रोषाल्लोकपाला महाबलाः। देवलोकमितो गत्वा शक्रश्चापि विनिर्जितः॥] ॥ ११ ॥

नाह–त्वयेत्यादिना। सार्धश्लोक एकान्वयः। भोगवतीं सर्पराजनगरीम्। कदनं युद्धम् ॥ ३ ॥ ४ स इति। स्पष्टम् ॥५॥ विमानं पुष्पकम् ॥ ६ ॥ दुहिता मन्दोदरी। यद्यपि मयेनाभिजात्यभ्रमाद्दत्तेत्युत्तरे वक्ष्यति, तथाप्यत्र प्रशंसायां भयाद्दत्तेत्युक्तम् ॥ ७ ॥ दानवेन्द्रः मधुः। कुम्भीनसी रावणभगिनी। सुखमावहतीति सुखावहः, भर्ता ॥ ८ ॥ जटी सर्पविशेषस्य नाम। त्वया भोगवतीमित्यत्र तक्षकादिभिन्नकर्कोटकादिजयोक्तिरिति न पौनरुक्त्यम् ॥९॥ अक्षया इत्यादिश्लोकद्वयमेकान्वयम्। लब्धवराः, ब्रह्मणेति शेषः। अक्षयाः चूर्णीकरणेऽपि पुनरुत्पत्तिमत्त्वेन क्षयरहिता इत्यर्थः। दानवाः शक्त्यृष्टिशूलपट्टिशसङ्कुलं बलं नः, अस्तीति शेषः ॥ २–५ ॥ विमानं पुष्पकम् ॥ ६ ॥ दुहिता मन्दोदरी ॥७॥ कुम्भीनस्यास्तव स्वसुः सुखावहः भर्ता ॥८॥ जटी नागविशेषः ॥ ९ ॥ अक्षया इत्यादि श्लोकद्वयम्। दानवाः कालकेयाः। तत्र तत्संवासान्मायाश्चाधिगता इति सम्बन्धः ॥ १०–१२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालकेयाः । तत्र कालकेयसकाशात् । बह्वः बह्व्यः । “ वोतो गुणवचनात् ” इति पक्षे ङीषभावः ॥ १० ॥ ११ ॥ चतुर्विधबलानुगाः रथगजतुरग पदातिभेदेन चतुर्विधानि बलानि पृष्ठगानि येषां ते तथा ॥ १२॥ मृत्युदण्डेत्यादिश्लोकद्वयमेकान्वयम् । मृत्युदण्डः यमदण्डः स एव महाग्राहः महानक्रः यस्मिन् । शाल्मलयः कण्टकशाल्मलिवृक्षाकारायुधविशेषाः त एव द्रुमाः तैर्मण्डितम् । मृत्युः यमः । प्रतिषेधितः युद्धादपक्रामितः ॥ १३ ॥ १४ ॥

शूराश्च बलवन्तश्च वरुणस्य सुता रणे । निर्जितास्ते महाबाहो चतुर्विधबलानुगाः ॥ १२ ॥ मृत्युदण्डमहाग्राहं शाल्मलिद्रुममण्डितम् । कालपाशमहावीचिं यमकिङ्करपन्नगम् ॥ १३ ॥ अवगाह्य त्वया राजन् यमस्य बलसागरम् । जयश्च विपुलः प्राप्तो मृत्युश्च प्रतिषेधितः ॥ १४ ॥ सुयुद्धेन च ते सर्वे लोकास्तत्र विलोलिताः ॥ १५ ॥ क्षत्रियै बहुभिर्वीरैः शक्रतुल्यपराक्रमैः । आसीद्वसुमती पूर्णा महद्भिरिव पादपैः ॥ १६ ॥ तेषां वीर्यगुणोत्साहैर्न समो राघवो रणे । प्रसह्य ते त्वया राजन् हताः परमदुर्जयाः ॥ १७ ॥ तिष्ठ वा किं महाराज श्रमेण तव वानरान् । अयमेको महाबाहुरिन्द्रजित् क्षपयिष्यति ॥ १८ ॥ अनेन हि महाराज माहेश्वरमनुत्तमम् । इष्ट्वा यज्ञं वरो लब्धो लोके परमदुर्लभः ॥ १९ ॥ शक्तितोमरमीनं च विनिकीर्णान्त्रशैवलम् । गजकच्छपसम्बाधमश्वमण्डूकसङ्कुलम् ॥ २० ॥ रुद्रादित्यमहाग्राहं मरुद्वसुमहोरगम् । रथाश्वगजतोयौघं पदातिपुलिनं महत् ॥ २१ ॥

सुयुद्धेनेत्यर्धम् । सुयुद्धेन स्वल्पयुद्धेनेत्यर्थः । विलोलिताः द्राविताः ॥ १५ ॥ क्षत्रियैः अनरण्यप्रभृतिभिः ॥ १६ ॥ तेषामिति । न समो राघव इति । तेभ्योऽपि निहीनबलः सुखेन निग्राह्य इति भावः ॥ १७ ॥ तिष्ठ वेति । स्पष्टम् ॥ १८ ॥ माहेश्वरं महेश्वरप्रीतिकरम् ॥ १९ ॥ शक्तितोमरेत्यादिश्लोक

मृत्युदण्डेत्यादि श्लोकद्वयम् । शाल्मलिद्रुमभूषितं शाल्मलयः आयुधविशेषाः त एव द्रुमाः तैर्भूषितम् ॥१२–१८ ॥ माहेश्वरं महेश्वरप्रीतिकरम् । इष्ट्वा कृत्वा ॥१९॥ युद्धं सागरत्वेन निरूपयति–शक्तितोमरेत्यादिना । विनिकीर्णानि व्याप्तानि ॥ २० ॥ महत् महान्तम् ॥ २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रयमेकान्वयम् । दैवतपतिः इन्द्रः ॥ २०–२२ ॥ पितामहेति । स्पष्टम् ॥ २३ ॥ विसृज प्रेषय । यावन्नयति नेष्यति ॥ २४ ॥ अयुक्ता असम्भाविता । प्राकृतात् क्षुद्रात् हनुमतः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तमः सर्गः ॥ ७ ॥

अनेन हि समासाद्य देवानां बलसागरम् । गृहीतो दैवतपतिर्लङ्कां चापि प्रवेशितः ॥ २२ ॥ पितामहनियोगाच्च मुक्तः शम्बरवृत्रहा । गतस्त्रिविष्टपं राजन् सर्वदेवनमस्कृतः ॥ २३ ॥ तमेव त्वं महाराज विसृजेन्द्रजितं सुतम् । यावद्वानरसेनां तां सरामां नयति क्षयम् ॥ २४ ॥ राजन्नापदयुक्तेयमागता प्राकृताज्जनात् । हृदि नैव त्वया कार्या त्वं वधिष्यसि राघवम् ॥२५॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदि०श्रीमद्युद्धकाण्डे सप्तमः सर्गः ॥७॥

ततो नीलाम्बुदनिभः प्रहस्तो नाम राक्षसः । अब्रवीत् प्राञ्जलिर्वाक्यं शूरः सेनापतिस्तदा ॥ १ ॥ देवदानवगन्धर्वाः पिशाचपतगोरगाः । न त्वां धर्षयितुं शक्ताः किं पुनर्वानरा रणे ॥ २ ॥ सर्वे प्रमत्ता विश्वस्ता वञ्चिताः स्म हनूमता । न हि मे जीवतो गच्छेज्जीवन् स वनगोचरः ॥ ३ ॥

एवं मन्त्रिभिः सह संमन्त्र्य भूयोऽभिहिते सकलसचिवप्रधानः प्रहस्तः स्वाभिमतमर्थं राज्ञे निवेदयति–तत इति । स्पष्टम् ॥ १ ॥ देवेति । स्पष्टम् ॥ २ ॥ हनुमतः पौरुषं प्रत्यक्षतो दृष्ट्वा कथमेवमुच्यत इत्यत्राह–सर्वे इति । विश्वस्ताः परिभवितुमस्मान् कोऽपि न शक्त इति विश्वस्ताः विस्रब्धाः । दैवतपतिः इन्द्रः ॥ २२ ॥ २३ ॥ विसृज प्रेषय । यावन्नयति नेष्यति । " यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् ॥ २४ ॥ अयुक्ता असम्भाविता ॥२५॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तमः सर्गः ॥ ७ ॥ १ ॥ २ ॥ हनुमतः पौरुषं प्रत्यक्षतो दृष्ट्वापि कथमेवं ब्रूष इत्यत्राह–सर्वे इत्यादि । प्रमत्ताः भोगादिपरवशाः । विश्वस्ताः अस्मान् परिभवितुं कोऽपि न शक्तिमानिति विस्रब्धाः अत एव वञ्चिताः । मामादिकः परिभवो न न्यूनतामावहतीति भावः । जीवत इत्यनादरे षष्ठी ॥ ३ ॥

स०–दैवतपतिः इन्द्रः । लङ्कायां तत्रापि कारागृह इति शेषः । सागरमित्यर्धर्चादिः अतो महदिति पूर्वश्लोकस्थविशेषणं युक्तम् । " दीप्तानलार्कद्युतिमप्रमेयम् " इत्यत्र प्रमेयदीपिकायामप्रमेयत्वस्य युताविव महदित्यस्य षड्व्रीहिघटकपुलिनपदार्थे वाऽन्वयः । अतो नपुंसकत्वोपपत्तिः । महान्तमिति लिङ्गविपर्यासो वा । दैवतशब्दग्रहणेन तेषां नपुंसकत्वं ध्वन्यते ॥ २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रामादिकशत्रुपरिभवो न न्यूनतामापादयतीति भावः ॥३॥ रामानु०—प्रमत्ताः अनवहिताः । विश्वस्ताः एको वानरः किं करिष्यतीत्यवज्ञया विस्रब्धाः, अत एव वञ्चिताः । नहीति । जीवत इत्यनादरे षष्ठी ॥ ३ ॥ सर्वामिति । स्पष्टम् ॥ ४ ॥ रामानु०—करोमि अचिरादेव करिष्यामि । " वर्तमानसामीप्ये वर्तमानवद्वा " इति भविष्यदर्थे लट् ॥ ४ ॥

सर्वां सागरपर्यन्तां सशैलवनकाननाम् । करोम्यवानरां भूमिमाज्ञापयतु मा भवान् ॥ ४ ॥ रक्षां चैव विधास्यामि वानराद्रजनीचर । नागमिष्यति ते दुःखं किञ्चिदात्मापराधजम् ॥ ५ ॥ अब्रवीत्तु सुसंक्रुद्धो दुर्मुखो नाम राक्षसः । इदं न क्षमणीयं हि सर्वेषां नः प्रधर्षणम् ॥ ६ ॥ अयं परिभवो भूयः पुरस्यान्तःपुरस्य च । श्रीमतो राक्षसेन्द्रस्य वानरेण प्रधर्षणम् ॥७॥ अस्मिन् मुहूर्ते हत्वैको निवर्तिष्यामि वानरान् । प्रविष्टान् सागरं भीममम्बरं वा रसातलम् ॥ ८ ॥ ततोऽब्रवीत् सुसंक्रुद्धो वज्रदंष्ट्रो महाबलः । प्रगृह्य परिघं घोरं मांसशोणितरूषितम् ॥ ९ ॥ किं वो हनुमता कार्यं कृपणेन तपस्विना । रामे तिष्ठति दुर्धर्षे ससुग्रीवे सलक्ष्मणे ॥१०॥ अद्य रामं ससुग्रीवं परिघेण सलक्ष्मणम् । आगमिष्यामि हत्वैको विक्षोभ्य हरिवाहिनीम् ॥ ११ ॥ इदं ममापरं वाक्यं शृणु राजन् यदीच्छसि । उपाय कुशलो ह्येव जयेच्छत्रूनतन्द्रितः ॥ १२ ॥

आत्मापराधः सीताहरणरूपो व्यतिक्रमः ॥ ५ ॥ हि यस्माद्वानरेण कृतमिदं कर्म सर्वेषां नः प्रधर्षणरूपम् । भूयः तदुपरि पुरस्यान्तःपुरस्य च परिभवरूपम् । अथ च राक्षसेन्द्रस्य प्रधर्षणरूपम् अतो न क्षमणीयमित्यर्थः ॥ ६ ॥ ७ ॥ ततः किं करिष्यसीत्यत आह—अस्मिन्निति । स्पष्टम् ॥ ८ ॥ रामानु०—निवर्तिष्यामि निवर्तिष्ये ॥ ८ ॥ तत इति । स्पष्टम् ॥ ९ ॥ कृपणेन गूढसञ्चारप्रकटितभयेन । तपस्विना शोच्येन ॥ १० ॥ रामानु०—तपस्विना तपस्व्याहारभूतफलाशिनेत्यर्थः ॥ १० ॥ अद्येति । स्पष्टम् ॥ ११ ॥ तद्वाक्यं किमित्याकाङ्क्षायामुपायप्रतिपादकं वाक्यं वक्तुमादावुपायं प्रशंसति—

करोमि करिष्यामि ॥ ४ ॥ आत्मापराधजं सीतापहरणरूपापराधजम् ॥५॥ इदमित्यादि सार्धश्लोकमेकं वाक्यम् । हि यस्मात् वानरेण कृतमिदं प्रधर्षणं सर्वेषां नः प्रधर्षणरूपं भूयस्तदुपरि पुरस्यान्तःपुरस्य च परिभवरूपम् अथ राक्षसेन्द्रप्रधर्षणमक्षवधादिरूपम् अतो न क्षमणीयमित्यन्वयः ॥ ६–९ ॥ किमिति । कृपणेन प्रकाशसञ्चरणे भयात् गूढं राघौ कृतकार्येण । तपस्विना शोच्येन ॥ १० ॥ अद्य राममित्यस्य वास्तवार्थस्तु—लक्ष्मणं रामं विनेति शेषः । सुग्रीवं हत्वा आगमिष्यामीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपायेति ॥ १२ ॥ विवक्षितमुपायमेवाह–कामरूपेत्यादिना । निश्चिताः निश्चितवन्तः । राक्षसा वा सहस्राणीति । सहस्रशब्दस्य सङ्ख्येयपरत्वेऽपि शब्दस्वाभाव्यान्नपुंसकत्वम् । किमिति ब्रूयुस्तत्राह–प्रेषिता इति । अस्यान्ते इतिकरणं द्रष्टव्यम् ॥ १३–१५ ॥ ते वयं तत्र समीपे याम । यामेति

कामरूपधराः शूराः सुभीमा भीमदर्शनाः । राक्षसा वा सहस्राणि राक्षसाधिप निश्चिताः ॥ १३ ॥ काकुत्स्थमुपसङ्गम्य बिभ्रतो मानुषं वपुः । सर्वे ह्यसम्भ्रमा भूत्वा ब्रुवन्तु रघुसत्तमम् ॥ १४ ॥ प्रेषिता भरतेन स्म भ्रात्रा तव यवीयसा । [तवागमनमुद्दिश्य कृत्यमात्ययिकं त्विति ॥] स हि सेनां समुत्थाप्य क्षिप्रमेवोपयास्यति ॥ १५ ॥ ततो वयमितस्तूर्णं शूलशक्तिगदाधराः । चापबाणासिहस्ताश्च त्वरितास्तत्र याम ह ॥ १६ ॥ आकाशे गणशः स्थित्वा हत्वा तां हरिवाहिनीम् । अश्मशस्त्रमहावृष्ट्या प्रापयाम यमक्षयम् ॥ १७ ॥ एवं चेदुपसर्पेतामनयं रामलक्ष्मणौ । अवश्यमपनीतेन जहतामेव जीवितम् ॥ १८ ॥ कौम्भकर्णिस्ततो वीरो निकुम्भो नाम वीर्यवान् । अब्रवीत् परमक्रुद्धो रावणं लोकरावणम् ॥ १९ ॥ सर्वे भवन्तस्तिष्ठन्तु महाराजेन सङ्गताः । अहमेको हनिष्यामि राघवं सहलक्ष्मणम् । सुग्रीवं च हनूमन्तं सर्वानेव च वानरान् ॥ २० ॥

लोटि रूपम् ॥ १६ ॥ आकाश इति । स्पष्टम् ॥ १७ ॥ एवं कृते किं स्यादित्यत्राह–एवं चेदिति । रामलक्ष्मणौ अनयम् अस्मत्कृतकैतवापरिज्ञानेन विश्वासं यद्युपसर्पेतां ततस्तेन अपनीतेन अपनयेन जीवितं जहतामेव, जह्यातामेवेत्यर्थः ॥ १८ ॥ कौम्भकर्णिरिति । स्पष्टम् ॥ १९ ॥ सर्व इत्यादि

सम्बन्धः ॥ ११ ॥ १२ ॥ राक्षसा वेत्यादि श्लोकद्वयमेकं वाक्यम् । सहस्रशब्दस्य नित्यनपुंसकत्वाद्राक्षसा इत्यनेन सामानाधिकरण्यम् । निश्चिताः निश्चितवन्तः इति कृत्वा भरतेन प्रेषिता इति ब्रुवन्त्वित्यन्वयः ॥ १३ ॥ १४ ॥ स हि सेनामित्यर्धं भिन्नं वाक्यम् । सः रामः ॥ १५ ॥ ततः किम् ? तत्राह–तत इति । ते वयं तत्र तत्समीपं यामेत्यन्वयः । यामेति लोडुत्तमपुरुषबहुवचनम् ॥१६॥१७॥ एवं चेदिति । रामलक्ष्मणौ अनयम् एवं चेदुपसर्पेताम् अस्मत्कैतवाज्ञानेन स्वकीयत्वबुद्धिजनितविस्रब्धत्वरूपानीतिम् एवं मदुक्तरीत्या यद्यवगच्छेतामित्यर्थः । अतस्तेनापनीतेन अपनयेन अवश्यं रामलक्ष्मणौ जीवितं जहतामेव, त्यजेतामेवेत्यर्थः ॥ १८ ॥ कौम्भकर्णिः कुम्भकर्णापत्यम् ॥ १९ ॥ सर्व इत्यादि सार्धश्लोकमेकं वाक्यम् । अहमित्यस्य वास्तवार्थस्तु–राघवादीन्, विनेति शेषः । वानरान् विनेष्यामीति सम्बन्धः ॥ २०–२२ ॥ ॥ २४ ॥

For Private And Personal Use Only

सार्धश्लोकमेकं वाक्यम् ॥ २० ॥ तत इत्यादिसार्धश्लोकत्रयमेकान्वयम् । मधुवारुणीं मधुरूपां वारुणीम् । रणकुञ्जरं रणाप्रधृष्यम् । स्वःस्था इत्यमङ्गलोक्तिः ॥ २१–२४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टमः सर्गः ॥ ८ ॥

ततो वज्रहनुर्नाम राक्षसः पर्वतोपमः । क्रुद्धः परिलिहन् वक्त्रं जिह्वया वाक्यमब्रवीत् ॥ २१ ॥ स्वैरं कुर्वन्तु कार्याणि भवन्तो विगतज्वराः । एकोऽहं भक्षयिष्यामि तान् सर्वान् हरियूथपान् ॥ २२ ॥ स्वस्थाः क्रीडन्तु निश्चिन्ताः पिबन्तो मधुवारुणीम् ॥२३॥ अहमेको वधिष्यामि सुग्रीवं सहलक्ष्मणम् । अङ्गदं च हनूमन्तं रामं च रणकुञ्जरम् ॥ २४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टमः सर्गः ॥ ८ ॥

ततो निकुम्भो रभसः सूर्यशत्रुर्महाबलः । सुप्तघ्नो यज्ञहा रक्षो महापार्श्वो महोदरः ॥ १ ॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः । इन्द्रजिच्च महातेजा बलवान् रावणात्मजः ॥ २ ॥ प्रहस्तोऽथ विरूपाक्षो वज्रदंष्ट्रो महाबलः । धूम्राक्षश्चातिकायश्च दुर्मुखश्चैव राक्षसः ॥ ३ ॥ परिघान् पट्टिशान् प्रासान् शक्तिशूलपरश्वधान् । चापानि च सबाणानि खड्गांश्च विपुलान् शितान् ॥ ४ ॥ प्रगृह्य परमक्रुद्धाः समुत्पत्य च राक्षसाः । अब्रुवन् रावणं सर्वे प्रदीप्ता इव तेजसा ॥ ५ ॥ अद्य रामं वधिष्यामः सुग्रीवं च सलक्ष्मणम् । कृपणं च हनूमन्तं लङ्का येन प्रधर्षिता ॥ ६ ॥

अथ निकुम्भमतमेवानुसरन्तः सर्वेऽपि प्रधाना अहमहमिकया समुत्थाय शत्रुवधोद्युक्ताः । तमुद्योगं नीतिशास्त्रज्ञो विभीषणः प्रतिषिद्धवानित्याह–तत इत्यादि श्लोकषट्कमेकं वाक्यम् । आदौ निकुम्भोपादानं निकुम्भमतानुसरणसूचनार्थम् । समुत्पत्य आसनेभ्यः समुत्थाय । प्रधर्षितेत्यनन्तरमिति

मधुवारुणीं मधुरूपां वारुणीम् । रणकुञ्जरं रणाप्रधृष्यम् ॥२३॥२४॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टमः सर्गः ॥८॥
तत इत्यादि श्लोकषट्कमेकं वाक्यम् । तस्य अद्य रामं वधिष्याम इत्यब्रुवन्निति क्रियया सम्बन्धः । वस्तुतस्तु–लक्ष्मणं रामं विना सुग्रीवादीन् वधिष्याम इति सम्बन्धः।

करणं द्रष्टव्यम् ॥ १–६ ॥ तानिति । क्रियाभेदात्तानित्यस्य न पुनरुक्तिः ॥ ७ ॥ प्रहस्तादीनां प्रधानानां संनिहितत्वाद्रावणिं वा रावणं वा प्रत्युक्तिः । मध्ये कांश्चित्सचिवान् प्रति वोक्तिः । विक्रमस्य नायमवसर इति दर्शयितुं सामान्येन विक्रमकालानाह–अप्युपायैरिति । तातेत्यभिमुखीकरणाय सम्बोधनम् । त्रिभिः सामदानभेदरूपैः उपायैरपि योऽर्थः लब्धुं न शक्यते तस्य सिद्धये तान् नीतिशास्त्रप्रसिद्धान् विक्रमकालान् युक्तानाहुः । तदुक्तं कामन्द

तान् गृहीतायुधान् सर्वान् वारयित्वा विभीषणः । अब्रवीत् प्राञ्जलिर्वाक्यं पुनः प्रत्युपवेश्य तान् ॥ ७ ॥
अप्युपायैस्त्रिभिस्तात योऽर्थः प्राप्तुं न शक्यते । तस्य विक्रमकालांस्तान् युक्तानाहुर्मनीषिणः ॥ ८ ॥
प्रमत्तेष्वभियुक्तेषु दैवेन प्रहतेषु च । विक्रमास्तात सिद्ध्यन्ति परीक्ष्य विधिना कृताः ॥ ९ ॥
अप्रमत्तं कथं तं तु विजिगीषुं बले स्थितम् । जितरोषं दुराधर्षं प्रधर्षयितुमिच्छथ ॥ १० ॥

केन–" सामादीनामुपायानां त्रयाणां विफले नये । विनयेन्नयसम्पन्नो दण्डं दण्ड्येषु दण्डभृत् ॥" इति । तथा च नायं दण्डस्य काल इत्युक्तम् ॥ ८ ॥ न केवलं दण्डस्याकालिकत्वम्, दण्डयत्वं च ते शत्रोर्नास्तीत्यभिप्रायेणाह–प्रमत्तेष्विति । प्रमत्तेषु अनवधानेषु, विषयासक्तेष्वित्यर्थः । अभियुक्तेषु ज्ञानिषु, विरक्तेष्विति यावत् । यद्वा सामन्तैराक्रान्तेषु । दैवेन भाग्येन । प्रहतेषु क्षीयमाणसम्पत्स्वित्यर्थः । चकाराद्वालवृद्धादिषु । विधिना नीतिशास्त्रोक्तरीत्या । परीक्ष्य मन्त्रिभिर्विचार्य । कृताः विक्रमाः विग्रहाः सिद्ध्यन्ति, नान्यत्रेत्यर्थः । यथाऽऽह कामन्दकः–" बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः । भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा । विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः । दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसंयुतः । अदेशस्थो बहुरिपुर्युक्तोऽकालेन यश्च सः । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी । एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम् ॥" इति ॥ ९ ॥ रामस्तु न तादृश इत्याह–अप्रमत्तमिति । अप्रमत्तं

समुत्पत्य उत्थाय ॥१–७॥ अपीति । त्रिभिरप्युपायैः सामदानभेदैः । तस्य अर्थस्य प्राप्तय इति विपरिणामः । विक्रमकालान् दण्डकालान् । तान् प्रसिद्धान् । उक्तान् शास्त्रचोदितान् ॥८॥ तानेव कालानाह–प्रमत्तेष्वित्यादि । प्रमत्तेषु अनवहितेषु । अभियुक्तेषु शत्रुभिराक्रान्तेषु । दैवेन प्रहतेषु दैवोपहतेषु । विधिना शास्त्ररीत्या ॥९॥ प्रमादादिदोषराहित्यं रामे दर्शयति–अप्रमत्तमिति । जितरोषमित्यनेन पापाभावात् दैवोपहतत्वाभाव उक्तः । इतरविशेषणत्रयेण अन्योपरुद्धत्वाभावः । राक्षसा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सावधानम् । तुशब्दोऽवधारणे । बले स्थितं स्थिरबलमित्यर्थः । जितरोषम् अकाले रोषरहितमित्यर्थः । इच्छयेति पूर्वं रावणं प्रति वचनम्, अत्र सर्वान् प्रतीति बहुवचनम् ॥ १० ॥ राम इदानीं दैवानुपहत इत्यत्र उदाहरणमाह–समुद्रमिति । स्पष्टम् ॥ ११ ॥ बलानीति । परेषां रामादीनाम् ॥ १२ ॥ अनपराधिनि निष्कारणवैरकरणमप्यपरमनुचितमित्याह–किं चेत्यादि ॥ १३ ॥ रामानु०–किं चेत्यस्य किमिति पदच्छेदः । किन्तु राक्षसराजस्येति वा पाठः ॥ १३ ॥ खरवध एव प्रथमापराध इत्याशङ्क्याह–खर इति । दुर्वृत्ततया स्ववधप्रवृत्तखरवधे रामस्य नापकारगन्धोऽपीति भावः । निहतो यदि,

समुद्रं लङ्घयित्वा तु घोरं नदनदीपतिम् । कृतं हनुमता कर्म दुष्करं तर्कयेत वा ॥ ११ ॥ बलान्यपरिमेयानि वीर्याणि च निशाचराः । परेषां सहसाऽवज्ञा न कर्तव्या कथंचन ॥१२॥ किं च राक्षसराजस्य रामेणापकृतं पुरा । आजहार जनस्थानाद्यस्य भार्यां यशस्विनः ॥ १३ ॥ खरो यद्यतिवृत्तस्तु रामेण निहतो रणे । अवश्यं प्राणिनां प्राणा रक्षितव्या यथाबलम् ॥ १४ ॥ अयशस्यमनायुष्यं परदाराभिमर्शनम् । अर्थक्षयकरं घोरं पापस्य च पुनर्भवम् ॥ १५ ॥ एतन्निमित्तं वैदेह्या भयं नः सुमहद्भवेत् । आहृता सा परित्याज्या कलहार्थे कृतेन किम् ॥ १६ ॥

तत्र को दोष इति शेषः । दोषाभावमाह–अवश्यमिति ॥ १४ ॥ प्रथमं रामेणापकृतत्वेऽप्यनेकदोषमूलं सीतापहरणं न कार्यमित्याह–अयशस्यमिति । पुनर्भवं जन्मान्तरम्, मृत्यन्तरमिति यावत् ॥ १५ ॥ एवं सामान्यतः परदाराभिमर्शनस्यानर्थहेतुत्वमुक्त्वा प्रकृते तद्दर्शयति–एतदिति । एतस्मान्निमित्तादित्यर्थः । "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति पञ्चम्यर्थे प्रथमा । अयशस्यत्वादिहेतोर्वैदेह्याः सकाशात्सुमहद्भयं भवेत् । तर्हि किमिदानीं कर्तव्यम् ? तत्राह–आहृतेति । उत्तमं वस्तु कथं त्यक्तव्यम् ? तत्राह कलहार्थे कृतेन किमिति । कलहार्थे विषये कृतेन कर्मणा किमित्यर्थः । "अर्थाभिमुख्येन इच्छयेत्युक्तिः । अत एवोपरि निशाचरा इति सम्बोधनम् ॥ १० ॥ समुद्रमित्यादि श्लोकद्वयमेकं वाक्यम् । 'कृतं हनुमता कर्म दुष्करं तर्कयेत वा ।' इति पाठः । को वा तर्कयेतेत्यर्थः । बलान्यपरिमेयानि, कृतानीति शेषः ॥११॥१२॥ किञ्चेत्यादि श्लोकद्वयमेकं वाक्यम् । किञ्चेत्यत्र किमिति छेदः । खरदूषणादिवधाद्रामस्य पूर्वापकारित्वमाशङ्क्य परिहरति–खर इति । यस्मात्तस्मादित्यध्याहार्यम् । यस्मादवश्यं प्राणिनां प्राणा रक्षितव्याः तस्मादतिवृत्तः । स्वयमेव रामं हन्तुं प्रवृत्तः खरस्तु निहतो यदि, एतावता रामेण पुरा राक्षसराजस्य किमपकृतम् ? नापकृतमित्यर्थः ॥ १३ ॥ १४ ॥ अयशस्यमित्यादि श्लोकद्वयम् । परदाराभिमर्शनम् अयशस्यादिरूपं पुनस्तदुपरि पापस्य च भवम् उत्पत्तिस्थानम् । एतन्निमित्तम् एतस्मात्कारणात् आहृता वैदेही नो भयं भयनिमित्तम् । वैदेही भयमिति पाठः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने। व्यवहारे धने शास्त्रवस्तुहेतुनिवृत्तिषु ॥" इति वैजयन्ती ॥ १६ ॥ बहुदोषप्रदर्शनपूर्वकं सीताप्रदानस्यावश्य कर्तव्यतामाह—न नः क्षममित्यादिना ॥ १७ ॥ यावद्दारयते दारयिष्यति। "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे लट्। राम इति शेषः ॥१८॥

न नः क्षमं वीर्यवता तेन धर्मानुवर्तिना। वैरं निरर्थकं कर्तुं दीयतामस्य मैथिली ॥ १७ ॥ यावन्न सगजां साश्वां बहुरत्नसमाकुलाम्। पुरीं दारयते बाणैर्दीयतामस्य मैथिली ॥ १८ ॥ यावत् सुघोरा महती दुर्द्धर्षा हरिवाहिनी। नावस्कन्दति नो लङ्कां तावत्सीता प्रदीयताम् ॥ १९ ॥ विनश्येद्धि पुरी लङ्का शूराः सर्वे च राक्षसाः। रामस्य दयिता पत्नी स्वयं न यदि दीयते ॥२०॥ प्रसादये त्वां बन्धुत्वात्कुरुष्व वचनं मम। हितं पथ्यमहं ब्रूमि दीयतामस्य मैथिली ॥ २१ ॥ पुरा शरत्सूर्यमरीचिसन्निभान् नवाग्रपुङ्खान् सुदृढान्नृपात्मजः। सृजत्यमोघान् विशिखान् वधाय ते प्रदीयतां दाशरथाय मैथिली ॥ २२ ॥ त्यज स्वकोपं सुखधर्मनाशनं भजस्व धर्मं रतिकीर्तिवर्द्धनम्। प्रसीद जीवेम सपुत्रबान्धवाः प्रदीयतां दाशरथाय मैथिली ॥ २३ ॥ विभीषणवचः श्रुत्वा रावणो राक्षसेश्वरः। विसर्जयित्वा तान् सर्वान् प्रविवेश स्वकं गृहम् ॥ २४ ॥ इत्यार्षे श्रीरामायणे॰ श्रीमद्युद्धकाण्डे नवमः सर्गः ॥ ९ ॥

यावत् यदा। तावत्तदा। नावस्कन्दति न रुणद्धि ॥ १९ ॥ शूरा इति। विनश्येयुरिति व्यत्ययेन योजनीयम्। स्वयं न यदि दीयत इति पाठः ॥२०॥ ब्रूमि ब्रवीमि। अस्य अस्मै ॥ २१ ॥ अग्रं शल्यम्, पुङ्खं शरमूलम्, नवे अग्रपुङ्खे येषां ते। अत एव सुदृढान् पुरा सृजति स्रक्ष्यति। दशरथस्यायं दाशरथः। "तस्येदम्" इति सम्बन्धार्थे अण्। सम्बन्धश्चात्र पुत्रत्वम्। दाशरथाय दाशरथये ॥ २२ ॥ रतिः सुखम् ॥ २३ ॥ विभीषणेति। सर्वं प्रातरालोचयिष्याम इति विभीषणप्रमुखान् विसृज्येत्यर्थः ॥२४॥ इति श्रीगोविन्द॰ श्रीरामा॰रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवमः सर्गः ॥९॥ ॥२६॥

अतः सा परित्याज्या। कलहार्थे कलहप्रयोजनविषये कुलेन, कर्मणेति शेषः। किमिति योजना ॥ १५ ॥ १६ ॥ अस्य अस्मै ॥ १७ ॥ यावद्दारयते दारयिष्यति "यावत्पुरा-"इत्यादिना भविष्यदर्थे लट्। तावत् दीयताम् ॥ १८ ॥ नावस्कन्दति नारोक्ष्यति ॥ १९ ॥ २० ॥ ब्रूमि ब्रवीमि ॥२१॥ पुरा सृजति स्रक्ष्यति। नवाग्र पुङ्खान् नवानि अग्राणि पुङ्खाश्च येषां तान् ॥ २२–२४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां नवमः सर्गः ॥ ९ ॥

For Private And Personal Use Only

अथ हितपरो विभीषणः सत्त्वोत्तरकाले रावणस्योपदेष्टुं तद्गृहं गत इत्याह-तत इत्यादि, प्रविवेश महाद्युतिरित्यन्तमेकं वाक्यम्। ततः प्रत्युषसी त्यनेन लङ्कादाहानन्तरमेकमहो गतमित्यवगम्यते। प्राप्तधर्मार्थनिश्चयः सीताप्रदानमेवास्माकं धर्मोऽर्थश्चेति कृतनिश्चयः। भीमकर्मा परमार्थतो रावणस्य हितत्वेऽप्यनभिमतार्थविज्ञापनरूपसाहसकरणात् भीमकर्मेत्युक्तिः। राक्षसाधिपतेः अग्रजस्य। आलयं निवासभूतं वेश्म प्रविवेशेति सम्बन्धः ॥ १ ॥ शैलाग्रचयसङ्काशं गिरिशिखरचयसदृशम्। अनेकशृङ्गयुक्तत्वादिति भावः। शैलशृङ्गमिवोन्नतमित्यौन्नत्ये दृष्टान्तः। सुविभक्तमहाकक्ष्यं सुष्ठु

ततः प्रत्युषसि प्राप्ते प्राप्तधर्मार्थनिश्चयः। राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः ॥ १ ॥ शैलाग्रचयसङ्काशं शैलशृङ्गमिवोन्नतम्। सुविभक्तमहाकक्ष्यं महाजनपरिग्रहम् ॥ २ ॥ मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितम्। राक्षसैश्चाप्तपर्याप्तैः सर्वतः परिरक्षितम् ॥ ३ ॥ मत्तमातङ्गनिश्वासैर्व्याकुलीकृतमारुतम्। शङ्खघोषमहाघोषं तूर्यनादानुनादितम् ॥ ४ ॥ प्रमदाजनसम्बाधं प्रजल्पितमहापथम्। तप्तकाञ्चननिर्यूहं भूषणोत्तमभूषितम् ॥ ५॥ गन्धर्वाणामिवावासमालयं मरुतामिव। रत्नसञ्चयसम्बाधं भवनं भोगिनामिव ॥ ६ ॥

विभक्तमहाप्रकोष्ठम्। "कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने" इत्यमरः। महाजनैः विद्वद्भिः परिगृह्यत इति महाजनपरिग्रहम्। तदधिष्ठितमित्यर्थः ॥ २ ॥ महामात्रैः प्रधानैः। "महामात्राः प्रधानाः स्युः" इत्यमरः। आप्तपर्याप्तैः कार्यकरणदक्षैरिति महामात्रविशेषणम् ॥३॥ व्याकुलीकृतमारुतं चक्रवातीकृतवायुम्। शङ्खघोषमहाघोषं शङ्खघोषेण महान् घोषो यस्य तथोक्तम्। तूर्यनादानुनादितं तूर्यनादेन सञ्जातप्रतिध्वनिम् ॥ ४ ॥ प्रजल्पितमहापथं सञ्जातमहाकलकलमहामार्गम्। तप्तकाञ्चननिर्यूहं द्रुतकनकमयमत्तवारणम्। "निर्यूहो मत्तवारणः" इत्यमरः। भूषणोत्तमैः तोरणवितानप्रभृतिभिर्भूषितम् ॥ ५ ॥ गन्धर्वाणामिवावासम्, तौर्यत्रिकमुखरितत्वादिति भावः। मरुतां देवानाम् आलयमिव, निरवधिकैश्वर्यसम्पन्नत्वादिति

तत इत्यादि श्लोकसप्तकमेकं वाक्यम्। प्राप्तधर्मार्थनिश्चयः प्राप्तो धर्मार्थनिश्चयो येन सः। राक्षसाधिपतेर्वेश्म प्रविवेश विभीषणः इति पाठे तूत्तरषट्कस्यैतत्प्रपञ्चार्थत्वात् अग्रजस्यालयं वीरः प्रविवेश महाद्युतिरित्यनेनापौनरुक्त्यम्। राक्षसाधिपतेर्वेश्म भीमकर्मा विभीषणः इति पाठे राक्षसाधिपतेरग्रजस्यालयं नित्यनिवासभूतं वेश्मेत्यन्वयः। अस्मिन् पाठे तु वेश्मालययोरपौनरुक्त्यम्। "आकेशग्रहणान्मित्रमहितेभ्यो निवारयेत्" इति न्यायेन सर्वात्मना हितमेव वक्तव्यमित्यभिप्रेत्य रावणानभिमतहितोपदेशे प्रवृत्तत्वाद्भीमकर्मेत्युक्तिः। शैलाग्रचयसङ्काशं बहुभिः स्वशिखरैः गिरिनिकरसन्निकाशमित्यर्थः। महामात्रैः प्रधानपुरुषैः। आप्तपर्याप्तैः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावः । रत्नसञ्चयैः सम्बाधं सम्पूर्णम् । अत एव भोगिनां सर्पाणां भवनमिव स्थितम् ॥ ६ ॥ तेजोविस्तृतरश्मिवान् तेजः शरीरकान्तिस्तदेव विस्तृत रश्मिरस्यास्तीति तथा । महाद्युतिः महाप्रभः । अभ्रमिवेत्युपमया तद्भवनं विभीषणस्य तेजोपहारकमिति व्यज्यते । एवं गृहोत्कर्षवर्णनं रावणस्य अनीत्या सर्वमेकपदे नष्टमिति ज्ञापनाय ॥ ७ ॥ पुण्यान् पुण्यकरान् । पुण्याहघोषान् पुण्याहमन्त्रघोषान् । विजयसंश्रितान् विजयफलकानित्यर्थः ।

तं महाभ्रमिवादित्यस्तेजोविस्तृतरश्मि(मा)वान् । अग्रजस्यालयं वीरः प्रविवेश महाद्युतिः ॥ ७ ॥ पुण्यान् पुण्याहघोषांश्च वेदविद्भिरुदाहृतान् । शुश्राव सुमहातेजा भ्रातुर्विजयसंश्रितान् ॥ ८ ॥ पूजितान् दधिपात्रैश्च सर्पिर्भिः सुमनोक्षतैः । मन्त्रवेदविदो विप्रान् ददर्श सुमहाबलः ॥ ९ ॥ स पूज्यमानो रक्षोभिर्दीप्यमानः स्वतेजसा । आसनस्थं महाबाहुर्ववन्दे धनदानुजम् ॥ १० ॥ स राजदृष्टिसम्पन्नमासनं हेमभूषितम् । जगाम समुदाचारं प्रयुज्याचारकोविदः ॥ ११ ॥ स रावणं महात्मानं विजने मन्त्रिसन्निधौ । उवाच हितमत्यर्थं वचनं हेतुनिश्चितम् ॥ १२ ॥

उदाहृतान् उच्चारितान् ॥ ८ ॥ दधिपात्रैः दधियुक्तपात्रैः । मन्त्रवेदविदः मन्त्रब्राह्मणविदः । मन्त्राः कर्मसु विनियुक्ताः "इषे त्वा" इत्यादयः । कर्मचोदना ब्राह्मणानि ॥ ९ ॥ पूज्यमानः श्लाघ्यमानः ॥ १० ॥ दृष्टिसम्पन्नं दृष्ट्या निवेदितमित्यर्थः । समुदाचारं जयशब्दप्रयोगादिसमुदाचारम् । जगाम आरुरोह ॥ ११ ॥ विजने मन्त्रिव्यतिरिक्तजनरहिते । हेतुनिश्चितं हेतुभिर्युक्तिभिर्निश्चितम् ॥ १२ ॥

आप्तैः हितैः पर्याप्तैः कार्यनिर्वहणसमर्थैः । निर्यूहो द्वारम् । "निर्यूहश्शिखरे द्वारे" इति विश्वः । गन्धर्वाणामिवालयं तौर्यत्रिकमुखरितत्वात् । आलयं मरुतामिव ऐश्वर्यातिशयात् । भवनं भोगिनामिव परैः प्रवेष्टुमशक्यत्वाच्च । आलयापेक्षया तमित्युक्तिः । तेजोविस्तृतरश्मिवान् तेजः स्वशरीरस्थं तेन विस्तृता विसृता विश्रुता वा रश्मयो यस्य । अनेन पाठत्रयं सूचितम् ॥ १–७ ॥ पुण्यानिति । विजयसंश्रितान् विजयमुद्दिश्य प्रवृत्तान् ॥८॥ पूजितांस्तिलपात्रैश्चेति पाठः । तिलपात्रैः दानविशेषैः । सर्पिर्भिः आज्यावेक्षणदानैः । मन्त्रवेदविदः मन्त्रब्राह्मणविदः, कर्मणि विनियुक्तो वेदभागो मन्त्रः, कर्मचोदना ब्राह्मणानि ॥९॥१०॥ राजदृष्टिसम्पन्नं राजदृष्ट्येक्षितम् । समुदाचारं प्रयुज्य विजयप्रयोगादिविनयप्रकाशकाचारं कृत्वा ॥ ११ ॥ स रावणमित्यादि श्लोकद्वयमेकं वाक्यम् । हेतुनिश्चितं युक्तिनिश्चितार्थम् । ॥ २७ ॥

प्रसाद्य स्तुतिवचनेन प्रसन्नं कृत्वा सान्त्वेनोवाचेत्यन्वयः । उपस्थितक्रमः ज्ञातवचनक्रमः । देशकालार्थसंवादी देशकालप्रयोजनानुसारी । दृष्टलोकपरावरः लोके ये परावरे उत्कृष्टापकृष्टे ते दृष्टे ज्ञाते येन तथोक्तः, रामस्य धार्मिकत्वं रावणस्याधार्मिकत्वं च जानातीत्यर्थः ॥ १३ ॥ प्रथमं रावणसंवादाय दुर्निमित्तानि दर्शयति—यदेति । यदाप्रभृति यत्कालमारभ्य । क्रियाविशेषणमिदम् । एवं तदाप्रभृतीत्यपि । अशुभानि निमित्तानि अशुभसूचकनिमित्तानि ॥ १४ ॥ सस्फुलिङ्गः अग्निकणसहितः । सधूमार्चिः धूमाकुलज्वालासहितः । सधूमकलुषोदयः धूमेन कलुषः उदयः आवि

प्रसाद्य भ्रातरं ज्येष्ठं सान्त्वेनोपस्थितक्रमः । देशकालार्थसंवादी दृष्टलोकपरावरः ॥ १३ ॥
यदाप्रभृति वैदेही सम्प्राप्तेमां पुरीं तव । तदाप्रभृति दृश्यन्ते निमित्तान्यशुभानि नः ॥ १४ ॥
सस्फुलिङ्गः सधूमार्चिः सधूमकलुषोदयः । मन्त्रसन्धुक्षितोऽप्यग्निर्न सम्यगभिवर्धते ॥ १५ ॥
अग्निष्ठेष्वग्निशालासु तथा ब्रह्मस्थलीषु च । सरीसृपाणि दृश्यन्ते हव्येषु च पिपीलिकाः ॥ १६ ॥
गवां पयांसि स्कन्नानि विमदा वीरकुञ्जराः । दीनमश्वाः प्रहेषन्ते न च ग्रासाभिनन्दिनः ॥ १७ ॥

र्भावो धूमकलुषोदयः, तेन सहितः सधूमकलुषोदयः, । शान्तः शान्तो ज्वलन्नित्यर्थः । मन्त्रसन्धुक्षितः मन्त्रवद्भिर्हविर्भिर्योजितः ॥ १५ ॥ अग्नयस्तिष्ठ न्त्यत्रेत्यग्निष्ठाः महानसाः तेषु । अग्निशालासु अग्निहोत्रशालासु । ब्रह्मस्थलीषु वेदाध्ययनस्थानेषु । सरीसृपाणि सर्पाः । लिङ्गव्यत्यय आर्षः । हविष्येषु देवताभ्यो देयेषु आज्यपुरोडाशादिषु ॥१६॥ स्कन्नानि शुष्काणि " स्कन्दिर् गतिशोषणयोः" इति धातोर्निष्ठा । "रदाभ्यां निष्ठातो नः पूर्वस्य च दः"

उपस्थितक्रमः अनुष्ठितवन्दनादिक्रियाक्रमः । देशकालार्थसंवादी देशकालप्राप्यमत्प्रयोजनसंवादीत्यर्थः । दृष्टलोकपरावरः भावप्रधानोऽयं निर्देशः । दृष्टं लोकस्य परत्वमुत्कृष्टत्वम् अवरत्वमपकृष्टत्वं च येन सः ॥ १३-१४ ॥ सस्फुलिङ्ग इति । सधूमकलुषोदयः धूमकलुषस्य उदय आविर्भावो धूमकलुषोदयः तेन सहितस्तथा । मन्त्रसन्धुक्षितः मन्त्रवद्भिर्हविर्भिर्योजितः ॥ १५ ॥ अग्निस्तिष्ठन्त्येष्विति अग्निष्ठाः महानसाः तेषु । अग्निशालासु अग्निहोत्रशालासु । ब्रह्मस्थलीषु ब्रह्म वेदः तस्य स्थलीषु, वेदाध्ययनस्थानेष्वित्यर्थः । सरीसृपाणि सर्पाः, लिङ्गव्यत्यय आर्षः ॥ १६ ॥ स्कन्नानि गालितानि । यद्वा स्कन्नानि शुष्काणि "स्कन्दिर् गतिशोषणयोः",

स०—मन्त्रसन्धुक्षितोऽप्यग्निरिति पाठः । मन्त्रसन्धुक्षित. विहितमन्त्रसमूहहुतोऽप्यग्निः सधूमार्चिः सस्फुलिङ्गः सधूमकलुषोदयः । मन्त्रसन्धुक्षित इत्यनेन कर्त्रादिवैगुण्यनिमित्तो नायमयं भावः किन्तु नोऽनर्थसूचक इति सूचयति ॥ १५ ॥

इति नत्वम् । वीरकुञ्जराः मत्तगजाः । प्रहेषन्ते हेषारवं कुर्वन्ति । हेषा अश्वशब्दः ॥ १७ ॥ अश्वतरा महास्वराः । भिन्नरोमाः स्वस्थानात् भिन्नरोमाणः गलितरोमाणः ऊर्ध्वरोमाणो वा । अकारान्तत्वमार्षम् । स्रवन्ति अश्रूणि मुञ्चन्ति । विधानैः चिकित्साभिः । चिन्तिताः अनुसंहिताः, चिकित्सिता अपीत्यर्थः । स्वभावे प्रकृतौ । नावतिष्ठन्ते प्रकृतिस्था न भवन्तीत्यर्थः ॥ १८ ॥ वायसा इति । सङ्घशो व्याहरन्ति सङ्घशः समवेता इति च

खरोष्ट्राश्वतरा राजन् भिन्नरोमाः स्रवन्ति नः । न स्वभावेऽवतिष्ठन्ते विधानैरपि चिन्तिताः ॥ १८ ॥ वायसाः सङ्घशः क्रूरा व्याहरन्ति समन्ततः । समवेताश्च दृश्यन्ते विमानाग्रेषु सङ्घशः ॥ १९ ॥ गृध्राश्च परिलीयन्ते पुरीमुपरि पिण्डिताः । उपपन्नाश्च सन्ध्ये द्वे व्याहरन्त्यशिवं शिवाः ॥ २० ॥ क्रव्यादानां मृगाणां च पुरद्वारेषु सङ्घशः । श्रूयन्ते विपुला घोषाः सविस्फूर्जथुनिस्वनाः ॥ २१ ॥ तदेवं प्रस्तुते कार्ये प्रायश्चित्तमिदं क्षमम् । रोचते यदि वैदेही राघवाय प्रदीयताम् ॥ २२ ॥

सम्बन्धः ॥ १९ ॥ पुरीमुपरि उपर्युपरि गृहेष्वित्यर्थः । पिण्डिताः मण्डलीभूताः सन्तः । परिलीयन्ते श्लिष्यन्ति । सन्ध्ये द्वे, अत्यन्तसंयोगे द्वितीया । शिवाः जम्बुकाः । उपपन्नाः नगरसमीपं प्राप्ताः ॥ २० ॥ क्रव्यादानां मांसभक्षकाणाम् । मृगाणां श्वादीनामित्यर्थः । सविस्फूर्जथुनिस्वनाः विस्फूर्जथुः अशनिघोषः । तद्रूपस्वनसहिताः ॥ २१ ॥ एवमुपस्थितदुर्निमित्तजातस्य प्रायश्चित्तं सीताप्रदानमेवेत्याह–तदेवमिति । तत् दुर्निमित्तदर्शनात्

इति धातोर्निष्ठा ॥ १७ ॥ भिन्नरोमाः ऊर्ध्वरोमाणः । अकारान्तत्वमार्षम् । स्रवन्ति मुञ्चन्ति, अश्रूणीति शेषः । विधानैः चिकित्साशास्त्रोक्तप्रकारैः चिन्तिताः चिकित्सिता अपि स्वभावेन यथापूर्वं न तिष्ठन्ति ॥ १८ ॥ १९ ॥ पुरीमुपरि पुर्या उपरि । पिण्डिताः मिलिताः । परिलीयन्ते पतन्ति । उपपन्नाः समीपं प्राप्ताः । सन्ध्ये द्वे सन्ध्ययोर्द्वयोः ॥ २० ॥ सविस्फूर्जथुनिस्वनाः विस्फूर्जथुरशनिः तन्निस्वनेन सहिताः ॥ २१ ॥ उक्तस्य दुर्निमित्तस्य प्रायश्चित्तमाह–तदिति । एवं प्रस्तुते संप्राप्ते अकार्ये अनर्थसूचकनिमित्ते जाते इदं वक्ष्यमाणम् क्षमं समर्थम् प्रायश्चित्तं मम मह्यं रोचते । वीरेति पाठे–मह्यमिति शेषः । प्रायश्चित्तमेवाह वैदेहीति ॥ २२ ॥

स०–वायसाः समन्ततो व्याहरन्ति । ते च साधारणाः केचनेत्याह–क्रूराः सङ्घशः इति । न केवलं व्याहरन्ति किन्तु सङ्घशः विमानाग्रेषु समवेताश्च दृश्यन्ते । रामरामास्पर्शमात्रमाहात्म्येनास्मन्नेत्रशातनं जातं त्वं च जागृहीति सूचयितुम्, अदाने च माव्यनर्थं सूचयितुं चैवमिति भावः ॥ १९ ॥

॥ २८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्सूच्ये कार्ये पराजये। एवं लङ्कादहनादिरूपेण प्रस्तुते प्रसक्ते सति । क्षमम् अशुभनिवारणसमर्थम् इदं प्रायश्चित्तम् । इदंशब्दार्थमाह–वैदेहीति ॥ २२ ॥ एवमनभिमतभाषणेन राजा कुप्यतीति समाधत्ते–इदमिति । मोहात् कार्यतत्त्वापरिज्ञानात् । लोभात् जीवनलोभाद्वाऽपि । यदि व्याहृतम् । तत्रापि तथापि । मयि दोषम् अपराधं कर्तुं नार्हसि ॥ २३ ॥ अयं दोषः पूर्वोक्तदुर्निमित्तसूचितोऽनर्थः । सर्वस्योपलक्ष्यते । संबन्धसामान्ये षष्ठी ।

इदं च यदि वा मोहाल्लोभाद्वा व्याहृतं मया । तत्रापि च महाराज न दोषं कर्तुमर्हसि ॥२३॥ अयं च दोषः सर्वस्य जनस्यास्योपलक्ष्यते । रक्षसां राक्षसीनां च पुरस्यान्तःपुरस्य च ॥ २४ ॥ श्रावणे चास्य मन्त्रस्य निवृत्ताः सर्वे मन्त्रिणः । अवश्यं च मया वाच्यं यद्दृष्टमपि वा श्रुतम् ॥ २५ ॥ सम्प्रधार्य यथान्यायं तद्भवान् कर्तुमर्हति ॥२६॥ इति स्म मन्त्रिणां मध्ये भ्राता भ्रातरमूचिवान् । रावण राक्षसश्रेष्ठं पथ्यमेतद्विभीषणः ॥ २७ ॥ हितं महार्थं मृदु हेतुसंहितं व्यतीतकालायतिसम्प्रतिक्षमम् । निशम्य तद्वाक्यमुपस्थितज्वरः प्रसङ्गवानुत्तरमेतदब्रवीत् ॥ २८ ॥

सर्वेणापि लक्ष्यत इत्यर्थः ॥ २४ ॥ प्रहस्तादिषु विद्यमानेषु भवतैव किमुच्यते तत्राह–श्रावणे चेति । तेषां त्वच्चित्तमात्रानुसारित्वादिति भावः । श्रावणे त्वां प्रति विज्ञापने च । त्वं पुनः कथं वक्तुं प्रगल्भसे तत्राह–अवश्यमिति । भ्रातृत्वादिति भावः ॥ २५ ॥ सम्प्रधार्येत्यर्धम् । यथान्यायं यथायोग्यम् । संप्रधार्य मनस्येव निश्चित्य । तत् संप्रधारितं कार्यम् ॥ २६ ॥ इत्येतदूचिवानित्यन्वयः । ऊचिवान् उक्तवान् । "क्वसुश्च" इति लिटः क्वस्वादेशः ॥ २७ ॥ महार्थं प्रयोजनव्याप्तम् । मृदु सान्त्वपूर्वम् । हेतुसंहितं युक्तियुक्तम् । व्यतीतकालायतिसंप्रतिक्षमं व्यतीतकालः भूतकालः, आयतिः भविष्यत्कालः, संप्रति वर्तमानकालः तत्र क्षमम् । अकीर्तिनाशकत्वेन सीतापहरणप्रायश्चित्तत्वेन वाऽप्यतीतकालक्षमम् । सुखवर्धकत्वेन वर्तमानकालक्षमम् । धर्मावहत्वेनायतिक्षमम् । उपस्थितज्वरः प्राप्तक्रोध इत्यर्थः । प्रसङ्गवान् परिगृहीतार्थेऽभिनिवेशवान् ॥ २८ ॥

मोहात् कार्यतत्त्वापरिज्ञानात् । लोभात् जीवनलोभाद्वा यदि व्याहृतम् तत्रापि तथापि मयि दोषमपराधम् ॥ २३ ॥ अविद्यमानदुर्निमित्तमुक्त्वा किमर्थं भीषयसे इत्याशङ्क्याह–अयमिति । अयं दोषः पूर्वोक्तदुर्निमित्तरूपः । सर्वस्येत्यादिषु तृतीयार्थे षष्ठी । सर्वस्य जनस्योपलक्ष्यते सर्वैर्जनैर्दृश्यत इत्यर्थः ॥ २४ ॥ अयं दोषस्तर्ह्यन्यैर्मन्त्रिभिः किमिति न निवेद्यत इत्याशङ्क्य त्वद्भयान्न श्रावयन्तीत्याह–श्रावणे चेति ॥ २५–२७ ॥ हितमिति । व्यतीतकालायतिसम्प्रतिक्षमं व्यतीत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भयं भयजनकं पुरुषम् । रामो युद्धेन सीतां प्राप्स्यतीति पूर्वं विभीषणोक्तस्य परिहारमाह–सुरैरिति । कथं (तिष्ठति) स्थास्यति ? स्थातुमेव न शक्तः कुतो योत्स्यति, कुतस्तरां सीतां प्राप्स्यतीति भावः ॥ २९ ॥ राघवं तृणीकृत्य कथमेवमाहेत्याशङ्क्य तन्निदानं दर्शयति–इतीति । नाशनः हिंसकः । चण्डविक्रमः उग्रविक्रमः । आप्तवादिनं युक्तवादिनम् ॥३०॥इति श्रीगोविन्द० श्रीरामायण०रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशमः सर्गः ॥१०॥

भयं न पश्यामि कुतश्चिदप्यहं न राघवः प्राप्स्यति जातु मैथिलीम् । सुरैः सहेन्द्रैरपि सङ्गतः कथं ममाग्रतः स्थास्यति लक्ष्मणाग्रजः ॥ २९ ॥ इतीदमुक्त्वा सुरसैन्यनाशनो महाबलः संयति चण्डविक्रमः । दशाननो भ्रातर माप्तवादिनं विसर्जयामास तदा विभीषणम् ॥ ३० ॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे दशमः सर्गः ॥१०॥

स बभूव कृशो राजा मैथिलीकाममोहितः । असम्मानाच्च सुहृदां पापः पापेन कर्मणा ॥१॥ [अतीव कामसंपन्नो वैदेहीमनुचिन्तयन् ।] अतीतसमये काले तस्मिन् वै युधि रावणः । अमात्यैश्च सुहृद्भिश्च मन्त्रकालममन्यत ॥ २ ॥

अथ परेद्युर्विभीषणाद्युपदेशेऽतिचिन्ताव्याकुलस्य रावणस्य निर्णयहेतुमन्त्रकरणाय सभाप्राप्तिं दर्शयति–स बभूवेत्यादि । पापः पापी । " गुणवच नेभ्यो मतुपो लुगिष्टः " इति मतुपो लुक् । असम्मानात् अनादरात् । सुहृदां विभीषणादीनाम् । कर्तरि षष्ठी । विभीषणोक्ते तूष्णीं स्थितत्वेन प्रहस्ता दीनामप्यनादरः सिद्ध एव । पापेन कुत्सितेन सीतापहरणरूपेण कर्मणा । हेतौ तृतीया । मैथिलीकाममोहित इति हेतुगर्भविशेषणम् । तथा च मैथिली विषयकाममोहात् सुहृदनादरात् पापहेतुसीताहरणाच्च कृशः । चिन्ताकुलो बभूवेत्यर्थः ॥ १ ॥ अतीतेति । तस्मिन् काले मन्त्रयोग्यकाले । अतीत समये अतीतावसरे सति । युधि च सत्यां युद्धे च प्राप्ते सति । अमात्यैश्च सुहृद्भिश्च मन्त्रस्य प्राप्तकालममन्यत । मुनिहृदयं तु कालेऽतीतसमये

कालः भूतकालः । आयतिः उत्तरकालः । सम्प्रति वर्तमानकालः तत्र क्षमं योग्यम् । उपस्थितज्वरः प्राप्तक्रोधः । प्रसङ्गवान् प्रकृष्टोपसङ्गवान् स्वगृहीतार्था भिनिवेशवानित्यर्थः ॥२८–३०॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां दशमः सर्गः ॥ १० ॥ स बभूवेति । असम्मानात् अनादरात् । सुहृदां विभीषणादीनाम् । पापेन कर्मणा पापहेतुभूतसीतापहरणेन । हेतौ तृतीया ॥ १ ॥ मन्त्रकालममन्यत मन्त्रकालं प्राप्तममन्यत

स०–अतीतसमये अतीतो भवति समयः द्वादशमासात्मकः सीताप्राप्तौ सङ्केतरूपो यस्मिंस्तस्मिन् काले । अनुचिन्तयन् तत्प्राप्तिमिति शेषः । युधि युद्धविषये अमात्यादिभिः सह प्राप्तकालं योग्यमालोचन मित्यमन्यत । युधि युद्धे । अतीतसमये विभीषणोक्तदिशा प्रतिबद्धे सति काले तत्काले मन्त्रणं प्राप्तकालं योग्यमित्यमन्यतेति वा ॥ २ ॥

For Private And Personal Use Only

रावणायुःकालेऽतीते सति । युधि अमात्यादिभिः सह आत्मानं प्राप्तकालं प्राप्तमृत्युम् अमन्यतेति । वै प्रसिद्धौ ॥ २ ॥ हेमजालविततं स्वर्णमयगवाक्षव्याप्तम् । स्वर्णसमूहनिर्मितमिति वा । विनीताश्वं शिक्षिताश्वयुक्तम् । उपगम्य प्रदक्षिणीकृत्य ॥ ३ ॥ सभां मन्त्रशालाम् ॥ ४ ॥ चर्म खेटः ॥ ५ ॥

स हेमजालविततं मणिविद्रुमभूषितम् । उपगम्य विनीताश्वमारुरोह महारथम् ॥ ३ ॥ तमास्थाय रथश्रेष्ठं महामेघसमस्वनम् । प्रययौ राक्षसश्रेष्ठो दशग्रीवः सभां प्रति ॥ ४ ॥ असिचर्मधरा योधाः सर्वायुधधरास्तथा । राक्षसा राक्षसेन्द्रस्य पुरतः सम्प्रतस्थिरे ॥५॥ नानाविकृतवेषाश्च नानाभूषणभूषिताः । पार्श्वतः पृष्ठतश्चैनं परिवार्य ययुस्ततः ॥ ६ ॥ रथैश्चातिरथाः शीघ्रं मत्तैश्च वरवारणैः । अनूत्पेतुर्दशग्रीवमाक्रीडद्भिश्च वाजिभिः ॥ ७ ॥ गदापरिघहस्ताश्च शक्तितोमरपाणयः । परश्वधधराश्चान्ये तथाऽन्ये शूलपाणयः ॥ ८ ॥ ततस्तूर्यसहस्राणां सञ्जज्ञे निस्वनो महान् । तुमुलः शङ्खशब्दश्च सभां गच्छति रावणे ॥ ९ ॥ स नेमिघोषेण महान् सहसाऽभिविनादयन् । राजमार्गं श्रिया जुष्टं प्रतिपेदे महारथः ॥ १० ॥ विमलं चातपत्राणं प्रगृहीतमशोभत । पाण्डरं राक्षसेन्द्रस्य पूर्णस्ताराधिपो यथा ॥ ११ ॥ हेममञ्जरिगर्भे च शुद्धस्फटिकविग्रहे । चामरव्यजने चास्य रेजतुः सव्यदक्षिणे ॥ १२ ॥

ततः रावणालयात् । नानाविकृतवेषाः नानाविधतया विशिष्य कृतालङ्काराः, राक्षसा इति शेषः ॥ ६ ॥ आक्रीडद्भिः धारामण्डलगमनादिकं कुर्वद्भिः ॥ ७ ॥ गदेति । अत्र प्रतिपदमन्य इत्यनुषञ्जनीयम् अनूत्पेतुरिति च ॥ ८ ॥ ततः स्वालयात् ॥ ९ ॥ नेमिः रथचक्रधारा ॥ १० ॥ विमलमिति । भासा विमलमित्यर्थः ॥ ११ ॥ हेममञ्जरिगर्भे हेमसूत्रगर्भे । इकारान्तत्वमार्षम् । शुद्धस्फटिकविग्रहे शुद्धस्फटिकसदृशाकारे । चामरव्यजने चामर

त्यर्थः । " अतीतसमये काले तस्मिन् वै युधि रावणः । अमात्यैश्च सुहृद्भिश्च प्राप्तकालममन्यत ॥" इति पाठे तु मन्त्रस्येति शेषः । तस्मिन् काले मन्त्रयोग्यकाले । अतीतसमये अतीतावसरे युधि च प्राप्ते सति अमात्यैः सुहृद्भिश्च मन्त्रस्य प्राप्तकालममन्यतेति योजना । वास्तवार्थे-स बभूवेत्यादि श्लोकद्वयमेकं वाक्यम् । अतीव कामसम्पन्नः अत एव पापेन कर्मणा । अथापि मैथिलीमनुविन्दन् न, स्वेष्टदेवतात्वेनेति शेषः । अत एव मैथिलीकाममोहितः मैथिलीभृत्यो भविष्यामीति च सम्बन्धः । काममोहितः सुहृदामसम्मानाच्च कृशो बभूव, मन्त्रकालं चामन्यतेति योजना ॥ २-६ ॥ रथैश्चेत्यादिश्लोकद्वयमेकं वाक्यम् । ॥ ७-१० ॥ आतपत्राणम् आतपत्रम् । हेममञ्जरिगर्भे हेममयपल्लवितलतागर्भे शुद्धस्फटिकसदृशाकारे चामरव्यजने चामरवालनिर्मिते च ते व्यजने च सव्यदक्षिणे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपव्यजने । सव्यदक्षिणे सव्यदक्षिणयोः । " सर्वो द्वन्द्वो विभाषयैकवद्भवति " इत्येकवद्भावः ॥ १२ ॥ त इति । स्पष्टम् ॥ १३ ॥ सुविहितां सुष्ठु निर्मिताम् ॥ १४ ॥ सुवर्णेत्यादिश्लोकद्वयमेकान्वयम् । विशुद्धस्फटिकान्तरां निर्मलस्फटिकनिर्मितमध्यप्रदेशाम् । रुक्मपट्टोत्तरच्छदां कनकमयपट्ट वस्त्रास्तरणाम् ॥ १५ ॥ १६ ॥ वैडूर्यमयं वैडूर्यप्रचुरम् । प्रियकाजिनसंवृतं प्रियकमृगस्याजिनेन संवृतम् । " प्रियको लोमभिर्युक्तो मृदूच्च

ते कृताञ्जलयः सर्वे रथस्थं पृथिवीस्थिताः । राक्षसा राक्षसश्रेष्ठं शिरोभिस्तं ववन्दिरे ॥ १३ ॥ राक्षसैः स्तूयमानः सन् जयाशीर्भिररिन्दमः । आससाद महातेजाः सभां सुविहितां शुभाम् ॥ १४ ॥ सुवर्णरजतस्थूणां विशुद्ध स्फटिकान्तराम् । विराजमानो वपुषा रुक्मपट्टोत्तरच्छदाम् ॥ १५ ॥ तां पिशाचशतैः षड्भिरभिगुप्तां सदा शुभाम् । प्रविवेश महातेजाः सुकृतां विश्वकर्मणा ॥ १६ ॥ तस्यां तु वैडूर्यमयं प्रियकाजिनसंवृतम् । महत् सोपाश्रयं भेजे रावणः परमासनम् ॥ १७ ॥ ततः शशासेश्वरवद् दूतान् लघुपराक्रमान् । समानयत मे क्षिप्रमिहैतान् राक्षसानिति ॥ १८ ॥ कृत्यमस्ति महज्जातं समर्थ्यमिह नो महत् ॥ १९ ॥

मसृणैर्घनैः" इति वैजयन्ती । सोपाश्रयं सावष्टम्भम्, सोपधानमिति यावत् ॥ १७ ॥ ईश्वरवत् राजार्हम् । इह सभायाम् एतान् एतन्नगरस्थान् । इति शशासेत्यन्वयः । तमेव प्रकारमाह–कृत्यमित्यर्धेन । महद्यथा तथा समर्थ्यं यत्नेन निर्वाह्यं जातं प्राप्तं महत्कृत्यमस्तीति शशास । महद्वचो रामादिभ्यो जातमिति वा । महदित्यनेन तदानीं चारमुखेन रामादेः समुद्रतीरगमनं रावणो ज्ञातवानिति गम्यते ॥ १८ ॥ १९ ॥ रामानु०–तत इति । ईश्वरवत् ईशानवत् । कृत्यमिति । एको महच्छब्दः क्रियाविशेषणम् । इह महज्जातं कृत्यमस्ति तत् महद् भूरि यथा तथा समर्थ्यं समर्थनीयम् । कर्मणि घञ् । समर्थ्यमिह नो भवेदिति वा पाठः । पूर्वश्लोकान्तस्थमितिकरणमत्र द्रष्टव्यम् । इति शशासेति संबन्धः । अनेन सैन्यस्य रामलक्ष्मणयोश्च समुद्रतीरगमनं चारमुखेन ज्ञातवानित्यवगम्यते ॥ १८ ॥ १९ ॥

सव्यदक्षिणपार्श्वयोरित्यर्थः ॥ ११–१३ ॥ राक्षसैरित्यादि श्लोकद्वयमेकं वाक्यम् । विरचितां, विश्वकर्मणेति शेषः । विशुद्धस्फटिकान्तरां शुद्धस्फटिकनिबद्धमध्य प्रदेशाम् । रुक्मपट्टोत्तरच्छदां रुक्मप्रचुरपट्टवस्त्रोत्तरच्छदाम् ॥ १४–१६ ॥ प्रियकाजिनसंवृतम् प्रियको मृगविशेषः तस्याजिनेन संवृतं सोपाश्रयं सावष्टम्भम्, सोपधानमिति यावत् ॥ १७ ॥ ततः शशासेत्यादिसार्धश्लोकमेकं वाक्यम् । एको महच्छब्दः क्रियाविशेषणम् । महद्यथा तथा समर्थ्यं शक्तेन निर्वाह्यं जातं ॥ २० ॥

राक्षसा इत्यादिसार्धश्लोकः। विहरमाणानीति शेषः। विहारो विहारस्थलम्। विहारादिषु आस्थाय विहरमाणानि रक्षांसि। अभीतवत् अभीताः। चोदयन्तः चोदनार्थं लङ्कायामनुगेहं परिचक्रमुरित्यन्वयः ॥२०॥ ते रथान् रुचिरानेके हस्तानेके पृथग्धयान्। नागानन्येऽधिरुरुहुर्जग्मुश्चैके पदातयः॥ इति पाठः। ॥ २१ ॥ रामानु०-त इति। रथान्तचराः रथमध्यस्थिताः। जग्मुरित्यर्थः। हयानित्यत्राप्यधिरुरुहुरिति संबध्यते। जग्मुरेके पदातयः केचित्पदातयः सन्तो जग्मुरिति सम्बन्धः ॥ २१ ॥

राक्षसास्तद्वचः श्रुत्वा लङ्कायां परिचक्रमुः। अनुगेहमवस्थाय विहारशयनेषु च। उद्यानेषु च रक्षांसि चोदयन्तो ह्यभीतवत् ॥ २० ॥ ते रथान् रुचिरानेके हस्तानेके पृथग्धयान्। नागानन्येऽधिरुरुहुर्जग्मुश्चैके पदातयः ॥ २१ ॥ सा पुरी परमाकीर्णा रथकुञ्जरवाजिभिः। सम्पतद्भिर्विरुरुचे गरुत्मद्भिरिवाम्बरम् ॥ २२ ॥ ते वाहनान्यवस्थाप्य यानानि विविधानि च। सभां पद्भिः प्रविविशुः सिंहा गिरिगुहामिव ॥ २३ ॥ राज्ञः पादौ गृहीत्वा तु राज्ञा ते प्रतिपूजिताः। पीठेष्वन्ये बृसीष्वन्ये भूमौ केचिदुपाविशन् ॥ २४ ॥ ते समेत्य सभायां वै राक्षसा राजशासनात्। यथार्हमुपतस्थुस्ते रावणं राक्षसाधिपम् ॥ २५ ॥ मन्त्रिणश्च यथा मुख्या निश्चयार्थेषु पण्डिताः। अमात्याश्च गुणोपेताः सर्वज्ञा बुद्धिदर्शनाः ॥ २६ ॥

गरुत्मद्भिः पक्षिभिः ॥ २२ ॥ वाहनानि शिबिकादीनि। यानानि अश्वादीनि। अवस्थाप्य बहिर्निक्षिप्य ॥ २३ ॥ अन्ये पुरोहितादयः। पीठेषु सुवर्णादिकृतासनेषु। अन्ये श्रोत्रियाः। बृसीषु दर्भमयासनेषु। केचित्पुत्रादयः। भूमौ सामान्यास्तरणमात्रयुक्तायां भूमौ ॥ २४ ॥ त इति। क्रियाभेदात्तच्छब्दद्वयम्। उपतस्थुः समीपे तस्थुः। यथार्हं यथाक्रमम् ॥ २५ ॥ मन्त्रिणश्चेत्यादिसपादश्लोकः। यथा यथाक्रमम्। यथामुख्या इत्येकं पदं वा। मुख्याननतिक्रम्य स्थिताः। अनव्ययत्वमार्षम्। निश्चयार्थेषु अर्थनिश्चयेषु। अमात्याः कर्मणि सहायाः। मन्त्रिणः बुद्धिसहायाः। यद्वा अमा सह तिष्ठन्तीत्य

प्राप्तं महत्कृत्यमस्ति अतो राक्षसान् समानयतेति दूतानीश्वरवच्छशासेति योजना। अनेन ससैन्यस्य सुग्रीवस्य रामलक्ष्मणयोश्च समुद्रतीरागमनं चारमुखेन ज्ञातवानित्यवगम्यते ॥ १८ ॥ १९ ॥ राक्षसा इत्यादिसार्धः। अवस्थाय, विहरमाणानीति शेषः। विहारशयनेषु उद्यानेषु च विहरमाणानि रक्षांसि अभीतवत् चोदयन्तः अभीता आह्वयन्तो लङ्कायामनुगेहं परिचक्रमुरित्यन्वयः ॥ २०-२५ ॥ मन्त्रिण इत्यादि सपादश्लोकमेकं वाक्यम्। यथा यथावत्। निश्चयार्थेषु अर्थ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मात्याः । " अव्ययात्त्यप् " । आप्ता इत्यर्थः । बुद्धिदर्शनाः बुद्धिचक्षुषः ॥ २६ ॥ शूरा इत्युत्तरशेषः । अन्यथा क्रियापदपौनरुक्त्यम् । सभायामिति । सुखाय क्षेमाय । क्षेमं विचारयितुम् । " क्रियार्थोपपदस्य– " इत्यादिना चतुर्थी ॥ २७ ॥ तत इति । युग्या अश्वाः । युगं वहन्तीति " तद्वहति रथयुगप्रासङ्गम् " इति यत् ॥ २८ ॥ स इति । नाम शशंस । अभिवादनमकरोदित्यर्थः । शुकः प्रहस्तश्चेति । ववन्दाते इत्यर्थः ॥ २९ ॥

समेयुस्तत्र शतशः शूराश्च बहवस्तदा । सभायां हेमवर्णायां सर्वार्थस्य सुखाय वै । रम्यायां राक्षसेन्द्रस्य समेयुस्तत्र सङ्घशः । [राक्षसा राक्षसश्रेष्ठं परिवार्योपतस्थिरे] ॥ २७ ॥ ततो महात्मा विपुलं सुयुग्यं वरं रथं हेमविचित्रिताङ्गम् । शुभं समास्थाय ययौ यशस्वी विभीषणः संसदमग्रजस्य ॥ २८ ॥ स पूर्वजायावरजः शशंस नामाथ पश्चाच्चरणौ ववन्दे । शुकः प्रहस्तश्च तथैव तेभ्यो ददौ यथार्हं पृथगासनानि ॥ २९ ॥ सुवर्णनानामणिभूषणानां सुवाससां संसदि राक्षसानाम् । तेषां परार्ध्यागरुचन्दनानां स्रजश्च गन्धाश्च ववुः समन्तात् ॥ ३० ॥ न चुक्रुशुर्नानृतमाह कश्चित् सभासदो नैव जजल्पुरुच्चैः । संसिद्धार्थाः सर्व एवोग्रवीर्या भर्तुः सर्वे ददृशुश्चाननं ते ॥ ३१ ॥ स रावणः शस्त्रभृतां मनस्विनां महाबलानां समितौ मनस्वी । तस्यां सभायां प्रभया चकाशे मध्ये वसूनामिव वज्रहस्तः ॥ ३२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये श्रीमद्युद्धकाण्डे एकादशः सर्गः ॥ ११ ॥

स्रजश्च गन्धाः स्रजां गन्धाः ॥ ३० ॥ न चुक्रुशुः न घोषं चक्रुः । न जजल्पुः न क्रमोक्तीश्चक्रुः । सभासदः सभागताः । संसिद्धेत्यर्धे वृत्तभेदश्चिन्त्यः ॥ ३१ ॥ समितौ सङ्घे । " सङ्घे सभायां समितिः " इत्यमरः । सभायाम् आस्थानमण्डपे ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकादशः सर्गः ॥ ११ ॥

निर्णयेष्वधिमन्त्रिणः अमात्याश्च उपमन्त्रिणः । बुद्धिदर्शनाः बुद्धिः दर्शनं चक्षुर्येषां ते तथा । यद्वा अमात्याः कर्मणि सहायाः, मन्त्रिणो बुद्धिसहायाः समेयुरित्यन्वयः । शूराश्चेत्युत्तरशेषः । सुखाय क्षेमाय क्षेमं विचारयितुम् ॥ २६–३० ॥ संसिद्धार्थाः पूर्णमनोरथाः ॥ ३१ ॥ ३२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकादशः सर्गः ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सर्वमेलनानन्तरं नगररक्षाविधानपूर्वकं स्वाभिमतानुसारेण रावणो मन्त्रमर्थयते—स तामित्यादि । समितौ युद्धे जयतीति समितिंजयः । "संज्ञायां भृतॄवृजि—" इत्यादिना खचि मुमागमः । तां पूर्वोक्ताम् । सेनेति । कृतविद्याः अभ्यस्तधनुर्विद्याः । चतुर्विधाः रथिकहस्तिपकसादिपदातिरूपेण चतुर्विधाः । अधिकरक्षायां पूर्वापेक्षया सावधानरक्षायाम् । यथा स्युः यथा जागरूकाः स्युः । तथा व्यादेष्टुमर्हसि । अत्र इतिकरणं बोध्यम् ॥ १ ॥ २ ॥

स तां परिषदं कृत्स्नां समीक्ष्य समितिंजयः । प्रचोदयामास तदा प्रहस्तं वाहिनीपतिम् ॥ १ ॥ सेनापते यथा ते स्युः कृतविद्याश्चतुर्विधाः । योधानधिकरक्षायां तथा व्यादेष्टुमर्हसि ॥ २ ॥ स प्रहस्तः प्रणीतात्मा चिकीर्षन् राजशासनम् । विनिक्षिपद्बलं सर्वं बहिरन्तश्च मन्दिरे ॥ ३ ॥ ततो विनिक्षिप्य बलं पृथङ्नगरगुप्तये । प्रहस्तः प्रमुखे राज्ञो निषसाद जगाद च ॥ ४ ॥ निहितं बहिरन्तश्च बलं बलवतस्तव । कुरुष्वाविमनाः क्षिप्रं यदभिप्रेतमस्तु ते ॥ ५ ॥ प्रहस्तस्य वचः श्रुत्वा राजा राज्यहिते रतः । सुखेप्सुः सुहृदां मध्ये व्याजहार स रावणः ॥ ६ ॥ प्रियाप्रिये सुखं दुःखं लाभालाभौ हिताहिते । धर्मकामार्थकृच्छ्रेषु यूयमर्हथ वेदितुम् ॥ ७ ॥

स इति । सः सर्वेषु विद्यमानेष्वपि रावणविस्रम्भपात्रभूतः । प्रणीतात्मा निश्चितबुद्धिः । मन्दिरे रावणगृहे । विनिक्षिपत् विन्यक्षिपत् व्यधात् ॥ ३ ॥ प्रमुखे अग्रे ॥ ४ ॥ अविमनाः स्वस्थहृदयः यदभिप्रेतं तत्कुरुष्व । तत् अभीष्टम् ते अस्तु सिद्ध्यतु ॥ ५ ॥ सुखेप्सुः कामपुरुषार्थेच्छुः, न विजयेच्छुः ॥ ६ ॥ मन्त्रणीयं वक्तुमनास्तेषामाभिमुख्यं संपादयितुं प्रथमं तान् प्रशंसति—प्रियाप्रिये इति । धर्मकामार्थकृच्छ्रेषु धर्मकामार्थसङ्कटेषु विषये । धर्मादिष्विदानीं को वा सेव्य इति सन्देहे तदनुष्ठानफलभूते प्रियाप्रिये सुखदुःखसाधने वस्तुनी । सुखं दुःखम्, लाभालाभौ लाभ इष्टप्राप्तिः अलाभः तन्नाशः

॥ १ ॥ सेनापत इति । ये कृतविद्याः अभ्यस्तसर्वविद्याः । चतुर्विधाः रथिकहस्तिपसादिपदातिरूपेण चतुर्विधा योधाः, सन्तीति शेषः । अधिकरक्षायां यथा स्युः यथा जागरूकाः स्युः तान् तथा व्यादेष्टुमर्हसीत्यर्थः । योधान्नगररक्षायामिति च पाठः ॥ २ ॥ प्रणीतात्मा विनीतात्मा प्रहस्तः राजशासनं चिकीर्षन् सर्वबलं मन्दिरे बहिरन्तश्च विनिक्षिप्य ततो नगरगुप्तये बलं पृथक् विनिक्षिप्य, आगत इति शेषः । प्रहस्तो राज्ञः प्रमुखे निषसाद अभिमतं कुरुष्वेति जगाद चेति योजना ॥ ३-६ ॥ प्रियाप्रिये इति । धर्मकामार्थकृच्छ्रेषु धर्मकामार्थसङ्कटेषु विषये । धर्मादिष्विदानीं को वा सेव्य इति सन्देहे तत्तदनुकूलभूते प्रियाप्रिये प्रिया

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तौ च । हिताहिते हितम् उत्तरकालफलवत् अहितं तदितरत् ते च । वेदितुमर्हथ । प्रियाप्रियादिफलस्वरूपनिर्धारणाय धर्मादिसन्देहं निराकर्तुं समर्था इत्यर्थः ॥ ७ ॥ कथमर्हाम इत्यपेक्षायां तत्कार्यमुखेन दर्शयति–सर्वेति । स्पष्टम् ॥ ८ ॥ इदानीमपि तथैवास्त्वित्याह–स सोमेति । ग्रहाः सोमभिन्नाः सूर्यादयः । मरुद्भिः सोमादिभिन्नैर्देवैः ॥ ९ ॥ पूर्वोक्तस्यैवार्थस्य पुनरपि वक्ष्यमाणत्वात्तत्र पुनः कथने हेतुं दर्शयति–अहमिति । तुरवधारणे । सर्वान्

सर्वकृत्यानि युष्माभिः समारब्धानि सर्वदा । मन्त्रकर्मनियुक्तानि न जातु विफलानि मे ॥ ८ ॥ स सोमग्रहनक्षत्रै मरुद्भिरिव वासवः । भवद्भिरहमत्यर्थं वृतः श्रियमवाप्नुयाम् ॥ ९ ॥ अहं तु खलु सर्वान् वः समर्थयितुमुद्यतः । कुम्भकर्णस्य तु स्वप्नान्नेममर्थमचोदयम् ॥ १० ॥ अयं हि सुप्तः षण्मासान् कुम्भकर्णो महाबलः । सर्वशस्त्रभृतां मुख्यः स इदानीं समुत्थितः ॥ ११ ॥ इयं च दण्डकारण्याद्रामस्य महिषी प्रिया । रक्षोभिश्चरिताद्देशादानीता जनकात्मजा ॥ १२ ॥ सा मे न शय्यामारोढुमिच्छत्यलसगामिनी । त्रिषु लोकेषु चान्या मे न सीतासदृशी मता ॥ १३ ॥ तनुमध्या पृथुश्रोणी शारदेन्दुनिभानना । हेमबिम्बनिभा सौम्या मायेव मयनिर्मिता ॥ १४ ॥

वः समर्थयितुं ज्ञापयितुम् उद्यत एव पूर्वमेवोद्यतः । किंतु कुम्भकर्णस्य स्वप्नाद्धेतोः इममर्थं नाचोदयं तस्य नावेदयम् । अतः कथ्यत इत्यर्थः ॥ १० ॥ कुम्भकर्णस्य स्वप्नादित्युक्तमेव स्पष्टयति–अयमिति । षण्मासानित्यत्यन्तसंयोगे द्वितीया । इदानीं समुत्थितः । अतः पूर्वं नावेदयमित्यर्थः ॥ ११ ॥ उत्तरत्र सीताप्रत्यर्पणं विना रामजयो विचार्यतामिति वक्तुकामस्तस्या दुस्त्यजत्वं दर्शयितुं तामेव स्तौति–इयमित्यादिना । रक्षोभिश्चरिताद्देशात् जनस्थानादित्यर्थः । सा मयाऽऽनीतेत्युक्तिरजानन्तं कुम्भकर्णं प्रति ॥ १२ ॥ अलसगामिनी मन्दगामिनी । त्यज तामनिच्छन्तीम्, प्रतिगृहाणेतरामित्यत्राह–त्रिष्विति ॥ १३ ॥ असदृशत्वमुपपादयति–तनुमध्येत्यादिना । हेमबिम्बनिभा स्वर्णप्रतिमातुल्या । सौम्या रम्या । मायेव प्रतिक्षणमपूर्ववदाश्चर्यावहवस्तुवत्

प्रियसाधने सुखे सुखकरोपाये दुःखे दुःखकरोपाये । लाभः इष्टप्राप्तिः, अलाभः तदभावः तस्मिन् । हिताहिते इति पाठः ॥ ७–९ ॥ पूर्वेद्युः कथितोऽर्थः इदानीं किमर्थं कथ्यत इत्याशङ्क्य पुनः कथने हेतुमाह–अहं त्विति । तुः अवधारणे । अहं सर्वान् वः समर्थयितुं ज्ञापयितुम् उद्यत एव, निवेदितवानित्यर्थः । किन्तु स्वप्नाद्धेतोरिममर्थं कुम्भकर्णस्य नावेदयम् । अतः कथ्यत इत्यर्थः । अबोधयमिति पाठेऽप्ययमेवार्थः ॥ १० ॥ षण्मासान् षट्सु मासेषु । अत्यन्तसंयोगे द्वितीया ॥ ११–१३ ॥ सीताप्रत्यर्पणं विना राघवजयोपायो विचार्यतामिति वक्तुकामस्तस्या दुस्त्यजत्वं दर्शयितुं स्तौति–तनुमध्येत्यादि । हेमबिम्बनिभा सुवर्णप्रतिमा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थिता ॥ १४ ॥ क्रमेणारोक्ष्यतीत्याशङ्क्य मन्मथो विलम्बं न सहत इत्याह–सुलोहितेति । सुप्रतिष्ठितौ समतलौ । दृष्ट्वा, स्थितस्येति शेषः । शरीरजः कामः ॥ १५ ॥ सोऽपि निगृह्यतामित्याशङ्क्याह–हुतेत्यादि । अर्धमेकं वाक्यम् । आर्चिश्शब्दस्य इकारान्तत्वमार्षम् । सौरीमिव प्रभामित्यस्य दृष्ट्वेत्यादिशेषपूरणेन सम्बन्धः ॥१६॥ उन्नसमिति । उन्नसम् उन्नतनासिकम् । "उपसर्गाच्च" इति नसादेशः । अवशः विवशः । तदधीनः कथं निगृह्णीया

सुलोहिततलौ श्लक्ष्णौ चरणौ सुप्रतिष्ठितौ । दृष्ट्वा ताम्रनखौ तस्या दीप्यते मे शरीरजः॥ १५॥ हुताग्नेरर्चिसङ्काशामेनां सौरीमिव प्रभाम्॥ १६॥ [दृष्ट्वा सीतां विशालाक्षीं कामस्य वशमेयिवान् ।] उन्नसं वदनं वल्गु विपुलं चारुलोचनम् । पश्यंस्तदा वशस्तस्याः कामस्य वशमेयिवान् ॥ १७ ॥ क्रोधहर्षसमानेन दुर्वर्णकरणेन च । शोकसन्तापनित्येन कामेन कलुषीकृतः ॥१८॥ सा तु संवत्सरं कालं मामयाचत भामिनी । प्रतीक्षमाणा भर्तारं राममायतलोचना ॥ १९ ॥ तन्मया चारुनेत्रायाः प्रतिज्ञातं वचः शुभम् । श्रान्तोऽहं सततं कामाद्यातो हय इवाध्वनि ॥ २० ॥

मिति भावः । वल्गु सुन्दरम् ॥ १७ ॥ कामवश्यत्वमेव विवृणोति–क्रोधेति । क्रोधहर्षयोः समानेन क्रोधे हर्षे चैकरूपेण । दुर्वर्णकरणेन वैवर्ण्यकारिणा । शोकसन्तापनित्येन शोके मनोव्यथायां सन्तापे शरीरपीडायां च नित्येन अनपायेन कामेन । कलुषीकृतः व्याकुलचित्तोऽस्मि ॥ १८ ॥ यद्येवं सा प्रसह्यापि शय्यामारोप्यताम्, तत्राह–सा त्विति । संवत्सरं कालं संवत्सररूपं कालम् । संवत्सराभ्यन्तरे रामो यदि नागतः तदा तथा करिष्यामीत्ययाचतेत्यर्थः । इदं चारोप्योक्तम् । वस्तुतो रावणेनैव तथा प्रतिज्ञानादिति भावः ॥ १९ ॥ चारुनेत्राया इति प्रतिश्रवणहेतुः । नयनसौन्दर्यपारवश्येन

सदृशी । माया प्रतिक्षणमपूर्ववदाश्चर्यावहवस्तुविशेषः ॥ १४ ॥ चरणौ दृष्ट्वा, स्थितस्येति शेषः ॥ १५ ॥ हुताग्नेरित्यर्धमेकं वाक्यम् । अत्रापि दृष्ट्वेत्यनुषज्यते ॥१६ ॥ उन्नसमिति । तस्या वदनं पश्यन् अवशः विवशस्सन् कामस्य वशमेयिवानिति सम्बन्धः ॥ १७ ॥ क्रोधहर्षसमानेन क्रोधहर्षयोस्समानेन क्रोधहर्षावस्थयोर्बाधकत्वेनैकरूपेण । दुर्वर्णकरणेन वैवर्ण्यकारिणा । शोकसन्तापनित्येन शोकसन्तापावस्थयोर्बाधकत्वेन नियतेन, अनेनाक्षवधादिजनितदुःखित्वाद्यवस्थास्वपि कामस्य बाधकत्वमुक्तं भवति ॥ १८ ॥ तर्ह्यावित आरभ्य प्रतिकूलया सीतया किं प्रयोजनम् ? सा त्यज्यतामित्याशङ्क्य " सा मे न शय्यामारोढुमिच्छत्यलसगामिनी " इत्यवशादागतसत्यवचनसूचितं तदनुरागाभावं सङ्गोप्य स्वकृतस्यावधेस्तत्प्रार्थनापूर्वकत्वमारोप्याह–सा त्वित्यादिना । कालमवधित्वेनायाचत ' इयं च दण्डकारण्यात् ' इत्यारभ्य–' श्रान्तोऽहं सततं कामात् ' इत्यन्तस्य ग्रन्थसन्दर्भस्य वास्तवार्थस्तु–पूजार्थमानीतां त्रैलोक्यमोहिनीं ममेष्टदेवतां सीतां स्थण्डिलशायिनीं दुःखाक्रान्तां दृष्ट्वा अहमतिदुःखमनुभवामीत्याशयेनाह–सा मे नेति । मे शय्यां मदर्पितां शय्यामित्यर्थः । एतादृशविशेषणविशिष्टा सीता दुःखार्हा न भवतीति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तद्वचनमङ्गीकृतवानस्मीति भावः । अध्वनि दीर्घमार्गे ॥२०॥ कथमेनामुपलप्स्यसे तामुपनेतुमुपागते सपरिकरे दाशरथावित्यत आह–कथमिति । उत्तरन्ति उत्तरिष्यन्ति । सत्त्वानि झषव्यतिरिक्तजन्तवः ॥२१॥ तर्हि किमिदानीं विचार्यम्? तत्राह–अथवेति । यस्य यथा मतिः तथा ब्रूतेत्यर्थः ॥२२॥ विभीषणमतव्यावृत्त्यर्थं स्वमतमाह–मानुषादिति । सपादश्लोकमेकं वाक्यम् । मानुषात् भयाभावे हेतुमाह तदेति । अजयमिति च्छेदः । लङुत्तमैक

कथं सागरमक्षोभ्यमुत्तरन्ति वनौकसः । बहुसत्त्वझषाकीर्णं तौ वा दशरथात्मजौ ॥ २१ ॥ अथवा कपिनैकेन कृतं नः कदनं महत् । दुर्ज्ञेयाः कार्यगतयो ब्रूत यस्य यथा मतिः ॥ २२ ॥ मानुषान्मे भयं नास्ति तथापि तु विमृश्यताम् । तदा देवासुरे युद्धे युष्माभिः सहितोऽजयम् । ते मे भवन्तश्च तथा सुग्रीवप्रमुखान् हरीन् ॥२३॥ परे पारे समुद्रस्य पुरस्कृत्य नृपात्मजौ । सीतायाः पदवीं प्राप्तौ सम्प्राप्तौ वरुणालयम् ॥ २४ ॥ अदेया च यथा सीता वध्यौ दशरथात्मजौ । भवद्भिर्मन्त्र्यतां मन्त्रः सुनीतं चाभिधीयताम् ॥ २५ ॥

वचनम् । इन्द्रं जितवतो मे मनुष्यः कियानिति भावः । ते मे भवन्तश्च तथा । ते देवासुरे युद्धे जेतारो भवन्तः । तथा सहायभूताः वर्तन्त इत्यर्थः ॥ २३ ॥ सुग्रीवप्रमुखान् हरीनित्युत्तरशेषः । प्राप्तौ ज्ञातवन्तौ । वरुणालयं समुद्रम् । संप्राप्तौ प्राप्नुतां नाम का नः क्षतिरिति भावः ॥ २४ ॥ विमृश्यतामित्युक्तं विमर्शप्रकारं दर्शयति–अदेयेति । मन्त्रो मन्त्र्यतां मन्त्रः क्रियतामित्यर्थः । सुनीतं सुनिश्चितम् ॥ २५ ॥

सूचयितुं तामनुवर्णयति–विलोकेष्वित्यादिना । किञ्च सुलोहितेति । तस्याः सकलकलुषहरणौ चरणौ दृष्ट्वा हुताग्नेरर्चिस्सङ्काशामेनाम्, दुःखितामिति शेषः । दृष्ट्वा मे शरीरजः सीतानिमित्तजः, अग्निरिति शेषः । दीप्यत इत्यर्थः । रमस्व स्वदारेषु, किमेतादृशचिन्तयेत्यत आह–उन्नसमित्यादि श्लोकद्वयेन । उक्तविशेषणविशिष्ट कामेन कलुषीकृतोऽपि अवशोऽपि तस्या दुःखितायाः, सीताया इति शेषः । वदनं पश्यन्नहं कामस्य वशमेयिवान् कामवशां प्राप्स्यामि किमिति काकुः । त्वद्गृहे जगदम्बायास्सीताया विद्यमानायास्सत्यास्तव का हानिरित्याशङ्क्य तस्या मद्गृहावस्थितिकालोऽपि समाप्तप्राय एवेत्याशयेनाह–सा तु संवत्सरमिति ॥१९-२२॥ मानुषान्मे भयमिति सपादश्लोकमेकं वाक्यम् । यदि अप्यर्थे । तदा देवासुरयुद्धे युष्माभिस्सहितो अयं प्राप्तवानस्मि यद्यपि, मे मते भवन्तस्तथा तादृक् सहायाः यद्यपि, मानुषान्मे भयं नास्ति यद्यपि, तथापि तु विमृश्यतामिति सम्बन्धः । सुग्रीवप्रमुखानिति । सीतायाः पदवीं वीरौ संप्राप्तौ वरुणालयम् । इति पाठे–पदवीम्, ज्ञात्वेति शेषः । पदवीं प्राप्तौ सम्प्राप्तौ वरुणालयम् इति पाठे–पदवीं प्राप्तौ ज्ञातवन्तौ सन्तौ वरुणालयं सम्प्राप्ताविति सम्बन्धः ॥ २३ ॥ २४ ॥ अदेयेत्यादि । सुनीतं सुष्ठु निर्णीतं कार्यम् । वास्तवार्थे–अवध्याविति छेदः ॥ २५ ॥ ॥ ३३ ॥

मा भूद्रामस्य समुद्रतरणे तव जये वा शक्तिः, तत्सहायस्यान्यस्य कस्यचित् स्यात्तत्राह–नहीति । वानरैः सह सागरं तीर्त्वा, आगन्तुमिति शेषः । रामादन्यस्य शक्तिं न पश्यामि अतो मम निश्चयेन जय इत्यन्वयः ॥ २६ ॥ कामपरीतस्य कामेन विपरीतस्य, कामातुरतया विपरीतबुद्धेरित्यर्थः । परिदेवितं परिदेवनम्, तद्वदसङ्गतभाषणमित्यर्थः ॥ २७॥ "मन्त्रिभिर्हितसंयुक्तैः समर्थैर्मन्त्रनिर्णये । सहितो मन्त्रयित्वा यः कर्मारम्भान् प्रवर्तयेत् " इत्युक्तो

न हि शक्तिं प्रपश्यामि जगत्यन्यस्य कस्यचित् । सागरं वानरैस्तीर्त्वा निश्चयेन जयो मम ॥ २६ ॥ तस्य कामपरीतस्य निशम्य परिदेवितम् । कुम्भकर्णः प्रचुक्रोध वचनं चेदमब्रवीत् ॥ २७ ॥ यदा तु रामस्य सलक्ष्मणस्य प्रसह्य सीता खलु सा इहाहृता । सकृत् समीक्ष्यैव सुनिश्चितं तदा भजेत चित्तं यमुनेव यामुनम् ॥ २८ ॥ सर्वमेतन्महाराज कृतमप्रतिमं तव । विधीयेत सहास्माभिरादावेवास्य कर्मणः ॥ २९ ॥

त्तममन्त्रयितृभावे, "एकोऽर्थं विमृशन्नेको धर्मे प्रकुरुते मनः । एकः कार्याणि कुरुते तमाहुर्मध्यमं नरम्॥" इत्युक्तमध्यममन्त्रयितृभावेऽपि नावस्थितोऽसीत्याह–यदेति । यदा सकृत्समीक्ष्यैव स्वयमेव विचार्य। रामस्य सीता इहाहृता तदैव चित्तं कर्तृ यमुना यामुनं पर्वतमिव सुनिश्चितं सुनिश्चयं भजेत खलु । स एवास्माभिः सह विचारकालः । इदानीं विचारणं गते जले सेतुबन्धनमिति भावः ॥ २८॥ तदा कृते किं स्यादित्यत्राह–सर्वमिति । कृतमिति कर्मणि

न हीति । अत्रागन्तुमिति शेषः । जगति कस्यचिदन्यस्य शत्रोर्वानरैस्सह सागरं तीर्त्वा अत्रागन्तुं शक्तिं न पश्यामि हि, अतो निश्चयेन मम जयः इत्यन्वयः । निश्चये न जये मम इति पाठे मम जये अन्यस्य कस्यचिदपि निश्चये शक्तिं न पश्यामीति योज्यम् । नहि शक्तिमित्यस्य वास्तवार्थस्तु–अन्यस्य शक्तिं न पश्यामि, रामं विनेति शेषः । एवं निश्चये सति मम जयो नेत्यन्वयः ॥२६॥२७॥ ननु पूर्वमेव करणीयमेतदिदानीं क्रियमाणं गतोदकसेतुबन्धनसदृशमित्याह–यदा त्विति । यदा तु सलक्ष्मणस्य रामस्य सीता सकृत्समीक्ष्यैवास्माभिस्सहाविचार्य स्वयमेव विचारयतेहाहृता तदैव खलु सकृत्समीक्षणवेलायामेवासकृदस्माभिस्सह विचारितं चेच्चित्तं कर्तृ सुनिश्चितं निश्चयं भजेत खलु प्राप्नुयाद्धि । कथमिव यमुना यामुनं यामुनाख्यगिरिमिव । अस्माभिस्सह विचारस्य स एव काल इति फलितार्थः । तदैवैतन्मन्त्रकरणे फलमाह–सर्वमिति । कृतमिति कर्मणि निष्ठा । तव सर्वमेतत्कृतं मन्त्रात्मकं कर्म । अस्य सीताहरणरूपस्य कर्मणः आदावेव प्रागेव अस्माभिः सह विधीयेत विहितं चेदप्रतिममनुत्तमं भवेदित्यर्थः । तदा न कृतम् । अतोऽधुना क्रियमाणो विचारः गतजलसेतुबन्धसदृश इति भावः ॥ २८ ॥ २९ ॥

निष्ठा । एतत्कृतं सर्वं मन्त्रकर्म । अस्य कर्मणः सीताहरणरूपस्य । आदावेव यदि विधीयेत तदा अप्रतिमं समञ्जसं स्यादित्यर्थः ॥ २९ ॥ आदौ विचार्य कृतस्य साफल्यप्रदर्शनपुरस्सरमविचार्यकृतस्य फलवैपरीत्यं दर्शयति श्लोकद्वयेन–न्यायेनेति । न्यायेन विचारणेन ॥ ३० ॥ अनुपायेन क्रियमाणानि कर्माणि विपरीतानि विपर्यस्तानि यानि तानि च दुष्यन्ति दोषवन्ति च भवन्ति । न केवलं निष्फलानि प्रत्युतानर्थकराण्यपि भवन्तीत्यर्थः । अप्रयतेषु

न्यायेन राजकार्याणि यः करोति दशानन। न स सन्तप्यते पश्चान्निश्चितार्थमतिर्नृपः ॥ ३० ॥
अनुपायेन कर्माणि विपरीतानि यानि च। क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ३१ ॥
यः पश्चात् पूर्वकार्याणि कर्माण्यभिचिकीर्षति। पूर्वं चापरकार्याणि न स वेद नयानयौ ॥ ३२ ॥
चपलस्य तु कृत्येषु प्रसमीक्ष्याधिकं बलम्। क्षिप्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ ३३ ॥

अशुचिषु अपात्रेषु, दीयमानानीति शेषः ॥ ३१ ॥ अकालकृतं मन्त्रकरणमनुचितमित्याह–य इति । पूर्वकार्याणि पूर्वं कर्तव्यानि मन्त्रकर्माणि । अपरकार्याणि उत्तरकालकर्तव्यकर्मारम्भान् । पूर्वं मन्त्रविचारात्पूर्वम् ॥ ३२ ॥ इदानीमसमीक्ष्यकारिणो बलमपि निरर्थकमित्याह–चपलस्येति । यद्वा प्राप्तामप्यनीतिं बलेन समीकरिष्यामीत्यत्राह चपलस्येति । कृत्येषु क्षिप्रं चपलस्य असमीक्ष्यकारिणः । बलमधिकमाभिमुख्येन जेतुमशक्यम् । समीक्ष्य विचार्य । अन्ये शत्रवः । खं रन्ध्रम् । प्रपद्यन्ते असमीक्ष्यकरणरूपावसरं लब्ध्वा अभिभवन्तीत्यर्थः । द्विजाः हंसाः । अलङ्घ्यस्य क्रौञ्चस्य क्रौञ्चाख्यपर्वतस्य लङ्घनाय खं रन्ध्रं यथा प्रपद्यन्ते तद्वदित्यर्थः । क्रौञ्चस्यौन्नत्येनालङ्घ्यत्वात् सुब्रह्मण्यशक्तिविदारणकृतरन्ध्रेण

आदावेव विचार्य कृतस्य कर्मणस्साफल्यमाह–न्यायेनेति । न्यायेन विचारेण। सन्तप्यते सन्तपति ॥ ३० ॥ विचारविधुरं कालातीतं च कर्म निष्फलं भवतीत्याह–अनुपायेनेति । अनुपायेन अविचारितोपायेन । विपरीतानि व्यस्तानि । अप्रयतेषु अपात्रेषु ॥ ३१ ॥ मन्त्रविचारानन्तरकर्तव्यसीतापहरणं मन्त्रविचारात्पूर्वं कृतवतः सीतापहरणात्पूर्वकर्तव्यमन्त्रविचारमिदानीं चिकीर्षतस्तव नीत्यनीतिज्ञता नास्तीत्याह–यः पश्चादिति । पूर्वकार्याणि पूर्वकर्तव्यानि ॥ ३२ ॥ इदानीमसमीक्ष्यकारिणो बलमपि निरर्थकमित्याह–चपलस्येति । बलवतोऽपि कृत्येषु चपलस्य असमीक्ष्यकारिणः पुरुषस्य अधिकं बलं समीक्ष्य स्वस्मादधिकं बलं समालोच्य तस्य खं रन्ध्रम् अन्ये शत्रवः प्रपद्यन्ते द्वितीयपादस्थखशब्दस्य काकाक्षिवदुभयत्राप्यन्वयः । द्विजाः हंसाः । अलङ्घ्यस्य क्रौञ्चस्य लङ्घनाय खं स्कन्दशक्तिकृतं रन्ध्रं

हंसास्तमतिक्रम्य गच्छन्तीति प्रसिद्धिः ॥ ३३ ॥ सापायं च त्वत्कृतं कर्मेत्याह–त्वयेति । महत् दुष्करम् । सापायमित्यर्थः । अप्रतिचिन्तितम् अनालोचितम् । इदं सीताहरणरूपं कार्यम् । सापायत्वमेवाह–दिष्ट्येति ॥ ३४ ॥ सर्वमेतन्महाराजेत्युपक्रम्योक्तमुपसंहरति--तस्मादिति । तर्हि का गतिरित्यपेक्षायां मयि जीवति कस्ते भार इत्याह अहमिति । अनघेति । त्वं तु निर्व्यसनो भवेत्यर्थः । समीकरिष्यामि नीत्यनीती तुल्ये करिष्यामीत्यर्थः ॥ ३५ ॥ तदेवाह–अहमिति सार्धश्लोकः । विशांपते प्रजानां पते । अतिमानुषवैभवौ तौ कथं जय्यौ ? तत्राह यदीति । तौ दश

त्वयेदं महदारब्धं कार्यमप्रतिचिन्तितम् । दिष्ट्या त्वां नावधीद्रामो विषमिश्रमिवामिषम् ॥ ३४ ॥ तस्मात्त्वया समारब्धं कर्म ह्यप्रतिमं परैः । अहं समीकरिष्यामि हत्वा शत्रूंस्तवानघ ॥ ३५ ॥ अहमुत्सादयिष्यामि शत्रूंस्तव विशांपते । यदि शक्रविवस्वन्तौ यदि पावकमारुतौ । तावहं योधयिष्यामि कुबेरवरुणावपि ॥ ३६ ॥ गिरिमात्र शरीरस्य महापरिघयोधिनः । नर्दतस्तीक्ष्णदंष्ट्रस्य बिभियाद्वै पुरन्दरः ॥ ३७ ॥ पुनर्मां स द्वितीयेन शरेण निहनिष्यति । ततोऽहं तस्य पास्यामि रुधिरं काममाश्वस ॥ ३८ ॥

रथात्मजौ शक्रविवस्वन्तौ यदि स्याताम् तथापीत्यर्थः ॥ ३६ ॥ स्वस्य योधनसामर्थ्यविशेषं दर्शयति–गिरीति । गिरिमात्रशरीरस्य गिरिप्रमाणदेहस्य । " प्रमाणे द्वयसज्दघ्नञ्मात्रचः " इति मात्रच प्रत्ययः । पञ्चम्यर्थे षष्ठी ॥ ३७ ॥ शरवर्षिणो रामस्य पुरतः कथं स्थातुं शक्तस्तत्राह–पुनरिति । सः रामः । पुनर्मां प्रथममेकेन शरेण निहत्य पुनरपि द्वितीयेन शरेण मां हनिष्यति । ततः तावदेवेत्यर्थः । अत्राश्लीलमपि ध्वन्यते । मां द्विती

यथा मपद्यन्ते तद्वदित्यर्थः ॥ ३३ ॥ भवत्वेवं मया किं चापलं कृतम् ? येन शत्रूणां मयि रन्ध्रं स्यादत आह–त्वयेति । अप्रतिचिन्तितम् अविचारितम् । महत् प्राणावसानपर्यवसायि इदं सीतापहरणरूपकार्यं त्वया धूर्तसहायेनारब्धं कृतम् अतो रन्ध्रं प्राप्तम् । तत् दैववशात्परिहृतमित्याह–दिष्ट्येति ॥ ३४ ॥ त्वत्कृताकृत्यपरिगणनेन किम् ? इदानीं सर्वं मच्छौर्येण प्रतिविधास्यामीत्याह–तस्मादिति । अप्रतिमं तवाननुरूपम् परैर्मद्व्यतिरिक्तैः, अप्रतिसमाधेयमिति शेषः ॥ ३५ ॥ रामस्य अधिकबलं विचिन्त्याह–अहमिति सार्धश्लोकमेकं वाक्यम् । यदीति । तौ रामलक्ष्मणौ शक्रविवस्वन्तौ यदि, स्यातामिति शेषः । तथापि योधयिष्यामि योत्स्यामीत्यर्थः ॥ ३६॥ ३७ ॥ पुनरिति । सः रामः मामेकेन शरेण प्रहृत्य पुनर्द्वितीयेन शरेण निहनिष्यति यदि ततः ततःपूर्वमेव तस्य रुधिरम् अहं कामं पास्यामि ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यन शरेणावश्यं निहनिष्यति । तस्य रामस्य ततस्तस्माद्धननात् । कर्तरि षष्ठी । रुधिरं स्वरुधिरं पास्यामि । कामम् अत्यर्थम् । आश्वस निश्वसेति ॥ ३८॥ 'आत्मानमरक्षन् परघाती वीरो न श्लाघ्यः' इति न्यायेन परवत् स्वस्यापि वधे न कोऽप्यतिशय इत्यत्राह–वधेनेति । अत्राप्यर्थान्तरम् । वधेन स्वविनाशेन दाशरथेः सुखावहं जयं तव सकाशादाहर्तुं यतिष्ये । रामं हत्वा रामं गत्वा । "हन हिंसागत्योः" इति धातुः । खादामि किं जीवामि

वधेन वै दाशरथेः सुखावहं जयं तवाहर्तुमहं यतिष्ये । हत्वा च रामं सह लक्ष्मणेन खादामि सर्वान् हरियूथमुख्यान्
॥ ३९ ॥ रमस्व कामं पिब चाग्र्यवारुणीं कुरुष्व कार्याणि हितानि विज्वरः । मया तु रामे गमिते यमक्षयं चिराय
सीता वशगा भविष्यति ॥ ४० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे द्वादशः सर्गः ॥ १२ ॥
रावणं क्रुद्धमाज्ञाय महापार्श्वो महाबलः । मुहूर्तमनुसञ्चिन्त्य प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥

किमिति काकुरनुसन्धेया ॥३९॥ रमस्वेति । अत्राप्यर्थान्तरम् । मया रामे विषये अक्षयं यथा भवति तथा गमिता प्रापिता इयं सीता रामस्य वशगा भविष्यति । रमस्वेत्यादौ काकुः ॥४०॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वादशः सर्गः ॥ १२ ॥ अथ रावणस्य दुर्मन्त्रिमतानुसारित्वमाह–रावणमित्यादि । क्रुद्धं कुम्भकर्णोक्तनयापरिज्ञानवचनेनेत्यर्थः । मुहूर्तमनुसञ्चिन्त्य रावणक्रोधनिवारणोपायं

आश्वसेति योजना । पुनरित्यादिश्लोकत्रयस्य वास्तवार्थस्तु–रणमूर्द्धनि स्वकर्तव्यं विज्ञापयति । पुनरिति । सः रामः एकेन शरेण मां महत्य पुनर्द्वितीयेन शरेण निहनिष्यति ततः ततःप्रागेव तस्य रामस्य सम्बन्धि, वानराणामिति शेषः । रुधिरं पास्यामि काममाश्वस ॥ ३८ ॥ श्रीरामजये मम सामर्थ्यं नास्तीति विज्ञापयति–वधे नेति । दाशरथेर्वधे सति तव सुखावहं जयमाहर्तुं न यतिष्ये किन्तु लक्ष्मणेन सह, रामं विनेति शेषः । सर्वान् हरियूथमुख्यान् हत्वा खादामीति सम्बन्धः ॥ ३९ ॥ रमस्वेति । मया रामे विषये यमक्षयं गमिते सति सीता अवशम् अस्य विष्णुरूपरामस्य वशमागमिष्यतीति सम्बन्धः ॥ ४० ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्वादशः सर्गः ॥१२॥ रावणमिति । मुहूर्तमनुसञ्चिन्त्य रावणक्रोधनिवारणोपायं विचार्य ॥ ३५ ॥

स०–मुहूर्तमनुसञ्चिन्त्य अप्रियोक्तौ मम विप्रियं तदप्रियोक्तौ सर्वप्रियहानिः कथं कर्तव्यमिति ध्यात्वा ॥ १ ॥

विचार्येत्यर्थः ॥१॥ य इति । खलुर्वाक्यालङ्कारे । दुष्करं सीताहरणं श्रमेण कृत्वा तत्सम्भोगमकुर्वाणस्त्वं क्षौद्राकाङ्क्ययाऽतिगहनं वनं प्रविश्य तदपिबन् जन इव मूढोऽसीति भावः ॥ २ ॥ शत्रुषु विद्यमानेष्वधर्मावहमिदं कथं कुर्यामित्यत्राह–ईश्वरस्येति । सर्वनियन्तुस्तव को वा नियन्ताऽस्ति । अतो धर्मान्न भेतव्यमिति भावः । शत्रून् मूर्धस्वाक्रम्य तान् तृणीकृत्येत्यर्थः । अर्थान्तरं तु रामस्येश्वरः कोऽस्ति । स निग्रहीतुं न शक्य इत्यर्थः । शत्रून्

यः खल्वपि वनं प्राप्य मृगव्यालसमाकुलम् । न पिबेन्मधु सम्प्राप्तं स नरो बालिशो भवेत् ॥ २ ॥
ईश्वरस्येश्वरः कोऽस्ति तव शत्रुनिबर्हण । रमस्व सह वैदेह्या शत्रूनाक्रम्य मूर्धसु ॥ ३ ॥
बलात् कुक्कुटवृत्तेन वर्तस्व सुमहाबल । आक्रम्याक्रम्य सीतां वै तथा भुङ्क्ष्व रमस्व च ॥ ४ ॥

रामम् । पूजायां बहुवचनम् । दशस्वपि मूर्धस्वाक्रम्य शिरसा प्रणम्येत्यर्थः । वैदेह्या सह रमस्व वैदेह्यां यथा स्वभर्ता रमते तथा त्वमपि स्वदारेषु रमस्व । वैदेह्या सह रामं प्रणम्येति वा योजना ॥ ३ ॥ किं करोमि सा हि न मामभिलषतीत्यत्राह–बलादिति । कुक्कुटवृत्तेन कुक्कुटवृत्त्या । भावे क्तः । कुक्कुटो वञ्चनामार्गेण स्वदयिताभाक्रमते । तथा त्वमपीत्यर्थः । कुक्कुटानां कामुककुक्कुटसङ्गे कोपो जातिधर्मः । तथा सीतामनुभव यथा कुक्कुट्यः सुखिनः तद्वदित्यर्थः । यथाऽऽह वात्स्यायनः–"कुद्धामाक्रम्य भोगस्तु कौक्कुटः सोऽपि सौख्यदः ।" इति । भुङ्क्ष्व भोगं भज । रमस्व निर्विचारो भवेत्यर्थः । मुनिहृदयं तु कुक्कुटवृत्तेनान्यत्र वर्तस्व सीतां तु बलात् भुङ्क्ष्व रक्ष । "भुज परिपालनाभ्यवहारयोः" इति धातुः । आत्मनेपद

इत्यर्थः ॥ १ ॥ दुष्करं सीताहरणं श्रमेण कृत्वा तत्सम्भोगमकुर्वाणस्त्वं मधुकाङ्क्षया दुर्गमं वनं प्रविश्य तदपिबन् जन इव मूढोऽसीति भावः ॥ २ ॥ ३ ॥ अनङ्गीकारे कथमनुभव इत्यत्राह–बलादिति । रमस्व सह वैदेह्येत्यादिसार्धश्लोकस्य वास्तवार्थस्तु–कुक्कुटवृत्तेनेत्यत्र कुक्कुटवृत्ते न इति छेदः । हे महाबल रावण ! वैदेह्या किम् ? अत आक्रम्याक्रम्य वा प्रकारान्तरेण वा तां वैदेहीं सीतां न भुङ्क्ष्व न रमस्व च । कुक्कुटवृत्ते कुक्कुटव्यापारे, चापल्य इति यावत् । न वर्तस्व किन्तु बलात

स०–प्रथमतः सीतानयनं न कर्तव्यम् । कृतं चेत् सीताननुभवो भवतो न योग्य इति प्रोत्साहयति–य इते ॥ २ ॥ "सा किं न रम्या स च किं न रन्ता गरीयसी केवलमीश्वरेच्छा" इत्यादिवदीश्वरेच्छानुसारिता चेतरस्य, न तवेत्याह–ईश्वरस्येति ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मार्षम् ॥ ४ ॥ एतन्निमित्तमागामिभयमनिवार्यं कथमेवं क्रियतामित्यत्राह–लब्धेति । एवं लब्धकामस्य ते पश्चात्कामलाभानन्तरम् यत् भयमागमिष्यति । प्राप्तं तदानीमागतम् । अप्राप्तकालं प्राप्तकालमित्यस्य "प्राप्तापन्ने च द्वितीयया" इति समासः । तथा न भवतीत्यप्राप्तकालम् । आगामीति यावत् । प्रतिसहिष्यसि अभिभविष्यसीत्यर्थः ॥५॥ तिष्ठतु भवान् त्वद्भ्रातृपुत्रावेव प्रतिपक्षप्रतिषेधे शक्तावित्याह–कुम्भकर्ण इति ॥६॥ विभीषणमतं खण्डयति–उपप्रदानमिति । अकुशलैः युद्धासमर्थैः । कृतं दानादिकम् । अतिक्रम्य त्यक्त्वा । दण्डेन बलात्कारेण । अर्थेषु प्रयोजनेषु सिद्धिं रोचय ॥७॥

लब्धकामस्य ते पश्चादागमिष्यति यद्भयम् । प्राप्तमप्राप्तकालं वा सर्वं प्रतिसहिष्यसि ॥ ५ ॥ कुम्भकर्णः सहास्माभिरिन्द्रजिच्च महाबलः । प्रतिषेधयितुं शक्तौ सवज्रमपि वज्रिणम् ॥ ६ ॥ उपप्रदानं सान्त्वं वा भेदं वा कुशलैः कृतम् । समतिक्रम्य दण्डेन सिद्धिमर्थेषु रोचय ॥७॥ इह प्राप्तान् वयं सर्वान् शत्रूंस्तव महाबल । वशे शस्त्रप्रतापेन करिष्यामो न संशयः ॥ ८ ॥ एवमुक्तस्तदा राजा महापार्श्वेन रावणः । तस्य संपूजयन् वाक्यमिदं वचनमब्रवीत् ॥ ९ ॥ महापार्श्व निबोध त्वं रहस्यं किंचिदात्मनः । चिरवृत्तं तदाख्यास्ये यदवाप्तं मया पुरा ॥१०॥ पितामहस्य भवनं गच्छन्तीं पुञ्जिकस्थलाम् । चञ्चूर्यमाणामद्राक्षमाकाशेऽग्निशिखामिव ॥ ११ ॥

रामादयो यत्र वर्तन्ते तत्र गत्वा योद्धव्यमित्युक्तं निकुम्भादिमतं दूषयन्नाह–इहेति । इह लङ्कापरिसरे । शस्त्रप्रतापेन शस्त्रबलेन । वशे करिष्यामः निग्रहीष्याम इत्यर्थः ॥ ८ ॥ एवमिति । संपूजयन् स्वचित्तानुगुणयुक्तमिति श्लाघयन्नित्यर्थः ॥ ९ ॥ महापार्श्वेति संबोधनम् । प्रमुदितोऽस्मीति शेषः । चिरवृत्तं रहस्यं किंचित् । अस्तीति शेषः । यत्पुरा मयाऽवाप्तं तदाख्यास्य इति योजना ॥ १० ॥ पितामहस्येति । गच्छन्तीम्, पितामहवन्दनायेति

शत्रून् मूर्ध्नस्याक्रम्य रमस्वेति सम्बन्धः ॥ ४ ॥ सीतानुभवनिमित्तकमागामिभयमनिवार्यं कथमेवं कर्तव्यमित्यत्राह–लब्धकामस्येति । लब्धकामस्य प्राप्तसीतानुभवस्य पश्चात् सीतानुभवानन्तरम् प्राप्तं तदानीमेवागतं प्राप्तकालम् आगामिकाले प्राप्यं वा यद्भयमागमिष्यति तत्सर्वं प्रतिसहिष्यसि प्रतिसहिष्यसे, अभिभविष्यसीत्यर्थः ॥ ५ ॥ भयाभिभवे शक्तिं प्रदर्शयति–कुम्भकर्ण इति ॥ ६ ॥ उपप्रदानमिति । अकुशलैः युद्धासमर्थैः कृतं सामादिकम् । समतिक्रम्य त्यक्त्वा । दण्डेन दण्डोपायेन । अर्थेषु सिद्धिं रोचय ॥ ७-१० ॥ पितामहस्येति । चञ्चूर्यमाणां मद्भीत्या निलीय चरन्तीम् । शापस्य भीतः शापाद्भीतः ॥ ११–२० ॥ ॥ ३६ ॥

स्र०–ननूत्तरकाण्डे रम्भानिमित्तं नलकूबरशापः परदाराणां बलात्सङ्गे श्रूयते । यथोक्तम्–"एतस्मिन्नन्तरे तत्र दिव्याभरणभूषिता । सर्वाप्सरोवरा रम्भा पूर्णचन्द्रनिभानना ॥" इत्यारभ्य "नलकूबरमासाद्य"–

शेषः। पुञ्जिकस्थला नाम काचिदप्सराः। चञ्चूर्यमाणां भीत्या निलीय गच्छन्तीम्। "लुपसदचर–" इत्यादिना भावगर्हायां यङ्। सञ्चरणात्मकस्य भावस्य गर्हा निलयनम्। "चरफलोश्च" इति नुक्। "उत्परस्यातः" इत्युकारः। अग्निशिखामिवेति तेजोविशेषोक्तिः। यद्वा द्रावकत्वोक्तिः। अत एवोक्तम्–"अङ्गारसदृशी नारी घृतकुम्भसमः पुमान्" इति। सञ्चार्यमाणामिति पाठे–परिचारिकादर्शितमार्गामित्यर्थः ॥११॥ विवसना कृता सा मया

सा प्रसह्य मया भुक्ता कृता विवसना ततः। स्वयम्भूभवनं प्राप्ता लोलिता नलिनी यथा ॥ १२ ॥
तस्य तच्च तदा मन्ये ज्ञातमासीन्महात्मनः। अथ सङ्कुपितो देवो मामिदं वाक्यमब्रवीत् ॥ १३ ॥
अद्यप्रभृति यामन्यां बलान्नारीं गमिष्यसि। तदा ते शतधा मूर्धा फलिष्यति न संशयः ॥ १४ ॥
इत्यहं तस्य शापस्य भीतः प्रसभमेव ताम्। नारोपये बलात् सीतां वैदेहीं शयने शुभे ॥ १५ ॥

भुक्तेत्यन्वयः ॥ १२ ॥ तत् धर्षणम्। मन्य इत्यनेन शापमात्रं मया श्रुतम्। धर्षणश्रवणं तु मया ऊहितमिति गम्यते ॥ १३ ॥ अद्येत्यादि। अद्यप्रभृति –इत्याद्युक्त्वा "उत्ससर्ज तदा शापं राक्षसेन्द्राय दारुणम्। अकामा तेन यस्मात्त्वं बलाद्भद्रे प्रधर्षिता। तस्मात्स युवतीमन्यां नाकामामुपयास्यति ॥" इत्यादि। तथा भारते वनपर्वणि रामोपाख्याने सीतां प्रति त्रिजटावाक्यम्–"नलकूबरशापेन रक्षिता ह्यसि नन्दिनि। शापो ह्येष पुरा पापो वधूं रम्भां परामृशन् ॥" इति। तथा च कथमत्र पुञ्जिकस्थलीनिमित्तं ब्रह्मशापोत्कीर्तनम्? न च पूर्वं रम्भानिमित्तशापः। अनन्तरं पुञ्जिकस्थलीकृतः शापः इत्येकस्यैव शापद्वयाङ्गीकारे बाधकाभाव इति वाच्यम्; तथात्वे नलकूबरशापेन तदनन्तरभाविपुञ्जिकस्थलीधर्षणकाले तच्छिरःस्फोटापत्तेः। ब्रह्मशापानन्तरं रम्भासम्भोगे तु सुतरां तस्य दुर्निवारत्वात्। तस्मात्कथमत्रेति चेत्? उच्यते–कल्पे कल्पे अवान्तरवैचित्र्यस्य बहुलमुपलम्भात्कल्पान्तरवृत्तां ब्रह्मशापकथां समाधौ समीक्ष्य कविरवादीदिति। अथवा नलकूबरशापस्य पतिव्रताधर्षणविषयत्वेन स्वैरिणीविषयत्वाभावेन न पुञ्जिकस्थलीसङ्गात्तच्छिरस्सहस्रधा भेदः। यथोक्तं तत्रैवोत्तररामायणे–"तेन निस्संशयतां प्रीतिमापुस्सर्वाः पतिव्रताः" इति। अन्यथा पतिव्रता इति न स्यात् स्याच्च स्त्रिय इति। यद्वा रम्भानिमित्तशापस्य कामनारहितस्त्रीबलात्कारविषयत्वम्। पुञ्जिकस्थल्या अन्तः कामो वर्तत इति ज्ञायते। अतो न तन्मरणमभूत्। यथोक्तं तत्रैव–"नाकामामुपयास्यसि" इति। अत्र चञ्चूर्यमाणां रावणलज्जया स्वाङ्गे निलीयमानामिवेति। प्रसह्योक्तिस्तु स्त्रीस्वभावेन लज्जयाऽनङ्गीकारप्रदर्शनादिति ज्ञेयम्। यत्तु नागोजिभट्टेन कश्चिदेवमेव कुबेरपुत्रनलकूबरशापोऽपि रम्भानिबन्धनः श्रूयते। तत्रोपपत्तिश्चिन्त्या। अस्य प्रथमत्वे तस्यां बलात्कारासम्भवात्। तस्य प्रथमत्वे अस्यां बलात्कारासम्भवादिति केचित्। नलकूबरशापस्य तपोबलेनाकिञ्चित्करत्वादयमेव शापो ब्रह्मशापवदप्रतिक्रियः पाश्चात्य इत्यन्ये इत्युक्तम्। तत्र नलकूबरशापेनेत्युक्तभारत वचने तस्यैव पुरस्करणम्। "तस्मिन्नुदाहृते शापे ज्वलिताग्निसमप्रभे। देवदुन्दुभयो नेदुः पुष्पवृष्टिश्च खाच्च्युता। पितामहमुखाश्चैव सर्वे देवाः प्रहर्षिताः। ज्ञात्वा लोकगतिं सर्वे" इत्यत्रैवोत्तरकाण्डे ब्रह्मादिभि मत्वा शापस्य दुष्परिहरतैव "श्रुत्वा तु स दशग्रीवस्तं शापं रोमहर्षणम्। नारीषु मिथुनीभावं नाकामास्वभ्यरोचयत् ॥" इत्यनेन शापेनैवाकामकामिनीसम्भोगविरहिता च कथं सङ्गत इति विचार्यम्, अत एव तेन केचिदन्ये चेत्युक्तमिति मन्तव्यम् ॥ ११ ॥

एतत्क्षणमारभ्य । क्रियाविशेषणमेतत् । तदा गमनकाले एव फलिष्यति विशीर्णो भविष्यति इति एवंप्रकारस्य शापस्य, शापादित्यर्थः । प्रसभं नारी पय इत्यन्वयो न बलादित्यनेन पौनरुक्त्यात् । किंतु प्रसभं शापस्येत्यन्वयः । वैदेहीमित्यनेन महाकुलप्रसूततया तच्छापादपि भीतोऽस्मीत्यवगम्यते ॥ १४ ॥ १५ ॥ रामानु०—अथेत्यादि । तदा ते शतधा मूर्धा फलिष्यति न संशय इत्यनेन रावणविषये रम्भानिबन्धननलकूबरशापे विद्यमानेऽपि तस्य प्राकृतदेवत्वात्प्रबलत्वाच्च तच्छाप मनादृत्य पुञ्जिकस्थलायामपि प्रवृत्तं रावणं पश्चात्पितामहः शप्तवान् । अत एव रावणोऽप्यनुल्लङ्घनीयं पितामहवाक्यमेवोक्तवानित्यवगम्यते । इत्यहमिति । शापस्य भीतः शापाद्भीतः ॥ १३–१५ ॥

सागरस्येव मे वेगो मारुतस्येव मे गतिः । नैतद्दाशरथिर्वेद ह्यासादयति तेन माम् ॥ १६ ॥
यस्तु सिंहमिवासीनं सुप्तं गिरिगुहाशये । क्रुद्धं मृत्युमिवासीनं प्रबोधयितुमिच्छति ॥ १७ ॥
न मत्तो निशितान् बाणान् द्विजिह्वानिव पन्नगान् । रामः पश्यति सङ्ग्रामे तेन मामभिगच्छति ॥ १८ ॥
क्षिप्रं वज्रोपमैर्बाणैः शतधा कार्मुकच्युतैः । राममादीपयिष्यामि उल्काभिरिव कुञ्जरम् ॥ १९ ॥
तच्चास्य बलमादास्ये बलेन महता वृतः । उदयन् सविता काले नक्षत्राणामिव प्रभाम् ॥ २० ॥

एवं न युक्ता बलात्कर्तुं सीतेत्युक्त्वा अस्माभिः सह कुम्भकर्णेन्द्रजितौ योत्स्यत इति महापार्श्ववचनस्यासहायशूरे मयि विद्यमाने किमन्येनेति परिहारमाह—सागरस्येति । एतत् वेगगतिमत्त्वम् । आसादयति, सेनामिति शेषः । स्वार्थण्यन्तो वा । तेन अवेदनेन ॥ १६ ॥ स्वप्रभावावेदनेनादित माह—यस्त्विति । सुप्तं सिंहमिवासीनं सिंहमिव स्थितमित्यर्थः । मृत्युमित्यत्रापि सुप्तमित्यनुषज्यते । अन्यथा प्रबोधयितुमिच्छतीत्यनेनानन्वयः । क्रुद्धं कोपार्हम् । यथा सुप्तं सिंहं मृत्युं वा प्रबोधयितुमिच्छन् पुरुषोऽनभिज्ञ एव । तद्वत् तूष्णीं स्थितं मां प्रकोपयन् रामोऽपीति भावः ॥१७॥ रामो मत्पराक्रमं न वेत्त्येव तत्तिष्ठतु मद्बाणवेगं वा जानाति, नेत्याह—नेति । लेलिहानतादशां द्योतयितुं द्विजिह्वानित्युक्तम् ॥ १८ ॥ आदीपयिष्यामि सन्तापयिष्यामि । उल्काभिः निर्गतज्वालकाष्ठैः । कुञ्जरपलायनार्थमुल्काः प्रदर्शयन्तीति प्रसिद्धिः ॥ १९ ॥ एवं रामं पलाययित्वा तस्य सेनां हनिष्यामीत्याह—तच्चेति । आदास्ये खण्डयिष्ये । " दो अवखण्डने " इति धातुः ॥ २० ॥ ॥ ४० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवानामप्यजय्योऽस्मि कथं मनुष्यादीनां जय्यो भविष्यामीत्याशयेनाह—न वासवेनेति । सहस्रचक्षुषेति तस्याभिमानातिशयोक्तिः । युधा युद्धेन न शक्योऽस्मि । जेतुमिति शेषः । उत्तरार्धेन कुबेरेणापि न जेतुं शक्य इति सिद्धम् । अत्र वंशस्थवृत्तम् ॥ २१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशः सर्गः ॥ १३ ॥

न वासवेनापि सहस्रचक्षुषा युधाऽस्मि शक्यो वरुणेन वा पुनः । मया त्वियं बाहुबलेन निर्जिता पुरी पुरा वैश्रवणेन पालिता ॥ २१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रयोदशः सर्गः ॥ १३ ॥

निशाचरेन्द्रस्य निशम्य वाक्यं स कुम्भकर्णस्य च गर्जितानि । विभीषणो राक्षसराजमुख्यमुवाच वाक्यं हितमर्थयुक्तम् ॥१॥ वृतो हि बाह्वन्तरभोगराशिश्चिन्ताविषः सुस्मिततीक्ष्णदंष्ट्रः । पञ्चाङ्गुलीपञ्चशिरोऽतिकायः सीतामहाहिस्तव केन राजन् ॥ २ ॥

एवं दुर्मन्त्रिभिः प्रभुचित्तानुसारेण कथिते तदसहमानो विभीषणः परमार्थं हितमुपदिशति—निशेति । स कुम्भकर्णस्येत्यत्र स इति छेदः । गर्जितानि निरर्थकवचनानि । अर्थयुक्तं कर्तव्यार्थबोधयुक्तम् ॥ १ ॥ अदेया न यथा सीतेति रावणवचनं प्रति वक्तुं सीतामहित्वेन रूपयति—वृत इति । बाह्वन्तरं वक्षः तदेव भोगराशिः फणापरिणाहो यस्य स तथा । यद्वा बाह्वन्तरे वक्षसि भोगराशिः सौख्यसम्पत् सैव बाह्वन्तरभोगराशिः तिर्यक् प्रसारितयोर्बाह्वोर्यदन्तरं तत्प्रमाणो भोगराशिः शरीरपरिणाहो यस्येत्यावृत्त्या रूपकनिर्वाहः । चिन्तैव विषं विरोधिप्राणहरत्वात् तत् यस्य सः चिन्ताविषः । सुस्मितं स्वाभाविकमन्दस्मितम् तदेव शुभ्रत्वेन कामुकहृदयहारित्वेन च तीक्ष्णा दंष्ट्रा यस्य सः सुस्मिततीक्ष्णदंष्ट्रः । चिन्तावशेन वदनोपधानीकृतपाणेः पञ्चाङ्गुल्य एव पञ्चशिरोरूपातिकायो यस्य सः पञ्चाङ्गुलीपञ्चशिरोतिकायः । सीतामहाहिः स्पर्शमात्रेण मारकाहिः । तव त्वया केन हेतुना वृतः, सर्वथा

न वासवेनेति । वासवेन यथा जेतुं न शक्योऽस्मि वरुणेनापि तथैवेत्यर्थः ॥ २१ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायण० युद्धकाण्डव्याख्यायां त्रयोदशः सर्गः ॥ १३ ॥

निशाचरेन्द्रस्येति । अर्थयुक्तं कर्तव्यार्थबोधकमित्यर्थः ॥ १ ॥ परावरज्ञो विभीषणः कुम्भकर्णादिप्रजल्पितमसहमानस्सन् परमहितमुपदिशति—वृतो हीति । बाहून्तरभोगराशिः बाह्वन्तरं बाहुमध्यं तदेव भोगराशिः सर्वशरीरपरिणाहो यस्य सः । पञ्चाङ्गुल्य एव पञ्च शिरांसि यस्य सः पञ्चाङ्गुलीपञ्चशिराः अतिकायो यस्य

For Private And Personal Use Only

त्यक्तव्य एवेति भावः । राजन्निति सान्त्वोक्तिः ॥ २ ॥ न केवलं तवैवानर्थहेतुः सीता किंतु तावकीनस्य सर्वस्येत्याह—यावदिति । " यावत्पुरानिपातयो र्लट् " इति लट् । तावदिति शेषः ॥ ३ ॥ यावदिति । स्पष्टम् ॥ ४ ॥ भित्त्वेति । तावच्छब्दो वाक्यालङ्कारे । प्राणान्ते भवाः प्राणान्तिकाः, प्राण हारिण इत्यर्थः । साक्षाद्राजानं प्रत्युक्तेरयुक्तत्वात् प्रहस्तं प्रति प्राणहरत्वोक्तिः । विकत्थसे आत्मानं श्लाघसे । " कत्थ श्लाघायाम् " इति धातुः ॥ ५ ॥

यावन्न लङ्कां समभिद्रवन्ति वलीमुखाः पर्वतकूटमात्राः । दंष्ट्रायुधाश्चैव नखायुधाश्च प्रदीयतां दाशरथाय मैथिली ॥ ३ ॥ यावन्न गृह्णन्ति शिरांसि बाणा रामेरिता राक्षसपुङ्गवानाम् । वज्रोपमा वायुसमानवेगाः प्रदीयतां दाशरथाय मैथिली ॥ ४ ॥ भित्त्वा न तावत् प्रविशन्ति कायं प्राणान्तिकास्तेऽशनितुल्यवेगाः । शिताः शरा राघवविप्रमुक्ताः प्रहस्त तेनैव विकत्थसे त्वम् ॥ ५ ॥ न कुम्भकर्णेन्द्रजितौ न राजा तथा महापार्श्वमहोदरौ वा । निकुम्भकुम्भौ च तथाऽतिकायः स्थातुं न शक्ता युधि राघवस्य ॥ ६ ॥ जीवंस्तु रामस्य न मोक्ष्यसे त्वं गुप्तः सवित्राप्यथवा मरुद्भिः । न वासवस्याङ्कगतो न मृत्योर्नभो न पातालमनुप्रविष्टः ॥ ७ ॥ निशम्य वाक्यं तु विभीषणस्य ततः प्रहस्तो वचनं बभाषे । न नो भयं विद्म न दैवतेभ्यो न दानवेभ्यो ह्यथवा कुतश्चित् ॥ ८ ॥

रामानु०—यावन्न गृह्णन्ति शिरांसि बाणा इत्यतः परं केषुचित् कोशेषु दृश्यमानः भित्त्वा न तावत् प्रविशन्ति कायमिति श्लोकः प्रहस्तोद्देशेन प्रवृत्तस्य तीक्ष्णा न तावदित्यस्यानन्तरं द्रष्टव्यः । अन्यथा प्रकरणविरोधः स्यात् ॥ ५ ॥ तर्हि कुम्भकर्णादयो रामं वारयिष्यन्तीत्यत्राह—न कुम्भकर्णेति । इदमपि प्रहस्तं प्रति वचनम् ॥ ६ ॥ राज्ञः असामर्थ्यं विशिष्य दर्शयति—जीवन्निति । रामस्य रामात् । विभक्तिव्यत्ययः । जीवन्न विमोक्ष्यसे प्राणपर्यन्तं न त्वां रामो विमोक्ष्यतीति भावः । अङ्कगतोऽपि पुत्रभावेनाङ्कस्थितोऽपीत्यर्थः । मृत्योरित्यत्रापि अङ्कगत इत्यनुषज्यते । नभः पातालं वाऽनुप्रविष्टः न मोक्ष्यस इति योजना ॥ ७ ॥ अस्माकं कुतश्चित् भयं न विद्म ! विसर्गलोपश्छान्दसः । एवं सामान्येनोक्त्वा विशिष्य दर्शयति न दैवतेभ्य इत्यादिना । भयं न विद्म इति सर्वत्रान्वेति ॥ ८ ॥

सः अतिकायः, पश्चाङ्गुलीपञ्चशिराश्चासौ अतिकायश्च तथाविधः । चिन्ताविषः दुःखकलुषितचिन्तैव विषं यस्य सः । सुस्मितमेव तीक्ष्णा दंष्ट्रा यस्य सः एतादृश सीतामहाहिस्त्वया केन हेतुना वृतः, अनर्थसम्पादनाय गृहीत इत्यर्थः ॥ २–४ ॥ भित्त्वेति । प्राणान्तिकाः प्राणान्तकराः ॥ ५–१० ॥

For Private And Personal Use Only

पतगोत्तमेभ्यः गरुडेभ्यः। नरेन्द्रपुत्रात् मानुषबालादित्यर्थः। कथं नो भवितेत्यपि ध्वन्यते॥९॥महात्मा महाबुद्धिः। धर्मार्थकामेषु, स्वामिन इति शेषः॥१०॥ प्रहस्तेति। महोदरोक्तत्वेन पूर्वमनुक्तमप्यनेनावगम्यते पूर्वमुक्तमिति। अर्थजातं यथा ब्रवीथ तथा रामं प्रति तत्कार्यजातं न शक्यम्, कर्तुमिति शेषः। अधर्मबुद्धेः स्वर्गं प्रति गतिर्यथा न शक्या तथैवेत्यर्थः॥ ११ ॥ अशक्यत्वमेव विशदयति-वधस्त्विति। अर्थविशारदस्य कार्यदक्षस्य रामस्य वधः, अप्लुवस्य

न यक्षगन्धर्वमहोरगेभ्यो भयं न सङ्ख्ये पतगोत्तमेभ्यः। कथं नु रामाद् भविता भयं नो नरेन्द्रपुत्रात् समरे कदाचित्॥ ९॥ प्रहस्तवाक्यं त्वहितं निशम्य विभीषणो राजहितानुकांक्षी। ततो महात्मा वचनं बभाषे धर्मार्थकामेषु निविष्टबुद्धिः॥ १०॥ प्रहस्त राजा च महोदरश्च त्वं कुम्भकर्णश्च यथाऽर्थजातम्। ब्रवीथ रामं प्रति तन्न शक्यं यथा गतिः स्वर्गमधर्मबुद्धेः॥११॥ वधस्तु रामस्य मया त्वया वा प्रहस्त सर्वैरपि राक्षसैर्वा। कथं भवेदर्थविशारदस्य महार्णवं तर्तुमिवाप्लवस्य॥ १२॥ धर्मप्रधानस्य महारथस्य इक्ष्वाकुवंशप्रभवस्य राज्ञः। प्रहस्त देवाश्च तथाविधस्य कृत्येषु शक्तस्य भवन्ति मूढाः॥ १३॥ तीक्ष्णा नता यत्तव कङ्कपत्रा दुरासदा राघवविप्रमुक्ताः। भित्त्वा शरीरं प्रविशन्ति बाणाः प्रहस्त तेनैव विकत्थसे त्वम्॥ १४॥

नौरहितस्य महार्णवं तर्तुं तरितुम्, शक्तिरिति शेषः। शक्तिरिव कथं भवेत् न कथंचिदपि संभवतीत्यर्थः। एतेन वध्यौ दशरथात्मजावित्युक्तस्योत्तरमुक्तम्॥१२॥ उक्तमर्थं कैमुतिकन्यायेन द्रढयति-धर्मेति। धर्मप्रधानस्य "अप्यहं जीवितं जह्याम्" इत्युक्तरीत्या धर्मविरोधे तृणीकृतसकलेतरपुरुषार्थस्य। महारथस्य रणे आत्मानं सारथिं च रक्षन् शत्रुसंहारक्षमो महारथः तस्य। "आत्मानं सारथिं चाश्वान् रक्षन् युद्धयेत यो नरः। स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः॥" इत्युक्तेः। इक्ष्वाकुवंशप्रभवस्य जन्मासिद्धनिरतिशयपराक्रमस्य। राज्ञः सकलप्रकृतिमण्डलरञ्जकस्य। तथाविधस्य विराधकबन्धवालिप्रभृतिवधविदितवैभवस्य। शक्तस्य कार्यदक्षस्य। रामस्य कृत्येषु रणव्यापारेषु विषये देवाश्च मूढा भवन्ति अविदिततदीयव्यापारा भवन्तीत्यर्थः। किं पुनर्भवादृशा इति भावः॥ १३॥ तीक्ष्णाः तीक्ष्णाग्राः, झटितिभेदनक्षमा इत्यर्थः। नताः नतपर्वाणः, ऋजव इत्यर्थः। सपदि

प्रहस्तेति। तन्न शक्यम्, कर्तुमिति शेषः। स्वर्गं स्वर्गमुद्दिश्य॥ ११॥ अर्थविशारदस्य कार्यनिपुणस्य। तर्तुम्, शक्तिरिति शेषः॥ १२-१४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भित्त्वा निर्गन्तुं क्षमा इति भावः । कङ्कपत्राः कङ्कानां पत्राण्येव पत्राणि येषां ते तथोक्ताः । कङ्कपक्षनिबद्धत्वेन महावेगा इत्यर्थः । अत एव दुरासदाः ॥ १४ ॥ रावणादयः सर्वेऽपि न समर्था इति योज्यम् ॥ १५ ॥ देवान्तक इति । अतिरथः अतिशयितरथः । महात्मा महाशरीरः । अद्रिसमानसारः गिरितुल्यबलः ।"सारो बले स्थिरांशे च" इत्यमरः । देवान्तकादयो रावणपुत्राश्च राघवस्य युधि स्थातुं न शक्ताः ॥ १६॥ अमित्रप्रतिमैः कार्यतो

न रावणो नातिबलस्त्रिशीर्षो न कुम्भकर्णोऽस्य सुतो निकुम्भः । न चेन्द्रजिद्दाशरथिं प्रसोढुं त्वं वा रणे शक्रसमं समर्थाः ॥ १५ ॥ देवान्तको वापि नरान्तको वा तथातिकायोऽतिरथो महात्मा । अकम्पनश्चाद्रिसमानसारः स्थातुं न शक्ता युधि राघवस्य ॥ १६ ॥ अयं हि राजा व्यसनाभिभूतो मित्रैरमित्रप्रतिमैर्भवद्भिः । अन्वास्यते राक्षसनाशनार्थे तीक्ष्णः प्रकृत्या ह्यसमीक्ष्यकारी ॥ १७ ॥ अनन्तभोगेन सहस्रमूर्ध्ना नागेन भीमेन महाबलेन । बलात्परिक्षिप्तमिमं भवन्तो राजानमुत्क्षिप्य विमोचयन्तु ॥ १८ ॥ यावद्धि केशग्रहणात् सुहृद्भिः समेत्य सर्वैः परिपूर्णकामैः । निगृह्य राजा परिरक्षितव्यो भूतैर्यथा भीमबलैर्गृहीतः ॥ १९ ॥

रिपुतुल्यैः नाम्ना मित्रैः भवद्भिः त्वत्प्रमुखैः । व्यसनाभिभूतः सप्तव्यसनैराक्रान्तः । प्रकृत्या तीक्ष्णः उग्रः । असमीक्ष्यकारी अविमृश्यकारी । अयं राजा राक्षसनाशनार्थम् अन्वास्यते अनुस्रियते । अस्य राजत्वासमीक्ष्यकारित्वव्यसनाभिभूतत्वान्यपुरस्कृत्य तीक्ष्णत्वमेव पुरस्कुर्वन्तो भवन्तोऽभिभवन्ति । सर्वराक्षसविनाशं न जानन्तीति भावः । सप्तव्यसनस्वरूपमुक्तं कामन्दकेन–"वाग्दण्डयोस्तु पारुष्यमर्थदूषणमेव च । पानं स्त्री मृगया द्यूतं व्यसनं सप्तधा प्रभोः॥" इति ॥१७॥ एवं प्रहस्तप्रमुखान् मन्त्रिमुख्यान्निर्भर्त्स्य संप्रति कर्तव्यमुपदिशति–अनन्तेति । अनन्तभोगेन अपरिच्छिन्नकायेन । सहस्रमूर्ध्ना अत एव भीमेन । न केवलं भीमत्वमात्रं महाबलेन नागेन, शेषेणेत्यर्थः । परिक्षिप्तं परिवेष्टितम् । रामद्वेषो महासर्पवेष्टनतुल्य इति भावः ॥ १८ ॥ ननु समयोऽतीतः किं कुर्म इत्यत्राह–यावदिति । परिपूर्णकामैः अवाप्तसर्वाभीष्टैरित्यर्थः । राजतो लब्धकामैः राजकार्ये अवश्यं यतितव्यमिति

न राघण इति । दाशरथिं प्रसोढुं दाशरथिपराक्रमं सोढुमित्यर्थः ॥१५॥१६॥ अयम् अन्वास्यते अस्य चित्तानुकरणं क्रियत इत्यर्थः ॥१७॥ परिक्षिप्तं परिवेष्टितम् । रघुनाथेन वैरकरणं महासर्पवेष्टनमिवेति निदर्शनालङ्कारः ॥ १८ ॥ यावत्केशग्रहणं राजा निगृह्य रक्षितव्यः अकार्यप्रवृत्तोऽयं राजा केशेष्वाकृष्यापि निवारणीयः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावः। सर्वैः सुहृद्भिः समेत्य ऐकमत्यं प्राप्येति यावत् । राजा भीमबलैः भूतैः गृहीतः पुरुष इव निगृह्य बलात्कृत्य यावत्केशग्रहणात् शत्रुभिः केशग्रहणपर्यन्तं परिरक्षितव्यः। "आकेशग्रहणान्मित्रमकृत्येभ्यो निवर्तयेत्" इति प्रसिद्धिं दर्शयति हिशब्दः । यद्वा आकेशग्रहणान्निगृह्य परिरक्षितव्यः अकार्यप्रवृत्तोऽयं राजा केशेष्वाकृष्यापि निवारणीय इत्यर्थः ॥ १९ ॥ संहारिणा विनाशकेन। राघवसागरेण लक्ष्मणसमुद्रेण । प्रच्छाद्यमानः । ततः काकुत्स्थपातालमुखे रामवडवाग्निमुखे । "पातालं वडवाग्नौ च" इति नानार्थरत्नमाला। पतन् सोऽयं राजा तरसा आरम्भकाल एव तारयितुं भवद्भिः

संहारिणा राघवसागरेण प्रच्छाद्यमानस्तरसा भवद्भिः । युक्तस्त्वयं तारयितुं समेत्य काकुत्स्थपातालमुखे पतन् सः ॥ २० ॥ इदं पुरस्यास्य सराक्षसस्य राज्ञश्च पथ्यं ससुहृज्जनस्य । सम्यग्घि वाक्यं स्वमतं ब्रवीमि नरेन्द्रपुत्राय ददाम पत्नीम् ॥ २१ ॥ परस्य वीर्यं स्वबलं च बुद्ध्वा स्थानं क्षयं चैव तथैव वृद्धिम् । तथा स्वपक्षेऽप्यनुमृश्य बुद्ध्या वदेत् क्षमं स्वामिहितं च मन्त्री ॥२२॥ इत्यार्षे श्रीरामायणे वाल्मी० श्रीमद्युद्धकाण्डे चतुर्दशः सर्गः ॥१४॥

हस्तप्रदानेनोत्तारयितुम् । युक्तः अर्हः। अत्र प्रच्छाद्यमानः पतन्निति प्रयोगौ वर्तमानसामीप्यात्, लक्ष्मणः प्रथमं ग्रहीष्यति ततो रामः अतो न जीवितुं शक्यम्। अतः प्रथममेव राजा निवर्तनीय इति भावः। सुवारिणेति पाठान्तरम्। तत्र सागरपक्षे सुजलेनेत्यर्थः। राघवपक्षे वारः स्यन्दनः। शोभनो वारः सुवारः सोऽस्यास्तीति सुवारी तेन। "सूर्यादिदिवसे वृन्दे कुन्दवृक्षे परिक्रमे। मद्यपात्रे स्यन्दने च वारो वरुणसेनयोः" इति निघण्टुः॥२०॥ मा दिशतु रामाय राजा वैदेहीम्, वयमेव बलाद्धि ददामः यदि हितमाकाङ्क्षितमित्याह–इदमिति । स्वमतं स्वस्य सिद्धान्तभूतम् । इदंशब्दार्थमाह नरेन्द्रेति ॥ २१ ॥ वयमपि सम्यगेव ब्रूमः शत्रुर्हन्तव्य इति तत्राह–परस्येति। मन्त्री परस्य शत्रोः वीर्यं स्वबलं स्वराजबलं च बुद्ध्वा, स्वराजपरराजयो र्बलं परीक्ष्येत्यर्थः। तथैव बलाबलपरीक्षावत् परस्य स्थानं संपदां साम्यम्, क्षयं वृद्धिं च बुद्ध्वा। तथा परस्येव स्वपक्षेऽपि बुद्ध्या सूक्ष्मदृष्ट्या स्थान

इत्यर्थः ॥ १९ ॥ सुवारिणा राघवसागरेणेति पाठः। शोभनो वारः वृन्दं सोऽस्यास्तीति सुवारी तेन। सागरपक्षे तु सुवारिणा शोभनजलेन ॥ २० ॥ इदमिति । ददामेति प्रार्थनायां लोट् ॥ २१ ॥ परस्येति । स्वबलं स्वबुद्धिबलम् । स्थानं पूर्वावस्थासाम्यम् । क्षयम् पूर्वावस्थातः शक्तिसिद्ध्योरपचयः क्षयः । वृद्धिम् पूर्वावस्थात उपचयो वृद्धिः ॥ २२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुर्दशः सर्गः ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षयवृद्धीः अनुमृश्य आलोच्य । क्षमं युक्तं स्वामिहितं च वदेत् । परस्य क्षये स्ववृद्धौ यानम्, परस्य वृद्धौ स्वस्य क्षये सन्धिम् परस्य स्वस्य च साम्ये आसनं च स्वामिने कथयेदित्यर्थः । अत्र प्रकृते परस्य वृद्धेः रावणस्य नगरदहनतनयनाशादिना क्षयस्य दर्शनाच्च सीताप्रदानेन सन्धिरेव साधुरिति मन्त्रिभिर्भवत्स्वामिने निवेदनीयमिति भावः ॥२२॥ इति श्रीगोविन्दराजवि० श्रीरामायण० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशः सर्गः॥१४॥

बृहस्पतेस्तुल्यमतेर्वचस्तन्निशम्य यत्नेन विभीषणस्य । ततो महात्मा वचनं बभाषे तत्रेन्द्रजिन्नैर्ऋतयोधमुख्यः ॥ १ ॥ किं नाम ते तात कनिष्ठवाक्यमनर्थकं चैव सुभीतवच्च । अस्मिन् कुले योऽपि भवेन्न जातः सोऽपीदृशं नैव वदेन्न कुर्यात् ॥ २ ॥ सत्त्वेन वीर्येण पराक्रमेण शौर्येण धैर्येण च तेजसा च । एकः कुलेऽस्मिन् पुरुषो विमुक्तो विभीषणस्तात कनिष्ठ एषः ॥ ३ ॥

अथेन्द्रजितो दुर्बुद्धिमुपन्यस्य दूषयति–बृहस्पतेरिति । ततो विभीषणवचनानन्तरम् । तत्र राक्षसेषु । यत्नेन निशम्य, असह्यतयेति भावः ॥ १ ॥ किन्नामेति । हे तात ते कनिष्ठवाक्यम् । अनर्थकं प्रयोजनशून्यम् । अनुधातुरभावादिति भावः । सुभीतवत् सुभीतिमत् । किन्नाम कीदृशं जुगुप्सितमित्यर्थः । नामशब्दः कुत्सनद्योतकः । "नाम प्राकाश्यसंभाव्यक्रोधोपगमकुत्सने " इति वैजयन्ती । तदेवोपपादयति–अस्मिन्निति । आद्योऽपिशब्दः प्रश्ने । अपि ननु । अस्मिन् कुले पौलस्त्यवंशे। यो जातो न भवेत् ।अन्यस्मिन् कुले यो जातः सोऽपि ईदृशं न वदेत् न कुर्यात् । ईदृग्वचनार्थं नानुतिष्ठेत् । ईदृग्वचनं वक्तृश्रोत्रोरुभयोरपि निन्दनीयम् । यद्वा हे तात कनिष्ठ ! ते वाक्यं किं नाम, जुगुप्सितमित्यर्थः । जुगुप्सितत्वमेवाह–अस्मिन्निति । न कुर्यात् न चिन्तयेत् । अत्र करोतिश्चिन्ताक्रियायां वर्तते । मुख्यस्य करणार्थस्यासम्भवात् सर्वधात्वर्थेषु करोत्यर्थस्य सम्भवाच्च ॥ २ ॥ एतद्वाक्यमेतत्स्वभावस्य सदृशमित्याह–सत्त्वेनेति । सत्त्वेन बलेन । वीर्येण प्रभावेन । "वीर्यं बले प्रभावे च" इत्यमरः । पराक्रमेण उद्योगेन । "शौर्योद्योगौ परा

अथेन्द्रजितो दुर्बुद्धिमुपन्यस्य दूषयति–बृहस्पतेरिति ॥ १ ॥ तात ! ते कनिष्ठवाक्यं किं नाम कीदृशम्, गर्हितमित्यर्थः । सुभीतवत् सुभीतिमत्, आद्योऽपिशब्दः प्रश्ने । अपि ननु । अस्मिन् कुले पौलस्त्यवंशे यो जातो न भवेत् अन्यस्मिन् कुले यो जातः सोऽपीदृशं नैव वदेत् न कुर्यात् । करोतेः क्रियासामान्यत्वान्न चिन्तयेदित्यर्थः ॥ २ ॥ सत्त्वेन बलेन, वीर्येण प्रभावेन, शौर्येण उत्साहेन, तेजसा पराभिभवसामर्थ्येन ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रमो" इत्यमरः । शौर्येण साहसिक्येन । धैर्येण स्थैर्येण । तेजसा गर्वेण । पराभिभवासहनेनेति यावत् ॥ ३ ॥ एवं रावणं प्रत्युक्त्वा विभीषणं निर्भर्त्सयति--किन्नामेत्यादिना । राक्षसेति हीनसम्बोधनमाग्रहकृत्यम् । तौ राजपुत्रौ किं नाम न किंचिदपि, अतिदुर्बलावित्यर्थः । कुत इत्यत्राह–अस्माकमेकेनेति । अस्माकं मध्ये सुप्राकृतेन अतिक्षुद्रेणापि एकेन राक्षसेन एतौ निहन्तुं शक्यौ हि । अतः भीरो ! कुतोऽस्मान् भीषयसे स्वयं भीतोऽस्मान् भीषयसे । नास्माकं किंचित् भयमिति भावः ॥४॥ भयाभावे पूर्ववृत्तं संवादयति–त्रिलोकेति । नन्वित्यामन्त्रणे ! त्रिलोकनाथ इत्यैश्वर्यमुक्तम् । देवराज इति

किं नाम तौ राक्षस राजपुत्रावस्माकमेकेन हि राक्षसेन । सुप्राकृतेनापि रणे निहन्तुं शक्यौ कुतो भीषयसे स्म भीरो ॥ ४ ॥ त्रिलोकनाथो ननु देवराजः शक्रो मया भूमितले निविष्टः । भयार्दिताश्चापि दिशः प्रपन्नाः सर्वे तथा देवगणाः समग्राः ॥ ५ ॥ ऐरावतो विस्वरमुन्नदन् स निपातितो भूमितले मया तु । विकृष्य दन्तौ तु मया प्रसह्य वित्रासिता देवगणाः समग्राः ॥ ६ ॥ सोऽहं सुराणामपि दर्पहन्ता दैत्योत्तमानामपि शोकदाता । कथं नरेन्द्रात्मजयोर्न शक्तो मनुष्ययोः प्राकृतयोः सुवीर्यः ॥ ७ ॥ अथेन्द्रकल्पस्य दुरासदस्य महौजसस्तद्वचनं निशम्य । ततो महार्थं वचनं बभाषे विभीषणः शस्त्रभृतां वरिष्ठः ॥ ८ ॥

सैन्यसामग्री दार्शिता । मया हेतुना । भूमितले निविष्टः स्थितः । निवेशित इत्यर्थ इत्यन्ये ॥५॥ ऐरावत इति । उन्नदन् उद्घुष्यन् । विकृष्य उत्पाट्य । ताभ्यां सर्वे देवगणाः वित्रासिताः । हेतुभेदेन देवानां भयान्तरमत्रोक्तमिति न पुनरुक्तिः ॥६॥ स्ववृत्तप्रदर्शनफलमाह–सोऽहमिति । मनुष्ययोरिति देवासुरव्यावृत्तिः । प्राकृतयोरिति इन्द्रव्यावृत्तिः । नरेन्द्रात्मजयोरिति बाल्योक्तिः । कथं न शक्तोऽस्मि अतः कुतो भीषयसे इति पूर्वेणान्वयः ॥७॥ अथेति । इन्द्रकल्पस्येत्यादिविशेषणत्रयेण पूर्वोक्तस्य यथार्थत्वमुक्तम् । शस्त्रभृतां वरिष्ठ इत्यनेनाभीरुत्वमुक्तम् । महार्थमित्यनेन वक्ष्यमाणार्थस्येन्द्रजिता

हे राक्षस ! राजपुत्रौ किंनाम न किञ्चिदपि दुर्बलावित्यर्थः । कुत इत्यत्राह–अस्माकमिति ॥ ४ ॥ भूमितले भूतले । निविष्टः निवेशितः । कारागृहे निबद्ध इत्यर्थः ॥ ५ ॥ विकृष्य उत्कृष्य ॥ ६–९ ॥

दुर्जेयत्वमुक्तम् ॥ ८ ॥ न तातेति । अनेन निकृष्टवयस्त्वमुक्तम् । बालत्वेऽपि कस्यचित्सुमतिः सम्भवति साऽपि नास्तीत्याह अद्यापीति । अविपक्वबुद्धिः अपरिणतबुद्धिः । निश्चयाभावं दर्शयति तस्मादिति । विप्रलप्तं विप्रलपितम् ॥ ९ ॥ न केवलं स्वाज्ञानस्य स्वविनाश एव फलं किन्तु पितृविनाशोऽपीत्याह–पुत्रेति । हे इन्द्रजित् ! त्वं पुत्रप्रवादेन पुत्रप्रसिद्ध्या । इत्थंभावे तृतीया । मित्रस्य मुखमिव मुखं यस्य सः तथोक्तः । मित्रवद्भासमान

न तात मन्त्रे तव निश्चयोऽस्ति बालस्त्वमद्याप्यविपक्वबुद्धिः । तस्मात्त्वया ह्यात्मविनाशनाय वचोऽर्थहीनं बहु विप्रलप्तम् ॥ ९ ॥ पुत्रप्रवादेन तु रावणस्य त्वमिन्द्रजिन्मित्रमुखोऽसि शत्रुः । यस्येदृशं राघवतो विनाशं निशम्य मोहादनुमन्यसे त्वम् ॥ १० ॥ त्वमेव वध्यश्च सुदुर्मतिश्च स चापि वध्यो य इहानयत्त्वाम् । बालं दृढं साहसिकं च योऽद्य प्रावेशयन्मन्त्रकृतां समीपम् ॥ ११ ॥ मूढः प्रगल्भोऽविनयोपपन्नस्तीक्ष्णस्वभावोऽल्पमतिर्दुरात्मा । मूर्खस्त्वमत्यन्तसुदुर्मतिश्च त्वमिन्द्रजिद् बालतया ब्रवीषि ॥ १२ ॥ को ब्रह्मदण्डप्रतिमप्रकाशानर्चिष्मतः कालनिकाशरूपान् । सहेत बाणान् यमदण्डकल्पान् समक्षमुक्तान्द युधि राघवेण ॥ १३ ॥

इत्यर्थः । शत्रुरसि । शत्रुत्वमेवोपपादयति–यस्येति । त्वं यस्य रावणस्य ईदृशं पुत्रमित्रविनाशपर्यन्तं राघवतो रामात् विनाशं निशम्य मन्मुखाच्छ्रुत्वा मोहादनुमन्यसे तस्य रावणस्य त्वं शत्रुरसीत्यर्थः । मोहादित्यनेन मित्रमुखत्वमुपपादितम् । अनुमन्यस इत्यनेन शत्रुत्वम् ॥ १० ॥ एवमनुमोदनस्य दण्डमाह–त्वमेवेति । त्वमेव वध्यः दण्ड्यः किमित्यर्थः । किन्तु यस्त्वाम् इह सभायाम् आनयत् प्रावेशयच्च स एव वध्यः ॥ ११ ॥ सुदुर्मतिश्चेति चशब्ददर्शितान् दोषानाह–मूढ इति । मूढः कृत्याकृत्यविवेकशून्यः । प्रगल्भः धृष्टः, पण्डितम्मन्य इति यावत् । अविनयोपपन्नः अशिक्षित इत्यर्थः । तीक्ष्णस्वभावः क्रूरप्रकृतिः । दुरात्मा दुष्टान्तःकरणः । मूर्खः अविमृश्यकारी । अत्यन्तसुदुर्मतिः । प्रहस्तो दुर्मतिः महापार्श्वादिः सुदुर्मतिः । त्वमत्यन्तसुदुर्मतिरित्यर्थः । त्वमेवम्भूतोऽसि अतस्त्वं बालतया ब्रवीषि इति सम्बन्धः ॥ १२ ॥ दुर्मतित्वे हेतुमाह–क इति । ब्रह्मदण्डप्रतिमप्रकाशान् ब्रह्मदण्डसदृश

पुत्रप्रवादेन पुत्रव्यपदेशेन रावणस्य त्वं मित्रमुखः मित्रवद्भासमानःशत्रुरसि । कुतः ? यस्येति । यस्य रावणस्य ॥ १० ॥ ११ ॥ मूढः जडः । प्रगल्भः पण्डितम्मन्यः । अविनयोपपन्नः, सद्भिरशिक्षित इत्यर्थः । मूर्खः अविवेकी ॥ १२ ॥ ब्रह्मदण्डप्रतिमप्रकाशान ब्रह्मशापतुल्यप्रभावान् । कालनिकाशरूपान् मृत्युतुल्यरूपान् ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रभान् । ब्रह्मदण्डो नाम युगान्तसमुत्थितोऽग्निवर्णो धूमकेतुरित्येके । ब्रह्मशाप इत्यन्ये । अर्चिष्मतः ज्वालावतः । "अर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः । कालनिकाशरूपान् अन्तकसदृशरूपान् । समक्षमुक्तान् समीपे मुक्तान् ॥ १३ ॥ कृतस्याकृत्यस्य प्रायश्चित्तं राजानं प्रत्याह—धनानीति । रत्नानि श्रेष्ठ वस्तूनि । "रत्नं स्वजातौ श्रेष्ठेऽपि" इत्यमरः । धनानि द्रव्याणि ॥१४॥ इति श्रीगोविन्द० श्रीरामा० रत्न० युद्धकाण्डव्याख्याने पञ्चदशः सर्गः ॥१५॥

धनानि रत्नानि विभूषणानि वासांसि दिव्यानि मणींश्च चित्रान् । सीतां च रामाय निवेद्य देवीं वसेम राजन्निह वीतशोकाः ॥ १४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चदशः सर्गः ॥ १५ ॥

सुनिविष्टं हितं वाक्यमुक्तवन्तं विभीषणम् । अब्रवीत् परुषं वाक्यं रावणः कालचोदितः ॥ १ ॥

इत्थं हितमुक्तवन्तं विभीषणं प्रति रावणस्य परुषभाषणं षोडशे—सुनिविष्टमिति । सुसन्निवेशम् अर्थानुसन्धानविरहेऽपि श्रवणमात्रेणात्यन्तप्रीतिजनकम् । तेनार्थस्यानतुकूलत्वेऽपि श्रवणस्यापरित्याज्यत्वमुक्तम् । सुनिविष्टम् उक्तवन्तमिति क्रियाविशेषणं वा । तेन मनस्यलग्नं चेदनादरणीयं वा स्यात् । मनसि सम्यग्लग्नं यथा भवति तथा उक्तवन्तम् । हितं न केवलं श्रवणप्रियम्, अतिदुर्दशानिस्तरणोपायतया पथ्यम् । श्रवणकटुत्वेऽपि पथ्यत्वपर्यालोचनया अपरित्याज्यम् । वाक्यं यावद्वक्तव्यार्थपूर्णम् उक्तवन्तम् । "नासंवत्सरवासिने प्रब्रूयात्" इत्युक्तरीत्या गुरूपसदनयुक्तस्य पादयोः पतितस्य वक्तव्यस्य दुरवस्थां दृष्ट्वोक्तवन्तं विभीषणम् । अन्येन चेदुक्तं परित्याज्यम् । साक्षादनुजतया प्रत्यासन्नेनोक्तं कथं त्याज्यम् । परुषं वाक्यमब्रवीत् । श्रवणसमनन्तरं स्थितोऽस्मि गतसन्देह इति वा वक्तव्यम् । त्वया महोपकारः कृत इति स्तोत्रं वा कर्तव्यम् । सदृशप्रत्युपकाराभावेनानुतापो वा कर्तव्यः । तद्विहाय शत्रून् प्रति वक्तव्यमुक्तवान् । अब्रवीदित्यनेन यथा सुनिविष्टमुक्तं तथा मनसि सुलग्नं यथा भवति तथा व्यक्तमुक्तवान् । एवमुक्तवन्तं प्रत्यपि परुषोक्तौ हेतुद्वय माह—रावण इत्यादि । रावयति रोदयतीति रावणः । परहिंसायां जगद्विदितः । रौतीति रवणः स एव रावणः । स्वार्थेऽण्प्रत्ययः । अस्थाने पदं दत्त्वा स्वयमप्याक्रन्दन्नित्यर्थः । कालचोदितः । भ्राता रामं शरणं गच्छेत्युक्तवान् कालस्तत्र कर्तव्यामिति स्वयं द्विधा भज्येयमिति । अतः स्वप्रकृत्यनुगुणं काल

धनानि श्रेष्ठवस्तूनि निवेद्य समर्प्य ॥ १४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चदशः सर्गः ॥ १५ ॥
सुनिविष्टमिति । सुनिविष्टं सुष्ठु विनीतिनिष्ठमिति यावत् ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनुसृतवानिति भावः ॥ १ ॥ परुषमेवाह–वसेदिति । सपत्नेन बाह्यशत्रुणा । मित्रप्रवादेन मित्रवदवभासमानेनेत्यर्थः । शत्रुसेविना शत्रुपक्षपातिना । सहजशत्रुणेत्यर्थः । शत्रुसर्पसहवासादपि सहजशत्रुसहवासः सुदूरं परिहर्तव्य इति भावः । अतस्त्वया अस्मान्नगरात् सद्यो गन्तव्यमिति द्योत्यते ॥ २ ॥ अत्र शत्रुसेवित्वे हेतून् त्रिभिर्दर्शयति–जानामीत्यादिभिः । सर्वलोकेषु सर्वजनेषु मध्ये । शीलं स्वभावम् । शीलमेवाह हृष्यन्तीति । अस्मद्व्यसनेन लब्धहर्षस्त्वमेवं गर्जसीति भावः ॥ ३ ॥ प्रधानमिति । ज्ञातयः । प्रधानं स्वजातिश्रेष्ठम् । साधनं कार्यसाधकम् । वेद्यं विद्वांसम् । प्राधान्यादिष्वेकैक

वसेत् सह सपत्नेन क्रुद्धेनाशीविषेण वा । न तु मित्रप्रवादेन संवसेच्छत्रुसेविना ॥ २ ॥ जानामि शीलं ज्ञातीनां सर्वलोकेषु राक्षस । हृष्यन्ति व्यसनेष्वेते ज्ञातीनां ज्ञातयः सदा ॥ ३ ॥ प्रधानं साधनं वेद्यं धर्मशीलं च राक्षस । ज्ञातयो ह्यवमन्यन्ते शूरं परिभवन्ति च ॥ ४ ॥ नित्यमन्योन्यसंहृष्टा व्यसनेष्वाततायिनः । प्रच्छन्नहृदया घोरा ज्ञातयस्तु भयावहाः ॥५॥ श्रूयन्ते हस्तिभिर्गीताः श्लोकाः पद्मवने क्वचित् । पाशहस्तान्नरान् दृष्ट्वा शृणु तान् गदतो मम ॥ ६ ॥ नाग्निर्नान्यानि शस्त्राणि न नः पाशा भयावहाः । घोराः स्वार्थप्रयुक्तास्तु ज्ञातयो नो भयावहाः ॥७॥

गुणयोगेऽपि ज्ञातयोऽवमन्यन्ते, न बहुमन्यन्ते अवसरे परिभवन्ति चेत्यर्थः ॥ ४ ॥ एवं ज्ञातीनां ज्ञातिषु व्यसने हर्षः उत्कर्षेऽसूया चेति शीलद्वय मुक्तम् । अथ भयावहत्वरूपं शीलान्तरमाह–नित्यमिति । प्रतिच्छन्नहृदयाः गूढाभिप्रायाः । अत एव नित्यमन्योन्यसंहृष्टाः बहिः स्नेहवन्त इव स्थिताः । घोराः क्रूरकर्माणः । अत एव व्यसनेषु सत्सु आततायिनः द्रोहकारिणः । अतस्त्वमस्मासु व्यसने प्रहर्तुमिच्छसीति भावः ॥ ५ ॥ उक्तं ज्ञातीनां भया वहत्वं हस्तिगीतेन संवादयति–श्रूयन्त इत्यादिना । क्वचित्पद्मवने । पाशहस्तान् पाशाः गजग्रहणरज्जवः ते हस्तेषु येषां ते तथोक्तान् । स्वबन्धनोद्युक्ता निति यावत् । नरान् ज्ञातिगजगोप्तॄन् गजग्राहिपुरुषान् दृष्ट्वा हस्तिभिः गीताः पठिताः श्लोकाः श्रूयन्ते । वक्तृपरम्परया तान् श्लोकान् गदतः वदतः मम मत्तः शृणु ॥ ६ ॥ तानेव त्रीन् श्लोकानुपादत्ते–नाग्निरित्यादि । नः अस्माकम् । अग्निः आश्रयाशोऽपि न भयावहः । अन्यानि लोकविलक्षणानि ॥ ५२ ॥

शत्रुसेविना शत्रुपक्षपातिना ॥ २ ॥ ३ ॥ साधनं कार्यसाधकम् । वेद्यं विद्वांसम् । अवमन्यन्ते परिभवन्ति च ॥ ४ ॥ नित्यम् इतरकालेषु व्यसनेष्वापत्सु च । आततायिनः द्रोहकारिणः ॥ ५ ॥ उक्तं ज्ञातीनां भयावहत्वं हस्तिगीतामुखेन संवादयितुमाह–श्रूयन्त इति ॥ ६ ॥ नेति । स्वार्थप्रयुक्ताः स्वार्थपराः ॥ ७ ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्नितोऽपि क्षणान्नाशकराणि । शस्त्राणि आयुधानि च । न भयावहानि । पाशाः मरणादप्यतिदुस्सहपारवश्यक्लेशकराश्च न भयावहाः । किंतु घोराः निर्दयाः स्वार्थप्रयुक्ताः स्वप्रयोजनपराः ज्ञातयः भयावहाः । अग्न्यादिभ्योऽप्यधिकं ज्ञातिभ्यो भयमित्यर्थः ॥ ७ ॥ उक्तं ज्ञातिभयातिरेकं सयुक्तिकमुपपादयति– उपायमिति । अस्माकं ग्रहणे एते ज्ञातिरूपा हस्तिनः उपायं वक्ष्यन्ति अत्रोपायकथने संशयो नास्ति । अतः कृत्स्नादग्न्यादिभयात् ज्ञातिभयं सुकष्टम् । प्रकृष्टं भयमित्यर्थः, इदमस्माभिः विदितं ज्ञातं च ॥ ८ ॥ स्निग्धेषु ज्ञातिषु कुतो भयसम्भावनेत्याशङ्क्याह–विद्यत इति । गोसम्पत्त्याद्युपादानं दृष्टान्तार्थम् । गोषु सम्पन्नं सम्पत्तिः । तद्धेतुत्वमित्यर्थः । विद्यते आस्ति । "विद सत्तायाम्" इति धातुः । दमः इन्द्रियनिग्रहः । चापल्यं चञ्चलत्वम् । ज्ञातितः ज्ञातिषु । भयं भयकरत्वम् ॥९॥ प्रधानं साधनमिति श्लोकोक्तं निदर्शयाति–तत इति । अहं लोकसत्कृतः ऐश्वर्यम् अभिजातः प्राप्तः । रिपूणां मूर्ध्न्यवस्थितश्चेति यत् इदं ततः ज्ञातीनामसहिष्णुत्वात् तव नेष्टम् ॥१०॥ रामानु०–सौम्येत्याक्षेपोक्तिः ॥ १० ॥ चिरं सह वसति विभीषणे कथमकार्यमाशङ्कसे इत्यपेक्षाया मनार्यस्य चिरसंवासोऽप्रयोजक इत्याह–यथेति । पुष्करपर्णेषु पद्मपत्रेषु । पतितास्तोयबिन्दवः यथा श्लेषम् ऐक्यं नोपगच्छन्ति तथा अनार्येषु दुष्टेषु विषये । सङ्गतं सम्बन्धः । श्लेषं स्नेहबन्धं नोपयातीत्यर्थः ॥११ ॥ त्वदुपजीविनस्त्वयि कथं स्नेहबन्धाभाव इत्यत्राह–यथेति । यथा मधुकरः तर्षात् अभि

उपायमेते वक्ष्यन्ति ग्रहणे नात्र संशयः । कृत्स्नाद्भयाज्ज्ञातिभयं सुकष्टं विदितं च नः ॥ ८ ॥

विद्यते गोषु सम्पन्नं विद्यते ब्राह्मणे दमः । विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम् ॥ ९ ॥

ततो नेष्टमिदं सौम्य यदहं लोकसत्कृतः । ऐश्वर्यमभिजातश्च ज्ञातीनां मूर्ध्न्यवस्थितः ॥ १० ॥

यथा पुष्करपर्णेषु पतितास्तोयबिन्दवः । न श्लेषमुपगच्छन्ति तथाऽनार्येषु सङ्गतम् ॥ ११ ॥

यथा मधुकरस्तर्षाद्रसं विन्दन्न विद्यते । तथा त्वमपि तत्रैव तथाऽनार्येषु सौहृदम् ॥ १२ ॥

सम्पन्नं सम्पत्तिः ॥ ९ ॥ अहम् ऐश्वर्यमभिजातः प्राप्तः लोकसत्कृत इति यत् इदं ज्ञातीनामसह्यत्वात्तव नेष्टम् ॥ १० ॥ ११ ॥ तर्षात अभिलाषात् । रसं मकरन्दं पिबन् तत्र रसाधारे कुसुमे न विद्यते न तिष्ठति । त्वमपि तथा मधुकर इव । अनार्येषु सङ्गतं तथा तादृशमित्यर्थः ॥ १२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लाषात्। रसं मकरन्दम्। विन्दन् पिबन्। तत्र रसाधारे पुष्पे। न विद्यते न तिष्ठति। रसप्रदानोपकारं जानन् तत्र न स्निह्यतीत्यर्थः। त्वमपि तथा मधुकर इव। अनार्येषु दुर्जनेषु सौहृदं तथा हि। उपजीव्यविषये न जायत इत्यर्थान्तरन्यासः ॥ १२ ॥ रामानु०-यथेति। मधुकरः तर्षात् तृष्णातः रसं विन्दन् पिबन् तत्र रसाधारे यथा न सक्तो भवति त्वमपि तथैव। अनार्येषु सौहृदं तथा तथा खल्वित्यर्थः ॥ १२ ॥ तथापि कृतस्नेहः कुतोऽपलप्यते तत्राह-यथेति। अनार्येषु सौहृदं गजस्नानवत्तैरेव दुष्यत इत्यर्थः ॥ १३ ॥ रामानु०-यथा पूर्वमिति। गजः पूर्वं स्नात्वा हस्तेन रजो गृह्य गृहीत्वा आत्मनो देहं यथा दूषयति अनार्येषु सौहृदं तथा तादृशम्।

यथा पूर्वं गजः स्नात्वा गृह्य हस्तेन वै रजः। दूषयत्यात्मनो देहं तथाऽनार्येषु सौहृदम् ॥ १३ ॥
यथा शरदि मेघानां सिञ्चतामपि गर्जताम्। न भवत्यम्बुसंक्लेदस्तथाऽनार्येषु सौहृदम् ॥ १४ ॥
अन्यस्त्वेवंविधं ब्रूयाद्वाक्यमेतन्निशाचर। अस्मिन् मुहूर्ते न भवेत्त्वां तु धिक् कुलपांसनम् ॥ १५ ॥
इत्युक्तः परुषं वाक्यं न्यायवादी विभीषणः। उत्पपात गदापाणिश्चतुर्भिः सह राक्षसैः ॥ १६ ॥

गजा इवानार्याः पूर्वं कृतं स्नेहं स्वयमेव नाशयन्तीत्यर्थः ॥ १३ ॥ दृष्टोऽपि स्नेहो न फलपर्यवसायीत्याह-यथेति। शरदि सिञ्चतां वर्षताम् मेघानां सम्बन्धी अम्बुसंक्लेदः अम्बुसेचनं यथा न भवति तथाऽनार्येषु सौहृदम्। शरन्मेघवर्षणवदनार्येषु सौहृदमनुपकारकमित्यर्थः ॥ १४ ॥ रामानु०-यथेति। शरदि सिञ्चतां जलं मुञ्चतां गर्जतां च मेघानां सम्बन्धी अम्बुसंक्लेदः भुवि सम्यगार्द्रताहेतुस्तोयधारा न भवति यथा। अनार्येषु सौहृदं तथा। शरदि मेघा इव अनार्याः आपातत उपकुर्वन्त इव प्रतीयमाना वस्तुतो नोपकुर्वन्तीत्यर्थः ॥ १४ ॥ एवं सामान्येन विनिन्द्य साक्षादपि निन्दति-अन्य इति। अन्यः अनुजादन्यः एवंविधम् अतिपरुषम् एतत्पूर्वोक्तं वाक्यं ब्रूयात् वदेच्चेत् अस्मिन्मुहूर्तेऽस्मिन् क्षण एव न भवेत् विनश्येत्। नाशयेयमिति यावत्। त्वां तु भ्रात्राभासं धिक् त्यक्ष्यामीत्यर्थः। कुलपांसनं राक्षसकुलावद्यकरम् ॥ १५ ॥ इत्युक्त इति। न्यायवाद्यपि इति पूर्वोक्तरीत्या परुषमुक्तस्सन् उत्पपात सन्तप्तसिकतामयभूमिस्थित इव उद्गतः ॥ १६ ॥

यथेति। गजः पूर्वं स्नात्वा हस्तेन रजो गृह्य गृहीत्वा आत्मनो देहं यथा दूषयति अनार्येषु सङ्गतं तथा तादृशम्। गज इव अनार्याः पूर्वं कृतं स्नेहं स्वयमेव नाशयन्तीत्यर्थः ॥ १३ ॥ शरदि सिञ्चतां जललवान् मुञ्चतां मेघानां यथा आर्द्रीभावो न भवति, मेघा इव अनार्याः आपातत उपकुर्वन्त इव प्रतीयमाना अपि वस्तुतो नोपकुर्वन्तीत्यर्थः ॥ १४-१६ ॥

For Private And Personal Use Only

एवमाकाशे उत्पतन्नपि पुनस्तस्मिन्ननुतापेन अपि नाम समुद्भवेत् समीची मतिरिति हितोपदेशे प्रावर्ततेत्याह–अब्रवीदिति । अन्तरिक्षगतः श्रीमान् । " परित्यक्ता मया लङ्का मित्राणि च धनानि च " इति समुत्थितस्य का नाम श्रीः ? उच्यते–प्रतिकूलनिवृत्तिपूर्वकानुकूलरामाविषयाभिमुख्यश्रीसमेत इत्यर्थः ॥ १७ ॥ रामानु०–अत्र श्रीशब्देन सोपाधिकप्रातिकूल्यसंबन्धपरित्यागपूर्वकनिरुपाधिकस्वामिसंबन्धावलम्बनरूपा श्रीरुच्यते ॥ १७ ॥ स त्वमित्यर्धमेकं वाक्यम् । स त्वं परुषवादी त्वम् । भ्रातासि प्रतिवक्तुमनर्होऽसि अतो यद्यदिच्छसि तद्वद ॥ १८ ॥ तर्हि किमर्थमुद्गतोऽसि प्रतिवचनाभावात्

अब्रवीच्च तदा वाक्यं जातक्रोधो विभीषणः । अन्तरिक्षगतः श्रीमान् भ्रातरं राक्षसाधिपम् ॥ १७ ॥ स त्वं भ्राताऽसि मे राजन् ब्रूहि मां यद्यदिच्छसि ॥ १८ ॥ ज्येष्ठो मान्यः पितृसमो न च धर्मपथे स्थितः । इदं तु परुषं वाक्यं न क्षमाम्यनृतं तव ॥ १९ ॥ सुनीतं हितकामेन वाक्यमुक्तं दशानन । न गृह्णन्त्यकृतात्मानः कालस्य वशमागताः ॥ २० ॥ सुलभाः पुरुषा राजन् सततं प्रियवादिनः । अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ २१ ॥ बद्धं कालस्य पाशेन सर्वभूतापहारिणा । न नश्यन्तमुपेक्षेयं प्रदीप्तं शरणं यथा ॥ २२ ॥ दीप्तपावकसङ्काशैः शितैः काञ्चनभूषणैः । न त्वामिच्छाम्यहं द्रष्टुं रामेण निहतं शरैः ॥ २३ ॥

क्षमापि कियती तत्राह–ज्येष्ठ इति । ज्येष्ठस्त्वं पितृसमः मान्यः । किंतु धर्मपथे न स्थितोऽसि । अतस्त्वदुक्तमनृतं परुषं न क्षमामि न क्षमे ॥ १९ ॥ रामानु०–इदमिति । वसेत्सह सपत्नेनेत्यादिना यदुक्तं तदिदम् ॥ १९ ॥ स्ववाक्याश्रवणे निमित्तं सामान्यतो दर्शयति–सुनीतमिति । स्पष्टम् ॥ २० ॥ सुलभा इति । प्रियवादिन इत्युपलक्षणं प्रियश्रोतारश्च ॥ २१ ॥ तर्ह्यश्रोतारं प्रति किमर्थं वदसि ? तत्राह–बद्धमिति । सर्वभूतापहारिणा निर्दयेनेत्यर्थः । नोपेक्षेयम् नोपेक्षेय । शरणं गृहम् ॥ २२ ॥ दीप्तेति । स्पष्टम् ॥ २३ ॥

अब्रवीदित्यादि–ज्येष्ठो मान्य इत्यन्ते वाक्यसमाप्तिः । न च धर्मपथे स्थित इति परशेषः । यतो न धर्मपथे स्थितः अतः इदं न क्षमामीति सम्बन्धः ॥१७–१९॥ सुनीतं सुनिर्मितम् । उपेक्षेयम् उपेक्षेय । शरणं गृहम् ॥ २२–२४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शौर्यबलास्त्रशालिनो मे कुतो विपदाशङ्केत्यत्राह–शूरा इति । कालाभिपन्नाः मृत्युगृहीताः । सीदन्ति शीर्यन्ति । वालुकाः सिकताः ॥ २४ ॥
तदिति । मर्षयतु, भवानिति शेषः ॥ २५ ॥ स्वस्तीत्यर्धम् ॥ २६ ॥ निवार्यमाणस्येति । स्पष्टम् ॥ २७ ॥ रामानु०–परीतकालाः परीतः प्रत्यासन्नः
कालो मृत्युर्येषां ते तथोक्ताः ॥ २७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षोडशः सर्गः ॥ १६ ॥

शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे । कालाभिपन्नाः सीदन्ति यथा वालुकसेतवः ॥ २४ ॥ तन्मर्षयतु यच्चोक्तं
गुरुत्वाद्धितमिच्छता । आत्मानं सर्वथा रक्ष पुरीं चेमां सराक्षसाम् ॥ २५ ॥ स्वस्ति तेऽस्तु गमिष्यामि सुखी भव
मया विना ॥ २६ ॥ [नूनं न ते रावण कश्चिदस्ति रक्षोनिकायेषु सुहृत् सखा वा । हितोपदेशस्य स मन्त्रवक्ता यो
वारयेत्त्वां स्वयमेव पापात् ॥] निवार्यमाणस्य मया हितैषिणा न रोचते ते वचनं निशाचर । परीतकाला हि
गतायुषो नरा हितं न गृह्णन्ति सुहृद्भिरीरितम् ॥२७॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे षोडशः सर्गः ॥१६॥

इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः । आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः ॥ १ ॥

एवमष्टभिः सर्गैः–" आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् । रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥ आत्मनिक्षेपकार्पण्ये षड्विधा
शरणागतिः ॥" इत्युक्तेषु शरणागत्यङ्गेषु प्रपित्सोर्विभीषणस्यानुकूल्यसङ्कल्पप्रातिकूल्यवर्जने दर्शिते । पुनः पुनरुपदेशादिना महाविश्वासो दर्शितः ।
अथ कार्पण्यप्रदर्शनपूर्वकं शरणागतिस्वरूपं दर्शयितुमुपक्रमते–इत्युक्त्वेत्यादिना । तत्र रावणेन तिरस्कारे सत्यस्य देश एवास्माभिस्त्याज्यः । परम
धार्मिकश्रीरामाश्रयस्तु कर्तव्य इति धार्मिकस्य विभीषणस्य धर्मे मतिरासीदित्यृषिः प्रस्तौति–इतीति । इत्युक्त्वा "प्रदीयतां दाशरथाय मैथिली" इति
मर्षयतु, भवानिति शेषः ॥ २५ ॥२६ ॥ परीतकालाः परीतः प्रत्यासन्नः कालो येषां ते । यद्वा परीतः परिवृतः कालः मृत्युरिव अहिः तेन गतान्यायूंषि येषां ते ॥ ४४ ॥
तथोक्ताः ॥२७॥ इति श्रीमहेश्वर० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षोडशः सर्गः ॥ १६ ॥ एवं परावरज्ञो विभीषणः दुर्मोनिना रावणेन धिक्कृतः
तं परित्यज्य अन्तरिक्षस्थितः सन् रावणस्यानुकूलबुद्ध्युत्पत्तिप्रत्याशया पुनरपि हितोपदेशं कृत्वा तत्रापि रावणाभिमुख्यमनालोक्य तेन सह संसर्गायोग्यत्वं
सम्यङ्निश्चित्य त्वरया श्रीरामं प्राप्तुकामः श्रीरामनिवासभूमिं प्राप्तवानित्याह–इत्युक्त्वेति । रावणानुजो विभीषणः यत्र सलक्ष्मणो रामः तत्राजगामेति सम्बन्धः ।

For Private And Personal Use Only

कर्तव्यसौकर्यं " यावन्न गृह्णन्ति शिरांसि बाणाः " इत्यकरणे प्रत्यवायं चोक्त्वा । परुषं सस्त्रीकजनसुखावहस्य मलयमारुतस्य विरहिणि दुःखकरत्व वद्विभीषणोदितं हितम् आश्रयदोषेण परुषम् । वाक्यं हितपरिपूर्णम् । उक्त्वा हितज्ञो भ्राता भ्रातरमापन्नं परितत्याजेत्यपयशो यावता शक्यं परि मार्ष्टुं तावत्पर्यन्तमुक्त्वा । परुषत्वे हेतुः रावणमिति । प्रबलदुर्बलविचारमन्तरेण सर्वरावकस्य शत्रुबलोपवर्णने परुषं भवत्येव । रावणानुजः रावणानु जत्वेऽपि सत्त्वोत्तरतया कथनीयं हितमुक्तवानित्यृषिः स्तौति । हितकथने ज्येष्ठभावोऽप्यप्रयोजकः । अत एवोक्तं मनुना—"पितॄनध्यापयामास शिशुराङ्गि रसः कविः । पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् । अज्ञं हि बालमित्याहुः पितेत्येव च मन्त्रदम् ॥ " इति । आजगाम रावणगोष्ठ्यां स्वस्य सम्बन्धाभावेन रामगोष्ठ्याः स्वगृहत्वेनाजगामेत्युक्तम्, न तु जगामेति । मुहूर्तेन "वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवास वैशसम् ॥ " इति न्यायेनाङ्गारनिकरपरिक्षिप्ते वर्त्मनि पदन्यासवत् रावणसदनावस्थित्यनर्हत्वं विगलितबन्धनरज्जोर्वत्सस्य मातुरूधःस्पर्शमन्तरेण मध्यदेशादर्शनवदतिवेगागमनं चोक्तम् । यत्र रामः रामापेक्षया तद्देशसम्बन्धस्य प्राप्यत्वमुक्तम् । "सुभगश्चित्रकूटोऽसौ गिरिराजोपमो गिरिः । यस्मिन् वसति काकुत्स्थः कुबेर इव नन्दने ॥ " इतिवत् । रामस्य लक्ष्मणो व्यावर्तक इति सलक्ष्मण इत्युक्तम् । यद्वा पुरुषकारसान्निध्यमनेनोच्यते । अनेन श्लोकेन भगवद्विमुखानां देशस्य त्याज्यत्वं तत्सम्बन्धिदेशस्य परमप्राप्यत्वं चोक्तम् । यद्वा " सा काशीति न चाकशीति " इत्याद्युक्तरीत्या भगवद्देश स्यापि भागवताभिमानाभावे परित्याज्यत्वाल्लक्ष्मणसान्निध्यमुक्तम् । ननु विश्रवःपितामहवरप्रदानविभवविदितनिखिलधर्मवृन्देन " विभीषणस्तु धर्मात्मा न तु राक्षसचेष्टितः " इति तत्र तत्र धार्मिकतया प्रशंसितेन विभीषणेन " ज्येष्ठो भ्राता पितृसमः " इति पितृवदनुवर्तनीयो ज्येष्ठभ्राता बाल्यात् प्रभृति परिपोषकश्च सन् रावणः सपदि सन्निहिते शत्रौ क्षुद्रबुद्धिनेव दूरं कथं परित्यक्तः ? त्यजतु नाम कथंचित् । अथापि न युक्तमभिगन्तुं तस्य प्रहर्ता रम् । अभिगच्छतु नाम नोचितमस्य स्थानमभिलषितुम् । अभिलषतु नाम नौपयिकमस्य वधोपायं निर्देष्टुम् । अत्र केचित्—रावणस्य निरवधिकदोष दूषितत्वात् " गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥ " इति स्मरणाद्विभीषणेन त्यक्तो रावण इत्याहुः । त्र्यम्बकगुरवस्तु पितामहवरप्रसादेन लब्धविज्ञानत्वाद्रामं सर्ववेदान्तवेद्यं सर्वलोकेश्वरभूतं सर्वलोकशरण्यं मुक्तप्राप्यं नारायणाख्यं परं ब्रह्म लोका

ननु " ज्येष्ठभ्राता पिता चैव यश्च विद्यां प्रयच्छति । त्रयस्ते पितरो ज्ञेया धर्मश्चेदत्र कारणम् ॥ " इति स्मृतेः ज्येष्ठभ्रातृत्वेन पितृसमं परित्यागानर्हं रावणं परित्यज्य रामसमीपगमनं विभीषणस्य विरुद्धमिति चेत्, सत्यम्; " गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥ " इत्यादिना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तुजिघृक्षयाऽवतीर्णमिति निर्विचिकित्समवगच्छति। यथा मन्दोदरीप्रभृतयः। एवं तत्त्वज्ञानसम्पन्नस्य विशेषसामान्यधर्मप्राबल्यदौर्बल्यविवेकेन सामान्यधर्मपरित्यागो विशेषधर्मपरिग्रहश्चोपपद्यते। ज्येष्ठभ्रात्रनुवर्तनं हि त्रैवर्गिकफलसाधनतया ज्येष्ठानुवर्तनद्वारा परमात्माराधने पर्यवसानस्य वक्तव्यत्वात् मोक्षपर्यवसानेऽपि परमात्मोपासनाङ्गत्वाच्च सामान्यधर्मः। रामानुवर्तनं तु साक्षात्परमात्मसमाराधनत्वात् यज्ञादिधर्मसाध्यत्वेन प्रधानत्वाच्च विशेषधर्मः। उभयोश्चाप्यविरोधे सत्युभयमप्यनुवर्तनीयम्। विरोधे तु सामान्यधर्मं परित्यज्य विशेषधर्मोऽनुवर्तनीयः। अतो विभीषणोऽपि इयन्तं कालं कृतं रावणानुवर्तनमपरित्यज्यैव मम रामानुवर्तनमपि किं सिद्ध्येदित्याशया तस्मै हितं पुनःपुनरुपदिदेश। एवमपि तस्यासुरप्रकृतितयाऽनपनोद्यं रामवैरमिति निश्चित्यातः परम् एतदनुवर्तने स्वात्मविनाशकं रामविषयकं वैरं मय्यपि स्यादिति भीतः सन् "वरं हुतवहज्वाला-" इत्यादिन्यायेनात्यन्तदुस्सहां तत्सङ्गतिं तत्याज। विशेषधर्मं रामानुवर्तनं चाङ्गीचकारेत्यतोऽयं परो धर्म एवेति कृतप्रशङ्का दूरोत्सारिता। नाप्ययं राज्यकाङ्क्षया रामं शरणमुपजगाम तदपेक्षाया अदर्शनात्। तथाहि शरणागतिसमये "त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः" इत्यन्याविषयवैराग्यस्य तेन कण्ठरवेणोक्तत्वात्। पश्चाद्रामाय विज्ञापने क्रियमाणे "परित्यक्ता मया लङ्का मित्राणि च धनानि च। भवद्गतं मे राज्यं च जीवितं च सुखानि च॥" इति सर्वविधपुरुषार्थत्वेन त्वामेवाहमुपेयिवानिति कथनाच्च। "अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम्। राजानं त्वां करिष्यामि सत्यमेतत् ब्रवीमि ते॥" इत्यनाकाङ्क्षितराजत्वकरणोक्तिः कृलङ्कपरामप्रीतिसागरपरीवाहरूपानुषङ्गिकभोगप्रदानपरा। यथाहुः-"आयुरारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान्। ददाति ध्यायतां नित्यमपवर्गप्रदो हरिः॥" इति। अतो यदुक्तं हनुमता "राज्यं प्रार्थयमानस्तु बुद्धिपूर्वमिहागतः" इति। यच्च रामेणोक्तं "राज्यकाङ्क्षी विभीषणः" इति तत्सर्वं रामभक्त्याविलाशयस्य सुग्रीवस्य व्यामोहप्रशमनाय नीतिशास्त्रोक्तराजवृत्तान्तप्रदर्शनमात्रपरमिति मन्तव्यम्। हनुमद्रामवाक्यस्य विभीषणवाक्यस्य चान्योन्यविरोधप्रसङ्गे "अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीयः" इति न्यायेन विभीषणवाक्यस्य प्राबल्यात्। अत एव "राजानं त्वां करिष्यामि" इति ब्रुवतो रामस्य प्रतिवचनमनुक्त्वा परिचरणमात्रमेव विभीषणः प्रार्थयामास "राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणे। करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम्॥" इति। तस्यानुमत्यभावेपि बलाद्राज्यस्वीकार उत्तरकाण्ड उक्तः-"यावत् प्रजा धरिष्यन्ति तावत्त्वं वै विभीषण। राक्षसेन्द्र महावीर्य लङ्कास्थस्त्वं धरिष्यसि। शापितस्त्वं सखित्वेन कार्यं ते मम शासनम्। प्रजाः संरक्ष धर्मेण नोत्तरं वक्तुमर्हसि॥" इति। इत्थमनन्य उत्पथप्रवृत्तस्य गुरोरपि परित्यागश्रवणात् उत्पथगामिनं सोपाधिकं गुरुं रावणं परित्यज्य निरुपाधिकाखिलजगद्गुरुं स्मृतमात्रेण सकलकलुषहरणप्रवीण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रयोजनत्वादेवास्मै रामः कुलधनं श्रीरङ्गनाथं ददौ । धर्मसंस्थापनार्थमेवावतीर्णस्य रामस्य नियोगेनावशिष्टां राक्षसजातिं सन्मार्गे प्रवर्तयितुं तस्य राज्याङ्गीकरणम् । इदमप्याज्ञानुविधायित्वात् कैङ्कर्यकोटावन्तर्भूतमिति विभीषणतात्पर्यम् । अतो यथावद्विदितधर्मो लक्ष्मणोऽपि "अहं तावन्महाराजे पितृत्वं नोपलक्षये । भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ॥" इति सोपाधिकपितरं दशरथं परित्यज्य निरुपाधिकसकलविधबन्धुं राममेव "अग्रतस्ते गमिष्यामि पन्थानमकुतोभयम् । अहं सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥" इति रामपरिचरणमेव फलं प्रार्थयामास । "स भ्रातुश्चरणौ गाढं निपीड्य रघुनन्दनः" इति राघवं शरणमुपागतश्च । तथा विभीषणोऽपि सोपाधिकबन्धुं भ्रातरं परित्यज्य कैङ्कर्यापेक्षयैव सर्वविधसहजबन्धुं रामं शरणं गत इति बोध्यम् । अत एव रामप्राप्त्यपेक्षया रावणपरित्यागवेलायामन्तरिक्षगतः श्रीमानिति प्रशंसितः 'स तु नागवरः श्रीमान्' 'लक्ष्मणो लक्ष्मि

तं मेरुशिखराकारं दीप्तामिव शतह्रदाम् । गगनस्थं महीस्थास्ते ददृशुर्वानराधिपाः ॥ २ ॥

सम्पन्नः' इतिवत् । तस्मान्नाधर्मशङ्का विभीषणे । ननु यद्येवं तर्हि "ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया । तावुभौ मम नाशाय प्रसुप्तौ पुरुषर्षभौ । जीवन्नपि विपन्नोऽस्मि नष्टराज्यमनोरथः । प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः ॥" इति नागपाशबन्धनसमये स्वस्य राज्यनाशकृत निर्वेदः कथमुपपद्यते इति चेत् ? न; तत्रापि प्रतिष्ठाशब्दस्य रामकैङ्कर्यपरत्वात् । नष्टराज्यमनोरथ इत्यत्रापि राज्यशब्दो "भवद्गतं मे राज्यं च" इत्युक्तकैङ्कर्यसाम्राज्यपरः । एतेन "राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नात्र संशयः" इति सुग्रीववचनं तु तदाशयाज्ञानकृतमिति न कश्चिद्दोष इति प्राहुः । अत एव चतुरशीतौ वक्ष्यति विभीषणः—"यदाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् । तत्तथाऽनुष्ठितं वीर त्वद्वाक्यसमनन्तरम् ॥" इति ॥ १ ॥ रावणसमीपादुत्पतनसमय एव सुग्रीवादयो विभीषणमपश्यन्नित्याह—तमिति । तं दवाग्नेर्निर्गत्य शीतलह्रदे पतितुमिवागच्छन्तम् । मेरुशिखराकारम् उन्नतत्वपीवरत्वरत्नबहुलत्वादिभिर्मेरुशिखरतुल्यम् । किञ्च प्रतिपक्षत्यागलाभेन स्थिरतया स्थितत्वं प्रकाशमानत्वं पारतन्त्र्यज्ञापकत्वम्, तेन रामस्य शृङ्गलाभः रावणस्य शृङ्गभङ्गश्चोच्यते । दीप्तामिव शतह्रदाम् तेजिष्ठत्वगगनसञ्चाराभ्यां विद्युद्दृष्टान्तः । रामभक्ता वानरा नास्मान् प्रवेशयिष्यन्तीति कम्पः, अप्रवेशे जीवनं न सिद्ध्यतीति त्वरा चेत्येतद्द्वयं तेन गम्यते । गगनस्थमिति । दूरत एव ददृशुरिति भावः ॥ २ ॥

श्रीरामनामधेयं कौसलेयं राममाजगामेति न दोषः ॥ १ ॥ तमिति । मेरुशिखराकारमिति उन्नतत्वपीवरत्वरत्नबहुलत्वादिभिर्मेरुशिखरदृष्टान्तः । नोद्विग्नत्व

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तनि०—गगनस्थं रावणगोष्ठीतो निर्गमनसमय एव ददृशुः । महीस्थाः भूमौ परितो रक्षणनियुक्ता आकाशस्थमपि ददृशुरिति जागरूकत्वातिरेकः । यद्वा महीस्थाः तत्र तत्र वृक्षादिषु स्थिताः सर्वे तदात्व एव गगनस्थं दृष्ट्वा रामं पर्यवारयन् । वानराधिपाः अत्यन्तं सावधानतया विद्यमानत्वाद्वानरानपि ऋषिः स्तौति वानराधिपा इति । ददृशुः एको दृष्ट्वा अन्यस्मै न दर्शितवान् किंतु युगपदेव सर्वे ददृशुः । अनेन न केवलं प्रतिकूलसमूहान्निर्गमनमेव विभीषणस्य प्रयोजनम् किंतु अनुकूलकटाक्ष विषयत्वं लब्धमित्युक्तम् ॥ २ ॥ अथ सुग्रीवो लङ्कापुरीदेशादागमनमायुधसन्नाहं च दृष्ट्वा प्रहर्तुमेवागच्छतीति विचार्य तमर्थं वानरैः सह चिन्तयामासे त्याह—तमिति । तम् अत्यन्ताभिनिवेशेन शीघ्रमागतम् । आत्मपञ्चमम् आत्मना पञ्चत्वसङ्ख्यापूरकामित्यर्थः । अनलशरभसंपातिप्रघसनामभि

[स हि मेघाचलप्रख्यो महेन्द्रसमविक्रमः । सर्वायुधधरो वीरो दिव्याभरणभूषितः ॥
ये चाप्यनुचरास्तस्य चत्वारो भीमविक्रमाः । तेऽपि सर्वायुधोपेता भूषणैश्चापि भूषिताः ॥]
तमात्मपञ्चमं दृष्ट्वा सुग्रीवो वानराधिपः । वानरैः सह दुर्द्धर्षश्चिन्तयामास बुद्धिमान् ॥ ३ ॥
चिन्तयित्वा मुहूर्तं तु वानरांस्तानुवाच ह । हनुमत्प्रमुखान् सर्वानिदं वचनमुत्तमम् ॥ ४ ॥

श्चतुर्भी राक्षसैर्युक्तमिति यावत् । अनलादिगतसङ्ख्यापूरण एव विभीषणस्य प्राधान्यमुक्तम् । रामविषयप्रेमास्पदत्वं तु समानम् । सुग्रीवः गगनस्थ दर्शनार्थं शीघ्रं शिर उन्नम्य दर्शनेन तात्कालिकग्रीवासौन्दर्यमृषिः स्तौति । वानराधिपः । शीघ्रमुत्थाय दर्शनं वानरसेनाया अपि स्वस्यैव रक्षकत्वेन रामविषयप्रीतेश्च 'राघवार्थे पराक्रान्ताः' इत्युक्तेभ्यो वानरेभ्योऽपि स्वस्यैव निरवधिकप्रीतिमत्ताज्ञापकत्वेन च । दुर्धर्षः शरणागतस्यापि पश्चादाक्रूरपाद त्वापादकत्वेन अनभिभवनीयः स्थितः । बुद्धिमान् वानरैः सह चिन्तयामास । स्वयं समर्थत्वेऽपि तानप्यनुसृत्य चिन्तनं कार्यगौरवात् । चारो वा शत्रु र्वेति चिन्तयामास । आगमनमुखविकासादिना निर्दुष्टत्वनिश्चयेऽपि रामविषयप्रेमपारवश्येन चिन्तितवानिति बुद्धेः प्राशस्त्यम् ॥ ३ ॥ विभीषणे सपरि करे सविधस्थे मन्त्रविलम्बो न युक्त इति झटिति मनसा निश्चित्य सचिवादीन् प्रति निर्णीतमाह—चिन्तयित्वेति । चिन्ताया निर्णयान्तत्वादत्र चिन्त यित्वेति निर्णयवाची । नायं चारो नापि दूतः अपितु बाधक एवेति निश्चित्य ॥ ४ ॥ तनि०—मुहूर्तम् अल्पकालेन । रावणः उत्तरकूल अनावृते स्थितं रामं गगनसञ्चाराभ्यां शतह्रदादृष्टान्तः ॥ २ ॥ आत्मपञ्चमम् आत्मना पञ्चमं पञ्चसङ्ख्यापूरकम् ॥ ३–७ ॥

For Private And Personal Use Only

शीघ्रं हत्वा आगन्तव्यमिति प्रेषितवान् मन्त्रेण विलम्बे कृतेऽयमतिशेत इति झटिति निश्चितवान् । तुशब्दः निश्चयानन्तरं पूर्वावस्थापेक्षया वैलक्षण्यं द्योतयति । तान्तु वाच प्रेमपरवशानुवाच ह । स्वामिपरिकरसमवायप्रकार आश्चर्यंकर इति ऋषिरभिनन्दति हेति । हनुमत्प्रमुखान् । गौरवकाले जाम्बवत्प्रमुखानिति वक्तव्यम् । मन्त्रविचारकाले तु बुद्धिमत्त्वप्राधान्यात् हनुमत्प्रमुखानित्युक्तिः । सर्वान् । रामविषयप्रेमातिशयः सर्वेषामविशेष इति सर्वानित्युक्तिः । इदं वचनम् । अर्थमन्तरेणापि वचनसन्निवेशस्य श्रुतिप्रियत्वमभिनन्दति ऋषिः । उत्तमं सर्वोत्कृष्टम् ॥ ४ ॥ स्वनिर्णीतार्थमाह-एष इति । एषः बाधकृतैकान्तक्रौर्यसम्पन्नः । सर्वायुधो

एष सर्वायुधोपेतश्चतुर्भिः सह राक्षसैः । राक्षसोऽभ्येति पश्यध्वमस्मान् हन्तुं न संशयः ॥ ५ ॥
सुग्रीवस्य वचः श्रुत्वा सर्वे ते वानरोत्तमाः । सालानुद्यम्य शैलांश्च इदं वचनमब्रुवन् ॥ ६ ॥
शीघ्रं व्यादिश नो राजन् वधायैषां दुरात्मनाम् । निपतन्तु हताश्चैते धरण्यामल्पतेजसः ॥ ७ ॥

पेतः मनःस्थितक्रौर्यानुकूलहिंसापरिकरसंपूर्णः । अनुकूलस्य प्रतिकूलतानिश्चयवत् रामविषयप्रेमान्धतया एकायुधस्य बहुत्वनिश्चयः । एकायुधग्रहणचातुर्यदर्शनेन सर्वायुधग्रहणेष्वपि नैपुण्यं ज्ञायत इति वा तथोक्तम् । स्वामिपीडने ब्रह्मास्त्रसदृशशरणागतिरेतस्य हस्ते विद्यत इति वा । उत्पपात गदापाणिरित्यत्र सर्वायुधोपलक्षणमित्यन्ये । राक्षसः सर्पजातिरितिवत् क्रौर्यातिशयोक्तिः । पश्यध्वं पश्यत । अस्मान् हन्तुम् । अस्मासु कस्यचिद्धनने हि शेषं जीविष्यति मूलभूतरामहनने सर्वविनाश इति बहुवचनार्थः ॥ ५ ॥ वानराश्च सुग्रीववाक्यानुसारेणोद्योगं चक्रुरित्याह-सुग्रीवस्येत्यादि श्लोकद्वयेन । अल्पतेजस इति । अस्मद्बलस्य गजकवलप्राया इत्यर्थः ॥ ६ ॥ ७ ॥ तनि०-सुग्रीवस्य साहसकृत्यनिर्वाहकस्य । वचः श्रुत्वा अनुमतिं लब्ध्वा । सालानुद्यम्य शैलांश्च शैलवृक्षतारतम्यानादरेण सहसा हस्तसुलभान् स्वीकृत्य । आदरातिशयेन प्रत्येकमुभयपरिकरत्वमुक्तम्, रामकैङ्कर्यानुकूलवृत्तेर्लक्ष्मणस्य युगपच्छत्रचामरग्रहणवत् । राक्षसहननं हि रामकैङ्कर्यम् । इदं वचनं स्वशेषत्वसिद्धये सुग्रीवानुमतिमप्यनवेक्ष्य तेषां वधनिश्चयोपपादकं वचनमब्रुवन् । गुणप्रधानभावमौचित्यं वाऽनपेक्ष्य सर्वे अब्रुवन् । अस्वतन्त्राणामनुमतिविलम्बे स्वतन्त्रप्रहारे च पारतन्त्र्यहानिः स्यात् सा यथा न भवति तथा शीघ्रमाज्ञापय । नः वधोद्युक्तानस्मान् । वधोद्युक्ता यूयं किं ममानुमत्येत्यत्राह-राजन्निति । राजाज्ञा खल्वनुवर्तनीयेति भावः । वधाय गृहीत्वा बद्धाश्चेदत्र स्थित्वा कथंचिदनर्थं कुर्युः अतो वधायैवानुमतिर्देया । एषां दुरात्मनाम् आकारेणैव दौरात्म्यं दृश्यते खलु । निपतन्तु हताः सर्वे हताः पतन्तु । यथा पुनराकाशं नोत्पतन्ति तथा भूमावेव निपातयिष्याम इति भावः । युद्धे जयाजयौ पाक्षिकावित्यत आह अल्पतेजसः अल्पबलाः । अस्मद्बलस्य गजकवलप्राया इति भावः ॥ ६ ॥ ७ ॥

तेषामिति । अनादरे चेयं षष्ठी । वदन्तु नामैते वानरा यत् किंचित्, सर्वज्ञः परमकारुणिकः सर्वलोकशरण्यो रामो मामवश्यं रक्षिष्यत्येवेति महाविश्वासेन तेषामन्योन्यभाषणमनादृत्य प्रहरणोद्यतानामपि तेषामाभिमुख्येनाजगाम । आगत्यापि निर्विशङ्कः सन् सर्वेषामात्मानं प्रकाशयन्नाकाश एव स्थितवानित्यर्थः । अत्र स्वस्थो व्यतिष्ठतेति द्विः प्रयोगो निर्भयत्वेन निष्कम्पावस्थानसूचनार्थः ॥ ८ ॥ अथ पुरुषकारलेशमनपेक्ष्य सर्वानपि प्रतिबन्धिनो निवार्य मां रक्षिष्यतीति महाविश्वासशाल्यपि विभीषणः सहसा रामं शरणं नोपजगाम । किंतु दूरत एव स्थितः प्रातिकूल्यप्रवृत्तानेव सुग्री

तेषां सम्भाषमाणानामन्योन्यं स विभीषणः । उत्तरं तीरमासाद्य खस्थ एव व्यतिष्ठत ॥ ८ ॥
उवाच च महाप्राज्ञः स्वरेण महता महान् । सुग्रीवं तांश्च संप्रेक्ष्य सर्वान् वानरयूथपान् ॥ ९ ॥

वादीन् पुरुषकारभूतान् कृत्वोवाचेत्याह—उवाच चेति । उवाच च चकारेण स्वीकारे स्वागमनमेव पर्याप्तम्, वचनमप्युक्तवान् । पद्भ्यामभिगमाच्चेत्यागमनमपि भारायेति मन्यमानस्य तदुपरि वाक्यं क्षते क्षारवत् । महाप्राज्ञ इत्यनेनान्तरङ्गपुरुषकारेणैव कृपालुरपि राजा शरणमुपगन्तव्य इति परिज्ञानं वानराणां मत्प्रतिकूलसंरम्भोऽपि न मद्द्वेषकृतः किंतु रामभक्तिप्रकर्षकारितः । अतो गुण एवायमिति जानन्, यदि रामपरिचारका एते नाङ्गीकुर्युः किं रामाङ्गीकारेण ? अतो रामाङ्गीकारादप्येतदन्तर्भाव एव मम पुरुषार्थ इति ज्ञानं च विवक्षितम् । स्वरेण महतेति । पुरुषकारभूतानां सर्वेषां सर्वलोक

तेषामित्यनादरे षष्ठी । वानरा यत् किमपि वदन्तु नाम सर्वज्ञः परमकारुणिकः सर्वलोकशरण्यश्च श्रीरामोऽवश्यं मां रक्षिष्यत्येवेति महाविश्वासेन तेषामन्योन्यभाषणमप्यनादृत्य प्रहरणोद्युक्तानामपि तेषामाभिमुख्येनाभिजगाम । आगम्यापि निर्विशङ्कस्सन् सर्वेषामात्मानं प्रकाशयन् आकाश एव स्थितवानित्यर्थः । अत्र स्वस्थ एव व्यतिष्ठतेति तिष्ठतेर्द्विः प्रयोगः निर्भयत्वेन निष्कम्पावस्थानसूचनार्थः ॥८॥ एते वानरा मदीयमभिप्रायमविज्ञायासौ रावणसम्बन्धीति योद्धुमुद्युञ्जन्ते । रामसमाश्रयणमेतेभ्यो निवेद्य एतत्पुरुषकारमुखेनैव रामलक्ष्मणौ समाश्रयिष्यामीत्यभिप्रेत्याब्रवीदित्याह—उवाचेति । महाप्राज्ञ इत्यनेन अन्तरङ्गपुरुषपुरुषकारेणैव कृपालुरपि राजा शरणमुपगन्तव्य इति परिज्ञानम्, वानराणां मत्प्रातिकूलसंरम्भोऽपि न मद्द्वेषकृतः किन्तु श्रीरामभद्रभक्तिप्रकर्षपारवश्यकारितः, अतो गुण एवायमिति ज्ञानम्, यदि श्रीरामपरिचारका एते नाङ्गीकुर्युः तदा किं रामाङ्गीकारेण ? रामाङ्गीकारादप्येतदङ्गीकार एव मम पुरुषार्थ इति ज्ञानं च विवक्षितम् । स्वरेण महतेति पुरुषकारभूतानां सर्वेषां सर्वलोकशरण्यस्य चार्तस्वश्रवणाय महास्वरप्रयोगः । महान् तत्र महत्त्वमौपाधिकसम्बन्धपरित्यागपूर्वकनिरुपाधिकस्वामिसमाश्रयणान्मुख्यकृतम् । "रावणो नाम दुर्वृत्तः" इत्यारभ्य "विभीषणमुपस्थितम्" इत्यन्तेन प्रकरणेन "आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शरण्यस्य च स्वातंत्र्यश्रवणाय महास्वरप्रयोगः । रामविषये चैवंविधातंरवोच्चारणं भाग्याधिकस्यैवेति विवक्षया महानित्युक्तिः । यथोक्तं लक्ष्मीतन्त्रे— "आकिञ्चन्यैकशरणाः केचिद्भाग्याधिकाः पुनः । मामेव शरणं प्राप्य मामेवान्ते समश्नुते" इति ॥ ९ ॥ अत्र प्रथमं स्वदोषान् पुरस्करोति—रावण इति । रावणं लोकरावणमिति न्यायेन रावयतीति व्युत्पत्तिसंभवान्नामैव क्रूरमित्यर्थः । न केवलं नामैव क्रूरम्, व्यापारोऽपि नृशंस इत्याह दुर्वृत्त इति । जाति रपि तथाविधेत्याह राक्षस इति । न केवलं स्वयमेव क्रूरः क्रूरानेकपरिकरसमवेतश्चेत्याह—राक्षसेश्वरः इति । रावणस्यैवंविधत्वे तव किमायातमित्यत्राह—

रावणो नाम दुर्वृत्तो राक्षसो राक्षसेश्वरः । तस्याहमनुजो भ्राता विभीषण इति श्रुतः ॥ १० ॥
तेन सीता जनस्थानाद्धृता हत्वा जटायुषम् । रुद्धा च विवशा दीना राक्षसीभिः सुरक्षिता ॥ ११ ॥

तस्याहमिति । यद्यहमग्रजः स्यां तर्हि तदाज्ञानुवर्तित्वेन धनदवत्तद्दोषैर्न लिप्येयम् । अनुजत्वेन तन्मनीषिताः सर्वे दोषास्तदाज्ञया मया कृता इति भावः ॥ १० ॥ राघवस्य तु प्रियापहारनिरोधादिभिः समाश्रितहननाच्च विशेषतस्तेनापकृतमित्याह—तेनेति । स्पष्टम् ॥ ११ ॥ तनि०—पूर्वोक्तदोषाः प्रायश्चित्तनिवर्त्याः । न क्षमामीत्युक्तभागवतापचारोऽप्यस्तीत्याह—तेनेति । तेन उक्तसकलदोषवता । हृता 'अनन्या राघवेणाहम् । जलान्मत्स्याविवोद्धृतौ' इत्याद्युक्तरीत्या रामविश्लेषानर्हा हृता । सीता गर्भवासादिक्लेशाभावेन परमपदादजहत्स्वभावतया अत्यन्तसौकुमार्या । जनस्थानात् पुष्पापचयादिभोगानामेकान्तस्थानतया अयोध्यात उत्कृष्टत्वेन सम्मतात् । जटायुषं हत्वा 'मम प्राणा हि' इत्युक्तरीत्यात्यन्ताभिमतं जटायुषमवधीत् । यदि सीतया सह जटायुषमपि कारागारे निवेशितवान् तदा मोचनं स्यात् । तथा न कृतम् । स्वस्य सपरिवारस्य विनाशार्थमेवं कृतवान् । रुद्धा च प्रमादाद्धरणेऽपि पश्चात्तापेन पुनर्न त्यक्ता किंतूच्छ्वासनिश्वासासञ्चारस्थले रुद्धा । विवशा न्यस्तपाणिपादाचलनेन रामविश्लेषदुःखेन आश्वासकान्तराभावेन च स्वबलहानिं प्रकाशयन्ती स्थिता । रामभोगपरम्परया हृष्टामेतादशावस्थाविशिष्टां कृतवान् । राक्षसीभिः सुरक्षिता

रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा । आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः ।" इति भगवच्छास्त्रोक्ता षडङ्गा शरणागतिः प्रदर्शिता ॥ ९ ॥ रावणः रावयतीति व्युत्पत्त्या नाम्नैव लोककण्टकत्वं द्योत्यते । दुर्वृत्त इत्यनेन कृत्याकरणाकृत्यकरणरूपदोषवत्त्वमुच्यते । राक्षस इत्यनेन जात्या क्रौर्यमुच्यते । राक्षसेश्वर इत्यनेन भृत्यसम्बन्धप्रयुक्तदोषवत्त्वमुच्यते । तस्याहमनुजो भ्रातेत्यनेन स्वस्य रावणसम्बन्धनिबन्धनदोषवत्त्वमुक्तं भवति । अनेन "उपायेनैव सिद्ध्यन्ति ह्यपाया विविधास्तथा । इति या गर्वहानिस्तद्दैन्यं कार्पण्यमुच्यते ॥" इत्युक्तगर्वहानिलक्षणं कार्पण्यरूपमङ्गं प्रदर्शितम् ॥ १० ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विकृतभयंकरवेषवचोभिरेकाक्ष्येककर्णीप्रभृतिभिः आश्वासकनवध्याकरणपण्डितस्यापि यथा न प्रवेशस्तथा रक्षिता ॥ ११ ॥ अस्त्वेवं ततः किमित्यत्राह–तमिति । हेतुभिर्वाक्यैः हेतुप्रतिपादकैर्वाक्यैः । न्यदर्शयम् अबोधयम् । बोधितमेवार्थमाह साध्विति । निर्यात्यतां प्रत्यर्प्यताम् ॥ १२ ॥ तनि०–सीताहरणसमकालमेवागमनं ममोचितं तथा अकृत्वा तस्य हितं वक्तुं विलम्बितोऽहमेव पापीयानित्याह–तमहमिति । तमुक्तमोहयुक्तम् अहं पापिष्ठं ज्ञात्वापि हितवक्ता विविधैः सामादिभिर्वाक्यैः पूर्णार्थैः हेतुभिः खरवधादिभिर्लिङ्गैरबोधयं सुप्तमिव प्राबोधयम् । बोधितमर्थमाह साधु निर्यात्यतां सीतेति । निर्यातनं प्रतिदानम् । साधु अनुतापाकिञ्च-न्यादिप्रदर्शनेन । सीता रामाय, तदीय एव वस्तुनि तस्मै दत्तेऽपि स्वकीयं दत्तमिति मन्वानाय । पुनः पुनः तस्येच्छाभावेऽपि मद्वचः कुर्यादिति प्रत्याशया प्रलपितम् ॥ १२ ॥

तमहं हेतुभिर्वाक्यैर्विविधैश्च न्यदर्शयम् । साधु निर्यात्यतां सीता रामायेति पुनः पुनः ॥ १२ ॥
स च न प्रतिजग्राह रावणः कालचोदितः । उच्यमानं हितं वाक्यं विपरीत इवौषधम् ॥ १३ ॥
सोऽहं परुषितस्तेन दासवच्चावमानितः । त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणं गतः ॥ १४ ॥
सर्वलोकशरण्याय राघवाय महात्मने । निवेदयत मां क्षिप्रं विभीषणमुपस्थितम् ॥ १५ ॥

स चेति । विपरीतः मुमूर्षुः ॥ १३ ॥ एवमीश्वरस्य निर्हेतुककरुणाकृतेन रावणावमानेन प्रयोजनान्तरवैमुख्यं जातम् । ततश्च परमपुरुषार्थभूतरामप्राप्त्यर्थं राममेव शरणमुपगतोऽस्मीत्याह–सोऽहमिति । अत्र पुत्रान् दारानिति 'परित्यक्ता मया लङ्का मित्राणि च धनानि च' इति वक्ष्यमाणानां लङ्काराज्यादीनामुपलक्षणम् । अत्र फलान्तरानिर्देशात् 'राक्षसानां वधे साह्यम्' इत्यादिवचनस्य स्वेनैव वक्ष्यमाणत्वाच्च रामपरिचरणस्यैव फलत्वपक्षो युक्तः ॥ १४ ॥ एवं शरण्यस्य विज्ञाप्यमर्थमुक्त्वा तद्विज्ञापनाय पुरुषकारभूतान् प्रार्थयते–सर्वलोकशरण्यायेति । शरणे रक्षणे साधुः शरण्यः । "तत्र

तमहमिति । हेतुभिः हेतुमद्भिः । न्यदर्शयं न्यबोधयम् । बोधितार्थमेवाह साध्विति । निर्यात्यतां प्रत्यर्प्यताम् । अनेन "चराचराणि भूतानि सर्वाणि भगवद्वपुः । ततस्तदानुकूल्यं मे कर्तव्यमिति निश्चयः ॥" इत्युक्तमानुकूल्यसङ्कल्परूपमङ्गं प्रदर्शितम् ॥ १२ ॥ स चेति । विपरीतः मुमूर्षुः ॥१३॥ दासवच्चावमानित इत्यनेन ईश्वरस्य निर्हेतुककरुणापरिपाकभूतेनैव रावणावमानेन प्रयोजनान्तरवैमुख्यं जातम् । ततश्च परमपुरुषार्थरूपरामप्राप्त्यर्थं राममेव शरणमुपगतोस्मीत्याह–त्यक्त्वेति । त्यक्त्वा पुत्रांश्च दारांश्चेत्यनेन प्रातिकूल्यवर्जनरूपमङ्गं प्रदर्शितम् । राघवं शरणं गत इत्यनेन आत्मनिक्षेपरूपमङ्गं प्रदर्शितम् ॥ १४ ॥ सर्वलोकशरण्याय अधिकारिभेदमन्तरेण सुरनरवानरतिर्यक्स्थावरान्तानां सर्वेषां समाश्रयणीयाय राघवाय । "अन्येऽपि सन्त्येव नृपाः पृथिव्यां मान्धातुरेते तनयाः ॥ ४८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साधुः " इति यत्प्रत्ययः । शरणं भवितुमर्हः शरण्य इति निरुक्तिः । अनालोचितकुलविद्यावृत्तादिविशेषाशेषलोकशरण्यायेत्यर्थः । अतः सञ्चित विविधापराधस्य रावणस्यापि युष्माकमिवात्रांशोऽस्ति किमुत तत्सम्बन्धिनः । परंतु रुच्यभावादेव स स्वांशं न लब्धवान् । मम त्वाभिमुख्येनागतस्य दुरपनोदोऽशलाभ इति भावः । अत्र शरण्याङ्गभूतं सुलभत्वपरत्वरूपं गुणद्वयं प्राधान्येन दर्शयति राघवाय महात्मन इति । सुलभत्वेप्यनिष्टानां लोष्टा नाम् उत्कर्षेप्यसुलभानां मेरुप्रभृतीनां चानुपादेयत्वादुभयमप्यपेक्षितम् । 'यत्तदनिर्देश्यम्' इत्यादिवेदान्तगोचरस्य परब्रह्मणः सकलमनुजतिर्यङ्नयनसाक्षा

एतत्तु वचनं श्रुत्वा सुग्रीवो लघुविक्रमः । लक्ष्मणस्याग्रतो रामं संरब्धमिदमब्रवीत् ॥ १६ ॥

त्कारक्षममनुजावतारात् केयमन्या सौलभ्यकाष्ठेति भावः । महात्मने एवमवतारेप्यजहत्स्वभावतया निखिलहेयप्रत्यनीकत्वे सति ज्ञानशक्त्याद्यनन्त कल्याणगुणैकतानाय । निवेदयत अत्र प्रत्यक्षस्य स्वागमनस्य निवेदने प्रयोजनाभावात् स्वापराधपरिपूर्तिः इहामुत्रफलभोगविरागः शरणागतिलक्षण निरपायोपायपरिग्रहः रामकैङ्कर्याभिलाषः तत्परिचारकान्तर्भावश्चेत्येतेऽर्था विज्ञापनीया इत्यर्थः । क्षिप्रमित्यनेन यावच्छरण्यः स्वयमेव परिग्रहीष्यति ततः पूर्वमेव विज्ञापनेन युष्माभिः सुहृत्कार्यमाचरणीयमिति भावः । विभीषणम् रावणवन्नाहं प्रतिकूलः किन्तु 'विभीषणस्तु धर्मात्मा' इत्यनुकूल एव । उप स्थितम् अतिहीनस्याप्युपगमनमेव हि रामाङ्गीकारे बीजमिति भावः ॥१५॥ अथ सुग्रीवो रामप्रेमातिशयजनिताद्व्यामोहात् ' अतिस्नेहः पापशङ्की ' इति

प्रसूताः । किन्त्वर्थिनामर्थितदानदीक्षाकृतव्रतश्लाघ्यमिदं कुलं तत ॥ " इत्यादिवचनैः प्रसिद्धवैभवे रघुवंशे अवतीर्णाय । अनेन अर्थिनां प्रार्थनावैफल्यं नास्तीति द्योतितम् । महात्मने परमात्मने । मां राममेव सर्वविधबन्धुत्वेनाश्रितम् । क्षिप्रं क्षिप्रमित्यनेन शीतलसुरभिसलिलं पद्माकरं दृष्टवतस्तृषितस्येव विलम्बासहत्वं द्योत्यते । निवेदयत विज्ञापयत । " वाचा धर्ममवाप्नुहि " इति न्यायेन अक्लेशेन भवतां महानुपकारः सेत्स्यतीति भावः । सर्वलोकशरण्यायेत्यनेन श्लोकेन " अप्रार्थितो न गोपायेदिति तत्प्रार्थनामतिः । गोपायिता भवत्येवं गोप्तृत्ववरणं स्मृतम् ॥ " इत्युक्तं गोप्तृत्ववरणरूपमङ्गं प्रदर्शितम् । उपस्थितं समीपं प्राप्य स्थितम् । अनेन " रक्षिष्यत्यनुकूलान्न इत्येवं सुदृढा मतिः । स विश्वासो भवेच्चात्र सर्वदुष्कृतिनाशनः॥" इत्युक्तं विश्वासरूपमङ्गं प्रदर्शितम् । ननु इक्ष्वाकुवंशस्य राज्ञो रामभद्रस्य सर्वलोकशरण्यत्वं परत्वं च विभीषणेन कथमुक्तमिति चेत् ? उच्यते-" परमापद्गतस्यापि धर्मे मम मतिर्भवेत् । या या मे जायते बुद्धिर्येषु येष्वाश्रयेषु च । सा सा भवतु धर्मिष्ठा तं तं धर्मं च पालयेत् ॥" इति प्रार्थितेन ब्रह्मणा-" धर्मिष्ठत्वं तथा वत्स तथा चैतद्भविष्यति । " इति दत्तवरत्वेन रामं सकलजगद्रक्षणार्थमिक्ष्वाकुवंशेऽवतीर्णं परमधर्मरूपं परमपुरुषं नारायणं ज्ञात्वा तथोक्तवानिति सर्वं समञ्जसम् ॥१५॥ क्रूरहृदयोऽयमस्मासु पापमाचरेदतो विभीषणो

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यायेन तस्य सर्वशक्तित्वमपि विस्मृत्य शरणागतवत्सलो रामः शरणागतिशब्दश्रवणमात्रेण मूढहृदयमेनं परिगृह्णीयात् ॥ १६ ॥ ततः क्रूरहृदयोऽयं रामे किमिव पापमाचरेदित्यस्थानभयशङ्काव्याकुलितः शीघ्रं रामसमीपं गत्वा स्वसमानहृदयं लक्ष्मणमपि सहायीकृत्य विभीषणो निमाद्य इति विज्ञापयामासेत्याह-एतदिति । तुशब्देन पूर्वोक्तविशेष उच्यते । लघुविक्रमः शीघ्रगमनः । संरब्धं प्रेमभरात् त्वरितोदिताक्षरम् ॥१७॥ मन्त्र इति । मन्त्रः

रावणस्यानुजो भ्राता विभीषण इति श्रुतः । चतुर्भिः सह रक्षोभिर्भवन्तं शरणं गतः ॥ १७ ॥
मन्त्रे व्यूहे नये चारे युक्तो भवितुमर्हसि । वानराणां च भद्रन्ते परेषां च परन्तप ॥ १८ ॥
अन्तर्धानगता ह्येते राक्षसाः कामरूपिणः । शूराश्च निकृतिज्ञाश्च तेषु जातु न विश्वसेत् ॥ १९ ॥
प्रणिधी राक्षसेन्द्रस्य रावणस्य भवेदयम् । अनुप्रविश्य सोऽस्मासु भेदं कुर्यान्न संशयः ॥ २० ॥
अथवा स्वयमेवैष छिद्रमासाद्य बुद्धिमान् । अनुप्रविश्य विश्वस्ते कदाचित् प्रहरेदपि ॥ २१ ॥

कार्याकार्यविचारः । व्यूहः सेनास्कन्दनिवेशः । नयः विचार्य निश्चितानामुपायानां स्वस्वविषये प्रयोगः । चारः गूढप्रेषणम् । वानराणां परेषां राक्षसानां च मन्त्रादिषु विषये युक्तः अवहितः । भवितुमर्हसि, वानराणां मन्त्रादीन् प्रयोजय । शत्रूणां मन्त्रादींस्तु सम्यक् जानीहि । एवं सति तव भद्रं भविष्यतीत्यर्थः ॥ १८ ॥ अस्त्वेवम्, ततः किमित्याशङ्क्य प्रकृतं विज्ञापयति-अन्तर्धानेति । अन्तर्धानगताः अदृश्यचारिणः । निकृतिज्ञाः कपटोपायवेदिनः ॥ १९ ॥ विश्वासे वा किमयं करिष्यतीत्याशङ्क्य भेदं दण्डं वा करिष्यतीत्याह-प्रणिधिरिति । प्रणिधिः चारः । " यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः । चारश्च गूढपुरुषः " इत्यमरः । भेदं मित्रभेदम् ॥ २० ॥ अथवेति । अपिः सम्भावनायाम् ॥ २१ ॥

न माद्य इति सुग्रीवः श्रीरामाय विज्ञापयामासेत्याह-एतत्त्वित्यादिना । लघुविक्रमः शीघ्रगमनः । संरब्धं त्वरितोदिताक्षरं यथा तथा ॥ १६ ॥ १७ ॥ मन्त्र इति । एतेषु विषयसप्तमी । मन्त्रे कार्याकार्यविचारे । व्यूहे सेनानिवेशे । नये विचार्य विनिश्चितानामुपायानां तत्तद्विषयप्रयोगे । चारे गूढपुरुषप्रेषणे । वानराणां परेषां राक्षसानां च मन्त्रादिषु विषये युक्तोऽवहितो भवितुमर्हसि । वानराणां मन्त्रादीन् प्रयोजय, शत्रूणां मन्त्रादीन् चारमुखेन सम्यग् जानीहि । एवं सति ते भद्रं भविष्यतीत्यर्थः ॥ १८ ॥ अन्तर्धानगता अदृश्यसञ्चारस्वभावाः । निकृतिज्ञाः गूढविप्रियकरणाभिज्ञाः ॥ १९ ॥ प्रणिधिः चारः ॥ २० ॥ २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शत्रुसकाशादागतस्यास्य परिग्रहे शत्रोर्बलक्षयः अस्माकं बलवृद्धिश्च स्यादित्याशङ्क्य द्विषद्बलव्यतिरिक्तमेव बलं ग्राह्यमित्याह–मित्रेति । मित्रबलं मित्रसम्बन्धिबलम् । अटवीबलम् आटविकजनरूपं बलम् । मौलं परम्परागतं सैन्यम् । भृत्यबलं तादात्विकभृतिप्रदानोपजीविबलम् ॥ २२ ॥ न केवलं द्विषद्बलत्वमात्रम् अन्येऽप्यपरिग्राह्यताहेतवः सन्तीत्याह–प्रकृत्येति । प्रकृत्या जात्येत्यर्थः ॥ २३ ॥ नन्वयं शरणागतः कथं परित्याज्य इत्याशङ्क्य शरणागतिलक्षणमायोपायेन विश्वासमुत्पाद्य त्वयि प्रहर्तुं प्रवृत्तत्वान्नास्यापरिग्राह्यत्वमात्रम्, किंतु सहायैः सह वध्यत्वमित्याह–रावणेनेत्यादि

मित्राटवीबलं चैव मौलं भृत्यबलं तथा । सर्वमेतद्बलं ग्राह्यं वर्जयित्वा द्विषद्बलम् ॥ २२ ॥

प्रकृत्या राक्षसेन्द्रस्य भ्राताऽमित्रस्य ते प्रभो । आगतश्च रिपोः पक्षात् कथमस्मिन् हि विश्वसेत् ॥ २३ ॥

रावणेन प्रणिहितं तमवेहि विभीषणम् । तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ २४ ॥

राक्षसो जिह्मया बुद्ध्या सन्दिष्टोऽयमुपागतः । प्रहर्तुं मायया च्छन्नो विश्वस्ते त्वयि राघव ॥ २५ ॥

प्रविष्टः शत्रुसैन्यं हि प्राज्ञः शत्रुरतर्कितः । निहन्यादन्तरं लब्ध्वा उलूक इव वायसान् ॥ २६ ॥

श्लोकद्वयमेकं वाक्यम् । प्रणिहितं प्रणिधिकर्मणा नियुक्तम् । अस्य शरणागतिर्विप्रलम्भकृतेति भावः । क्षमवतां युक्तव्यापारवताम् । क्षमं हितम् । "क्षमं शक्ते हिते त्रिषु" इत्यमरः ॥२४॥ प्रणिधिरप्येष नः किं करिष्यतीत्यत्राह–राक्षस इति । सन्दिष्टः, रावणेनेति शेषः । प्रहर्तुं सन्दिष्ट इति सम्बन्धः ॥२५॥ यदा शाठ्यं दृश्यते तदाऽसौ हन्यताम् तत्राह–प्रविष्ट इति । प्राज्ञ इति हेतुगर्भं विशेषणम् । प्राज्ञत्वादतर्कितः अस्मज्जिघांसयाऽयमागत इति तैरविचारितः ।

शत्रुकुलादागतस्यास्य परिग्रहे शत्रोर्बलस्य क्षयः, अस्माकं बलवृद्धिश्च स्यादित्याशङ्क्य तस्यापरिग्राह्यत्वमाह–मित्रेति । अटवीबलम् आरण्यजनबलम् । मौलं मूलबलम् । भृत्यबलं भृत्युपजीविबलम् ॥२२॥ न केवलमस्मिन् द्विषद्बलत्वमात्रम्, किन्त्वस्यापरिग्राह्यताहेतवस्सन्तीत्याह–प्रकृत्येति ॥२३॥ नन्वयं शरणागतः कथं परित्याज्य इत्याशङ्क्य शरणागतिलक्षणमायोपायेन विश्वासमुत्पाद्य त्वयि प्रहर्तुं प्रवृत्तत्वान्नास्यापरिग्राह्यत्वमात्रम्, किन्तु सहायैस्सह वध्यत्वं चेत्याह–रावणेनेत्यादिना । तं शरणागतशब्दोच्चारिणं रावणानुजम् । क्षमवतां युक्तव्यापारवताम् ॥२४॥ राक्षस इत्यादि श्लोकद्वयमेकं वाक्यम् । सन्दिष्टः, रावणेनेति शेषः । प्राप्तः स्वामिपार्श्वात्

स०–तस्य बलिष्ठस्य कथं निग्रह इत्यत आह क्षमवतां वरेति । क्षमाः शक्ता एषां सन्तीति क्षमवन्तः तेषु वर ! एतेन त्वत्सेनानायकैरस्माभिरपि तन्निग्रहः सुसाध्यः किमु त्वयेति सूचयति । "क्षमं युक्ते क्षमान्विते । वाच्यवच्छक्तहितयोः क्षमा भूमितितिक्षयोः ॥" इति विश्वः । एतेन तितिक्षार्थं क्षमसन्दमङ्गीकृत्य कृतत्वस्यार्थत्ववर्णनं परास्तम् । सति गत्यन्तरे तस्यायुक्तत्वात्क्षमाकथनस्य कथाऽसङ्गतत्वाच ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत एव तेषां सैन्यं प्रविष्टः सन् कदाचित् अन्तरं छिद्रं लब्ध्वा हन्यादित्यर्थः । प्रविष्टोऽप्येकाकी कथं बहून् हनिष्यतीत्याशङ्क्य छिद्रसाहितस्य युज्यत इति दृष्टान्तमुखेन प्रकटयति उलूक इति ॥ २६ ॥ तर्हि किं कर्तव्यम् ? तत्राह–वध्यतामिति । वध्यतां केवलनिरसने कृते मारीचवदनर्थकारी स्यादिति भावः । तीव्रेण दण्डेन । वालिवदेकेन बाणेन न हन्तव्यः । किंतु शिरसि वर्तिं कृत्वा दीपारोपणं कार्यम् । सचिवैः सह प्रथमं तेषां शिरांसि छित्त्वा विभीषणहस्ते दत्त्वा ततोऽयं वद्ध्यताम् । तत्र हेतुमाह रावणस्येत्यादि ॥ २७ ॥ एवं सुग्रीवो विभीषणविषयवक्तव्यमुक्त्वा अतः परमनेन यत्किंचिदुक्तं

वध्यतामेष दण्डेन तीव्रेण सचिवैः सह । रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ २७ ॥
एवमुक्त्वा तु तं रामं संरब्धो वाहिनीपतिः । वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ २८ ॥
सुग्रीवस्य तु तद्वाक्यं श्रुत्वा रामो महायशाः । समीपस्थानुवाचेदं हनुमत्प्रमुखान् हरीन् ॥ २९ ॥
यदुक्तं कपिराजेन रावणावरजं प्रति । वाक्यं हेतुमदर्थ्यं च भवद्भिरपि तच्छ्रुतम् ॥ ३० ॥
सुहृदा ह्यर्थकृच्छ्रेषु युक्तं बुद्धिमता सता । समर्थेनापि सन्देष्टुं शाश्वतीं भूतिमिच्छता ॥ ३१ ॥

चेदुत्तरं वक्ष्याम इति तूष्णीं स्थित इत्याह--एवमुक्त्वेति ॥ २८ ॥ अथ शरणागतवत्सलो रामः सुग्रीवस्य संरम्भप्रतिक्षेपाय यत्किंचिद्व्याजमपेक्षमाणो विभीषणस्य विश्वासातिरेकेण किंचिद्विलम्बेऽपि भावं निवेदयतेति वदतस्तस्य तदन्तर्भावापेक्षां च सम्यगालोच्य प्रतिक्षेपकमुखेनैव तदानयनं कर्तुं कामो हनुमदादीनुवाचेत्याह--सुग्रीवस्येति । स्पष्टम् ॥२९॥ रामः सुग्रीववचनोपलालनपूर्वकमन्यानपि सचिवान् स्वं स्वं मतं पृच्छति–यदुक्तमित्यादि श्लोकद्वयेन । हेतुमत् युक्तियुक्तम् । अर्थ्यम् अर्थः प्रयोजनं तस्मादनपेतम् ॥ ३० ॥ सुहृदेति । न ह्येकेन सुहृदोपदिष्टे सत्यन्यैस्तूष्णीं स्यातव्यम् ।

शत्रूणां वासमागतः । अतर्कितः प्रवेशवेलायाम् अस्माञ्जिघांसयाऽयमागत इति तैरविचारितः । अत एव तेषां सैन्यं प्रविष्टः स्थितस्सन् कदाचिदन्तरं लब्ध्वा निहन्या दिति सम्बन्धः । प्रविष्टोऽप्ययमेकाकी कथं बहून् हनिष्यतीत्याशङ्क्य छिद्रे सति सत्सम्भवतीति दृष्टान्तमाह उलूक इति ॥ २५–२९ ॥ श्रीरामस्सुग्रीववचनो पलालनपूर्वकमन्यानपि सचिवान् स्वं स्वं मतं पृच्छति–यदुक्तमित्यादिश्लोकद्वयेन । हेतुमत् युक्तियुक्तम् । अर्थ्यम् अर्थः प्रयोजनम् तस्मादनपेतं वाक्यं भवद्भि रपि विश्रुतम् । अर्थकृच्छ्रेषु कार्यसङ्कटेषु बुद्धिमता समर्थेन श्रेयस्कामेन सुहृदा सुहृदन्तरेणापि सन्देष्टुमुपदेष्टुं युक्तमेव, अतो यूयमपि स्वं स्वं मतं ब्रूतेति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपि तु बुद्धिमता समर्थेन शाश्वतीं भूतिमिच्छता श्रेयस्कामेन सुहृदा सुहृदन्तरेणापि। अर्थकृच्छ्रेषु कार्यसङ्कटेषु । उपदेष्टुं युक्तमेव। अतो यूयमपि वदतेत्यर्थः ॥ ३१ ॥ इत्येवमिति। स्पष्टम् ॥ ३२ ॥ सोपचारप्रशंसावाक्यमेवाह–अज्ञातमिति। अत्र सर्वज्ञ इत्युक्ते प्रायिकत्वशङ्का स्यादिति तन्निवृत्त्यर्थं व्यतिरेकोक्तिः। त्रिषु लोकेषु कृतकमकृतकं कृतकाकृतकमित्युक्तेषु। आत्मानं सुहृत्तया सूचयन्नस्मान् पृच्छसीत्यन्वयः। अयं वानराणां सुहृदितीमां कीर्तिं लोके ख्यापयितुं तवायं प्रश्न इत्यर्थः। पूजयन्निति पाठे तु अस्मान् प्रत्येकं मानयन्नस्मान् पृच्छसीत्यर्थः। प्रत्येकं माननाभिप्रायेणैव

इत्येवं परिपृष्टास्ते स्वं स्व मतमतन्द्रिताः। सोपचारं तदा राममूचुर्हितचिकीर्षवः ॥ ३२ ॥
अज्ञातं नास्ति ते किञ्चित् त्रिषु लोकेषु राघव। आत्मानं सूचयन् जानन् पृच्छस्यस्मान् सुहृत्तया ॥ ३३ ॥
त्वं हि सत्यव्रतः शूरो धार्मिको दृढविक्रमः। परीक्ष्यकारी स्मृतिमान् निसृष्टात्मा सुहृत्सु च ॥ ३४ ॥

आत्मानमित्येकवचनप्रयोगः। यद्वा आत्मानम् आत्मस्वभावम्। जानन् राजनीतिमिति यावत्। पूजयन् पालयन्। यद्वा सुहृत्तया शोभनहृदयतया हेतुना आत्मानं स्वं पूजयन्। कार्यविचारेषु अस्मदपेक्षया स्वयमेव शोभनहृदय इति स्वप्रभावमभिव्यञ्जयितुमिति भावः। अस्मन्मतानि पूर्वपक्षीकृत्य स्वमतमेव सिद्धान्तयितुमिति भावः ॥ ३३ ॥ स्वपूजनार्थमस्मान् पृच्छसीत्यत्र हेतुमाह–त्वमिति। सत्यव्रतः शरणागतरक्षणव्रतस्य सापराधरावणादिष्वपि विफलीकर्तुमशक्यत्वात्। परीक्ष्यकारी सर्वज्ञः सन्नपि सम्यग्घेतुभिर्विमृश्याचरणशीलः। सुहृत्सु निसृष्टात्मा सुहृत्परतन्त्रीकृतात्मस्वरूपः। पूर्वश्लोके सुहृत्त्वमात्रमुक्तम्। अत्र तु सुहृत्परतन्त्रत्वमिति भेदः ॥ ३४ ॥

शेषः ॥ ३० ॥ ३१ ॥ सोपचारं सप्रशंसम् ॥ ३२ ॥ तदेवाह–अज्ञातमिति। त्रिषु लोकेष्विति सर्वलोकोपलक्षणम्। आत्मानं सुहृत्तया सूचयन् अस्मान् पृच्छसीत्यन्वयः। अयं वानराणां सुहृदितीमां कीर्तिं लोके ख्यापयितुं तवायं प्रश्न इत्यर्थः। पूजयन्निति पाठे तु–आत्मानम् अस्मान् प्रत्येकं पूजयन् मानयन् अस्मान् पृच्छसि। यद्वा आत्मानं पूजयन् जानन्निति स्वभावं परिपालयन् ॥ ३३ ॥ त्वं हि इति पदद्वयम् अखिलवानरगुणवैलक्षण्यं कथयति। शरणागतव्रतस्य सापराधरावणादिष्वपि विफलीकर्तुमशक्यत्वात्सत्यव्रतः शरणागतरक्षणधर्मनिष्ठान्वितः। परीक्ष्यकारी सर्वज्ञस्सन्नपि सम्यग्घेतुभिर्विमृश्याचरणशीलः। सुहृत्सु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्मादिति । तस्मात् भवत उक्तगुणत्वात् । तावत् क्रमेण । हेतुतः युक्तिभिः । ब्रुवन्तु ॥ ३५ ॥ सुग्रीवानन्तरमङ्गदस्य युवराजतया प्रधानत्वात् प्रथममङ्गदो जगादेत्याह–इत्युक्त इति । विभीषणपरीक्षार्थम्, तदुपायप्रतिपादकमिति शेषः ॥ ३६ ॥ शत्रोरिति । असौ शरणागतोऽपि शत्रोः सकाशात् प्राप्तत्वादनुकूलो नेति शङ्क्य एव । अतः सहसा परीक्षामन्तरेण विश्वासयोग्यो न कर्तव्यः किन्तु परीक्ष्य प्रवेष्टव्य इति सुग्रीव वचनाद्विशेषः ॥ ३७ ॥ विश्वासकरणे अनिष्टमाह–छादयित्वेति । शठबुद्धयः कुटिलबुद्धयः । आत्मभावं स्वाभिप्रायम् । छादयित्वा स्वाभिप्राय

तस्मादेकैकशस्तावत् ब्रुवन्तु सचिवास्तव । हेतुतो मतिसम्पन्नाः समर्थाश्च पुनः पुनः ॥३५॥ इत्युक्ते राघवायाथ मतिमानङ्गदोऽग्रतः । विभीषणपरीक्षार्थमुवाच वचनं हरिः ॥ ३६ ॥ शत्रोः सकाशात् सम्प्राप्तः सर्वथा शङ्क्य एव हि । विश्वासयोग्यः सहसा न कर्तव्यो विभीषणः ॥३७॥ छादयित्वाऽऽत्मभावं हि चरन्ति शठबुद्धयः । प्रहरन्ति च रन्ध्रेषु सोऽनर्थः सुमहान् भवेत् ॥ ३८ ॥ अर्थानर्थौ विनिश्चित्य व्यवसायं भजेत ह । गुणतः सङ्ग्रहं कुर्याद्दोषतस्तु विवर्जयेत् ॥३९॥ यदि दोषो महांस्तस्मिंस्त्यज्यतामविशङ्कितम् । गुणान् वापि बहून् ज्ञात्वा सङ्ग्रहः क्रियतां नृप ॥४०॥

सूचकेङ्गितादिकमपि स्थगयित्वेत्यर्थः । चरन्ति यावद्रन्ध्रलाभं स्वैरसञ्चारं कुर्वन्ति । रन्ध्रेषु अनवधानेषु सत्सु । प्रहरन्ति हिंसन्ति ॥ ३८ ॥ त्यागोपादानोपयुक्तं परीक्षाप्रकारमाह–अर्थानर्थाविति । अर्थानर्थौ गुणदोषौ विनिश्चित्य कस्मिंश्चित्कर्मणि नियोगेन निश्चित्य व्यवसायं त्यागसङ्ग्रहोचिताध्यवसायं भजेत । तत्र गुणतः गुणनिश्चयेन सङ्ग्रहम् अङ्गीकारं कुर्यात् । दोषतः दोषनिश्चयेन तु विसर्जयेत् ॥ ३९ ॥ ननु सर्वात्मना गुणी दोषी वा दुर्लभः अतः कथं सङ्ग्रहत्यागव्यवस्थितिरित्यत्राह–यदीति । तस्मिन् विभीषणे महान् दोषो यदि स्यात् तदा असौ अविशङ्कितम् अविशङ्कं त्यज्यताम् ।

निसृष्टात्मा सुहृन्निवेशितान्तःकरणः । सुहृदधीनमनस्क इत्यर्थः ॥ ३४ ॥ हेतुतः हेतुगर्भितं स्वं स्वं मतं ब्रुवन्तु ॥ ३५ ॥ इत्युक्त इत्यादि श्लोकपञ्चकमेकं वाक्यम् । इत्युक्त इति, सचिवैरिति शेषः । विभीषणपरीक्षा अर्थः प्रयोजनं यस्य तत् ॥ ३६॥३७॥ शीघ्रं विश्वासानर्हत्वे हेतुमाह–छादयित्वेति । सोऽनर्थस्सुमहान् भवेदिति ॥३८ ॥ अतः कस्मिंश्चित्कर्मणि एनं नियुज्य तत्रास्य गुणदोषौ परीक्ष्य पश्चात्सङ्ग्रहः परित्यागो वा क्रियतामित्याह–अर्थानर्थाविति । अर्थानर्थौ गुणदोषौ । व्यवसायं सङ्ग्रहविसर्जनाध्यवसायं भजेत । ततः गुणतः गुणे सति सङ्ग्रहं कुर्यात् । दोषतः दोषे सति विसर्जयेदिति सम्बन्धः ॥ ३९ ॥ उभयोरपि सद्भावे तु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बहून् गुणान् ज्ञात्वा सङ्ग्रहः क्रियतां वा । स्वल्पदोषवत्त्वेऽपि बहुगुणो ग्राह्यः । स्वल्पगुणवत्त्वेऽपि बहुदोषस्त्याज्य इति भावः ॥ ४० ॥ विनियोगं विना गुणदोषपरिज्ञानं न सम्भवति, सहसा विनियोगे च मन्त्रहानिः स्यादिति पूर्वास्वरसाच्छरभ आह–शरभस्त्विति । तुशब्दः पूर्वस्माद्वैलक्षण्यपरः । साद्व्यं साध्यार्थकम् । अनेनाङ्गदपक्षस्यासाध्यार्थत्वं द्योतितम् । अस्मिन् विभीषणविषये । प्रतिविधीयतां प्रेष्यताम् ॥ ४१ ॥ प्रणिधायेति । प्रणिधाय चारं

शरभस्त्वथ निश्चित्य साद्व्यं वचनमब्रवीत् । क्षिप्रमस्मिन्नरव्याघ्र चारः प्रतिविधीयताम् ॥ ४१ ॥
प्रणिधाय हि चारेण यथावत् सूक्ष्मबुद्धिना । परीक्ष्य च ततः कार्यो यथान्याय्यं परिग्रहः ॥ ४२ ॥
जाम्बवांस्त्वथ सम्प्रेक्ष्य शास्त्रबुद्ध्या विचक्षणः । वाक्यं विज्ञापयामास गुणवद्दोषवर्जितम् ॥ ४३ ॥
बद्धवैराच्च पापाच्च राक्षसेन्द्राद् विभीषणः । अदेशकाले सम्प्राप्तः सर्वथा शङ्क्यतामयम् ॥ ४४ ॥
ततो मैन्दस्तु सम्प्रेक्ष्य नयापनयकोविदः । वाक्यं वचनसम्पन्नो बभाषे हेतुमत्तरम् ॥ ४५ ॥

प्रेषयित्वा । सूक्ष्मबुद्धिना चारेण यथावन्नीतिशास्त्रोक्तरीत्या परीक्ष्य ततो यथान्याय्यं न्यायादनपेतं न्याय्यं निर्णीतार्थमनतिक्रम्य । परिग्रहः विभीषणपरिग्रहः कार्यः ॥४२॥ नियोगेन चारेण वा नायं परीक्ष्यः अविस्रम्भहेतूनां बहूनां सम्भवादिति जाम्बवान् पक्षान्तरमुपक्षिपति–जाम्बवानिति । गुणवत् युक्तिमत् । दोषवर्जितम् अनपायमिति पूर्वोक्तमतद्वयव्यावृत्तिः ॥ ४३ ॥ बद्धेति । बद्धवैरात् दृढवैरात् । पापात् पापकर्मणः । अदेशे दूरतया साम्प्रतिकभयाभावेन आगमनप्रयोजनरहिते । अकाले स्वामिपरित्यागानर्हकाले ॥ ४४ ॥ सर्वथा शङ्क्यत्वेऽपि सुकरोपायेन गुणदोषपरीक्षाया अकरणे सुखोपनतमित्रहानिः स्यादिति मैन्दो मतान्तरमाह–तत इति । हेतुमत्तरम् अतिशयेन हेतुयुक्तम् ॥ ४५ ॥

तयोर्भूयस्त्वाल्पत्वे परीक्ष्य परित्यागसङ्ग्रहौ कार्यावित्याह–यदि दोष इति ॥ ४० ॥ अथ शरभः, तिष्ठतु नियोगः इदानीमेव चारमुखेन गुणदोषौ परीक्ष्य सङ्ग्रहः परित्यागो वा कर्तव्य इत्याह–शरभस्त्विति श्लोकद्वयमेकं वाक्यम् । अत्र तुशब्दः अङ्गदमताद्वैषम्यं द्योतयति । साध्यं कर्तव्यार्थपरं वचनम् ॥ ४१ ॥ प्रणिधायेति । प्रणिधाय चारं प्रेषयित्वा सूक्ष्मबुद्धिना चारेण यथावत्परीक्ष्य च ततः यथान्याय्यं परिग्रहः कार्यो हीति योजना ॥ ४२ ॥ अथ जाम्बवान् किमस्मिन् परीक्षया अविश्वासे बहुसम्भवात्परित्याज्य एवेत्याह–जाम्बवानित्यादिश्लोकद्वयेन । पापात् पापकर्मणः । अदेशकाले अदेशे शत्रुसमीपदेशे अकाले रात्रौ । यद्वा अकाले स्वामिपरित्यागानर्हकाले ॥ ४३ ॥ ४४ ॥ अथ मैन्दः शङ्कनीयत्वमभ्युपगम्यैव गुणदोषपरीक्षायामुपायान्तरमाह–ततो मैन्द इत्यादिश्लोकत्रयेण । हेतुमत्तरम्

For Private And Personal Use Only

वचनमिति । मधुरेण वचसा रावणस्य वचनमयं विभीषणः शनैः पृच्छ्यतामिति सम्बन्धः । पृच्छ्यतामित्यत्र अज्ञातपुरुषमुखेनेति शेषः । उत्तरत्र तथैव हनुमताऽनुवादात् ॥४६॥ एवंविधपरीक्षणेनास्य तत्त्वतो भावं विज्ञाय यदि दुष्टः तदा तदनुरूपम् अदुष्टश्चेत्तदनुरूपं च बुद्धिपूर्वं परीक्षापूर्वकं करिष्यसीत्यर्थः ॥ ४७ ॥ एवं सुग्रीवेणेदानीं वध्यत्वं प्रतिपादितम् । अङ्गदादिभिस्तु गुणदोषपरीक्षापूर्वकं परिग्रहपरित्यागौ सिद्धान्तितौ । अथ सचिवोत्तमो हनुमान् सुग्रीवमतं राजमतत्वादत्यन्ताविचारमूलत्वाच्चोपेक्ष्य अङ्गदादिमतमेकैकानुवादपूर्वकं दूषयित्वा इदानीमेव दोषाभावस्य निर्णेतुं

वचनं नाम तस्यैष रावणस्य विभीषणः । पृच्छ्यतां मधुरेणायं शनैर्नरवरेश्वर ॥ ४६ ॥ भावमस्य तु विज्ञाय तत स्तत्त्वं करिष्यसि । यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ ॥४७॥ अथ संस्कारसम्पन्नो हनूमान् सचिवोत्तमः । उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु ॥४८॥ न भवन्तं मतिश्रेष्ठं समर्थं वदतां वरम् । अतिशाययितुं शक्तो बृहस्पतिरपि ब्रुवन् ॥४९॥ न वादान्नापि सङ्घर्षान्नाधिक्यान्न च कामतः । वक्ष्यामि वचनं राजन् यथार्थं राम गौरवात् ॥५०॥

शक्यत्वात् सहसैव परिग्राह्य इति सिद्धान्तयति सर्गशेषेण—अथेति । संस्कारसम्पन्नः शास्त्राभ्यासदृढतरसंस्कारयुक्तः । लघु अविस्तृतम् ॥४८॥ भवतः उपदेशार्थं न मम प्रवृत्तिः भवतः सर्वप्रकारोत्कृष्टत्वात् केनाप्याकारेणातिशयितस्य कस्यचिदभावादित्याह—न भवन्तमिति । स्पष्टम् ॥ ४९ ॥ वादात्

अतिशयेन युक्तियुक्तम् ॥४९॥ मधुरेण वचसा रावणस्य रावणसम्बन्धि वचनम् अयं विभीषणः शनैः पृच्छ्यतां रावणवृत्तान्तं गूढपुरुषमुखेन पृच्छ्यतामित्यर्थः । उपरि हनुमता मैन्दमतदूषणप्रस्तावे अज्ञातपुरुषैरित्यनुवादात ॥ ४६ ॥ भावमिति । एवंविधपरीक्षणेन अस्य तत्त्वं यथार्थं भावमभिप्रायं विज्ञाय यदि दुष्टस्तदा तदनुरूपम्, अदुष्टश्चेत तदनुरूपं च बुद्धिपूर्वं परीक्षापूर्वकं यत्कर्तव्यं तत्करिष्यसीति सम्बन्धः ॥ ४७ ॥ एवञ्च सुग्रीवेणेदानीमेव वध्यत्वं प्रतिपादितम् । अङ्गदादिभिस्तु गुणदोषपरीक्षापूर्वकं परिग्रहपरित्यागौ समर्थितौ । अथ सचिवोत्तमो हनुमान् सुग्रीवमतं राजवचनत्वादत्यन्ताविचारमूलत्वाच्चोपेक्ष्याङ्गदादिमतमेकैकानुवादपूर्वकं दूषयित्वेदानीमेव तद्दोषाभावस्य निर्णेतुं शक्यत्वादविलम्बेनास्य परिग्रहो युक्त इति स्वसिद्धान्तमाह—अथेत्यादिसर्गशेषेण । संस्कारसम्पन्नः सकलशास्त्राभ्यासजनितसंस्कारयुक्तः । समर्थं विवक्षितार्थप्रतिपादनशक्तम् । मधुरं श्रवणमात्रेण सुखकरम् । लघु नातिविस्तरं वचनमुवाचेति सम्बन्धः ॥ ४८ ॥ न भवन्तमिति । ब्रुवन् बृहस्पतिरपि मतिश्रेष्ठं समर्थं भवन्तम् अतिशाययितुम् अतिशयितुं न शक्त इत्युवाचेति पूर्वेण सम्बन्धः ॥ ४९ ॥ साध्यात्मतर्ककौशलादिमदर्शनार्थं न मद्वचनप्रवृत्तिरित्याह—न वादादिति । वादात् तर्ककौशलात् । सङ्घर्षात् सचिवेषु स्पर्धावशात् । आधिक्यादहं धीमान् नीतिमान् वाग्मी च ॥ ५२ ॥

तर्ककौशलात् । सङ्घर्षात् सचिवेषु स्पर्धावशात् । आधिक्यात् अहं मतिमान् वाग्मी चेत्याधिक्याभिमानात् । कामतः स्वैरभाषणेच्छातः, विभीषण पक्षपाताद्वा । तर्हि किमर्थं प्रवृत्तिस्तत्राह—गौरवादिति । मयि त्वत्कृतात्सम्मानात् ॥५०॥ पूर्वोक्तेषु चतुर्षु मतेषु प्रथममङ्गदमतं दूषयति—अर्थानर्थेति । अर्थानर्थयोर्निमित्तं निर्णयोपायः । सचिवैः अङ्गदेन, तादात्विकसंरम्भपरिहाराय नामानुक्तिर्बहुवचनं च, यदुक्तं तत्र दोषं प्रपश्यामि । कुतः ? क्रिया एवं

अर्थानर्थनिमित्तं हि यदुक्तं सचिवैस्तव । तत्र दोषं प्रपश्यामि क्रिया न ह्युपपद्यते ॥ ५१ ॥
ऋते नियोगात् सामर्थ्यमवबोद्धुं न शक्यते । सहसा विनियोगो हि दोषवान् प्रति भाति मा ॥ ५२ ॥
चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव । अर्थस्यासम्भवात्तत्र कारणं नोपपद्यते ॥ ५३ ॥

प्रकारेण क्रिया नोपपद्यते हि ॥ ५१ ॥ अनुपपत्तिमेव दर्शयति—ऋत इति । नियोगाद्राजकार्येषु नियोगात् । ऋते विना । " अन्यारादितरर्ते—" इत्यादिना पञ्चमी । सामर्थ्यं साधुत्वम् । सहसा विनियोगः गुणदोषपरीक्षामन्तरेण कुत्रचिन्महति राजकार्ये विनियोजनम् । मा मां प्रति । दोषवान् भाति । तथा च सत्यां गुणदोषपरीक्षायां नियोगः, नियोगे सति गुणदोषपरीक्षणमित्यन्योन्याश्रयः । अतोऽनुपपन्नमङ्गदमतमिति भावः ॥५२॥ अथ शरभमतं प्रयोजनाभावेन खण्डयति—चारेति । अत्रेतिशब्दोऽध्याहर्तव्यः । चारप्रणिहितं चारप्रणिधानं युक्तमिति तव सचिवैर्यदुक्तम्, शरभेण यदुक्तमित्यर्थः । तत्र तस्मिन्मते । अर्थस्य चारप्रयोजनस्य दूरतिरोहितदर्शनादेरसम्भवात् चारप्रणिधानलक्षणं कारणम् उपायः, न युज्यत इत्यर्थः । अत्यासन्ने

इत्याधिक्याभिमानात् । कामतः स्वैरभाषणेच्छातः । तर्हि किमर्थं प्रवृत्तिः ? तत्राह गौरवात् कार्यगौरवाद्धेतोः । यद्वा त्वत्कृतात्सम्मानात् ॥ ५० ॥ तत्र प्रथममङ्गदमतं दूषयति—अर्थेति । अर्थानर्थनिमित्तं विभीषणगुणदोषनिश्चयनिमित्तम् । सचिवैः अङ्गदेन यदुक्तं तत्र तस्मिन्नर्थे दोषं प्रपश्यामि । कुतः क्रिया पूर्वोक्तप्रकारेण परीक्षणक्रिया तदिदानीं नोपपद्यते हि ॥ ५१ ॥ अनुपपत्तिमेवाह—ऋते नियोगादिति । नियोगात्कस्मिंश्चित्कर्मणि नियोजनात् ऋते । सामर्थ्यं सद्गुणवत्त्वम् अवबोद्धुं न शक्यते । अस्तु विनियोगः का हानिरित्यत आह सहसा विनियोगः गुणदोषावपरीक्ष्य महत्सु कार्येषु विनियोगः मा मां प्रति । दोषवान् प्रतिभाति । ततश्च गुणदोषपरीक्षायां सत्यां नियोगः । नियोगे च सति गुणदोषपरीक्षणमित्यन्योन्याश्रयदोषग्रस्तमिदं मतमिति भावः ॥ ५२ ॥ शरभमतं प्रयोजनाभावेन दूषयति—चारेति । चारप्रणिहितं चारप्रेषणं युक्तमिति तव सचिवैः शरभेण यदुक्तम् तत्र तस्मिन्मते तु अर्थस्य चारकर्तव्यप्रयोजनस्यासम्भवात् कारणं चारप्रणिधानलक्षणोपायो नोपपद्यते चारप्रेषणस्य दूरतिरोहितविषयत्वात्परिदृश्यमाने विभीषणे तन्न युक्तमिति भावः । चारणं नोपपद्यते इति पाठे तु—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वचक्षुर्विषये सम्यक्परिदृश्यमाने व्यवधानरहिते नभस्स्थलावस्थायिनि चास्मिन् पररन्ध्रादितत्त्वदर्शनलक्षणचारप्रयोजनाभावादयमुपायो न युज्यत इति भावः। चारणं नोपपद्यत इति पाठे तु–चारयितव्यस्यान्तःपुरसमाजतीर्थादिरूपस्य विषयस्याभावाच्चारसञ्चारणं न घटत इत्यर्थः ॥५३॥ अदेशकाले संप्राप्त इत्यस्य जाम्बवन्मतस्यासारत्वात्तन्निराकरणेन सर्वं निराकृतप्रायमिति तत्स्वरूपासिद्ध्या दूषयति–अदेशेति सार्धश्लोक एकान्वयः। अयं विभीषणः। अदेशकाले संप्राप्त इति यत्। तत्र तद्विषये। यथातथा याथातथ्येन। स एष देशः कालश्च भवतीति मे यथामति इयं विवक्षाऽस्ति तां

अदेशकाले सम्प्राप्त इत्ययं यद्विभीषणः। विवक्षा तत्र मेऽस्तीयं तां निबोध यथामति। स एष देशः कालश्च भवतीति यथातथा ॥ ५४ ॥ पुरुषात् पुरुषं प्राप्य तथा दोषगुणावपि। दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि। युक्तमागमनं तस्य सदृशं तस्य बुद्धितः ॥ ५५ ॥ अज्ञातरूपैः पुरुषैः स राजन् पृच्छ्यतामिति। यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता ॥ ५६ ॥

निबोधेत्यन्वयः ॥ ५४ ॥ विवक्षितमेव सोपपत्तिकं विशदयति–पुरुषादित्यादिसार्धश्लोकेन। पुरुषात् अधमपुरुषाद्रावणात्। पुरुषम् उत्तमपुरुषं भवन्तम्। प्राप्य मनसा विमृश्य। तथा दोषगुणावपि युवयोर्विमृश्य। तथा रावणे दौरात्म्यं राक्षसकुलविनाशहेतुभूतसीतापहरणतत्प्रत्यर्पणानपेक्षित्वादिकम्। त्वयि विक्रमं खरदूषणप्रमुखराक्षसवधादिकम्, वालिवधपूर्वकसुग्रीवराज्यप्रदानम्, अतिदुस्तरसमुद्रतरणोद्योगं च दृष्ट्वा। तस्य बुद्धितः बुद्धेः सदृशं तस्य आगमनं युक्तमिति सम्बन्धः। यदा प्रतिकूले दोषदर्शनमनुकूले गुणज्ञानं च स एव देशः कालश्च भवति। इदं तथ्यमिति भावः ॥ ५५ ॥ मैन्दमतं प्रतिक्षिपति श्लोकत्रयेण–अज्ञातेति। अज्ञातरूपैः अपरिचितस्वरूपस्वभावैः। समीक्षिता सम्यक्परीक्षिता। प्रेक्षा

चारणं चारभेषणम् ॥५३॥ जाम्बवतोक्तं शङ्कनीयत्वविषयम् अदेशकालागतत्वहेतुं स्वरूपासिद्ध्या दूषयति--अदेशकाल इत्यादिना। अयं विभीषणः अदेशकाले सम्प्राप्त इति यत् तत्र तद्विषये यथातथा याथार्थ्येन स एष देशः कालश्च भवतीति मे यथामति इयं विवक्षा अस्ति तां निबोधेति सम्बन्धः ॥ ५४ ॥ विवक्षितमेव सोपपत्तिकं विशदयति–पुरुषादिति। पुरुषादधमपुरुषाद्रावणात्। पुरुषम् उत्तमपुरुषं भवन्तं प्राप्य मनसा विमृश्य तथा उभयोः दोषगुणावपि विमृश्य दौरात्म्यं सीताप्रत्यर्पणाभावादिलक्षणं रावणे दृष्ट्वा विक्रमं च तथा त्वयि कबन्धखरदूषणप्रमुखराक्षसवधादिकम् अतिबलपराक्रमवालिवधपूर्वकसुग्रीवराज्यस्थापनम् अतिदुस्तरसागरतरणोद्योगं च त्वयि दृष्ट्वा ज्ञात्वा तस्य बुद्धितः बुद्धिसदृशं तस्यागमनं युक्तमिति योजना ॥ ५५ ॥ चारभेषणं मित्रामित्रविषये ॥ ५३ ॥

For Private And Personal Use Only

युक्तिरूपा बुद्धिः ॥ ५६ ॥ क्वचिद्गुणवत्यपि मित्रे दोषदृष्टिहेतुत्वेनानैकान्तोऽयं गुणदोषनिर्णयोपाय इत्याह–पृच्छ्यमान इति । बुद्धिमानपि पुमान् अपरिचितैः पृच्छ्यमानः सन् अविश्वासादेवैते पृच्छन्ति कस्मिन् वचस्युक्ते को वाऽनर्थः समापद्यत इति प्रतिवचनरूपं वच उद्दिश्य सहसा विविधां शङ्कां प्राप्नुयात् । तथा सति सुखागतं स्वस्मिन्दोषराहित्येन विश्वासोपगतमपि मित्रं मिथ्या पृष्टं सत् तेन प्रश्नेन हेतुना प्रदुष्येत दुष्टं भवेदित्यर्थः ॥ ५७ ॥ क्वचिन्निष्प्रयोजनश्चायमुपाय इत्याह--अशक्य इति । भृशम् अत्यर्थम् । स्वस्मिन्नैपुण्यं पश्यतापि मिथ्या प्रश्न अन्तःस्वभावैः अन्तर्हित

पृच्छ्यमानो विशङ्केत सहसा बुद्धिमान् वचः । तत्र मित्रं प्रदुष्येत मिथ्या पृष्टं सुखागतम् ॥ ५७ ॥
अशक्यः सहसा राजन् भावो वेत्तुं परस्य वै । अन्तःस्वभावैर्गीतैस्तैर्नैपुण्यं पश्यता भृशम् ॥ ५८ ॥
न त्वस्य ब्रुवतो जातु लक्ष्यते दुष्टभावता । प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः ॥ ५९ ॥

स्वाभिप्रायैः । परस्य गीतैः भाषितैः । पराभिप्रायः सहसा ज्ञातुमशक्य इत्यर्थः । छद्मना प्रष्टुर्गूढमभिप्रायं ज्ञात्वा । अहृदयवाचामहृदया एव प्रतिवाचो भवन्तीति न्यायेन परेणापि स्वाभिप्रायानाविष्करणादिति भावः ॥ ५८ ॥ एवं पूर्वोक्तेषु पक्षेषु दोषानुद्भाव्य सम्प्रत्यात्मना परीक्ष्यकक्षीकृतं पक्ष

अकिञ्चित्करम्, मित्रस्य शङ्काजनकत्वात् । अमित्रस्य शठत्वेन तदभिप्रायादर्शनाच्च । अतो मैन्दमतं दुष्टमित्यनूद्य निराकरोति--अज्ञातरूपैरित्यादिश्लोकत्रयेण । अज्ञातरूपैः अपरिचितस्वरूपस्वभावैः स विभीषणः पृच्छ्यतामिति मैन्देन यदुक्तम् अत्र अस्मिन्मते समीक्षिता सम्यक् परीक्षिता प्रेक्षाबुद्धिर्युक्तिर्वा काचिदस्ति ॥ ५६ ॥ का पुनस्तद्बुद्धिरित्यत आह--पृच्छ्यमान इति । बुद्धिमानपि पुमानपरिचितैः पृच्छ्यमानस्सन् विशङ्केत अविश्वासादेते मां पृच्छन्ति कस्मिन् वचस्युक्ते को वाऽनर्थस्समापतेदिति प्रतिवचनरूपं वचनमुद्दिश्य सहसा विविधां शङ्कां प्राप्नुयात् तथा सति सुखागतं स्वस्मिन् दोषराहित्येन विश्वासोपगतम् अयत्नलब्धं मित्रं मिथ्यापृष्टं छद्मना पृष्टं सत् तेन प्रश्नेन हेतुना प्रदुष्येत दुष्टं भवेत् । छद्मना प्रश्ने कृते मित्रहानिर्भवेदित्यर्थः ॥ ५७ ॥ किञ्चिन्निष्प्रयोजनश्चायमुपाय इत्याह--अशक्य इति । भृशमत्यर्थं स्वस्मिन्नैपुण्यं पश्यता निपुणत्वं जानता, नैपुण्यं मन्यतेत्यर्थः । अन्तस्स्वभावैः आपाततः प्रसन्नार्थत्वेऽपि गूढाभिप्रायैः गीतैः प्रश्नरूपभाषितैः परस्य भावः अभिप्रायः सहसा वेत्तुं न शक्यः । छद्मना प्रष्टुः गूढमभिप्रायं ज्ञात्वा अहृदयवाचामहृदया एव प्रतिवाचो भवन्तीति न्यायेन परेणापि स्वाभिप्रायानाविष्करणादिति भावः ॥ ५८ ॥ एवं मतान्तराणि निराकृत्य इङ्गिताकारभाषणचेष्टितरूपैरुपपत्तिभिरस्य निर्दुष्टता ज्ञातुं शक्या, अतोऽयं विभीषणो ग्राह्य एवेत्याह–न त्वस्येत्यादिना । संशयः दुष्टभावत्वसंशयः ॥ ५९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुपक्षिपति—न त्वित्यादिना। ब्रुवतो बहुव्याहरतोऽस्य ॥ ५९ ॥ एवमस्योङ्गिताकाराभ्यामदुष्टत्वमुक्त्वा चेष्टाभाषणाभ्यां च तद्दर्शयति—अशङ्कितेति। शठः गूढविप्रियकारी ॥ ६० ॥ ननु परमवञ्चकः पुरुषो भावं निगूहयति, कथं तेन विश्वास इत्यत्राह—आकार इति। आकारः मुखविकारः ॥ ६१ ॥ एवं दोषाभावमुक्त्वा गुणमुचितज्ञत्वरूपं दर्शयितुं नीतिमर्यादां दर्शयति—देशेति। देशकालोपपन्नं देशकालाभ्यां युक्तम् प्रयोगेण उचितपुरुषप्रयोगेण

अशङ्कितमतिः स्वस्थो न शठः परिसर्पति। न चास्य दुष्टा वाक्चापि तस्मान्नास्तीह संशयः ॥ ६० ॥ आकारश्छाद्यमानोऽपि न शक्यो विनिगूहितुम्। बलाद्धि विवृणोत्येव भावमन्तर्गतं नृणाम् ॥ ६१ ॥ देशकालोपपन्नं च कार्यं कार्यविदां वर। स्वफलं कुरुते क्षिप्रं प्रयोगेणाभिसंहितम् ॥ ६२ ॥ उद्योगं तव सम्प्रेक्ष्य मिथ्यावृत्तं च रावणम्। वालिनश्च वधं श्रुत्वा सुग्रीवं चाभिषेचितम्। राज्यं प्रार्थयमानश्च बुद्धिपूर्वमिहागतः ॥ ६३ ॥ एतावत्तु पुरस्कृत्य युज्यते तत्र सङ्ग्रहः। यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति। त्वं प्रमाणं तु शेषस्य श्रुत्वा बुद्धिमतां वर ॥ ६४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तदशः सर्गः ॥ १७ ॥

अभिसंहितं युक्तम्। उचितेषु देशकालपुरुषेषु प्रयुक्तमित्यर्थः। कार्यं क्रिया। स्वफलं स्वोचितफलम्। क्षिप्रम् अप्रतिबन्धम्। कुरुते, कर्तरीति शेषः ॥ ६२ ॥ एतेनाप्येवमेव कार्यं प्रयुक्तमित्याशयेनाह—उद्योगमिति सार्धश्लोक एकान्वयः ॥ ६३ ॥ फलितमाह—एतावदिति सार्धश्लोकेन। स्ववचनं

किञ्च शठः अशङ्कितमतिः स्वस्थः निर्भयस्सन् न परिसर्पति नागच्छति अयमशङ्कितमतिः स्वस्थः आगच्छति। अतः शठो न भवतीत्यर्थः। किञ्च अस्य वागपि दुष्टा न तस्मादिह विभीषणे संशयो नास्तीत्यर्थः ॥ ६० ॥ दुष्टस्याप्येतादृशधर्मस्स्वाकारगोपनेन सम्भवतीत्याशङ्क्य तत्र घटत इत्याह—आकार इति। सः आकारः भावं विवृणोतीति सम्बन्धः ॥ ६१ ॥ यद्ययमदुष्टः अस्यां वेलायामत्रागमने किमस्य प्रयोजनमित्याशङ्क्य देशकालौचित्यं ज्ञात्वा अयमागत इति वक्तुं सामान्येन नीतिमाह—देशकालेति। देशकालोपपन्नं देशकालाभ्यां युक्तम्। प्रयोगेणाभिसंहितं सम्यगनुष्ठानेनाभिसम्पादितम्। कार्यं क्रियत इति कार्यं कर्म कर्तृ, स्वफलं स्वस्य फलम् क्षिप्रं कुरुते, कर्तुरिति शेषः ॥ ६२ ॥ उद्योगमित्यादि सार्धमेकं वाक्यम् ॥ ६३ ॥ अतो निर्दोषत्वादयं परिग्राह्य इत्याह—एताव

स०—प्रयोगेणाभिसंहितम् प्रयोगेण प्रकृष्टयोगेनोपायेन दैवरूपेणाभिसंहितं सम्बद्धम्। यद्वा प्रयोगोऽनुष्ठानम्। स्वात्मानमेव सफलं कुरुत इति वा। क्षिप्रं प्रयोगेणाभिसंहितम् अदीर्घसमीक्षया कृतं कर्तारं सफलं सविशरणम्। नष्टमिति यावत्। देशकालोपपन्नं च कार्यं सफलं कुरुते विभीषणकार्यं च देशकालोपपन्नमिति सफलमेवेति भावः ॥ ६२ ॥ तवोद्योगं रावणमारणविषयम्। मिथ्यावृत्तम् असदाचारम्। वालिनः रावणादपि बलिनः निष्कम्पप्रवृत्तावयं हेतुः। राज्यं रावणसाम्राज्यम्। ज्येष्ठमारणकनिष्ठाभिषेचनयोः सुग्रीवनिदर्शनेन निश्चित्य रावणमारणस्वस्थापनार्थमयमायात इति नाचातुरी तस्येति भावः ॥ ६३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निगमयति—यथाशक्तीति । यथाशक्ति बुद्धिशक्तिमनतिक्रम्य । आर्जवं निर्दोषत्वम् । मद्वाक्यं श्रुत्वा यत्कर्तव्यमकर्तव्यं वा तस्य सर्वस्य त्वं तु त्वमेव प्रमाणं प्रमातेत्यर्थः ॥ ६४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशः सर्गः ॥ १७ ॥ एवं सुग्रीवादिभिः स्वस्वमते प्रतिपादिते स्वाभिमतमपि रामो वक्तुं प्रारभते—अथेति । वायुसुतस्य, वचनमिति शेषः । प्रसन्नात्मा सुग्रीवादिवाक्यैः कलुषीकृते मनसि सति हनुमद्वाक्येन प्रसन्नमनाः । दुर्धर्षः पूर्वपक्षैरक्षोभ्यः । तत्र हेतुमाह श्रुतवानिति । वसिष्ठादिभ्यः श्रुतकपोतकण्डूपाख्यानादिमान् ।

अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह । प्रत्यभाषत दुर्धर्षः श्रुतवानात्मनि स्थितम् ॥ १ ॥
ममापि तु विवक्षाऽस्ति काचित्प्रति विभीषणम् । श्रोतुमिच्छामि तत्सर्वं भवद्भिः श्रेयसि स्थितैः ॥ २ ॥
मित्रभावेन सम्प्राप्तं न त्यजेयं कथंचन । दोषो यद्यपि तस्य स्यात् सतामेतदगर्हितम् ॥ ३ ॥

आत्मनि स्थितं चित्तावस्थितम् ॥ १ ॥ सर्वमतप्रतिक्षेपरूपेण स्ववाक्येन किमेते व्याकुलितमनसो भवेयुरिति शङ्कया रामः सचिवानुपच्छन्दयति—ममापीति । तुशब्दः पक्षान्तरवद्धनुमत्पक्षमपि व्यावर्तयति । ममापि विभीषणं प्रति काचिद्युष्मत्पक्षैः सह परिगणनायोग्या विवक्षा अस्ति । अतः तत्सर्वं मद्विवक्षितं हेतुसाध्यरूपं सर्वमर्थजातम् । श्रेयसि स्थितैः अस्मच्छ्रेयोनिरतैः । भवद्भिः युष्माभिः । श्रोतुमिच्छामि, भवद्भिः श्रुत्वा परीक्षणं कार्यमिति ममेच्छास्तीत्यर्थः ॥२॥ एवं सचिवाननुगुणीकृत्य स्वस्वभावकथनव्याजेन स्वविवक्षितं सहेतुकं दर्शयति—मित्रभावेनेति । मतान्तरेषु सदोषत्वान्न परिग्राह्यत्विति । एतावत्तु पुरस्कृत्य पूर्वोक्तधर्मजातं पुरस्कृत्य । स्ववचनं निगमयति यथाशक्तीति । आर्जवं निर्दोषत्वम् । मद्वाक्यं श्रुत्वा यत्कर्तव्यं त्वया तस्य सर्वस्य त्वमेव प्रमाणं परिच्छेत्ता ॥ ६४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तदशः सर्गः ॥ १७ ॥ अथ श्रीरामः सुग्रीववाक्यजनिते मनःकालुष्ये हनुमद्वाक्यैः किञ्चित्प्रशमिते सति प्रसन्नचित्तः स्वमतं वक्तुमुपक्रमते—अथेति । वायुसुतस्य, वचनमिति शेषः । श्रुतवान् सामान्यविशेषशास्त्रज्ञः । आत्मनि स्थितं स्वमतम् ॥ १ ॥ अथ सर्वमतप्रतिक्षेपरूपेण स्ववाक्येनेतरे व्याकुलितमनसो भवेयुरिति शङ्कया रामः सचिवानुपलालयति—ममापीति । ममापि विभीषणं प्रति काचिद्युष्मत्पक्षैस्सह परिगणनायोग्या विवक्षाऽस्ति, तत्सर्वं मद्विवक्षितहेतुसाध्यादिरूपमर्थजातं श्रेयसि स्थितैरस्मच्छ्रेयोनिरतैः भवद्भिः श्रोतुमिच्छामि, मन्मतमपि श्रुत्वा भवद्भिः परीक्षणं कार्यमिति ममेच्छाऽस्तीत्यर्थः ॥ २ ॥ एवं सचिवानुपलाल्य स्वकीयस्वभाव

स०—अयं हनुमदुक्तप्रकारेण निर्दोष एव यद्यपि । यदि तस्य दोषः त्यागहेतुस्स्यात्तर्हि तस्यैव दोषः वधरूपः स्यात् नास्माकं कश्चन । यद्यपि तस्य दोषः स्यात्तथापि न त्यजेयमिति वा ॥ ३ ॥

For Private And Personal Use Only

इति हेतुसाध्ये अपि दुष्टे। मारुतिमते तु परिग्राह्यत्वरूपे साध्ये समीचीनेऽपि निर्दोषत्वादिति हेतुरसमीचीनः । किंतु शरणागतोऽहमिति वाक्यप्रयोक्तृत्वमेव तत्र मुख्यहेतुरित्यभिप्रायेण मित्रभावेनेति हेतुनिर्देशः । मित्रभावेन वास्तवमित्रत्वाभावेऽपि मित्रत्वाभिनयमात्रेणापीत्यर्थः । मित्रभावः शरणागतत्वम् । " राघवं शरणं गतः " " शरण्यं शरणं गतः " इति पूर्वोत्तरत्र च तस्यैव कथनात् । अन्यत्रापि–" विदितः स हि धर्मज्ञः शरणागतवत्सलः " इति शरणागतिशब्देनोपक्रम्य " तेन मैत्री भवतु ते यदि जीवितुमिच्छसि " इति मैत्रीशब्देन परिसमापनात् । यद्वा मित्रशब्दः स्वाभिप्रायेण शरणागते गौरवारोपाद्युज्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्राविणः परित्यागे शक्तिसम्भावनामपि न पश्यामीत्यर्थः । कथंचन दृष्टादृष्टानर्थशतानुबन्धित्वे तत्परिग्रहस्य सुहृदामनभिमतत्वे मत्प्राणपरित्यागे प्रस्तुतेऽपीत्यर्थः । दोषो यद्यपि तस्य स्यात् यद्यपि सुग्रीवादिभिरुक्ता दोषा नास्मिन् सन्ति, सन्तु वा ततोऽपि भूयांसः । अथाप्यशक्यमहं कथं करोमीत्यर्थः । स्याच्छब्दः दुष्टोऽपि शरणागतशब्दप्रयोक्ता मया परिगृहीत इति मम महद्यशो भवेदित्येवमर्थम् । अदुष्टपरिग्रहे गुणो मन्दः, दुष्टपरिग्रहे तु मम शरणागतरक्षणधर्म उत्तेजितो भवतीति भावः । करुणया दुष्टपरिग्रहे शिष्टगर्हा स्यादित्यत्राह सतामेतदिति । एतद्दुष्टस्यापि शरणागतस्य सङ्ग्रहणम् । सतां शिष्टानाम् । अगर्हितं गर्हितादन्यत्, पूजितमित्यर्थः । पूजितत्वं च कपोतोपाख्यानादिभिः प्रपञ्चयिष्यते । एवं च शास्त्रेषु दोषाणां परित्यागहेतुत्वोक्तिः शरणागतव्यतिरिक्तविषयेति विषयव्यवस्थाऽभिप्रेता । अत एव दोषाधिक्येन वधार्हस्यापि शरणागतस्य रक्षणमेव कार्यमिति श्रुतिराह " तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छन्ति " इति । आचार्ययोजना–मित्रस्य स्नेहिनो भावो मित्रत्वम्, तेन आशालेशमात्रेण । अद्वेषमाभिमुख्यमात्रं वा अस्मदङ्गीकारे प्रयोजकम् न तु पूर्णभक्तिरिति भावः । तथोक्तम् " त्वामामनन्ति कवयः करुणामृताब्धे ज्ञानक्रियाभजनलभ्यमलभ्यमन्यैः । एतेषु केन वरदोत्तरकोसलस्थाः पूर्वं सदूर्वमभजन्त हि जन्तवस्त्वाम् ॥" इति । यद्वा मित्रभावेन मित्राक्रियया । "भावो लीलास्वभावयोः । जन्त्वभिप्रायचेष्टासु भूतौ विद्वत्पदार्थयोः । क्रियायामात्मनि" इति नानार्थरत्नमाला । मित्रभावनयेति यावत् । अहृदयशरणोक्त्येत्यर्थः । तदप्युक्तम् " शरणवरणवागियं योदिता न भवति बत सापि धीपूर्विका " इति । शरणागतभावेनेति वक्तव्ये मित्रभावेनेत्युक्तिः स्वाश्रयणाय कतिचित्पदानि कुर्वत्यपि स्वसदृशबुद्धिकारिणो भगवतोऽभिप्रायेण । देव्यापि शरणागति

कथनेन स्वमतं दर्शयति–मित्रेति । मित्रभावेन वास्तवामित्रस्वभावेनापि मित्रत्वाभिनयमात्रेण संप्राप्तं कथञ्चन न त्यजेयम्, सर्वदेशकालावस्थास्वपि त्यक्तुं न शक्नुयामित्यर्थः । ननु स्वस्मिन् शरणागतभूमिकामारोप्य शत्रुपक्षादागतोऽयं दुष्ट एव कथमेनमवलम्बस इत्याशङ्क्याह–दोष इति । दोषो यद्यपि तस्य शत्रुपक्षादागतस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मभिदधत्या "तेन मैत्री भवतु ते यदि जीवितुमिच्छसि" इत्युक्तम् । यद्वा मित्रभावेन मित्रत्वेन हेतुना। "सुहृदं सर्वभूतानाम् " इत्युक्तरीत्या अस्मदीय
सहजसौहार्दं पुरस्कृत्येत्यर्थः। यद्वा मित्रभावेन आनुकूल्यसङ्कल्पादिपूर्वकमित्यर्थः। यद्वा मितात्रायत इति मित्रम् । ईश्वरोपकारं परिच्छिद्य तत्सदृशो
पकारप्रवृत्तस्य भावेनेत्यर्थः। यद्वा विश्वसनीयस्थलं मित्रम् "तन्मित्रं यत्र विश्वासः" इत्युक्तत्वात् । विश्वासिनो भावेनेत्यर्थः । सम्प्राप्तं तस्याश्लेश
मात्रेण " हीरेषा हि ममातुला " इत्युक्तरीत्या मम तन्निवासगमने प्राप्तेऽपि स्वयमेव प्राप्तं कथं त्यजेयम् । सम्प्राप्तं सम्यक्प्राप्तम् । पादुके द्वारि विन्यस्य
देववन्दनकारिन्यायेनान्यत्र चित्तप्राप्तिमन्तरेण "परित्यक्ता मया लङ्का मित्राणि च धनानि च" इति विरोधिनिवृत्तिपूर्वकं प्राप्तमित्यर्थः । यद्वा सम्प्राप्तं माता
पिता भ्राता निवासः शरणं सुहृद्गतिर्नारायण इति न्यायेन मयि त्यक्तसकलविधबन्धुभावमाचरन्तम् । यद्वा मदन्तरङ्गानुचरपुरस्कारेण प्राप्तम् । यद्वा
सम्प्राप्तं लङ्कायां स्थित्वा राघवं शरणं गतोऽस्मीत्युक्तं चेत् "अतन्द्रितचमूपति–" इत्याद्युक्तन्यायेन मम तत्र गन्तव्यतायामपि तस्यागमनेन पङ्गोरुपरि
गङ्गानिपतनवदस्मत्प्रयोजनमेव कृतम् । सम्प्राप्तं प्राप्तिरेवास्माकमपेक्षिता, न तु स्तुत्यर्चनध्यानप्रणामादिः। समित्यनेन मानसवाचिककायिकरूपपूर्ण
प्रपदनमुच्यते । न त्यजेयं त्यक्तुं न शक्नोमि । सर्वशक्तेरपि मम शरणागतशब्दश्राविणः परित्यागे शक्तिसम्भावनामपि न पश्यामीत्यर्थः । सम्प्राप्तं
न त्यजेयम्, "शरणागतसस्यमालिनीयं वृषशैलेशकृषीवलं धिनोति " इत्युक्तरीत्या रक्षापेक्षां प्रतीक्षमाणोऽहं कथं सम्प्राप्तं त्यजेयम् । न त्यजेयं तत्स
म्बन्धेन रावणविषयाकारापेक्षी कथं तमेव त्यजेयम् । अत एव हि घण्टाकर्णपक्षपातेन तदनुजस्यापि मुक्तिं ददौ । अत एव च मालाकारविषय
पक्षपातेन युष्मत्सन्ततिजातानां दीर्घमायुर्भविष्यतीत्युक्तवान् । न त्यजेयम् आगमनमात्रेण श्लाघनीये त्यागसम्भावना कुतः ? सम्भावनायां
लिङ् । त्यागसम्भावनायां खलु साधनोद्योगः । तस्य त्यागे स्वसत्ता चेत् साधनोद्योगः स्यात् । सैव न निर्वहति कथमुद्योगः । तत्स्वीकारा
भावे स्वसत्ता न सिद्ध्यति चेत् तत्स्वीकारेऽस्मत्सत्ता न सिद्ध्यतीत्यस्मत्त्यागः स्यात् स कथमुपपद्यत इति चेत्तत्राह कथंचन । " अप्यहं
जीवितं जह्याम् " इत्युक्तरीत्या नवप्रसववात्सल्येन वत्सला गौः पूर्ववत्सानिव युष्मानपि त्यक्ष्यामि न त्वाश्रितम् । यद्वा कथंचन सर्वदेशसर्वकाल
सर्वावस्थास्वपीत्यर्थः। यद्वा कथंचन शरणागतस्य गुणाभावेऽपि दोषप्राचुर्येऽपि तत्परिग्रहस्य सर्वानभिमतत्वेऽपि दृष्टादृष्टानिष्टशतानुबन्धित्वेऽपि
शरणागतस्य दोषो यद्यपि वस्तुतो दोष एव नास्ति । यद्यपि स्यात् भवेदस्तु नाम तथापि न त्यजेयमित्यर्थः । यद्वा यद्यस्मिन् दोषो नास्ति भवेदपि तस्य दोष
स्तस्यैव स्यात् तिष्ठतु तद्दोषोऽस्मान् किं करिष्यतीति भावः। अतो मित्रभावेन सम्प्राप्तमेनं कथञ्चन न त्यजेयमिति सम्बन्धः । ननु दुष्टजनपरिग्रहस्य शिष्टगर्हि
तत्वाच्छास्त्रविरुद्धत्वादयुक्तमेतदित्याशङ्क्य, सत्यमेवैतद् दुष्टजनत्याज्यत्वप्रतिपादकं शास्त्रं सामान्यविषयम् " तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छन्ति" इत्येव

For Private And Personal Use Only

मत्प्राणपरित्यागे प्रस्तुतेऽपीत्यर्थः । किंच, दोषो यद्यपि तस्य स्यात् अस्मदभिप्रायेण दोषो नास्त्येव अस्थानभयशङ्किनो भवतोऽभिप्रायेण तस्य दोषोऽस्ति चेत् स्यात् । अङ्गीकारेऽव्ययमिदम् । दोषभोग्यत्वरूपवात्सल्यैकस्वभावस्य मे आश्रितदोषो ह्युपादेय इति भावः । सुकुमारस्य राजकुमारस्य सुगन्धिमूलमृल्लेशवदस्य दोषभोग्यत्वम् । यद्वा दोषो यद्यपि स्यात् तस्य शरणागतस्य न दोषः । "यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इत्युक्तरीत्या दोषो न श्लिष्येदित्याशयः । यद्वा दोषो यद्यपि स्यात् स तस्य हि शरणागतिरूपनिरतिशयगुणशालिनो दोषो न त्याज्यकोटिमाटीकते सुगन्धिमूलमृल्लेशवत् । यद्वा दोषो यद्यपि तस्य दोषोऽस्ति चेत्तत्सम्बन्धी खलु दोषः । सः

सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च । ततः शुभतरं वाक्यमुवाच हरिपुङ्गवः ॥ ४ ॥

तस्मादपि श्लाघ्यः स्यात् । प्रार्थनायां लिङ् । अस्माभिः प्रार्थितः खलु । गुणवान् रक्षितश्चेत् गुणवत्ताप्रतिकरः दोषवान् रक्षितश्चेदतिशयोऽस्माकमिति भावः । यद्वा दोषो यद्यपि अस्मद्वधापेक्षया तस्य स्यात् तस्यापेक्षितफलसिद्धिः स्यात् कपोतोपाख्यानानुगुणेयं योजनेति श्रीवत्साङ्कमिश्रा आहुः । कथं तर्ह्येतन्महामन्त्रिणो निन्दन्तीत्यत्राह–सतामेतदगर्हितम् । एतदाश्रितदोषाङ्गीकरणं सताम् अगर्हितम् अनिन्दितम् । अस्मत्पक्षपातिनामस्थानभयशङ्किनां निन्दितत्वेऽपि परमार्थदर्शिनां कपोतादीनां च न निन्दितमिति भावः । यद्वा एवं दुष्टापरित्यागे प्रत्यवायपरिहारो वा पुरुषार्थसिद्धिर्वा पापक्षयो वेति चेन्नैतदित्याह–सतामिति । सद्गोष्ठीष्वस्मद्गर्हापरिहार एव फलं स्वमारणोद्योगवतामपि रक्षकाः कपोतादयः तेषामगर्हितम् । यद्वा दुष्टजनपरिग्रहस्य शिष्टगर्हितत्वाच्छास्त्रनिन्दितत्वाच्चायुक्तमित्याशङ्क्य सत्यमेतद्दुष्टजनत्याज्यत्ववचनं सामान्यविषयम् । 'तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति' इत्येवमादिशरणागतापरित्यागविषयविशेषशास्त्रस्य सद्भावात् । दुष्टस्यापि शरणागतस्य संरक्षणे शिष्टगर्हणा नास्ति प्रत्युत श्रेय एवेत्याह सतामेतदगर्हितमिति । एतत् दुष्टशरणागतपरिग्रहणम् । सतां सामान्यविशेषशास्त्रविदाम् । अगर्हितं गर्हितादन्यत्, पूजनीयमित्यर्थः । सर्वशक्तेः काचिदशक्तिः, सर्वज्ञस्य किञ्चिदज्ञानं च मित्रभावेनेति श्लोकेन दर्शितमिति गोविन्दयतिनः प्रत्यवदन् ॥ ३ ॥ अथ सुग्रीवो रामप्रकृतिमाकर्ण्य

मादिशरणागतापरित्यागविषये विशेषशास्त्रस्य सद्भावात दुष्टजनस्यापि शरणागतस्य रक्षणे शिष्टगर्हणा नास्ति, प्रत्युत श्रेय एवेत्याह सतामेतदगर्हितम् । एतच्छरणागतदुष्टजनपरिग्रहणं सतां सामान्यविशेषशास्त्रविदाम् अगर्हितम् गर्हितादन्यत, पूजनीयमित्यर्थः ॥ ३ ॥ एवं श्रीरामेण स्वमते कथितेऽपि सुग्रीवः पुनरपि विभीषणं प्रति शङ्कमानस्तत्परित्याज्यतामाह–सुग्रीवास्त्विति । तद्वाक्यं रामवाक्यम् । आभाष्य अनूद्य । ततः विमर्शानन्तरम् ॥ ४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतिसाहसमेतदित्यत्यन्तं भीतभीतः प्राह–सुग्रीव इति । आभाष्य अनूद्य । शुभतरं नीतिशास्त्ररहस्यमूलत्वात्स्वामिविषयप्रेमातिशयनिबन्धनत्वाच्च शुभतरं वाक्यमुवाच । अत्र लक्ष्मणमित्युक्तत्वादुपसंहारे सहलक्ष्मण इत्युक्तत्वाच्चोभयोरपि वचनमुभावपिप्रति प्रतिवचनं च बोध्यम्॥४॥ सुदुष्ट इत्यर्धमेकं वाक्यम् । अस्माभिः पूर्वमुक्तैश्छिद्रान्वेषित्वादिदोषैर्युक्तो भवतु वा मा वा, कृतघ्नः स एष रजनीचरः । किं किमर्थम् ? परित्याज्य एवेत्यर्थः ॥ ५ ॥

सुदुष्टो वाप्यदुष्टो वा किमेष रजनीचरः ॥५॥ ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत् । को नाम स भवेत्तस्य यमेष न परित्यजेत् ॥ ६ ॥ वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य च । ईषदुत्स्मयमानस्तु लक्ष्मणं पुण्यलक्षणम् । इति होवाच काकुत्स्थो वाक्यं सत्यपराक्रमः ॥ ७ ॥ अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च । न शक्यमीदृशं वक्तुं यदुवाच हरीश्वरः ॥ ८ ॥ अस्ति सूक्ष्मतरं किंचिद्यदत्र प्रतिभाति मे । प्रत्यक्षं लौकिकं वापि विद्यते सर्वराजसु ॥ ९ ॥

रामानु० दुष्टत्वादुष्टत्वयोर्ग्राह्योऽयमिति वदन्तं रामं प्रति उभयथाऽपि त्याज्य इति सोपपत्तिकमाह–सुदुष्ट इत्यादिना । सुदुष्टो वाप्यदुष्टो वा एष रजनीचरः । किं किमर्थम् ? अनेन साध्यं प्रयोजनं किमपि नास्तीत्यर्थः ॥ ५ ॥ कृतघ्नतामेवाह–ईदृशमिति । यं बन्धुम् । एष व्यसने प्राप्ते न परित्यजेत्स कस्तस्य भवेत् न कोऽपीत्यर्थः । भ्रातरं परित्यजन् सर्वानपि परित्यजेदेवेति भावः । ईदृशं व्यसनम् लङ्कादहनपुत्रवधादिकमारभ्य समुद्रतीरनिवेशपर्यन्तं व्यसनमित्यर्थः ॥ ६ ॥ अथ सूक्ष्मधर्मानभिज्ञस्य सुग्रीवस्य नीतिमर्यादयैवोत्तरं वक्तुमारभते–वानराधिपतेरिति । सार्द्धश्लोकः । ईषदुत्स्मयमानः धर्मरहस्यमिदं मम परमशक्तिं शरणागतसंरक्षणव्रतं च सम्यगपरिज्ञाय यत्किंचिद्वदत्ययमिति मन्दस्मयं कुर्वन् ॥ ७ ॥ प्रथमं तद्वचनमुपलालयति–अनधीत्येति ॥ ८ ॥ अस्तीति । सूक्ष्मतरं

सुदुष्ट इत्यादि सार्धश्लोकमेकं वाक्यम् । सुदुष्टो वा अस्माभिः पूर्वमुक्तच्छिद्रहन्तृत्वादिदोषयुक्तो वा । अदुष्टः उक्तदोषैरयुक्तो वा कृतघ्नस्स एष रजनीचरः, किं किमर्थम् ? परित्याज्य एवेत्यर्थः ॥५॥ कृतघ्नतामेवाह–ईदृशमिति । यो विभीषणः ईदृशं व्यसनं प्राप्तं भ्रातरं परित्यजेत् तस्य विभीषणस्य को नाम भवेत् न कोऽपीत्यर्थः । ईदृशस्साक्षाज्ज्येष्ठभ्रातृपरित्यागी सर्वानपि व्यसने परित्यजेदिति भावः । यद्वा यः विभीषणः ईदृशं व्यसनं प्राप्तं भ्रातरं परित्यजेत् त्यक्तवान् स एषः यं कमि त्यर्थः स एष विभीषणः कं न परित्यजेत् तस्य को नाम भवेत् । एवंविधमेनं को वा परिगृह्णीयादित्यर्थः ॥६॥ अथ रामस्सुग्रीववाक्यं श्रुत्वा तत्प्रशंसन् लक्ष्मणादीनवलोक्य राजनीतिमर्यादयैतद्वाक्यस्योत्तरं वक्तुमारभते–वानराधिपतेरित्यादिसार्धश्लोकद्वयेन । ईषदुत्स्मयमानः मम परमां शक्तिं शरणागतसंरक्षणव्रतं च सम्यगपरिज्ञाय यत्किञ्चिद्वदतीति मन्दस्मितं कुर्वन्नित्यर्थः ॥ ७ ॥ ८ ॥ अथ रामः स्वयुक्तेरुपरि नीतिशास्त्रानुसारेण कक्ष्यान्तरमारूढत्वात् सुग्रीववाक्यं प्रशस्य

For Private And Personal Use Only

किंचित्, अर्थस्वरूपमिति शेषः । तदेवार्थस्वरूपं विशिनष्टि प्रत्यक्षमिति । प्रत्यक्षं दृष्टम् । लौकिकं लोकसिद्धम् । यत्सर्वेष्वपि राजसु विद्यते मे प्रतिभाति च तत्सूक्ष्मतरं किंचिद्धर्मस्वरूपमस्तीति सम्बन्धः ॥ ९ ॥ तदेवार्थस्वरूपमाह–अमित्रा इति । तत्कुलीनाः ज्ञातयः । प्रातिदेश्याः समनन्तरदेशाधिपाश्च । व्यसनेषु समुपस्थितेषु प्रहर्तारः अमित्राः शत्रवः कीर्तिताः । तस्माद्व्यसनप्रहर्तृज्ञातित्वात् ॥ १० ॥ व्यसनिनं रावणं परित्यज्यागमने कारणान्तरमस्तीत्याह–अपापा इति । अपापास्तत्कुलीना नरेन्द्राः । हितान् हितपरान् । स्वकान् ज्ञातीन् मानयन्त्येव । तेषामपि नरेन्द्राणां

अमित्रास्तत्कुलीनाश्च प्रातिदेश्याश्च कीर्तिताः । व्यसनेषु प्रहर्तारस्तस्मादयमिहागतः ॥ १० ॥ अपापास्तत्कुलीनाश्च मानयन्ति स्वकान् हितान् । एष प्रायो नरेन्द्राणां शङ्कनीयस्तु शोभनः ॥ ११ ॥ यस्तु दोषस्त्वया प्रोक्तो ह्यादानेऽरिबलस्य च । तत्र ते कीर्तयिष्यामि यथाशास्त्रमिदं शृणु । न वयं तत्कुलीनाश्च राज्यकाङ्क्षी च राक्षसः ॥ १२

शोभनो गुणवानेष ज्ञातिः प्रायः शङ्कनीयः । लोके पापभूयिष्ठतया शोभनोऽपि प्रायेण शङ्कनीयः । पापिनस्तु नरेन्द्रस्य तादृशो ज्ञातिः शङ्कनीय इति किमु वक्तव्यम् । अतोऽयं रावणे न शङ्कितस्तेन सह विरुद्ध्यैवागत इत्यर्थः ॥ ११ ॥ एवं रावणपरित्यागे हेतुमुक्त्वा स्वापरित्यागे हेतुं वक्तुं प्रतिजानीते–यस्त्विति । अरिबलस्य विभीषणस्य दोषः 'को नाम स भवेत्तस्य' इत्यादिनोक्तः । तत्र विषये । यथाशास्त्रं नीतिशास्त्रमनतिक्रम्य ।

भ्रातृपरित्यागिविभीषणागमने नीतिशास्त्रानुसारं राजधर्मोऽस्तीत्याह–अस्तीति । अत्र विभीषणागमनरूपकार्ये प्रत्यक्षं परिदृश्यमानं लौकिकं लोकव्यवहारसिद्धं यद्राजसु विद्यते मे प्रतिभाति च तत्सूक्ष्मतरं किंचिदर्थरूपम् अस्तीति सम्बन्धः ॥९॥ तदेव प्रदर्शयति–अमित्रा इति । तत्कुलीनाः ज्ञातयः । प्रातिदेश्याः प्रतिदेशे वसन्तीति प्रातिदेश्याः, समनन्तरदेशवर्तिनो राजानश्च व्यसनेषूपस्थितेषु प्रहर्तारः सन्तः अमित्राः शत्रव इति कीर्तिताः । तस्माद्व्यसनप्रहर्तृज्ञातित्वात् व्यसनिनं रावणं प्रहर्तुमयं विभीषण इहागत इत्यर्थः ॥१०॥ एवं ज्ञातयो व्यसनेषु राजानं प्रहरन्तीत्युक्त्वा ये धार्मिष्ठा राजानो ज्ञातीन् परिपालयन्ति तेऽपि प्रज्ञाशौर्याद्युन्मेषशालिनं ज्ञातिं शङ्कन्त इत्याह–अपापा इति । अपापास्तत्कुलीनाश्च नरेन्द्राः स्वकान् हितान् ज्ञातीन् मानयन्ति तेषामपि नरेन्द्राणां शोभनः प्रज्ञाशौर्याद्युन्मेषशाली ज्ञातिस्तु प्रायो बहुलं शङ्कनीय एव । पापकर्मणस्तु नरेन्द्रस्य तादृशो ज्ञातिश्शङ्कनीय इति किमु वक्तव्यम् । अतश्शङ्कितेन रावणेन सह विरुद्ध्य अयं विभीषणोऽत्रागत इति निश्चितार्थः ॥११॥ एवमुक्तप्रकारेण विभीषणस्य रावणपरित्यागे व्यसनिज्ञातिप्रहर्तृत्वं शोभनज्ञातित्वं च हेतुद्वयमस्ति, बान्धवपरित्यागे तु हेतुर्नास्तीति कृत्वा ' को नाम स भवेत्तस्य ' इति सुग्रीवोक्तं न युक्तियुक्तमिति भावः । शत्रुसम्बन्धित्वमात्रमवलम्ब्यास्मिन् यो दोषः कथितः स दोषोऽप्यस्मिन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इदमुत्तरम् । न वयमिति । न वयं तत्कुलीनाः राक्षसराज्यानर्हाः, अस्माकं तद्राज्ये आकाङ्क्षाभावात् । मम रावणस्येव तस्मिन्नरित्वशङ्काप्रसक्ति र्नास्ति । अतो नास्मान् त्यक्ष्यतीति भावः । किंच राक्षसो विभीषणस्तु राज्यकाङ्क्षी अस्मन्मुखेन रावणं घातयति । अतः स्वकार्यविघातभयादपि नास्माकमपकारं करोतीत्यर्थः ॥ १२ ॥ ननु मूर्खा राक्षसाः कथमेवं विमृश्यकारिण इत्याशङ्क्य नायं नियम इत्याह–पण्डिता इति । अर्धमेकं वाक्यम् । राक्षसा अपीत्यर्थः ॥१३॥ पुनरप्यस्य रावणेन विरुध्यागमनमेव प्रतिपादयन् परिग्राह्यत्वं निगमयति–अव्यग्रा इति सार्धश्लोकेन । ते ज्ञातयः

पण्डिता हि भविष्यन्ति तस्माद्ग्राह्यो विभीषणः ॥ १३ ॥ अव्यग्राश्च प्रहृष्टाश्च न भविष्यन्ति सङ्गताः । प्रवादश्च महानेष ततोऽस्य भयमागतम् । इति भेदं गमिष्यन्ति तस्माद्ग्राह्यो विभीषणः ॥ १४ ॥ न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः । मद्विधा वा पितुः पुत्राः सुहृदो वा भवद्विधाः ॥ १५ ॥

अव्यग्राः प्रहृष्टाश्च सन्तः कदाचिदप्यन्योन्यसङ्गताः न भविष्यन्ति न भवन्तीति । अनेनैव हेतुना ज्ञातयोऽवसरे भेदं गमिष्यन्ति गच्छन्ति । अस्य च भीतस्यैव महान् प्रवादः श्रूयते । अतो बलीयसो रावणात् अस्य भयमागतं तेन च भयेनात्मत्राणार्थमागत इति परिग्राह्योऽयमित्यर्थः ॥ १४ ॥ ननु दुष्टोऽपि ज्येष्ठोऽनुवर्तनीय एवेत्याशङ्क्य यद्यप्ययं धर्मः तथापि न सर्वत्र सम्भवतीत्याह–न सर्वे इति । मद्विधा वा पितुः पुत्राः इति भूतार्थकथनत्वात्

नास्तीत्यतोऽयं परिग्राह्य इत्याह–यस्त्वित्यादिना । अखिलस्य विभीषणस्य । यथाशास्त्रं राजनीतिशास्त्रमनतिक्रम्य । नेति । न वयं तत्कुलीनाः । चकारात्प्राति देश्याश्च न भवाम इत्यर्थः । अतो नास्मानयं छिद्रेषु प्रहरति अस्मत्सापेक्षश्चायम्, यतो राज्यकाङ्क्षी अस्मन्मुखेन रावणं घातयामीति वीक्षते । अतः स्वकार्यविघात भयादपि नास्माकमपकारं करोतीति भावः ॥ १२ ॥ ननु मूर्खा राक्षसाः कथमेवं विमृश्यकारिण इत्याशङ्क्य नायं नियम इत्याह–पण्डिता हीति । राक्षसा अपि पण्डिता भविष्यन्ति तस्माद्विभीषणो ग्राह्य इति सम्बन्धः ॥ १३ ॥ पुनरप्यस्य रावणेन विरुध्यागमनमेव प्रतिपादयन् परिग्राह्यत्वं निगमयति–अव्यग्राश्चेत्या दिना सार्धश्लोकेन । ते पण्डिताः ज्ञातयः अव्यग्राः अपर्याकुलाः तुष्टाश्च सन्तः कदाचिदपि अन्योन्यं सङ्गताः न भविष्यन्तीति अनेनैव हेतुना ज्ञातयोऽवसरे भेदं च गमिष्यन्ति । किञ्च अस्य च भीतस्यैव महान् प्रवादः श्रूयते । अतः बलीयसो रावणात अस्य विभीषणस्य भयमागतम् । तेन भयेन चात्मत्राणार्थमिहागतः, तस्मात्परिग्राह्यो विभीषण इत्यर्थः । प्रवादश्च महानेष इति पाठ तु–ज्ञातिभ्यो भयागमने अपवादश्च ‘ घोराः स्वार्थप्रयुक्ताश्च ज्ञातयो नो भयावहाः ’ इति हस्तिगीतादिरूपो लोकप्रवादोऽपीत्यर्थः ॥ १४ ॥ इत्युक्तप्रकारेण ज्ञातित्वप्रयुक्तदोषस्य शङ्कनीयत्वं शोभन इत्युक्तप्रकारेण राजदोषस्य च सार्वत्रिकत्व

स०–भ्रातृषु सौभ्रात्रं दुर्मिलमिति न वक्तुं युक्तम् । भरते भक्तिभरितता त्वयि त्वदनुभूतैव वर्तत इत्यतः कश्चित्क एवैवंभावो भ्रात्रादिष्वित्याह–नेति । सर्वे भ्रातरो भरतोपमा न भवन्ति । स लोकविलक्षण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नात्मप्रशंसादोषः । यथा ' कृपावानविकत्थनः ' इत्युक्तलक्षणेन धीरोदात्तेन दुष्यन्तेन " सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः " इत्युक्तम् । यथा च हनुमता "पन्नगाशनमाकाशे पतन्तं पक्षिसेविते । वैनतेयमहं शक्तः परिगन्तुं सहस्रधा ॥" इति । दण्डिना च काव्यादर्शे प्रथमपरिच्छेदे–" स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः । अपि त्वनियमो दृष्टस्तथा त्वन्यैरुदीरणात् ॥" इति । यद्वा पूर्वश्लोकार्थस्य भरतेऽतिप्रसङ्गं परिहरति–सर्व इति । तातेति सान्त्वोक्तिः । सर्वे भ्रातरः भरतोपमा न भवन्ति । कैकेयीवरप्राप्तं पित्रा दत्तमपि राज्यं परित्यज्य वनं गतं मामनुसृत्य तवैव

एवमुक्तस्तु रामेण सुग्रीवः सहलक्ष्मणः । उत्थायेदं महाप्राज्ञः प्रणतो वाक्यमब्रवीत् ॥ १६ ॥

रावणेन प्रणिहितं तमवैमि विभीषणम् । तस्याहं निग्रहं मन्ये क्षमं क्षमवतां वर ॥ १७ ॥

राज्यं त्वमेव गृहाण, अहं त्वद्दास्यं करिष्यामीति वदन् भरतादन्यः कश्चिदस्ति किमिति भावः । एवंविधप्रसक्त्यभावाल्लक्ष्मणस्यानुपादानम् । अत्र दृष्टान्तमाह मद्विधा इत्यादिना । मद्विरहमात्रेण लोकान्तरं गतः पिता । तत्तुल्यपितृमानस्मत्सदृशः कश्चिदस्ति किमित्यर्थः । यद्वा माद्विधाः पितुः पुत्राः सन्तु वा मा वा भरतसमा भ्रातरस्त्वत्समाः सुहृदश्च न सन्तीत्यर्थः । सुहृदो वा भवद्विधाः । वर्षरात्रसमये स्थितेन मया अत्यन्तकुपितेन लक्ष्मणेन चात्यन्तं परुषमुक्तेऽपि अस्मासु प्रेमातिशयमेव प्रकटयन् त्वत्समः को वाऽस्तीति भावः । यद्वा मद्विधा वा पितुः पुत्रा न भवन्ति । निरतिशयपितृवात्सल्यभूतोऽस्मत्तुल्यो नास्तीत्यर्थः ॥ १५ ॥ अथ सुग्रीवो नीतिमुखेन विभीषणस्य त्याज्यतां प्रतिपादयितुमशक्तः परिग्रहे चाविदितभावोऽयं रामे

माशङ्क्य परिहरति–न सर्व इति । सर्वे भ्रातरः भरतोपमा न भवन्ति । पितृदत्तराज्यप्राप्तिसद्भावेऽपि तदनङ्गीकारेण ज्ञातित्वप्रयुक्तदोषं परिहृतवान् । राज्यप्राप्तिशङ्कागन्धमात्रस्याप्यसम्भवात् लक्ष्मणस्यानुपादानम् । ज्येष्ठत्वेन स्वस्यैव राज्यप्राप्तेरसाधारणत्वेऽपि पितृवचनगौरवेण कनिष्ठे भरते राज्यप्रदानात् मद्विधा वा पितुः पुत्रा न भवन्तीत्युक्तवान् । भूतार्थकथनरूपत्वान्नात्मप्रशंसादोषः । तदुक्तं दण्डिना–" स्वगुणाविष्क्रियादोषो नात्र भूतार्थशंसिनः " इति । ' शङ्कनीयस्तु शोभनः ' इत्युक्तदोषविषयशङ्का सुग्रीवस्य मा भूदिति सुहृदो वा भवद्विधाः इत्युक्तवान् । यद्वा मद्विधा वा पितुः पुत्रास्सन्तु वा । भरतसमा भ्रातरः भवद्विधाः सुहृदश्च न सन्तीति सम्बन्धः ॥ १५ ॥ अथ सुग्रीवो नीतिमुखेन शरणागतविभीषणस्य त्याज्यतां प्रतिपादयितुमशक्तः परिग्रहे विभीषणोऽस्मासु कंचा अनर्थमुत्पादयिष्यतीति भिया एतस्य विभीषणस्य शरणागतेरुपेक्षया स्वेन लक्ष्मणेन च क्रियमाणं शरणागतिद्वयं प्रबलं मन्यमानः शरणागतिपूर्वकं

–इति भावः । लक्ष्मणस्य च स्वसमखेदमोदत्वेन सहैवावस्थानाद्राज्यप्राप्तेरहन्ताहेतोरभावेन चानुक्तिः नतु सौहार्दविमर्देनेति हृदयम् । आनुप्रस्तावे पितापुत्राचारोक्तिः प्रसङ्गसङ्गत्या । सर्वे भ्रातरो भरतोपमा नेत्यनेन मारिततारारमणस्य मर्मोत्कीर्तनं मन्यमानस्तं सुमुखीकर्तुं सुहृद इत्याद्युक्तिश्चेति ज्ञेयम् ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कमनर्थमुत्पादयिष्यतीति प्रेमवशेन व्याकुलो विभीषणशरणागतेरेकस्याः सलक्ष्मणेन स्वेन क्रियमाणं शरणागतिद्वयं प्रबलमभिमन्यमानः शरणागतिपूर्वकं विभीषणनिग्रहं प्रार्थयते--एवमित्यादिचतुःश्लोकैः ॥ १६ ॥ १७ ॥ राक्षस इत्यादि । अत्र मयि लक्ष्मण इति स्वस्य लक्ष्मणस्य चानर्थकथनं स्वव्यसनादपि स्वाश्रितव्यसनं रामस्यात्यन्तारुन्तुदमिति तत्प्रदर्शनेन विभीषणापरिग्रहसमर्थनार्थम् ॥ १८ ॥ १९ ॥ एवमुक्त्वेति । मौनमुपागमत्, प्रणयरोषादिति भावः ॥ २० ॥ अथ रामः स्वस्य सर्वशक्तित्वप्रदर्शनेन सुग्रीवस्यातिशङ्कां निवार्य शरणागतरक्षणरूपस्य स्वव्रतस्य धर्मशास्त्र

राक्षसो जिह्मया बुद्ध्या सन्दिष्टोऽयमिहागतः । प्रहर्तुं त्वयि विश्वस्ते प्रच्छन्नो मयि वाऽनघ ॥ १८ ॥ लक्ष्मणे वा महाबाहो स वध्यः सचिवैः सह । रावणस्य नृशंसस्य भ्राता ह्येष विभीषणः ॥ १९ ॥ एवमुक्त्वा रघुश्रेष्ठं सुग्रीवो वाहिनीपतिः । वाक्यज्ञो वाक्यकुशलं ततो मौनमुपागमत् ॥ २० ॥ सुग्रीवस्य तु तद्वाक्यं रामः श्रुत्वा विमृश्य च । ततः शुभतरं वाक्यमुवाच हरिपुङ्गवम् ॥ २१ ॥ सुदुष्टो वाप्यदुष्टो वा किमेष रजनीचरः । सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथंचन ॥ २२ ॥ पिशाचान् दानवान् यक्षान् पृथिव्यां चैव राक्षसान् । अङ्गुल्यग्रेण तान् हन्यामिच्छन् हरिगणेश्वर ॥ २३ ॥

सिद्धत्वात्तस्यापरित्याज्यतां प्रतिपादयति--सुग्रीवस्य त्वित्यादिना । विमृश्य मयि प्रेमातिशयेनैवमुक्तमिति विचार्य ॥ २१ ॥ सुग्रीवस्य भयं निवर्तयति--सुदुष्ट इति । स एष रजनीचरः सुदुष्टो वा अदुष्टो वा भवतु किं करिष्यति । तदेव विवृणोति--सूक्ष्ममिति । सूक्ष्ममपीत्यनेन साक्षान्मयि मदाश्रितेषु मत्सम्बन्धिसम्बन्धिष्वपि न शक्त इति भावः ॥ २२ ॥ कथं न शक्त इत्याकाङ्क्षायां स्वशक्तिं दर्शयति--पिशाचानिति । पृथिव्याम्, विद्यमाना

विभीषणनिग्रहं प्रार्थयते--एवमुक्त इत्यादि मौनमुपागमदित्यन्तेन । अत्र मयि लक्ष्मणे वेति स्वस्य लक्ष्मणस्य च विभीषणेन करिष्यमाणानर्थकथनं स्वव्यसनादपि स्वाश्रितव्यसनं रामस्यात्यन्तमरुन्तुदमिति मत्वा विभीषणेन करिष्यमाणानर्थमुक्त्वा तत्परिग्रहमसहमानः प्रणयरोषात् मौनमुपागमदित्यर्थः ॥ १६-२० ॥ अथ रामः स्वस्य सर्वशक्तित्वप्रदर्शनेन सुग्रीवस्यातिशङ्कां निवार्य शरणागतरक्षणरूपस्वव्रतस्य धर्मशास्त्रसिद्धत्वात्तस्यापरित्याज्यतां प्रतिपादयति--सुग्रीवस्य त्विति । सुग्रीवस्य वाक्यं श्रुत्वा तद्विमृश्य । अस्यायमर्थः--प्रथमतः कृतविभीषणशरणागत्यपेक्षया पश्चात्कृतसुग्रीवलक्ष्मणशरणागतेर्दौर्बल्यं च " तस्मादपि वध्यं प्रपन्नं न प्रति प्रयच्छन्ति " इति श्रुत्यर्थानुसारिशरणागतरक्षणरूपस्वधर्मं च पर्यालोच्येत्यर्थः ॥ २१ ॥ असौ राक्षसोऽन्तःप्रविष्टस्सन् अनवहिताया

For Private And Personal Use Only

निति शेषः । त्वं तावत्सकलैः स्वबलैः सह तिष्ठ। अहमेक एव पर्याप्त इत्यभिप्रायेणाह हरिगणेश्वरेति । अङ्गुल्यग्रेण शस्त्रास्त्रादिप्रसङ्गशून्येन अङ्गुल्यन्तरनिरपेक्षेण एकस्यामप्यङ्गुल्यामंशान्तरव्यापारवर्जितेन। तत्रापि हस्तपादादिविशेषविवक्षाशून्येन अग्रमात्रेण । हन्यां हन्तुं शक्तः । न केवलं लङ्कामात्रनिवासिनो राक्षसान् किन्तु स्थानान्तरनिवासिनोऽपीति विवक्षया पृथिव्यां चैवेति निर्देशः । न केवलमेकजातीयानामेव लक्ष्यत्वम् किन्तु सर्वेषामपीत्यभिप्रायेणाह--तानिति । तर्हि लङ्कामात्रनिवासिनो राक्षसान् किमिति न हंसीत्यत्राह इच्छन्निति । इच्छाभावादेव तद्वधाभावः, न त्वशक्त्येति

श्रूयते हि कपोतेन शत्रुः शरणमागतः । अर्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः ॥ २४ ॥

भावः ॥ २३ ॥ एवमस्मादपकारशङ्का नास्तीत्युक्त्वा भवतु वाऽयमपकारी तस्मादेवापकारान्मम प्राणा गच्छन्तु वा । अथापि नायं निग्राह्यः नापि परित्याज्यः, किन्त्ववश्यं रक्ष्य एवेति कपोतोपाख्यानेन प्रतिपादयति–श्रूयते हीति, प्रसिद्धेयमाख्यायिकेत्यर्थः । कपोतेन धर्माधिकारशून्येन तिर्यङ्मात्रेण, एतेनाप्यनुष्ठितत्वे किमु वक्तव्यमस्माकम् । कपोतेन एकेनासहायेन कृतं किमुत ससहायैरस्माभिः । शत्रुः कपोतस्य मृगयुः स्वयं भार्यापहारी वैरी, विभीषणस्त्वस्माकं न तथा । तथाप्यरक्षणे किमस्मत्पौरुषेण । शरणमागतः कपोताध्युषितद्रुमस्थलं यदृच्छया प्राप्तः । "सोऽञ्जलिं शिरसा बद्ध्वा वाक्यमाह वनस्पतिम् । शरणं हि गतोऽस्म्यद्य देवतामिहवासिनीम् ॥ " इति स्वावासवनस्पतिदेवतां प्रत्युक्तवान् न तु कपोतम् । विभीषणस्तु 'राघवं शरणं गतः' इति अस्मत्कूटस्थरघुराक्षससंवादोक्तशरणागतराक्षसरक्षणं पुरस्कृत्य मां प्राप्तः । यद्वा शरणं "शाखिनः पक्षिणां गृहम्" इत्युक्तरीत्या वनस्पतिरूपं गृहं प्राप्तः, न तु शरणागतिं चक्रे । "शरणं गृहरक्षित्रोः" इत्यमरः । अर्चितश्च लुब्धकत्वात्सहजशत्रुत्वात् भार्यापहर्तृत्वाच्चापन्नोऽप्यसावित्युपेक्षणस्य तद्वधोपायान्वेषणस्य च कर्तव्यत्वे प्राप्तेऽप्यातिथिं देवत्वेन मत्वा शीतनिवारणायाग्निमानीय पूजितः । वयं तु " वध्यतामेष तीव्रेण दण्डेन सचिवैः सह " इत्यनुबन्धिपर्यन्तं सम्यगर्चयामः । यथान्यायम् यावत्क्षुन्निवृत्ति सन्मित्रागम इव

मत्स्थायामस्मान् वधिष्यतीति सुग्रीवोक्तदोषस्यावकाशो नास्तीत्याह–सुदुष्ट इति । किं किमप्यहितम् ॥ २२ ॥ २३ ॥ एवं विभीषणस्य परिग्राह्यत्वे नीतिशास्त्रं लोकव्यवहारं स्वशक्तिं च प्रदर्श्य अशक्तेनापि पुरुषेण स्वप्राणव्ययेनापि शरणागतः संरक्षणीय इत्यत्रैतिहासं प्रमाणयति–श्रूयते हीत्यादिना । कपोतेन शास्त्रानधिकारिणा क्षुद्रजन्तुना । शत्रुः, अत्र शत्रुशब्देन भार्याहर्तृत्वेन शत्रुभूतो व्याध उच्यते । शरणं गृहम्, स्वनिवासभूतवृक्षमित्यर्थः । यथान्यायमर्चितः यथोचितं पूजितः, कपोतोपाख्यानकथिताग्न्यानयनशीतनिवारणाद्युपचारेणार्चित इत्यर्थः । स्वैश्च मांसैः स्वशरीरमांसैर्निमन्त्रितो भोजनार्थं नियोजितः ॥ २४ ॥ ॥ ५९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समग्रादरेणान्तर्विषादलेशं विना आहतः । यद्वा प्रियवचनादिभिः वचनां विनेत्यर्थः । स्वैश्च मांसैर्निमन्त्रितः । वहिः कतिचिदाहारानानीय स्वकीय द्रव्यान्तराणि कतिपयानि शरीरैकदेशान्वा दत्त्वा नोपचचार, किन्त्वज्ञैरात्मत्वेनाभिमन्यमानैः प्राज्ञैरप्याद्यं धर्मसाधनमित्यादरणीयैः शरीरमांसैः शरभङ्ग इव 'इदमेकं महत्तपः' इति मत्वा वह्नावह्नाय पतति स्म । निमन्त्रितः भोजनार्थं नियोजितः ॥ २४ ॥ उक्तमेवार्थं दृढीकुर्वन् स्वस्य कैमुत्यमाह–स हि तमिति । स कपोतः वयमिव धर्मानुष्ठानयोग्यजातौ शरण्यवंशे वा नोत्पन्नः । तं जात्या स्वभावेन च क्षुद्रसमाचारम्

स हि तं प्रतिजग्राह भार्याहर्तारमागतम् । कपोतो वानरश्रेष्ठ किं पुनर्मद्विधो जनः ॥ २५ ॥

'पक्षिणां कालसंमितः' इत्यखिलपक्षिजातिविरोधिनं तस्य कपोतस्यान्तिकं प्रति यदृच्छयाऽभ्येत्य पतितम् उपायान्तरशून्यं विपरीतानुष्ठानैकनिरतम् अनुतापलेशेन वा अनुकूलवादप्रसङ्गेन वाऽनन्वितं प्रतिजग्राह । स्वात्मत्यागेनाङ्गीकृत्यावति स्म । पूर्वश्लोके शत्रुरिति सामान्येनोक्तमर्थं तदवृत्ति प्रदर्शनेन विशिनष्टि–भार्याहर्तारमिति । एवमेव रावण आगतश्चेदस्माभिः कार्य इत्यभिप्रायः । आगतम् अस्याङ्गीकाराय कृतमुपायानुष्ठानं कपोतावासद्रुमस्थलं प्रत्यागमनमात्रमेव । तद्विना वनस्पतिदेवतां प्रत्युक्तं शरणशब्दं कपोतो नाशृणोत् । अत्र स हीत्यनेनैव कपोतानुवादे लब्धेऽपि पुनः कपोतग्रहणं श्येनकपोतोपाख्यान इव नायं परिगृहीतकपोतशरीरो देवो मुनिर्वा, किन्तु प्राकृतः कपोत इति ज्ञापनार्थम् । अयं कपोतः प्राक्तनधर्मविशेषैर्गजेन्द्रादिवत्तिर्यक्त्वेप्येवंधर्मानुष्ठानयोग्यो बभूव । कपोत इत्यनेन तिर्यक्त्वं शास्त्रानधिकारित्वं बुद्धिमान्द्यं च सूचितम् । वानरश्रेष्ठ ! पुनरप्येकस्तिर्यक् शत्रुं किरातं ररक्षेत्येनां कथां शृणु । वानरः कश्चिद्व्याघ्राद्भीतं स्वावासद्रुममागतं किरातं ररक्ष । तदानीं वृक्षमूलस्थो व्याघ्रस्तस्मिन्वानरे

उक्तार्थदृढीकरणाय स्वस्य कैमुत्यमाह–स हि तमिति । सः हृतभार्यः कपोतः । कपोत इत्यनेन तिर्यक्त्वाच्छास्त्रानधिकारित्वं बुद्धिमान्द्यञ्च सूचितम् । भार्याहर्तारमप्यागतं किरातं प्रतिजग्राह आभिमुख्येनाङ्गीचकार, किम्पुनर्मद्विधो जनः सकलशास्त्राधिकारी सकलधर्मरहस्यवेदी सकलधर्मानुष्ठानपरश्च मादृशो जनः

स०–स हि सोऽपि अनेनापकृतोऽपीत्यर्थः । प्रतिजग्राह प्रतिहृतभार्यावचनश्रवणानन्तरमपि प्रीतिपूर्वकं जग्राहेति पश्यति । सहितं हितेन सहितं यथा भवति तथेति वा । तिर्यक्सभावानं तिर्यग्निदर्शनेन किम भवतीति वा भार्यापहर्तृभ्रातृग्रहणे भार्यापहर्तृसत्कारकर्तृनिदर्शनमुचितमिति वा आदौ कपोतेतिहासो बोधितो रामेणेति ज्ञेयम् । " मुनिरुवाच । धर्मनिश्चयसंयुक्तां कामार्थसहितां कथाम् । शृणुष्वावहितो राजन् गदतो मे महाभुज ॥ " इत्यारभ्य दशाध्याय्या शान्तिपर्वण्युक्तनैका कपोतव्याधकथाऽत्रानुसन्धेया ॥ २५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुप्ते निषादं समीक्ष्य त्वां रक्षामि वानरं पातयेत्युवाच। ततः पापैकनिरतः किरातः स्वरक्षणकारिणं वानरं पातयामास। अनन्तरं वानरं पतितं गृहीत्वा व्याघ्रः त्वां जह्यां स्वोपकारिद्रोहिणं निषादं जहीति मनुष्यमांसलुब्धत्वादुवाच। ततो धर्मवित्स वानरः प्राणात्ययदशात्वादहृदयं तत्त्यागमङ्गीकृत्य व्याघ्रमुक्तस्तरुमारुह्य स्वस्यापकर्तारं किरातं पश्चादपि गत्यन्तराभावान्निजवासद्रुमस्थितिहेतुना शरणागत इत्यरक्षत्। भवान्वानराधिपत्ये स्थितः सन् स्वजातिधर्म इति शरणागतरक्षणं किन्नावलम्बते। किं पुनर्मद्विधो जनः कपोतचरितं पश्यतां मादृशां किं वक्तव्यम्। मद्विधः शरणागतरक्षणाय

ऋषेः कण्वस्य पुत्रेण कण्डुना परमर्षिणा। शृणु गाथां पुरा गीतां धर्मिष्ठां सत्यवादिना ॥ २६ ॥

समुच्छ्रितध्वजे रघुवंशे जातः "षष्टिर्वर्षसहस्राणि लोकस्य चरता हितम्। पाण्डरस्यातपत्रस्य च्छायायां जरितं मया॥" इत्युक्तरीत्या लोकरक्षणदीक्षितस्य दशरथस्य पुत्रः वसिष्ठविश्वामित्रादिशिष्यः महायोगिना जनकेन कृतसम्बन्धः 'रामो विग्रहवान् धर्मः' इति प्रसिद्धः "मर्यादानां च लोकस्य कर्ता कारयिता च सः" इति सर्वलोकानुकृतधर्मानुष्ठानः अहं सम्प्रति शरणागतहिंसां कुर्यां चेल्लोकः कीदृग्विधः स्यात्। मद्विधः मम वृत्तं पश्चाद्वक्ष्यते। सामान्येन 'धर्मसेतुर्नृपाणाम्' इति मादृशानां संमतत्वेन स्थितः मद्विधः मादृशः शरणागतत्यागं न करोति। अवध्यवधोन्मुखानां रावणादीनां खल्वीदृशं कार्यं रोचते। जनः शरणागतत्यागकृत्कीदृशोत्पत्तिमान् स्यात् ॥ २५ ॥ ननु शास्त्रानधिकारिणास्तिरश्चोऽनुष्ठानमनुपादेयम् न च चोदनामन्तरेण पक्षिमात्रेण धर्मत्वं सिद्ध्यतीत्यत्राऽऽह कण्डुमुनि[illegible] विधानं दर्शयति–ऋषेरिति। कण्वस्य पुत्रेणेत्यनेन महाकुलप्रसूतत्वम्, परमर्षिणेति यथार्थदर्शित्वम्, सत्यवादिनेति यथादृष्टार्थवादित्वं चोच्यते। तेन परमाप्तत्वं दर्शितम् वेदवचनादिसिद्धम्। पुरा गीतां कण्डुकल्पितेयमिति न मन्तव्यम्। ऋच एव सामत्वात्पुरा विद्यमानामेवेदानीं गीयमानां गीताम्। एतत्कृतत्वेऽपि सामत्वनिवत्समस्तपापापनोदनक्षमाम्। धर्मिष्ठां वेदोक्तधर्मोपमेयस्मृत्युक्तप्रतिपादिकाम्। अनेन परमप्रयोजनत्वमुक्तम्। सत्यवादिनीमिति पाठे–अबाधितार्थप्रतिपादिनीं गाथाम् अनेकार्थौचितसुलभाभ्यस

अकृतापकारमयमेव शरण्य इति मास्तं पुरुषं प्रतिगृह्णीयादिति किमुतेति भावः॥ २५ ॥ स वध्यः सचिवैः सह इति सुग्रीवोक्तं शरणागतस्य विभीषणस्य

स०–पिपीलिकालिपिविद्यादच्छिकत्वान्न तत्वेष्ट' धर्मे प्रमाणीस्यादित्यतो महर्षिगीतां गाथां कथयति–ऋषेरिति। रामोक्तितिर्यगतिर्यगादिविषयत्वादेवमादिनिदर्शनं युक्तमिति भावः। "नहि पितुः पाण्डित्येन पुत्रः पण्डितो भवति" इति न्यायेनातत्सदृशपुत्रगीतेत्यतस्तं विशिनष्टि–परमर्षिणेति। पितुः ऋषित्वन् एतस्य परमर्षित्वमिति तद्गीता(गाथा)कथा आदर्तव्येत्यनेन सूचयति ॥ २६ ॥

For Private And Personal Use Only

नीयत्वाय सङ्कुचितशब्दां शृणु, इतः पूर्वमेतद्गाथानाकर्णनेन खलु त्वमेवमाविलात्माऽसि एनामवहितमनाः शृणु ॥ २६ ॥ अथ कण्डुगाथायां चतुः श्लोक्यामाद्यश्लोकेन पूर्णप्रपत्त्यसिद्धावपि गत्यन्तरशून्यतया आत्मनिक्षेपाभिप्रायव्यञ्जकशरणागतिशकलतुल्याञ्जलिबन्धादिमात्रविधानमपि हानिं न नयेत् तत्करणमनुग्रहावहमित्याह—बद्धाञ्जलिपुटमिति । अनुकूलबुद्धिवाग्वृत्त्यभावेऽप्यञ्जलिमात्रमेवालम् । "अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी" इति स्वतन्त्रस्याप्याशु दयाजननी मुद्रा खल्वियम् । दीनम् एवमञ्जलिबन्धमात्रं विनापि कार्पण्यद्योतनावस्थानमेवालम् । याचन्तम् अञ्जल्याद्य

बद्धाञ्जलिपुटं दीनं याचन्तं शरणागतम् । न हन्यादानृशंस्यार्थमपि शत्रुं परन्तप ॥ २७ ॥
आर्तो वा यदि वा दृप्तः परेषां शरणागतः । अरिः प्राणान् परित्यज्य रक्षितव्यः कृतात्मना ॥ २८ ॥

भावेऽपि कार्पण्याद्योतनेप्यह्रदयप्रार्थनैवालम् । शरणागतम् अञ्जलिबन्धादित्रयेप्यविद्यमाने रक्षकनिवासस्थलाभिगमनमेवालम् । पूर्वं स्वरक्षाभरनिक्षेपरूप शरणागतिशकलान्युक्त्वा शरणागतमिति पूर्णप्रपत्तिरुक्तेति वा स्यात् । अपि शत्रुं साक्षाच्छत्रुमपि न हन्यात् । अयं शास्त्रार्थ ऐहिकाभ्युदयार्थो वा पर लोकार्थो वा प्रत्यवायपरिहारार्थो वेत्युक्ते सति तेभ्यः प्राक्प्रयोजनान्तरमाह आनृशंस्यार्थमिति । अघातुकत्वसिद्ध्यर्थमित्यर्थः । नृशंसोऽयमिति लोकाप वादपरिहारार्थमिति यावत् । यद्वा आनृशंस्यं सकलधर्मसारभूतो दयागुणः तद्रक्षणार्थं वा । यथोक्तं सीतया "आनृशंस्यं परो धर्मस्त्वत्त एव मया श्रुतः" इति । परन्तपेति । कण्डुरपि कंचिद्राजानं प्रत्युक्तवानिति गम्यते । परन्तप ! शरणागते किं पौरुषप्रकटनेन प्रत्यर्थिषु खलु तत्कर्तव्यमिति भावः ॥ २७ ॥ पूर्वं न हन्यादिति स्वेन क्रियमाणं हननमात्रं प्रतिषिद्धम् । अत्र स्वेतरक्रियमाणशरणागतपीडायामपि शरणागते आर्तत्वदृप्तत्वविभागा नालोचनेन प्राणान् हित्वा तद्रक्षणं कार्यमित्याह—आर्तो वेति । आर्तः स्वाभिमतसम्भवे विलम्बाक्षमतीव्रसंवेगवान् वा, शरणागमनवेलायामपि स्वाप राधनिमित्तभयादिमान् वेत्यर्थः । दृप्तस्तु विलम्बाविलम्बावनादृत्य फलसिद्धिमात्रसक्तः । अस्यां वेलायां विनयस्वापराधभयशून्यो वा । मुमुक्षुपक्षे संसारजुगुप्सानुसन्धानेन सद्य एव देहनिवृत्तिकाम आर्तः । दृप्तः शरीरावसाने मुक्तिकामः । यद्वा आकिञ्चन्यानन्यगतित्वपुरस्सरं प्रपन्न आर्तः । स्तोभ

त्यात्यत्वं परिहर्तुं कण्डुमहर्षिगीतगाथामाह—ऋषेरित्यादि । धर्मिष्ठां धर्मपराम् । सत्यवादिनीमबाधितार्थप्रतिपादिनीम् ॥ २६ ॥ आनृशंस्यार्थमघातुकत्वसिद्ध्यर्थं न हन्यादिति सम्बन्धः । परंतपेति कण्डुरपि यं कञ्चित्सम्बोध्योपदिशति ॥ २७ ॥ आर्त इति । परेषां शत्रूणां मध्ये आर्तः स्वाभिमते विलम्बाक्षमावान् ।

हेलनादिरूपेण शरणागतोऽस्मीति ब्रुवन् द्दप्तः । परेषां शरणागतः स्वव्यतिरिक्तशरणागतः । यद्वा परेषामिति निर्धारणे षष्ठी । परेषां मध्ये शरणागतोऽरिः वैरे हृदि विद्यमानेपि शरणागतिशब्दमात्रमभिदधानः पुरुषः । कृतात्मना निश्चितमनस्केन, धर्मशास्त्रविश्वासशालिनेत्यर्थः । प्राणान् परित्यज्य रक्षितव्यः, अस्थिरान् प्राणान्परित्यज्य स्थिरं शरणागतरक्षणं कर्तव्यम् । कृतात्मनेति विशेषणेन विदुषोऽतिक्रमे दण्डभूयस्त्वमुक्तम् । शरणागतरक्षणशास्त्रस्य निरवकाशत्वात् "सर्वथैवात्मानं गोपायेत्" इति शास्त्रस्य सावकाशत्वात् तद्व्यतिरिक्तविषयेऽप्यवस्थाप्यमिति भावः ॥ २८ ॥

स चेद्भयाद्वा मोहाद्वा कामाद्वापि न रक्षति । स्वया शक्त्या यथासत्त्वं तत्पापं लोकगर्हितम् ॥ २९ ॥
विनष्टः पश्यतस्तस्यारक्षिणः शरणागतः । आदाय सुकृतं तस्य सर्वं गच्छेदरक्षितः ॥ ३० ॥

एवं शरणागतरक्षणधर्मं चोदनामभिधाय तदरक्षणे प्रत्यवायमाह–स चेदिति । भयात् तद्रक्षणे तच्छत्रुसकाशात् तस्माद्वा । किरातन्यायेन स्वस्यापि भयमुत्प्रेक्ष्य ततो हेतोः । मोहात् शास्त्रार्थापरिज्ञानात् । कामात् स्वच्छन्दवृत्तिस्वाभाव्यात्, तच्छत्रुसकाशात्किंचिल्लाभापेक्षणाद्वा । स्वया शक्त्या स्वकीयेन केनचित्सामर्थ्यप्रकारेण । स्वसहायसम्पादनस्वकीयद्रव्यदानादिना शरीरत्यागपर्यन्तेनोपायकलापेनेत्यर्थः । यथासत्त्वं सत्त्वमनतिक्रम्य शक्तौ सत्यामपि येन केनचिच्छलेन शक्तिवञ्चनामकृत्वा । तत् अरक्षणम् । पापं प्रत्यवायहेतुः । अनेन निरयहेतुत्वमुक्तम् । न केवलं परलोकबाधकम्, इह लोकेऽपि सर्वजनगर्हितमित्याह लोकगर्हितमिति ॥ २९ ॥ न केवलमैहिकानर्थहेतुत्वमात्रम् पूर्वसञ्चितसकलसुकृत विनाशकमपीत्याह–विनष्ट इति । यः कश्चिद्यं कश्चिच्छरणमागतः । तमरक्षिणस्तस्य पश्यतः रक्षकत्वेन वृते समर्थे च तस्मिन् पश्यति ।

द्दप्तः शरणागमनवेलायामपि गूढहृदयतयाऽनुपशान्तशत्रुभावः । अरिः कृतात्मना प्राणानपि परित्यज्य रक्षितव्य इति सम्बन्धः ॥ २८ ॥ सः भयात्तद्रक्षणे शत्रोः सकाशात्तस्माद्वा स्वस्यापि भयमुत्प्रेक्ष्य ततो हेतोर्वा मोहाच्छास्त्रार्थापरिज्ञानाद्वा कामात्तच्छत्रोस्सकाशात्किंचित्फलापेक्षणाद्वा स्वया शक्त्या स्वकीयेन केनचित्सामर्थ्येन सहायसम्पादनस्वकीयद्रव्यदानादिना वा यथान्यायं न्यायमनतिक्रम्य न रक्षति, शरणागतमिति शेषः । तत् पापं तच्छरणागतारक्षणं पापं पापहेतुः । न केवलं पापहेतुः,इह लोकेऽपि सर्वजनगर्हितमित्याह लोकगर्हितमिति॥२९॥ न केवलमैहिकामुष्मिकानर्थहेतुत्वमात्रम्, पूर्वसञ्चितसकलसुकृतविनाशकत्वमपीत्याह–विनष्ट इति । यः कश्चित् यं कश्चिच्छरणमुपगतः रक्षिणस्तस्य पश्यतः रक्षकत्वेन वृते समर्थे च तस्मिन् पश्यत्येव तेनारक्षितः तदरक्षणेनैव स्वशत्रुसकाशात्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेनारक्षणेनैव स्वशत्रुसकाशाद्विनष्टश्चेत् तस्य अरक्षकस्य सम्बन्धि अनादिकालसञ्चितं सर्वं सुकृतमादाय गच्छति । अस्यारक्षकस्य समार्जित सकलसुकृतक्षयो भवतीत्यर्थः ॥ ३० ॥ कण्डुवचनचतुःश्लोकीतात्पर्यं सङ्ग्रहेणाह—एवं दोषो महानत्र प्रपन्नानामरक्षणे इत्यर्धेन ॥ ३१ ॥ विस्तरेणाह—अस्वर्ग्यमित्यादिना । अस्वर्ग्यं स्वर्गविरुद्धम्, नरकहेतुभूतमित्यर्थः । अयशस्यम् अकीर्तिकरम् । बलवीर्यविनाशनम्, ययोः शारीरबलवीर्ययोः सतो रेव शरणागतो न रक्षितः तयोर्विनाशकमित्यर्थः । अत्र अरक्षणमिति विशेष्यमनुषज्यते ॥ ३२ ॥ एवं शरणागतरक्षणे कण्डुवचनं प्रमाणयित्वा धर्म

एवं दोषो महानत्र प्रपन्नानामरक्षणे ॥ ३१ ॥ अस्वर्ग्यं चायशस्यं च बलवीर्यविनाशनम् ॥ ३२ ॥ करिष्यामि यथार्थं तु कण्डोर्वचनमुत्तमम् ॥ ३३ ॥ धर्मिष्ठं च यशस्यं च स्वर्ग्यं स्यात्तु फलोदये ॥ ३४ ॥ सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥ ३५ ॥

संस्थापनप्रवृत्तस्य ममैतदवश्यं पालनीयमित्याह—करिष्यामीति । उत्तमं लोकाहतम् ॥ ३३ ॥ न केवलमकरणे प्रत्यवायबाहुल्यम्, करणे दृष्टादृष्टाभ्यु दया बहवः सन्तीत्यपि कण्डुवचनतात्पर्यमिति रामः स्वयमाह—धर्मिष्ठमिति । पापनिवर्तकधर्मोपेतत्वं विवक्षितम् । फलहेतुधर्मोपेतत्वस्य स्वर्ग्यमित्य नेनैव सिद्धत्वात् । फलोदये फलप्रदानकाले समुपस्थिते । स्वर्ग्यं स्वर्गहेतुरित्यर्थः । अत्र प्रतिपाद्यगतं धर्मिष्ठत्वादिकं प्रतिपादकवचने समुपचर्यते ॥३४॥ एवं " श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः । सम्यक्सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥ " इति याज्ञवल्क्योक्तधर्मप्रमाणेषु श्रूयत इत्यनेन " तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्ति " इत्यादिना श्रुतिः, कण्डुगाथामुखेन स्मृतिः, कपोतादिना शिष्टाचारः, प्रतिपक्षनिरसनपूर्वक बलवदुपपादनेन स्वप्रियत्वं चेत्येवं चतुर्षु प्रमाणेषु प्रपन्नरक्षणरूपपरमधर्मविषयेषु दर्शितेषु सम्प्रति तत्र प्रमाणं पञ्चमं दर्शयति—सकृदेवेति ।

विनष्टश्चेत्तस्यारक्षकस्य सम्बन्धि अनादिकालसञ्चितं सर्वं सुकृतमादाय गच्छति तत्प्राप्यपुण्यलोकान् स्वयमध्यास्ते ॥ ३० ॥ ३१ ॥ अस्वर्ग्यमित्यादिसार्ध श्लोकमेकं वाक्यम् । कण्डोर्वचनम् । अस्वर्ग्यम् अयशस्यं बलवीर्यविनाशनं च, अरक्षितमिति शेषः । धर्मिष्ठं पापनिवर्तकधर्महेतुकम् । यशस्यं कीर्तिकरम् । फलोदये फलप्रदानकाले समुपस्थिते स्वर्ग्यं स्वर्गप्रदं च स्यात्, रक्षितुरिति शेषः । अतस्तद्वचनं यथार्थं करिष्यामि, कण्डुनोक्तप्रकारेणावश्यमार्तरक्षणं करिष्यामीत्यर्थः । एवं धर्मशास्त्रप्रसिद्धं शरणागतरक्षणरूपं धर्ममवश्यमनुतिष्ठामीत्युक्तम् ॥ ३२-३४ ॥ तिष्ठतु नामैतत्, सर्वलोकस्वामिनस्सर्वलोकशरण्यस्य सर्वज्ञस्य सर्वशक्तेः परमकारुणिकस्य ममानादिसङ्कल्पसिद्धतया सहजव्रतविशेषोऽप्यस्तीत्याह—सकृदेवेति । एकवारमेव प्रपन्नायेति गत्यर्थस्य पदेः ज्ञानार्थत्वान्मानसप्रपत्तिरुक्ता ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सकृदेव एकवारमेव । उपायान्तरेष्वावृत्तिः शास्त्रार्थः प्रपत्तौ त्वनावृत्तिः । " सकृदेव हि शास्त्रार्थः कृतोऽयं तारयेन्नरम् " इत्युक्तेः । प्रपन्नाय "गत्यर्था ज्ञानार्थाः" इति न्यायेनात्र मानसप्रपत्तिरुच्यते । तवास्मीति तु वाचिकी । उभयोरन्यतरेण युक्तायापीत्यर्थः । यद्वा प्रपन्नायेत्युपायः कथ्यते । तवास्मीति च याचत इति तच्छेषवृत्तिलक्षणफलविशेषप्रार्थना । एवम्भूतायाधिकारिणे । सर्वभूतेभ्य इति " भीत्रार्थानां भयहेतुः " इत्यपादानत्वम् । भयहेतुतया शङ्कितेभ्यः सर्वभूतेभ्यः । अभयं भयाभावं ददामि । अभयमेव मोक्षो नाम । "अथ सोऽभयं गतो भवति । आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति" इति ब्रह्मविद्याफलत्वेन श्रवणात् । एतत् तवास्मीति फलविशेषयाच्ञेति पक्षस्यानुकूलम् । पक्षान्तरे त्रैवर्गिकफलानामप्येतदुपलक्षणम् । स्वस्य सकल

आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया । विभीषणो वा सुग्रीव यदि वा रावणः स्वयम् ॥ ३६ ॥

फलप्रदत्वात् । एतद्व्रतं मम व्रतवदिदं कस्यांचिदपि दशायां परित्यागायोग्यमित्यर्थः । अत्र सर्वभूतेभ्य इत्यपि चतुर्थी । प्रपन्नसम्बन्धिभ्योऽपि सर्वभूतेभ्योऽभयं ददामि । " पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम् ॥ " इत्युक्तेः ॥ ३५ ॥ एवमुक्ते सत्यसम्भव दुस्तरं प्रशान्तप्रेमान्ध्यतया प्रसन्नमुखं विभीषणाभिमुखं सुग्रीवमालोक्य तमेव तदानयने नियुङ्क्ते–आनयैनमिति । निवेदयतेति सपरिवारान् युष्मान् पुरुषकारतया वृतवन्तमेनं यूयमेवानयत तथा सत्येतावत्पर्यन्तमस्वीकारकृतदुःखमस्य निवर्तेत । हरिश्रेष्ठ ! तस्य दुःखनिवृत्तये त्वमेव गत्वाऽऽनयसि चेन्मयि स्नेहबद्धचो हरिभ्यः श्रेष्ठं भवन्तमतिक्रम्य किमहं स्वीकरोमि । दत्तमस्याभयं मया अस्य स्वबन्धुत्यागपूर्वकं स्वनिकर्षकीर्तनपुरस्सरं चागतस्य

तवास्मीति च याचते उभयोरन्यतरेणापि युक्तायेत्यर्थः । यद्वा प्रपन्नायेत्युपायः कथ्यते । तवास्मीति तच्छेषवृत्तिलक्षणा फलविशेषप्रार्थना । एवंविधायाधिकारिणे । सर्वभूतेभ्य इति " भीत्रार्थानां भयहेतुः " इति पञ्चमी । भयहेतुतया शङ्कितेभ्यो भूतेभ्यः ब्रह्मपर्यन्तसर्वभूतेभ्योऽभयं भयाभावं ददामि । अभयमेव मोक्षो नाम " अथ सोऽभयं गतो भवति, आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति " इति ब्रह्मविद्याफलत्वेन श्रवणात्तवास्मीति फलविशेषमाप्नोति । पक्षस्यानुकूलं पक्षान्तरं चातुर्वर्गिकफलानामप्येतदुपलक्षणम् । स्वस्य सकलफलप्रदत्वादेतद्व्रतं मम सत्यसन्धस्य कस्यांचिद्दशायामपरित्यागयोग्यमादाय सिद्धं सदाचरणशीलमित्यर्थः । ददामीति वर्तमानप्रयोगेणाभयप्रदानस्य यावदात्मभावित्वं द्योत्यते ॥३५॥ स्वयं विभीषणो वा अन्यो वेति न ज्ञायते, कथमेवमविचार्याभयं दीयत इत्याशङ्क्याह विभीषणो वा भवतु यदि वा रावणो वा भवतु । राघवं शरणं गत इति वाक्यश्रवणानन्तरमेव अभयमस्मै दत्तम्, किं विचारेणेत्याह–आनयैनमिति । अयं विभीषणो वा भवतु यदि वा रावणः स्वयम्, विभीषणवेषधारी तादृशापराधी साक्षाद्रावणो वा भवतु अस्य मया शरणागतरक्षणव्रतैकदीक्षादक्षेण ॥ ६२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मया मित्रभावेनैवालमिति मन्यमानेन अभयं दत्तम्, शरणशब्दश्रवणकाल एवेति शेषः । कथमानयेयमित्याकुलितं समाधत्ते विभीषणो वेत्यादिना। विभीषणोवा "विभीषणस्तु धर्मात्मा" इति विभीषणस्वीकारो धर्मवत्स्वीकारतया नोत्कर्षाय। रावणस्य नृशंसस्येति रावणस्वीकार एवोत्कर्षः स्यादिति । विभीषणस्वीकारे तत्परिकराश्चत्वार एव रक्षिताः स्युः। रावणस्वीकारे तु लङ्कास्थाः सर्वेऽपि रक्षिताः स्युरिति महान् लाभः । सुग्रीव ! अस्माकमागतोऽतिशयो युष्माकं तुल्यः खलु, 'एकं दुःखं सुखं च नौ' इत्युक्तेः। यदि वा रावणः स्वयं यत्सम्बन्धेन विभीषणेऽप्यातिशङ्का स एवास्तु।

रामस्य तु वचः श्रुत्वा सुग्रीवः प्लवगेश्वरः। प्रत्यभाषत काकुत्स्थं सौहार्देन प्रचोदितः ॥ ३७ ॥
किमत्र चित्रं धर्मज्ञ लोकनाथ सुखावह। यत्त्वमार्य प्रभाषेथाः सत्त्ववान् सत्पथे स्थितः ॥ ३८ ॥

स्वयम् सीतामपुरस्कृत्य स्वयमागतो रावणो वाऽस्तु। यद्वा स्वयम् अयं यदि विभीषणो न भवति किंतु कामरूपी रावण एव विभीषणभूमिकां परिगृह्य यद्यागतः तथाप्यस्याभयं मया दत्तम् । त्वमपि रावणोऽयं न तु विभीषण इति विज्ञापनायापि पुनर्नागच्छेः, किंत्वानयैवेत्यर्थः ॥ ३६ ॥ अथ सुग्रीवः क्वचिदप्यसम्भावितं रामस्य शरणागते स्वस्मिंश्च सौहार्दातिशयमालोच्य विस्मयपरवश आह-रामस्येति । सौहार्देन प्रचोदितः सर्वानपि दोषाननालोच्य विपरीतप्रवृत्तान् पूर्वसुहृदो नानाप्रकारैरनुनीय 'यदि वा रावणः स्वयम्' इति वदतो रामचन्द्रस्य कोऽयं सौहार्दातिशय इति विस्मयेन प्रेरित इत्यर्थः ॥ ३७ ॥ एवं विस्मयातिशयाद्धृकुसुपकान्तो रामस्य स्वाभाविकान् कल्याणगुणौघानालोच्य सहजधर्मत्वादेतद्रामे नाश्चर्यकरमित्याह-किमिति। धर्मज्ञ ! धर्मसूक्ष्मतत्त्वज्ञस्य तव धर्मानुष्ठानं किमाश्चर्यम्। लोकनाथ ! भृत्यवर्गसंरक्षणं स्वामिनः किं चित्रम्। सुखावह ! स्वयमवाप्तसमस्तकामत्वेन परप्रयोजनैकपरायणस्य सर्वसुखकारिणस्तव शरणागतेषु समाश्रितेष्वस्मासु सुखकारित्वे को वा विस्मयः। आर्य समीचीनम् । सत्त्ववान् प्रशस्ताध्यवसायवान् । "द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु" इत्यमरः। दृढव्रतस्य व्रतपरिपालनं किमद्भुतम्। यद्वा सत्त्वं बलम्, सर्वशक्तेस्तव

अभयं दत्तम्, त्वमपि रावणोऽयं न तु विभीषण इति विज्ञापनाय पुनः पुनर्नागच्छेः किन्त्वानयैवेत्यर्थः ॥३६॥३७॥ अथ सुग्रीवः कुत्रचिदप्यसम्भावितशरणागतरक्षणं स्वस्मिन् सौहार्दातिशयं चालोच्य विस्मयपरवश आह-किमत्रेति । धर्मज्ञ शरणागतरक्षणधर्मरहस्यज्ञ ! लोकनाथ सर्वजनस्वामिन् ! सुखावह सर्वजनानन्दकारिन् ! त्वं सत्त्ववान् सत्त्वगुणैकनिष्ठः सत्पथे स्थितस्त्वम् आर्य कल्याणं प्रभाषेथा इति यत् अत्र किं चित्रम् ? धर्मसंस्थापनार्थमेवावतीर्णस्य तव शरणागत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

समाश्रितभयनिवारणं किमाश्चर्यम् । सत्पथे स्थितः, धर्मसंस्थापनार्थमेवावतीर्णस्य शरणागतरक्षणरूपविशेषधर्मानुष्ठानं नाश्चर्यमित्यर्थः । प्रपन्न संरक्षणे धर्मज्ञत्वादिष्वन्यतम एव गुणः पर्याप्तः, किमुत सर्वेऽपि समुदिता इति भावः ॥३८॥ किमस्मत्प्रशंसनेन त्वन्मनःप्रवृत्तौ खलु विभीषणो ग्राह्यः स्यात्तत्राह–ममेति। मम 'वध्यतामेष तीव्रेण दण्डेन' इत्युक्तवतोऽपि। न केवलमस्मिन्नर्थे मदन्तःकरणप्रवृत्तिरेकमेव प्रमाणम्, प्रमाणान्तराण्यपि सन्ती त्याह अनुमानादिति। अनुमानात् त्वया हनुमता चोक्तयुक्तिकदम्बात् भावात् भावबोधकान्मुखप्रसादादिलिङ्गात् । सर्वतः सर्वत्र, अन्तर्बहिश्च

मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् । अनुमानाच्च भावाच्च सर्वतः सुपरीक्षितः ॥ ३९ ॥ तस्मात् क्षिप्रं सहास्माभिस्तुल्यो भवतु राघव । विभीषणो महाप्राज्ञः सखित्वं चाभ्युपैतु नः ॥४०॥ ततस्तु सुग्रीववचो निशम्य तद्धरीश्वरेणाभिहितं नरेश्वरः । विभीषणेनाशु जगाम सङ्गमं पतत्रिराजेन यथा पुरन्दरः ॥ ४१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टादशः सर्गः ॥ १८ ॥

इत्यर्थः । यद्वा अनुमानात् हृदयप्रकाशक मुखविकासादिलिङ्गात् । भावादार्तध्वनिप्रकाशितमृदुस्वभावात् । चशब्देन वध्यतामपीत्युक्तावस्थायां न त्यजेयमिति कालेऽप्येकरूपत्वं समुच्चीयते । सुपरीक्षितः संशयविपर्ययराहित्येन परीक्षितः । अन्तरात्मा अन्तःकरणम् । चापीति रामान्तःकरणसमु च्चयार्थः ॥ ३९ ॥ पूर्वमानयैनमिति नियुक्तमनुतिष्ठति–तस्मादिति । क्षिप्रं पूर्वमज्ञानवशान्मया पापमाचरितम् । तत्त्वविचारे त्वयं क्षणमात्रं विलम्बा नर्ह इति भावः । तुल्यो भवतु निवेदयत मामिति पुरुषकारकरणायाभ्यर्थितानां नृशंसानामस्माकं पुरुषकारत्वं सम्पादयितुमेव तवायं प्रयासश्च सिद्धः । इतः परमस्माभिः पुरुषकारव्यापारः क्रियत इत्यर्थः । एवं विभीषणस्य पुरुषार्थमर्थयित्वा तत्सख्यरूपं स्वेषां पुरुषार्थमर्थयते–विभीषण इति । महाप्राज्ञः फलसाधनोपयोगिज्ञानवान् । न केवलं ममैव, सर्वेषामिदं फलं समानमिति दर्शयितुं नः सखित्वमित्युक्तम् ॥ ४० ॥ एवं सुहृत्तरसुग्रीवा

रक्षणरूपविशेषधर्मानुष्ठानं नाश्चर्यमेवेत्यर्थः । प्रपन्नसंरक्षणे धर्मज्ञत्वादिष्वन्यतम एव गुणः पर्याप्तः किमुत सर्वेऽपि समुदिताश्चेदिति भावः ॥३८॥ मम "वध्यतामेष तीव्रेण दण्डेन" इत्युक्तवतः अन्तरात्मा अन्तःकरणं विभीषणं शुद्धं वेत्ति । किञ्चानुमानात् त्वदुक्तयुक्तिसमूहात्, भावात् अभिप्रायबोधकमुखप्रसादादिलिङ्गात् । सर्वतः अन्तर्बहिश्च सुपरीक्षितः शुद्धत्वेन सम्यङ्निश्चितः ॥ ३९ ॥ ४० ॥ तत इति । नरेश्वरः यथोक्तं यथावदुक्तं तद्वचनं ' मम चाप्यन्तरात्माऽयं शुद्धं वेत्ति विभीषणम् '

स०–हरीश्वरेण हनुमताऽभिहितं विभीषणेन सङ्गमं सख्यं जगाम, मनसेति शेषः । पतत्रिराजेन गरुडेन पुरन्दरो यथा अमृतहरणकाले सख्यं जगाम तद्वत् ॥ ४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्यनुज्ञानानन्तरं शरण्यस्य शरणागतसङ्गमविशेषं दर्शयति—तत इति । सुग्रीववचो निशम्य ततो हरीश्वरेणाभिहितं विभीषणेन सङ्गमं जगामेत्यन्वयः । अभिहितं हे विभीषण ! राघवस्तवाभयं दत्तवान् राघवमुपयाहीत्येवं सुग्रीवोक्तम् । नरेश्वरः सङ्गमं जगामेति सङ्गमोऽपि कर्तुरीप्सिततमत्वकथनेन रामस्यायं लाभ इति गम्यते । न त्यजेयं कथंचनेत्यादिभिः सुग्रीवादिवाक्यरूपविरोधिनिरसनपूर्वकं श्रीविभीषणस्वीकारं प्रतिश्रुत्य कथंचित्सुग्रीवादिवाक्यजनितं विलम्बमविषह्य त्वरया रक्षितुं स्वयमेव तेन सङ्गत इत्याह विभीषणेनाशु जगाम सङ्गममिति । आशु त्वरितम् । आश्रितसंश्लेषे स्वयं त्वरातिशयवानिति भावः । पुरन्दरो यथा पतत्रिराजेन सङ्गमं स्वलाभममन्यत तथाऽयमपीति दृष्टान्ताभिप्रायः । यद्वा सुग्रीवस्य बुद्धिः पुनर्विपरीता चेत्कार्यहानिरिति शीघ्रं जगाम ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशः सर्गः ॥१८॥

राघवेणाभये दत्ते सन्नतो रावणानुजः । विभीषणो महाप्राज्ञो भूमिं समवलोकयन् ।
खात्पपातावनौ हृष्टो भक्तैरनुचरैः सह ॥ १ ॥

एवं शरण्यस्य शरणागतसङ्गमरूपफलमुक्त्वा शरणागतस्य शरण्यसेवाख्यपुरुषार्थलाभमाह—राघवेणेत्यादिसार्धश्लोक एकान्वयः । अभये स्वापेक्षिते सर्वभूताभये दत्ते । सन्नतः 'गुणैर्दास्यमुपागतः' इति न्यायेन पूर्वश्रुतेभ्योऽप्यधिकानां रामकल्याणगुणानां साक्षात्कारेण सम्यक्प्रह्वीभूताङ्गः । महाप्राज्ञः निरपायोपायपरिग्रहेण परमपुरुषार्थलाभाद्वेदशास्त्राभ्यासातिशयजनितप्रज्ञातिशयस्य फलमिदानीं निर्वृत्तमिति भावः । भूमिं समवलोकयन् अन्तरङ्गसचिवसमूहसम्मर्दनिरवकाशेऽपि रामपुरोदेशे सचिवैरेव सयूथ्यतामापन्नस्य विभीषणस्य स्वपरिषन्मध्ये दत्तं भूतलावकाशं सम्यक्पश्यन् । खादवनौ पपातेति प्राथमिको दूरप्रणाम उच्यते । प्रणामाद्ययोग्यस्थानमाकाशं परित्यज्य पाणिपादशिरःप्रभृतिभिरष्टाङ्गैर्भूमिं प्राप्तवानित्यर्थः ।

इत्यादि सुग्रीववचनं निशम्य ततः हरीश्वरेणाभिहितं विभीषणसङ्गमं जगामेति सम्बन्धः ॥ ४१ ॥ इति श्रीमहे० श्रीरामा० युद्धकाण्ड० अष्टादशः सर्गः ॥ १८ ॥
राघवेणेति । सन्नतः स्वामिसंनिधौ पादपुरस्सरावरोहणमनुचितमिति मत्वा प्रह्वीभूतशिरस्कस्सन्नित्यर्थः । भूमिम् आनयनोत्सुकैः सुग्रीवादिभिरित आगच्छेति

स०—सन्नतः प्रवणः । सत्स्वभावत्वात्सत्सु नत इति वा । भूमिं समवलोकयत्, अवतरणायेति भावः । हृष्टः महालाभो जात इति प्रीतमनाः । रामस्य पादयोः, अनेन न केवलमयमम्परचर ऐहिकफलावलम्बी, किन्तु मोक्षज्ञानानन्दार्थी चेति सूचयति । यथोक्तं बृहदारण्यकोपनिषद्भाष्ययोः "सुवरिति प्रतिष्ठे द्वे एते प्रतिष्ठे द्वे एते अक्षरे" "स्वित्यानन्दस्समुद्दिष्टो वरिति ज्ञानमुच्यते । मोक्षदानेन तदानात्सुवरस्य पदद्वयम् ।

For Private And Personal Use Only

नन्वपेक्षितमभयं दत्तमेव पुनः किमर्थं प्रणनामेत्यत्राह हृष्ट इति । रामस्य स्वरूपरूपगुणानुभवजनितहर्षविवशीकृतशरीर एव प्रणतः । न तु किमपि प्रयोजनमुद्दिश्येत्यर्थः । भक्तैरनुचरैः सहेति "राघवं शरणं गतः । निवेदयत माम्" इति विभीषणस्यैकस्यैवोपायानुष्ठानश्रवणेऽपि तदनुबन्धिनां तद्भक्तिवशादेव रामपरिचरणं समानमित्युच्यते। उक्तं हि "पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदम् ॥" इति ॥ १ ॥ पूर्वं वाचिका प्रपत्तिः कृता, सम्प्रति कायिकशरणागतिं प्रयुङ्क्ते–स त्विति । स तु पूर्वस्माद्विलक्षणः, संशयविपर्ययनिवृत्त्या अनुकूलत्व

स तु रामस्य धर्मात्मा निपपात विभीषणः । पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः ॥ २ ॥
अब्रवीच्च तदा रामं वाक्यं तत्र विभीषणः । धर्मयुक्तं च युक्तं च साम्प्रतं सम्प्रहर्षणम् ॥ ३ ॥

निर्णयविषय इत्यर्थः । धर्मात्मा सर्वावस्थास्वप्यप्रच्युतशरणागतिधर्मनिष्ठावान् । वध्यतामिति शङ्क्यतामिति न त्यजेयमिति आनयैनमिति अस्माभिस्तुल्यो भवत्विति चोक्तासु सर्वावस्थास्वप्यविचारेणैकरूपचित्त इत्यर्थः । अनेन विभीषणस्य महाविश्वास उक्तः । शरणान्वेषी कृतशरणवरणः । विभीषणः, रामस्य स्वस्मिन् पक्षपातातिशयद्योतकाभिरामाकारस्य । पादयोः स्तनन्धयस्य मातृस्तनवत् श्रीपादावेव स्वस्य भोग्यभूताविति पपात, अन्यैरागत्य प्रशिथिलावयववान् सम्यग्योजयित्वा यथोत्थाप्येत तथा पपात । चतुर्भिः सह राक्षसैः, करचरणाद्यवयववत्तत्परतन्त्रैरित्यर्थः । तत्रानुकूल्यसङ्कल्पप्रातिकूल्यवर्जनवत्त्वमुक्तम् । धर्मात्मेति महाविश्वासः शरणान्वेषीति गोप्तृत्ववरणं पपातेत्यात्मनिक्षेप इति साङ्गशरणागतिः कृता भवति ॥ २ ॥ एवं कायिकी शरणागतिरुक्ता, अथ वाचिकीं दर्शयति–अब्रवीदिति । तदा पादपतनसमये । तत्र सुग्रीवादीनां सर्वेषामेकमत्यवति सदसि ।

निर्दिष्टां भुवम् । हृष्टः अभिमतवस्तुलाभजनितप्रीतियुक्तः ॥ १ ॥ पादयोर्निपपातेत्यनेन स्तनन्धयस्य मातुः स्तनाविव शरणागतस्य शरण्यस्य पादारविन्दद्वयमेव भोग्यत्वेन परमप्राप्यमिति द्योत्यते ॥ २ ॥ अब्रवीदिति । तत्र सुग्रीवादिसचिवसमेतरामसन्निधौ । युक्तं युक्तियुक्तम् । साम्प्रतं संप्रहर्षणं सद्यस्सन्तोषकरम् ॥ ३ ॥

–दक्षिणश्चेति सव्यश्च" इति । अथ अवतरणानन्तरम् । चतुर्भिस्सचिवैः सह सहितः । यः निपपाता नितरां पान्ति जगदिति निपाः महायाः तान् पाति स्वभावेन न फलाशयेति निपपाता । तं रामं प्रति विभीषणोऽब्रवीदिति श्लोकद्वयस्यैकान्वयः । अथवा स्वयं पादयोर्निपपात । स्वामित्वात्स्वस्य प्रथमतः प्रणामः । अथ अनन्तरं स विभीषणः चतुर्भिः सचिवैस्सह निपपात । अथवा खात्पपातेति पूर्वम् । अनन्तरं रामस्य समीपत इति शेषः । अथ तदनन्तरं चतुर्भी राक्षसैस्सह रामस्य पादयोर्निपपात । एतं विशेषं तुशब्द उद्घोषयति । अथ विभीषणस्य रामपादनिपतनानन्तरम् । स रावणः चतुर्भी राक्षसैः कुम्भकर्णमहापार्श्वेन्द्रजित्प्रहस्तैस्सह निपपातेति मध्य एष्यन्नयेन कविवचनं वा चतुर्भिरभिहितैस्सहेतरराक्षसैर्वा रामप्रणिपातस्तन्निपातहेतुरिति भावः ॥ १ ॥ २ ॥

॥ ६४ ॥

रामं पूर्वं सुग्रीवादिपुरुषकारभूतान् प्रति, सम्प्रति शरण्यमेव। धर्मयुक्तं शरणागत्यङ्गानुकूल्यसङ्कल्पादिधर्मयुक्तम् । युक्तं समर्थकारुणिकशरण्याविषयतया योग्यम् । साम्प्रतं सम्प्रहर्षणम् पूर्वं 'राघवं शरणं गतः' इत्युक्तिदशायां सुग्रीवादीनां श्रुतिकटुकं जातम्, इदानीं सर्वसम्प्रहर्षणम् ॥ ३ ॥ अनुज इति। पूर्वं निवेदयतेत्यत्र पुरुषकारभूतान् प्रत्युक्तम्, इदानीं साक्षाच्छरण्यं प्रतीति न पुनरुक्तिः । पूर्वार्धेन स्वदोषख्यापनादाकिञ्चन्यमुक्तम् । सर्वभूतानां शरण्यं रावणस्यापि शरणं भवामीति कृतसङ्कल्पम् । भवन्तं ज्ञानशक्त्यादिपरिपूर्णम् ॥ ४ ॥ अनन्तरं प्राप्यान्तरनिरसनपूर्वकं त्वमेव प्राप्य इत्याह–

अनुजो रावणस्याहं तेन चाप्यवमानितः । भवन्तं सर्वभूतानां शरण्यं शरणागतः ॥ ४ ॥
परित्यक्ता मया लङ्का मित्राणि च धनानि वै । भवद्गतं मे राज्यं च जीवितं च सुखानि च ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत् । वचसा सान्त्वयित्वैनं लोचनाभ्यां पिबन्निव ॥ ६ ॥

परित्यक्तेति । लङ्का वासस्थानम् । मित्राणि सुहृदः । धनानि तद्द्वारा समागतानि, सोपाधिकानि वस्तूनि प्राप्यान्तराणि त्यक्तानीत्यर्थः । भवद्गतं त्वदधीनम् । राज्यमिति सर्वपरिग्रहोपलक्षणम् । जीवितमिति धारकपोषकभोग्योपलक्षणम् । सुखानि ऐहिकामुष्मिकरूपाणि । इदं सर्वं भवद्गतं भवत्कैङ्कर्यान्तर्गतम्, भवत्कैङ्कर्यं विना अन्यन्नाहमभ्यर्थयामीत्यर्थः ॥ ५ ॥ तस्येति । तस्य सर्वपरिग्रहत्यागपूर्वकं रामे न्यस्तभरस्य । तद्वचनं रामकैङ्कर्यमेव सकलभोग्यजातमिति वाक्यम् । सान्त्वयित्वा शरणं गत इत्युक्तिसमय एव स्वीकार्योऽसि एतावत्पर्यन्तं विलम्बः क्षन्तव्य इति सान्त्ववचनान्युक्त्वा

'त्यक्त्वा पुत्रांश्च दारांश्च राघवं शरणङ्गतः' इत्यादि सुग्रीवादिसर्ववानरसन्निधौ कृतं प्रलपनं शरण्यरामप्रीतिवर्द्धनाय पुनरप्यनुसन्धत्ते–अनुज इति ॥ ४ ॥ परित्यक्तेति । मे राज्यादिकं सर्वं भवद्गतं वै भवदधीनमेव ॥ ५–११ ॥

स०–**भवन्तं सर्वभूतानां शरण्यम्** अनेनाग्रजस्य महाद्रोहेण सहवासायोग्यतां स्वस्य श्रीरामे भगवदवतारतामतिं च सूचयति ॥४॥ **मित्राणि** पूर्वं मित्रवदनुकृतानि । परित्यक्तानीति लिङ्गवचनव्यत्यासेन वा यस्यां मित्राणि धनानि च सा लङ्का परित्यक्तेति वाऽन्वयः । मे राज्यम् । जीवितं जीवनम् । सुखानि ऐहलौकिकानि पारलौकिकानि च भवद्गतानि पूर्वस्मात्परित्यक्ता मया लङ्केत्याहृतं सद्भवद्गतेति विपरिणतेनान्वेति। परित्यक्तः आमयो रोगरूपी प्राकाराद्यङ्गभङ्गकारित्वाद्रावणः यया सा लङ्का भवद्गता । एतेन एकां मूलनगरीं स्थापयित्वा वा स्वस्यास्त्विति रामेण गृहीत्वा राज्यप्रदानं नाभिप्रेतं विभीषणेन रामपदान्यतायेनेति भावः ॥ ६ ॥

लोचनाभ्यां पिबन्निव सान्त्ववचनेन तस्य हृदयमार्द्रं कृत्वा अत्यादरेण विलोकयन्नित्यर्थः ॥ ६ ॥ एवं विभीषणेन कायिककैङ्कर्यं प्रार्थिते कायिककैङ्कर्यं पश्चात् भविष्यतीति सम्प्रति वाचिककैङ्कर्यं कुर्विति दर्शयति-आख्याहीति । अत्र भवदीयानामित्यनुक्त्वा राक्षसानामित्युक्तेरयं राक्षसजातिर्न भवति किन्त्विक्ष्वाकुवंश्य इति रामो मेने इति गम्यते । भ्रमरकीटन्यायेन सद्यः स्वसाम्यप्रदं हि भगवदाश्रयणवैभवम् ॥ ७ ॥ एवमिति ।

आख्याहि मम तत्त्वेन राक्षसानां बलाबलम् ॥ ७ ॥ एवमुक्त तदा रक्षो रामेणाक्लिष्टकर्मणा । रावणस्य बलं सर्व माख्यातुमुपचक्रमे ॥ ८ ॥ अवध्यः सर्वभूतानां गन्धर्वासुररक्षसाम् । राजपुत्र दशग्रीवो वरदानात् स्वयम्भुवः ॥ ९ ॥ रावणानन्तरो भ्राता मम ज्येष्ठश्च वीर्यवान् । कुम्भकर्णो महातेजाः शक्रप्रतिबलो युधि ॥ १० ॥ राम सेनापतिस्तस्य प्रहस्तो यदि वा श्रुतः । कैलासे यन सङ्ग्रामे माणिभद्रः पराजितः ॥ ११ ॥ बद्धगोधाङ्गुलित्राण स्त्ववध्यकवचो युधि । धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित् ॥ १२ ॥ संग्रामसमयव्यूहे तर्पयित्वा हुताशनम् । अन्तर्धानगतः शत्रूनिन्द्रजिद्धन्ति राघव ॥ १३ ॥ महोदरमहापार्श्वौ राक्षसश्चाप्यकम्पनः । अनीकस्थास्तु तस्यैते लोकपालसमा युधि ॥ १४ ॥

स्पष्टम् ॥ ८ ॥ अवध्य इति । सर्वभूतानामित्येतद्गन्धर्वादिव्यतिरिक्तपरम् । राजपुत्रेति सम्बुद्ध्या मानुषवध्यत्वं द्योतयति ॥ ९ ॥ प्रतिबलः समान बलः ॥ १० ॥ कैलासे, वर्तमान इति शेषः । माणिभद्रः कुबेरसेनापतिः । यदि वा श्रुत इति, हनुमत इति शेषः ॥ ११ ॥ बद्धेति । अङ्गुलीस्त्रायत इत्य ङ्गुलित्राणम् अङ्गुलिकवचम् । " गोधा तलं ज्याघातवारणे " इत्यमरः । अनेन निरन्तरशरसन्धायीति गम्यते । अवध्यकवचः अभेद्यकवचः । युधि अदृश्यो भवतीत्यन्वयः । हनुमद्ग्राहकत्वेन प्रसिद्धत्वात्तस्य रावणपुत्रत्वानुक्तिः ॥ १२ ॥ कुतोऽस्यादृश्यत्वशक्तिः अदृश्यश्च किं करोतीत्याह- सङ्ग्रामेति । सङ्ग्रामसमयकृतव्यूहे । तर्पयित्वा होमैः प्रीणयित्वा ॥ १३ ॥ महोदर इत्यादि श्लोकद्वयम् । अनीकस्थाः सेनापतयः । एते महोदरादयः ।

बद्धगोधाङ्गुलित्राणः गोधा ज्याघातवारणम् । अङ्गुलित्राणमङ्गुलिवारणम् ॥ १२ ॥ सङ्ग्रामसमयव्यूहे सङ्ग्रामसमयकृतव्यूहे ॥ १३ ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशकोटिसहस्राणि, सन्तीति शेषः॥१४॥१५॥ स तैरित्यर्द्धम्॥१६॥ न केवलं योधनम्, पराजिताश्च ते लोकपाला इत्याह–सह देवैरित्यर्धमेकं वाक्यम्। देवैः लोकपालभिन्नैः। ते लोकपालाः। महात्मना महाधैर्येण ॥ १७ ॥ अन्वीक्ष्य आलोच्य। सर्वं कर्तव्याकर्तव्यम् ॥ १८ ॥ यानीति । कर्मापदानानि "अपदानं कर्मवृत्तम्" इत्यमरः। करिकलभ इत्यत्रेव कर्मशब्दप्रयोगः। शौर्यकृतव्यापारा इत्यर्थः। अवगच्छामि अवधारयामीत्यर्थः॥ १९॥ आलो

दशकोटिसहस्राणि रक्षसां कामरूपिणाम्। मांसशोणितभक्षाणां लङ्कापुरनिवासिनाम् ॥ १५ ॥ स तैस्तु सहितो राजा लोकपालानयोधयत् ॥ १६ ॥ सह देवैस्तु ते भग्ना रावणेन महात्मना ॥ १७ ॥ विभीषणवचः श्रुत्वा रामो दृढपराक्रमः। अन्वीक्ष्य मनसा सर्वमिदं वचनमब्रवीत् ॥ १८ ॥ यानि कर्मापदानानि रावणस्य विभीषण। आख्यातानि च तत्त्वेन ह्यवगच्छामि तान्यहम् ॥ १९ ॥ अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम्। राजानं त्वां करिष्यामि सत्यमेतद् ब्रवीमि ते ॥ २० ॥ रसातलं वा प्रविशेत् पातालं वापि रावणः। पितामहसकाशं वा न मे जीवन् विमोक्ष्यते ॥ २१ ॥ अहत्वा रावणं सङ्ख्ये सपुत्रबलबान्धवम्। अयोध्यां न प्रवेक्ष्यामि त्रिभिस्तैर्भ्रातृभिः शपे ॥ २२ ॥ श्रुत्वा तु वचनं तस्य रामस्याक्लिष्टकर्मणः। शिरसाऽऽवन्द्य धर्मात्मा वक्तुमेवोपचक्रमे ॥ २३ ॥

चितमर्थमाह–अहमित्यादिना ॥ २० ॥ रसातलं भूविवरम्। पातालम् अधोलोकम्। पितामहसकाशं स्ववरप्रदसमीपम्। उपरितनलोकावधिभूतं सत्य लोकं वा। मे मत्तः ॥ २१ ॥ उक्तमर्थं व्यतिरेकमुखेन द्रढयन् सत्यमेतद्ब्रवीमि त इत्युक्तं विवृणोति–अहत्वेति। सङ्ख्ये युद्धे। तैः प्रसिद्धैः। भ्रातृभि रिति हेतुविवक्षया तृतीया ॥ २२ ॥ स्वानभिमतराज्यप्रदानप्रतिज्ञानात् वन्दनपूर्वकं स्वाभिमतं कैङ्कर्यमेव प्रयोजनान्तरनिवृत्तयेऽर्थयते–श्रुत्वेत्या

दशकोटीति प्रधानराक्षसविवक्षया ॥ १५-२० ॥ रसातलं भूमिसन्निहितलोकम्। पातालम् अधोलोकावधिभूतं लोकम्। पितामहसकाशं ब्रह्मलोकम्। मे, पुरतः इति शेषः ॥ २१ ॥ अहत्वेति। तैस्सौभ्रात्रसम्पन्नतया प्रसिद्धैः॥ २२ ॥ २३ ॥

स०–रामप्रतिज्ञां श्रुत्वा विभीषणोऽपि प्रतिशृणोतीत्याह–वक्तुमेवेति। एवकारेण सर्वस्वामिनो रामस्य साहाय्यकरणवचनमुपहास्यम्, तथापि लौकिकरीत्यनुपालनार्थमिदमिति सूचयति ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिना । आवन्चोति च्छेदः ॥ २३ ॥ राक्षसानामिति । साह्यं साहाय्यम् । सहशब्दः सहायवाची । यथाप्राणं यथाबलम् ॥ २४ ॥ एवं कैङ्कर्य व्यतिरिक्तफलमनाकाङ्क्षमाणं विभीषणं परिष्वङ्गेन वशीकृत्यानुषाङ्गिकमपि फलं मत्प्रदत्तमङ्गीकर्तव्यमित्यभिप्रायेण लक्ष्मणमादिशति–इतीति । तेनेति । तेन समुद्रजलेन । महाप्राज्ञं कैङ्कर्यपर्यन्तस्वशेषत्वस्वरूपज्ञम् । मयि प्रसन्ने सतीत्यनेन अभिषेको विभीषणेनानाकाङ्क्षित इति गम्यते । मानद बहुमानप्रद, मत्प्रसादे सति फलप्रदस्त्वमिति भावः ॥ २५ ॥ २६ ॥ एवमिति । मध्ये वानरमुख्यानामित्यनेन महत्समाजे

राक्षसानां वधे साह्यं लङ्कायाश्च प्रधर्षणम् । करिष्यामि यथाप्राणं प्रवेक्ष्यामि च वाहिनीम् ॥ २४ ॥ इति ब्रुवाणं रामस्तु परिष्वज्य विभीषणम् । अब्रवील्लक्ष्मणं प्रीतः समुद्राज्जलमानय ॥ २५ ॥ तेन चेमं महाप्राज्ञमभिषिञ्च विभीषणम् । राजानं रक्षसां क्षिप्रं प्रसन्ने मयि मानद ॥ २६ ॥ एवमुक्तस्तु सौमित्रिरभ्यषिञ्चद्विभीषणम् । मध्ये वानरमुख्यानां राजानं राजशासनात् ॥ २७ ॥ तं प्रसादं तु रामस्य दृष्ट्वा सद्यः प्लवङ्गमाः । प्रचुक्रुशुर्महात्मानं साधु साध्विति चाब्रुवन् ॥ २८ ॥ अब्रवीच्च हनूमांश्च सुग्रीवश्च विभीषणम् ॥ २९ ॥ कथं सागरमक्षोभ्यं तराम वरुणालयम् । सैन्यैः परिवृताः सर्वे वानराणां महौजसाम् ॥ ३० ॥

कृतमलङ्घनीयमिति द्योत्यते । राजशासनादित्यनेनालङ्घनीयं राजशासनमिति विभीषणोऽनुमेन इति भाव्यते ॥ २७ ॥ प्रचुक्रुशुः हर्षनादं चक्रुः । महात्मानं रामम् । अब्रुवन् प्राशंसन्नित्यर्थः ॥ २८ ॥ अथ समयान्तरे कुत्रचिदेकान्ते प्रदेशे हनुमत्सुग्रीवौ स्थलज्ञं विभीषणं वानरसेनातरणोपाय मपृच्छतामित्याह–अब्रवीच्चेति । इदमर्धमेकं वाक्यम् ॥ २९ ॥ कथमिति । दुस्तरत्वे हेतुः अक्षोभ्यमिति । तत्रापि हेतुः वरुणालयमिति ॥ ३० ॥

राक्षसानामिति । साह्यं साहाय्यम् ॥ २४–३० ॥

स०–राजानं लङ्कायाः । राजशासनात् रामाज्ञायाः । रावणावरजस्य स्वावरजेनाभिषेचनं युक्तमिति वा इदानीं रावणमारणदीक्षापन्नाग्रजान्तरस्याकरणीयतया वा साक्षात्पितामह एवाभिषेकयोग्यो नान्य इति वा लक्ष्मणेनाभिषेचनमिति मन्तव्यम् । राजशासनात् राजा रावणः तच्छासनं शिक्षां तृणीकृत्येति वा । ल्यब्लोपनिमित्ता पञ्चमी ॥ १७ ॥

For Private And Personal Use Only

बुद्धिमन्तो भवन्त एव विचारयन्तीत्यत्राह—उपायं नाधिगच्छाम इति । सर्वे, वयमिति शेषः ॥ ३१ ॥ समुद्रमित्यर्धम् । लक्ष्मणव्यावृत्तये राजेत्युक्तिः ॥ ३२ ॥ शरणवरणं व्याजीकृत्य समुद्रः प्रत्यासक्त्यतिशयात्सद्य उपायं दिशेदित्यभिप्रायेणाह—खानित इति । खानितः, स्वपुत्रैरिति शेषः । न केवल मुत्पत्तिमात्रं तन्मूलम्, किंत्वतिशयोऽपि तदधीन इत्याह अप्रमेयो महोदधिरिति । सगरेण रामकूटस्थेन । महामतिः उपकारज्ञ इत्यर्थः ॥ ३३ ॥

उपायं नाधिगच्छामो यथा नदनदीपतिम् । तराम तरसा सर्वे ससैन्या वरुणालयम् । एवमुक्तस्तु धर्मज्ञः प्रत्युवाच विभीषणः ॥ ३१ ॥ समुद्रं राघवो राजा शरणं गन्तुमर्हति ॥ ३२ ॥ खानितः सगरेणायमप्रमेयो महोदधिः । कर्तु मर्हति रामस्य ज्ञात्वा कार्यं महामतिः ॥ ३३ ॥ एवं विभीषणेनोक्तो राक्षसेन विपश्चिता । आजगामाथ सुग्रीवो यत्र रामः सलक्ष्मणः ॥ ३४ ॥ ततश्चाख्यातुमारेभे विभीषणवचः शुभम् । सुग्रीवो विपुलग्रीवः सागरस्योपवेशनम् ॥ ३५ ॥ प्रकृत्या धर्मशीलस्य राघवस्याप्यरोचत ॥ ३६ ॥ स लक्ष्मणं महातेजाः सुग्रीवं च हरीश्वरम् । सत्क्रियार्थं क्रियादक्षः स्मितपूर्वमुवाच ह ॥ ३७ ॥

एवमिति । राक्षसेनेति स्थलज्ञतोक्ता । विपश्चितेति तात्कालिकबुद्धिमत्ता । आजगामेत्यनेन कालान्तरे देशान्तरे सुग्रीवादिप्रश्न इति गम्यते ॥ ३४ ॥ ततश्चेति । विपुलग्रीव इत्यनेन कुतूहलित्वमुक्तम् । आरेभ इत्यनेन आरम्भमात्र एव सूक्ष्मज्ञतया रामेण सहसा सुग्रीवविवक्षितं ज्ञातमित्युच्यते । उपवेशनम् उपासनम् ॥ ३५ ॥ प्रकृत्येत्यर्द्धमेकं वाक्यम् । अरोचत तदुपवेशनमित्यनुषङ्गः ॥ ३६ ॥ स इति । महातेजाः तात्कालिकहर्षप्रकाशक

उपायैरिति । उपायैः कैश्चिदुपायैः नदनदीपतिमधिगच्छामः अधिगमिष्यामः । ससैन्याः सर्वे तरसा वरुणालयं यथा तराम तदृशोपायान् वदेति शेषः उपायं नाधिगच्छामः इति पाठे—ससैन्या नदनदीपतिं वरुणालयं यथा तराम तादृशमुपायं नाधिगच्छामः, न जानीम इत्यर्थः ॥ ३१ ॥ ३२ ॥ शरणवरण मात्रेण कथमसौ कार्यं करिष्यतीत्याशङ्क्य कार्यकरणोपयुक्तं राघवसमुद्रयोः सम्बन्धं दर्शयति—खानित इति ॥ ३३ ॥ यत्र रामो वर्तते तं देशं लक्ष्मणसुग्रीव श्चाजगामेति सम्बन्धः ॥ ३४ ॥ ततश्चेति । सागरस्योपवेशनम् उपासनं राघवस्याप्यरोचत ॥ ३५ ॥ ३६ ॥ स इति । सत्क्रियार्थं लक्ष्मणसुग्रीवयोस्सम्मानार्थं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देहकान्तिमान् । अन्यान्विहाय सुग्रीवं प्रति वचने हेतुः हरीश्वरमिति । सत्क्रियार्थं विभीषणमन्त्रबहुमानार्थम् । क्रियादक्षः स्वयं कार्यकरणसमर्थोऽपि ॥ ३७ ॥ ३८ ॥ पण्डितः मन्त्रसमर्थः । उभाभ्यामिति चतुर्थी । अर्थं प्रयोजनम् । सम्प्रधार्य निश्चित्य । यत्कार्यमुभाभ्यां रोचते तदुच्यतामिति सम्बन्धः ॥ ३९ ॥ समुदाचारः अञ्जलिबन्धाद्युपचारः तत्संयुक्तमिति क्रियाविशेषणम् ॥ ४० ॥ अस्मिन्काले उपायमन्तरा दर्शनकाले । सुखावहम्

विभीषणस्य मन्त्रोऽयं मम लक्ष्मण रोचते । ब्रूहि त्वं सहसुग्रीवस्तवापि यदि रोचते ॥ ३८ ॥ सुग्रीवः पण्डितो नित्यं भवान् मन्त्रविचक्षणः । उभाभ्यां संप्रधार्यार्थं रोचते यत्तदुच्यताम् ॥ ३९ ॥ एवमुक्तौ तु तौ वीरावुभौ सुग्रीवलक्ष्मणौ । समुदाचारसंयुक्तमिदं वचनमूचतुः॥४०॥ किमर्थं नौ नरव्याघ्र न रोचिष्यति राघव । विभीषणेन यच्चोक्तमस्मिन् काले सुखावहम् ॥ ४१ ॥ अबद्ध्वा सागरे सेतुं घोरेऽस्मिन् वरुणालये । लङ्का नासादितुं शक्या सेन्द्रैरपि सुरासुरैः ॥४२॥ विभीषणस्य शूरस्य यथार्थं क्रियतां वचः । अलं कालात्ययं कृत्वा समुद्रोऽयं नियुज्यताम् । यथा सैन्येन गच्छामः पुरीं रावणपालिताम् ॥ ४३ ॥ एवमुक्तः कुशास्तीर्णे तीरे नदनदीपतेः । संविवेश तदा रामो वेद्यामिव हुताशनः ॥४४॥ इत्यार्षे श्रीरामायणे वाल्मी० श्रीमद्युद्धकाण्डे एकोनविंशः सर्गः ॥ १९ ॥

अयत्नेन कार्यसाधकम् । नौ आवयोः ॥ ४१ ॥ रामशरणागतेः फलं सेतुबन्धनमित्याशयेनाह–अबद्ध्वेति । घोरे तिमितिमिङ्गिलादिसत्त्वाधिष्ठितत्वेन दुस्तरे । सेन्द्रैरिति । किंपुनरस्माभिरिति भावः ॥ ४२ ॥ शूरस्य मन्त्रशूरस्य । यथार्थं परमाप्तोक्तत्वादिति भावः । नियुज्यतां प्रार्थ्यताम् । यथेति । तथा नियुज्यतामिति पूर्वेणान्वयः ॥ ४३ ॥ संविवेश संवेशनमकरोत् । वेद्यामिव हुताशन इत्यनेन ज्वलिष्यमाणत्वं व्यज्यते ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशः सर्गः ॥ १९ ॥

स्मितपूर्वमुवाचेति सम्बन्धः ॥ ३७–३९ ॥ एवमिति । समुदाचारसंयुक्तं सोपचारमित्यर्थः ॥ ४०–४२ ॥ विभीषणस्येति । समुद्रोऽयं नियुज्यताम् समुद्रस्सेतुबन्धाय प्रार्थ्यताम् ॥ ४३ ॥ एवमिति । हुताशनदृष्टान्तेन तत्तेजोयुक्ततया कार्पण्याभावः सूचितः ॥ ४४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोनविंशः सर्गः ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ विभीषणनिर्गमनानन्तरं लङ्कावृत्तान्तं प्रस्तौति—तत इत्यादिना । निविष्टां समुद्रतीरस्थाम् । ध्वजिनीं सेनाम् । वीर्यवानिति दर्शनसामर्थ्योक्तिः ॥ १ ॥ चार इत्यादि सार्द्धश्लोकः । दुरात्मनः दुर्बुद्धेः, अकाले चारप्रेषितुरित्यर्थः ॥ २ ॥ एष इति । अगाधः सेनापक्षे दुष्प्रवेश इत्यर्थः । अप्रमेयः अपरिच्छेद्यः ॥ ३ ॥ पुत्राविति । पदं स्थानम् प्रति आगतौ ॥ ४ ॥ एतावित्यर्द्धमेकम् ॥ ५ ॥ बलमिति । पूर्वं सेनासन्निवेशमात्रमुक्तम् ।

ततो निविष्टां ध्वजिनीं सुग्रीवेणाभिपालिताम् । ददर्श राक्षसोऽभ्येत्य शार्दूलो नाम वीर्यवान् ॥ १ ॥ चारो राक्षसराजस्य रावणस्य दुरात्मनः । तां दृष्ट्वा सर्वतो व्यग्रं प्रतिगम्य स राक्षसः । प्रविश्य लङ्कां वेगेन रावणं वाक्यमब्रवीत् ॥ २ ॥ एष वानरऋक्षौघो लङ्कां समभिवर्तते । अगाधश्चाप्रमेयश्च द्वितीय इव सागरः ॥ ३ ॥ पुत्रौ दशरथस्येमौ भ्रातरौ रामलक्ष्मणौ । उत्तमायुधसम्पन्नौ सीतायाः पदमागतौ ॥ ४ ॥ एतौ सागरमासाद्य सन्निविष्टौ महाद्युती ॥ ५ ॥ बलमाकाशमावृत्य सर्वतो दशयोजनम् ॥ ६ ॥ तत्त्वभूतं महाराज क्षिप्रं वेदितुमर्हसि । तव दूता महाराज क्षिप्रमर्हन्त्यवेक्षितुम् ॥ ७ ॥ उपप्रदानं सान्त्वं वा भेदो वाऽत्र प्रयुज्यताम् ॥ ८ ॥

अत्र तद्विस्तार उच्यते । आकाशम् अवकाशम् । सर्वतः चतुःपार्श्वेषु । दशयोजनपरिमितमवकाशमावृत्य स्थितम् ॥ ६ ॥ तत्त्वभूतमिति । मया सामान्यतो ज्ञातं यथार्थभूतं यथा भवति तथा ज्ञातुमर्हसीत्यर्थः ॥ ७ ॥ उपप्रदानमित्यर्द्धमेकं वाक्यम् । दण्डस्य त्ववकाश एव नास्तीति भावः ।

॥ १ ॥ चार इति । सर्वतः सर्वां तां वानरध्वजिनीम् अव्यग्रं यथा तथा दृष्ट्वा वेगेन लङ्कामाविश्य राजानमब्रवीदिति सम्बन्धः ॥ २ ॥ एष इति सेनापक्षे अगाधत्वं दुष्प्रवेशत्वम् ॥ ३ ॥ पुत्राविति । सीतायाः पदमागतौ सीतास्थानमुद्दिश्यागतौ ॥ ४ ॥ ५॥ बलं चेत्यत्र सन्निविष्टमिति व्यत्ययेनानुषङ्गः । आकाशमवकाशम् ॥६॥ तत्त्वभूतमेतन्मयुक्तं यथार्थमित्यर्थः । समनन्तरकर्तव्यमेवाह तव दूता इति ॥ ७–१० ॥

स०—सीतायाः पदं त्राणमुद्दिश्य अत्र वर्तत इति चिह्नं ज्ञात्वा वा शब्दं हनुमद्घोषितं श्रुत्वा वा । " पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु " इत्यमरः ॥ ४ ॥ उपप्रदानं सीताया रामसमीपं नीत्वा दानम् । सान्त्वं सीतादानं विना अमूल्यरत्नादिदानेन समाधानम् । भेदः मित्रभेदः । चतुर्थोपायभूतो दण्डस्तु रामसेनावलोकनानन्तरम् अयमशक्य इति शार्दूलेन नोपन्यस्तः ॥ ८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्र रामविषये ॥ ८ ॥ शार्दूलस्येत्यर्द्धत्रयमेकान्वयम् । अर्थः कर्तव्यार्थः ॥ ९ ॥ भेदप्रयोगमुपदर्शयति–सुग्रीवमिति । मम वचनाद्ब्रूहि मयोक्तमिति ब्रूहि । अक्लीबं सधार्ष्ट्यमित्यर्थः । श्लक्ष्णया पारुष्यरहितया । परया श्राव्यया ॥ १० ॥ वचनमेवाह–त्वमिति । वचनगाम्भीर्यव्यञ्जनाय गुरुवृत्तारम्भः । हे महाराज ! त्वं कुलप्रसूतः । सूर्यपुत्रत्वादिति भावः । तेन निष्कारणवैरं त्वया कर्तुमनुचितमिति व्यज्यते । महाबलः अल्पबलं राममवलम्बितुं नार्हसी

शार्दूलस्य वचः श्रुत्वा रावणो राक्षसेश्वरः । उवाच सहसा व्यग्रः संप्रधार्यार्थमात्मनः । शुकं नाम तदा रक्षो वाक्यमर्थविदांवरम् ॥९॥ सुग्रीवं ब्रूहि गत्वा त्वं राजानं वचनान्मम । यथासन्देशमक्लीबं श्लक्ष्णया परया गिरा ॥ १० ॥ त्वं वै महाराज कुलप्रसूतो महाबलश्चर्क्षरजस्सुतश्च । न कश्चिदर्थस्तव नास्त्यनर्थस्तथा हि मे भ्रातृसमो हरीश ॥ ११ ॥ अहं यद्यहरं भार्यां राजपुत्रस्य धीमतः । किं तत्र तव सुग्रीव किष्किन्धां प्रति गम्यताम् ॥ १२ ॥ न हीयं हरिभिर्लङ्का शक्या प्राप्तुं कथंचन । देवैरपि सगन्धर्वैः किं पुनर्नरवानरैः ॥ १३ ॥ स तथा राक्षसेन्द्रेण सन्दिष्टो रजनीचरः । शुको विहङ्गमो भूत्वा तूर्णमाप्लुत्य चाम्बरम् ॥ १४ ॥

त्यर्थः । ऋक्षरजस्सुतः ब्रह्मपौत्रत्वेन मम बन्धुभूतोऽसीत्यर्थः । तव रामावलम्बने कश्चिदर्थो नास्ति । अनवलम्बने अनर्थश्च नास्ति । अफलं वैरं तव नोचितमिति भावः । वालिसम्बन्धेन भ्रातृसमत्वान्मयैव प्रणयं कुर्वित्यभिप्रायेणाह–तथा हीति ॥११॥ सीतापहरणमेव त्वत्कृतो महाननर्थ इत्यत्राह–अहमिति । राजपुत्रस्य तवेति पदाभ्यां नरवानरयोः कः सम्बन्ध इत्युक्तम् । धीमत इति सुग्रीवविशेषणम् । तत्र हरणविषये । किम् का हानिरित्यर्थः ॥१२॥ "आरब्धस्यान्तगमनम्" इति न्यायेन प्रक्रान्तं कार्यं कथं त्यज्यतामित्यत्राह–न हीति । उक्तमर्थं कैमुतिकन्यायेन द्रढयति–देवैरिति । अत्र नरग्रहणात् पूर्वार्धे हरिपदं नरोपलक्षकं बोध्यम् । त्वमेवामुमर्थमालोचयेति भावः । इयं लङ्का प्राप्तुं न शक्येत्युत्तरार्धेऽनुषज्यते ॥ १३ ॥ अम्बरमाप्लुत्य, ॥ ६८ ॥

त्वमिति । अर्थः उपकारः । अनर्थः अपकारः । अर्थानर्थयोरभावेऽपि भ्रातृसमः ॥ ११ ॥ १२ ॥ मद्वचनमनादृत्यागतेनापि त्वया किमपि कर्तुं न शक्यमित्याह–न हीयमिति ॥ १३ ॥ स तथेति । आप्लुत्य चाम्बरम्, जगामेति शेषः ॥ १४ ॥

स०–त्वं मे भ्रातृसमः वालिरावणयोः सख्यान्मदनुजसम इत्युक्तिः । एवं दैवान्निसृतया वाण्या वालिन इव रावणस्यापि वधो रामाद्भविष्यतीति सूच्यते ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आजगामेति शेषः ॥१४॥ उपर्युपरि सागरं सागरस्याव्यवहितोपरि प्रदेशे। ''उपर्यध्यधसः सामीप्ये'' इति द्विर्वचनम्। आम्रेडितान्तत्वात् ''उभसर्वतसोः—'' इति द्वितीया ॥ १५ ॥ तमिति। प्रापयन्तं श्रावयन्तम्। प्रापद्यन्त पर्यवारयन् ॥ १६ ॥ निगृहीतः बद्धः ॥ १७ ॥ वानरैरित्यादि। दूतोऽप्यनुक्त

स गत्वा दूरमध्वानमुपर्युपरि सागरम्। संस्थितो ह्यम्बरे वाक्यं सुग्रीवमिदमब्रवीत्। सर्वमुक्तं यथादिष्टं रावणेन दुरात्मना ॥ १५ ॥ तं प्रापयन्तं वचनं तूर्णमाप्लुत्य वानराः। प्रापद्यन्त दिवं क्षिप्रं लोप्तुं हन्तुं च मुष्टिभिः ॥ १६ ॥ स तैः प्लवङ्गैः प्रसभं निगृहीतो निशाचरः। गगनाद्भूतले चाशु परिगृह्य निपातितः ॥ १७ ॥ वानरैः पीड्यमानस्तु शुको वचनमब्रवीत्। न दूतान् घ्नन्ति काकुत्स्थ वार्यन्तां साधु वानराः ॥ १८ ॥ यस्तु हित्वा मतं भर्तुः स्वमतं सम्प्रभाषते। अनुक्तवादी दूतः सन् स दूतो वधमर्हति ॥ १९ ॥ शुकस्य वचनं श्रुत्वा रामस्तु परिदेवितम्। उवाच मा वधिष्टेति घ्नतः शाखामृगर्षभान् ॥२०॥ स च पत्रलघुर्भूत्वा हरिभिर्दर्शिते भये। अन्तरिक्षस्थितो भूत्वा पुनर्वचनमब्रवीत् ॥२१॥ सुग्रीव सत्त्वसम्पन्न महाबलपराक्रम। किं मया खलु वक्तव्यो रावणो लोकरावणः ॥२२॥

कारी वध्य एवेत्याशङ्क्य नाहं तथा अनुक्तकारीत्याशयेनाह—यस्त्विति ॥ १८ ॥ १९ ॥ परिदेवितं परिदेवनरूपं वचनम्। मा वधिष्टेति प्रत्येकोक्त्यभिप्रायेणैकवचनम्। वधिष्टेतीत्यत्र आर्षः सन्धिः ॥ २० ॥ पत्रलघुः लघुपत्रः। वानरैः प्रायेण लूनपक्ष इत्यर्थः। भये दर्शिते दर्शितेऽपि ॥२१॥ रामानु०—पक्षलघुः पक्षैर्लघुः। लूनपक्ष इति यावत्। दर्शितेभय इत्यत्र अभय इति पदच्छेदः ॥ २१ ॥ स्ववाक्यश्रवणाय सुग्रीवं प्रशंसति—सुग्रीवेति। लोकरावणः

स गत्वेति। उपर्युपरि सागरं सागरस्य समीपोपरिप्रदेशे। रावणेनोक्तं सर्वमिदं वाक्यं यथादिष्टमब्रवीदिति सम्बन्धः ॥ १५ ॥ लोप्तुम्, पक्षाविति शेषः॥१६–१९॥ परिदेवितं वचनं परिदेवनरूपं वाक्यम् ॥ २० ॥ स च पक्षलघुरिति। पक्षलघुः, पक्षैर्लघुः लूनपक्ष इति यावत् ॥ २१–२५ ॥

स०—पक्षलघुः कपिभिर्लूनाल्पपक्षः पूर्वं भूत्वा अनन्तरं रामाज्ञया हरिभिरभये दर्शिते दत्ते सति पक्षैः छिन्नप्ररूढैः लघुः शीघ्रगामी भूत्वेत्यर्थो वा। यत्तु लूनपक्षत्वेऽन्तरिक्षगमनासम्भवः। रामाज्ञाननुष्ठानप्रसङ्गश्चेति कैश्चिदभिहितम्, तत्तु शुकरूपस्य मायिकत्वेन पक्षच्छेदेऽपि मायया पुनः प्ररोहणस्य सम्भवादन्तरिक्षगमनसम्भवेन रामाज्ञातः पूर्वमेव कतिपयतल्लोपनेन तदाज्ञाभङ्गस्याप्यभावेन चायुक्तमिति ज्ञेयम् ॥२१॥

For Private And Personal Use Only

इत्यनेन प्रतिवचनानादाने मां हनिष्यतीति भावः ॥ २२ ॥ स एवमिति । लोके कश्चिदधिपतिरपि तज्जातीयो न भवति । तद्व्यावर्तनाय प्लवङ्गमाना मृषभ इत्युक्तम् । महाबलः तृणीकृतरावण इत्यर्थः । अदीनसत्त्वः अदीनमनस्कः । अत्र वंशस्थोपेन्द्रवज्रेन्द्रवज्रायोगादुपजातिवृत्तभेदः ॥ २३ ॥ भ्रातृसमोऽसीत्यस्योत्तरमाह–न मेऽसीति । मे मित्रं नासीत्यर्थः । अनुकम्प्यः दयनीयश्च नासि । मे उपकर्ता च नासि । मे प्रियोऽपि नासि । अतः

स एवमुक्तः प्लवगाधिपस्तदा प्लवङ्गमानामृषभो महाबलः । उवाच वाक्यं रजनीचरस्य चारं शुकं तूर्णमदीन सत्त्वः ॥२३॥ न मेऽसि मित्रं न तथाऽनुकम्प्यो न चोपकर्ताऽसि न मे प्रियोऽसि । अरिश्च रामस्य सहानुबन्धः स मेऽसि वालीव वधार्ह वध्यः ॥ २४ ॥ निहन्म्यहं त्वां ससुतं सबन्धुं सज्ञातिवर्गं रजनीचरेश । लङ्कां च सर्वां महता बलेन क्षिप्रं करिष्यामि समेत्य भस्म ॥ २५ ॥ न मोक्ष्यसे रावण राघवस्य सुरैः सहेन्द्रैरपि मूढ गुप्तः । अन्तर्हितः सूर्यपथं गतो वा तथैव पातालमनुप्रविष्टः [गिरीश पादाम्बुजसङ्गतो वा हतोऽसि रामेण सहानुज स्त्वम्] ॥ २६ ॥ तस्य ते त्रिषु लोकेषु न पिशाचं न राक्षसम् । त्रातारमनुपश्यामि न गन्धर्वं न चासुरम् ॥ २७ ॥

कथं भ्रातृसमोऽसीति भावः । प्रत्युत मित्रशत्रुत्वाच्छत्रुरेवासीत्याह अरिश्चेति । ननु नोपकर्तृत्वादिना मित्रम्, किन्तु सख्युर्वालिनो भ्रातृत्वादित्यत आह स मेऽसीति । सः अरिभूतस्त्वमपि वालीव मे वध्योऽसि । अरिमित्रस्याप्यरित्वादिति भावः । इदमेव मनसि कृत्वोक्तं वधार्हेति । अनेन 'अहं यद्यहरं भार्याम्' इत्येतद्वृत्तोत्तरम् ॥२४॥ न हीयं हरिभिर्लङ्केत्यस्योत्तरमाह–निहन्मीति । ज्ञातिवर्गः कुम्भकर्णादिः । विभीषणस्तु न ज्ञातिरिति भावः । सुतादयः किमर्थं हन्तव्या इत्यपेक्षायां राजापराधादित्याह रजनीचरेशेति । बलेन सेनया ॥ २५ ॥ मयि लङ्कास्थे खल्वेवं करिष्यसि स्थलान्तरं गमिष्यामीति शङ्कायामाह–न मोक्ष्यस इति । राघवस्य राघवात् । पञ्चम्यर्थे षष्ठी । मूढेति सम्बुद्धिः । सूर्यपथं सूर्यद्वारं गतः सन् अन्तर्हितोऽपि न मोक्ष्यसे ॥ २६ ॥ त्रिदशेश्वरेऽपि त्रातुमनीश्वरे का वार्ता क्षुद्राणामित्याह–तस्येति । तस्य रामशरविद्धस्य ॥ २७ ॥

नेति । राघवस्य राघवात् ॥ २६–३३ ॥

स०–प्लवगाधिपः एवमुक्तोऽभूत् । एवमुक्तः प्लवङ्गमानामृषभः सुग्रीवः । रजनीचरस्य रावणस्य चारं दूतं दीनं शुकं प्रत्युवाच । प्लवगान् आधितः मनोव्यथातः पातीति वा । तथा प्लवङ्गेषु मानः चित्तोन्नतिर्यस्य सः प्लवङ्गमानः । स चासौ न विद्यते मृषा मिथ्यावचनं येषां ते अमृषाः तेषां भ इव भः, इन्द्र इति यावत् । "भः स्यान्मयूखे शुक्रे च" इति "मानश्चित्तोन्नतौ" इति च विश्वः । अदीनसत्त्वः अदीनान्तःकरणः ॥२३॥ ॥ ६९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि रामसहाये स्थितोऽसि तर्हि ते जटायुषोऽवस्था स्यादित्यत्राह–अवधीरिति। अर्द्धमेकं वाक्यम्। जरया वृद्धम् अत एवाक्षमम् असमर्थम्। जटायुषमवधीरिति यत्तत्र ते किं,वीर्यमिति शेषः। नाहं तादृश इति भावः॥२८॥ भार्याहरणकाले किमप्यकुर्वन् रामः किमिदानीं करिष्यतीत्यत्राह–किं न्विति। ते त्वया। सन्निधिरेव सान्निध्यम्। विशालाक्षीत्यनेन सीताहरणं रामस्यात्यन्तासह्यमित्युच्यते। गृह्य गृहीत्वा। न बुध्यसे, भाव्यनर्थमिति शेषः॥ २९॥ न बुध्यस इत्युक्तं विवृणोति–महाबलमिति। महात्मानं महाबुद्धिम्॥ ३०॥ तत इति। हरिसत्तमः इङ्गितप्रेक्षणादिज्ञ इति यावत्॥ ३१॥

अवधीर्यज्जरावृद्धमक्षम किं जटायुषम्॥२८॥ किं नु ते रामसान्निध्ये सकाशे लक्ष्मणस्य वा। हृता सीता विशालाक्षी यां त्वं गृह्य न बुद्ध्यसे॥२९॥ महाबलं महात्मानं दुर्द्धर्षममरैरपि। न बुद्ध्यसे रघुश्रेष्ठं यस्ते प्राणान् हरिष्यति॥ ३०॥ ततोऽब्रवीद्वालिसुतस्त्वङ्गदो हरिसत्तमः॥ ३१॥ नायं दूतो महाराज चारिकः प्रतिभाति मे। तुलितं हि बल सर्वमनेनात्रैव तिष्ठता। गृह्यतां मा गमल्लङ्कामेतद्धि मम रोचते॥ ३२॥ ततो राज्ञा समादिष्टाः समुत्प्लुत्य वलीमुखाः। जगृहुश्च बबन्धुश्च विलपन्तमनाथवत्॥३३॥ शुकस्तु वानरैश्चण्डैस्तत्र तैः सम्प्रपीडितः। व्याक्रोशत महात्मानं रामं दशरथात्मजम्। लुप्येते मे बलात्पक्षौ भिद्येते च तथाऽक्षिणी॥ ३४॥ यां च रात्रिं मरिष्यामि जाये रात्रिं च यामहम्। एतस्मिन्नन्तरे काले यन्मया ह्यशुभं कृतम्। सर्वं तदुपपद्येथा जह्यां चेद्यदि जीवितम्॥ ३५॥

नायमिति। चारिकः चारः। स्वार्थे ठक्। दूतो हि न वध्यः चारस्तु वध्य एवेति भावः। तुलितं तुलया मितम्, परिच्छिद्य ज्ञातमिति यावत्॥ ३२॥ रामानु०–नायमिति। चारः चरणं तदस्यास्तीति चारिकः। "अत इनिठनौ" इति ठन्। तुलितम् इयत्तया परिच्छिन्नम्॥ ३२॥ राज्ञा सुग्रीवेण॥ ३३॥ शुकस्त्वित्यादि सार्द्धश्लोक एकान्वयः। चण्डैः अत्यन्तकोपनैः। पितृसम्बन्धकीर्तने दया भवेदिति दशरथात्मजमित्युक्तम्। पक्षौ पूर्वलुप्तशेषौ॥ ३४॥ यामित्यादि सार्द्धश्लोक एकान्वयः। रात्रिशब्दोऽहोरात्रवचनः। यां च रात्रिं यस्मिंश्च दिवसे मरिष्यामि। यस्मिंश्च जाये अजाये। "अनित्यमागमशासनम्" लुप्येते इत्यादिश्लोकद्वयम्। यां च रात्रिमित्यत्र रात्रिशब्दः अहोरात्रवचनः। अहमेवं वानरपीडया यदि जीवितं जह्यां तदा यां च रात्रिं यस्यां रात्र्यां जाये जातवानस्मि यां च रात्रिं यस्यां रात्र्यां मरिष्यामि एतस्मिन्नन्तरे काले जन्ममरणयोर्मध्यवर्तिनि काले मया यदशुभं कर्म कृतम् तत्सर्वं त्वमुपपद्येथाः

For Private And Personal Use Only

इत्यडभावः । जातोऽस्मि । एतस्मिन्नन्तरे जननमरणयोर्मध्यकाले । मया यदशुभं कृतं तत्सर्वं निरपराधस्य मे घातयिता त्वम् उपपद्येथाः प्राप्नुहि । चेदिति प्रसिद्ध्यर्थमव्ययम् ॥ २५ ॥ नाघातयदिति । नाघातयद्वधान्यवर्तयत् । मुच्यतां बन्धनान्मुच्यताम् । निर्यापणं तु दक्षिणकूले ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशः सर्गः ॥ २० ॥

नाघातयत्तदा रामः श्रुत्वा तत्परिदेवनम् । वानरानब्रवीद्रामो मुच्यतां दूत आगतः ॥ २६ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे विंशः सर्गः ॥ २० ॥

ततः सागरवेलायां दर्भानास्तीर्य राघवः । अञ्जलिं प्राङ्मुखः कृत्वा प्रतिशिश्ये महोदधेः । बाहुं भुजगभोगाभमुपधायारिसूदनः ॥ १ ॥ जातरूपमयैश्चैव भूषणैर्भूषितं पुरा ॥ २ ॥

एवं प्रासङ्गिकं परिसमाप्य एकान्तरितपूर्वसर्गान्तोदितकथाशेषमुपक्षिपति–तत इत्यादिसार्द्धश्लोक एकान्वयः । ततः शुकमोक्षणानन्तरम् । सागरवेलायां शर्कराप्रचुरायाम् । दर्भान् शिताग्रकुशान् आस्तीर्य । राघवः सर्वशरण्यकुलप्रसूतः । महोदधेः अञ्जलिं कृत्वा भुजगभोगाभम् अहिकायवदतिमृदुलं बाहुम् उपधाय उपधानीकृत्य । प्राङ्मुखः सन् प्रतिशिश्ये । प्रतीत्यनेन तदानीं सागराभिमुखमपरः सागर इव स्थित इत्यवगम्यते । अरिसूदन इत्यनेन तादृशदशायामपि शत्रूणामधृष्यतया स्थित इत्युच्यते । अत्र विशेषणमहिम्ना अतिसुकुमारस्य कथमतिकठिनावनितलशयनम्,अखिलरक्षकस्य कथमन्यतो रक्षापेक्षेति वाल्मीकेः खेदो द्योत्यते ॥१॥ अमुमेवार्थं प्रपञ्चयति सार्द्धसप्तश्लोकैः–जातरूपमयैरित्यादिभिः । जातरूपमयैः चकारात्

मामुहीत्यर्थः ॥२४॥२५॥ नेति । मुच्यतां दूत आगत इति बन्धमोक्षणं दक्षिणकूले ॥ २६ ॥ इति श्रीमहे० श्रीरामा० युद्धकाण्डव्याख्यायां विंशः सर्गः ॥ २० ॥ तत इत्यादि सार्धश्लोकमेकं वाक्यम् । अरिसूदनो राघवः प्राङ्मुखस्सन् महोदधेरञ्जलिं कृत्वा भुजगभोगाभं बाहुमुपधाय प्रतिशिश्य इति सम्बन्धः । प्रतिशिश्ये आभिमुख्येन शयितवान् ॥ १ ॥ २ ॥

स०–सागरवेलायां समुद्रतीरे । महोदधेः अञ्जलिं कृत्वा बद्ध्वा । प्राङ्मुखस्सन् प्रतिशिश्ये । शयनप्रतिनिधिं कृतवान् । प्रतिना निर्दोषस्य रामस्य स्वाभाविकी निद्रा न वक्तुं शक्येति तत्प्रतिनिधिभूतं चक्षुर्निमीलनमात्रमिति सूचयति ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रत्नमयैः । एवकारो योगव्यवच्छेदार्थः । पुरा अयोध्यावासकाले अवतारात्पूर्वं वा ॥ २ ॥ वरकाञ्चनेति परमनारीभुजविशेषणम् । भुजैः हस्तैः । तदेक देशलक्षणा । परमनारीणां सैरन्ध्रिकाणाम् । अनेकधा स्नानालङ्करणादिषु चन्दनागरुकुङ्कुमप्रभृतिभिः बहुप्रकारेण । अभिमृष्टम् संमृष्टम् ॥ ३ ॥ अधि वासितं सञ्जातगन्धम् । बालसूर्यैति विशेषणात् द्वितीयचन्दनशब्दो रक्तचन्दनपरः । तच्च कुङ्कुमम् । "कुङ्कुमं घुसृणं प्रोक्तं लोहितं रक्तचन्दनम् " इति हलायुधः । आदौ चन्दनागरुभ्यां चर्चितम् अथ कुङ्कुमैरिति बोध्यम् । कश्चिदाह–परमनारीणामित्यनेन सीताव्यतिरिक्ताश्च भार्याः सन्तीति । तन्न;

वरकाञ्चनकेयूरमुक्ताप्रवरभूषणैः । भुजैः परमनारीणामभिमृष्टमनेकधा ॥ ३ ॥
चन्दनागरुभिश्चैव पुरस्तादधिवासितम् । बालसूर्यप्रतीकाशैश्चन्दनैरुपशोभितम् ॥ ४ ॥

नहि बालकाण्डे कुत्रचिद्रामस्य दारान्तरोद्वाहः प्रतिपाद्यते, प्रत्युत " रामस्तु सीतया सार्द्धं विजहार बहूनृतून् । मनस्वी तद्गतस्तस्या नित्यं हृदि समर्पितः ॥" इति सीतया सह निरन्तरभोग एवोच्यते । अत एव सीताप्याह " समा द्वादश तत्राहं राघवस्य निवेशने। भुञ्जाना मानुषान् भोगान् सर्व कामसमृद्धिनी ॥ " इति अत्यन्तसंयोगे द्वितीयया निरन्तरभोगम् । तत्कुतोऽस्य दारान्तरावकाशः ? ननु " रामस्य दयिता भार्या " इति विशेषणा द्रोहिणी यथेति ताराणामन्यतमया रोहिण्या दृष्टान्तीकरणाच्च भार्यान्तरं तस्य व्यज्यत इति चेन्न; दयितो भ्रातुरितिवदनुगमनानर्हत्वाय तथा विशेषि तत्वात् । किं भरतो रामस्य न दयितः ? " तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु । " " न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः । " इत्यादि विरोधात् रामवाल्लभ्यातिशयेन सौकुमार्यातिशयेन च राजगृह एवावस्थाय दिव्यसुखानुभवयोग्यावपि सीतालक्ष्मणौ राममनुगताविति हि तत्र मुनिहृदयम् । रोहिणी चेयमन्या, प्रसिद्धाया नित्यानुगमनासम्भवात् । ननु च " हृष्टाः खलु भविष्यन्ति रामस्य परमाः स्त्रियः । अप्रहृष्टा भवि ष्यन्ति स्नुषास्ते भरतक्षये॥ " इति स्नुषासाहचर्याद्रामस्य स्त्रियः पत्न्यो बह्वयः सन्तीति गम्यते । सुन्दरकाण्डेऽपि " स्त्रीभिस्तु मन्ये विपुलेक्षणाभि

वरकाञ्चनेति । तदेव विशिनष्टि–भुजैरित्यादिना । भुजैः परमनारीणामभिमृष्टमिति रामस्यैकदारत्वात् परमनारीशब्देन श्रेष्ठपरिचारिका विवक्षिताः ।

स०–परमनारीणां कौसल्यादीनाम् । परमाश्च ते अरयो न भवन्तीति नारयो भक्ताया भक्ताः तेषाम् । अथवा स्वदलपारम्यो वरुणस्तस्य नार्यो गङ्गाद्याः तासां बाहुभिस्तरङ्गैः । स्वेष्ववतारेषु रमाया अन्य वतारबाहुविध्येन नारीणामिति बहुवचनबोधितबहुविधता सम्भवतीति नैककामिनीव्रततोपहतिरिति ज्ञेयम् ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्त्वं रंस्यसे वीतभयः कृतार्थः " इति सीतया चोच्यते। अत्रापि 'भुजैः परमनारीणामभिमृष्टमनेकधा' इत्युक्तम् । तस्माद्बह्व्यः पत्न्यो रामस्य सन्तीत्यवगम्यते । मैवम्; रामस्य परमाः स्त्रिय इति रामसम्बन्धिन्यः कौसल्यासीतातद्दासीप्रभृतय उच्यन्ते । पूजायां बहुवचनेन सीतैवोच्यते । ते स्नुषा इतिवत् । न हि भरतस्यानेकाः स्त्रियः सन्तीत्यत्र प्रमाणमस्ति । त्वं रंस्यस इत्यत्रापि लौकिकरीतिमनुसृत्य सीतोक्तवती । परमनारीणामित्यत्रापि अलङ्कर्त्रीणामित्यर्थ उक्तः । यद्वा अभिमृष्टम् अभिमर्शनार्हम् । आशंसायां क्तः । परमनार्यः श्रीभूमिनीलाः । आत्मानं मानुषं राम एव हि मन्यते

शयने चोत्तमाङ्गेन सीतायाः शोभितं पुरा । तक्षकस्येव सम्भोगं गङ्गाजलनिषेवितम् ॥ ५ ॥

ऋषिस्तु रामस्य विष्णुत्वं व्यक्तीकरोत्येव । " जज्ञे विष्णुः सनातनः " इत्याह । ननु राजसूयाश्वमेधाद्यनुष्ठानान्यथानुपपत्त्या रामस्यानेकपत्न्यः कल्प्यन्ते, कामं कल्प्यन्तां न ता इह सम्बध्यन्ते । तासां केवलं धर्मार्थं वृतानां परिग्रहं रन्तुं चायोग्यत्वात् । वस्तुतो न ताः कल्प्याः, सीतयैव प्रतिमया यज्ञे पत्नीकार्यनिर्वाहस्योत्तरकाण्डे दर्शितत्वात् । न च पत्नीप्रातिनिधिभावो न भट्टाचार्येण कथ्यत इति वाच्यम्, न हि वचनविरोधे न्यायः प्रभवतीति न्यायात् । वचनं च हेमाद्रिस्मृतिनिबन्धने दर्शितम् " यदि दुष्टभार्यो दूरभार्यो वा स्यात्तदा दर्भपुञ्जीलं तत्स्थाने निधायाग्निमाधाय कुर्यात् " इति । धर्मसंस्थापनार्थं प्रवृत्तस्य रामस्याचारादपरं किं नाम मानमपेक्षणीयम् । वस्तुत आचार एव प्रथमं प्रमाणं श्रुत्या पूर्वाचारं प्रदर्श्यैव कर्मविधानात् । आपस्तम्बोऽप्यत एव " धर्मज्ञसमयः प्रमाणं वेदाश्च " इत्याचारमेव प्रथमं प्रमाणमाह । अत एव स्मरन्ति च स्मर्तारः–" श्रुतिर्विभिन्ना स्मृतयो विभिन्ना न चानृषेर्दर्शनमस्ति किंचित् । धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥" इति । तस्मात् "चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति ।" इत्युक्तरामाचार एव समीचीनं प्रमाणम्, तद्विरुद्धाश्च न्याया न प्रभवन्ति । यद्यपि राजसूयाश्वमेधानां महिषीवद्वावातापरिवृत्तिभ्यामपि भवितव्यम् । तथापि तल्लोपे तत्कार्याननुष्ठानमेव । तस्य कर्मवैकल्याहेतुत्वात् । यथा पङ्ग्वन्धादेर्यज्ञे विष्णुक्रमाज्यावेक्षणादिलोपेन न यज्ञलोपः । तत्तन्मन्त्रोच्चारणस्यैव कार्यत्वात् । तस्मात्केवलन्यायसञ्चारेणापन्यायमार्गो नानुसरणीयः । किन्तु सर्वाचारप्रवर्तकसर्वकर्मधुरन्धरभगवदवतार रामचन्द्राचार एव विवेकिभिरनुवर्तनीय इति सर्वमवदातम् ॥ ४ ॥ शयने हंसतूलिकामये तल्पे । गङ्गानिषेवितं गङ्गाजले वर्तमानम् । तक्षकस्य चन्दनागरुभिः स्नानीयभूतैः बालसूर्यप्रतीकाशैश्चन्दनैः, कुङ्कुमैरिति यावत् । सीताया उत्तमाङ्गेन पुरा शोभितम् । तक्षकस्येति । सम्भोगं सम्यग् भोगम् ।

For Private And Personal Use Only

सम्भोगं कायमिव स्थितम् । सीताया उत्तमाङ्गेन शोभितं चेति योजना ॥ ५ ॥ संयुगे युद्धे । युगसङ्काशं गोपुरार्गलवत् प्रतिभटनिवारकम् । अत एव शत्रूणां शोकवर्धनम् । सागरोऽन्ते यस्यासौ सागरान्तः भूमण्डलम्, तस्य व्यपाश्रयम् आलम्बनभूतम् ॥ ६ ॥ सव्यम् अप्रदक्षिणं यथा भवति तथा । अस्यता इषून् क्षिपता । स्वेनैव हेतुना ज्याघातेन करणेन विगतत्वचं ज्याकिणाङ्कितमित्यर्थः । महापरिघसन्निभम् उत्तमपरिघाख्यायुधवत् दृढम् ॥ ७ ॥ गोसहस्रप्रदातारम्, करणे कर्तृत्वोपचारः । महद्भुजं भुजोत्तमम् । तथैव प्रायशः पाठः । आत्वाभाव आर्षः । एवंभूतं दक्षिणं बाहुमुपधाय । दक्षिणः

संयुगे युगसङ्काशं शत्रूणां शोकवर्द्धनम् । सुहृदानन्दनं दीर्घं सागरान्तव्यपाश्रयम् ॥ ६ ॥ अस्यता च पुनः सव्यं ज्याघातविगतत्वचम् । दक्षिणो दक्षिणं बाहुं महापरिघसन्निभम् ॥७॥ गोसहस्रप्रदातारमुपधाय महद्भुजम् । अद्य मे मरणं वाऽथ तरणं सागरस्य वा ॥ ८ ॥ इति रामो मतिं कृत्वा महाबाहुर्महोदधिम् । अधिशिश्ये स विधिवत् प्रयतो नियतो मुनिः॥९॥ तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले । नियमादप्रमत्तस्य निशास्तिस्रोऽतिचक्रमुः ॥ १० ॥ स त्रिरात्रोषितस्तत्र नयज्ञो धर्मवत्सलः । उपासत तदा रामः सागरं सरितां पतिम् ॥ ११ ॥

दाक्षिण्यवान् । महाबाहुः सर्वाभयप्रदः रामः, अद्य मे तरणं वा सागरस्य, मरणं वा भवत्विति मतिं कृत्वा । विधिवत् शास्त्रोक्तरीत्या । प्रयतः कायिकनियमयुक्तः । नियतः वाचिकनियमवान् । मुनिः मानसनियमोपेतश्च सन् । महोदधिमुद्दिश्याधिशिश्य इति योजना ॥ ८ ॥ ९ ॥ सुप्तस्य शयानस्य । नियमादप्रमत्तस्य अत एवाप्रच्युतनियमस्येत्यर्थः । तिस्रो निशाः त्रीण्यहानि ॥ १० ॥ तिसृष्वपि रात्रिषूपासनमविच्छिन्नमित्याह—स इति । त्रिरात्रोषितः त्रिरात्रं शयानः । तत्र समुद्रतीरे । सर्वशक्तेः कुत एवं निर्बन्ध इत्याशङ्क्य धर्मप्रवर्तनार्थमित्याशयेनाह नयज्ञो धर्मवत्सल इति । शरणागतधर्मे

सागरान्तव्यपाश्रयं सागरान्तं भूचक्रं तस्य व्यपाश्रयमाश्रयम् ॥३–६॥ अस्यतेति । पुनर्मुहुर्मुहुः सव्यं यथा तथा अस्यता स्वेन कृता ये ज्याघातास्तैर्विहतत्वचम्, ज्याघातकिणाङ्कितमित्यर्थः । जातरूपमयैर्भूषितमित्यादि भुजोत्तममित्यन्तविशेषणविशिष्टं दक्षिणं बाहुमुपधाय रामः 'अद्य मे मरणं वाऽथ तरणं सागरस्य वा' इति मतिं कृत्वा महोदधिमुद्दिश्य अधिशिश्य इति सम्बन्धः । विशेषणान्तरवैशिष्ट्यकथनार्थमधिशिश्य इति पुनरभिधानम् । प्रयतः परिशुद्धः । मुनिः मौनी ॥ ७–९ ॥ अप्रमत्तस्य अस्खलितस्य॥१०॥ सः 'अङ्गुल्यग्रेण तान् हन्याम्' इत्यादिभिः प्रकटितवीर्यः । नयज्ञः आदौ साम प्रयोज्यमिति नीतिज्ञः । धर्मवत्सलः अनपराधिन्याक्रमण

स०—अत्र बाहुं भुजगभोगाभमित्युपक्रम्य गोसहस्रप्रदातारमित्येतच्छ्लोकपर्यन्तं प्रतिश्लोकं विशेष्येण बाह्वादिशब्देन भवितव्यमिति दर्शयितुं बाहुं भुजगभोगाभं दक्षिणं बाहुं भुजोत्तममिति त्रिवारमुक्तिः ॥ ७ ॥

प्रीतिमान् । सरितां पतिं स्वगोष्ठ्यां कान्तापुरुषकारमुखेन समाश्रयणदर्शनात् स्वयमपि तथैवाचरदिति भावः ॥ ११ ॥ न च दर्शयते, आत्मानमिति शेषः । मन्दः अज्ञः । ननु रामेण सम्यक्कृता शरणागतिः कुतो न फलिता ? उच्यते-अनधिकारिणा कृतत्वात् ब्राह्मणकृतराजसूयवत् ।

न च दर्शयते मन्दस्तदा रामस्य सागरः । प्रयतेनापि रामेण यथार्हमभिपूजितः ॥ १२॥ समुद्रस्य ततः क्रुद्धो रामो रक्तान्तलोचनः । समीपस्थमुवाचेदं लक्ष्मणं शुभलक्षणम् ॥ १३ ॥ अवलेपः समुद्रस्य न दर्शयति यत्स्वयम् ॥ १४ ॥ प्रशमश्च क्षमा चैव आर्जवं प्रियवादिता । असामर्थ्यं फलन्त्येते निर्गुणेषु सतां गुणाः ॥ १५ ॥ आत्मप्रशंसिनं दुष्टं धृष्टं विपरिधावकम् । सर्वत्रोत्सृष्टदण्डं च लोकः सत्कुरुते नरम् ॥ १६ ॥ न साम्ना शक्यते कीर्तिर्न साम्ना शक्यते यशः । प्राप्तुं लक्ष्मण लोकेऽस्मिन् जयो वा रणमूर्द्धनि ॥ १७ ॥

न च शरणागतावधिकारी रामः, अकिञ्चनो हि तत्राधिकारी ॥ १२ ॥ समुद्रस्य समुद्रविषये । सम्बन्धसामान्ये षष्ठी । रक्तान्ते लोचने यस्य सः रक्तान्तलोचनः । अनेन मन्दकोपत्वमुक्तम् । शुभलक्षणं स्वस्य हृदयकोपमवगम्य कृतमन्दहासम् ॥ १३ ॥ अवलेप इति । स्वयं न दर्शयतीति यत् अयं समुद्रस्यावलेप इत्यन्वयः ॥ १४ ॥ प्रशमः अक्रोधता । क्षमा अपराधसहिष्णुता । आर्जवं परचित्तानुसारित्वम्, अकौटिल्यं वा । प्रियभाषिता प्रियवादित्वमित्येते गुणाः निर्गुणेषु असामर्थ्यं फलन्ति, असमर्थत्वबुद्धिं जनयन्तीत्यर्थः॥ १५ ॥ कं पुनः समर्थं निर्गुणो मन्यते ? तत्राह-आत्मेति ! आत्मप्रशंसिनम् आत्मस्तुतिपरम् । दुष्टं वञ्चकम् । धृष्टं निर्दयमित्यर्थः । विपरिधावकं सर्वपलायनकरम् । सर्वत्र सगुणेषु निर्गुणेषु च । उत्सृष्टदण्डं क्लृप्तदण्डम् । लोकः अज्ञो जनः ॥ १६ ॥ न साम्नेति । बलकृता प्रथा यशः । पराक्रमकृता कीर्तिः । जयो वेत्यत्रापि न साम्ना प्राप्तुं शक्यते

मनुचितमिति यो धर्मः तस्मिन् वत्सलः । उपासत उपास्त ॥ ११ ॥ एवं यथाशास्त्रं शरणागतत्वेऽपि फलप्रदानाभिमुख्याभावात् सागरस्य सापराधत्वं दर्शयति-न च दर्शयत इति । न दर्शयते, आत्मानमिति शेषः ॥१२॥ समुद्रस्य समुद्राय क्रुद्धः॥ १३ ॥ अवलेप इत्यर्धं भिन्नं वाक्यम् । स्वयमात्मानं न दर्शयतीति यत् ॥ ७२ ॥ अयं समुद्रस्यावलेपो गर्वः, दृश्यतामिति शेषः ॥ १४ ॥ प्रशमः चित्तप्रसादः । क्षमा अपराधसहिष्णुत्वम् । आर्जवं करणत्रयैकरूप्यम् । प्रियवादिता चेत्येते सतां गुणा निर्गुणेषु पुरुषेषु विषये असामर्थ्यं फलन्ति, दुष्टजनाः सर्वशक्तियुक्तोऽपि प्रशमादिपरश्चेत् तमसमर्थं मन्यन्त इत्यर्थः । अतोऽयं दण्डस्यैव विषय इति भावः ॥ १५ ॥ विपरिधावकम् अमार्गवर्तिनम् ॥ १६ ॥ कीर्तिः गुणवत्ताप्रथा । यशः दानजनिता ख्यातिः ॥ १७ ॥ १८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यनुषञ्जनीयम् ॥ १७ ॥ मद्बाणनिर्भिन्नैः अत एव जलोपरि प्लवद्भिः मकरैः । निरुद्धतोयं व्याप्ततोयम् ॥ १८ ॥ भोगिनां महाकायानाम् । भूम्नि मतुप् । "भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः" इत्यमरः । नागानां सर्पाणाम् । महाभोगानि महाशरीराणि । क्लीबत्वमार्षम् । करिणां मत्स्यानां गजाकारमत्स्यानाम् । छिन्नानीति लिङ्गव्यत्ययेनानुषङ्गः । करान् शुण्डादण्डान् । "मत्स्यविशेषो मकरः करिमकरो भवति तद्विशेषश्च " इति

अद्य मद्बाणनिर्भिन्नैर्मकरैर्मकरालयम् । निरुद्धतोयं सौमित्रे प्लवद्भिः पश्य सर्वतः ॥१८॥ महाभोगानि मत्स्यानां करिणां च करानिह । भोगिनां पश्य नागानां मया छिन्नानि लक्ष्मण ॥ १९ ॥ सशङ्खशुक्तिकाजालं समीनमकरं शरैः । अद्य युद्धेन महता समुद्रं परिशोषये ॥२०॥ क्षमया हि समायुक्तं मामयं मकरालयः । असमर्थं विजानाति धिक् क्षमामीदृशे जने ॥ २१ ॥ न दर्शयति साम्ना मे सागरो रूपमात्मनः ॥२२॥ चापमानय सौमित्रे शरांश्चाशीविषोपमान् । सागरं शोषयिष्यामि पद्भ्यां यान्तु प्लवङ्गमाः ॥ २३ ॥

हलायुधः ॥१९॥ सशङ्खेति । स्पष्टः ॥२०॥ क्षमैकसाराणां भवतामीदृशी फणितिरनुचितेत्याशङ्क्याह—क्षमयेति । सागरशोषणे प्रवृत्तोऽप्येतावत्पर्यन्तं क्षमया गृहीतचरणोऽस्मि । सुप्तप्रमत्तकुपितानां भावज्ञानं दृष्टमिति न्यायेन स्वरूपं प्रकटयति मामिति । माम् इतरनैरपेक्ष्येण स्थितम् । असमर्थं विजानाति कार्यकरणाक्षमं मन्यते । विजानाति मकरालयः । अयोध्याधिपतिः कोसलाधिपतिरितिवत् स्वमात्मानं मन्यते, कतिपयमीनग्रहणगर्त इति न जानाति । धिक् क्षमाम् इतः परं क्षमां नाङ्गीकुर्मः । विनियोगकाले हि क्षमा स्वीकार्या । अद्य क्रोध एवाङ्गीकर्तव्यः । इक्ष्वाकूणां कदाचिदपि क्षमा किं त्याज्येत्यत्राह ईदृशे जन इति । ईदृशे जने प्राप्तरक्षःसहवासदोषे ॥ २१ ॥ न दर्शयतीत्यर्धमेकं वाक्यम् ॥ २२ ॥ अपि कदाचिदात्मानं दर्शयेदिति करुणया समुद्रं वाचा निर्भर्त्स्य कर्मणाऽपि निर्भर्त्सयितुमुपक्रमते—चापमानयेति । एवं विलम्ब्य करणं क्रमेण निर्भर्त्स्य कार्यं कारयितुम् । अन्यथा सद्य एव शोषयेत् । चापमानय निर्गुणं वशीकर्तुं सगुणमानयेत्याशयः । चापमानय अत्यानम्रत्वं निवर्तयितुं नम्रं चापमानय ।

भोगिनां महाशरीराणां नागानां सर्पाणां महाभोगानि महाभोगान् । लिङ्गव्यत्यय आर्षः ॥ १९ ॥ युद्धेन बाणप्रहारेण ॥ २०-२४ ॥

For Private And Personal Use Only

समुद्रस्य शेषशय्यात्वेन तस्मिन्किंचित्सौहार्दवता लक्ष्मणेन क्षणं विलम्बः कृतः। अत आह सौमित्र इति। सुमित्रावचनमेव कर्तव्यम् ज्येष्ठवचनं तु न कर्तव्यमिति नियमोऽस्ति। यद्वा सौमित्रे! "रामे प्रमादं माकार्षीः" इति मात्रोपदिष्टं मा विस्मार्षीः। अथ चापमात्र मानीतं तदाह शरांश्चेति। लीलाप्रयोगार्हेषु केषुचिदानीतेष्वाह आशीविषोपमानिति। दृष्टिविषाः सर्पा आशीविषा इत्युच्यन्ते। किमर्थं शरा नयनमिति विलम्ब्य सौमित्रिणा पृष्ट आह सागरमिति। एकेनैव दग्धुं सामर्थ्येऽपि शरानित्युक्तिस्तत्सम्बन्धेन सप्तसागरानपि शोषयितुमिच्छया।

अद्याक्षोभ्यमपि क्रुद्धः क्षोभयिष्यामि सागरम् ॥ २४ ॥ वेलासु कृतमर्यादं सहसोर्मिसमाकुलम्। निर्मर्यादं करिष्यामि सायकैर्वरुणालयम् ॥ २५ ॥ महार्णवं क्षोभयिष्ये महादानवसङ्कुलम् ॥ २६ ॥ एवमुक्त्वा धनुष्पाणिः क्रोधविस्फारितेक्षणः। बभूव रामो दुर्द्धर्षो युगान्ताग्निरिव ज्वलन् ॥ २७ ॥ सम्पीड्य च धनुर्घोरं कम्पयित्वा शरैर्जगत्। मुमोच विशिखानुग्रान् वज्रानिव शतक्रतुः ॥ २८ ॥

कोपातिशयेन स्वबलमज्ञात्वा वा तादृशोक्तिः। शोषयिष्यामीति वदतः किं शरेणेति न शङ्कनीयम्। "छिन्नं भिन्नं शरैर्दग्धम्" इति राम शराणां दाहकत्वसंभवात्। अन्तरेणापि चतुर्थभूतजगन्निर्वाहं करिष्यामीति भावः। सागरम्, यद्ययं ज्ञातिविरोधमाचरति तर्हि वयमपि ज्ञाति कृत्यं कुर्म इति भावः। सागरं शोषयिष्यामि अनेकसहस्रसातमेक एव हरिष्यामि। किं तत इत्यत्राह–पद्भ्यामिति। एकैकस्य पदद्वयं गमन साधनमिति द्विवचनम्। वानराणां हि द्वावेव पादौ द्वौ हस्तौ ग्रहणभक्षणादीनां ताभ्यामेवं दर्शनात्। अनेन कृतस्य कार्यविच्छेदस्यानुरूपमसुं वानरपादाभ्यामेव दर्शयिष्यामीति भावः ॥ २३ ॥ पक्षान्तरमाह–अद्येति। अर्धमेकं वाक्यम् ॥ २४ ॥ पुनः पक्षान्तरमेवाह–वेलास्विति। वेलासु चतुर्षु तीरेषु। कृतमर्यादं कृतव्यवस्थम्, कदाचिदपि वेलाम् अनतिवर्तमानमित्यर्थः। निर्मर्यादं करिष्यामि अव्यवस्थं करिष्यामि। भूतले प्लाव यिष्यामीत्यर्थः ॥ २५ ॥ समुद्रेण चिरपरिपोषिता दानवादय एतं रक्षिष्यन्तीत्यत्राह–महार्णवमिति। दानवैः सह क्षोभयिष्यामीत्यर्थः ॥ २६ ॥ एव मिति। विस्फारितेक्षणः विवर्तितनयनः ॥ २७ ॥ संपीड्य दृढमुष्टिना मध्यमवलम्ब्य। कम्पयित्वा भयकम्पितं कृत्वा। जगत् जगत्स्थजन्तून्। वज्रा

वेलास्विति। वेलासु कृतमर्यादं वेलासु प्रागादिदिक्चतुष्टयतीरेषु कृतमर्यादं कृतव्यवस्थम्। वेलानामलङ्घने कृतनियममित्यर्थः। निर्मर्यादं लङ्घितवेलं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नित्यभूतोपमा ॥ २८ ॥ तेजसा ज्वलन्त इत्यन्वयः । प्रविशन्ति प्राविशन् । त्रस्तपन्नगमिति क्रियाविशेषणम् ॥ २९ ॥ तोयवेगः तरङ्गविततिः । मारुतरवः वातजन्यरवः । समारुतरवः वातसङ्घट्टनजन्यरवसहित इत्यर्थः ॥ ३० ॥ तीरे महोर्मिमालाविततः । अन्तस्तरङ्गजालाकृष्टशङ्खशुक्तिसमावृतः । सज्वालशरप्रवेशेन सधूमः । मध्ये शराग्निशोषणेन परिवृत्तोर्मिश्चासीदित्यन्वयः ॥ ३१ ॥ व्यथिता इति । आपातालं शराः प्रविष्टा इति भावः ॥ ३२ ॥

ते ज्वलन्तो महावेगास्तेजसा सायकोत्तमाः । प्रविशन्ति समुद्रस्य सलिलं त्रस्तपन्नगम् ॥२९॥ तोयवेगः समुद्रस्य सनक्रमकरो महान् । सम्बभूव महाघोरः समारुतरवस्तदा ॥ ३० ॥ महोर्मिमालाविततः शङ्खशुक्तिसमावृतः । सधूमपरिवृत्तोर्मिः सहसाऽऽसीन्महोदधिः ॥ ३१ ॥ व्यथिताः पन्नगाश्चासन् दीप्तास्या दीप्तलोचनाः । दानवाश्च महावीर्याः पातालतलवासिनः ॥३२॥ ऊर्मयः सिन्धुराजस्य सनक्रमकरास्तदा । विन्ध्यमन्दरसङ्काशाः समुत्पेतुः सहस्रशः ॥ ३३ ॥ आघूर्णिततरङ्गौघः सम्भ्रान्तोरगराक्षसः । उद्वर्तितमहाग्राहः संवृत्तः सलिलाशयः ॥ ३४ ॥ ततस्तु तं राघवमुग्रवेगं प्रकर्षमाणं धनुरप्रमेयम् । सौमित्रिरुत्पत्य समुच्छ्वसन्तं मा मेति चोक्त्वा धनुराललम्बे ॥ ३५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकविंशः सर्गः ॥ २१ ॥

तात्कालिकतरङ्गौन्नत्यं वर्णयति–ऊर्मय इति ॥ ३३ ॥ उक्तानुवादेन विशेषान्तरमाह–आघूर्णितेति । आघूर्णितसम्भ्रान्तोद्वर्तितपदान्येकार्थानि ॥ ३४ ॥ ततस्त्विति । तुशब्देन पूर्वसन्धानाद्वैषम्यमुक्तम् । अप्रमेयम् अपरिच्छेद्यवैभवम् । प्रकर्षमाणम्, अमोघशरसन्धानायेति भावः । समुच्छ्वसन्तम्, कोपेनेति शेषः । तं राघवम् । उत्पत्य झटित्यागत्य । मा मेत्युक्त्वा एतादृशं धनुराकर्षणं मा कुर्वित्युक्त्वा । भयातिशयाद्वीप्सा । अनिवर्तमाने तस्मिन् धनुराललम्बे ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशः सर्गः ॥ २१ ॥

करिष्यामि ॥ २५–३५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकविंशः सर्गः ॥ २१ ॥

For Private And Personal Use Only

प्रथमं वानरसेनातरणाय सागरं शरणं गत्वा तस्मिन्ननागते चापमानयेति वाचा भीषयित्वा तथाप्यनाविष्कृतनिजरूपं तं शरैः प्रक्षोभ्य तावताप्यनागतस्य तस्य भीतिमुत्पादयितुं ब्रह्मास्त्रसन्धानायोपक्रमत इत्याह–अथेत्यादिना। सपातालं पातालपर्यन्तमित्यर्थः ॥ १ ॥ शरेति । शरनिर्दग्धतोयस्य निर्जलस्येत्यर्थः । परिशुष्कस्य भूम्यन्तर्गतजलशून्यस्य । शोषितसत्त्वस्य दग्धसत्त्वस्येत्यर्थः । ते महान् पांसुः अतिसूक्ष्मो रेणुः उत्पद्यते । वर्तमानसामीप्ये वर्तमानप्रयोगः । महावर्षेऽपि पुनर्यथा जललवोऽपि न तिष्ठति तथा करिष्यामीति भावः ॥ २ ॥ ननु सकलजलशोषणेन पातालमात्रपरिशोषात्तत्र गमनासम्भवादाकाशेन गन्तव्यं ततो वरमिदानीं तथा गमनं किं कोपेनेत्यत्राह–मत्कार्मुकेति । शरवर्षेण शरजालेन सेतुस्थानीयेन । सेतुबन्धादिक्लेशो मे न भवतीति भावः ॥ ३ ॥ पौरुषं बलं विक्रमं पराक्रमं च विचिन्वन् विशेषेण पर्यालोचयितुं नाभिजानासि । "लक्षणहेत्वोः–" इति शतृप्रत्ययः । इदमज्ञानं सहवासकृतमित्याशयेन दानवालयेति संबोधनम् । मत्तो भाविनं सन्तापं च नाधिगमिष्यसि न ज्ञास्यसि । मत्पराक्रममजानन् मत्तो भाविब्रह्मास्त्रपीडामपि न ज्ञास्यस्येवेति भावः ॥ ४ ॥ ब्रह्मदण्डः ब्रह्मशापः । तद्वदमोघमित्यर्थः । यद्वा ब्रह्मदण्डः केतुविशेषः । तथोक्तं नारदसंहितायाम्–"पितामहात्मजः क्रूरस्त्रिवर्णः शिखरान्वितः । ब्रह्मदण्डाह्वयः केतुः सर्वभूतविनाशनः॥" इति । ब्राह्मेणास्त्रेण ब्रह्मास्त्रमन्त्रेण । संयोज्य अभिमन्त्र्य । तद्धनुर्विचकर्ष ॥५॥

अथोवाच रघुश्रेष्ठः सागरं दारुणं वचः । अद्य त्वां शोषयिष्यामि सपातालं महार्णव ॥ १ ॥ शरनिर्दग्धतोयस्य परिशुष्कस्य सागर । मया शोषितसत्त्वस्य पांसुरुत्पद्यते महान् ॥ २ ॥ मत्कार्मुकविसृष्टेन शरवर्षेण सागर । पारं तेऽद्य गमिष्यन्ति पद्भिरेव प्लवङ्गमाः ॥३॥ विचिन्वन्नाभिजानासि पौरुषं वापि विक्रमम् । दानवालय सन्तापं मत्तो नाधिगमिष्यसि ॥४॥ ब्राह्मेणास्त्रेण संयोज्य ब्रह्मदण्डनिभं शरम् । संयोज्य धनुषि श्रेष्ठे विचकर्ष महाबलः॥५॥

॥ १ ॥ शरनिर्दग्धतोयस्य शरवर्षेण शोषितस्य, तत्रेति शेषः ॥ २ ॥ ३ ॥ विचिन्वन्निति । विक्रमं जलोपरि शरसेतुबन्धनजलस्तम्भनतच्छोषणादिशक्तिरूपम् । विचिन्वन् विशेषेण पर्यालोचयन् । नाभिजानासि पौरुषं शास्त्रवश्यत्वसौजन्यनिबन्धनं शरणवरणरूपं पुरुषकृत्यं नाभिजानासि । मत्तो भाविनं सन्तापं नाधिगमिष्यसि न ज्ञास्यसि, सर्वशक्तेरपि धर्मशीलतया शरणागतस्य फलप्रदानाभावे महाननर्थो भविष्यतीत्यमुमर्थं न जानासीत्यर्थः ॥४॥ ब्रह्मदण्डनिभं

अथास्त्रसन्धानस्य मरुकान्तारवर्तिनां युगपद्विनाशहेतुत्वात्तत्काले तदुचितमहोत्पातान् दर्शयति–तस्मिन्नित्यादिना। शरसन्धानकालिकं लोकस्य भयं दर्शयतीत्यप्याहुः। रोदसी द्यावापृथिव्यौ। सम्पफालेव भिन्ने इव। एकवचनमार्षम्। "द्यावापृथिव्यौ रोदस्यौ द्यावाभूमी च रोदसी" इत्यमरः ॥६॥७॥ तिर्यक् चेति श्लोकद्वयमेकान्वयम्। चन्द्रभास्करौ नक्षत्रैः सह तिर्यक् वक्रं यथा भवति तथा सङ्गतौ तिर्यग्जग्मतुः, भयादिति भावः।

तस्मिन् विकृष्टे सहसा राघवेण शरासने। रोदसी सम्पफालेव पर्वताश्च चकम्पिरे ॥ ६ ॥ तमश्च लोकमाववे दिशश्च न चकाशिरे। परिचुक्षुभिरे चाशु सरांसि सरितस्तथा ॥ ७ ॥ तिर्यक् च सह नक्षत्रैः सङ्गतौ चन्द्रभास्करौ। भास्करांशुभिरादीप्तं तमसा च समावृतम् ॥८॥ प्रचकाशे तदाऽऽकाशमुल्काशतविदीपितम्। अन्तरिक्षाच्च निर्घाता निर्जग्मुरतुलस्वनाः ॥ ९ ॥ पुस्फुरुश्च घना दिव्या दिवि मारुतपङ्क्तयः ॥ १० ॥ बभञ्ज च तदा वृक्षान् जलदानुद्वहन्नपि। अरुजंश्चैव शैलाग्रान् शिखराणि प्रभञ्जनः ॥ ११ ॥

आदीप्तम् ईषद्दीप्तम्, मन्दरश्मित्वात्तमसावृतत्वाच्च सूर्यस्येति भावः। समावृतं सम्यगावृतम्। उल्काशतविदीपितम्। उल्कालक्षणमुक्तं वराहमिहिरेण–"उल्का शिरसि विशाला निपतन्ती वर्द्धते च तनुपुच्छा" इति। निर्घातलक्षणं तेनैवोक्तम्–"पवनः पवनाभिहतो गगनादवनौ यदा समापतति। भवति तदा निर्घातः स च पापो दीर्घखगविरुतः॥" इति ॥ ८ ॥ ९ ॥ पुस्फुरुः चेरुः। मारुतपङ्क्तयः आवहोद्वहादिवातस्कन्धाः। दिव्याः श्लाघ्याः ॥ १० ॥ उद्वहन् ऊर्ध्वं नयन्। शैलाग्रान् पर्वताग्रप्रदेशान्। शिखराणि खण्डपर्वतान्। अरुजन् अपीडयत्। बहुवचनमार्षम् ॥ ११ ॥

शरं ब्राह्मेणास्त्रेण ब्रह्मास्त्रमन्त्रेण संयोज्याभिमन्त्र्येति सम्बन्धः ॥ ५ ॥ रोदसी द्यावाभूमी ॥ ६ ॥ ७ ॥ चन्द्रभास्करौ नक्षत्रैस्सह तिर्यक् सङ्गतौ तिर्यग्यथा तथा सङ्गतौ व्युत्क्रमेण यथा गन्तुमुपक्रान्तावित्यर्थः। "भास्करांशुभिरादीप्तं तमसा च समावृतम्" इत्यनेन विरुद्धयोस्तेजस्तिमिरयोस्सामानाधिकरण्यमभूदिति सूच्यते ॥ ८ ॥ ९ ॥ मारुतपङ्क्तयः वातस्कन्धाः। पुस्फुरुश्चेति वा पाठः ॥ १० ॥ शैलाग्रान् शैलोच्चप्रदेशान् ॥ ११ ॥

स०–रोदसी द्यावापृथिव्यौ। सम्पफाल विशीर्णे। एकवचनमार्षमिति नागोजिभट्टादयः। वस्तुतस्तु "रोदश्च रोदसी चापि दिवि भूमौ पृथक् पृथक्। सहप्रयोगेऽप्यनयो रोदः स्यादपि रोदसी" इति विश्वोक्तेः रोदसी तन्त्रन्यायेन द्यौः पृथिवी च। संपफाल विशीर्णेत्यर्थः। रोदसीत्यव्ययमप्यस्तीति भानुदीक्षितः ॥६॥ विषम०–प्रास्फुटन् प्रचेलुः। बभञ्ज चेति। मारुतपंक्तिरिति शेषः। उद्वहन्, मारुतसमूह इति शेषः। अग्रेऽप्येष एव कर्ता, शैलाग्रान् पर्वतप्रदेशान्। अरुजन् अपीडयत्। बहुवचनमार्षम्। शिखराणि खण्डपर्वतान् बभञ्ज चेत्यन्वयः ॥ १० ॥ ११ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ते वैद्युताग्नयः तदा महाशनयोऽभवन् । अशनिस्वरूपं मिहिरेणोक्तम्–" अशनिः स्वनेन महता शुक्ला नृगजाश्वतरुपशुमुखेषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना ॥" इति ॥१२॥ यानीत्यादि श्लोकद्वयमेकं वाक्यम् । यानि भूतानि दृश्यानि मनुष्यादीनि । अदृश्यानि पिशाचादीनि । तानि सर्वाणि भूतानि सन्त्रस्तानि । अत एवोद्विजन्ति कम्पमानानि सन्ति । अशनेः समम् अशनिस्वरसमं यथा तथा चुकुशुः तथा भैरवस्वनं मुमुचुः । ततः शिशियरे

दिविस्पृशो महामेघाः सङ्गताः समहास्वनाः । मुमुचुर्वैद्युतानग्नींस्ते महाशनयस्तदा ॥ १२ ॥ यानि भूतानि दृश्यानि चुक्रुशुश्चाशनेः समम् । अदृश्यानि च भूतानि मुमुचुर्भैरवस्वनम् ॥ १३ ॥ शिशियरे चापि भूतानि सन्त्रस्तान्युद्विजन्ति च । सम्प्रविव्यथिरे चापि न च पस्पन्दिरे भयात् ॥ १४ ॥ सह भूतैः सतोयोर्मिः सनागः सह राक्षसः । सहसाऽभूत्ततो वेगाद्भीमवेगो महोदधिः ॥ १५ ॥ योजनं व्यतिचक्राम वेलामन्यत्र सम्प्लवात् । तं तदा समतिक्रान्तं नातिचक्राम राघवः । समुद्धतममित्रघ्नो रामो नदनदीपतिम् ॥ १६ ॥ ततो मध्यात् समुद्रस्य सागरः स्वयमुत्थितः । उदयन् हि महाशैलान्मेरोरिव दिवाकरः ॥ १७ ॥

सुप्तानि, सुप्तवद्भूमौ पतितानीत्यर्थः । तत्रापि सम्प्रविव्यथिरे चिन्तया दुःखितानि । भयान्न पस्पन्दिरे न चलितानि ॥ १३ ॥ १४ ॥ अथ समुद्रराजस्योत्थानं सूचयति–सह भूतैरित्यादिना । ततो वेगात्पूर्वसर्गान्तोक्ताद्रामवेगात् । सहसा शरसन्धानसमय एव । भीमवेगोऽभूत् भीमप्रवाहवेगोऽभूत् । केवलशरमोक्षकृतात् क्षोभात् ब्रह्मास्त्रमोक्षारम्भे महान् क्षोभोऽभूदित्यर्थः ॥ १५ ॥ वेगफलं दर्शयति–योजनमित्यादिना । सार्धश्लोक एकान्वयः । संप्लवात् वारिपूरेण वेलामन्यत्र वेलां विनेत्यर्थः । अथवा संप्लवादन्यत्र प्रलयं विना । वेलां योजनं योजनपर्यन्तं व्यतिचक्राम अतिक्रान्तवान् । योजनमन्तर्जीर्णोऽभूदित्यप्याहुः । तं समतिक्रान्तं पलायमानं नातिचक्राम पलायमानं प्रति शस्त्रप्रयोगरूपातिक्रमं न चकार ॥ १६ ॥ तत इति । समुद्रस्य मध्यात्

वैद्युतान् विद्युत्सञ्जातान् ॥ १२ ॥ अशनेः समम् अशनिघोषतुल्यं यथा तथा चुक्रुशुः ॥ १३ ॥ उद्विजन्ति आकम्पन्ति ॥ १४ ॥ सहेति । ततो वेगात् प्रथमप्रयुक्तकेवलबाणप्रयोगकृतात् । क्षोभात् उदधिः भीमवेगोऽभूत् ब्रह्मास्त्रसन्धानेनातिभयङ्करक्षोभोऽभूदित्यर्थः ॥ १५ ॥ महोदधिः संप्लवात् वारिपूरेण वेलामन्यत्र योजनं

स० –तथाशब्द उपमायाम् । तं तथा चोरमिव स्थितम् । चोरं स्वगृहे स्थापयिता यथा चोरसदृशो भवति तथा स्वदारचोरस्य रावणस्य स्वगर्भे स्थापनात् समुद्रश्चोरसदृशस्तम् । द्वितीयेन तमित्यनेन समुद्रपरामर्शः । " तकारः कीर्तितश्चोरे " इति विश्वः । एतेन न पौनरुक्त्यम् । समतिक्रान्तम् अतिक्रान्तवेलम् अत एवोद्धतम् उत्कृष्टमपि तं नदनदीपतिम् । रामः नातिचक्राम नावधीत् । भीषणार्थमेवास्त्रसंयोजनं न वस्तुतः सत्यसङ्कल्पत्वात् । नातिचक्राम स्वधैर्यान्न चचालेति वा, अत्र पक्षे चक्रेति शेषः ॥ १६ ॥ सागरः वरुणः मेरोरिव विद्यमानात् उदयाद्रेर्महाशैलात् अङ्कात् दिवाकर इव । मेरोर्मनुष्यो–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उन्नतात्। स्वयं सागरः समुद्राभिमानिदेवता। दिवाकर इव, बभाविति शेषः ॥ १७॥ जाम्बूनदं जम्बूनदीप्रभवं स्वर्णम् । रक्तमाल्यं रक्तवैकक्ष्यमाला। जातरूपमयैः आकरजसुवर्णप्रचुरैः। तपनीयविभूषितैः रत्नकीलनार्हद्रुतकनकविभूषितैः। रत्नानां संबन्धिभिर्भूषणोत्तमैः। एकावली मुक्तावली। तरलं नायकरत्नम्। आघूर्णितः चलितः। कालिका मेघपङ्क्तिः। "मेघजालेऽपि कालिका" इत्यमरः। तया अनिलेन च सङ्कुलः क्षुभितः। मेघानिलौ समुद्रस्य सहचरा-

पन्नगैः सह दीप्तास्यैः समुद्रः प्रत्यदृश्यत। स्निग्धवैडूर्यसङ्काशो जाम्बूनदविभूषितः ॥ १८ ॥ रक्तमाल्याम्बरधरः पद्मपत्रनिभेक्षणः। सर्वपुष्पमयीं दिव्यां शिरसा धारयन् स्रजम् ॥ १९ ॥ जातरूपमयैश्चैव तपनीयविभूषितैः। आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः ॥२०॥ धातुभिर्मण्डितः शैलो विविधैर्हिमवानिव। एकावलीमध्यगतं तरलं पाण्डरप्रभम् ॥२१॥ विपुलेनोरसा बिभ्रत् कौस्तुभस्य सहोदरम्। आघूर्णिततरङ्गौघः कालिकानिलसङ्कुलः ॥२२॥ [देवतानां सुरूपाणां नानारूपाभिरीश्वरः। गङ्गासिन्धुप्रधानाभिरापगाभिः समावृतः॥] उद्वर्तितमहाग्राहः सम्भ्रान्तोरगराक्षसः। सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान्। अब्रवीत् प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् ॥२३॥

विति प्रसिद्धिः ॥१८-२२॥ उद्वर्तितेत्यादिसार्द्धश्लोक एकान्वयः। उद्वर्तितः उद्भ्रामितः। समुपक्रम्य समुपागम्य। स्वसौजन्यं पुरस्कर्तुं पूर्वम् आमन्त्र्य

-व्यतिचक्राम रामशरसन्धानक्षुब्धं सत्सागरजलं वेलां विसृज्य योजनमात्रं परावृत्तम् वेलामुल्लङ्घ्य योजनमात्रं बहिर्गतं वेत्यर्थः। तं सापराधं सागरं नातिचक्राम नाभ्यभवत्, नावधीदित्यर्थः। परमकारुणिकेन श्रीरामेण समुद्रभयोत्पादनार्थमेव ब्रह्मास्त्रं संहितम्, न तु तद्वधार्थमिति भावः ॥ १६-१९ ॥ जातरूपेति। तपनीयविभूषणैः रत्नकीलितस्वर्णभूषणैः। आत्मजानां स्वस्मिन्नुत्पन्नानाम् ॥ २० ॥ २१ ॥ कालिकानिलसङ्कुलः मेघपटलसम्मिलितवायुना सङ्कुलः "मेघजालेऽपि कालिका" इत्यमरः ॥ २२ ॥ समुपक्रम्य समुपागम्य ॥ २३ ॥

-भयादुत्थित इति वा "मेरुर्भूधरधन्वनोः" इति विश्वः ॥ १७ ॥ **सर्वपुष्पमयीं** यावत्पुष्पयुक्ताम्। शिरसि धारयन्नित्यनेन रामसत्कारार्थमिति ज्ञायते। एकैकस्य देवस्य एकैकं पुष्पं युक्तम्, अयुक्तं चैकं श्रीनारायणरूपिणो रामस्य। समस्तकुसुमयुक्ता युक्ता माला। यथोक्तं भागवते नवमे। रुक्मिणीशविजये च प्रमाणान्तरोक्तार्थसंग्राहकं-"सिन्धुः शिरस्यर्हणं प्रतिगृह्य रूपी" इति। "या वै चम्पकसम्पदाञ्जवसतेर्दूर्वाश्रिया स्वात्मनः केतक्या विमलेन छत्रितननस्याम्भोजकान्त्या विधोः। सन्नीलोत्पलशोभया दिनमणेः श्रीमत्तुलस्याऽमता हेरम्बस्य हरेः परं समुचिता सा मालिका शोभते॥" इति। यद्वा वरुणाभरणप्रस्तावात्तत्सत्त्वा ॥ १९ ॥ **समुपक्रम्य** पादाभ्यामागत्य पूर्वमामन्त्र्य अहं भो रामाम्भोनिधिर्देवं वन्दे त्वामिति सम्बोध्य। शरपाणिनं बाणपाणिम्। पणो ग्लहः, स एव पाणः प्रज्ञादिः। शरैः पाणः-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आहूय । प्रकृष्टो मूर्ध्नि कृतोऽञ्जलिः यस्यासौ प्राञ्जलिः । शरपाणिनमिति नकारान्तत्वमार्षम् । स्वविरोधिनो मरुवासिनो रामेण घातयितुं स्वयं रावण भीतत्वेन तत्संहारक्षममस्य पराक्रमं परीक्षितुं च समुद्र एतावत्पर्यन्तं विलम्बितवानिति बोध्यम् ॥ २३ ॥ किं विभोस्तव मया कर्तव्यम्, किं गाधत्वम्, उत जलस्तम्भनम्, आहोस्वित्सेतुबन्धनानुकूल्यमित्याशङ्क्य न तावदाद्यः पक्ष इत्याह श्लोकद्वयेन—पृथिवीति । सौम्य प्रसन्न । अनेनाञ्जलिकरणान

पृथिवी वायुराकाशमापो ज्योतिश्च राघव । स्वभावे सौम्य तिष्ठन्ति शाश्वतं मार्गमाश्रिताः ॥ २४ ॥
तत्स्वभावो ममाप्येष यदगाधोऽहमप्लवः । विकारस्तु भवेद्गाध एतत्ते प्रवदाम्यहम् ॥ २५ ॥
न कामान्न च लोभाद्वा न भयात् पार्थिवात्मज । ग्राहनक्राकुलजलं स्तम्भयेयं कथंचन ॥ २६ ॥

न्तरमेव रामः प्रसन्न इति गम्यते । पृथिव्यादयः पञ्च पदार्थाः शाश्वतं नित्यं मार्गं मर्यादाम् आश्रिताः सन्तः स्वभावे काठिन्यातिर्यग्गमनावकाशप्रदाना गाधत्वोर्ध्वज्वलनादिस्वस्वभावे तिष्ठन्ति, स्वस्वभावं नातिक्रामन्तीत्यर्थः ॥ २४ ॥ एषु कस्ते स्वभाव इत्यत आह—तदिति । तत् तस्मात् सर्वेषां पृथिव्यादीनां स्वस्वभावानतिलङ्घित्वात् । अहम् अगाधः अप्लवः अलङ्घ्यश्चेति यत् एषः ममापि स्वभावः । तस्मादेवमेव मया स्थातव्यम् । गाधः प्लवविषयोऽहमिति यत् एषः मम विकारः अन्यथाभावः । तथा मया न स्थातुं युक्तम् । एतत् उक्तस्वरूपं मे प्रवदामि प्रावदम् । प्रददामीति पाठेऽप्यय मेवार्थः । धातूनामनेकार्थत्वात् ॥ २५ ॥ द्वितीयपक्षोऽप्यनुपपन्न इत्याह—न कामादिति । कामात् अर्थेच्छया । लोभात् लब्धवस्तुत्यागासहिष्णुतया ।
स्वकीयापराधं परिहर्तुं पातनिकामाह—पृथिवीत्यादि । स्वभावे स्वस्याधिकारे ॥२४॥ तव स्वभावः कीदृश इत्यत आह—तत्स्वभाव इति । अहमप्लवः अगाध इति यत् एष ममापि स्वभावः, गाधस्तु विकारो भवेत । एतत्ते प्रवदामि प्रावदम् । तत्तस्मात्कारणात् तव समक्षं नागममिति शेषः ॥२५॥ तर्हि मा भूत्स्वभावहानिः, घनीभवनेनास्माकं मार्गं प्रयच्छेत्याशङ्क्य तथात्वे जलचरजन्तुपीडा स्यात् । प्रकारान्तरेण मार्गं करिष्यामीत्याह—न कामादित्यादिश्लोकद्वयेन । कामात् अभिलाषात् ।

—रिपुप्राणरूपः सोऽस्यास्तीति स तथा वा तम् । न च भारते वनपर्वणि " सागरस्तु ततः स्वप्ने दर्शयामास राघवम् " इति स्वप्ने रामस्य सागर आत्मानं दर्शयामासेत्युक्त्या अत्र च समुत्थितः प्राञ्जलिरिति वचः पूर्वम् अत्र च " सागरः समुपक्रम्य पूर्वमामन्त्र्य वीर्यवान् । अब्रवीत्प्राञ्जलिर्वाक्यम् " इति वाक्यं विरुद्धमिति वाच्यम्; भागवते नवमे " सिन्धुः शिरस्यर्हणं प्रतिगृह्य रूपी पादारविन्दमुपगम्य बभाष एतत् " इत्युक्तेः प्रत्यक्षत एव जाग्रद्दशायामेव दर्शनम् । भागवतस्योत्तरत्वेनैतदनुरोधेन प्रतिशिक्ष्य इति पूर्वोदीरिते स्वप्ने स्वापे कृते सति नदनदीभर्ता राघवं स्वं दर्शयामासेति भारतश्लोकार्थोपपत्तेः । अत्रैव यादोगणैर्वृत इत्युक्तिस्वारस्याच्च । स्वप्ने चेदेकमात्रदर्शनेन भाविकार्यसिद्धेस्तत्संवृततयाऽऽगमनमनुपयुक्तम् । प्रत्यक्षतस्तत्सहनयनं स्वद्रोषोष्मणा यादसां दशेदशीति प्रदर्शनेन देवदयोदयहेतुरिति सहनयनं युक्तम् ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भयात् दण्डभयात् । पार्थिवात्मजेत्यनेन सर्वमर्यादास्थापकोऽसीति द्योतयति । न स्तम्भयेयं पीडाकरत्वादिति भावः ॥ २६ ॥ तृतीयं तु पक्षं कक्षीकरोमीत्याह–विधास्य इत्यादिसार्धश्लोकेन । येन यथाऽहं विषहिष्ये शक्ष्यामि तथा विधास्ये । किं तच्छक्यमित्यपेक्षायामाह ग्राहेत्यादि । यावत्सेना तरिष्यति तावत् ग्राहा न प्रहरिष्यन्ति । जलेऽपि हि केचिद्भ्रमिष्यन्ति । हरीणां तरणे विषये । यथा स्थलं भवति यथा सेतुमार्गो भवति तथा करिष्यामि

विधास्ये राम येनापि विषहिष्ये ह्यहं तथा । ग्राहा न प्रहरिष्यन्ति यावत् सेना तरिष्यति ॥ २७ ॥ हरीणां तरणे राम करिष्यामि यथा स्थलम् ॥ २८ ॥ तमब्रवीत्तदा राम उद्यतो हि नदीपते । अमोघोऽयं महाबाणः कस्मिन् देशे निपात्यताम् ॥ २९ ॥ रामस्य वचनं श्रुत्वा तं च दृष्ट्वा महाशरम् । महोदधिर्महातेजा राघवं वाक्यमब्रवीत् ॥ ३० ॥ उत्तरेणावकाशोऽस्ति कश्चित् पुण्यतमो मम । द्रुमकुल्य इति ख्यातो लोके ख्यातो यथा भवान् ॥ ३१ ॥ उग्रदर्शनकर्माणो बहवस्तत्र दस्यवः । आभीरप्रमुखाः पापाः पिबन्ति सलिलं मम ॥ ३२ ॥

सेतुबन्धद्रव्यापकर्षणादिविघ्नं न करिष्यामीत्यर्थः ॥ २७ ॥ २८ ॥ उद्यतः कृतसन्धानः ॥ २९ ॥ महातेजाः स्वाभिमतलाभेन जनितकान्तिः ॥ ३० ॥ उत्तरेण समीपवर्तिन्युत्तरभागे । " एनबन्यतरस्यामदूरेऽपञ्चम्याः " इत्येनप् । ममावकाशः मध्यप्रदेश इत्यर्थः । पुण्यतमः चारुतमः । " पुण्यं तु चार्वपि" इत्यमरः । द्रुमेषु कुल्या यस्यासौ द्रुमकुल्यः । "कुल्याऽल्पा कृत्रिमा सरित्" इत्यमरः ॥ ३१ ॥ उग्रे दर्शनकर्मणी येषां ते उग्रदर्शनकर्माणः ।

लोभात् स्वकीयवस्तुपरित्यागासहिष्णुत्वात् । रागादनुरागाच्च नक्राकुलजलं न स्तम्भयेयं भयाद्वा न स्तम्भयेयम्, कथञ्चन अन्येन हेतुना न स्तम्भयेयम्, किन्तु अहमपि येन विषहिष्ये यावत्सेना तरिष्यति तावद्ग्राहा अपि यथा सेनां न प्रहरिष्यन्ति तथा विधास्य इति योजना ॥ २६ ॥ २७ ॥ तमेव प्रकारमाह–हरीणामिति । हरीणां तरणे विषये स्थलं यथा करिष्यामि, सेतुबन्धनसमये सेतुबन्धनसाधनखातमृद्दारुपर्वतादीनां निमज्जनं यथा न भवति तथा करिष्यामीत्यर्थः । यद्वा सेनातरणमार्गप्रकाशनप्रकारमाह–न कामादित्यादिसार्धद्वाभ्याम् । कामात् यत्किञ्चिद्वस्त्वभिलाषात् नक्राकुलजलं न स्तम्भयेयम्, लोभात् स्वकीयवस्तुपरित्यागासहिष्णुत्वान्न स्तम्भयेयम्, कथञ्चन प्रकारान्तरेणापि न स्तम्भयेयम्, किन्तु हे पार्थिवात्मजेत्यनेन दशरथेऽवतीर्णेश्वरेत्युक्तं भवति । ईश्वरत्वादेव भयात् त्वद्भयात् रागात् त्वयि भक्त्या च वानररूपान्तरङ्गभक्तसहितत्वत्पादारविन्दरजोवहनभाग्यं मया लब्धमिति भक्त्या जलं स्तम्भयेयमित्यर्थः । अब्रवीत्प्राञ्जलिर्वाक्यं राघवं शरपाणिनम् इत्युक्त्या भयान्मार्गप्रदत्वोक्तिः ॥ २८ ॥ उद्यतः संयोजितः ॥ २९ ॥ ३० ॥ उत्तरेणेति । उत्तरतीरसमीपदेशवर्तिद्रुमकुल्याख्योऽवकाशो देशः अस्तीति सम्बन्धः ॥ ३१ ॥ उग्रदर्शनकर्माणः उग्रे दर्शनकर्मणी येषां ते तथा ॥ ३२ ॥ ३३ ॥

For Private And Personal Use Only

दस्यवः शत्रवः । "दस्युशात्रवशत्रवः" इत्यमरः । दस्यवः चोरा वा । आभीराः महाशूद्राः ॥ ३२ ॥ तत्र द्रुमकुल्ये । तेषु आभीरप्रमुखेषु ॥ ३३ ॥ सागरदर्शनात्सागरमतेन । यद्वा अङ्गुल्या निर्दिश्य सागरेण प्रदर्शनात् ॥ ३४ ॥ तेन शरमोक्षणेन ॥ ३५ ॥ ननाद जलनिर्गमेनेति भावः । व्रण मुखात् व्रणमुखद्वारेण ॥ ३६ ॥ सः व्रणमुखं व्रणकूपः इत्यभिविश्रुतो बभूव । सततमिति । तस्येति शेषः ॥ ३७ ॥ अवदारणशब्दः, बाणस्येति

तैस्तु संस्पर्शनं प्राप्तैर्न सहे पापकर्मभिः । अमोघः क्रियतां राम तत्र तेषु शरोत्तमः ॥ ३३ ॥ तस्य तद्वचनं श्रुत्वा सागरस्य स राघवः । मुमोच तं शरं दीप्तं वीरः सागरदर्शनात् ॥ ३४ ॥ तेन तं मरुकान्तारं पृथिव्यां खलु विश्रुतम् । निपातितः शरो यत्र दीप्ताशनिसमप्रभः ॥ ३५ ॥ ननाद च तदा तत्र वसुधा शल्यपीडिता । तस्माद्व्रणमुखात्तोयमुत्पपात रसातलात् ॥ ३६ ॥ स बभूव तदा कूपो व्रण इत्यभिविश्रुतः । सततं चोत्थितं तोयं समुद्रस्येव दृश्यते ॥ ३७ ॥ अवदारणशब्दश्च दारुणः समपद्यत ॥ ३८ ॥ तस्मात्तद्बाणपातेन त्वपः कुक्षिष्व शोषयत ॥ ३९ ॥ विख्यातं त्रिषु लोकेषु मरुकान्तारमेव तत् ॥ ४० ॥ शोषयित्वा ततः कुक्षिं रामो दशरथात्मजः । वरं तस्मै ददौ विद्वान् मरवेऽमरविक्रमः ॥ ४१ ॥

शेषः ॥ ३८ ॥ तस्मादित्यर्धम् । तद्बाणपातेन तस्य बाणस्य पातेन । कुक्षिषु अवटेषु स्थिता अपः पूर्वं पापस्पृष्टानि जलानि । तस्मात् द्रुमकुल्यात् । अशोषयत् न्यवारयदित्यर्थः ॥३९॥ पूर्वं रामबाणपातेन पृथिव्यां विश्रुतत्वमुक्तम्, सम्प्रति विरोधिनिरसनात् त्रिषु लोकेषु विख्यातत्वमाह–विख्यातामिति । मरुकान्तारमेव मरुकान्तारनामैव । विख्यातं प्रसिद्धमभूदित्यर्थः ॥४०॥ शोषयित्वेति । कुक्षिं समुद्रमध्यप्रदेशम् । मरुकान्तारं शोषयित्वा दग्ध्वा । कथं

सागरदर्शनात् सागरोपदेशात् ॥ ३४ ॥ तेन रामेण । दीप्ताशनिसमप्रभः शरो यत्र निपातितः तत्स्थलं पृथिव्यां मरुकान्तारमिति विश्रुतं खलु पूर्वमेव प्रसिद्धं हीत्यर्थः ॥३५॥ सततमिति । मरुभूमौ रामबाणव्रणादुत्थितं तोयं स्वादूदकं समुद्रस्येव समुद्रसलिलमिव दृश्यत इत्यर्थः ॥ ३६–३८ ॥ तस्मादिति । तद्बाणपातेन कुक्षिष्ववटेष्वपः आभीरादीनां जीवनसाधनभूताः पुरातनीरपः तस्माद्देशादशोषयत् निरासयत्, राम इति शेषः । यद्वा पूर्वमपः पापिष्ठाभिस्स्पृष्टाः ताः तस्मात्पापिष्ठाभिस्पर्शनाद्धेतोः तद्बाणपातेनाशोषयत्, राम इति शेषः । कुक्षिं समुद्रकुक्षिं ततो मोक्षयित्वा पुरातनपापिष्ठाभीरजनान्मोचयित्वा ॥ ३९–४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनुष्यत्वं भावयतो वरदानमित्यत्राह अमरविक्रम इति । "सत्येन लोकान् जयति" इति न्यायेन वशीकृतसर्वलोक इत्यर्थः ॥ ४१ ॥ वरं सिद्धिमुखेन दर्शयति श्लोकद्वयेन–पशव्य इत्यादि। पशव्यः पशुभ्यो हितः पशूपभोग्यबालतृणादिसमृद्ध इत्यर्थः। अल्परोगः आरम्भ एव विनष्टरोगः। रसः मधु । आयुतः समन्तायुक्तः । स्नेहः घृतम् । औषधमोषधिसमूहः । एवमेतैः एवम्प्रकारैः । गुणैः भोग्यैः । युक्तः संयुक्तः । शिवः पन्थाः शोभनप्रदेश इत्यर्थः ॥४२॥४३॥

पशव्यश्चाल्परोगश्च फलमूलरसायुतः । बहुस्नेहो बहुक्षीरस्सुगन्धिर्विविधौषधः ॥ ४२ ॥ एवमेतैर्गुणैर्युक्तो बहुभिः सततं मरुः । रामस्य वरदानाच्च शिवः पन्था बभूव ह ॥४३॥ तस्मिन् दग्धे तदा कुक्षौ समुद्रः सरितां पतिः । राघवं सर्वशास्त्रज्ञमिदं वचनमब्रवीत् ॥ ४४ ॥ अयं सौम्य नलो नाम तनुजो विश्वकर्मणः। पित्रा दत्तवरः श्रीमान् प्रतिमो विश्वकर्मणा ॥४५॥ एष सेतुं महोत्साहः करोतु मयि वानरः । तमहं धारयिष्यामि तथा ह्येष यथा पिता ॥४६॥ एवमुक्त्वोदधिर्नष्टः समुत्थाय नलस्तदा । अब्रवीद्वानरश्रेष्ठो वाक्यं रामं महाबलः ॥ ४७ ॥ अहं सेतुं करिष्यामि विस्तीर्णे वरुणालये । पितुः सामर्थ्यमास्थाय तत्त्वमाह महोदधिः॥४८॥ दण्ड एव वरो लोके पुरुषस्येति मे मतिः । धिक् क्षमामकृतज्ञेषु सान्त्वं दानमथापि वा ॥ ४९ ॥

तस्मिन्निति । स्पष्टम् ॥ ४४ ॥ एवं सेतुनिर्माणानुकूलं स्थास्यामीत्युक्तवान्, सम्प्रति वरदानसन्तुष्टो वाक्सहायमाचरति–अयमिति । दत्तवरः मत्तुल्यः पुत्रस्ते भविष्यतीति मात्रे दत्तवरः ॥ ४५ ॥ एष इति । तं सेतुम् तथा ह्येष यथा पितेति । पिता यथा यादृशशक्तिमान् तादृशोऽयमित्यर्थः ॥ ४६ ॥ एवमिति । उदधिः नष्टः अन्तर्हितः ॥ ४७ ॥ अहमिति । पितुः सामर्थ्यं पित्रा दत्तं सामर्थ्यम् ॥ ४८ ॥ अथ वानरान् प्रत्याह–दण्ड इत्यादिश्लोकद्वयेन ।

पशव्य इति । पशव्यः पशुभ्यो हितः ॥ ४२ ॥ ४३ ॥ कुक्षौ दग्धे शोषितजले ॥ ४४ ॥ पित्रा विश्वकर्मणा दत्तवरः आकाशजलोपरिस्थायिगमनशीलविमानादिनिर्माणादिस्वकर्मकुशलेन सदृशसामर्थ्यः ॥ ४५ ॥ एष इति । नलः सेतुं बद्धुं कथं शक्नुयादत्राह–यथेति । यथा पिता विश्वकर्मा एव नलस्तथेति सम्बन्धः ॥ ४६ ॥ नष्टः अन्तर्हितः ॥ ४७–४९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अता राघवायेति परोक्षनिर्देशः । "हिमवान् मन्दरो मेरुः" इत्यादिवत् । मध्ये कविवाक्यं वा । दण्ड एव परः समीचीनोपायः । क्षमां सान्त्वं साम दानं वा धिक्, क्षमादयो नोपाया इत्यर्थः ॥ ४९ ॥ उक्तेऽर्थे हेतुमाह–अयं हीति। हि यस्मात्सागरः सगरखानितः प्रत्युपकारानभिज्ञ इत्यर्थः । दण्डभयात् सेतुकर्मदिदृक्षया गाधं ददावित्यन्वयः । सेतुकर्मदिदृक्षा च दण्डभयादेवास्य जातेत्यर्थः ॥ ५० ॥ पूर्वोक्तस्य पितृतुल्यसामर्थ्यलाभस्य हेतुं दर्शयति–

अयं हि सागरो भीमः सेतुकर्मदिदृक्षया । ददौ दण्डभयाद्गाधं राघवाय महोदधिः ॥ ५० ॥ मम मातुर्वरो दत्तो मन्दरे विश्वकर्मणा । औरसस्तस्य पुत्रोऽहं सदृशो विश्वकर्मणा ॥५१॥ स्मारितोऽस्म्यहमेतेन तत्त्वमाह महोदधिः । न चाप्यहमनुक्तो वै प्रब्रूयामात्मनो गुणान् ॥ ५२ ॥ समर्थश्चाप्यहं सेतुं कर्तुं वै वरुणालये । काममद्यैव बध्नन्तु सेतुं वानरपुङ्गवाः ॥५३॥ ततोऽतिसृष्टा रामेण सर्वतो हरियूथपाः । अभिपेतुर्महारण्यं हृष्टाः शतसहस्रशः ॥५४॥ ते नगान्नगसङ्काशाः शाखामृगगणर्षभाः । बभञ्जुर्वानरास्तत्र प्रचकर्षुश्च सागरम् ॥ ५५ ॥

ममेति । मया सदृशः पुत्रस्तव भविष्यतीत्येवंरूपो वरः । अयं चार्थः 'औरसस्तस्य पुत्रोऽहं सदृशो विश्वकर्मणा' इत्यनुवादात्सिद्धः ॥ ५१ ॥ तर्हि तावत्पर्यन्तं किमर्थं नोक्तवानसीत्यत्राह–स्मारित इति । एतेन समुद्रेण । अनुक्तौ निमित्तान्तरमप्याह–नचेति। अनुक्तः अन्येनानुक्तः । स्वेनैवोक्तौ महाकर्मारम्भे विश्वासो न भवेदिति भावः ॥५२॥ न केवलमुक्तिमात्रं समर्थश्चापीत्याह–समर्थश्चेति । बध्नन्तु बन्धनाय शिलादिकमानयन्त्वित्यर्थः ॥ ५३ ॥ अतिसृष्टाः नियुक्ताः ॥ ५४ ॥ नगान् वृक्षान् । नगसङ्काशाः गिरिसङ्काशाः । वानराधिपतित्वेऽपि मनुष्यत्वं सम्भवति निषादस्थपत्यधिकरणपूर्वपक्ष-

अयमिति । अयं सागरः दण्डभयात्सेतुकर्मदिदृक्षया गाधं ददावित्यन्वयः । ननु रामसम्बन्धित्वमात्रेण हनुमते मैनाकद्वारेण कृतोपकारः सागरस्साक्षाद्रामे समागत्य प्रसन्ने सति अमुमुपायं प्रथमत एवाविलम्बेन किमर्थं नोपदिष्टवानिति चेत्? सत्यम्; मया च विलम्बे क्रियमाणे विलम्बमसहमानो रामो मयि कोपादस्त्रं सन्धास्यति एतस्मिन्नन्तरे तं प्रसादयित्वा संहितेनास्त्रेण मम शत्रून्मारयित्वा पश्चादुपकरिष्यामीति धिया स्थित इति न दोषः ॥ ५० ॥ स्वस्य पितृसदृशत्वं दर्शयितुं वरागमनप्रकारमाह–मम मातुरिति । मम मातुर्वरो दत्तः मया सदृशस्तव पुत्रो भविष्यतीत्येवंरूपः ॥ ५१ ॥ नलस्समुद्रोपदेशात्प्रागेवैतत्सामर्थ्यं किं नावदत् ? तत्राह–न चेति ॥ ५२ ॥ ५३ ॥ तत इति । सागरं, प्रतीति शेषः ॥ ५४–५७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्यायात् अत आह वानरा इति । तत्र तदानीम् । प्रचकर्षुः आनयन्ति स्म ॥ ५५ ॥ सेतुबन्धनसाध्यकृतां वृक्षाणां कृतार्थतां व्यञ्जयितुं तान् परिगणयति श्लोकद्वयेन—ते सालैरित्यादिना ॥ ५६ ॥ ५७ ॥ अथैषामानयनशैघ्र्यमाह—समूलानिति । हरयस्तरूनित्युत्तरशेषः ॥ ५८ ॥ वृक्षेषून्मूलितेषु गुल्मादीनाजह्रुरित्याह—तालानिति । तालान् क्षुद्रतालान् । खदिरान् अरिमेदकान् ॥ ५९ ॥ भूरुहेषु लुतेषु पाषाणपर्वतादीनाजह्रुरित्याह—हस्तीति ।

ते सालैश्चाश्वकर्णैश्च धवैर्वंशैश्च वानराः । कुटजैरर्जुनैस्तालैस्तिलकैस्तिमिशैरपि ॥ ५६ ॥ बिल्वैश्च सप्तपर्णैश्च कर्णिकारैश्च पुष्पितैः । चूतैश्चाशोकवृक्षैश्च सागरं समपूरयन् ॥५७॥ समूलांश्च विमूलांश्च पादपान् हरिसत्तमाः । इन्द्रकेतूनिवोद्यम्य प्रजह्रुर्हरयस्तरून् ॥५८॥ तालान् दाडिमगुल्मांश्च नारिकेलान् विभीतकान् । वकुलान् खदिरान्निम्बान् समाजह्रुः समन्ततः ॥५९॥ हस्तिमात्रान् महाकायाः पाषाणांश्च महाबलाः । पर्वतांश्च समुत्पाट्य यन्त्रैः परिवहन्ति च ॥ ६० ॥ प्रक्षिप्यमाणैरचलैः सहसा जलमुद्धतम् । समुत्पतितमाकाशमुपासर्पत्ततस्ततः ॥ ६१ ॥ समुद्रं क्षोभयामासुर्वानराश्च समन्ततः । सूत्राण्यन्ये प्रगृह्णन्ति व्यायतं शतयोजनम् ॥ ६२ ॥ नलश्चक्रे महासेतुं मध्ये नदनदीपतेः । स तथा क्रियते सेतुर्वानरैर्घोरकर्मभिः ॥६३॥ दण्डानन्ये प्रगृह्णन्ति विचिन्वन्ति तथा परे ॥६४॥

हस्तिमात्रान् गजप्रमाणान् । "प्रमाणे द्वयसज्दघ्नञ्मात्रचः" इति मात्रच्प्रत्ययः । यन्त्रैः शकटादिभिः ॥ ६० ॥ प्रक्षिप्यमाणैरिति । उद्धतम् उत्पतितम् आसीत् । समुत्पतितं सत् आकाशं ततस्ततः तत्र तत्र उपासर्पत् प्रससार ॥ ६१ ॥ समुद्रमिति । सूत्राणि शतयोजनं व्यायतम् आकृष्टं यथा भवति तथा प्रगृह्णन्ति प्रागृह्णन्, आर्जवार्थम् । व्यत्ययेन लकारः ॥ ६२ ॥ घोरकर्मभिः युगपदनेकपर्वतानयनकर्मभिः । तथा नलक्रियानुसारेण ॥६३॥ दण्डान् सूत्रबद्धदण्डान्, वानरत्वराकरणदण्डान् वा । विचिन्वन्ति विशेषेण चयनं कुर्वन्ति । नलबद्धसेतोरुपरि शिलाश्चितवन्त इत्यर्थः ॥६४॥

समूलानिति । हरयस्तरूनित्यस्योत्तरेण सम्बन्धः ॥ ५८ ॥ ५९ ॥ यन्त्रैः आनयनसाधनैः । समुद्रं क्षोभयामासुर्वानराश्च समन्ततः इति पाठः ॥ ६० ॥ ६१ ॥ सूत्राणीति । शतयोजनं व्यायतं सूत्राणि प्रगृह्णन्ति । व्यायतं व्यायामः । शतयोजनदीर्घपर्यन्तस्य न्यूनातिरिक्तपरिहारार्थं सूत्राण्यगृह्णन्नित्यर्थः ॥६२॥६३॥ दण्डानिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वानरा इति । बबन्धिरे, सेतुप्रदेशानिति शेषः ॥ ६५ ॥ पुष्पिताग्रैरिति । मार्दवार्थमुपरि बबन्धुरित्यर्थः ॥ ६६ ॥ अथ वानराणां पर्वतानयनं वर्ण यति–पाषाणांश्चेति । गृह्य गृहीत्वा ॥ ६७ ॥ शिलानामिति । निपात्यताम् आर्षं परस्मैपदम् । तुमुलः सङ्कुलः ॥ ६८ ॥ चतुर्दशयोजनपरिमित

वानराः शतशस्तत्र रामस्याज्ञापुरस्सराः । मेघाभैः पर्वताग्रैश्च तृणैः काष्ठैर्बबन्धिरे ॥ ६५ ॥ पुष्पिताग्रैश्च तरुभिः सेतुं बध्नन्ति वानराः ॥६६॥ पाषाणांश्च गिरिप्रख्यान् गिरीणां शिखराणि च । दृश्यन्ते परिधावन्तो गृह्य वारणसन्निभाः ॥ ६७ ॥ शिलानां क्षिप्यमाणानां शैलानां च निपात्यताम् । बभूव तुमुलः शब्दस्तदा तस्मिन् महोदधौ ॥ ६८ ॥ कृतानि प्रथमेनाह्ना योजनानि चतुर्दश । प्रहृष्टैर्गजसङ्काशैस्त्वरमाणैः प्लवङ्गमैः ॥ ६९ ॥ द्वितीयेन तथा चाह्ना योजनानि तु विंशतिः । कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः ॥ ७० ॥ अह्ना तृतीयेन तथा योजनानि कृतानि तु । त्वरमाणैर्महाकायैरेकविंशतिरेव च ॥ ७१ ॥ चतुर्थेन तथा चाह्ना द्वाविंशतिरथापि च । योजनानि महावेगैः कृतानि त्वरितैस्तु तैः ॥ ७२ ॥ पञ्चमेन तथा चाह्ना प्लवगैः क्षिप्रकारिभिः । योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै ॥ ७३ ॥

सेतुर्बद्ध इत्यर्थः । एवमुत्तरेष्वपि योज्यम् ॥ ६९ ॥ द्वितीयेनेति । प्रतिदिनं योजनाधिक्यमुत्साहातिरेकात् ॥ ७०–७२ ॥ पञ्चमेनेति । त्रयोविंशत्

प्रत्येकं बन्धनीयसेतुविभागार्थं मानदण्डान् गृह्णन्ति । विचिन्वन्ति समविषमभागं परीक्षन्ते । यद्वा सेतुबन्धनार्थं पर्वताद्यानेतॄन् वानरान् त्वरयितुं दण्डान् यष्टीः गृह्णन्ति धारयन्ति । विचिन्वन्ति श्रमात्तत्र तत्र छायासु लीनान्वानरानन्वेषयन्ति ॥ ६४ ॥ बबन्धिरे, सेतुप्रदेशानिति शेषः । नलबद्धसतोरुपरिप्रदेशा वानरैः सज्जीकृता इत्यर्थः ॥ ६५–६७ ॥ निपात्यतां पात्यमानानाम् ॥ ६८ ॥ योजनानि चतुर्दशेत्यत्र चतुर्दशयोजनप्रमाणस्सेतुर्विरचित इत्यर्थः । एवमन्यत्रापि द्रष्टव्यम् ॥ ६९–७२ ॥ पञ्चभिर्दिनैः शतयोजनं बबन्ध । सुवेलं वेलासमीपम् । सामीप्येऽव्ययीभावः । परपारसमीपमधिकृत्येत्यर्थः ॥ ७३ ॥ ७४ ॥

स०–सुवेलं सुशोभना प्राप्याऽनन्तरवेला यस्मिन् कर्मणि तद्यथा भवति तथा । अधिकृत्येति केचित् । वस्तुतस्तु सुवेलं तन्नामकं पर्वतम् । यद्वक्ष्यति "ते सुवेलस्य शैलस्य" इति । ननु वनपर्वणि "दश योजनविस्तारं त्रिंशद्योजनमायतम् । बबन्धुर्वानरास्सेतुं प्रथमे दिवसे तदा । सन्ध्यामर्वाग् द्वितीये तु त्रिंशद्योजनविस्तरः । एवं त्रिभिर्दिनैर्वीरैः सेतुर्नवतियोजनम् । चतुर्थे तु दिने सार्धे यामे ते च वलीमुखाः । दृष्ट्वा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रयोविंशतिः। आर्षो व्यत्ययः। अधिकृत्य अवधिं कृत्वा ॥ ७३ ॥ अस्य पिता यथा यादृशशक्तिविशिष्टः तथा तादृशशक्तिविशिष्ट इत्यर्थः ॥ ७४ ॥ स नलेनेति। सुभगः शोभनमाहात्म्यवान्। स्वातीपथः छायापथः। स्वातीवीथिर्वा। सा चाकाशे सूर्यादीनां मध्यमार्गे मध्यमा वीथिः। तदुक्तं वायु पुराणे–"सूर्यादीनां त्रयो मार्गा दक्षिणोत्तरमध्यमाः" इति प्रक्रम्य "तथा द्वे चापि फल्गुन्यौ मघा चैवार्षभी मता। हस्तश्चित्रा तथा स्वाती मध्यवीथ्यभि

स वानरवरः श्रीमान् विश्वकर्मात्मजो बली। बबन्ध सागरे सेतुं यथा चास्य पिता तथा ॥ ७४ ॥

स नलेन कृतः सेतुः सागरे मकरालये। शुशुभे सुभगः श्रीमान् स्वातीपथ इवाम्बरे ॥ ७५ ॥

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः। आगम्य गगने तस्थुर्द्रष्टुकामास्तदद्भुतम् ॥ ७६ ॥

दशयोजनविस्तीर्णं शतयोजनमायतम्। ददृशुर्देवगन्धर्वा नलसेतुं सुदुष्करम् ॥ ७७ ॥

विश्रुता। ज्येष्ठा विशाखाऽनूराधा वीथिराजगवी मता। एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते ॥" इति ॥ ७५ ॥ तत इति। स्पष्टः ॥ ७६ ॥ नल

स नलेनेति। स्वातीपथः छायापथः, स्वातीवीथिर्वा। सा चाकाशे सूर्यादीनां मध्यमे मार्गे मध्यमा वीथिः। सूर्यादीनामारोहणावरोहणस्थानानि वायव्यपुराणे दर्शितानि–" सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः। स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम्। वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥" इति। तदेवं मध्य मोत्तरदक्षिणमार्गत्रयं प्रत्येकं वीथित्रयेण त्रिधा भिद्यते। "अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता। रोहिण्यार्द्रा मृगशिरा गजवीथ्यभिधीयते। पुष्याश्लेषे तथाऽऽदित्यो वीथी चैरावती स्मृता। एतास्तु वीथयस्तिस्र उत्तरो मार्ग उच्यते। तथा द्वेचापि फल्गुन्यौ मघा चैवार्षभी मता। हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दिता। ज्येष्ठा विशाखानूराधा वीथिराजगवी मता। एतास्तु वीथयस्तिस्रो मध्यमो मार्ग उच्यते। मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दिता। श्रवणं च धनिष्ठा च मार्गी शतभिषक् तथा। वैश्वानरी भाद्रपदी रेवती चैव कीर्तिता। एतास्तु वीथयस्तिस्रो दक्षिणो मार्ग उच्यते ॥" इति ॥ ७५-७७ ॥

–लङ्केति रामाय शशंसुः" इति चतुर्थे दिने दशयोजनानीत्याहृत्य शतयोजनो भवति सेतुर्दशयोजनविस्तारश्चेति दिनचतुष्टये सेतुसमाप्त्युक्तेः। तथा पद्मपुराणे पुष्करखण्डे त्रिंशोऽध्याये "एष सेतुर्मया बद्धस्समुद्रे वरुणा लये। त्रिभिर्दिनैस्समाप्तिं मे नीतो वानरसत्तमैः॥" इति त्रिभिर्दिनैस्सेतुसमाप्त्युक्तेश्च भारते चतुर्दिन्युक्तिश्च कथम्, कथञ्चात्र पञ्चदिन्युक्तिरिति चेन्न। हिरण्याक्षवधस्य भागवते तृतीयस्कन्धे कर्णमूलताडनेन तथा पुन स्तत्रैव दंष्ट्रयेति यथा कथनं कल्पभेदेनेति व्यवस्था श्रीतात्पर्येण कृता कृता च वामाङ्गुष्ठनखनिर्भिन्नेति भागवतस्य दक्षिणाङ्गुष्ठनखनिर्भिन्नेति पुराणान्तरस्य च वाराहादिकल्पभेदेनेति तथा भारतरामायणयोरपि विरोधसमाधिरवधेयः। अवधेयश्च पद्मपुराणाविरोधः। तथो चोक्तं स्कान्दे उमासंहितायां द्वादशाध्याये " कदाचिद्धनुषा सेतुः कदाचिद्गिरिशिखेन च। दार्वादिना कदाचिच्च कल्पे कल्पे व्यवस्थितिः ॥" इति। एवं दिनेष्वपि कल्पभेदेन समाधानं ज्ञेयम्। अथवा पञ्चधासु पुस्तकसम्पुटीषु नैते श्लोकास्सन्ति सन्ति च कचिदेवैत्येते प्रक्षिप्ता इति ज्ञेयम् ॥ ७३ ॥

For Private And Personal Use Only

संबन्धी सेतुर्नलसेतुः तम् ॥ ७७ ॥ निर्विघ्नसेतुबन्धेन जातं वानरहर्षं दर्शयति–आप्लुवन्त इति । अर्द्धमेकं वाक्यम् । आप्लुवन्तः आभिमुख्येन प्लुवन्तः दूरं प्लुवन्तः, आसन्निति शेषः ॥ ७८ ॥ रामानु०–आप्लुवन्त इति । प्लवङ्गमाश्च ददृशुरिति संबन्धः । यद्वा अभूवन्निति शेषः ॥ ७८ ॥ अचिन्त्यम् इतः पूर्वं मनसापि चिन्तयितुमनर्हम् । असह्यं कस्यापि यत्नाविषयम् । अद्भुतम् आश्चर्यकरम् । रोमहर्षणं पुलकावहम् ॥ ७९ ॥ तानीति । सेतुं बध्नन्तः सेतुबन्धनसह

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ॥७८॥ तदचिन्त्यमसह्यं च अद्भुतं रोमहर्षणम् । ददृशुः सर्वभूतानि सागरे सेतुबन्धनम् ॥ ७९ ॥ तानि कोटिसहस्राणि वानराणां महौजसाम् । बध्नन्तः सागरे सेतुं जग्मुः पारं महोदधेः ॥ ८० ॥ विशालः सुकृतः श्रीमान् सुभूमिः सुसमाहितः । अशोभत महासेतुः सीमन्त इव सागरे ॥८१॥ ततः पारे समुद्रस्य गदापाणिर्विभीषणः । परेषामभिघातार्थमतिष्ठत् सचिवैः सह ॥ ८२ ॥ सुग्रीवस्तु ततः प्राह रामं सत्यपराक्रमम् । हनुमन्तं त्वमारोह अङ्गदं चापि लक्ष्मणः ॥ ८३ ॥ अयं हि विपुलो वीर सागरो मकरालयः । वैहायसौ युवामेतौ वानरौ तारयिष्यतः ॥८४॥ अग्रतस्तस्य सैन्यस्य श्रीमान् रामः सलक्ष्मणः । जगाम धन्वी धर्मात्मा सुग्रीवेण समन्वितः ॥ ८५ ॥ अन्ये मध्येन गच्छन्ति पार्श्वतोऽन्ये प्लवङ्गमाः । सलिले प्रपतन्त्यन्ये मार्गमन्ये न लेभिरे ॥ ८६ ॥

कारिणः ॥ ८० ॥ सुकृतः दृढतया कृतः सुकृतकरो वा । श्रीमान् ऋजुत्वेन कान्तिमान् । सुभूमिः निम्नोन्नतत्वरहितः । सुसमाहितः निर्विवरः ॥ ८१ ॥ पारे दक्षिणतीरे ॥ ८२ ॥ लक्ष्मण इत्यत्र आरोहत्विति पुरुषविपरिणामः कर्तव्यः ॥ ८३ ॥ आरोहणहेतुमाह–अयमिति । विपुलः शतयोजनं पद्भ्यां गमने बहुकालविलम्बो भविष्यतीति भावः । वैहायसौ अपादचारिणौ । इति सुग्रीवः प्राहेति पूर्वेणान्वयः ॥ ८४ ॥ अग्रत इति । स्पष्टः ॥ ८५ ॥ रामानु०–अग्रत इति । सुग्रीवेण समन्वितो जगामेत्यनेन सुग्रीवस्यापि विहायसा गमनं द्योत्यते ॥ ८५ ॥ अन्य इति । न लेभिरे मार्गालाभात्तीर एव कंचित् कालं स्थिताः

आप्लवन्तः प्लवन्त इत्यत्र, अभूवन्निति शेषः । गर्जन्तः प्लवङ्गमाश्च ददृशुः ॥ ७८ ॥ अचिन्त्यम् अचिन्त्यरचनम् । असह्यं भगवत्सम्बन्धं विना केनापि कर्तुम शक्यम् ॥ ७९ ॥ बध्नन्त इत्यत्र लिङ्गव्यत्यय आर्षः ॥ ८० ॥ ८१ ॥ परेषां राक्षसानाम् ॥ ८२ ॥ ८३ ॥ वैहायसौ विहायसा गच्छन्तौ ॥ ८४–८६ ॥

For Private And Personal Use Only

इत्यर्थः ॥८६॥ केचिदित्यर्द्धमेकं वाक्यम् । वैहायसं विहायस्सम्बन्धि गतं गमनं येषां ते तथोक्ताः । सुपर्णाः गरुडाः॥८७॥ अन्तर्दधे तिरश्चकार ॥८८॥ वानराणां राज्ञो वाहिनीत्यन्वयः । राज्ञेति पाठे राज्ञा सुग्रीवेण सहेत्यर्थः । तीरे दक्षिणतीरे ॥ ८९ ॥ इत्थमकुण्ठदशकण्ठकण्ठाटवीत्रुटननिदर्शनभूतं सेतुनिर्माणनैपुण्यमालोक्य समुपजातमानन्दसन्दोहमा रावणनिबर्हणादलुद्घाटनीयमप्यन्तर्नियन्तुमशक्नुवन्तस्तादृशहर्षप्रकर्षबलात्कारेण देवा यथोचितं

केचिद्वैहायसगताः सुपर्णा इव पुप्लुवुः ॥ ८७ ॥ घोषेण महता तस्य सिन्धोर्घोषं समुच्छ्रितम् । भीममन्तर्दधे भीमा तरन्ती हरिवाहिनी ॥ ८८ ॥ वानराणां हि सा तीर्णा वाहिनी नलसेतुना । तीरे निविविशे राज्ञो बहुमूलफलोदके ॥ ८९ ॥ तदद्भुतं राघवकर्म दुष्करं समीक्ष्य देवाः सह सिद्धचारणैः । उपेत्य रामं सहसा महर्षिभिः समभ्यषिञ्चन् सुशुभैर्जलैः पृथक् ॥ ९० ॥ जय स्वशत्रून् नरदेव मेदिनीं ससागरां पालय शाश्वतीः समाः । इतीव रामं नरदेवसत्कृतं शुभैर्वचोभिर्विविधैरपूजयन् ॥९१॥ इत्यार्षे श्रीरामायणे॰ श्रीमद्युद्धकाण्डे द्वाविंशः सर्गः ॥ २२ ॥

राममपूजयन्नित्याह–तदित्यादिना श्लोकद्वयेन । दुष्करं रामादन्यैर्मनसापि कर्तुमशक्यम् । पृथक् प्रत्येकं समभ्यषिञ्चन् ॥ ९० ॥ जयेति च्छेदः । स्वशत्रून् आश्रितशत्रूणामेवास्य शत्रुत्वादिति भावः । नरदेवसत्कृतं नरैश्च देवैश्च सत्कृतम् । अपूजयन् अस्तुवन् । स्तुतिर्हि वाचिका पूजा ॥ ९१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशः सर्गः ॥ २२ ॥

वैहायसगताः विहायस्सम्बन्धि गतं गमनं येषां ते तथोक्ताः ॥ ८७ ॥ हरिवाहिनी सागरस्य घोषम् अन्तर्दधे अन्तरधापयदिति सम्बन्धः ॥ ८८ ॥ वाहिनी राज्ञा सुग्रीवेण निविविशे निविष्टा ॥ ८९ ॥ अथ समुद्रे सेतुबन्धनहृष्टैर्देवैस्तदानीमेव रामस्य राज्याभिषेकः रामेण विभीषणस्यैवेत्याह–तदद्भुतमिति । राघवकर्म राघवाज्ञाजन्यत्वात् । सुशुभैर्जलैः आकाशगङ्गादिजलैः ॥ ९० ॥ नरदेवसत्कृतं नरैर्देवैश्च सत्कृतम् ॥ ९१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्वाविंशः सर्गः ॥ २२ ॥ (कतकरीत्याऽयमेकविंशः सर्गः ॥)

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं रामो नलसेतुना तीर्णमहार्णवो महासमरसूचकान् महोत्पातान् दृष्ट्वा चिरप्रार्थिताभीष्टसिद्धिर्भविष्यतीति सन्तुष्टो दृष्टानि निमित्तानि निमित्तज्ञाय लक्ष्मणाय दर्शयति–निमित्तानीति । निमित्तज्ञत्वे लक्ष्मणादप्याधिक्यं दर्शयितुं लक्ष्मणपूर्वज इत्युक्तम् । सम्परिष्वङ्गश्चिरप्रार्थितसमरस्यासन्नत्वात् । निमित्तापेक्षणस्यावश्यकत्वमुक्तं कामन्दके–" निमित्तान्येव शंसन्ति शुभाशुभफलोदयम् । तस्मादेतानि शास्त्रज्ञो राजा समुपलक्षयेत् ॥" इति ॥ १ ॥

निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपूर्वजः । सौमित्रिं सम्परिष्वज्य इदं वचनमब्रवीत् ॥ १ ॥ परिगृह्योदकं शीतं वनानि फलवन्ति च । बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण ॥२॥ लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् । निबर्हणं प्रवीराणामृक्षवानररक्षसाम् ॥३॥ वाताश्च कलुषा वान्ति कम्पते च वसुन्धरा । पर्वताग्राणि वेपन्ते पतन्ति च महीरुहाः ॥ ४ ॥ मेघाः क्रव्यादसङ्काशाः परुषाः परुषस्वनाः । क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥ ५ ॥

शीतमुदकं शीतोदकवत्प्रदेशम् । वनानि जलसमीपस्थानि । परिगृह्य वासार्थं स्वीकृत्य । व्यूह्य गरुडरूपेण सन्निवेश्य । तथा व्यक्तीभविष्यति ॥ २ ॥ लोकक्षयकरं क्षुद्रजनक्षयकरम् । विशिष्य प्रवीराणां निबर्हणं विनाशकम् । भयमिति युद्धमुच्यते ॥ ३ ॥ भयदर्शने लिङ्गान्याह–वाता इत्यादि । महीरुहाः पतन्ति अकस्मादिति भावः । अत्रात्यन्तानिष्टकरो भूकम्पः सन्ध्याकालिक इति ज्ञेयम् । तथोक्तं वसिष्ठेन–"यामत्रयाच्च भूकम्पो द्विजातीनामरिष्टदः । अरिष्टदः क्षितीशानां सन्ध्ययोरुभयोरपि ॥" इति ॥ ४ ॥ मेघा इति । क्रव्यादसङ्काशाः वृकवर्णाः, श्येनादिसंस्थाना इति वा । परुषाः दुर्दर्शाः, रूक्षा इति यावत् । परुषस्वनाः श्रुतिकटुस्वनाः । अत एव क्रूराः भयङ्कराः । मिश्रम्, उदकमिति शेषः । क्रूरमिति क्रियाविशेषणम् । अत्र

॥ १ ॥ परिगृह्येति । शीतोदकं फलवन्ति वनानि च परिगृह्य आश्रित्य च बलौघं संविभज्य व्यूह्य तिष्ठेमेति सम्बन्धः । सशीतोदकसफलवनप्रदेशे बलौघं गरुडादिव्यूहं कृत्वा तिष्ठेमेत्यर्थः ॥ २ ॥ भीमं महत् ॥ ३ ॥ कलुषाः रजोव्याप्ताः ॥ ४ ॥ क्रव्यादसङ्काशाः गृध्रश्येनादिसदृशाः । शोणितबिन्दुभिर्मिश्रं यथा

स०–भयं तत्साधनम् । निबर्हणं नाशश्च । योग्यतया भयम् ऋक्षवानराणाम् । राक्षसानां निबर्हणमित्यन्वेतव्यम् । अन्यथा सर्वज्ञस्य रामस्य निमित्तोपन्यासो निर्फलवानरऋक्षविषये मोघः स्यात् । अथवा " तारापिता तान्निरजश्चकार " इति तद्ग्रन्थप्रामाण्यान्निलोऽजीविताः मलवराश्च जीविताश्चेत्येतत्पूर्ववर्तनीं मूर्तिं विवक्षित्वा प्रबर्हणवचनमर्हति ऋक्षवानरपक्षेऽपि ॥ १ ॥ परुषस्वराः प्रखरस्वराः । अत एव परुषाः श्रोत्रोल्बणाः । क्रूराः मनउद्वेजकाः ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिहिरः—"दिव्युल्कापतनं चैव दिवा नक्षत्रदर्शनम् । दिवाऽशनिस्तथा काष्ठतृणरक्तप्रवर्षणम् ॥" इति ॥ ५ ॥ रक्तचन्दनं कुङ्कुमम्, रक्तचन्दनतुल्यमेव वर्तीत्यर्थः । परमदारुणा, भवतीति शेषः । अग्निमण्डलम् अग्निपिण्डः ॥ ६ ॥ दीनाः दीनाकृतयः । जनयन्तः सूचयन्तः ॥ ७ ॥ रजन्यामिति । अर्धमेकं वाक्यम् । अप्रकाशः निष्प्रभः । सन्तापयति, शीतस्य सन्तापकरणं ह्युत्पात इति भावः ॥ ८ ॥ कृष्णा रक्ताश्चांशवः पर्यन्ते यस्य सः तथोक्तः । सर्वान्ते

रक्तचन्दनसङ्काशा सन्ध्या परमदारुणा । ज्वलतः प्रपतत्येतदादित्यादग्निमण्डलम् ॥ ६ ॥ दीना दीनस्वराः क्रूराः सर्वतो मृगपक्षिणः । प्रत्यादित्यं विनर्दन्ति जनयन्तो महद्भयम् ॥ ७ ॥ रजन्यामप्रकाशस्तु सन्तापयति चन्द्रमाः ॥ ८ ॥ कृष्णरक्तांशुपर्यन्तो लोकक्षय इवोदितः । ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः ॥ ९ ॥ आदित्ये विमले नीलं लक्ष्म लक्ष्मण दृश्यते ॥ १० ॥ रजसा महता चापि नक्षत्राणि हतानि च । युगान्तमिव लोकानां पश्य शंसन्ति लक्ष्मण ॥ ११ ॥ काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च । शिवाश्चाप्यशिवान्नादान्नदन्ति सुमहाभयान् ॥ १२ ॥

कृष्णमण्डलः तदनन्तरं रक्तमण्डल इत्यर्थः । सुलोहितः मध्ये अत्यन्तरक्तवर्णः । लोकक्षये प्रलये उदितः परिवेष इव स्थितः । रूक्षः क्रूरः । अप्रशस्तः अप्रसिद्धः, इतः पूर्वमदृष्ट इत्यर्थः । परिवेषः, दृश्यत इति शेषः । अत्र वर्णत्रयकथनेन मण्डलत्रयकथनात्सायङ्कालिकत्वाच्च परिवेषस्य नृपक्षयकरत्वं सूच्यते । तथाह काश्यपः—" द्विमण्डलश्चमूपघ्नो नृपघ्नो यस्त्रिमण्डलः " इति । " दिनकरपरिवेषः पूर्वयामे तु पीडा दिनकरपरिवेषो वृष्टियुद्धं द्वितीये । दिनकरपरिवेषं क्षेममाहुस्तृतीये दिनकरपरिवेषः सर्वनाशश्चतुर्थे ॥" इति ॥ ९ ॥ नीलं लक्ष्म छिद्ररूपम् । तदाह वराहः—"अपर्वणि तथा राहुग्रहणं चन्द्रसूर्ययोः । चन्द्रार्कमण्डलच्छिद्रं दृष्ट्वा जनपदक्षयः ॥" इति । यद्वा नीलं लक्ष्म चन्द्र इव कलङ्को दृश्यते । एतदेवौत्पातिकं नैल्यमधिकृत्य ' यदादित्यस्य रोहितं रूपम् ' इत्यारभ्य 'यत् कृष्णं तदन्नस्य' इत्युच्यते ॥ १० ॥ रजसा मालिन्येन । युगान्तं प्रलयम् ॥ ११ ॥ नीचैः दुर्बलैः । अधिक

तथा ॥ ५ ॥ ६ ॥ प्रत्यादित्यं सूर्यसम्मुखम् ॥ ७ ॥ रजन्यामित्यर्धं भिन्नं वाक्यम् ॥ ८ ॥ कृष्णरक्तांशुपर्यन्तः कृष्णाश्च रक्ताश्च अंशवो येषां ते कृष्णरक्तांशवः तादृशाः पर्यन्ताः यस्य स तथोक्तः । लोकक्षय इव लोकनाशसमय इव परिवेष उदित इति सम्बन्धः ॥ ९ ॥ १० ॥ रजसा मालिन्येन ॥ ११–१६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलानां दुर्बलैः परिभवोऽप्युत्पात इति । शिवाः गोमायवः । " स्त्रियां शिवा भूरिमायुर्गोमायुः " इत्यमरः । नादान् नदन्ति नादान्कुर्वन्तीत्यर्थः ॥ १२ ॥ उक्तोत्पातफलमाह-शैलैरिति । मांसशोणितकर्दमा मांसशोणितरूपकर्दमवती ॥ १३ ॥ क्षिप्रं सत्वरम् । जवेन वेगेन ॥ १४ ॥

शैलैः शूलैश्च खड्गैश्च विसृष्टैः कपिराक्षसैः । भविष्यत्यावृता भूमिर्मांसशोणितकर्दमा ॥ १३ ॥ क्षिप्रमद्यैव दुर्धर्षां पुरीं रावणपालिताम् । अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ १४ ॥ इत्येवमुक्त्वा धर्मात्मा धन्वी सङ्ग्रामहर्षणः । प्रतस्थे पुरतो रामो लङ्कामभिमुखो विभुः ॥ १५ ॥ सविभीषणसुग्रीवास्ततस्ते वानरर्षभाः । प्रतस्थिरे विनर्दन्तो निश्चिता द्विषतां वधे ॥ १६ ॥ राघवस्य प्रियार्थं तु धृतानां वीर्यशालिनाम् । हरीणां कर्मचेष्टाभिस्तुतोष रघुनन्दनः ॥ १७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रयोविंशः सर्गः ॥ २३ ॥

इत्येवमिति । पुरतः प्रतस्थ इति उत्साहातिशयोक्तिः । विभुः समर्थः ॥ १५ ॥ निश्चिताः निश्चयवन्तः । अत्र प्रस्थानं शीतोदकफलवद्वनपरिग्रहार्थं परिगृह्योदकमित्यादिना प्रथमं तस्य कर्तव्यतया अभिहितत्वात् ॥ १६ ॥ धृतानां धैर्यवताम् । कर्मचेष्टाभिः युद्धकर्मादिविषयचेष्टाभिः लाङ्गूलोत्थापनादिभिः । तुतोषेत्यनेन इदं दुर्गप्रदेशं दृष्ट्वा वानरा निरुत्साहा भवेयुरिति पूर्वं राममनसि स्थितमित्यवगम्यते ॥ १७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशः सर्गः ॥ २३ ॥

राघवस्येति । धृतानामवहितानाम् ॥ १७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रयोविंशः सर्गः ॥ २३ ॥

स०-अरामः पुत्रत्वेन तत्सदृशः तद्भिन्नो लक्ष्मणः । पुरतो रामः । अपुरनः तत्पश्चाल्लक्ष्मणः । सैः मुक्ताहारादिभिर्न विद्यते मा शोभा इदानीं यस्येति वा सरामः इदानीं दूरितभार्यात्वेनारामः सर्वाभिरामोपि रिपूणाममनोहर इति वा अरामः । धर्मात्मेति कचित्पाठो व्याख्यातृसाहसासहः । इत्येवमुक्त्वा धन्वी स रामः संग्रामधर्षणः । इति पाठः ॥ १५ ॥ राघवस्य स्वस्य प्रियार्थं भार्यार्थम् । यत्कर्म अन्वेषणरूपं तदनुरूपाभिश्चेष्टाभिः । रघुनन्दनो रामस्तुतोष राघवशब्देन मुख्यतो गृहीतस्य पुना रघुनन्दनपदेन ग्रहणम् " अनुग्रहार्थं त ऋषेरवाप सलक्ष्मणोऽस्त्रं मुनितो हि केवलम् । " इत्यादिवत्सम्भवति । राघवस्य लक्ष्मणस्य । प्रियार्थं प्रियावहप्रयोजनमुद्दिश्य यत्कर्म तदनुरूपचेष्टाभिः रघुनन्दनो रामः । राघवस्य रामस्य । रघुनन्दनो लक्ष्मण इति वा ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रावणस्य वानरसेनागमनश्रवणम्--सेत्यादि। राज्ञा रामेण। व्यवस्थिता शीतोदकादिकं परिगृह्य स्थिता। वीरसमितिः वीरसङ्घः। "सङ्घे सभायां समितिः" इत्यमरः। शशिना व्यवस्थिता कृतमर्यादा ॥१॥ सागरवर्चसा सागरवदपरिच्छिन्नेनेत्यर्थः ॥ २॥ ततः सेनानिवेशानन्तरम्, निष्कोला हले सतीत्यर्थः। आक्रुष्टं सेनाकोशम्। भावे क्तः। भेरीमृदङ्गसंघुष्टमिति समुच्चयः ॥ ३ ॥ घोषवत्तरं राक्षसघोषादधिकघोषवत्, क्रियाविशेषणम् ॥४॥ दत्तानां पूर्णानाम्। आकाशस्यैव शब्दाश्रयत्वादम्बर इत्युक्तम्। यद्वा "प्लवगसैन्यमुलूकजिताजितम्" इतिवदम्बरशब्दस्तत्पर्यायं नभश्शब्दं लक्ष

सा वीरसमिती राज्ञा विरराज व्यवस्थिता। शशिना शुभनक्षत्रा पौर्णमासीव शारदी ॥ १ ॥ प्रचचाल च वेगेन त्रस्ता चैव वसुन्धरा। पीड्यमाना बलौघेन तेन सागरवर्चसा ॥ २ ॥ ततः शुश्रुवुराक्रुष्टं लङ्कायां काननौकसः। भेरीमृदङ्गसंघुष्टं तुमुलं रोमहर्षणम् ॥३॥ बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः। अमृष्यमाणास्तं घोषं विनेदुर्घोषवत्तरम् ॥ ४ ॥ राक्षसास्तु प्लवङ्गानां शुश्रुवुश्चापि गर्जितम्। नर्दतामिव दृप्तानां मेघानामम्बरे स्वनम् ॥ ५ ॥ दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम्। जगाम मनसा सीतां दूयमानेन चेतसा ॥ ६ ॥ अत्र सा मृगशावाक्षी रावणेनोपरुद्ध्यते। अभिभूता ग्रहेणेव लोहिताङ्गेन रोहिणी ॥ ७ ॥

यित्वा श्रावणमासमाह ॥ ५ ॥ दृष्ट्वेति। चिह्नयुक्तो ध्वजः, केवलचेला पताकेति भिदा। चेतसा उपलक्षितः मनसा जगाम, सस्मारेत्यर्थः ॥ ६ ॥ स्मरणप्रकारमाह--अत्रेति। एतच्छ्लोकान्ते प्रकारवचनमितिकरणं द्रष्टव्यम्। सा साकेते सकलभोगार्हा। मृगशावाक्षी मृगानुसरणसमये यद्धरिणदर्शनकुतूहलेन मृगशिशुवत्तरलतरं विलोचनयुगलं तदेवाद्यापि मनसि परिवर्तते तदाह। यद्वा मृगशावे मारीचमये अक्षिणी यस्या इति विग्रहः ॥ ७ ॥

सेति। समितिः सभा। "सभासमितिसंसदः" इत्यमरः। राज्ञा रामेण। व्यवस्थिता निर्व्यूढा ॥ १ ॥ सागरवर्चसा सागरनिभेन ॥ २ ॥ आक्रुष्टम् आक्रोशम्, कोलाहलमिति यावत्। सङ्घुष्टं सङ्घोषम्। दूयमानेन चेतसा उपलक्षितः सीतां मनसा जगाम, सस्मारेत्यर्थः ॥ ३-६ ॥ स्मरणप्रकारमाह--अत्र सेति। अस्यान्ते

स०--सागरस्य वर्चो येन सः तेन। बलौघेन सेनासङ्घेन वसुन्धरा वेगेन पीड्यमाना त्रस्तेव प्रचचाल ॥ २ ॥ दूयमानेनेति मनःपदेन चेतःपदेनाप्यन्वेति। ततश्च दूयमानेन चेतसा सहितां सीतां दूयमानेन मनसा जगामेत्यन्वयः कृतो ज्ञेयः। "वृद्धो यूना--" इत्यादिवत्सहेति लाभः। दूयमानेन मनसा विशिष्टाम्। वैशिष्ट्यं तृतीयार्थ इति वा ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दीर्घमिति । अद्य युद्धयात्रासमये कान्तास्मरणव्यसनमनुचितमिति तन्नियमितवानिति सूचयति दीर्घमुष्णं च निश्वस्येत्यनेन । तत्कालहितं युद्ध यात्रासमये हितम् । शोकविस्मारकनगरशोभावर्णनरूपं वचनम् । यद्वा अङ्गदः सह नीलेनेत्यादि वाक्यं तत्कालहितम् । तत्साहचर्यादाढ्यं नगर मितिवत् आलिखन्तीमित्यादिकं सर्वं वाक्यजातं तत्कालहितमित्युक्तम् ॥ ८ ॥ आलिखन्तीं स्पृशन्तीम् । उत्थिताम् उन्नताम् । नगाग्रे त्रिकूट

दीर्घमुष्णं च निश्वस्य समुद्वीक्ष्य च लक्ष्मणम् । उवाच वचनं वीरस्तत्कालहितमात्मनः ॥ ८ ॥ आलिखन्तीमिवाकाशमुत्थितां पश्य लक्ष्मण । मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणा ॥ ९ ॥ विमानैर्बहुभिर्लङ्का सङ्कीर्णा भुवि राजते । विष्णोः पदमिवाकाशं छादितं पाण्डरैर्घनैः ॥ १० ॥ पुष्पितैः शोभिता लङ्का वनैश्चैत्ररथोपमैः । नाना पतङ्गसंघुष्टैः फलपुष्पोपगैः शुभैः ॥ ११ ॥ पश्य मत्तविहङ्गानि प्रलीनभ्रमराणि च । कोकिलाकुलषण्डानि दोधवीति शिवोऽनिलः ॥ १२ ॥

शिखरे ॥ ९ ॥ रामानु०-मनसेव कृतां लङ्कां नगाग्रे विश्वकर्मणेति पाठः ॥ ९ ॥ विष्णोः आदित्यस्य पदं स्थानम्, आकाशमध्यमिति भावः । विमानम् अनेक तलप्रासादः ॥ १० ॥ रामानु०-विष्णोः पदं विष्णुपादभूतम् ॥ १० ॥ फलभूतानि पुष्पाणि यासां ताः फलपुष्पाः मल्लिकादयः ताभिरुपगम्यन्त इति तथा । अतो न पुष्पितैरित्यनेन पौनरुक्त्यम् । संघुष्टं सङ्घोषः । भावे क्तः । नानाविधानि पतङ्गसंघुष्टानि येषां तैः ॥ ११ ॥ मत्तविहङ्गानि । विहङ्गशब्दोऽत्र कोकिलपरः । अनेन सदा फलवत्त्वमुक्तम् । प्रलीनभ्रमराणि मधुपानपरवशतया निष्पन्दभ्रमराणि । अनेन सदा पुष्पवत्त्वमुक्तम् । कोकिलाकुलं षण्डं पुष्पसमूहो येषां तानि कोकिलाकुलषण्डानि । अनेन सदा पल्लवितत्वमुक्तम् । कोकिलानां पल्लवप्रियत्वात् । वनानीत्यनुषञ्जनीयम् । दोधवीति पुनः पुनः कम्पयति । " धूञ् कम्पने " इत्यस्माद्यङ्लुक् ॥ १२ ॥

इतिकरणं द्रष्टव्यम् । लोहिताङ्गेन अङ्गारकेण ॥ ७ ॥ यद्यप्यालिखन्तीमिवेत्यादिलङ्कावर्णनावाक्यस्य तत्कालहितत्वं नास्ति, तथाप्येतद्वाक्यानन्तरमङ्गदस्सह नीलेनेत्यादिना तत्कालहितेन सेनारक्षणनियोगवाक्येन साहचर्यादालिखन्तीमिवेत्यादि सर्वं वाक्यं तत्कालहितमिति मन्तव्यम् ॥ ८ ॥ ९ ॥ विमानैः सप्तभूमिक प्रासादैः सङ्कीर्णा निबिडा । अत्रोपमा । पाण्डरैर्घनैस्सङ्कीर्णं विष्णोर्व्यापनशीलस्य वायुमयस्य ब्रह्मणः पदं प्रचारस्थानमाकाशमिव ॥ १० ॥ ११ ॥ दोधवीति ॥ ८३ ॥

इतीत्यर्धमेकं वाक्यम् ॥ १२ ॥ शास्त्रदृष्टेन नीतिशास्त्रज्ञानेन । कर्मणा प्रयोगेन । बलं सेनाम् । विभजन् व्यूहयन् व्यूहहेतोः । शशास कपिसेनाया इत्याद्युत्तरशेषः ॥ १४ ॥ शासनप्रकारमाह–कपिसेनाया इत्यादि । अङ्गदो नीलेन सह स्वबलमादाय कपिसेनायाः उरसि उरःस्थाने तिष्ठेदित्यन्वयः ॥ १५ ॥ वानरौघसमावृतः कपिसमूहसहितः ॥ १६ ॥ गन्धहस्ती मत्तगजः ॥ १७ ॥ मूर्ध्नीत्यर्धमेकं वाक्यम् । युक्तः सावधानः ॥ १८ ॥ वानर

इति दाशरथी रामो लक्ष्मणं समभाषत ॥ १३ ॥ बलं च तद्वै विभजन् शास्त्रदृष्टेन कर्मणा । शशास कपिसेनाया
बलमादाय वीर्यवान् ॥ १४ ॥ अङ्गदः सह नीलेन तिष्ठेदुरसि दुर्जयः ॥ १५ ॥ तिष्ठेद्वानरवाहिन्या वानरौघसमा
वृतः । आश्रित्य दक्षिणं पार्श्वमृषभो वानरर्षभः ॥ १६ ॥ गन्धहस्तीव दुर्धर्षस्तरस्वी गन्धमादनः । तिष्ठेद्वानर
वाहिन्याः सव्यं पार्श्वं समाश्रितः ॥१७॥ मूर्ध्नि स्थास्याम्यहं युक्तो लक्ष्मणेन समन्वितः ॥१८॥ जाम्बवांश्च सुषेण
श्च वेगदर्शी च वानरः । ऋक्षमुख्या महात्मानः कुक्षिं रक्षन्तु ते त्रयः ॥ १९ ॥ जघनं कपिसेनायाः कपिराजो
ऽभिरक्षतु । पश्चार्धमिव लोकस्य प्रचेतास्तेजसा वृतः ॥ २० ॥ सुविभक्तमहाव्यूहा महावानररक्षिता । अनीकिनी
सा विबभौ यथा द्यौः साभ्रसम्प्लवा ॥ २१ ॥

इति वेगदर्शिविशेषणम् । ऋक्षमुख्यपदं वानराणामप्युपलक्षणम् । महात्मानः महाबुद्धयः । कुक्षिं कुक्षिस्थानम् ॥१९॥ जघनं चरमभागम्, पुच्छमिति यावत् । कपिराजः सुग्रीवः । पश्चार्धमिति । "अपरस्यार्धे पश्चभावो वक्तव्यः" इत्यपरशब्दस्य पश्चादेशः । अर्धशब्दोऽंशवाची । पश्चिमां दिशमित्यर्थः ॥२०॥ सुविभक्तमहाव्यूहा सुष्ठु कृतगरुडव्यूहा । उत्तरत्र शार्दूलवचने 'गारुडं व्यूहमाश्रित्य' इति वक्ष्यमाणत्वात् । साभ्रसम्प्लवा समेघसञ्चारा ॥२१॥

पुनः पुनः कम्पयते ॥ १२ ॥ १३ ॥ शास्त्रदृष्टेन कर्मणा सेनाविभजनशास्त्रोक्तप्रकारेण । बलं स्वबलमादाय कपिसेनाया उरसि तिष्ठेदित्यन्वयः ॥ १४ ॥ १५ ॥ वानरौघसमावृतः ऋषभः वानरवाहिन्या दक्षिणं पार्श्वमाश्रित्य तिष्ठेदित्यन्वयः ॥ १६–१९ ॥ पश्चार्द्धं पश्चिमां दिशम् । लोकस्य भूलोकस्य ॥ २० ॥ साभ्रसंप्लवा

आसेदुः आसादितुमुद्युक्ताः । विमर्दयिषवः मर्दयितुमिच्छवः । सनि द्वित्वाभाव आर्षः ॥२२॥ शिखरैः सानुभिः विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ २३–२६ ॥ सितौ बद्धौ । " षिञ् बन्धने " इत्यस्माद्धातोर्निष्ठा । तत्र हेतुमाह लूनपक्षश्च दृश्यस इति । चो हेत्वर्थः । यस्माल्लून पक्षो दृश्यसे तस्मात् सिताविति सम्बन्धः । अनेकचित्तानां चञ्चलचित्तानामित्यर्थः । अनेन पुनः पुनर्बन्धविसर्जने ध्वन्येते । तेषां वानराणां वशमागतो

प्रगृह्य गिरिशृङ्गाणि महतश्च महीरुहान् । आसेदुर्वानरा लङ्कां विमर्दयिषवो रणे ॥२२॥ शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा । इति स्म दधिरे सर्वे मनांसि हरिसत्तमाः ॥ २३ ॥ ततो रामो महातेजाः सुग्रीवमिदमब्रवीत् । सुविभक्तानि सैन्यानि शुक एष विमुच्यताम् ॥ २४ ॥ रामस्य वचनं श्रुत्वा वानरेन्द्रो महाबलः । मोचयामास तं दूतं शुकं रामस्य शासनात् ॥२५॥ मोचितो रामवाक्येन वानरैश्चाभिपीडितः । शुकः परमसन्त्रस्तो रक्षोधिपमुपागमत् ॥ २६ ॥ रावणः प्रहसन्नेव शुकं वाक्यमभाषत । किमिमौ ते सितौ पक्षौ लूनपक्षश्च दृश्यसे । कच्चिन्नानेकचित्तानां तेषां त्वं वशमागतः ॥ २७ ॥ ततः स भयसंविग्नस्तथा राज्ञाऽभिचोदितः । वचनं प्रत्युवाचेदं राक्षसाधिपमुत्तमम् ॥ २८ ॥ सागरस्योत्तरे तीरे ब्रुवंस्ते वचनं तथा । यथासन्देशमक्लिष्टं सान्त्वयं श्लक्ष्णया गिरा ॥२९ ॥

न कच्चिदित्यन्वयः ॥ २७ ॥ संविग्नः सम्भ्रान्तः । तथापि चोदितः मत्सन्देशस्य किमुत्तरं सुग्रीवेण दत्तं वदेति चोदित इत्यर्थः ॥ २८ ॥ सान्त्वयम् असान्त्वयम्, सुग्रीवमिति शेषः ॥ २९ ॥

अवसन्नाकारसहिता ॥ २१ ॥ विमर्दयिषवः विमर्दयितुमिच्छवः ॥२२॥२३॥ शुक एष विमुच्यतामिति । पूर्वं 'मुच्यतां दूत आगतः' इत्यत्र ताडनादिदुःखान्मुच्यतामित्येवार्थः । तेन बद्ध्वा स्थापित इत्यवगम्यते॥२४–२६॥ किमिति । पक्षौ सितौ बद्धौ किम् ? अत एव लूनपक्षश्च दृश्यसे । अनेकचित्तानां चलचित्तानां वशं नागतः कच्चिदिति सम्बन्धः ॥२७॥२८॥ सागरस्योत्तरे तीरे, स्थित्वेति शेषः । श्लक्ष्णया गिरा सान्त्वयन्, वानरानिति शेषः । सन्देशवचनं यथा तथा अब्रुवमिति सम्बन्धः २९

स०–विमुच्यताम् बन्धनात् । पूर्वं विमुच्यतामित्युक्तिस्ताडनादिविमोचनविषयिणी । इयं तु लङ्कां प्रतिगन्तुं मुच्यतामित्येतत्परेति मुक्त्युक्तिविवेकः ॥ २४ ॥ वानरैश्च निपीडितः प्राक् । परमसन्त्रस्तः पुनः स्सरकपयस्ताडयेयुरिति वा इयदालस्यं कृत इति रावणः क्रुद्धो हनिष्यतीति वा तथा । अत एव पुनर्भाषया लूनपक्षत्वमुच्यमानं युज्यते । इतः परं रामाज्ञानन्तरम् असन्त्रस्तः कपिपीडनभयरहितः ॥ २६ ॥

For Private And Personal Use Only

लोप्तुं विनाशयितुम् ॥ ३० ॥ अत्र वानरेषु । विषये सप्तमी । तीक्ष्णाः क्रूराः । उक्तेरेवावकाशो नास्ति । प्रत्युक्तेः का कथेति भावः । रावणप्रसादार्थं मध्ये राक्षसाधिपेति सम्बुद्धिः । त्वत्तोऽप्येतेऽतिशयितेति इति ज्ञापनार्थं वा ॥ ३१ ॥ वक्ष्यमाणयोः सीताप्रदानयुद्धयोर्मध्ये सीताप्रदानस्य साधिष्ठत्वं दर्शयितुं

क्रुद्धैस्तैरहमुत्प्लुत्य दृष्टमात्रैः प्लवङ्गमैः । गृहीतोऽस्म्यपि चारब्धो हन्तुं लोप्तुं च मुष्टिभिः ॥ ३० ॥ नैव सम्भाषितुं शक्याः सम्प्रश्नोऽत्र न लभ्यते । प्रकृत्या कोपनास्तीक्ष्णा वानरा राक्षसाधिप ॥ ३१ ॥ स च हन्ता विराधस्य कबन्धस्य खरस्य च । सुग्रीवसहितो रामः सीतायाः पदमागतः ॥ ३२ ॥ स कृत्वा सागरे सेतुं तीर्त्वा च लवणोदधिम् । एष रक्षांसि निर्धूय धन्वी तिष्ठति राघवः ॥ ३३ ॥ ऋक्षवानरसङ्घानामनीकानि सहस्रशः । गिरिमेघनिकाशानां छादयन्ति वसुन्धराम् ॥ ३४ ॥ राक्षसानां बलौघस्य वानरेन्द्रबलस्य च । नैतयोर्विद्यते सन्धिर्देवदानवयोरिव ॥ ३५ ॥ पुरा प्राकारमायान्ति क्षिप्रमेकतरं कुरु । सीतां वाऽस्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम् ॥ ३६ ॥ शुकस्य वचनं श्रुत्वा रावणो वाक्यमब्रवीत् । रोषसंरक्तनयनो निर्दहन्निव चक्षुषा ॥ ३७ ॥ यदि मां प्रति युद्ध्येरन् देवगन्धर्वदानवाः । नैव सीतां प्रयच्छामि सर्वलोकभयादपि ॥ ३८ ॥

रामपराक्रमं वर्णयति—स चेति । तदव्याहतपराक्रमस्य भूयः सन्दर्शनादस्मानवश्यं हनिष्यत्येवेति भावः ॥ ३२ ॥ निर्धूय तृणीकृत्य । एष इत्यतिसन्निहितत्वमुच्यते ॥ ३३ ॥ सङ्घानामनीकानीत्यनेन सङ्घारब्धत्वोक्त्या महानीकत्वं सूचितम् ॥ ३४ ॥ इदानीं तव वचनावकाशाभावेऽपि पुनः प्रकारान्तरेण गच्छेत्याशङ्क्याह—राक्षसानामिति । सन्धिः योगमात्रम् ॥ ३५ ॥ सम्प्रति कर्तव्यमुपदिशति—पुरेति । पुरा आयान्ति आयास्यन्ति । "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे लट् । एकतरमित्युक्तं विशदयति सीतामिति ॥ ३६ ॥ ३७ ॥ यदीति । सर्वलोकभयात् सर्वलोकेभ्यो भयात् ॥ ३८ ॥

अहं तथा ब्रुवन् लोप्तुं पक्षभागे छेत्तुं मुष्टिभिर्हन्तुं चारब्धः ॥ ३० ॥ संप्रश्नः सम्यक् प्रश्नः, मिथः संवादः ॥ ३१ ॥ ३२ ॥ निर्धूय तृणीकृत्य ॥ ३३ ॥ ३४ ॥ सन्धिः सन्धानं नास्त्येव ॥ ३५ ॥ पुरा आयान्ति आयास्यन्ति । "यावत्पुरानिपातयोर्लट्" इति भविष्यदर्थे लट् । एकतरं वक्ष्यमाणयोरन्यतरत् । तदेवाह सीतामिति ॥ ३६ ॥ ३७ ॥ सर्वलोक

स०—सर्वलोकः सर्वज्ञः हरो वा हरिर्वा हिरण्यगर्भो वा, तस्माद्भयादपि नैव प्रदास्यामीत्यन्वयः । सर्वलोकभयात् पुत्रादिलोकनाशभयादपीति वा ॥ ३८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वमनोरथं दर्शयति—कदेत्यादिना॥३९॥ तूणीशयैः चिरात् समराभावेन केवलतूणीरस्थैः। गणशः सङ्घशः। उल्काभिः निर्गतज्वाला(ल)काष्ठैः । ताभिः कुञ्जरमभिद्रावयन्तीति प्रसिद्धिः ॥४०॥ तच्चेति । तत् बलं 'स च हन्ता विराधस्य' इत्यादिना भवदुक्तबलम् । आदास्ये तिरस्करोमीत्यर्थः ॥४१–४३॥

रामानु०–सागरस्य जगदाप्लवनोद्यतस्य ॥ ४२ ॥ न जानातीत्यर्धम् । पुरा न जानाति इतः परं ज्ञास्यतीत्यर्थः ॥ ४४ ॥ अथ रूपकव्याजेन युद्धस्यात्मनो

कदा नामाभिधावन्ति राघवं मामकाः शराः । वसन्ते पुष्पितं मत्ता भ्रमरा इव पादपम् ॥ ३९ ॥ कदा तूणीशयैर्दीप्तैर्गणशः कार्मुकच्युतैः । शरैरादीपयाम्येनमुल्काभिरिव कुञ्जरम् ॥ ४० ॥ तच्चास्य बलमादास्ये बलेन महता वृतः । ज्योतिषामिव सर्वेषां प्रभामुद्यन् दिवाकरः ॥ ४१ ॥ सागरस्येव मे वेगो मारुतस्येव मे गतिः । न हि दाशरथिर्वेद तेन मां योद्धुमिच्छति ॥ ४२ ॥ न मे तूणीशयान् बाणान् सविषानिव पन्नगान् । रामः पश्यति सङ्ग्रामे तेन मां योद्धुमिच्छति ॥ ४३ ॥ न जानाति पुरा वीर्यं मम युद्धे स राघवः ॥ ४४ ॥ मम चापमयीं वीणां शरकोणैः प्रवादिताम् । ज्याशब्दतुमुलां घोरामार्तभीतमहास्वनाम् ॥ ४५ ॥ नाराचतलसन्नादां तां ममाहितवाहिनीम् । अवगाह्य महारङ्गं वादयिष्याम्यहं रणे ॥ ४६ ॥

विनोदनकरत्वमाह—ममेत्यादिना । ममाहितवाहिनीमेव महारङ्गं विपुलनृत्तशालाम् अवगाह्य प्रविश्य । शरैरेव कोणैः वीणावादनदण्डैः । प्रवादितां शब्दिताम् । ज्याशब्द एव तुमुलः तुमुलस्वनो यस्यास्ताम् । आर्तभीतमहास्वनाम् आर्तभीतशब्देन तत्स्वनो लक्ष्यते । एवं नाराचतलशब्देनापि तत्स्वनः । आर्तभीतानां स्वन एव महास्वनो यस्यास्ताम् । नाराचतलस्वन एव सन्नादो यस्यास्ताम् । घोराम् अन्यैर्वादयितुमशक्याम् । मम चापमयीं वीणामिति व्यस्तरूपकम् । रणे रणस्थजने, शृण्वतीति शेषः । वीणाया मन्द्रमध्यतारभेदेन स्वरत्रयसम्भवादत्रापि स्वरत्रयमुक्तम् ॥ ४५ ॥ ४६ ॥ ॥ ८५ ॥

भयात् सर्वलोकनिमित्तभयात् ॥ ३८ ॥ अभिधावन्ति धाविष्यन्ति ॥ ३९ ॥ ४० ॥ अस्य रामस्य बलमादास्ये तिरस्करिष्यामि ॥ ४१–४३ ॥ न जानातीत्यर्धं भिन्नं वाक्यम् ॥ ४४ ॥ मम चापीत्यादिश्लोकद्वयमेकं वाक्यम् । ममाहितवाहिनीं नाम महारङ्गमवगाह्य प्रविश्य शरकोणैः शरवादनदण्डैः प्रवादिताम् ।

For Private And Personal Use Only

न वासवेनेति । सहस्रचक्षुष्ट्वं गर्वहेतुत्वेनोक्तम् । दिग्विजये वरुणपुत्रैरेव युद्धकरणात् स्वयमित्युक्तम् । वासवादिभिः शराग्निना यथा धर्षयितुं न शक्यो ऽस्मीति योजना ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशः सर्गः ॥ २४ ॥

अथ शुकसारणप्रेषणं पञ्चविंशे—सबल इत्यादि । दशरथात्मज इति मनुष्यत्वोक्तिः । श्रीमानिति मदातिशयोक्तिः । शुकः पूर्वस्मादन्यः, सारण

न वासवेनापि सहस्रचक्षुषा यथाऽस्मि शक्यो वरुणेन वा स्वयम् । यमेन वा धर्षयितुं शराग्निना महाहवे वैश्रवणेन वा पुनः ॥ ४७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुर्विंशः सर्गः ॥ २४ ॥

सबले सागरं तीर्णे रामे दशरथात्मजे । अमात्यौ रावणः श्रीमानब्रवीच्छुकसारणौ ॥ १ ॥
समग्रं सागरं तीर्णं दुस्तरं वानरं बलम् । अभूतपूर्वं रामेण सागरे सेतुबन्धनम् ॥ २ ॥
सागरे सेतुबन्धं तु न श्रद्दध्यां कथंचन । अवश्यं चापि सङ्ख्येयं तन्मया वानरं बलम् ॥ ३ ॥

साहित्यात् ॥१॥ समग्रं विशालम् । दुस्तरं तरितुमशक्यम् । सागरं कर्म । वानरं वानरसम्बन्धि बलं कर्तृ । तीर्णम् अतरत् । कर्तरि क्तः । सेतुबन्धनम्, रामेण कृतमिति शेषः ॥ २ ॥ सेतुबन्धं रामेण कृतम् । कथंचन आप्तपुरुषोदितत्वेऽपि । अपि च तथापि । सङ्ख्येयं ज्ञातव्यम् ॥ ३ ॥

ज्याशब्दतुमुलो ज्याशब्द एव तुमुलः शब्दो यस्यास्ताम् । आर्तभीतमहास्वनाम् आर्तभीतशब्दौ तदारवे उपचर्येते । आर्तानां रव एव महास्वनो यस्यास्ताम् । नाराचतलसन्नादां नाराचतलशब्दौ तदारवे उपचर्येते । नाराचतलरव एव सन्नादो यस्यास्ताम् । मम चापमयीं वीणां वादयिष्यामीत्यन्वयः । तुमुलमहास्वरसन्नादशब्दैर्वीणाया मन्द्रमध्यमतारा उच्यन्ते तेऽत्र सूचिताः ॥ ४५-४७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्ध० चतुर्विंशः सर्गः ॥२४॥

सबल इति । पूर्वप्रेषितशुकोक्तवृत्तान्तज्ञापनपूर्वकं प्रेषणादमात्यत्वेन विशेषणाच्चात्र शुकोऽन्य इत्यवगम्यते ॥ १ ॥ वानरं बलं दुस्तरं सागरं तीर्णमिति, रामेण

स० –चारात्प्राचीनादयमन्योऽमात्यत्वेनोक्तेः, अथवाऽयं स एव । परिचितसैन्यकत्वात् । अमात्यस्याप्तत्वेन प्रथमप्रतिपत्त्यर्थं प्रेषणस्यौचित्यात् । अत एव पक्षीभूय प्रतिपक्षिसेनाप्रवेशोऽपि सम्भवति । न च चारः इत्युक्त्याऽयमन्य इति वाच्यम्; चतुर्दशश्लोके–“ राक्षसेन्द्रस्य मन्त्रिणौ । लङ्कायाः समनुप्राप्तौ चारौ ” इत्युक्तेर्मन्त्रिणोऽपि चारतासम्भवात् । छत्रिन्यायेन वा अमात्यत्वोक्तिरिति भवतु चार एवायम् “ अवश्यं चापि सङ्ख्येयम्” इत्युत्तरत्र सेनासङ्ख्यारूपादिविशेषविवित्सानुष्ठानात्सामान्यतस्तज्ज्ञानिना सहान्यप्रेषणस्य न्याय्यत्वात् ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवन्तावित्यादि चतुःश्लोक्येकान्वया। तस्माद्भवन्तौ अनुपलक्षितौ परैरविज्ञातौ सन्तौ। वानरं सैन्यं प्रविश्य। परिमाणं वानराणामियत्ताम्। तेषां वीर्यं बलपरिच्छेदम्। ये प्लवङ्गमाः मुख्याः प्रधानभूताः तान् ॥ ४ ॥ ये रामस्य सुग्रीवस्य च सम्मता मन्त्रिणः। ये नासीरभटाः पूर्वमभिवर्तन्ते। ये च प्लवङ्गमाः वस्तुतः शूराः तान् सर्वान् ॥५॥ सागरे सगरखानिते। सलिलार्णवे लवणजलसमुद्रे। स सेतुः वानरतरणार्थसेतुश्च। यथा येन प्रकारेण बद्धः तं

भवन्तौ वानरं सैन्यं प्रविश्यानुपलक्षितौ। परिमाणं च वीर्यं च ये च मुख्याः प्लवङ्गमाः ॥ ४ ॥ मन्त्रिणो ये च रामस्य सुग्रीवस्य च सम्मताः। ये पूर्वमभिवर्तन्ते ये च शूराः प्लवङ्गमाः ॥ ५ ॥ स च सेतुर्यथा बद्धः सागरे सलिलार्णवे। निवेशं यद्यथा तेषां वानराणां महात्मनाम् ॥ ६ ॥ रामस्य व्यवसायं च वीर्यं प्रहरणानि च। लक्ष्मणस्य च वीर्यं च तत्त्वतो ज्ञातुमर्हथः ॥ ७ ॥ कश्च सेनापतिस्तेषां वानराणां महौजसाम्। एतज्ज्ञात्वा यथा तत्त्वं शीघ्रमागन्तुमर्हथः ॥ ८ ॥ इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ। हरिरूपधरौ वीरौ प्रविष्टौ वानरं बलम् ॥ ९ ॥ ततस्तद्वानरं सैन्यमचिन्त्यं रोमहर्षणम्। सङ्ख्यातुं नाध्यगच्छेतां तदा तौ शुकसारणौ ॥१०॥ संस्थितं पर्वताग्रेषु निर्दरेषु गुहासु च। समुद्रस्य च तीरेषु वनेषूपवनेषु च ॥११॥ तरमाणं च तीर्णं च तर्तुकामं च सर्वशः। निविष्टं निविशच्चैव भीमनादं महाबलम्। तद्बलार्णवमक्षोभ्यं ददृशाते निशाचरौ ॥ १२ ॥

प्रकारम्। तेषां निवेशं निवासम्। उत्पत्तिस्थानं वा। क्लीबत्वमार्षम्। यद्यथा यादृशप्रकारः ॥ ६ ॥ रामस्य व्यवसायं कर्तव्यविषयनिश्चयम्। वीर्यं बलम्। प्रहरणानि आयुधानि। लक्ष्मणस्य व्यवसायं बलं च तत्त्वतः पारमार्थ्येन ज्ञातुमर्हथ इत्यन्वयः ॥ ७–९ ॥ नाध्यगच्छेतां नाज्ञासिष्टाम् ॥१०॥ अज्ञानहेतुमाह सार्धश्लोकद्वयेन–संस्थितमिति। निर्दरेषु दलितपर्वतप्रदेशेषु। उपवनेषु आरामेषु। "आरामः स्यादुपवनम्" इत्यमरः ॥ ११ ॥ १२ ॥ सागरे सेतुबन्धनं कृतमिति चैतदुभयमपि अभूतपूर्वमिति सम्बन्धः ॥ २ ॥३॥ परिमाणं चेत्यादिना तत्त्वतो ज्ञातुमर्हथ इत्यनेन सम्बन्धः। ये च मुख्याः प्लवङ्गमाः तांश्च ये पूर्वमभिवर्तन्ते, युद्धायेति शेषः। ये च शूरास्तांश्च सागरे सगरविरचिते सलिलार्णवे लवणजलसमुद्रे ॥ ४–९ ॥ तत इति। नाध्यगच्छेतां नाशक्नुताम् ॥ १० ॥ तत्र हेतुमाह–संस्थितमित्यादिश्लोकद्वयेन। तत महाबलम्। शुकसारणनिरीक्षणवेलायामुक्तप्रकारमभूदित्यर्थः ॥ ११ ॥ तद्बलार्णवमित्यर्धं भिन्नं ॥ ८६ ॥

स०–सागरे सागरत्वयाततवाततत्वमिति। अर्णवशब्दो रूढः समुद्र इत्येतत्प्रयार्थकः। सलिलार्णवे जलसमुद्रे इत्यर्थः। "सरः पानौ" इत्यजन्तः। तथा च सलिलानि धरन्ति अर्णांसि सन्त्यत्रेति सवा तदित्यर्थः ॥ ९

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामानु०–तादिति । तद्बलार्णवमित्येकं पदम् । ददृशाते ददृशतुः ॥ १२ ॥ ताविति । अथ विभीषणः ददर्श आचचक्षे चेत्यन्वयः ॥ १३ ॥ लङ्कायाः इति पञ्चमी । परपुरं जयतीति परपुरंजयः । " संज्ञायां भृतॄवृजिधारिसहितपिदमः " इति खच् ॥ १४–१६ ॥ दशरथात्मजः महापुरुषप्रसूतत्वेन सहजकारुण्यः ।

तौ ददर्श महातेजाः प्रच्छन्नौ च विभीषणः । आचचक्षेऽथ रामाय गृहीत्वा शुकसारणौ ॥ १३ ॥ तस्येमौ राक्षसेन्द्रस्य मन्त्रिणौ शुकसारणौ । लङ्कायाः समनुप्राप्तौ चारौ परपुरञ्जय ॥१४॥ तौ दृष्ट्वा व्यथितौ रामं निराशौ जीविते तदा । कृताञ्जलिपुटौ भीतौ वचनं चेदमूचतुः ॥१५॥ आवामिहागतौ सौम्य रावणप्रहितावुभौ । परिज्ञातुं बलं कृत्स्नं तवेदं रघुनन्दन ॥ १६ ॥ तयोस्तद्वचनं श्रुत्वा रामो दशरथात्मजः । अब्रवीत् प्रहसन् वाक्यं सर्वभूतहिते रतः ॥१७॥ यदि दृष्टं बलं कृत्स्नं वयं वा सुपरीक्षिताः। यथोक्तं वा कृतं कार्यं छन्दतः प्रतिगम्यताम् ॥१८॥ अथ किंचिददृष्टं वा भूयस्तद्द्रष्टुमर्हथः । विभीषणो वा कार्त्स्न्येन भूयः सन्दर्शयिष्यति॥१९॥ न चेदं ग्रहणं प्राप्य भेतव्यं जीवितं प्रति । न्यस्तशस्त्रौ गृहीतौ वा न दूतौ वधमर्हथः ॥२०॥ पृच्छमानौ विमुञ्चैतौ चारौ रात्रिंचरावुभौ । शत्रुपक्षस्य सततं विभीषण विकर्षणौ ॥ २१ ॥ प्रविश्य नगरीं लङ्कां भवद्भ्यां धनदानुजः । वक्तव्यो रक्षसां राजा यथोक्तं वचनं मम ॥२२॥ यद्बलं च समाश्रित्य सीतां मे हृतवानसि । तद्दर्शय यथाकामं ससैन्यः सहबान्धवः॥२३॥

प्रहसन् रावणबुद्धिमान्द्यस्मरणात् प्रहासः । सर्वभूतहिते रतः रिपूणामपि वत्सलः ॥ १७ ॥ यथोक्तं रावणेन यथोक्तम् । छन्दतः यथेच्छातः ॥ १८ ॥ अथेति पक्षान्तरे । भूयः अतिशयेन । दूतौ, युवामिति शेषः ॥ १९ ॥ २० ॥ विभीषणं प्रत्याह–पृच्छमानाविति । सततं पृच्छमानत्वदशायामपि शत्रुपक्षस्य विकर्षणौ बाधकाविति यावत् ॥२१॥ पुनर्दूतौ प्रत्याह–प्रविश्येति ॥२२॥ यदिति । यथाकामं यथेच्छम् । शरणं वा आगच्छेति भावः ॥२३ ॥

वाक्यम् । ददृशाते ददृशातुः ॥ १२–२० ॥ विभीषणं प्रत्याह–पृच्छमानाविति । हे विभीषण ! शत्रुपक्षस्य विकर्षणौ विविधं कर्षणं सामादिना इतस्ततः कर्षणं ययोस्तौ । सततं पृच्छमानौ अभयं पृच्छन्तौ एतौ विमुञ्चेत्यर्थः ॥ २१ ॥ पुनश्चारौ प्रत्याह–प्रविश्येत्यादिना ॥ २२–२४ ॥

स०–वयं वा सुपरीक्षिताः इति पाठः । सुपरीक्षिताः अतिसम्यगवलोकिताः । वयं वा सुसमाहिता इति पाठे–सुसमाहिताः स्वस्थचित्ताः, प्रतिभटभीतिरहिता इति यावत् । दृष्टमिति विपरिणतं सत् दृष्टाः–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्वः काल्ये परेद्युः प्रातःकाले ॥ २४ ॥ क्रोधं मोक्ष्ये क्रोधकार्यं करिष्य इत्यर्थः । वज्रवान् अभ्यस्तवज्र इत्यर्थः ॥ २५ ॥ रामानु०—श्वः काले वज्रवान् वज्रमिति पाठः ॥ २५ ॥ इतीत्यादिसार्धश्लोक एकान्वयः । प्रतिनन्द्य अभिष्टुत्य ॥ २६ ॥ मुक्तौ, आवामिति शेषः । धर्मात्मना दूतवधमनिच्छतेत्यर्थः । अमिततेजसेत्यनेन अस्मत्त्यागे भीतिहेतुता न शङ्क्येत्यर्थः ॥ २७ ॥ एकस्थानेत्यादि श्लोकत्रयमेकान्वयम् । यत्र एकस्थानम् ऐकमत्यम्, एकप्रदेशं

श्वः काल्ये नगरीं लङ्कां सप्राकारां सतोरणाम् । राक्षसं च बलं पश्य शरैर्विध्वंसितं मया ॥ २४ ॥ क्रोधं भीममहं मोक्ष्ये ससैन्ये त्वयि रावण । श्वः काल्ये वज्रवान् वज्रं दानवेष्विव वासवः ॥२५॥ इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ । जयेति प्रतिनन्द्यैतौ राघवं धर्मवत्सलम् । आगम्य नगरीं लङ्कामब्रूतां राक्षसाधिपम् ॥ २६ ॥ विभीषणगृहीतौ तु वधार्हौ राक्षसेश्वर । दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा ॥२७ ॥ एकस्थानगता यत्र चत्वारः पुरुषर्षभाः । लोकपालोपमाः शूराः कृतास्त्रा दृढविक्रमाः ॥ २८ ॥ रामो दाशरथिः श्रीमान् लक्ष्मणश्च विभीषणः । सुग्रीवश्च महातेजा महेन्द्रसमविक्रमः ॥ २९ ॥ एते शक्ताः पुरीं लङ्कां सप्राकारां सतोरणाम् । उत्पाट्य सङ्क्रामयितुं सर्वे तिष्ठन्तु वानराः ॥ ३० ॥

वा गताः । एते शक्ताः पुरीं लङ्कामित्याद्यन्वयः । कृतास्त्राः शिक्षितास्त्राः । छत्रिणो गच्छन्तीतिवदयं निर्देशः, सुग्रीवस्याकृतास्त्रत्वात् ॥२८॥२९॥ उत्पाट्य

श्वः काले इति पाठः । श्व इत्यर्थः ॥ २५–२७ ॥ एकस्थानगता इत्यादिश्लोकत्रयमेकं वाक्यम् । यत्र लङ्कामर्दनरूपकार्ये । एकस्थानगताः ऐकमत्यं प्राप्ताः । तत्र कार्ये विषये । सर्वे वानरास्तिष्ठन्तु, उक्तविशेषणा रामादयश्चत्वार एव लङ्कामुत्पाट्य संक्रामयितुमन्यत्र क्षेप्तुं शक्ता इति सम्बन्धः ॥ २८–३० ॥

–इत्यन्वेति । "अस्मदो द्वयोश्च" इति वयमिति सम्भवति । ननु न सम्भवति सविशेषणत्वादिति चेन्न; "नच विदितवेद्या अपि वयम्" "शैवा वयं न खलु तत्र विचारणीयं पञ्चाक्षरीजपपरा नितराम्" इत्यादिवद्विधेयविशेषणत्वाददोषः । असुसमाहिताः रावणं सगणं तृणीकृत्यानवधानेनैव स्थिता इति वा । प्रति गम्यतां स्वस्वामिसन्निधिम् ॥ १८ ॥

स०—ननु "वधं न कुर्वन्ति परावरज्ञा दूतस्य" इत्यारभ्य "युक्तायुक्तं विनिश्चित्य दूतदण्डो विधीयताम् । विभीषणवचः श्रुत्वा" इत्यन्तेन ग्रन्थेन विभीषणकृततदूतघातप्रतिषेधबोधनावगतेः अत्र पुनः "विभीषणगृहीतौ तु वधार्थम्" इत्युक्तिः कथमिति चेत्, सत्यम्–शङ्केरंस्तत्त्यागे कपयो मयीति तथाऽऽत्मानं दर्शयामासेति युक्ततोक्तेर्ज्ञेया । परिपन्नमनस्य परिभ्रमकर एव यमदूत इति नीतेरभावादारभ्य; ऽतथाकार्येऽपि तथेति वा ॥ २७ ॥

For Private And Personal Use Only

उद्धृत्य । संक्रामयितुम् अन्यत्र क्षेप्तुम् । सर्वे एतच्चतुष्टयभिन्नाः ॥ ३० ॥ प्रहरणादिकं यादृशं तदवलोकने राम एको वधिष्यतीति मन्यावहे इत्यर्थः ॥ ३१ ॥ नन्वसहायशूरोऽपि रामः सेनाहननादनुत्साहः स्यात्, तत् क्रियतामित्यत्राह–रामलक्ष्मणेति । सुग्रीवेण च अङ्गदादिना च सहिता सा अपरिच्छिन्ना । हरिवाहिनी चपलकपिसेना । रामलक्ष्मणगुप्ता रामेण 'रामस्य दक्षिणो बाहुः' इति रामदक्षिणबाहुभूतेन लक्ष्मणेन च गुप्ता सती ।

यादृशं तस्य रामस्य रूपं प्रहरणानि च । वधिष्यति पुरीं लङ्कामेकस्तिष्ठन्तु ते त्रयः ॥ ३१ ॥ रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी । बभूव दुर्धर्षतरा सेन्द्रैरपि सुरासुरैः ॥३२॥ [व्यक्तः सेतुस्तथा बद्धो दशयोजनविस्तृतः । शतयोजनमायामस्तीर्णा सेना च सागरम् । निविष्टो दक्षिणे तीरे रामः स च नदीपतेः । तीर्णस्य तरमाणस्य बलस्यान्तो न विद्यते ॥] प्रहृष्टरूपा ध्वजिनी वनौकसां महात्मनां सम्प्रति योद्धुमिच्छताम् । अलं विरोधेन शमो विधीयतां प्रदीयतां दाशरथाय मैथिली ॥ ३३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्ध काण्डे पञ्चविंशः सर्गः ॥ २५ ॥

सुग्रीवस्य रक्ष्यकोटावेवान्वयः, न तु रक्षककोटौ । तन्मन्त्रिणा हनुमतैव "जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ " इत्युक्तेः । दुर्धर्षतरा बभूव तरसा मनसापि धर्षयितुमशक्येत्यवगम्यते । न केवलं मनुष्यादिभिः किन्तु सुरैरपि । न केवलं सुरैरेव किन्तु सुरासुरैः विरोधं विहाय कृतसौहार्दैरपि । न केवलमनायकैस्तैः, किन्तु सेन्द्रैरपि । स्वस्वातन्त्र्यं विहाय नायकाज्ञानुवर्तिभिरित्यर्थः ॥ ३२ ॥ महात्मनां दृढमनस्कानाम् । सम्प्रति सद्य एव । योद्धुमिच्छताम् । प्रहृष्टरूपा हर्षद्योतकाकारयुक्ता, भवतीति शेषः । अतस्तद्विरोधेनालम् । शमः क्रोधनिवृत्तिः । विधीयतां क्रियताम्, मैथिली प्रदीयतां च ॥ ३३ ॥ रामानु०–प्रहृष्टरूपा अत्यन्तं प्रहृष्टा । "प्रशंसायां रूपप्" ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चविंशः सर्गः ॥ २५ ॥

यादृशं रामस्य रूपं प्रयाणानि च यादृशानि तद्विमर्शे स एव वधिष्यतीति मन्यावहे इत्यर्थः ॥ ३१ ॥ ३२ ॥ प्रहृष्टरूपा अत्यन्तं प्रहृष्टा ॥ ३३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चविंशः सर्गः ॥ २५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रावणाय सारणेन वानरयूथपतीनां वीर्यादिकथनपूर्वकं तत्प्रदर्शनं षड्विंशे–तदिति। अक्लीबम् अकातरम्। प्रत्यभाषत अनिन्ददित्यर्थः ॥ १ ॥ यदीति। अभियुञ्जीरन् युद्धचेरन्। सर्वलोकभयात् सर्वलोकेभ्यो भयात् ॥ २ ॥ त्वमित्यादिसार्द्धश्लोकः। सपत्नः शत्रुः ॥ ३ ॥ इत्युक्त्वेत्यादिसार्ध

तद्वचः पथ्यमक्लीबं सारणेनाभिभाषितम्। निशम्य रावणो राजा प्रत्यभाषत सारणम् ॥ १॥ यदि मामभियुञ्जीरन् देवगन्धर्वदानवाः। नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ २ ॥ त्वं तु सौम्य परित्रस्तो हरिभिर्निर्जितो भृशम्। प्रतिप्रदानमद्यैव सीतायाः साधु मन्यसे। को हि नाम सपत्नो मां समरे जेतुमर्हति ॥ ३ ॥ इत्युक्त्वा परुषं वाक्यं रावणो राक्षसाधिपः ॥ ४ ॥ आरुरोह ततः श्रीमान् प्रासादं हिमपाण्डरम्। बहुतालसमुत्सेधं रावणोऽथ दिदृक्षया ॥ ५ ॥ ताभ्यां चराभ्यां सहितो रावणः क्रोधमूर्च्छितः। पश्यमानः समुद्रं च पर्वतांश्च वनानि च। ददर्श पृथिवीदेशं सुसम्पूर्णं प्लवङ्गमैः ॥ ६ ॥ तदपारमसङ्ख्येयं वानराणां महद्बलम्। आलोक्य रावणो राजा परिपप्रच्छ सारणम् ॥ ७॥ एषां वानरमुख्यानां के शूराः के महाबलाः। के पूर्वमभिवर्तन्ते महोत्साहाः समन्ततः ॥ ८ ॥ केषां शृणोति सुग्रीवः के वा यूथपयूथपाः। सारणाचक्ष्व तत्त्वेन के प्रधानाः प्लवङ्गमाः ॥९॥ सारणो राक्षसेन्द्रस्य वचनं परिपृच्छतः। आचचक्षेऽथ मुख्यज्ञो मुख्यांस्तांस्तु वनौकसः ॥ १० ॥

श्लोकः। ततः तस्मात्पूर्वस्थानात्। बहुतालसमुत्सेधम् अनेकतालवृक्षतुल्यौन्नत्यम्। यद्वा विततांङ्गुष्ठमध्यमामितस्तालः। तदाह सज्जनः–"प्रादेश तालगोकर्णवितस्त्यश्च यथाक्रमम्। भवन्ति विततांङ्गुष्ठप्रदेशिन्यादिभिः सह॥" इति। अत्र द्वितीयो रावणशब्दो रावयतीति व्युत्पत्त्या क्रियानिमित्तकः। दिदृक्षया वानरबलदिदृक्षया ॥ ४ ॥ ५ ॥ चराभ्यां चाराभ्याम्। क्रोधमूर्च्छितः क्रोधेन व्याप्तः। पृथिवीदेशं त्रिकूटाधःप्रदेशम् ॥ ६ ॥ अपारम् उत्तरावधिरहितम् ॥७॥ येषामिति। इयं निर्धारणे षष्ठी ॥८॥ केषामिति। वचनमिति शेषः। प्रधानाः सेनापतयः ॥९॥ वचनं, निशम्येति शेषः॥१०॥ ॥ ८८ ॥

॥१-२॥ इत्युक्त्वेत्यादिश्लोकद्वयमेकं वाक्यम्। बहुतालसमुत्सेधं बहुतालौन्नत्यसमानौन्नत्यम्। दिदृक्षया वानरबलदर्शनेच्छया॥४॥५॥ पश्यमानः पश्यन्॥६-८॥ केषां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिभिर्नीलं वर्णयति–एष इत्यादि । य एष इत्यन्वयः । तिष्ठते तिष्ठति ॥ ११–१३ ॥ अथाङ्गदं वर्णयति–बाहू इत्यादिना स्वेनानीकेन दुर्जयः इत्यन्तेन । बाहू प्रगृह्य उत्क्षिप्य । अभि उद्दिश्य मुखं यस्यासावभिमुखः । विजृम्भते जृम्भणं करोति ॥ १४ ॥ पद्मकिञ्जल्कसन्निभः पद्मकेसरवत्

एष योऽभिमुखो लङ्कां नर्दंस्तिष्ठति वानरः । यूथपानां सहस्राणां शतेन परिवारितः ॥११॥ यस्य घोषेण महता सप्राकारा सतोरणा । लङ्का प्रवेपते सर्वा सशैलवनकानना ॥ १२ ॥ सर्वशाखामृगेन्द्रस्य सुग्रीवस्य महात्मनः । बलाग्रे तिष्ठते वीरो नीलो नामैष यूथपः ॥ १३ ॥ बाहू प्रगृह्य यः पद्भ्यां महीं गच्छति वीर्यवान् । लङ्कामभिमुखः क्रोधादभीक्ष्णं च विजृम्भते ॥ १४ ॥ गिरिशृङ्गप्रतीकाशः पद्मकिञ्जल्कसन्निभः ॥ १५ ॥ स्फोटयत्यभिसंरब्धो लाङ्गूलं च पुनः पुनः। यस्य लाङ्गूलशब्देन स्वनन्ति प्र दिशो दश ॥१६॥ एष वानरराजेन सुग्रीवेणाभिषेचितः। यौवराज्येऽङ्गदो नाम त्वामाह्वयति संयुगे ॥१७॥ वालिनः सदृशः पुत्रः सुग्रीवस्य सदा प्रियः। राघवार्थे पराक्रान्तः शक्रार्थे वरुणो यथा ॥ १८ ॥ एतस्य सा मतिः सर्वा यद् दृष्टा जनकात्मजा । हनूमता वेगवता राघवस्य हितैषिणा ॥ १९ ॥ बहूनि वानरेन्द्राणामेष यूथानि वीर्यवान् । परिगृह्याभियाति त्वां स्वेनानीकेन दुर्जयः ॥ २० ॥

पीतवर्ण इत्यर्थः ॥ १५ ॥ स्फोटयति भूमौ ताडयति । अभिसंरब्धः कुपितः । प्रस्वनन्तीत्यन्वयः ॥ १६ ॥ अभिषेचितः अभिषिक्तः । आह्वयति आह्वयते । स्पर्धाविषयेऽप्यात्मनेपदाभाव आर्षः ॥ १७ ॥ पराक्रान्तः पराक्रमितुमुद्यतः ॥ १८ ॥ हनूमता सीता दृष्टेति यत् सा मतिः एतस्याङ्गदस्य एतद्बुद्धिमूलं हनुमतः सीतादर्शनमिति भावः । अङ्गदपुरस्कारेण हनुमतः समागमात् ॥ १९ ॥ बहूनीति । स्वेनानीकेनेति दुर्जयत्वकारणोक्तिः

शृणोति, वाक्यमिति शेषः ॥ ९–१२ ॥ तिष्ठते तिष्ठति ॥ १३ ॥ बाहू प्रगृह्येत्यादि स्वेनानीकेन दुर्जयः इत्येतदन्तम् अङ्गदवर्णनम् । बाहू प्रगृह्य उत्क्षिप्य । अभिषेचितः अभिषिक्तः । पराक्रान्तः पराक्रमितुमुद्यतः ॥१४–१८॥ एतस्य अङ्गदस्य । हनुमता जनकात्मजा दृष्टेति यत् सा सर्वा मतिरेतस्येति, अङ्गदोपदेशादेव हनुमता सीता दृष्टेति भावः ॥ १९ ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अतो न पुनरुक्तिः ॥ २० ॥ अनु वालीति । एतस्योत्तरार्धे वीरस्तिष्ठति सङ्ग्राम इति। वालिसुतस्य अनु पश्चात्। सेतुहेतुः सेतुकर्ता । सङ्ग्रामे सङ्ग्राम निमित्तम् ॥ २१ ॥ नलपरिवारानाह–ये त्वित्यादिना मर्दितुमित्यन्तेन । श्लोकत्रयमेकान्वयम् । विष्टभ्य उन्नम्य। क्ष्वेलयन्ति सिंहनादं कुर्वन्ति । नदन्ति गर्जन्ति । उत्थाय, आसनादिति शेषः । विजृम्भन्ते कोपेन गात्रविनामं कुर्वन्ति । य एवंविधा वानराः ये च चन्दनवासिनः चन्दनवनवासिनः ।

अनु वालिसुतस्यापि बलेन महता वृतः । वीरस्तिष्ठति सङ्ग्रामे सेतुहेतुरयं नलः ॥२१॥ ये तु विष्टभ्य गात्राणि क्ष्वेलयन्ति नदन्ति च । उत्थाय च विजृम्भन्ते क्रोधेन हरिपुङ्गवाः ॥ २२ ॥ एते दुष्प्रसहा घोराश्चण्डाश्चण्डपराक्रमाः । अष्टौ शतसहस्राणि दशकोटिशतानि च ॥ २३ ॥ य एनमनुगच्छन्ति वीराश्चन्दनवासिनः । एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥२४॥ श्वेतो रजतसङ्काशश्चपलो भीमविक्रमः । बुद्धिमान् वानरो वीरस्त्रिषु लोकेषु विश्रुतः ॥ २५ ॥ तूर्णं सुग्रीवमागम्य पुनर्गच्छति सत्वरः । विभजन् वानरीं सेनामनीकानि प्रहर्षयन् ॥ २६ ॥

एते एनं नलमनुगच्छन्तीति सम्बन्धः । चन्दनवानरा इति पाठे मध्यमपदलोपिसमासः । चन्दनवासिनो वानरा इति । एषैवेति सन्धिरार्षः । आशंसते प्रार्थयते ॥ २२–२४ ॥ अथ द्वाभ्यां श्वेताख्यं वानरं वर्णयति–श्वेत इत्यादि । अन्वर्थनामेत्याह रजतेति । चपलः युद्धचपलः ॥ २५ ॥ रामानु०–श्वेतः श्वेताख्यः ॥ २५ ॥ अनीकानि पुनर्गच्छतीत्यन्वयः । विभजन् निबिडां सेनां भित्त्वा गच्छन्नित्यर्थः । अत्र चपल इत्यनेन अद्यैव लङ्कां ध्वंसयामीति निवेदनार्थं गत्वा तेन सान्त्वितः पुनर्गच्छतीत्यवगम्यते ॥ २६ ॥

अनु वालिसुतस्य वालिसुतस्यानु अनन्तरम् ॥ २१ ॥ ये तु विष्टभ्येत्यादि अनीकानि प्रहर्षयन्नित्यन्तं श्वेताख्यवानरवर्णनम् । ये गात्राणि विष्टभ्य क्ष्वेलयन्ति य एनं श्वेताख्यमनुगच्छन्ति एते दुष्प्रसहाः चन्दनवासिनः चन्दनवनवासिन इति सम्बन्धः ॥ २२–२५ ॥ यः अनीकानि प्रहर्षयन् वानरीं सेनां विभजन् सुग्रीवमागम्य पुनर्गच्छति एष श्वेत एव वानरः स्वेनानीकेन लङ्कां मर्दितुम् आशंसते प्रार्थयतीति सम्बन्धः ॥ २६ ॥

स०–चन्दनवासिनः तन्नामकगिरिविशेषवासिनः । अथवा चन्दनभूयिष्ठत्वान्मलयः तत्र वासिनो वा । एषैव एष एव । सन्धिरार्षः । एषा या प्रसिद्धा त्वदावासभूता तां लङ्कां मर्दितुमिति वा ॥ २४ ॥

For Private And Personal Use Only

चतुर्भिः कुमुदं वर्णयति--यः पुरेत्यादि । पुरेत्यनेनाद्य सुग्रीवसमीप एव वसतीति गम्यते । पर्यैति परितः सञ्चरति । नाम्ना सङ्कोचनो नाम यः प्रसिद्ध: तं पर्वतमित्यन्वयः । तत्र गोमतीतीरे ॥२७॥ परिकर्षति आनयति ॥ २८ ॥ घोरकर्मणो यस्य लाङ्गूलमाश्रिताः वालाः रोमाणि । दैर्घ्यस्यावधिमाह

यः पुरा गोमतीतीरे रम्यं पर्यैति पर्वतम् । नाम्ना सङ्कोचनो नाम नानानगयुतो गिरिः । तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ॥ २७॥ योऽसौ शतसहस्राणां सहस्रं परिकर्षति ॥ २८ ॥ यस्य वाला बहुव्यामा दीर्घा लाङ्गूलमाश्रिताः । ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥ २९ ॥ अदीनो रोषणश्चण्डः सङ्ग्राममभि काङ्क्षति । एषोऽप्याशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥३०॥ यस्त्वेष सिंहसङ्काशः कपिलो दीर्घलोचनः । निभृतः प्रेक्षते लङ्कां दिधक्षन्निव चक्षुषा ॥ ३१ ॥ विन्ध्यं कृष्णगिरिं सह्यं पर्वतं च सुदर्शनम् । राजन् सततमध्यास्ते रम्भो नामैष यूथपः॥३२॥ शतं शतसहस्राणां त्रिंशच्च हरिपुङ्गवाः। यमेते वानराः शूराश्चण्डाश्चण्डपराक्रमाः । परिवार्यानुगच्छन्ति लङ्कां मर्दितुमोजसा ॥ ३३ ॥ यस्तु कर्णौ विवृणुते जृम्भते च पुनः पुनः । न च संविजते मृत्योर्न च युद्धाद्विधावति ॥ ३४ ॥ प्रकम्पते च रोषेण तिर्यक् च पुनरीक्षते । पश्यन् लाङ्गूलमपि च क्ष्वेलते च महाबलः ॥ ३५ ॥ महाजवो वीतभयो रम्यं साल्वेयपर्वतम् । राजन् सततमध्यास्ते शरभो नाम यूथपः ॥ ३६ ॥

बहुव्यामा इति । "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्" इत्यमरः । अदीन इत्यत्र य इत्युपस्कार्यम् ॥ २९ ॥ ३० ॥ अथ सार्द्धैस्त्रिभी रम्भं वर्णयति--यस्त्वेष इत्यादि ॥ ३१--३३ ॥ अथ शरभं वर्णयति--यस्तु कर्णावित्यादि । संविजते बिभेति ॥ ३४--३७ ॥

यः पुरेत्यादिना सार्धेन कुमुदवर्णनम् ॥ २७ ॥ योऽसावित्यारभ्य स्वेनानीकेनेत्यन्तं चण्डाख्यवर्णनम् । यस्य वालाः रोमाणि बहुव्यामाः दीर्घबाहुद्वयप्रमाणाः । सिताश्वेताः अश्वेता नीलाश्च सिताश्वेताः पीताश्च ॥ २८ ॥ २९ ॥ चण्डः चण्डाख्यः ॥ ३० ॥ यस्त्वेष इत्यारभ्य लङ्कां मर्दितुमोजसा इत्यन्तं रम्भाख्यवर्णनम् । निभृतः एकाग्रः ॥ ३१--३३ ॥ यस्तु कर्णावित्यारभ्य चत्वारिंशत्तथैव चेत्यन्तं शरभाख्यवर्णनम् । न संविजते न बिभेति ॥ ३४--३७ ॥

रामानु०–एतस्येति । चत्वारिंशत्तथैव चेति पाठः । एतदुत्तरशेषः ॥ ३७ ॥ अथ पनसं वर्णयति–यस्तु मेघ इत्यादिना ॥ ३८–४० ॥ रामानु०–भेरीणामिति । घोषः शाखामृगेन्द्राणामिति पाठः ॥ ३९ ॥ एनं पनसम् । येषां यूथपानां यूथानि च भागशः स्वस्वांशासङ्ख्येन एनं पर्युपासत इति संबन्धः ॥ ४१ ॥ विनतं वर्णयति–यस्त्वित्यादि । प्रवल्गन्तीम् उत्साहेन प्लवमानाम् । समुद्रस्य पारे स्थिताम् । अत एव द्वितीयः सागर इव, स्थितामिति शेषः । विनताविशेषणं

एतस्य बलिनः सर्वे विहारा नाम यूथपाः । राजन् शतसहस्राणि चत्वारिंशत्तथैव च ॥ ३७ ॥ यस्तु मेघ इवाकाशं महानावृत्य तिष्ठति । मध्ये वानरवीराणां सुराणामिव वासवः ॥ ३८ ॥ भेरीणामिव सन्नादो यस्यैष श्रूयते महान् । घोषः शाखामृगेन्द्राणां सङ्ग्राममभिकाङ्क्षताम् ॥ ३९ ॥ एष पर्वतमध्यास्ते पारियात्रमनुत्तमम् । युद्धे दुष्प्रसहो नित्यं पनसो नाम यूथपः ॥ ४० ॥ एनं शतसहस्राणां शतार्धं पर्युपासते । यूथपा यूथपश्रेष्ठं येषां यूथानि भागशः ॥ ४१ ॥ यस्तु भीमां प्रवल्गन्तीं चमूं तिष्ठति शोभयन् । स्थितां तीरे समुद्रस्य द्वितीय इव सागरः ॥ ४२ ॥ एष दर्दरसङ्काशो विनतो नाम यूथपः । पिबंश्चरति पर्णासां नदीनामुत्तमां नदीम् ॥ ४३ ॥ षष्टिः शतसहस्राणि बलमस्य प्लवङ्गमाः ॥ ४४ ॥ त्वामाह्वयति युद्धाय क्रोधनो नाम यूथपः । विक्रान्ता बलवन्तश्च यथायूथानि भागशः ॥ ४५ ॥ यस्तु गैरिकवर्णाभं वपुः पुष्यति वानरः । अवमत्य सदा सर्वान् वानरान् बलदर्पितान् ॥ ४६ ॥

वा ॥ ४२ ॥ दर्दरो नाम गङ्गासमीपस्थः पर्वतः । पर्णासां पर्णासाख्यां नदीम् ॥ ४३ ॥ विनतसेनासङ्ख्यामाह–षष्टिरिति । षष्टिः शतसहस्राणि प्लवङ्गमाः अस्य विनतस्य बलं सेनेत्यर्थः ॥ ४४ ॥ एकेन क्रोधनमाह–त्वामिति । उत्तरार्धे अस्येत्यध्याहार्यम् । यथायूथानि यथायूथम् । अमभावश्छान्दसः । भागशः भागत्वेन स्थिताः वानराः विक्रान्ता बलवन्तश्चेति योजना ॥ ४५ ॥ शेषेण गवयं वर्णयति–यस्त्वित्यादिना । गैरिकं रक्तवर्णधातुविशेषः । ॥ ९० ॥
यस्तु मेघ इत्यारभ्य येषां यूथानि भागशः इत्यन्तं पनसाख्यवानरवर्णनम् ॥ ३८ ॥ शाखामृगेन्द्राणां मध्ये यस्य घोषो भेरीणां सन्नाद इव श्रूयत इति सम्बन्धः ॥ ३९ ॥ ४० ॥ पनमिति । येषां यूथपानां यूथानि भागशः प्रत्येकं वर्तन्ते तेऽर्धशतसहस्राणि शतार्धं सहस्राणि यूथपा एनं पनसं पर्युपासत इति सम्बन्धः ॥ ४१ ॥ यस्तु भीमामित्यादिसार्धश्लोक एकं वाक्यम् । पिबंश्चरतीत्यारभ्य यथायूथानि भागशः इत्यन्तं क्रोधनाख्यवानरवर्णनम् । वपुः पुष्यति पोषयति, युद्धदर्पावमि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

" धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः " इत्यमरः । तद्वर्ण इवाभा यस्येति विग्रहः । गैरिकवर्ण इवाभातीति गैरिकवर्णाभमिति वा । पुष्यति युद्धहर्षादभिवर्धयतीत्यर्थः ॥ ४६ ॥ ४७ ॥ उपसंहरति–एत इति । यूथपाः अङ्गदादयः । यूथपश्रेष्ठाः सुग्रीवादयः । एषां यूथपानां यूथानि भागशः पृथक् विद्यन्त इति शेषः ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षड्विंशः सर्गः ॥ २६ ॥

गवयो नाम तेजस्वी त्वां क्रोधादभिवर्तते । एनं शतसहस्राणि सप्ततिः पर्युपासते । एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ ४७ ॥ एते दुष्प्रसहा घोरा बलिनः कामरूपिणः । यूथपा यूथपश्रेष्ठा एषां यूथानि भागशः ॥ ४८ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षड्विंशः सर्गः ॥ २६ ॥

तांस्तु तेऽहं प्रवक्ष्यामि प्रेक्षमाणस्य यूथपान् । राघवार्थे पराक्रान्ता ये न रक्षन्ति जीवितम् ॥ १ ॥
स्निग्धा यस्य बहुव्यामा वाला लाङ्गूलमाश्रिताः । ताम्राः पीताः सिताः श्वेताः प्रकीर्णा घोरकर्मणः ॥ २ ॥
प्रगृहीताः प्रकाशन्ते सूर्यस्येव मरीचयः । पृथिव्यां चानुकृष्यन्ते हरो नामैष यूथपः ॥ ३ ॥

पुनरुक्तेभ्योऽप्युत्कृष्टान् प्रधानयूथपतीन् वक्तुं प्रतिजानीते-तांस्त्वित्यादि । ये राघवार्थे पराक्रान्ताः सन्तः जीवितं न रक्षन्ति तान् यूथपान् ते तुभ्यं प्रवक्ष्यामीत्यन्वयः ॥ १ ॥ द्वाभ्यां हरं वर्णयति–वाला इति । वालाः रोमाणि बहुव्यामाः बहुव्यामप्रमाणाः । व्यामो नाम प्रसारितबाहुद्वयप्रमाणम् । प्रगृहीताः उत्क्षिप्ताः । प्रकीर्णाः विरलाः सूर्यस्य मरीचय इव मेघेषु शक्रचापादिरूपेण प्रसृता रश्मय इव प्रकाशन्ते । कदाचित् पृथिव्यामनुकृष्यन्ते । एष

वर्धयतीति यावत् ॥ ४२--४८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षड्विंशः सर्गः ॥ २६ ॥ (अत्र सर्गच्छेदोऽपाङ्क्तो वृत्तभेदाभावादेकप्रकरणत्वाच्चेति कतकः ॥) तांस्त्विति । तेषां प्रसिद्धानां वानराणां मध्ये ये राघवार्थे जीवितं न रक्षन्ति तान् यूथपान् प्रेक्षमाणस्य ते प्रवक्ष्यामि ॥ १ ॥ बहुव्यामाः अतिदीर्घाः वालाः । सिताः श्लिष्टाः । प्रकीर्णाः विश्लिष्टाः ॥ २ ॥ प्रगृहीता उत्क्षिप्ताः । एष हरो नामेत्यन्वयः । हरो

For Private And Personal Use Only

यूथपो हरो नाम ॥ २ ॥ ३ ॥ यमित्यादिसार्धश्लोक एकान्वयः । यं हरम् । हरस्य हरिराजकिङ्करत्वेन तदीया अपि यूथपा हरिराजकिङ्करा एवेति न विरोधः ॥ ४ ॥ ऋक्षसेनां वर्णयति—नीलानित्यादि । अनिर्देश्यान् प्रत्येकं निर्देष्टुमशक्यान् । परं पारमिवोदधेः समुद्रस्यापरं तीरमिव स्थितामित्यर्थः । विषमेषु निम्नोन्नतप्रदेशेषु ॥ ५–७ ॥ पर्जन्यः वर्षदेवता ॥ ८ ॥ ९ ॥ यवीयान् कनिष्ठः, अयमिति शेषः । विशिष्टः अधिकः ॥ १० ॥ गुरुवर्ती गुरु

यं पृष्ठतोऽनुगच्छन्ति शतशोऽथ सहस्रशः । द्रुमानुद्यम्य सहसा लङ्कारोहणतत्पराः । यूथपा हरिराजस्य किङ्कराः समुपस्थिताः ॥ [एष कोटिसहस्रेण वानराणां महौजसाम् । आकांक्षते त्वां सङ्ग्रामे जेतुं परपुरंजय ।] ॥४॥ नीलानिव महामेघांस्तिष्ठतो यांस्तु पश्यसि ॥५॥ असिताञ्जनसङ्काशान् युद्धे सत्यपराक्रमान् । असङ्ख्येयाननिर्देश्यान् परं पारमिवोदधेः ॥ ६ ॥ पर्वतेषु च ये केचिद्विषमेषु नदीषु च । एते त्वामभिवर्तन्ते राजन्नृक्षाः सुदारुणाः ॥ ७ ॥ एषां मध्ये स्थितो राजन् भीमाक्षो भीमदर्शनः । पर्जन्य इव जीमूतैः समन्तात् परिवारितः ॥ ८ ॥ ऋक्षवन्तं गिरिश्रेष्ठमध्यास्ते नर्मदां पिबन् । सर्वर्क्षाणामधिपतिर्धूम्रो नामैष यूथपः ॥ ९ ॥ यवीयानस्य तु भ्राता पश्यैनं पर्वतोपमम् । भ्रात्रा समानो रूपेण विशिष्टस्तु पराक्रमैः ॥१०॥ स एष जाम्बवान्नाम महायूथपयूथपः । प्रक्रान्तो गुरुवर्ती च संप्रहारेष्वमर्षणः ॥ ११ ॥ एतेन साह्यं सुमहत् कृतं शक्रस्य धीमता । देवासुरे जाम्बवता लब्धाश्च बहवो वराः ॥१२॥ आरुह्य पर्वताग्रेभ्यो महाभ्रविपुलाः शिलाः । मुञ्चन्ति विपुलाकारा न मृत्योरुद्विजन्ति च ॥१३॥

शुश्रूषकः ॥११॥ रामानु०–संप्रहारेषु युद्धेषु । "संप्रहाराभिसंपातकलिसंस्फोटसंयुगाः" इत्यमरः ॥ ११ ॥ देवासुरे देवासुरयुद्धे ॥१२॥ जाम्बवतः सैनिकान् वर्णयति लाङ्गूलजातिः ॥ ३ ॥ ४ ॥ नीलानित्यादि ऋक्षास्सुदारुणा इत्यन्तमेकं वाक्यम् । महोदधेः परं पारमिव अनिर्देश्यान् नीलान् महामेघानिव तिष्ठतः असिताञ्जनसङ्काशान् यान् पश्यसि ये केचित्पर्वतेषु नदीषु च वर्तन्ते एतेषु दारुणा ऋक्षास्त्वामभिवर्तन्ते त्वदभिमुखं वर्तन्त इति सम्बन्धः ॥ ५–७ ॥ एषामित्यादि श्लोकद्वयमेकं वाक्यम् ॥ ८ ॥ ९ ॥ यवीयानस्येत्यारभ्य लब्धाश्च बहवो वरा इत्यन्तमेकं वाक्यम् । अस्य धूम्रस्य । यवीयान् कनिष्ठः । गुरुवर्ती गुरुशुश्रूषकः । सम्प्रहारेषु युद्धेषु । साह्यं साहाय्यम् ॥ १०–१२ ॥ अथ तत्सैन्यवर्णनम्–आरुह्येति । उद्विजन्ति बिभ्यति ॥ १३ ॥ स०–अस्य धूम्रस्य । यवीयान् कनिष्ठः । रूपेण आकारेण । विशिष्टः उत्तमः । एतेन जाम्बवन्त इव धूम्रस्यापि ब्रह्मजातत्वं ज्ञायते । बालकाण्डे अंशावतरणप्रस्तावे गुणज्येष्ठत्वाज्जाम्बवत एवोक्तिः । सौहार्दाद्भ्रातेव वा ॥ १० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्वाभ्याम्–आरुह्येत्यादि । पर्वताग्राणीत्यर्थात्सिद्धम् । मुञ्चन्ति च्यावयन्ति । नोद्विजन्ति न बिभ्यति । राक्षसानां पिशाचानां च सदृशा इत्यन्वयः ॥ १३ ॥ १४ ॥ द्वाभ्यां दम्भं वर्णयति–यं त्विति । अभिसंरब्धं कुपितम् । प्लवमानमिव सदा प्लुवमानामिव स्थितं प्रेक्षन्ते, आश्चर्येणेति शेषः । बलेन पर्युपास्ते बलेन प्रीणयतीत्यर्थः ॥१५॥१६॥ त्रिभिः सन्नादनं वर्णयति–यः स्थितमिति । यो गच्छन् योजने योजनदूरे स्थितं शैलं पार्श्वेन (सेवते) गच्छति,

राक्षसानां च सदृशाः पिशाचानां च लोमशाः । एतस्य सैन्या बहवो विचरन्त्यमितेजसः ॥ १४ ॥ यं त्वेनमभिसंरब्धं प्लवमानमिव स्थितम् । प्रेक्षन्ते वानराः सर्वे स्थिता यूथपयूथपम् ॥ १५ ॥ एष राजन् सहस्राक्षं पर्युपास्ते हरीश्वरः । बलेन बलसम्पन्नो दम्भो नामैष यूथपः ॥ १६ ॥ यः स्थितं योजने शैलं गच्छन् पार्श्वेन सेवते । ऊर्ध्वं तथैव कायेन गतः प्राप्नोति योजनम् ॥ १७ ॥ यस्मान्न परमं रूपं चतुष्पादेषु विद्यते । श्रुतः सन्नादनो नाम वानराणां पितामहः ॥ १८ ॥ येन युद्धं पुरा दत्तं रणे शक्रस्य धीमता । पराजयश्च न प्राप्तः सोऽयं यूथपयूथपः ॥ १९ ॥ यस्य विक्रममाणस्य शक्रस्येव पराक्रमः । एष गन्धर्वकन्यायामुत्पन्नः कृष्णवर्त्मनः ॥ २० ॥

अस्य गमनकाले एकपदप्रक्षेपदशायाम् एकयोजनपरिमितः पर्वतः पार्श्वस्थो भवति, योजनायतशरीर इत्यर्थः । कायेनोर्ध्वं गतः सन् योजनं प्राप्नोति, योजनोन्नतकाय इत्यर्थः । अत एव चतुष्पादेषु यस्मात् परमं परं रूपं शरीरं न विद्यते । शक्रस्य रणे शक्रस्यासुरैः सह युद्धे । येनासुरेभ्यो युद्धं दत्तं तदा पराजयश्चासुरेभ्यो न प्राप्तः सोऽयं सन्नादन इति श्रुतो नाम ॥१७–१९॥ कस्यायं पुत्र इत्यत्राह–यस्येति । विक्रममाणस्य पराक्रमं कुर्वतः । यस्य पराक्रमः शक्रस्येव, तत्पराक्रमसदृशपराक्रम इत्यर्थः ॥ २० ॥ रामानु०–यस्य विक्रममाणस्येत्यारभ्य स्वेनानीकेन मर्दितुमित्यन्तं कथनारूयवानरविषयम् ॥ २० ॥

लोमशाः अधिकरोमवन्तः ॥ १४ ॥ प्लवमानमिव स्थितं प्लवमानत्वेन वर्तमानम् । स्थिता यूथपयूथपा इति च पाठः ॥ १५ ॥ १६ ॥ यः सन्नादनाख्यो गच्छन् योजने स्थितं शैलं पार्श्वेन सेवते स्पृशति । अनेन योजनपरिमितमस्य स्थौल्यमित्युक्तं भवति । तथैव गतः गमनवेलायां कायेन ऊर्ध्वमुपरि योजनं प्राप्नोति स्पृशति, अनेन योजनोन्नतवानित्युक्तं भवति ॥ १७ ॥ १८ ॥ पुरा युद्धकाले ॥ १९ ॥ यस्य विक्रममाणस्य इत्यारभ्य स्वेनानीकेन मर्दितुमित्यन्तं कथनाख्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

किमर्थमुत्पादित इत्यत्राह–तदेत्यर्धम् । तदा प्रसिद्धे ॥ २१ ॥ क्रथनं वर्णयति सार्द्धैस्त्रिभिः–यस्येत्यादिना । यस्य गिरेः वैश्रवणः कुबेरो राजा । यो गिरिः जम्बूं जम्बुवृक्षम् उपनिषेवते, जम्बूयुक्त इत्यर्थः । यः ते भ्रातुः कुबेरस्य विहारसुखदः । तत्र पर्वते युद्धेष्वकत्थनः क्रथनो नामैष यूथपो वसतीति संबन्धः ॥ २२–२४ ॥ यो गङ्गामित्यादि सार्द्धश्लोकसप्तकं प्रमाथिविषयम् । हस्तिनां वानराणां च अन्योन्यं पूर्ववैरमनुस्मरन् यः गङ्गामनु

तदा दैवासुरे युद्धे साह्यार्थं त्रिदिवौकसाम् ॥ २१ ॥ यस्य वैश्रवणो राजा जम्बूमुपनिषेवते । यो राजा पर्वतेन्द्राणां बहुकिन्नरसेविनाम् ॥ २२ ॥ विहारसुखदो नित्यं भ्रातुस्ते राक्षसाधिप । तत्रैष वसति श्रीमान् बलवान् वानरर्षभः ॥२३॥ युद्धेष्वकत्थनो नित्यं क्रथनो नाम यूथपः । वृतः कोटिसहस्रेण हरीणां समुपस्थितः । एषैवाशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥२४॥ यो गङ्गामनु पर्येति त्रासयन् हस्तियूथपान् । हस्तिनां वानराणां च पूर्ववैरमनुस्मरन् ॥२५॥ एष यूथपतिर्नेता गच्छन् गिरिगुहाशयः । गजान् योधयते वन्यान् गिरींश्चैव महीरुहान् ॥ २६ ॥ हरीणां वाहिनीमुख्यो नदीं हैमवतीमनु । उशीरबीजमाश्रित्य पर्वतं मन्दरोपमम् ॥ २७ ॥

गङ्गासमीपे । " कर्मप्रवचनीययुक्ते द्वितीया " इति द्वितीया । हस्तियूथपान् त्रासयन् पर्येति परितश्चरति । अत्रेयं पौराणिकी कथा–पुरा किल शम्बसादनो नामासुरो गजरूपेण मुनीन् बाधमानस्तैर्मुनिभिश्चोदितेन केसरिणा हनुमत्पित्रा हतः । तत्सन्तुष्टैर्मुनिभिर्महापराक्रमो हनुमान् पुत्रस्ते भविष्यतीति केसरिणे वरो दत्तः । ततः प्रभृति हस्तिनां वानराणां च परस्परं वैरमभूदिति । गच्छन्नेव गमनकाल एव रिपूणां नाशयिता । गिरिगुहायां शेते वर्तत इति गिरिगुहाशयः । गजानिति । गजैर्वृक्षान् वृक्षैर्गजांश्च हन्तीत्यर्थः ॥ २५ ॥ २६ ॥ हैमवतीमनु गङ्गासमीपे स्थितम् उशीरबीजाख्यं

वानरवर्णनम् । कृष्णवर्त्मनः अग्नेः त्रिदिवौकसां साह्यार्थमुत्पन्न इत्यन्वयः ॥ २० ॥ २१ ॥ यस्येति । यस्य गिरेः वैश्रवणः कुबेरो राजा । यो गिरिः जम्बूमुपनिषेवते, जम्बूवृक्षयुक्त इत्यर्थः ॥२२॥ यो गिरिः ते भ्रातुः कुबेरस्य विहारसुखदः । तत्र पर्वते एष क्रथनो नाम वानरः वसतीति सम्बन्धः ॥२३॥२४॥ यो गङ्गामित्यारभ्य यत्रैतद्बहुलं रजः इत्यन्तं प्रमाथिवानरवर्णनम् । हस्तिनां वानराणां च पूर्ववैरमनुस्मरन्निति । पुरा किल सागरतीरे हस्त्याकारः शम्बसादनो नाम राक्षसः स मुनीनबाधत तैर्मुनिभिश्चोदितो हनुमत्पिता केसरी हस्तिरूपं तमसुरं हतवान् । तत आरभ्य करिणां वानराणां च विरोधस्समभूदिति पौराणिकी कथा ॥ २५ ॥ २६ ॥ नदीं हैमवतीमनु शीतलजलां गङ्गां प्राप्य स्थितमुशीरबीजाख्यं पर्वतमाश्रित्य रमत इति सम्बन्धः ॥ २७–२९ ॥ ॥ ९२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्वतमाश्रित्य रमत इति योजना । हरिवाहिनीमुख्यत्वेऽपि भिन्नजातीयत्वभ्रमव्युदासार्थं वानरश्रेष्ठ इत्युक्तम् ॥ २७ ॥ २८ ॥ रामानु०–"कर्मप्रवचनीययुक्ते द्वितीया" इति हैमवतीमिति द्वितीया ॥ २७ ॥ वीरस्य भावो वीर्यम्, उत्साह इत्यर्थः । विक्रमः परान्प्रत्यभिभवः । बलशालिनां वानराणामित्यर्थसिद्धम् । शतसहस्राणां सहस्रम् सहस्रलक्षमित्यर्थः । नेता नायकः ॥ २९ ॥ प्रमाथिनं वर्णयति–स एष इति । दुर्धरः दुर्धर्षः । प्रमाथी नाम

रमते वानरश्रेष्ठो दिवि शक्र इव स्वयम् । एवं शतसहस्राणां सहस्रमनुवर्तते ॥ २८ ॥ वीर्यविक्रमदृप्तानां नर्दतां बलशालिनाम् । स एष नेता चैतेषां वानराणां महात्मनाम् ॥ २९ ॥ स एष दुर्धरो राजन् प्रमाथी नाम यूथपः । वातेनेवोद्धतं मेघं यमेनमनुपश्यसि ॥ ३० ॥ अनीकमपि संरब्धं वानराणां तरस्विनाम् । उद्धूतमरुणाभासं पवनेन समन्ततः । विवर्तमानं बहुधा यत्रैतद्बहुलं रजः ॥ ३१ ॥ एतेऽसितमुखा घोरा गोलाङ्गूला महाबलाः । शतं शतसहस्राणि दृष्ट्वा वै सेतुबन्धनम् ॥ ३२ ॥ गोलाङ्गूलं महावेगं गवाक्षं नाम यूथपम् । परिवार्याभिवर्तन्ते लङ्कां मर्दितुमोजसा ॥ ३३ ॥ भ्रमराचरिता यत्र सर्वकामफलद्रुमाः । यं सूर्यस्तुल्यवर्णाभमनु पर्येति पर्वतम् ॥ ३४ ॥

प्रमाथिनामकः । वातेनोद्धतं मेघमिव यमेनमनुपश्यसि एष प्रमाथीति सम्बन्धः ॥ ३० ॥ यत्र अनीके । समन्ततः पवनेनोद्धूतम् अरुणाभासम् अरुणकान्ति बहुलम् एतद्रजः बहुधा विवर्तमानं भवति, संरब्धं तत् तरस्विनां वानराणामनीकमपि पश्यसि । तदप्यस्य प्रमाथिन इत्यर्थः ॥ ३१ ॥ गवाक्षमाह श्लोकद्वयेन–एत इति । असितमुखाः गोलाङ्गूलाः सेतुबन्धनं दृष्ट्वा उत्साहेन शतं शतसहस्राणि च सन्तः गवाक्षं नाम स्वयूथपतिं परिवार्य लङ्काम् ओजसा स्वतेजसा मर्दितुमभिवर्तन्ते । अत्र यूथपत्यपेक्षया यूथानां बलोत्साहाधिक्यं व्यज्यते ॥ ३२ ॥ ३३ ॥ अथ चतुर्भिः केसरिणं वर्णयति–भ्रमरेति । यत्र पर्वते । सर्वकामफलाः सर्वैः काम्यन्त इति सर्वकामाः सर्वाभीष्टार्थाः तान् फलन्तीति सर्वकामफलाः, ते च ते द्रुमाश्च

यत्रानीकेषु पवनेन उद्धूतं बहुलं रजो दृश्यते तदनीकं वातेनोद्धतं मेघमिव यमेनमनुपश्यसि स एष प्रमाथी नाम यूथप इत्यन्वयः ॥ ३० ॥ ३१ ॥ एत इत्यादि श्लोकद्वयमेकं वाक्यम् । शतसहस्राणि गोलाङ्गूलाः सेतुबन्धनं दृष्ट्वा गोलाङ्गूलं गवाक्षं नाम यूथपं परिवार्य लङ्कां मर्दितुमभिवर्तन्त इति सम्बन्धः । शतं शतसहस्राणि, शतलक्षमित्यर्थः । सेतुबन्धनं नलसमीपे तत्सहायतया स्थित्वा सेतुबन्धनकर्तारम् ॥ ३२ ॥ ३३ ॥ भ्रमराचरिता इत्यारभ्य केसरी नाम यूथप इत्यन्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वकामफलद्रुमाः । भ्रमरैः आचरिताः व्याप्ताः भवन्ति, अनेन वृक्षाणां सर्वापेक्षितप्रदत्वं सदा पुष्पितत्वं चोक्तम् । यं पर्वतं सूर्यः तुल्यवर्णाभं तुल्य प्रकारकान्तिकं यथा तथा अनु समीपे पर्येति सञ्चरति । दृश्यते हि सूर्यस्तत्सन्निधाने काञ्चनवर्णः ॥ ३४ ॥ ३५ ॥ यस्मिन्पर्वतसत्तमे सर्वकामफलाः सर्वैः काम्यमानफलाः । अनेन स्वादुफलत्वमुक्तम् । सदा फलसमन्विताः सर्वकालं फलयुक्ता इत्यर्थः । काञ्चनपर्वते मेरौ ॥ ३६ ॥ ३७ ॥ अथ शतबलि

यस्य भासा सदा भान्ति तद्वर्णा मृगपक्षिणः । यस्य प्रस्थं महात्मानो न त्यजन्ति महर्षयः ॥ ३५ ॥ सर्वकाम फला वृक्षाः सदा फलसमन्विताः । मधूनि च महार्हाणि यस्मिन् पर्वतसत्तमे ॥ ३६ ॥ तत्रैष रमते राजन् रम्ये काञ्चनपर्वते । मुख्यो वानरमुख्यानां केसरी नाम यूथपः ॥ ३७ ॥ षष्टिर्गिरिसहस्राणां रम्याः काञ्चनपर्वताः । तेषां मध्ये गिरिवरस्त्वमिवानघ रक्षसाम् ॥ ३८ ॥ तत्रैते कपिलाः श्वेतास्ताम्रास्या मधुपिङ्गलाः । निवसन्त्युत्तम गिरौ तीक्ष्णदंष्ट्रा नखायुधाः ॥ ३९ ॥ सिंहा इव चतुर्दंष्ट्रा व्याघ्रा इव दुरासदाः । सर्वे वैश्वानरसमा ज्वलिताशी विषोपमाः ॥ ४० ॥ सुदीर्घाञ्चितलाङ्गूला मत्तमातङ्गसन्निभाः । महापर्वतसङ्काशा महाजीमूतनिस्वनाः ॥ ४१ ॥

वानरसेनाश्लाघनपूर्वकं वर्णयति-षष्टिरित्यारभ्य हरिरित्यन्तेन । गिरिसहस्राणां षष्टिरस्ति । ते रम्याः काञ्चनपर्वता भवन्ति । गिरिवरः मेरुः । अस्ति ह्यस्तगिरेः पूर्वतश्चापरो मेरुः ॥ ३८ ॥ ३९ ॥ वैश्वानरसमाः वैश्वानरः अग्निः तद्वदुग्रा इत्यर्थः । ज्वलिताशीविषाः कुपितसर्पाः आशिषि दंष्ट्रायां विषं येषां ते आशीविषाः । " आशीरुरगदंष्ट्रायां प्रियवाक्याभिलाषयोः " इत्यमरः । पृषोदरादित्वात् सलोपः । तद्वत्कोपना इत्यर्थः ॥ ४० ॥ अञ्चित लाङ्गूलाः उदञ्चितलाङ्गूलाः । मत्तेत्यादिना महाकायत्वमुक्तम् । पर्वतसङ्काशा इत्यनेन दार्ढ्यमुक्तम् ॥ ४१ ॥

केसर्याख्यवानरवर्णनम् । यत्र यस्मिन् काञ्चनपर्वते । सर्वकामफलद्रुमः सर्वैः काम्यन्त इति सर्वकामानि फलानि येषां ते तथोक्ताः ते च ते द्रुमाश्च सर्वकामफलद्रुमाः । यं काञ्चनपर्वतम् । यस्य काञ्चनपर्वतस्य । यस्मिन् काञ्चनपर्वते । अस्ताद्रिसमीपवर्तिनि सावर्णिनिवासमेरौ ॥ ३४-३७ ॥ तमेव विशिनष्टि-षष्टिरिति । गिरि सहस्राणां षष्टिरस्ति ते काञ्चनपर्वताः तेषां मध्ये गिरिवरो मेरुरस्तीति सम्बन्धः ॥ ३८ ॥ मेरुस्थवानरान् वर्णयति-तत्रैत इत्यादिना ॥ ३९-४१ ॥

For Private And Personal Use Only

भीमभीमाः भीमप्रकाराः, प्रकारः सादृश्यम्, भीमसदृशाः ईषद्भीमा इत्यर्थः । "प्रकारे गुणवचनस्य" इति द्विर्भावः । तादृशगमनस्वराः ते वानराः । ते तव लङ्कां समीक्ष्य मर्दयन्तीव तस्थुः मर्दयन्त इव तिष्ठन्ति । आर्षो लिङ्गव्यत्ययः ॥ ४२ ॥ उपतिष्ठति उपतिष्ठते । एषैवेति सन्धिरार्षः । पौरुषे

वृत्तपिङ्गलरक्ताक्षा भीमभीमगतिस्वराः । मर्दयन्तीव ते सर्वे तस्थुर्लङ्कां समीक्ष्य ते ॥४२॥ एष चैषामधिपतिर्मध्ये तिष्ठति वीर्यवान् । जयार्थी नित्यमादित्यमुपतिष्ठति बुद्धिमान् ॥ ४३ ॥ नाम्ना पृथिव्यां विख्यातो राजन् शतवलीति यः । एषैवाऽऽशंसते लङ्कां स्वेनानीकेन मर्दितुम् ॥ ४४ ॥ विक्रान्तो बलवान् शूरः पौरुषे स्वे व्यवस्थितः । रामप्रियार्थं प्राणानां दयां न कुरुते हरिः ॥ ४५ ॥ गजो गवाक्षो गवयो नलो नीलश्च वानरः । एकैक एव यूथानां कोटीभिर्दशभिर्वृतः ॥ ४६ ॥ तथाऽन्ये वानरश्रेष्ठा विन्ध्यपर्वतवासिनः । न शक्यन्ते बहुत्वात्तु सङ्ख्यातुं लघुविक्रमाः ॥ ४७ ॥ सर्वे महाराज महाप्रभावाः सर्वे महाशैलनिकाशकायाः । सर्वे समर्थाः पृथिवीं क्षणेन कर्तुं प्रविध्वस्तविकीर्णशैलाम् ॥४८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तविंशः सर्गः ॥२७॥

सारणस्य वचः श्रुत्वा रावणं राक्षसाधिपम् । बलमादिश्य तत्सर्वं शुको वाक्यमथाब्रवीत् ॥ १ ॥

पराक्रमे । प्राणानां प्राणेषु ॥ ४३–४७ ॥ सर्व इति । प्रविध्वस्तविकीर्णशैलां प्रविध्वस्ताः चूर्णिताः विकीर्णाः विक्षिप्ताः शैलाः यस्याः सा तां तथा ॥ ४८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशः सर्गः ॥ २७ ॥

एवं सारणेनोक्तं श्रुत्वा शुकस्तेन कार्त्स्न्येनानुक्तेः स्वयं तत् सर्वं दर्शयत्यष्टाविंशे सर्गे—सारणस्येति । शुकः सारणस्य वचः श्रुत्वा तेन कार्त्स्न्येनानुक्तेः स्वयं तत्सर्वं बलम् आदिश्य अङ्गुल्या निर्दिश्य । रावणम् । अथ कार्त्स्न्येन अब्रवीत् । "मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ" इत्यमरः ।

ते वानराः । ते तव लङ्कां समीक्ष्य मर्दयन्तीव मर्दयन्त इव तस्थुरिति सम्बन्धः । आर्षो लिङ्गव्यत्ययः ॥ ४२–४८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तविंशः सर्गः ॥ २७ ॥ सारणस्येति । आदिश्य निर्दिश्य ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सविनयोक्तिद्योतनाय राक्षसाधिपमित्युक्तम् ॥ १ ॥ न्यग्रोधान् वटान् । गाङ्गेयान् गङ्गातटरुहान् । हैमवतान् हिमवत्पर्वतोद्भवान् । दैत्यदानवसङ्काशाः दैत्यदानवतुल्यबलाः ॥२॥३॥ शङ्खवृन्दादिस्वरूपमुत्तरत्र स्वयमेव वक्ष्यति । वृन्दशतादिसङ्ख्याः, सन्तीति शेषः ॥४ ॥ सुग्रीवसचिवाः सुग्रीवसहायाः "मन्त्री सहायः सचिवः" इत्यमरः । देवगन्धर्वैः देवेभ्यो गन्धर्वेभ्यश्चेत्यर्थः । उत्पन्नाः कामरूपिण इति । कामरूपित्वेन उत्पन्ना इत्यर्थः । पूर्वं कामरूपित्व

स्थितान् पश्यसि यानेतान् मत्तानिव महाद्विपान् । न्यग्रोधानिव गाङ्गेयान् सालान् हैमवतानिव ॥ २ ॥ एते दुष्प्रसहा राजन् बलिनः कामरूपिणः । दैत्यदानवसङ्काशा युद्धे देवपराक्रमाः ॥ ३ ॥ एषां कोटिसहस्राणि नव पञ्च च सप्त च । तथा शङ्खसहस्राणि तथा वृन्दशतानि च ॥ ४ ॥ एते सुग्रीवसचिवाः किष्किन्धानिलयाः सदा । हरयो देवगन्धर्वैरुत्पन्नाः कामरूपिणः ॥ ५ ॥ यौ तौ पश्यसि तिष्ठन्तौ कुमारौ देव रूपिणौ । मैन्दश्च द्विविदश्चोभौ ताभ्यां नास्ति समो युधि ॥ ६ ॥ ब्रह्मणा समनुज्ञातावमृतप्राशिनावुभौ । आशंसेते युधा लङ्कामेतौ मर्दितुमोजसा ॥७॥ [यावेतावेतयोः पार्श्वे स्थितौ पर्वतसन्निभौ । सुमुखोऽसुमुखश्चैव मृत्युपुत्रौ पितुः समौ । प्रेक्षन्तौ नगरीं लङ्कां कोटिभिर्दशभिर्वृतौ ॥] यं तु पश्यसि तिष्ठन्तं प्रभिन्नमिव कुञ्जरम् । यो बलात् क्षोभयेत् क्रुद्धः समुद्रमपि वानरः ॥ ८ ॥ एषोऽभिगन्ता लङ्काया वैदेह्यास्तव च प्रभो । एनं पश्य पुरा दृष्टं वानरं पुनरागतम् ॥ ९ ॥

मुक्तम् । तस्य इदानीमौत्पत्तिकत्वमुच्यत इति न पुनरुक्तिः ॥५॥ कुमारौ युवानौ । देवेति रावणं प्रति संबुद्धिः । रूपिणौ प्रशस्तरूपौ । प्रशंसायां मत्वर्थीय इनिप्रत्ययः । यौ पश्यसि तौ मैन्दश्च द्विविदश्चेत्युच्येते इत्यर्थः । युधि ताभ्यां समो नास्तीत्यत्र हेतुं दर्शयति–ब्रह्मणेति । समनुज्ञातौ सन्तौ अमृतप्राशिनावित्यर्थः ॥६॥७॥ हनुमन्तं वर्णयति–यं त्वित्यादिना । प्रभिन्नं मत्तम् । "प्रभिन्नो गर्जितो मत्तः" इत्यमरः ॥८॥ अभिगन्तेति । वैदेहीपक्षे अभिगमनम् ॥९४॥

गाङ्गेयान् गङ्गातटरुहान् ॥ २ ॥ ३ ॥ एषां कोटीति सुग्रीवसचिवसङ्ख्या । सर्वबलसङ्ख्या तु सर्गान्ते वक्ष्यति ॥ ४ ॥ ५ ॥ याविति । कुमारौ तरुणौ ॥ ६॥ ७॥ प्रभिन्नं मत्तम् ॥ ८ ॥ एष हनुमान् तव लङ्काया अभिगन्ता, वैदेह्या अभिगन्ता अन्वेषी ॥ ९ ॥ १० ॥

For Private And Personal Use Only

अन्वेषणम् । रावणपक्षे दर्शनम् ॥९॥ ज्येष्ठ इति । अत्र एष इत्यध्याहार्यम् । केसरिणः पुत्रः तस्य क्षेत्रजः पुत्रः ॥ १० ॥ बलरूपसमन्वितः प्रशस्त बलसमन्वितः । प्रशंसायां रूपप् प्रत्ययः । यथा सततगः सततग इव । सततगः वायुः ॥ ११ ॥ उद्यन्तमित्यादि । बालः बाल्यावस्थः । किलेत्यैतिह्ये । पिपासितः स्तन्यापेक्षः, क्षुधित इति यावत् । त्रियोजनसहस्रं त्रियोजनसहस्रपरिमाणम् । "द्विगोर्नित्यम्" इति प्रमाणप्रत्ययस्य लुक् । हनुमत्पितुः

ज्येष्ठः केसरिणः पुत्रो वातात्मज इति श्रुतः । हनुमानिति विख्यातो लङ्घितो येन सागरः॥ १०॥ कामरूपी हरिश्रेष्ठो बलरूपसमन्वितः । अनिवार्यगतिश्चैव यथा सततगः प्रभुः ॥ ११ ॥ उद्यन्तं भास्करं दृष्ट्वा बालः किल पिपासितः । त्रियोजनसहस्रं तु अध्वानमवतीर्य हि॥ १२॥ आदित्यमाहरिष्यामि न मे क्षुत् प्रतियास्यति । इति सञ्चिन्त्य मनसा पुरैष बलदर्पितः ॥ १३ ॥ अनाधृष्यतमं देवमपि देवर्षिदानवैः । अनासाद्यैव पतितो भास्करोदयने गिरौ ॥ १४ ॥ पतितस्य कपेरस्य हनुरेका शिलातले । किंचिद्भिन्ना दृढहनोर्हनुमानेष तेन वै॥ १५॥ सत्यमागमयोगेन ममैष विदितो हरिः । नास्य शक्यं बलं रूपं प्रभावो वाऽपि भाषितुम् ॥ १६ ॥ एष आशंसते लङ्कामेको मर्दितुमोजसा ॥ १७ ॥

केसरिणः कनकाचलवासित्वात्तस्य चात्युन्नतत्वादादित्यस्य तच्छिखरस्य च मध्यमाद्धा त्रिसहस्रयोजनपरिमित इत्युक्तम् । अत एव अवतीर्येत्युक्तम्, नतूत्पत्येति । यद्वा आदित्यस्य भूमेरुपरि लक्षयोजनान्तरत्वात् त्रियोजनसहस्रमित्येतदनेकसहस्रोपलक्षणम् ॥१२॥ आहरिष्यामि भक्षयिष्यामि । इति संचिन्त्य मनसा पुरैष बलदर्पित इत्यनन्तरं त्रियोजनसहस्रमित्यर्धं योज्यम् ॥ १३ ॥ देवं सूर्यम् । भास्कर उदयतेऽस्मिन्निति भास्करोदयनः तस्मिन् गिरौ । हनुः तालुप्रदेशः । अनासाद्येत्यत्र तत्तेजसेत्युपस्कार्यम् । "तेजसा तस्य निर्धूतः" इति किष्किन्धाकाण्डोक्तेः । यद्यप्युत्तरकाण्डे इन्द्रवज्रेण पतनमुक्तम् तथापि तदपि हेत्वन्तरमिति ज्ञेयम् ॥ १४ ॥ १५ ॥ कथमियं कथा त्वया विदितेत्यत्राह—सत्यमिति । आगमः आप्तवाक्यम्, तदेव

सततगः वायुः ॥ ११ ॥ पिपासितः स्तन्यपानापेक्षी, क्षुधित इति यावत् । त्रियोजनसहस्रमादित्यस्य भूमेरुपरि लक्षयोजनान्तरत्वात्त्रियोजनसहस्रमित्येतदनेकयोजनसहस्रोपलक्षणम् ॥ १२ ॥ प्रतियास्यति, भूलोकवर्तिफलैरिति शेषः ॥ १३ ॥ अनासाद्य, भास्करमिति शेषः । भास्करोदयने इति बहुव्रीहिः ॥१४॥१५॥ सत्यमिति । आगमयोगेन आगमः आप्तोपदेशः स एव योग उपायः, आप्तवाक्यश्रवणेनेत्यर्थः ॥ १६ ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योग उपायः तन । यद्वा आप्तवाक्यश्रवणेन । मम मया । रूपं वपुः । भाषितुं न शक्यम्, कामरूपदर्शनादिति भावः ॥ १६ ॥ १७ ॥ अथ रामं वर्णयति-यश्चैष इत्यादिना । अनन्तरः अन्तरम् अवकाशः तद्रहितः स्कन्धारूढत्वेन पूर्वोक्तहनुमतोऽत्यन्तसन्निहित इत्यर्थः । शूरः हनुमदारूढत्वेन प्रकटितशौर्यः । श्यामः कनकमयशिखरारूढकालाम्बुदकमनीयविग्रहः । पद्मनिभेक्षणः दिव्यविग्रहमहातटाकस्थविकासितकमललोभनीय

यश्चैषोऽनन्तरः शूरः श्यामः पद्मनिभेक्षणः । इक्ष्वाकूणामतिरथो लोके विख्यातपौरुषः ॥ १८ ॥ यस्मिन्न चलते धर्मो यो धर्मं नातिवर्तते । यो ब्राह्ममस्त्रं वेदांश्च वेद वेदविदां वरः ॥ १९ ॥ यो भिन्द्याद्गगनं बाणैः पर्वतानपि दारयेत् । यस्य मृत्योरिव क्रोधः शक्रस्येव पराक्रमः ॥ २० ॥ यस्य भार्या जनस्थानात् सीता चापहृता त्वया । स एष रामस्त्वां योद्धुं राजन् समभिवर्तते ॥ २१ ॥ यस्यैष दक्षिणे पार्श्वे शुद्धजाम्बूनदप्रभः । विशालवक्षास्ताम्राक्षो नीलकुञ्चितमूर्धजः ॥ २२ ॥

विलोचनः । अनरण्यादिवदयं न मन्तव्यः । किन्त्विक्ष्वाकूणां मध्ये अतिरथः अतिशयितरथः, अपराजितरथ इत्यर्थः । अत्र न वयमेव प्रमाणम्, लोके विख्यातपौरुषः खरवधादिना ख्यातं भवद्भिरवालिवधेन विशेषेण ख्यातं पौरुषं यस्य तथोक्तः ॥१८॥ न केवलं पौरुषम्, धर्मोऽप्यस्यैव स्वमित्याह-यस्मिन्निति । यस्मिन् धर्मो न चलति जाबालिप्रभृतिभिराकुलितोऽप्यप्रकम्पितः । यो धर्मं नातिवर्तते भरतसीतादिभिः कृतेऽपि प्रतिबन्धे पितृवचनमुनिप्रतिज्ञाधर्मं नातिवर्तते । खरयुद्धेऽपसर्पणं बाणपातावकाशलाभार्थम् । छद्मना वालिवधस्त्वन्यथानुपपत्त्या अवश्यमाश्रितविषयप्रतिज्ञाया निर्वोढव्यतया च । न केवलं पौरुषधर्मौ, अस्त्रबलं चास्यैवेत्याह-य इति । ब्राह्ममस्त्रं ब्रह्मास्त्रमन्त्रं वेदांश्च वेद जानाति । ब्रह्मास्त्रमन्त्रस्य वेदान्तर्गतत्वेऽपि प्राधान्यात् पृथगुक्तिः । वेदविदां वेदार्थविदां वरः उपदेष्टृभ्यो वसिष्ठादिभ्योऽप्युत्कृष्टः । ॥ १९ ॥ उक्तं पौरुषमेव प्रपञ्चयति-यो भिन्द्यादित्यादि । गगनं गगनस्थविमानादि । आदिशब्देन पातालादिकमुच्यते ॥२० ॥ संप्रति कोपोद्भवे मूलमाह-यस्य भार्येति ॥ २१॥ अथ लक्ष्मणं वर्णयति-यस्यैष

रामं वर्णयति-यस्यैष इति । यस्य दर्शितस्य हनुमतः । अनन्तरः समीपवर्ती ॥१८॥१९॥ गगनं बाणैर्भिन्द्यात, सर्वदुष्करमपि तस्य सुकरमिति तात्पर्यम्॥२०-२५॥

For Private And Personal Use Only

इत्यादिना । दक्षिणे, रामस्येति शेषः । शुद्धजाम्बूनदप्रभः स्वर्णवर्णः । ताम्राक्षः त्वद्विषयकोपेनेति भावः ॥ २२ ॥ सर्वेति । शास्त्रशब्दो नीतिशास्त्रव्यतिरिक्तपरः ॥ २३ ॥ प्राणो बहिश्चर इत्यनेन प्राणसंरक्षकत्वमुच्यते ॥ २४ ॥ २५ ॥ यस्त्विति । पक्षं पार्श्वम् । रक्षोगणेति । चतुर्णामेव रक्षसां गणतुल्यविक्रमत्वात्तथोक्तम् । राजा, त्वद्राज्यस्येति शेषः । अत्र हीति गायत्र्याः षोडशाक्षरम् ॥ २६ ॥ राजत्वं कुत इत्यत्राह–

एषोऽस्य लक्ष्मणो नाम भ्राता प्राणसमः प्रियः । नये युद्धे च कुशलः सर्वशास्त्रविशारदः ॥ २३ ॥ अमर्षी दुर्जयो जेता विक्रान्तो बुद्धिमान् बली । रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः ॥ २४ ॥ न ह्येष राघवस्यार्थे जीवितं परिरक्षति । एषैवाशंसते युद्धे निहन्तुं सर्वराक्षसान् ॥ २५ ॥ यस्तु सव्यमसौ पक्षं रामस्याश्रित्य तिष्ठति । रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः ॥ २६ ॥ श्रीमता राजराजेन लङ्कायामभिषेचितः । त्वामेव प्रतिसंरब्धो युद्धायैषोऽभिवर्तते ॥ २७ ॥ यं तु पश्यसि तिष्ठन्तं मध्ये गिरिमिवाचलम् । सर्वशाखामृगेन्द्राणां भर्तारमपराजितम् ॥ २८ ॥ तेजसा यशसा बुद्ध्या ज्ञानेनाभिजनेन च । यः कपीनतिबभ्राज हिमवानिव पर्वतान् ॥ २९ ॥ किष्किन्धां यः समध्यास्ते गुहां सगहनद्रुमाम् । दुर्गां पर्वतदुर्गस्थां प्रधानैः सह यूथपैः ॥ ३० ॥ यस्यैषा काञ्चनी माला शोभते शतपुष्करा । कान्ता देवमनुष्याणां यस्यां लक्ष्मीः प्रतिष्ठिता ॥ ३१ ॥

श्रीमतेति । श्रीमता अवाप्तसमस्तकामत्वेन लङ्काराज्यानभिलाषिणेत्यर्थः । राजराजेन विभीषणादिराजत्वानिर्वाहे स्वस्य राजराजत्वं न निर्वहेदिति मन्त्रानेन । लङ्कायां निमित्ते । लङ्कायां राजेति वाऽन्वयः ॥ २७ ॥ अथ सुग्रीवं वर्णयति–यं त्वित्यादि । मध्ये रामविभीषणयोर्मध्ये । अचलं निश्चलम् ॥२८॥ बुद्ध्या ऊहापोहरूपज्ञानेन । ज्ञानेन शास्त्रजन्यज्ञानेन । अभिजनेन कुलेन । अतिबभ्राज आतिशय्य बभ्राज ॥ २९ ॥ गहनं वनम् । दुर्गां प्राकारादिना दुर्गमाम् । पर्वतदुर्गस्थां पर्वतरूपदुर्गे स्थिताम् ॥३०॥ शतपुष्करा शतपद्मा । कान्ता काम्यमाना । लक्ष्मीः वीरलक्ष्मीः । तद्धारणे कदाचिदपि हीति गायत्र्याः षोडशाक्षरं रक्षोगणपरिक्षिप्त इत्यस्य श्लोकस्य एकादशाक्षरेण 'हि' इत्यनेन संगृह्णाति । राक्षोगणपरिक्षिप्तः गणशब्देन चत्वार एवोच्यन्ते । परिक्षिप्तः व्याप्तः ॥२६॥ राजराजेन श्रीरामेण ॥२७॥ सुग्रीवं वर्णयति–यं त्विति ॥२८॥ अतिबभ्राज अतिक्रम्यातिशयेन बभ्राजेत्यर्थः ॥२९॥३०॥ पुष्करं पद्मम् ॥ ३१॥३२॥

For Private And Personal Use Only

 पराजयो न भवतीति सदा वाली तां वहति स्मेति प्रसिद्धिः । तद्धारणादेव हि रामस्तदनभिमुख एव वालिनं हतवान्॥३१॥ प्रतिपादितः प्रापितः॥३२॥
उक्तानुक्तसकलवानरसङ्ख्यां वक्तुं प्रथमतः सङ्ख्यामेव दर्शयति-शतमित्यादिना । शतपर्यन्तसङ्ख्यायाः स्फुटत्वात्तदूर्ध्वसङ्ख्या अत्र सङ्कीर्त्यन्ते ।

एतां च मालां तारां च कपिराज्यं च शाश्वतम् । सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः ॥ ३२ ॥ शतं शतसहस्राणां कोटिमाहुर्मनीषिणः । शतं कोटिसहस्राणां शङ्ख इत्यभिधीयते ॥ ३३ ॥ शतं शङ्खसहस्राणां महाशङ्ख इति स्मृतः । महाशङ्खसहस्राणां शतं वृन्दमिति स्मृतम् ॥ ३४ ॥ शतं वृन्दसहस्राणां महावृन्दमिति स्मृतम् । महावृन्दसहस्राणां शतं पद्ममिति स्मृतम् ॥ ३५ ॥ शतं पद्मसहस्राणां महापद्ममिति स्मृतम् । महापद्म सहस्राणां शतं खर्वमिहोच्यते ॥ ३६ ॥ शतं खर्वसहस्राणां महाखर्वमिति स्मृतम् । महाखर्वसहस्राणां समुद्र मभिधीयते ॥ ३७ ॥ शतं समुद्रसाहस्रमोघ इत्यभिधीयते । शतमोघसहस्राणां महौघ इति विश्रुतः ॥ ३८ ॥ एवं कोटिसहस्रेण शङ्खानां च शतेन च । महाशङ्खसहस्रेण तथा वृन्दशतेन च ॥ ३९ ॥ महावृन्दसहस्रेण तथा पद्म शतेन च । महापद्मसहस्रेण तथा खर्वशतेन च ॥ ४० ॥ समुद्रेण शतेनैव महौघेन तथैव च । एष कोटिमहौघेन समुद्रसदृशेन च ॥ ४१ ॥ विभीषणेन सचिवै राक्षसैः परिवारितः । सुग्रीवो वानरेन्द्रस्त्वां युद्धार्थमभि वर्तते ॥४२॥ महाबलवृतो नित्यं महाबलपराक्रमः ॥ ४३ ॥

शतसहस्राणां लक्षाणां शतं कोटिरित्याहुः ॥ ३३-३८ ॥ एवं कोटिसहस्रेणेत्याद्यवान्तरसङ्ख्याभेदकीर्तनमवान्तरसेनाप्रतिभेदात् । समुद्रसदृशेन सागरसदृशेन । विभीषणेनेति । सचिवैः राक्षसैरुपलक्षितेन विभीषणेन परिवारितः सुग्रीवः त्वामभि त्वां प्रति युद्धार्थं वर्तते ॥ ३९-४३ ॥ रामानु०-एष इति । समुद्रसदृशेन सागरवदपरिच्छेद्येनेत्यर्थः ॥ ४१ ॥

अथ सर्वबलसङ्ख्यां दर्शयितुं सङ्ख्यास्वरूपं दर्शयति-शतमिति ॥ ३३-३८ ॥ अथ बलसङ्ख्यामाह-एवं कोटीति ॥ ३९-४३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इमामिति । प्रज्वलितग्रहोपमां क्रूरग्रहोपमाम् । यथेति । यथा ते जयो न स्यात् प्रत्युत परैः पराजय एव स्यात् तथा यत्नः क्रियतामिति व्यज्यते ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशः सर्गः ॥ २८ ॥

इमां महाराज समीक्ष्य वाहिनीमुपस्थितां प्रज्वलितग्रहोपमाम् । ततः प्रयत्नः परमो विधीयतां यथा जयः स्यान्न परैः पराजयः ॥ ४४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टाविंशः सर्गः ॥ २८ ॥

शुकेन तु समाख्यातांस्तान् दृष्ट्वा हरियूथपान् । समीपस्थं च रामस्य भ्रातरं स्वं विभीषणम् ॥ १ ॥ लक्ष्मणं च महावीर्यं भुजं रामस्य दक्षिणम् । सर्ववानरराजं च सुग्रीवं भीमविक्रमम् ॥ २ ॥ [गजं गवाक्षं गवयं मैन्दं द्विविदमेव च । अङ्गदं चैव बलिनं वज्रहस्तात्मजात्मजम् । हनूमन्तं च विक्रान्तं जाम्बवन्तं च दुर्जयम् । सुषेणं कुमुदं नीलं नलं च प्लवगर्षभम् ॥] किंचिदाविग्नहृदयो जातक्रोधश्च रावणः । भर्त्सयामास तौ वीरौ कथान्ते शुकसारणौ ॥ ३ ॥ अधोमुखौ तौ प्रणतावब्रवीच्छुकसारणौ । रोषगद्गदया वाचा संरब्धः परुषं वचः ॥ ४ ॥ न तावत् सदृशं नाम सचिवैरुपजीविभिः । विप्रियं नृपतेर्वक्तुं निग्रहप्रग्रहे प्रभोः ॥ ५ ॥

अथ रावणेन चारप्रेषणादि प्रतिपाद्यत एकोनत्रिंशे–शुकेनेत्यादिश्लोकत्रयम् । सर्ववानरराजं चेत्यत्र चकारो हनुमदादिसमुच्चयार्थः । आविग्नहृदयः भीतहृदयः । तथापि जातक्रोधः परस्तवाकर्णनेन कुपित इत्यर्थः । कथान्ते वचनान्ते ॥ १–३ ॥ रोषगद्गदया कोपस्खलितया । संरब्धः कुपितः ॥४॥ न तावदिति । तावत् प्रथमतः । निग्रहप्रग्रहे निग्रहानुग्रहयोः । प्रभोः शक्तस्य । नृपतेः विप्रियं वक्तुं न सदृशं नाम । नामेति नीतिशास्त्रप्रसिद्धिः ॥ ५ ॥

प्रज्वलितग्रहोपमां प्रज्वलितग्रहज्वालोपमाम् ॥४४॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टाविंशः सर्गः ॥२८॥

॥१॥२॥ कथान्ते वृत्तान्तश्रवणसमाप्तिसमये । भर्त्सयामास स्वकीयभीताकारगोपनार्थोऽयं व्यापारः ॥३॥ अधोमुखौ, भर्त्सनेनेति शेषः ॥४॥ प्रग्रहे अनुग्रहे ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विप्रियपदोक्तं विशदयति–रिपूणामिति । अभिवर्तताम् अभिवर्तमानानाम् । अप्रस्तवे अनवसरे । स्तवं वक्तुं सदृशं नाम सदृशं किमु ? युद्धारम्भसमयो हि परस्तुत्यनर्ह इति भावः ॥ ६ ॥ आचार्या इति । यद्यस्मात् राजशास्त्राणां सारं प्रतिपाद्यसारभूतम् अनुजीव्यम् अनुजीविकृत्यम् । न गृह्यते न ज्ञायते । अतः वां युवाभ्याम् । गुरवः महान्तः । वृद्धाः ज्ञानवयःशीलसम्पन्नाः । आचार्याः नीतिशास्त्रोपदेष्टारः । वृथा पर्युपासिताः,

रिपूणां प्रतिकूलानां युद्धार्थमभिवर्तताम् । उभाभ्यां सदृशं नाम वक्तुमप्रस्तवे स्तवम् ॥ ६ ॥ आचार्या गुरवो वृद्धा वृथा वां पर्युपासिताः । सारं यद्राजशास्त्राणामनुजीव्यं न गृह्यते ॥ गृहीतो वा न विज्ञातो भारो ज्ञानस्य वोह्यते ॥ ७ ॥ ईदृशैः सचिवैर्युक्तो मूर्खैर्दिष्ट्या धराम्यहम् ॥ ८ ॥

तदुपासनफलादर्शनान्निरर्थकमाराधिता इत्यर्थः । ननु चिरोपासितगुरोरज्ञानं न साम्प्रतम्, तत्राह गृहीतो वेति । गृहीतो वाऽर्थः । न विज्ञातः न विशेषेण ज्ञातः, विस्मृत इत्यर्थः । तर्हि कथं ज्ञातृत्वप्रवाद इत्यत्राह भार इति । ज्ञानस्य भारः उह्यते वा । जातमपि ज्ञानं नानुष्ठानपर्यवसायीत्यर्थः । यद्वा ज्ञानस्य भार उह्यते । ज्ञानभारभरणाभिमान एव क्रियते न तु तत्कार्यमित्यर्थः ॥ ७ ॥ आवयोरज्ञत्वे कथमेतावत्पर्यन्तमस्मन्मत्यनुसारेण तव राज्यभरणम् ? तत्राह–ईदृशैरिति । ईदृशैः एवं नीतिशास्त्रलेशानभिज्ञैरित्यर्थः । धरामि, राज्यमिति शेषः । " धृञ् धारणे " इति

अप्रस्तवे स्तुत्यनर्हकाले । सदृशं नाम सदृशं किमु ? अभिवर्तताम् अभितो वर्तमानानाम् ॥ ६ ॥ यद्यस्मात् राजशास्त्राणां सारं सारभूतम् अनुजीव्यम् अनुजीविकर्म । न गृह्यते न ज्ञायते, अत आचार्यादयो वां युवाभ्याम् वृथा पर्युपासिताः तदुपासनफलादर्शनान्निरर्थकमाराधिताः इत्यर्थः । आचार्या उपनयनपूर्वकं साङ्गवेदाध्यापकाः । गुरवः पित्रादयः । वृद्धाः ज्ञानवयोवृद्धाः । एतच्छास्त्रधारणं भारायैव कल्पत इत्याह गृहीत इति । गृहीतो वा अभ्यस्तोऽपि न विज्ञातः औचित्यापर्यालोचनया सम्यङ्न चिन्तितः । ज्ञानस्य ज्ञानसाधनस्य शास्त्रस्य । भारो वा भार एव । उह्यत इति भारशब्दावृत्त्या योजनीयम् ॥ ७ ॥ धरामि,

स०–**रिपूणां** शत्रूणाम् । ननु " रिपोरपि गुणा वाच्याः " इत्याद्युक्तेस्तत्स्तुतिर्युक्तेत्यतो वक्ति–**प्रतिकूलाना**मिति । विरुद्धाचरणवतामित्यर्थः । स्तुतिस्तु अप्रतिकूलशत्रुजातीयविषयेति भावः । तत्राह–**युद्धार्थे**मिति । अप्रस्तवे तद्विषयकप्रश्नाभावे । स्तवं गुणकीर्तनम् । वक्तुं सदृशं नाम सदृशं किल काकुः । यद्वा उभाभ्यामेवाप्रस्तवे स्तवं वक्तुं सदृशं नाम नान्येषामिति वा । स्तवशब्दार्थीभूतगुणकीर्तनस्य नपुंसकविवक्षया " अजानता महिमानं तवेदं ' उदीचामातः स्थाने यकपूर्वायाः ' ' मातुरुत्सङ्ख्यासंभद्रपूर्वायाः " इत्यादिवच्च स्तवमित्युक्तिस्सम्भवतीति मन्तव्यमिति केचित् । वस्तुतस्तु " सम्बन्धमनुवर्तिष्यते " इति माष्यात् लिङ्गानामतन्त्रत्वाद्वा ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भौवादिको धातुः। धरामि जीवामीति वा ॥ ८ ॥ मां परुषं वचो वक्तुं युवयोर्मृत्योः सकाशात् भयं नास्ति किन्नु ? वक्तुम्, उद्यतयोर्युवयोरिति शेष इत्यप्याहुः। परुषोक्तिमात्रे कुतो मृत्युरित्यत्राह—यस्येति। शासतो मे जिह्वैव शुभाशुभं प्रयच्छति। शासने प्रवृत्तस्य मे जिह्वाचलनमेव मृत्युं श्रेयो वा प्रयच्छतीत्यर्थः ॥ ९॥ राजदोषः राजकोपः। दहनस्पृष्टवनपादपस्थितिसम्भवादप्यसम्भाविता राजदोषस्पृष्टजनस्थितिरिति भावः। तिष्ठन्ते

किन्नु मृत्योर्भयं नास्ति वक्तुं मां परुषं वचः। यस्य मे शासतो जिह्वा प्रयच्छति शुभाशुभम् ॥ ९॥ अप्येव दहनं स्पृष्ट्वा वने तिष्ठन्ति पादपाः। राजदोषपरामृष्टास्तिष्ठन्ते नापराधिनः ॥ १० ॥ हन्यामहं त्विमौ पापौ शत्रुपक्ष प्रशंसकौ। यदि पूर्वोपकारैस्तु न क्रोधो मृदुतां व्रजेत् ॥११॥ अपध्वंसत गच्छध्वं सन्निकर्षादितो मम। नहि वां हन्तुमिच्छामि स्मराम्युपकृतानि वाम् ॥ १२ ॥ हतावेव कृतघ्नौ तौ मयि स्नेहपराङ्मुखौ ॥ १३ ॥ एवमुक्तौ तु सव्रीडौ तावुभौ शुकसारणौ। रावणं जयशब्देन प्रतिनन्द्याभिनिस्सृतौ ॥ १४॥ अब्रवीत्तु दशग्रीवः समीपस्थं महोदरम्। उपस्थापय मे शीघ्रं चारान्नीतिविशारदान्। महोदरस्तथोक्तस्तु शीघ्रमाज्ञापयच्चरान् ॥ १५ ॥ ततश्चाराः संत्वरिताः प्राप्ताः पार्थिवशासनात्। उपस्थिताः प्राञ्जलयो वर्धयित्वा जयाशिषा ॥ १६ ॥ तानब्रवीत्ततो वाक्यं रावणो राक्षसाधिपः। चारान् प्रत्यायितान् शूरान् भक्तान् विगतसाध्वसान् ॥ १७ ॥

तिष्ठन्ति ॥ १० ॥ स्वमनः प्रत्याह- हन्यामिति ॥ ११ ॥ अपध्वंसत स्थानात् प्रच्यवध्वम्। परस्मैपदं बहुवचनं चार्षम्। गच्छध्वं गच्छत। सन्निकर्षात् दृष्टिविषयात् ॥ १२ ॥ हतावित्यर्धम्। कृतघ्नत्वस्नेहपराङ्मुखत्वे एव तयोर्वध इति भावः ॥ १३॥ प्रतिनन्द्य प्रशस्य। अभिनिस्सृतौ निर्गतौ ॥ १४ ॥ अब्रवीदिति। चारानुपस्थापयेत्यब्रवीदित्यन्वयः ॥ १५ ॥ १६ ॥ तानिति। प्रत्यय एव प्रत्यायः तं प्राप्ताः प्रत्यायिताः तान्, विश्वसनीयानित्यर्थः। राज्यमिति शेषः। दिष्ट्या जीवामीति वा ॥ ८ ॥ किस्विति। वक्तुम्, उद्यतयोः युवयोरिति शेषः ॥ ९ ॥ अपीति। राजदोषपरामृष्टाः राजक्रोधविषयी भूताः। तिष्ठन्ते तिष्ठन्ति ॥ १० ॥ पूर्वोपकारैः युद्धादौ कृतैः मे क्रोधो मृदुतां न व्रजेद्यदि तदा इमौ पापौ हन्यामिति सम्बन्धः ॥ ११ ॥ अपध्वंसत अधिकारात् भ्रश्यत। परस्मैपदबहुवचनप्रयोगश्छान्दसः ॥ १२ ॥ हतावेवेति। कृतघ्नत्वस्नेहपराङ्मुखत्वे एव युवयोर्वध इत्यर्थः ॥१३॥ प्रतिनन्द्याभिनिस्सृतौ। अयमेव तयोः राक्षसत्वप्रापकशापस्यान्त इत्यन्यत्र स्पष्टम् ॥ १४-१६ ॥ प्रत्यायितान् प्रत्ययो विश्वासः प्राप्तप्रत्ययान्, विश्वसनीयानित्यर्थः ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विगतसाध्वसान् विगतशत्रुभयान् ॥ १७ ॥ इत इति । व्यवसायं कर्तव्यनिश्चयम् । परीक्षथ परीक्षध्वम् । शिथिलव्यवसायश्चेदमुं भीषयाम इति भावः । अस्य रामस्य मन्त्रिषु ये अभ्यन्तराः अन्तरङ्गभूता इत्यर्थः । तेन रामेण प्रीत्या सङ्गताः, मित्रभूता इत्यर्थः । तानपि परीक्षध्वम् । तच्छैथिल्ये तान् भेत्स्याम इत्याशयः ॥१८॥ कथं स्वपिति किमेकः स्वपिति उत जाग्रद्भिरनेकैरावृतः स्वपिति ? आद्ये सुप्ते युद्धं प्रवर्तयिष्याम इति हृदयम् । कथं जागर्ति किं चिन्ताकुलः उतानाकुल इत्यर्थः । आद्ये व्याक्षिप्तं प्रहरिष्यामीत्याकूतम् । किमन्यच्च करिष्यति किं कञ्चित्कालं विलम्ब्य नगरमुपरोत्स्यति

इतो गच्छत रामस्य व्यवसायं परीक्षथ । मन्त्रिष्वभ्यन्तरा येऽस्य प्रीत्या तेन समागताः ॥ १८ ॥ कथं स्वपिति जागर्ति किमन्यच्च करिष्यति । विज्ञाय निपुणं सर्वमागन्तव्यमशेषतः ॥ १९ ॥ चारेण विदितः शत्रुः पण्डितैर्वसुधाधिपैः । युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥ २० ॥ चारास्तु ते तथेत्युक्त्वा प्रहृष्टा राक्षसेश्वरम् । शार्दूलमग्रतः कृत्वा ततश्चक्रुः प्रदक्षिणम् ॥ २१ ॥ ततस्ते तं महात्मानं चारा राक्षससत्तमम् । कृत्वा प्रदक्षिणं जग्मुर्यत्र रामः सलक्ष्मणः ॥ २२ ॥ ते सुवेलस्य शैलस्य समीपे रामलक्ष्मणौ । प्रच्छन्ना ददृशुर्गत्वा ससुग्रीवविभीषणौ ॥ २३ ॥ प्रेक्षमाणाश्चमूं तां च बभूवुर्भयविक्लवाः ॥ २४ ॥ ते तु धर्मात्मना दृष्टा राक्षसेन्द्रेण राक्षसाः ॥ २५ ॥ विभीषणेन तत्रस्था निगृहीता यदृच्छया । शार्दूलो ग्राहितस्त्वेकः पापोऽयमिति राक्षसः ॥ २६ ॥

उत सद्य इति । आद्ये क्रमेण वञ्चयिष्यामीति तात्पर्यम् । निपुणं प्रच्छन्नमिति यावत् । क्रियाविशेषणमिदम् । सर्वम् उक्तं स्वापादिकम् अशेषतः सर्वप्रकारेण विज्ञायागन्तव्यम् । अशेषतः अशेषैश्चारैरिति वाऽर्थः । अशेषत इत्युत्तरशेषो वा ॥ १९ ॥ उक्तमाशयं विवृणोति—चारेणेति । पण्डितैः निपुणैः वसुधाधिपैः । चारेण चारद्वारेण । अशेषतो विदितः शत्रुः युद्धे स्वल्पेन यत्नेन समासाद्य निरस्यते ॥ २० ॥ चाराः शार्दूलमग्रतः कृत्वा प्रधानीकृत्य । राक्षसेश्वरं रावणम् । प्रदक्षिणं चक्रुः ॥ २१ ॥ कृत्वा प्रदक्षिणमित्यनुवादो मध्ये विलम्बाभावद्योतनार्थम् ॥ २२ ॥ प्रच्छन्नाः वेषान्तरधारिणः ॥ २३ ॥ भयविक्लवाः भयेन दीनाः ॥ २४ ॥ धर्मात्मना राक्षसेन्द्रेण, विभीषणेनेत्यर्थः ॥ २५ ॥ निगृहीताः तर्जिता इत्यर्थः । मन्त्रेषु विचारेषु अभ्यन्तराः परमान्तरङ्गाः मन्त्रिणः ॥ १८-२५ ॥ शार्दूलः प्रधानचारो गृहीतः । एको ग्राहितः इत्यत्र हेतुः पापोऽयमिति । अतिदुष्ट इत्यर्थः ॥२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्राहितः ग्रहणं प्रापितः ॥ २६ ॥ मोचित इति । मोचितः, प्रहारादिति शेषः ॥ २७॥ वानरैरिति । अर्दिताः पीडिताः । विक्रान्तैरित्यत्र विक्रममात्रोक्तेः लघुविक्रमैरित्यत्र जवमात्रं विक्रमस्य विशेष्यते ॥ २८ ॥ तत इति । बहिर्नित्यचराः परराष्ट्रेषु वृत्तान्तज्ञानाय सदा सञ्चारशीलाः । समीपवासिनमिति पुंस्त्वमार्षम् ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशः सर्गः ॥ २९ ॥

मोचितः सोऽपि रामेण वध्यमानः प्लवङ्गमैः । आनृशंस्येन रामस्य मोचिता राक्षसाः परे ॥२७॥ वानरैरर्दितास्ते तु विक्रान्तैर्लघुविक्रमैः । पुनर्लङ्कामनुप्राप्ताः श्वसन्तो नष्टचेतसः ॥ २८ ॥ ततो दशग्रीवमुपस्थितास्तु ते चारा बहिर्नित्यचरा निशाचराः । गिरेः सुवेलस्य समीपवासिनं न्यवेदयन् भीमबलं महाबलाः ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनत्रिंशः सर्गः ॥ २९ ॥

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः । सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥ चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् । जातोद्वेगोऽभवत् किंचिच्छार्दूलं वाक्यमब्रवीत् ॥२॥ अयथावच्च ते वर्णो दीनश्चासि निशाचर । नासि कच्चिदमित्राणां क्रुद्धानां वशमागतः ॥ ३ ॥ इति तेनानुशिष्टस्तु वाचं मन्दमुदीरयत् । तदा राक्षसशार्दूलं शार्दूलो भयविह्वलः ॥ ४ ॥ न ते चारयितुं शक्या राजन् वानरपुङ्गवाः ॥ ५ ॥

अथशार्दूलादिचारवचनं त्रिंशे—तत इति । सुवेले सुवेलसमीपे । सामीप्ये सप्तमी । सुवेलस्य समीप इति पूर्वमुक्तत्वात् ॥ १ ॥ चाराणां चारेभ्यः ॥२॥ रामानु०-प्राप्तं रामं महाबलमिति पाठः ॥ २ ॥ शत्रुगृहीतत्वेन तेषां स्वरूपं किं न ज्ञातमिति भावः ॥३॥ अनुशिष्टः पृष्टः । उदीरयत् । अडभाव आर्षः ॥४॥ चारयितुं चारविषयीकर्तुम् । न शक्याः चारसञ्चारविषया न भवन्तीत्यर्थः ॥ ५ ॥

सोऽपि शार्दूलोऽपि । परे शार्दूलसहायभूतास्ते च मोचिताः ॥ २७ ॥ २८ ॥ बहिर्नित्यचराः परराष्ट्रेषु तत्रत्यवृत्तान्तजिज्ञासया सदा सञ्चरणशीलाः ॥ २९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोनत्रिंशः सर्गः ॥ २९ ॥ ॥ १ ॥ चाराणां चारेभ्यः ॥ २ ॥ ३ ॥ उदीरयदिति अडभाव आर्षः ॥ ४ ॥ चारयितुम् चारविषयीकर्तुम् ॥ ५-२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सम्प्रश्नः परीक्षणम् । अत्र वानरेषु ॥ ६ ॥ प्रविष्टमात्रे प्रविष्ट एव । अचारिते चाराविषयीकृते ॥ ७ ॥ बलादित्यादि । रक्षोभिः विभीषणसचिवैः । विचालितः भुवि परिवर्तितः ॥ ८ ॥ परिणीतः परितो नीतः । सर्वतः परिणीय सर्वेषां निकटे चारोऽयमिति घोषणपूर्वकं परिणीयेत्यर्थः । रामसंसदं रामसभाम् ॥ ९ ॥ विह्वलः मूर्च्छितः । मूर्च्छानिवृत्तावपि चलितेन्द्रियः । याचमानः, त्राणमिति शेषः । परित्रात इत्यनुवादात् ॥ १० ॥ राघवे

विक्रान्ता बलवन्तश्च राघवेण च रक्षिताः । नापि सम्भाषितुं शक्याः सम्प्रश्नोऽत्र न लभ्यते ॥६॥ सर्वतो रक्ष्यते पन्था वानरैः पर्वतोपमैः । प्रविष्टमात्रे ज्ञातोऽहं बले तस्मिन्नचारिते ॥ ७ ॥ बलाद्गृहीतो रक्षोभिर्बहुधाऽस्मि विचालितः । जानुभिर्मुष्टिभिर्दन्तैस्तलैश्चाभिहतो भृशम् ॥ ८ ॥ परिणीतोऽस्मि हरिभिर्बलवद्भिरमर्षणैः । परिणीय च सर्वत्र नीतोऽहं रामसंसदम् ॥ ९ ॥ रुधिरादिग्धसर्वाङ्गो विह्वलश्चलितेन्द्रियः । हरिभिर्वध्यमानश्च याचमानः कृताञ्जलिः ॥१०॥ राघवेण परित्रातो जीवामीति यदृच्छया ॥११॥ एष शैलैः शिलाभिश्च पूरयित्वा महार्णवम् । द्वारमाश्रित्य लङ्काया रामस्तिष्ठति सायुधः ॥१२॥ गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः । मां विसृज्य महातेजा लङ्कामेवाभिवर्तते ॥१३॥ पुरा प्राकारमायाति क्षिप्रमेकतरं कुरु। सीतां वाऽस्मै प्रयच्छाशु सुयुद्धं वा प्रदीयताम्॥१४॥

णेत्यर्धम् । जीवामीति यदृच्छया, इदानीं जीवनं यादृच्छिकमित्यर्थः । यद्वा इतीति स्वशरीरप्रदर्शनम् । 'अयथावच्च ते वर्णो दीनश्चासि निशाचर' इति ह्युक्तम् ॥ ११ ॥ एष इति । द्वारमाश्रित्य तिष्ठतीति वर्तमानसामीप्ये वर्तमानवत्प्रयोगः ॥ १२ ॥ गरुडेति । स्पष्टः ॥ १३ ॥ पुरा प्राकारम् आयाति, आयास्यतीत्यर्थः । " यावत्पुरानिपातयोर्लट् " । एकतरं द्वयोरेकम् । " एकाच्च प्राचाम् " इति तरप् । एकतरमित्युक्तं विवृणोति सीतामिति ॥ १४ ॥

हरिभिरिति । हरिभिर्वध्यमानो जीवामीति कृताञ्जलिस्सन् याचमानोऽहं यदृच्छया राघवेण परित्रात इति सम्बन्धः ॥ १०–१३ ॥ पुरेति । प्राकारं पुरा आयाति ॥ ९९ ॥

स०–गरुडव्यूहमास्थाय प्रधानसमयत्वात् साक्षाद्गरुडारोहे ज्ञातभगवत्त्वो रावणः प्रपन्नश्चेदवतारव्यापारानिष्पादनं स्यादिति व्यूहमिषेण तं विरचय्य तत्र स्थित इति ध्वनिः ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनसा प्रेक्ष्य आलोच्य तं शार्दूलमुवाचेत्यन्वयः ॥ १५ ॥ सीताऽस्मै प्रदीयतामित्यस्योत्तरमाह–यदीति । युद्ध्येरन् तथापि सीतां न प्रदास्यामि । सर्वलोकेभ्यो भयादपि न प्रदास्यामीति योजना ॥ १६ ॥ एवं प्रथमपक्षस्यानुपपत्त्या द्वितीयपक्षं करिष्यमाणः तत्र ज्ञातव्यविशेषं पृच्छति–एवमित्यादि श्लोकत्रयम् । भवता सेना चारिता चारविषयीकृता, सम्यक् दृष्टेत्यर्थः । अत्र सेनायाम् । के शूराः ॥ १७ ॥ ये दुरासदाः ते कीदृशाः

मनसा तं तदा प्रेक्ष्य तच्छ्रुत्वा राक्षसाधिपः । शार्दूलं सुमहद्वाक्यमथोवाच स रावणः ॥ १५ ॥ यदि मां प्रति युद्ध्येरन् देवगन्धर्वदानवाः । नैव सीतां प्रदास्यामि सर्वलोकभयादपि ॥ १६ ॥ एवमुक्त्वा महातेजा रावणः पुनरब्रवीत् । चारिता भवता सेना केऽत्र शूराः प्लवङ्गमाः ॥१७॥ कीदृशाः किंप्रभाः सौम्य वानरा ये दुरासदाः । कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि राक्षस ॥ १८ ॥ तथाऽत्र प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबलम् । अवश्यं बलसङ्ख्यानं कर्तव्यं युद्धमिच्छताम् ॥ १९ ॥ तथैवमुक्तः शार्दूलो रावणेनोत्तमश्चरः । इदं वचनमारेभे वक्तुं रावणसन्निधौ ॥ २० ॥ अथर्क्षरजसः पुत्रो युधि राजा सुदुर्जयः । गद्गदस्याथ पुत्रोऽत्र जाम्बवानिति विश्रुतः ॥ २१ ॥

कीदृशाकाराः । किंप्रभाः किंप्रभावाः । कस्य पुत्राः कस्य पौत्राश्च । तत्त्वं तेषां वानराणां भावमाख्याहि ॥ १८ ॥ १९ ॥ कथने किं प्रयोजनमित्यत्राह–तथेति । तथा एवमाख्याते सति । तेषां बलाबलं ज्ञात्वा अत्र वानरेषु प्रतिपत्स्यामि प्रतिपत्स्ये, कर्तव्यं ज्ञास्यामीत्यर्थः ॥ २० ॥ अथेत्युत्तरवचनारम्भे । द्वितीयोऽथशब्दः पादपूरणे । राजा सुग्रीवः । पाञ्चालीन्यायेन गद्गदेन पोषितत्वात्तत्पुत्रो जाम्बवान् । तस्य ब्रह्मणो जृम्भारम्भसम्भूतत्वात् ॥२१॥

आयास्यति । " यावत्पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् । एकतरम् अन्यतरत् । तदेवाह सीतामिति ॥ १४–१६ ॥ चारितेति । वानराणां सेनेति योजना ॥१७॥१९॥ कथने किमित्यत आह–तथेति । तथा एवमाख्याते सति । तेषां बलाबलं ज्ञात्वा प्रतिपत्स्यामि प्रतिपत्स्ये, कर्तव्यं ज्ञास्यामीत्यर्थः ॥१९॥२०॥ राजा सुग्रीवः । गद्गदः क्षेत्रद्वारा जाम्बवतः पिता । यद्यपि जाम्बवतः ' जृम्भमाणस्य सहसा मम वक्त्रादजायत ' इति ब्रह्ममुखादुत्पत्तिरुक्ता, तथापि जृम्भणसमये उद्गताया ब्रह्मशक्तेर्गद्गदक्षेत्रमाविश्य तद्रूपेण परिणामाददोषः ॥ २१ ॥

स०–आख्याहि सुव्रतेति पाठः । अनेन अनृतभाषणे प्रत्यवेयामिति परिज्ञानमस्तीति सूच्यते ॥१८॥ गद्गदस्य द्वितीयजन्मनि । नचैवं वचने किं कल्पकमिति वाच्यम् । देवानामुत्पत्तेर्नानाविधाया भारतभागवतादौ प्रोक्तिरेवेत्यवेहि । अत्रापि " जाम्बवान् जृम्भमाणस्य मम वक्त्रादजायत " इत्येकत्र निर्भ्रातृकस्यैकस्य ब्रह्मजत्वजल्पनं अन्यत्र धूम्रानुजत्वेन गद्गदपुत्रत्वजल्पनं च कल्पयिष्यतोऽमुमर्थं मितिज्ञेयम् ॥ २१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गद्गदस्यैवेति । अन्यः पुत्रः धूम्रः । जाम्बवान् धूम्रश्चेति गद्गदस्य द्वौ पुत्रावित्यर्थः । यस्य पुत्रेणैकेन महता रक्षसाम् अक्षादीनां कदनं हननं कृतम्, स केसरी शतक्रतोर्गुरुः बृहस्पतिः तस्य पुत्रः । सापेक्षत्वेऽपि गमकत्वात् समासः ॥ २२ ॥ धर्मस्य देवतायाः । ननु "वरुणो जनयामास सुषेणं नाम वानरम्" इति बालकाण्डोक्तम् । सत्यमुक्तम् । स एवात्र धर्मशब्देनोच्यते । शार्दूलो वा भयाकुलोऽन्यथा श्रुतवान् । अन्योऽयं सुषेण इत्यप्याहुः ।

गद्गदस्यैव पुत्रोऽन्यो गुरुपुत्रः शतक्रतोः । कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम् ॥ २२ ॥ सुषेणश्चापि धर्मात्मा पुत्रो धर्मस्य वीर्यवान् । सौम्यः सोमात्मजश्चात्र राजन् दधिमुखः कपिः ॥ २३ ॥ सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः । मृत्युर्वानररूपेण नूनं सृष्टः स्वयंभुवा ॥ २४ ॥ पुत्रो हुतवहस्याथ नीलः सेनापतिः स्वयम् । अनिलस्य च पुत्रोऽत्र हनुमानिति विश्रुतः ॥२५॥ नप्ता शक्रस्य दुर्धर्षो बलवानङ्गदो युवा । मैन्दश्च द्विविदश्चोभौ बलिनावश्विसम्भवौ ॥ २६ ॥ पुत्रा वैवस्वतस्यात्र पञ्च कालान्तकोपमाः । गजो गवाक्षो गवयः शरभो गन्धमादनः ॥ २७ ॥ दश वानरकोट्यश्च शूराणां युद्धकांक्षिणाम् । श्रीमतां देवपुत्राणां शेषं नाख्यातुमुत्सहे ॥ २८ ॥

एवमन्यत्रापि ज्ञेयम् ॥ २३ ॥ मृत्युरेव स्वयंभुवा सुमुखादिवानररूपेण सृष्टः, सुमुखादयो मृत्युतुल्या इत्यर्थः । यद्वा सुमुखादयो मृत्युपुत्रा इत्यर्थः ॥ २४ ॥ रामानु०–मृत्युर्वानररूपेण नूनं सृष्टः स्वयंभुवा । सुमुखादयो मृत्युपुत्रा इति यावत् ॥ २४ ॥ पुत्रो हुतवहस्येति । अनिलस्य पुत्रः औरसः । एवं तत्र तत्र पितृद्वयनिर्देशो बीजित्वक्षेत्रित्वाभ्यामिति मन्तव्यम् ॥ २५ ॥ अत्र नप्तृशब्दोऽर्थसामर्थ्यात् पौत्रे वर्तते ॥२६॥ पुत्रा इति । स्पष्टः ॥ २७ ॥ दशेति । वानरकोट्य इत्यत्र वानरेत्यविभक्तिकनिर्देशः । "सुपां सुलुक्" इत्यादिना षष्ठ्या लुक् । वानराणामित्यर्थः । शेषं जन्मस्थानादि । नोत्सहे न शक्नोमि ॥२८॥

गद्गदस्यैवेति । अन्यः पुत्रः धूम्राख्यः । यस्य केसरिणः पुत्रेण हनुमता रक्षसां कदनं कृतम् । केसरी शतक्रतोर्गुरुः बृहस्पतिः तस्य पुत्र इति ॥ २२ ॥ २३ ॥ मृत्युरेव स्वयम्भुवा सुमुखादिवानररूपेण सृष्टः, सुमुखादयो मृत्युतुल्या इति भावः ॥ २४–२७ ॥ दशवानरकोट्य इत्यत्र वानरेति लुप्तविभक्तिकं षष्ठ्यन्तं पदम् । आख्यातुं नोत्सहे न शक्नोमि ॥ २८–३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिंहसंहननः रमणीयावयवसन्निवेशवान् । "वराङ्गरूपोपेतो यः सिंहसंहननो हि सः" इत्यमरः ॥ २९ ॥ ३० ॥ वक्तुमिति । ये जनस्थानगताः ते यावन्तः ते सर्वेऽपि हता इत्यर्थः । "यावत्तावच्च साकल्ये" इत्यमरः ॥३१॥ लक्ष्मण इति । चशब्देन दशरथस्य पुत्र इत्याकृष्यते । मातङ्गानामिवर्षभः

पुत्रो दशरथस्यैष सिंहसंहननो युवा । दूषणो निहतो येन खरश्च त्रिशिरास्तथा ॥ २९ ॥ नास्ति रामस्य सदृशो विक्रमे भुवि कश्चन । विराधो निहतो येन कबन्धश्चान्तकोपमः ॥ ३० ॥ वक्तुं न शक्तो रामस्य नरः कश्चिद् गुणान् क्षितौ । जनस्थानगता येन यावन्ता राक्षसा हताः ॥ ३१ ॥ लक्ष्मणश्चात्र धर्मात्मा मातङ्गानामिवर्षभः । यस्य बाणपथं प्राप्य न जीवेदपि वासवः ॥ ३२॥ श्वेतो ज्योतिर्मुखश्चात्र भास्करस्यात्मसम्भवौ । वरुणस्य च पुत्रोऽन्यो हेमकूटः प्लवङ्गमः ॥३३॥ विश्वकर्मसुतो वीरो नलः प्लवगसत्तमः । विक्रान्तो बलवानत्र वसुपुत्रः सुदुर्धरः ॥३४॥ राक्षसानां वरिष्ठश्च तव भ्राता विभीषणः । परिगृह्य पुरीं लङ्कां राघवस्य हिते रतः ॥ ३५ ॥ इति सर्वं समाख्यातं तवेदं वानरं बलम् । सुवेलेऽधिष्ठितं शैले शेषकार्ये भवान् गतिः ॥ ३६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रिंशः सर्गः ॥ ३० ॥

गजश्रेष्ठ इव स्थितः ॥ ३२ ॥ ३३ ॥ सुदुर्धरः सुदुर्धरनामा ॥ ३४ ॥ राक्षसानामिति । लङ्कां रामात् परिगृह्य तस्य हिते रतो विभीषणस्तव भ्रातेत्यन्वयः ॥ ३५ ॥ गतिः प्रमाणम् । अत्र वानरजन्मोक्तेः प्रायशो बालकाण्डोक्तविरोधादेतत्सर्गं विनापि पूर्वोत्तरकथासङ्घटनाच्च सर्गोऽयं कल्पित इत्याहुः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशः सर्गः ॥ ३० ॥

वक्तुमिति । जनस्थानगता यावन्तो राक्षसाः ते सर्वे येन निहताः तस्य गुणान् वक्तुं न शक्त इति सम्बन्धः ॥ ३१–३३ ॥ विश्वकर्मेति । दुर्धरः दुर्धराख्यः ॥ ३४ ॥३५ ॥ गतिः प्रमाणम् । नन्वत्र सर्गे धर्मस्य पुत्रः सुषेणः । वैवस्वतपुत्रौ शरभगन्धमादनावित्युच्येते । बालकाण्डे तु "वरुणो जनयामास सुषेणं नाम वानरम् । शरभं जनयामास पर्जन्यस्तु महाबलम् । धनदस्य सुतः श्रीमान् वानरो गन्धमादनः ॥" इति त्रयाणामन्यत उत्पत्तिरुक्ता । सत्यम्; सुषेणादिसंज्ञावतामनेकेषामपि सत्त्वान्न विरोधः ॥ ३६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रिंशः सर्गः ॥ ३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सीतामोहनमेकत्रिंशे । कथासङ्घटनाय पूर्वसर्गोक्तमनुवदति-तत इति । स्पष्टः ॥ १ ॥ रामानु०-ततस्तमक्षोभ्यबलमित्यनुवादः पूर्वसर्गादौ च कृतः । पूर्वमेव मया सृष्टो जाम्बवानृक्षपुङ्गवः । जृम्भमाणस्य सहसा मम वक्त्रादजायत ॥ इति जृम्भमाणपितामहवक्त्राद्रुत्पन्नत्वेन प्रसिद्धस्य जाम्बवतः पूर्वसर्गे गद्गदपुत्रत्वेनाभिधानाद्विरोधः स्फुरति । पूर्वसर्गमन्तरेणापि कथा सङ्गच्छते । तथापि स्थितस्य गतिश्चिन्तनीयेति न्यायेन पूर्वसर्गो व्याख्यातः ॥ १ ॥ चाराणां चारेभ्यः । जातोद्वेगः जातसम्भ्रमः । सचिवान् मन्त्रिणः

ततस्तमक्षोभ्यबलं लङ्काधिपतये चराः । सुवेले राघवं शैले निविष्टं प्रत्यवेदयन् ॥ १ ॥ चाराणां रावणः श्रुत्वा प्राप्तं रामं महाबलम् । जातोद्वेगोऽभवत् किञ्चित् सचिवानिदमब्रवीत् ॥२॥ मन्त्रिणः शीघ्रमायान्तु सर्वे वै सुसमाहिताः । अयं नो मन्त्रकालो हि संप्राप्त इति राक्षसाः ॥ ३ ॥ तस्य तच्छासनं श्रुत्वा मन्त्रिणोऽभ्यागमन् द्रुतम् । ततः स मन्त्रयामास सचिवै राक्षसैः सह ॥ ४ ॥ मन्त्रयित्वा स दुर्धर्षः क्षमं यत् समनन्तरम् । विसर्जयित्वा सचिवान् प्रविवेश स्वमालयम् ॥ ५ ॥ ततो राक्षसमाहूय विद्युज्जिह्वं महाबलम् । मायाविदं महामायः प्राविशद्यत्र मैथिली ॥ ६ ॥ विद्युज्जिह्वं च मायाज्ञमब्रवीद्राक्षसाधिपः । मोहयिष्यावहे सीतां मायया जनकात्मजाम् ॥ ७ ॥ शिरो मायामयं गृह्य राघवस्य निशाचर । त्वं मां समुपतिष्ठस्व महच्च सशरं धनुः ॥ ८ ॥ एवमुक्तस्तथेत्याह विद्युज्जिह्वो निशाचरः । [दर्शयामास तां मायां सुप्रयुक्तां स रावणे ।] तस्य तुष्टोऽभवद्राजा प्रददौ च विभूषणम् ॥ ९ ॥ अशोकवनिकायां तु सीतादर्शनलालसः । नैर्ऋतानामधिपतिः संविवेश महाबलः ॥ १० ॥

समीपस्थान् ॥ २ ॥ हे राक्षसाः ! अयं नो मन्त्रकालः संप्राप्तः इति हेतोः मन्त्रिणः समायान्त्विति इदं वाक्यमब्रवीदिति पूर्वेण सम्बन्धः । यद्वा इदमब्रवीदित्यस्य वाक्यान्तस्थेनेतिशब्देन संबन्धः । राक्षसा इत्युत्तरशेषः । अथवा हे मन्त्रिणः ! भवन्तः आयान्तु समीपमिति सचिवानब्रवीत् । राक्षसा इति मन्त्रिविशेषणम् । सचिवै राक्षसैरित्यनुवादात् । सुसमाहिताः नीतिकुशला इत्यर्थः ॥ ३ ॥ ४ ॥ मन्त्रयित्वेति । समनन्तरं रामस्य समीपागमनानन्तरम् । यत् क्षमं कर्तुमुचितं तन्मन्त्रयित्वेति योजना ॥ ५-७ ॥ शिर इति । गृह्य गृहीत्वा ॥ ८ ॥ तस्य तस्मिन् ॥ ९ ॥ लालसः साभिलाषः ॥ १० ॥ ११ ॥ ॥१०१॥
॥ १ ॥ चाराणामिति । चाराणां चारेभ्यः ॥ २ ॥ हे राक्षसाः ! अयं नो मन्त्रकालः सम्प्राप्त इति हेतोः मन्त्रिणः समायान्त्वितीदं वाक्यमब्रवीदिति पूर्वेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उपास्यमानाम् अनुव्रताम् ॥ १२ ॥ उपसृत्येति । प्रहर्षं नाम कीर्तयन् प्रहर्षवार्तां कीर्तयन्निव । नामेत्यपरमार्थे ॥ १३ ॥ वल्गसे जल्पसि, मां निष्ठुरमवद इत्यर्थः ॥१४॥ मूलम् आधारभूतम् । सर्वतः कात्स्न्येन । व्यसनेन निमित्तेन, प्रार्थनां विनेत्यर्थः॥१५॥मृतेन रामेण । भवस्वेत्यात्मनेपद

ततो दीनामदैन्यार्हां ददर्श धनदानुजः । अधोमुखीं शोकपरामुपविष्टां महीतले ॥ ११ ॥ भर्तारमेव ध्यायन्तीमशोकवनिकां गताम् । उपास्यमानां घोराभी राक्षसीभिरितस्ततः* ॥ १२ ॥ उपसृत्य ततः सीतां प्रहर्षं नाम कीर्तयन् । इदं च वचनं धृष्टमुवाच जनकात्मजाम् ॥१३॥ सान्त्व्यमाना मया भद्रे यमुपाश्रित्य वल्गसे । खरहन्ता स ते भर्ता राघवः समरे हतः ॥१४॥ छिन्नं ते सर्वतो मूलं दर्पस्ते विहतो मया । व्यसनेनात्मनः सीते मम भार्या भविष्यसि ॥ १५ ॥ विसृजेमां मतिं मूढे किं मृतेन करिष्यसि । भवस्व भद्रे भार्याणां सर्वासामीश्वरी मम ॥१६॥ अल्पपुण्ये निवृत्तार्थे मूढे पण्डितमानिनि । शृणु भर्तृवधं सीते घोरं वृत्रवधं यथा ॥ १७ ॥ समायातः समुद्रान्तं मां हन्तुं किल राघवः । वानरेन्द्रप्रणीतेन बलेन महता वृतः ॥ १८ ॥

मार्षम् ॥ १६ ॥ निवृत्तार्थे एतावत्पर्यन्तं निवृत्तपुरुषार्थे । पण्डितमानिनि । "क्यङ्मानिनोश्च" इति ह्रस्वत्वम् ॥ १७ ॥ समुद्रान्तं समुद्रतीरम् ।

सम्बन्धः ॥ ३–१२ ॥ उपसृत्येति । प्रहर्षं नाम कीर्तयन् प्रहर्षं कीर्तयन् हे सीते ! इति सम्बोधयन् ॥१३॥१४॥ छिन्नमिति । सर्वतः कात्स्न्येन, आत्मनः तव व्यसनेनैव हेतुना मम भार्या भविष्यसि, मत्प्रार्थनां विना त्वमेव मम भार्या भविष्यसीति भावः ॥ टीका–ते मूलम् अस्मदपरिग्रहनिदानं सर्वथा सर्वप्रकारेण छिन्नम् । ते दर्पश्च मया विहतः । एवं करणेन किं ते जातं तत्राह–आत्मनस्तव व्यसनेन मम भार्या भविष्यसि, गत्यन्तराभावात्स्वयमेवेति शेषः ॥ १५ ॥ एनां मतिं रामविषयां मतिम् । भवस्व भवेत्यर्थः ॥ १६ ॥ निवृत्तार्थे निवृत्तपुरुषार्थे । कथमिदं त्वया साधितमिति चेदुपायेनेत्याह शृण्विति ॥ १७ ॥ वानरेन्द्रेण प्रणीतेन आनीतेन ॥ १८ ॥ १९ ॥

---

* राक्षसीभिर्वृतां सीतां पूर्णचन्द्रनिभाननाम् । उत्पातमेघजालाभिश्चन्द्ररेखामिवावृताम् ॥ भूषणैरुत्तमैः कैश्चिन्मङ्गलार्थमलंकृताम् । चरन्तीं मारुतोद्धूतां क्षिप्तां पुष्पलतामिव ॥ हर्षशोकान्तरे मग्नां विषादस्य विलक्षणाम् । स्तिमितामिव गाम्भीर्यान्नदीं भागीरथीमिव ॥ इत्यधिकः पाठः केषुचित्पुस्तकेषु दृश्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रणीतेन आनीतेन ॥ १८ ॥ स रामः समुद्रस्योत्तरं तीरं महता बलेन पीड्य पीडयित्वा दिवाकरे अस्तं प्रयाति सति निविष्टः ॥१९॥ अथेति। कार्त्स्न्ये अथशब्दः। अध्वनि परिश्रान्तमत एव स्थितम्। अर्द्धरात्रे सुखसंसुप्तं बलं प्रथममासाद्य चारैश्चारितमभूत् ॥२०॥ यत्र बले। रामः सलक्ष्मणोऽवस्थितः। तदस्य बलं प्रहस्तप्रणीतेन महता बलेन हतम् ॥ २१ ॥ पट्टिशानित्यादिश्लोकद्वयम्। पट्टिशान् असिविशेषान्। परिघान् अर्गलानि। चक्रान् क्षुद्र

स निविष्टः समुद्रस्य पीड्य तीरमथोत्तरम्। बलेन महता रामो व्रजत्यस्तं दिवाकरे ॥ १९ ॥ अथाध्वनि परिश्रान्त मर्धरात्रे स्थितं बलम्। सुखसंसुप्तमासाद्य चारितं प्रथमं चरैः ॥ २० ॥ तत्प्रहस्तप्रणीतेन बलेन महता मम। बलमस्य हतं रात्रौ यत्र रामः सलक्ष्मणः॥२१॥ पट्टिशान् परिघांश्चक्रान् दण्डान् खड्गान् महायसान्। बाणजालानि शूलानि भास्वरान् कूटमुद्गरान् ॥२२॥ यष्टीश्च तोमरान् शक्तीश्चक्राणि मुसलानि च। उद्यम्योद्यम्य रक्षोभिर्वानरेषु निपातिताः ॥ २३ ॥ अथ सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना। असक्तं कृतहस्तेन शिरश्छिन्नं महासिना ॥२४॥ विभीषणः समुत्पत्य निगृहीतो यदृच्छया। दिशः प्रव्राजितः सर्वैर्लक्ष्मणः प्लवगैः सह ॥ २५ ॥ सुग्रीवो ग्रीवया सीते भग्नया प्लवगाधिपः। निरस्तहनुकः शेते हनुमान् राक्षसैर्हतः ॥ २६ ॥ जाम्बवानथ जानुभ्यामुत्पतन्निहतो युधि। पट्टिशैर्बहुभिश्छिन्नो निकृत्तः पादपो यथा ॥ २७ ॥

चक्राणि। महायसान् महायसानिर्मितान्। दण्डविशेषणमेतत्। कूटमुद्गरान् अयःकीलकीलितगदाः। यष्टीः केवलदण्डान्। तोमरान् स्थूलाग्रगदाः। प्रासान् क्षेपणीः। चक्राणि महाचक्राणि। पट्टिशादीनुद्यम्योद्यम्य वानरेषु निपातिताः, त इति शेषः ॥ २२ ॥ २३ ॥ प्रमथ्नाति प्रहरतीति प्रमाथिः तेन। कृतहस्तेन शिक्षितहस्तेन कर्त्रा। महासिना करणेन। असक्तम् अविलम्बितं यथा भवति तथा छिन्नमित्यन्वयः ॥ २४ ॥ विभीषणः समुत्पत्य गतोऽपि निगृहीत इत्यर्थः। प्रव्राजितः पलायितः ॥ २५ ॥ सुग्रीव इति। ग्रीवया, उपलक्षित इति शेषः॥ २६ ॥ जानुभ्यां जानुनोः निहतः। अथ पट्टिशैश्छिन्नः ॥१०२॥

अध्वनि परिश्रान्तं स्थितम्। अर्धरात्रे सुखसंसुप्तं बलं समासाद्य। चरैः चारितम्, अभूदिति शेषः। पट्टसादीनुद्यम्योद्यम्य पट्टसादयो वानरेषु निपातिता इत्यर्थः ॥ २०-२३ ॥ अथेति। प्रमाथिना प्रमथनशीलेन। कृतहस्तेन सुशिक्षितहस्तेन। असक्तं यथा तथा शिरश्छिन्नमिति सम्बन्धः ॥ २४-२९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जाम्बवान् निकृत्तः पादप इवाभूत् ॥ २७ ॥ व्यायतौ दीर्घशरीरौ । मध्ये कटिस्थाने ॥ २८ ॥ अनुतिष्ठति शेते । पनसः पनसफलम् । तथा खण्डित इत्यर्थः ॥ २९ ॥ निष्कूजः निःशब्दः ॥ ३० ॥ राक्षसैरासाद्य शरैश्छिन्नः निपतिताङ्गदोऽङ्गदः क्षितौ पतितः ॥ ३१ ॥ शायिताः शयानाः । अपरे हरयः

मैन्दश्च द्विविदश्चोभौ निहतौ वानरर्षभौ । निश्वसन्तौ रुदन्तौ च रुधिरेण परिप्लुतौ । असिना व्यायतौ छिन्नौ मध्ये ह्यरिनिषूदनौ ॥ २८ ॥ अनुतिष्ठति मेदिन्यां पनसः पनसो यथा ॥२९॥ नाराचैर्बहुभिश्छिन्नः शेते दर्यां दरीमुखः । कुमुदस्तु महातेजा निष्कूजः सायकैः कृतः ॥ ३० ॥ अङ्गदो बहुभिश्छिन्नः शरैरासाद्य राक्षसैः । पतितो रुधिरोद्गारी क्षितौ निपतिताङ्गदः ॥ ३१ ॥ हरयो मथिता नागै रथजातैस्तथाऽपरे । शायिता मृदिताश्चाश्वैर्वायुवेगैरिवाम्बुदाः ॥ ३२ ॥ प्रहृताश्चापरे त्रस्ता हन्यमाना जघन्यतः । अभिद्रुतास्तु रक्षोभिः सिंहैरिव महाद्विपाः ॥ ३३ ॥ सागरे पतिताः केचित् केचिद्गगनमाश्रिताः । ऋक्षा वृक्षानुपारूढा वानरीं वृत्तिमाश्रिताः ॥ ३४ ॥ सागरस्य च तीरेषु शैलेषु च वनेषु च । पिङ्गलास्ते विरूपाक्षैर्बहुभिर्बहवो हताः ॥ ३५ ॥ एवं तव हतो भर्ता ससैन्यो मम सेनया । क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः ॥ ३६ ॥ ततः परमदुर्धर्षो रावणो राक्षसाधिपः । सीतायामुपशृण्वन्त्यां राक्षसीमिदमब्रवीत् ॥ ३७ ॥ राक्षसं क्रूरकर्माणं विद्युज्जिह्वं त्वमानय । येन तद्राघवशिरः सङ्ग्रामात् स्वयमाहृतम् ॥ ३८ ॥ विद्युज्जिह्वस्ततो गृह्य शिरस्तत् सशरासनम् । प्रणामं शिरसा कृत्वा रावणस्याग्रतः स्थितः ॥ ३९ ॥ तमब्रवीत्ततो राजा रावणो राक्षसं स्थितम् । विद्युज्जिह्वं महाजिह्वं समीपपरिवर्त्तिनम् ॥ ४० ॥

वायुवेगैरम्बुदा इव नागै रथजातैश्च मृदिताः ॥ ३२ ॥ त्रस्ताः अत एवाभिद्रुताः । जघन्यतः पृष्ठतः । हन्यमानाः अपरे हरयः सिंहैः द्विपा इव प्रहृताः ॥ ३३ ॥ ३४ ॥ पिङ्गलाः वानराः । विरूपाक्षैः वानरैः ॥ ३५ ॥ ३६ ॥ राक्षसीं समीपवर्तिनीं कांचित् ॥ ३७ ॥ ३८ ॥ विद्युज्जिह्व इति । ततः राक्षसीं

निष्कूजः निश्शब्दः ॥ ३०–३६ ॥ राक्षसीं सीतासमीपवर्तिनीम् ॥ ३७–४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रत्याज्ञापनवचनश्रवणानन्तरमेव ॥ ३९ ॥ ४० ॥ पश्चिमामवस्थाम्, मरणमित्यर्थः ॥ ४१ ॥ उप समीपे। अन्तरधीयत अपागच्छत् ॥ ४२ ॥ चिक्षेप आचकर्ष। विद्युज्जिह्वहस्तादित्यर्थः। त्रिषु लोकेषु विख्यातम्, वैष्णवत्वादिति भावः ॥ ४३ ॥ ४४ ॥ स इति। विद्युज्जिह्वेत्यत्र तल्लोप आर्षः। सहैव

अग्रतः कुरु सीतायाः शीघ्रं दाशरथेः शिरः। अवस्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु ॥ ४१ ॥ एवमुक्तं तु तद्रक्षः शिरस्तत् प्रियदर्शनम्। उपनिक्षिप्य सीतायाः क्षिप्रमन्तरधीयत ॥ ४२ ॥ रावणश्चापि चिक्षेप भास्वरं कार्मुकं महत्। त्रिषु लोकेषु विख्यातं सीतामिदमुवाच च ॥ ४३ ॥ इदं तत्तव रामस्य कार्मुकं ज्यासमायुतम्। इह प्रहस्तेनानीतं हत्वा तं निशि मानुषम् ॥ ४४ ॥ स विद्युज्जिह्वेन सहैव तच्छिरो धनुश्च भूमौ विनिकीर्य रावणः। विदेहराजस्य सुतां यशस्विनीं ततोऽब्रवीत्तां भव मे वशानुगा ॥ ४५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकत्रिंशः सर्गः ॥ ३१ ॥

युगपदेव। विनिकीर्य शिरो धनुश्च युगपत् सीतायाः पुरतः स्थापयित्वेत्यर्थः। विद्युज्जिह्वः शिरः प्रक्षिप्तवान्, स्वयं धनुरिति ज्ञेयम्। वशानुगेत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ ४५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशः सर्गः ॥ ३१ ॥

एवमुक्तमिति। अन्तरधीयत अपागच्छत ॥ ४२ ॥ चिक्षेप आचकर्ष ॥४३॥४४॥ सहैव युगपदेव। विनिकीर्य सीतायाः पुरतः स्थापयित्वा ॥ 'उपसृत्य ततस्सीतां प्रहर्षन्नाम कीर्तयन्' इत्यारभ्य सर्गसमाप्तिपर्यन्तस्य वास्तवार्थस्तु–रावणस्तु देवीं स्पष्टं देवतात्वेन ज्ञात्वाऽपि रामहस्ताद्वधेच्छुरपि रावणो रामेण सह वैरं सम्पाद्य मृत इति इतरराक्षसवञ्चनाय देवीमोहनार्थमिव श्रीराममायाशिरआदिकं प्रदर्श्य रामवधशङ्कया मोहितां देवीं रहसि प्रियवचनैस्समाश्वासयति–उपसृत्येत्यारभ्य सर्गसमाप्तिपर्यन्तेन। उपसृत्य समीपं प्राप्य प्रहर्षन् प्रहर्षयन् दुष्टं वचनम् इतरराक्षसदृष्ट्या दुष्टमित्यर्थः। सान्त्व्यमानेति। रामस्य कापि हानिर्नास्तीति मया सान्त्व्यमानाऽपि यं राममुपाश्रित्य उद्दिश्य वलासे दुःखेन धावसीत्यर्थः। खरहन्ता स ते भर्ता समरे हतोऽथ किम्, न हत एवेत्यर्थः। अतो दुःखं मा प्राप्नुहीति शेषः। मम दुःखेन तव का हानिरित्याशङ्क्याह–छिन्नमिति। हे सीते! आत्मनस्तव व्यसनेन हेतुना ते त्वया ते मम त्वदीयभृत्यस्य ममेत्यर्थः। दर्पः मया लक्ष्म्या सह सर्वतः सर्वप्रकारेण निहतः मूलं च लक्ष्म्यागमननिमित्तमपि छिन्नम्, अतो भार्या भर्तऽद्य भविष्यसि, रामेणैवेति शेषः। अतो दुःखं मा प्राप्नुहीत्यर्थः। विसृजे

For Private And Personal Use Only

अथ सीताप्रलापो द्वात्रिंशे—सा सीतेत्यादिश्लोकत्रयमेकं वाक्यम् । हनुमता पूर्वं कथितम् । सुग्रीवप्रतिसंसर्गं रामस्य सुग्रीवप्रतिसम्बन्धम् । रावणमुखाच्छ्रुत्वेति शेषः । यद्वा दृष्ट्वा ज्ञात्वेत्यर्थः । ज्ञानं च सुग्रीवप्रतिसम्बन्धस्य स्मरणम् । अन्यत्र साक्षात्कारः ॥ १ ॥ नयने इति द्वितीया । भर्तुः सदृशम् भर्तुर्मुखसदृशमित्यर्थः । इदं नयनादावप्यन्वेति । केशान्तदेशं ललाटम् ॥ २ ॥ अभिज्ञानैः चिह्नैः । "प्रज्ञानं चाप्याभिज्ञानम्" इत्यमरः । अभि

सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् । सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता ॥ १ ॥
नयने मुखवर्णं च भर्तुस्तत्सदृशं मुखम् । केशान् केशान्तदेशं च तं च चूडामणिं शुभम् ॥ २ ॥
एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता । विजगर्हेऽत्र कैकेयीं क्रोशन्ती कुररी यथा ॥ ३ ॥
सकामा भव कैकेयि हतोऽयं कुलनन्दनः । कुलमुत्सादितं सर्वं त्वया कलहशीलया ॥ ४ ॥

ज्ञाय तदेव शिर इति प्रत्यभिज्ञायेत्यर्थः । अत्र रामविषये ॥ ३ ॥ सकामेति । हे कैकेयि ! सकामा भव, सम्पूर्णकामा भवेत्यर्थः । कः काम इत्यत्राह

त्यादि सार्धश्लोक एकं वाक्यम् । हे भद्रे हे अमूढे हे सर्वज्ञे ! एतां मिथ्याकल्पितरामविपद्विषयिणीं मतिं विसृज । मम मद्भार्याणां च ईश्वरी भव । अल्पपुण्ये निष्फलार्थे नष्टपुरुषार्थे । पण्डितमानिनि मूढे मृते मृतकल्पे एतादृशविशेषणविशिष्टे मयि, कृपयेति शेषः । किं यदर्थे । एवं न करिष्यसि यदि दुःखं न त्यजसि यदीत्यर्थः । तर्ह्यहं सद्यो मरिष्यामीति शेषः । नन्वेता राक्षस्यः किमिति रामविपत्तिं कथयन्तीत्याशङ्क्य तदसहमानः कुपित आह—शृण्विति । भर्तृवधं भर्तृवधविषयवचनमित्यर्थः । त्वं शृणु, अहं त्वेतादृशमिथ्यावचनं श्रोतुं न सहे इति शेषः । रामवधविषयराक्षस्युक्तिरसङ्गतेति दर्शयितुं राक्षस्युक्तिं स्वयमनुवदति—'समायातः समुद्रान्तं मां हन्तुं किल राघवः' इत्यारभ्य 'क्षतजार्द्रं रजोध्वस्तमिदं चास्याहृतं शिरः' इत्यन्तेन । मां हन्तुं किल राघव इत्यत्र किलशब्दो 'वानरेन्द्रप्रणीतेन' इत्यारभ्य 'एवं तव हतो भर्ता ससैन्यो मम सेनया' इत्यन्तं सर्वत्र योज्यः । तर्हि राक्षस्युक्तिः सर्वात्मना मिथ्या किमित्याशङ्क्य, नहि; त्वन्मोहनार्थं राक्षसैर्मायया रामशिरआदिकं कल्पितमित्याशयेनाह—क्षतजार्द्रमिति । देव्यास्तच्छिरोदिदृक्षायां तदानेतुं राक्षसस्याह्वाने राक्षसीं नियोजयति—ततः परमदुर्धर्ष इत्यादिना । अग्रतः कुर्विति अवस्थां पश्चिमां भर्तुः इत्याद्युक्तिरितरराक्षसवञ्चनाय ज्ञातव्या । स विद्युज्जिह्वेनेत्यस्य वास्तवार्थस्तु—मे वशानुगेत्यत्र अवशानुगेति छेदः । हे मे लक्ष्मीः ! अवशानुगा अस्य विष्णो रामस्य वशमनुगच्छतीत्यवशानुगा भवेत्यर्थः ॥४५॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायाम् एकत्रिंशः सर्गः ॥३१॥ सेति । सुग्रीवप्रतिसंसर्गं हनुमता पूर्वं कथितसुग्रीवरामसम्बन्धं दृष्ट्वा ज्ञात्वा, रावणाच्छ्रुत्वेति वा शेषः ॥१॥ केशान्तदेशं ललाटम् । अभिज्ञानैर्लक्षणैरभिज्ञाय ॥२–४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हत इति । कलहशीलया कलहस्वभावया, कलहप्रयोजनयेति यावत् । त्वया सर्वं कुलं रघुवंशः उत्सादितं भवति । तथा कुलनन्दनोऽयं रामो हतः । प्रव्राजनव्याजेन रामहननमेव त्वया सङ्कल्पितं तदिदानीं विपरीतफलं ते जातम् । कुलतन्तुभूतरामहननेन तदेकपराः सर्वे भरतादयो हता एव । कलह एव ते प्रयोजनं फलितमिति भावः ॥ ४ ॥ हेत्वन्तराभावादिदमेव रामवनप्रव्राजने हेतुरित्याह–आर्येणेति । आर्येण सर्वप्रियकारिणेत्यर्थः ।

आर्येण किं ते कैकेयि कृतं रामेण विप्रियम् । यन्मया चीरवसनस्त्वया प्रस्थापितो वनम् ॥ ५ ॥
एवमुक्त्वा तु वैदेही वेपमाना तपस्विनी । जगाम जगतीं बाला छिन्ना तु कदली यथा ॥ ६ ॥
सा मुहूर्तात् समाश्वस्य प्रतिलभ्य च चेतनाम् । तच्छिरः समुपाघ्राय विललापायतेक्षणा ॥ ७ ॥
हा हतास्मि महाबाहो वीरव्रतमनुव्रत । इमां ते पश्चिमावस्थां गतास्मि विधवा कृता ॥ ८ ॥
प्रथमं मरणं नार्या भर्तुर्वैगुण्यमुच्यते । सुवृत्त साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ ९ ॥

यत् येन कारणेन मया सह चीरवसनो रामः प्रस्थापितः तादृशं विप्रियं किं कृतम् ॥ ५ ॥ एवमिति । तपस्विनी शोचनीया । जगतीं भूमिं जगाम । मूर्च्छितेत्यर्थः । बाला मृदुबुद्धिरित्यर्थः ॥ ६ ॥ समाश्वस्य उच्छ्वासं प्राप्य । चेतनां ज्ञानम् । आयतेक्षणा अश्रुमिश्रत्वेन शिरोवलोकनार्थं विस्तृत विलोचनेत्यर्थः ॥७॥ वीरव्रतं शत्रुमहत्वा न निवर्तिष्य इति सङ्कल्पम् । अनुव्रत अनुप्राप्त । गताऽस्मि दृष्टवत्यास्मि । गत्यर्था ज्ञानार्था इति न्यायात् । अतो विधवा कृता ॥८॥ प्रथमं भर्तुर्मरणं भार्यादोषनिमित्तकं भवति तत्त्वत्र न पश्यामीत्याह–प्रथममिति । प्रथमं भर्तुर्मरणं नार्या वैगुण्यं वैगुण्यहेतुकम् । सुवृत्तस्त्वं साधुवृत्ताया ममाग्रतः संवृत्तः मृतः, कथमिदं सङ्गच्छत इति भावः । अस्मिन् पक्षे न सुवृत्तपदस्वारस्यम् । यद्वा भर्तृमरणस्य महोष एव हेतुरित्याह–प्रथममिति । विगुण एव वैगुण्यम् । स्वार्थे ष्यञ् । प्रथमं भर्तृमरणं भार्यादोषनिमित्तकमिति सुप्रसिद्धम् । अतो हे सुवृत्त साधुवृत्त । ॥१०४॥

आर्येण रामेणेत्यन्वयः । चीरवसनं दत्त्वा मया सह प्रव्राजित इत्यन्वयः ॥ ५ ॥ ६ ॥ तच्छिरस्समुपास्थाय इति पाठः । समुपास्थाय स्वसमीपे स्थापयित्वा ॥ ७ ॥ वीरव्रतमनुव्रत वीरव्रतस्याचरणशील । गताऽस्मि दृष्टवत्यस्मि ॥ ८ ॥ प्रथमं भर्तृमरणं नार्या वैगुण्यं दुश्चारित्रहेतुकमुच्यते । तथा सति साधुवृत्ताया मम

साधुवृत्तायाः सम्यग्जीवनवत्याः । ममाग्रतस्त्वं मृतोऽसि । मद्वैगुण्यहेतुकं त्वन्मरणमिति भावः । सुवृत्तेत्यनेन त्वद्वैगुण्यहेतुकं न भवतीति ज्ञापितम् ॥ ९ ॥ स्वस्य वैगुण्यसद्भावे निदर्शनमाह–दुःखादिति । दुखाद्दुःखम् अत्यन्तदुःखम् । प्रपन्नायाः वनप्रस्थानं प्रथमं दुःखम्, तस्मादपि दुःखं रावणेनापहरणम्, तत् प्राप्ताया इत्यर्थः । सम्प्रति भर्तृमरणेन शोकसागरे निमग्नायाः । इयं च षष्ठी " यस्य च भावेन भावलक्षणम् " इत्यस्मि

दुःखाद्दुःखं प्रपन्नाया मग्नायाः शोकसागरे । यो हि मामुद्यतस्त्रातुं सोऽपि त्वं विनिपातितः ॥ १० ॥
सा श्वश्रूर्मम कौसल्या त्वया पुत्रेण राघव । वत्सेनेव यथा धेनुर्विवत्सा वत्सला कृता ॥ ११ ॥
आदिष्टं दीर्घमायुस्ते यैरचिन्त्यपराक्रम । अनृतं वचनं तेषामल्पायुरसि राघव ॥ १२ ॥
अथवा नश्यति प्रज्ञा प्राज्ञस्यापि सतस्तव । पचत्येनं यथा कालो भूतानां प्रभवो ह्ययम् ॥ १३ ॥

न्नर्थे । शोकसागरे मग्नायाः शोकसागरे मग्नायां मयि । दुःखाद्दुःखं प्रपन्नायाः प्रपन्नायां सत्याम् । यो मां त्रातुमुद्यतः स त्वमपि विनिपातित इति सम्बन्धः ॥ १० ॥ न केवलं ममैव दुःखम्, मातुश्चेत्याह–सेति । सा मम श्वश्रूः कौसल्या वत्सला धेनुर्यथा धेनुरिव त्वया हतेन पुत्रेण वत्सेनेव विवत्सा कृता ॥ ११ ॥ रामानु०–वत्सेनेव त्वया धेनुर्यथा धेनुरिव सेति यथेवशब्दयोर्निर्वाहः ॥ ११ ॥ यैः ब्राह्मणैः दीर्घमायुरित्यादिष्टम् उपदिष्टम् । तेषां वचनमनृतमासीत् । अनृतत्वे हेतुमाह अल्पायुरसीति । अचिन्त्यपराक्रमेत्यनेन ते पराक्रमं दृष्ट्वा तैरुक्तम्, न तु शास्त्रं दृष्ट्वेति गम्यते ॥ १२ ॥ अथवा तेषामनृतवादित्वं नास्त्येव किन्तु तवैव भाग्यविपर्यासात्तेषामपि प्रज्ञा नष्टेति पक्षान्तरमवलम्बते–अथवेति । प्रभवत्यस्मादिति प्रभवः । भूतानां

अग्रतः संवृत्तः, ममापचारं विनैव कथं मृतोऽसीत्यर्थः ॥ ९ ॥ दुःखादित्यादिसार्धश्लोक एकं वाक्यम् । यस्त्वं मां त्रातुमुद्यतः सोऽपि त्वं संहृत्य राक्षसैर्विनिपातितस्सन् मम कारणान्निहतः । अतो दुःखाद् दुःखं प्रपन्नायाः शोकसागरे मग्नायाः मम, इतः परं मरणमेव वरमिति शेषः ॥१०॥ वत्सला कौसल्या वत्सेन त्वया धेनुर्यथा धेनुरिव विवत्सा कृतेति योजना ॥ ११ ॥ आदिष्टमिति । अनृतत्वे हेतुमाह अल्पायुरसीति ॥ १२ ॥ अथवा न तेषामनृतवादित्वम्, तव भाग्यविपर्ययात्

स०–प्राज्ञस्यापि सतस्तव बुद्धिमत्त्वेन सम्प्रतिपन्नस्यापि तव प्रज्ञा नश्यत्यथवा नष्टा किमित्यर्थः । अव्ययानामनेकार्थत्वादथवेति किमर्थः । एतादृशस्यापि बुद्धिभ्रंश ईशायत्त इत्याह–पचतीति । हि यतः भूतानां कालः प्रभवः उत्पादकः । भूतानां कालः संहारकश्च । तत एनं भूतसङ्घं पचति पाचयति । तत्तत्कर्मानुरोधेन बुद्धिभ्रंशं वा सद्बुद्धिं वा दत्वा तत्तत्फलं भोजयति । अथवा अथवेति श्लोकः पूर्वोक्तपक्ष एव

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कारणभूतः । अयं कालः परमात्मा । यथा येन प्रकारेण । एनं पचनविषयभूतम् । पचति पक्वकर्माणं करोति । तथा प्राज्ञस्य भविष्यदर्थवेदिनोऽपि सतः सत्पुरुषस्य प्रज्ञा । तव त्वयि विषये । नश्यति नष्टेत्यर्थः । यद्वा पूर्वमचिन्त्यपराक्रमेति तव कथं विपत्तिरित्यभिप्रायेण सम्बोधितम् । तत्र पक्षान्तरमाह–अथवेति । एनं रामम् । येन प्रकारेण कालः पचति तथाऽस्य प्राज्ञस्यापि प्रज्ञा नश्यति । अतो विपत्तिरियमिति भावः ॥ १३ ॥ हि यस्माद् व्यसनानां वर्जने प्रतिरोधे कुशलोऽसि । अतः अदृष्टम् अचिन्तितं सौप्तिकत्वेनादृष्टं वा मृत्युम् । कस्मादापन्नः कथमापन्नोऽसीत्यर्थः ॥ १४ ॥

अदृष्टं मृत्युमापन्नः कस्मात्त्वं नयशास्त्रवित् । व्यसनानामुपायज्ञः कुशलो ह्यसि वर्जने ॥ १४ ॥
तथा त्वं सम्परिष्वज्य रौद्रयाऽतिनृशंसया । कालरात्र्या ममाच्छिद्य हृतः कमललोचन ॥ १५ ॥
उपशेषे महाबाहो मां विहाय तपस्विनीम् । प्रियामिव समाश्लिष्य पृथिवीं पुरुषर्षभ ॥ १६ ॥

रौद्रया क्रूरया । कालरात्र्या यस्यां रात्रौ समुद्रतीरे निविष्टोऽसि तया रात्र्या । सम्परिष्वज्य । मम मत्तः । आच्छिद्य अपहृत्य । तथा हृतोऽसीति सम्बन्धः । यद्वा मयेति पाठः । रौद्रया अतिनृशंसया । अत्यन्तनिर्दयया कालरात्र्या कर्त्र्या । मया करणभूतया । संपरिष्वज्य आच्छिद्य बलात्कृत्य । तथा हृत इति । कालरात्रिर्नाम सर्वभूतापहारिणी काचन शक्तिः । यद्वा मया कालरात्र्येति व्यस्तरूपकम् । सम्परिष्वज्य त्वमाच्छिद्य बलाद्धृतोऽसीति, घोरवैधव्यलक्षणयुक्तत्वेन क्रूराया मे परिष्वङ्ग एव तेऽन्तहेतुरासीदित्यर्थः । शिरश्छेदादेरश्लीलत्वेन तथेत्युक्तम् । कमललोचनेति हेतुगर्भम् । कमललोचनत्वात् त्वं कालरात्र्या हृतोऽसि । परिकरानुप्राणितरूपकालङ्कारः ॥१५॥ उपशेष इति । तपस्विनीं शोचनीयाम् । प्रियां मत्तः प्रियाम् ।

तेषामपि प्रज्ञा नष्टेति पक्षान्तरमवलम्बते–अथवेति । भूतानां प्रभवः कालो यथा येन कारणेन एनं त्वां पचति मारयति तेन कारणेन प्राज्ञस्यापि सतः भविष्यदर्थज्ञानवतोऽपि सत्पुरुषस्य त्वद्विषये प्रज्ञा नश्यतीत्यर्थः ॥ १३ ॥ अदृष्टमिति । व्यसनानां वर्जने प्रतिरोधे कुशलोऽसि अथवाप्येतादृशोपायज्ञः । अदृष्टमचिन्तितं मृत्युं कस्मादापन्नः कथं प्राप्नोषीति योजना ॥ १४ ॥ कमललोचन ! मया हेतुना, रौद्रया नृशंसया कालरात्र्या सम्परिष्वज्य आच्छिद्य

.पक्षान्तरमाश्रित्य प्रवृत्तः । प्राज्ञस्यापि सतः दैवज्ञसत्त्वस्य तव विषये प्रज्ञा नश्यति नष्टा, अतस्तद्वचनानुतीभवनमुचितम् । तन्नाशे निमित्तमाह पचतीति । एनं दैवज्ञं भूतानां प्रभवः कालः प्रभवोऽस्यास्तीत्यच् प्रभवत्यस्मिन्निति वा उत्पत्तिकालः । तथा यथावचनमनृतं भवेत्तथा पचति परिपाकं नयति, तस्यातिसूक्ष्मत्वादिति भावः । पूर्वं दैवज्ञैरिति बहुवचनम् अत्र प्राज्ञस्येत्येकवचनं च वक्तारो बहुलाः, प्रज्ञा तु त्वदेकोच्छ्रायविषयेति सम्भवतः ॥ १३
स०–प्रियामिव मदपेक्षया पृथिवीं नारीं तद्रूपां रमणीम्, आश्लिष्येति शेषः । यद्वा प्रियां तपस्विनीं नारीं भार्यां मामिव पृथिवीं पितृपितामहादिपालितामपि विहाय सह रक्षोरक्षितक्षितौ शेष इत्यर्थः ॥ १६

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरुषर्षभेत्यनेन दक्षिणस्य शठत्वमनुचितमिति द्योत्यते ॥ १६ ॥ अर्चितमिति । मया सह । तव त्वया । यदर्चितं तत्ते धनुः इदम् एतादृशंजातमित्यर्थः ॥ १७ ॥ पित्रेति । सर्वैः पितृभिः सार्धं स्थितेन दशरथेन समागत इति संबन्धः ॥१८॥ दिवीति । महत्कर्मकृतां महाकर्मकृताम् । आत्वाभाव आर्षः । प्रियं कर्मफलत्वेन काङ्क्षणीयं पुण्यम् । आत्मनो राजर्षिवंशम् इक्ष्वाकुप्रमुखम्, दिवि नक्षत्रभूतः विमानस्थः सन् समवेक्षसे पश्यसि ॥ १९ ॥ किमिति ।

अर्चितं सततं यत्तत् गन्धमाल्यैर्मया तव । इदं ते मत्प्रियं वीर धनुः काञ्चनभूषणम् ॥ १७ ॥
पित्रा दशरथेन त्वं श्वशुरेण ममानघ । सर्वैश्च पितृभिः सार्धं नून स्वर्गे समागतः ॥ १८ ॥
दिवि नक्षत्रभूतस्त्वं महत्कर्मकृतां प्रियम् । पुण्यं राजर्षिवंशं त्वमात्मनः समवेक्षसे ॥ १९ ॥
किं मां न प्रेक्षसे राजन् किं मां न प्रतिभाषसे । बालां बाल्येन सम्प्राप्तां भार्यां मां सहचारिणीम् ॥ २० ॥
संश्रुतं गृह्णता पाणिं चरिष्यामीति यत्त्वया । स्मर तन्मम काकुत्स्थ नय मामपि दुःखिताम् ॥ २१ ॥

बालां बाल्येन संप्राप्ताम् बाल्य एव त्वयोढामित्यर्थः । भार्यां सदा भर्तुं योग्याम् । माम् एतादृशावस्थामापन्नां सहचारिणीं मां किं न प्रेक्षसे किं न प्रतिभाषस इति सम्बन्धः ॥ २० ॥ संश्रुतमिति । मम पाणिं गृह्णता त्वया चरिष्यामि सहचरिष्यामीति यत् संश्रुतं प्रतिज्ञातम् तत् स्मर । स्मृत्वा

बलात्कृत्य त्वं तथा हृत इति योजना । कालरात्रिः सर्वभूतापहारिणी काचन शक्तिः ॥ १५ ॥ १६ ॥ मया सह तव त्वया अर्चितं धनुरिदमेतादृशं जातमित्यर्थः ॥ १७ ॥ सर्वैः पितृभिस्सार्धं स्थितेन दशरथेन समागत इति सम्बन्धः ॥ १८ ॥ महत्कर्मकृतां महान्तश्च ते कर्मकृतश्च तेषां प्रियं कर्मफलत्वेन काङ्क्षणीयम् आत्मनः पुण्यं राजर्षिवंशं दिवि नक्षत्रभूतस्त्वं समुपेक्षस इति सम्बन्धः ॥ १९ ॥ २० ॥ त्वया सह चरिष्यामीति मम पाणिं गृह्णता भवता यत्संश्रुतं

स०–सर्वैः पितृभिः पितामहादिभिस्सार्धं स्थितेन, त्वदपेक्षया पूर्वं गतत्वात् । पित्रा श्वशुरेण दशरथेन स्वर्गे समागतः मिलितः । "पितामहाश्च पितरो नाम कीर्तिताः" इत्यैतरेयभाष्योक्तेः पितामहादीनां पितृशब्दवाच्यता सम्भवति । अनन्तरेयनेन पुण्यलभ्यस्वर्गगतियोग्यतां सूचयति ॥ १८ ॥ दिवि नक्षत्रभूतस्त्वं महत्कर्मकृतं महतां कर्म महत्कर्म तत्कृतं महात्मनां पुण्यकर्मफलत्वेन प्राप्यं राजर्षिवंशम् इक्ष्वाकुवंशम् किमुपेक्षसे । बहुकर्म कृत्वाऽस्माकमिक्ष्वाकुवंशसम्भवः स्यादिति काङ्क्षितं वंशं किमुपेक्षसे, उपेक्ष्य गत इति यावत् । दिवि नक्षत्रभूतं प्रकाशमानमिति यावत् । महत्कर्मकृतं पुण्यं राजर्षिवंशं पित्रादिकं यथा राम ईक्षसे पश्यसि तत्र गतः । तथा पुण्यम् आत्मनो मम राजर्षिवंशं जनकवंशम् किमुपेक्षसे मदनयनेनेति वा ॥ १९ ॥

For Private And Personal Use Only

मामपि त्वत्समीपं नय ॥ २१ ॥ कस्मादिति । त्यक्त्वा त्वां विहाय दुःखितां मामपि प्रेयसीमपि माम् । अपहाय अस्माल्लोकात् अमुं लोकं परलोकम् । कस्माद्धेतोः गतोऽसि ॥ २२ ॥ कल्याणैरिति । यदित्यर्थे यत्तदित्यपि प्रयुज्यते । कल्याणैः मङ्गलैः । शुभैश्चन्दनादिभिर्वा सुवर्णाभरणैर्वा । उचितम् अभ्यस्तं यत्तच्छरीरं मयैव परिष्वक्तं नान्यथा । एतदद्य क्रव्यादैः श्येनादिभिः विपरिकृष्यते । अत्र मयैवेत्यनेन रामस्य दारान्तरं नास्तीति गम्यते ॥ २३ ॥ अग्निष्टोमेति । वनवासनिवृत्त्यनन्तरं त्वम् आप्तदक्षिणैः पर्याप्तदक्षिणैः अग्निष्टोमादिभिर्यज्ञैः । इष्टवान् कृतदेवपूजनो भूत्वा । अग्नि

कस्मान्मामपहाय त्वं गतो गतिमतां वर । अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखिताम् ॥ २२ ॥
कल्याणैरुचितं यत्तत् परिष्वक्तं मयैव तु । क्रव्यादैस्तच्छरीरं ते नूनं विपरिकृष्यते ॥ २३ ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः । अग्निहोत्रेण संस्कारं केन त्वं तु न लप्स्यसे ॥ २४ ॥
प्रव्रज्यामुपपन्नानां त्रयाणामेकमागतम् । परिप्रक्ष्यति कौसल्या लक्ष्मणं शोकलालसा ॥ २५ ॥
स तस्याः परिपृच्छन्त्या वधं मित्रबलस्य ते । तव चाख्यास्यते नूनं निशायां राक्षसैर्वधम् ॥ २६ ॥

होत्रेण यज्ञीयवह्निना संस्कारं केन हेतुना न लप्स्यसे ? अत्र वनवासात्पूर्वमग्न्याधानाद्यभावात्तन्निवृत्त्यनन्तरमाधानाग्निष्टोमादिकमनुष्ठाय पश्चात् क्रमप्राप्तायुरवसाने यज्ञीयाग्निभिः संस्कारं प्राप्तुं योग्यस्त्वं कथमेवं मध्ये मरणं प्राप्तोऽसीति भावः । अनेन वनवासात्पूर्वं रामेण यज्ञादिकं नानुष्ठितमिति सूच्यते । अयमर्थोऽयोध्याकाण्डे सम्यक्प्रतिपादितः ॥ २४ ॥ प्रव्रज्यामिति । प्रव्रज्यां प्रवासम् । "व्रजयजोर्भावे क्यप्" इति क्यप् । उपपन्नानां प्राप्तानाम् । त्रयाणां रामादीनां मध्ये एकं लक्ष्मणमागतम् । शोकलालसा शोकमन्दा कौसल्या परिप्रक्ष्यति ॥२५॥ स इति । सः लक्ष्मणः ।

तत् स्मर । हे काकुत्स्थ ! दुःखितां मामपि नयेति सम्बन्धः ॥ २१ ॥ २२ ॥ कल्याणैरिति । यत्त्वदीयं कल्याणैर्मङ्गलैरुचितं यत् तच्छरीरं मयैव परिष्वक्तं तदेवाद्य क्रव्यादैर्विपरिकृष्यत इति सम्बन्धः ॥ २३ ॥ अग्निहोत्रेण वैतानाग्निना ॥ २४ ॥ प्रव्रज्यां प्रवासम् ॥ २५ ॥ मित्रबलस्य वानरबलस्य ॥ २६ ॥

स०--त्वामपहाय अगतिमताम् अगतिरिति मतां गतिरहितेति सम्मतां मां रमारूपिणीं माम् । दुःखितां तद्वद्दिश्यमानां मां कस्मात्त्यक्त्वा गत इत्यन्वयः । दुःखातिशयाद्वा पुनरुक्तिः । " परिहासे प्रलापे च वागनर्थापि दृश्यते ।" अनर्था निरर्था । चरितार्थत्वेनानधिकार्थेति दीपिकाव्याख्यानात् ॥ २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

परिपृच्छन्त्यास्तस्याः ते मित्रबलस्य वधं तव वधं चाख्यास्यते ॥२६॥ सेति । सुप्तं हतं सुप्तत्वदशायां हतमित्यर्थः । अवदीर्णेन भिन्नेन हृदयेनोपलक्षिता सा न भविष्यति न जीविष्यति ॥ २७ ॥ ममेति । अनार्यायाः दुःशीलायाः मम हेतोः मन्निमित्तम् । अनर्हः एतादृशसौप्तिकवधानर्हः । सागरमुत्तीर्य गोष्पदे हतः, खरतरखरादीन् हत्वा क्षुद्रेण प्रहस्तेन हत इत्यर्थः ॥ २८ ॥ रामानु०—अनर्हः एतादृशवधानर्हः । गोष्पदे हतः । अतिबलपराक्रमखरदूषणादिचतुर्दशसहस्र राक्षसापेक्षया हन्तुः प्रहस्तस्य गोष्पदत्वोक्तिः ॥ २८ ॥ स्वकुलपांसनी स्वकुलदूषणी । अहं मोहात् अज्ञानात् दाशरथेनोढाऽस्मि । अतो रामस्य भार्यैव मृत्यु

सा त्वां सुप्तं हतं श्रुत्वा मां च रक्षोगृहं गताम् । हृदयेनावदीर्णेन न भविष्यति राघव ॥ २७ ॥ मम हेतोरनार्याया ह्यनर्हः पार्थिवात्मजः । रामः सागरमुत्तीर्य सत्त्ववान् गोष्पदे हतः ॥२८॥ अहं दाशरथेनोढा मोहात् स्वकुलपांसनी । आर्यपुत्रस्य रामस्य भार्या मृत्युरजायत ॥२९॥ नूनमन्यां मया जातिं वारितं दानमुत्तमम् । याऽहमद्येह शोचामि भार्या सर्वातिथेरपि ॥३०॥ साधु पातय मां क्षिप्रं रामस्योपरि रावण । समानय पतिं पत्न्या कुरु कल्याणमुत्तमम् ॥ ३१ ॥ शिरसा मे शिरश्चास्य कायं कायेन योजय । रावणानुगमिष्यामि गतिं भर्तुर्महात्मनः * ॥ ३२ ॥

रजायत ॥ २९ ॥ नूनमिति । मया अन्यां जातिं प्राप्य । यद्वा अन्यां जातिम् अन्यस्मिन् जन्मनि । उत्तमं दानं वारितम्, कन्यादानं वारितमित्यर्थः । तत्र हेतुमाह येति । सर्वे अतिथयो यस्य तस्य सर्वातिथेः । सर्वरक्षितुरित्यर्थः । सर्वातिथिपूजकस्येति वाऽर्थः । भार्यापि याऽहम् इह जन्मनि अद्य भोगकाल एव शोचामि ॥ ३० ॥ साध्विति । समानय योजय । उत्तमं कल्याणं पतिसंयोगरूपम् ॥ ३१ ॥ ३२ ॥

न भविष्यति न जीविष्यति ॥ २७ ॥ अनर्हः । एवंविधवधानर्हः । सागरमुत्तीर्य गोष्पदे हतः, दुर्धरान् खरादीन् हत्वा दुर्बलेन प्रहस्तेन हत इत्यर्थः ॥२८॥ स्वकुलपांसनी अहं दाशरथेन रामेण यस्मादूढा आर्यपुत्रस्य रामस्य भार्या भार्यैव मृत्युरजायतेति सम्बन्धः ॥२९॥ अन्यां जातिम् अन्यस्मिन्नपि जन्मनीत्यर्थः । उत्तमं दानमित्यनेन कन्यादानं विवक्षितम् । सर्वातिथेः सर्वे अतिथयो यस्य तस्य सर्वातिथिपूजकस्य भार्याऽहं शोचामीति सम्बन्धः॥३०॥ समानय योजय ॥३१–३२॥

* मुहूर्तमपि नेच्छामि जीवितुं पापजीविता । श्रुतं मया वेदविदां ब्राह्मणानां पितुर्गृहे ॥ यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः । क्षमा यस्मिन् दमस्त्यागः सत्यं धर्मः कृतज्ञता ॥ अहिंसा चैव भूतानां तमृते का गतिर्मम ॥ इत्यधिकः पाठः केषुचित्पुस्तकेषु दृश्यते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शिरः धनुश्च । तत्र पुरोदेशे ॥ ३३ ॥ एवमिति । लालप्यमानायां प्रलपन्त्याम् । भर्तारं रावणम् । अनीकस्थः द्वाररक्षी । ननु लौकिकीषु काचिदिव सीता भर्तृशिरस्साक्षात्कारेऽपि चिरं रुदित्वा विलप्य कथं जीवितं धारयति स्म ? उच्यते–अनयोर्दिव्यदम्पत्योः परस्परसत्तैव जीवितधारणे निमित्तम्, ननु ज्ञानाज्ञाने । अतो भर्तुर्जीवितवैकल्याभावात्सा जीवति स्म ॥ ३४ ॥ विजयस्वेति । अनुप्राप्तम्, द्वारीति शेषः ॥ ३५ ॥ वयमिति ।

इति सा दुःखसन्तप्ता विललापायतेक्षणा । भर्तुः शिरो धनुस्तत्र समीक्ष्य च पुनः पुनः ॥ ३३ ॥ एवं लालप्यमानायां सीतायां तत्र राक्षसः । अभिचक्राम भर्त्तारमनीकस्थः कृताञ्जलिः ॥ ३४ ॥ विजयस्वार्यपुत्रेति सोऽभिवाद्य प्रसाद्य च । न्यवेदयदनुप्राप्तं प्रहस्तं वाहिनीपतिम् ॥ ३५ ॥ अमात्यैः सहितैः सर्वैः प्रहस्तः समुपस्थितः । तेन दर्शनकामेन वयं प्रस्थापिताः प्रभो ॥३६॥ नूनमस्ति महाराज राजभावात् क्षमान्वितम् । किंचिदात्ययिकं कार्यं तेषां त्वं दर्शनं कुरु ॥ ३७ ॥ एतच्छ्रुत्वा दशग्रीवो राक्षसप्रतिवेदितम् । अशोकवनिकां त्यक्त्वा मन्त्रिणां दर्शनं ययौ ॥ ३८ ॥ स तु सर्वं समर्थ्यैव मन्त्रिभिः कृत्यमात्मनः । सभां प्रविश्य विदधे विदित्वा रामविक्रमम् ॥३९॥

भयेन बहुवचनम्, बहूनामन्तःपुरे समागमासम्भवात् ॥ ३६ ॥ प्रहस्तेन प्रेषितोऽपि कथमनवसरे समागतोऽसीत्याशङ्क्याह–नूनमिति । राजभावात् राजत्वाद्धेतोः । क्षमान्वितम्, तदानीमेव कर्तव्यत्वेऽपि तव राजभावात् क्षमया त्वदाज्ञाप्रतीक्षणेनान्वितम् । आत्ययिकम् आतिपातिकम् । किंचित् कार्यमस्ति नूनम् । तत्तस्मात्तेषां प्रहस्तादीनां दर्शनं कुर्वित्यन्वयः ॥ ३७ ॥ ३८ ॥ स रावणः । रामविक्रमं विदित्वा सभां प्रविश्य आत्मनः सर्वं कृत्यं मन्त्रिभिः सह समर्थ्य निश्चित्य विदधे, प्रकृतकार्यमिति शेषः ॥ ३९ ॥

एवमिति । भर्तारं रावणम् । अनीकस्थः द्वाररक्षी राक्षसः॥३४॥ आर्यपुत्रशब्दो यद्यपि स्त्रीभिर्भर्तरि प्रयोज्यते प्रायेण, तथापि पूज्यमात्रे सामान्यतः प्रयोगोऽपि बोध्यः ॥ ३५ ॥ ३६ ॥ प्रहस्तेन प्रेषितोऽपि कथमनवसरे समागतोऽसीत्याशङ्क्याह–नूनमिति । हे महाराज ! राजभावात् क्षमान्वितं तदानीमेव कर्तव्यत्वेऽपि तव राजभावात् राजत्वाद्धेतोः क्षमया त्वदाज्ञाप्रतीक्षणेनान्वितम्, आत्ययिकं प्रयाससाध्यं किञ्चित्कार्यमस्ति नूनम्, तस्मात्तेषां प्रहस्तादीनां दर्शनं कुर्विति योजना ॥३७॥ मन्त्रिणां दर्शनम्, उद्दिश्येति शेषः ॥ ३८ ॥ समर्थ्य निश्चित्य ॥ ३९ ॥ ४० ॥

For Private And Personal Use Only

निर्याणं निर्गमनम् ॥ ४० ॥ समर्थयैत्युक्तं विवृणोति–राक्षसेन्द्र इति । रामकार्यविनिश्चयं रामविषये स्वकृत्यानिश्चयम् ॥ ४१ ॥ ४२ ॥ स्फुटकोणाहतेन उल्बणवादनदण्डाहतिजनितेन । कार्ये कारणोपचारः । वक्तव्यं च न कारणमिति । युद्धार्थं निर्यातेति पुरे प्रवदन्ति चेद्बलाध्यक्षाः तदानीं देव्याः सन्निधौ

अन्तर्धानं तु तच्छीर्षं तच्च कार्मुकमुत्तमम् । जगाम रावणस्यैव निर्याणसमनन्तरम् ॥ ४० ॥ राक्षसेन्द्रस्तु तैः सार्धं मन्त्रिभिर्भीमविक्रमैः । समर्थयामास तदा रामकार्यविनिश्चयम् ॥ ४१ ॥ अविदूरस्थितान् सर्वान् बलाध्यक्षान् हितैषिणः । अब्रवीत् कालसदृशो रावणो राक्षसाधिपः ॥ ४२ ॥ शीघ्रं भेरीनिनादेन स्फुटकोणाहतेन मे । समानयध्वं सैन्यानि वक्तव्यं च न कारणम् ॥४३॥ ततस्तथेति प्रतिगृह्य तद्वचो बलाधिपास्ते महदात्मनो बलम् । समानयंश्चैव समागमं च ते न्यवेदयन् भर्तरि युद्धकाङ्क्षिणि ॥ ४४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्वात्रिंशः सर्गः ॥ ३२ ॥

कथितं स्वकीयं रामसैन्यवधवृत्तान्तवाक्यमसत्यमिति तस्याः विदितं स्यादिति भावः ॥ ४३ ॥ आत्मनः आत्मनाम् । भर्तरि विषये ॥ ४४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वात्रिंशः सर्गः ॥ ३२ ॥

राक्षसेन्द्र इति । रामकार्यविनिश्चयं रामविषयस्वकर्तव्यनिश्चयमित्यर्थः ॥ ४१ ॥ ४२ ॥ शीघ्रमिति । स्फुटकोणाहतेन उल्बणवादनदण्डहतेन । न च वक्तव्यं कारणं देव्याः पुरतः स्वोक्तं रामहननविषयवाक्यमसत्यमिति सीता ज्ञास्यतीति शङ्कया वक्तव्यं च न कारणमित्युक्तम् । " सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमम् " इत्यारभ्य "इति सा दुःखसन्तप्ता विललापायतेक्षणा " इत्यन्तानां सीताप्रलापवाक्यानां वास्तवार्थोऽयमाशयः–सीताऽपि रामशिरआदिकं मायाकल्पितमिति ज्ञात्वाऽपि तत्सत्यमिति मत्वेव मिथ्याप्रलापादिना राक्षसान् वञ्चयितुं बहुविधं प्रलपति ॥ ४३ ॥ ४४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्वात्रिंशः सर्गः ॥ ३२ ॥

For Private And Personal Use Only

अथ सरमा सीतां समाश्वासयति त्रयस्त्रिंशे—सीतामिति । मोहितां रामविषयविपरीतज्ञानवतीम् । सरमा विभीषणभार्या । प्रणयिनीं स्नेहवतीम् । ॥ १ ॥ २ ॥ ननु राक्षस्यास्तस्याः कथं सख्यमाश्वासनं वेत्यत्राह—सा हीति । हि यस्माद्रावणादिष्टा रक्षन्ती सा आत्मना रक्ष्यमाणया मित्रं सखी कृता अत इत्यर्थः । रक्षन्ती तत्रतत्रावसरे सीताया योगक्षेमविधानं कुर्वतीत्यर्थः । रावणादिष्टा योगक्षेमे रावणेनादिष्टा । सानुक्रोशा सदया । अनेन सख्य

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी । आससादाथ वैदेहीं प्रियां प्रणयिनीं सखीम् ॥ १ ॥ मोहितां राक्षसेन्द्रेण सीतां परमदुःखिताम् । आश्वासयामास तदा सरमा मृदुभाषिणी ॥ २ ॥ सा हि तत्र कृता मित्रं सीतया रक्ष्यमाणया । रक्षन्ती रावणादिष्टा सानुक्रोशा दृढव्रता ॥ ३ ॥ सा ददर्श ततः सीतां सरमा नष्टचेतनाम् । उपावृत्योत्थितां ध्वस्तां वडवामिव पांसुलाम् ॥ ४ ॥ तां समाश्वासयामास सखीस्नेहेन सुव्रता ॥ ५ ॥

करणे हेतुरुक्तः । दृढव्रता दृढप्रतिज्ञा । अनेन सख्यस्याप्रच्युतिर्दर्शिता ॥ ३ ॥ रामानु०—सा हीति । विभीषणभार्यायाः सरमायाः रक्षन्ती रावणादिष्टेति सीतारक्षणे रावणनियोगः प्रतीयते । उपरि " सखीस्नेहेन तद्भीरु मया सर्वं प्रतिश्रुतम् । लीनया गहने शून्ये भयमुत्सृज्य रावणात् ॥ " इति रावणभयाद् गूढावस्थानेन रावणोक्तवाक्यश्रवणं च प्रतीयते । विभीषणभार्याया रावणेन नियोगोऽनुचित इव प्रतिभाति । रावणनियुक्तत्वे तद्भयाद्गूढावस्थानमनुपपन्नमिति प्रतीयते । अत्र परिहारो विद्वद्भिश्चिन्तनीयः ॥ ३ ॥ आसादनानन्तरं तदवस्थादर्शनमाह—सेति । नष्टचेतनां विपरीतज्ञानवतीम् । उपावृत्य लुठित्वा । ध्वस्तां धूल्युपहताम् । वडवाम् अश्वस्त्रियम् । पांसुलां पांसुमतीम् ॥ ४ ॥ तामिति । पूर्वं करस्पर्शादिना समाश्वासनमुक्तम् । इदानीं रावणवृत्तान्तप्रदर्शनेनेति ज्ञेयम् ॥ ५ ॥

सीतामिति । सरमा विभीषणभार्या । विभीषणपत्नीयं सरमा सीतायां भक्तिमती । सा हि रावणेन ज्ञातसात्त्विकभावा अतिभर्त्सनेन नाशमाशङ्क्य सीताश्वासनार्थं सन्दिष्टेति बोध्यम् । प्रणयिनी स्नेहवती ॥ १ ॥ २ ॥ ननु विभीषणभार्यायाः सरमायाः कथं सख्यम् आश्वासनं वा ? तत्राह—सा हीति । हि यस्माद्रावणादिष्टा सीतां रक्षन्ती सा आत्मना रक्ष्यमाणया सीतया मित्रं सखी कृता । " ज्येष्ठा कन्याऽनला नाम विभीषणसुता कपे । तया ममेदमाख्यातं मात्रा प्रहितया स्वयम् " इति सुन्दरकाण्डे सीतयोक्तत्वात् अत्रापि सानुक्रोशेत्युक्तत्वाच्च विभीषणभार्यायास्सरमायास्सीतायास्सखित्वं तत्समाश्वासनञ्च युक्तमिति भावः । तत्र अशोकवनिकायाम् । सानुक्रोशा दुःखितेषु सदया । दृढव्रता प्राणैरपि मयेयं रक्षणीयेति दृढप्रतिज्ञा ॥ ३ ॥ उपावृत्य लुठित्वा । ध्वस्तां पीडिताम् । अध्वश्रमेण

For Private And Personal Use Only

समाश्वसिहीत्यादि । स्वयं साक्षात् प्रत्युक्तं प्रलापरूपम्, सखीस्नेहेन सर्वाविषयस्नेहेन प्रतिश्रुतम् । प्रतिरुपसर्गमात्रम् ॥ ६ ॥ तदानीमसन्निहितया त्वया कथं श्रुतमित्यत्राह–लीनयेति । लीनया छन्नया ! गगने कुत्रचित्तरुरन्ध्रे । गहन इति पाठे आवृत इत्यर्थः । शून्ये निर्जने । कथं घोराद्रावणाद्भयं त्यक्तम् ? तत्राह–तवेति । तव हेतोः त्वन्निमित्तम् । मे जीवितमपि न प्रियम् । तत्र हेतुर्विशालाक्षीति । तव नयनसौन्दर्यं पश्यन्त्या मे कथं त्वत्पीडा सोढव्येति भावः । ननु विभीषणभार्या कथं सीतारक्षणे रावणेन नियोगार्हा, नियोगे वा कथं तस्याः रावणभयाद्गूढावस्थानम् ? उच्यते–विभीषणा

समाश्वसिहि वैदेहि मा भूत्ते मनसो व्यथा । उक्ता यद्रावणेन त्वं प्रत्युक्तं च स्वयं त्वया । सखीस्नेहेन तद्भीरु मया सर्वं प्रतिश्रुतम् ॥ ६ ॥ लीनया गगने शून्ये भयमुत्सृज्य रावणात् । तव हेतोर्विशालाक्षि न हि मे जीवितं प्रियम् ॥ ७ ॥ स सम्भ्रान्तश्च निष्क्रान्तो यत्कृते राक्षसाधिपः । तच्च मे विदितं सर्वमभिनिष्क्रम्य मैथिलि ॥ ८ ॥ न शक्यं सौप्तिकं कर्तुं रामस्य विदितात्मनः । वधश्च पुरुषव्याघ्रे तस्मिन्नैवोपपद्यते ॥ ९ ॥

वस्थानकाले सीतायोगक्षेमपरामर्शायान्तरङ्गभूता सरमा नियुक्ता । तन्निर्गमनादिदानीमन्तरङ्गवार्ताश्रवणे भीताऽऽसीदिति न विरोधः । नियोगश्च दासीमुखेन । अदर्शनं च स्नुषात्वादिति च बोध्यम् । अन्येयं सरमेत्येके ॥ ७ ॥ मे मया । यत्कृते यन्निमित्तम् । अभिनिष्क्रम्य बहिर्निर्गम्य ॥ ८ ॥ मा भूदस्मदवगमः उपपत्तिश्च तत्र नास्तीत्याह–न शक्यमिति । सौप्तिकं सुप्तौ मारणम् । न केवलमशक्यत्वम्, रामस्य पुरुषधौरेयतया वधयोग्यतापि

शोकेन च ॥४॥५॥ स्वयं रावणः त्वया प्रत्युक्त इति सम्बन्धः । सखीस्नेहेन हेतौ तृतीया ॥ ६ ॥ लीनयेति रावणाद्भयमुत्सृज्य गहने आवृतप्रदेशे शून्ये निर्जने लीनया तत् रावणेनोक्तं श्रुतमिति सम्बन्धः ॥ ७ ॥ सः रावणः यत्कृते निष्क्रान्तः तच्च तदपि विदितमिति सम्बन्धः ॥ ८ ॥ सौप्तिकं कर्म सुप्तमारणम् । वधः जाग्रदवस्थायां हननम् ॥ ९ ॥

स०–अत्यनावश्यकत्वादनन्तरं वदिष्यामीत्यादौ भववार्ताजीवातु सीताया वदिष्यन्ती ततोऽप्यादौ मोहमपहर्त्तीत्याह–न शक्यमिति । सौप्तिकं स्वापरामवध्यापारः । तत्र निमित्तमाह–विजितेति । विजितात्मनः जितमनस्कस्य । विदितात्मन इति पाठे–विदितः अयं करिष्यतीति ज्ञातः आत्मा यत्नो येन न तदेत्यर्थः । पुरुषव्याघ्रे आकृति नति वधश्च स्वतो वा आत्मकालिकः वा नोपपद्यते ॥ ९ ॥

नास्तीत्याह वधश्चेति ॥ ९ ॥ एवं वानरवधोऽप्यनुपपन्न इत्याह–न त्विति । स्वबलाद्रामबलाच्च न वानरा हन्तुं शक्या इत्यर्थः ॥ १० ॥ न केवलं बलादिना, सौभाग्यलक्षणादिभिरप्यतदर्हो राम इत्याह श्लोकत्रयेण–दीर्घेत्यादिना । श्रीमान् कान्तिमान् । प्रतापवान् तेजिष्ठः । संहननोपेतः शोभनावयवसंस्थानः । लक्ष्मणेन सह रक्षितेत्यन्वयः । श्रीमान् विजयश्रीमान् ॥ ११-१३ ॥ कथं तर्हि शिरःप्रभृतिप्रापणम् ? तत्राह–अयुक्तेति । अयुक्तबुद्धि

न त्वेव वानरा हन्तुं शक्याः पादपयोधिनः । सुरा देवर्षभेणेव रामेण हि सुरक्षिताः ॥ १० ॥ दीर्घवृत्तभुजः श्रीमान् महोरस्कः प्रतापवान् । धन्वी संहननोपेतो धर्मात्मा भुवि विश्रुतः ॥ ११ ॥ विक्रान्तो रक्षिता नित्यमात्मनश्च परस्य च । लक्ष्मणेन सह भ्रात्रा कुलीनो नयशास्त्रवित् ॥ १२ ॥ हन्ता परबलौघानामचिन्त्यबलपौरुषः । न हतो राघवः श्रीमान् सीते शत्रुनिबर्हणः ॥ १३ ॥ अयुक्तबुद्धिकृत्येन सर्वभूतविरोधिना । इयं प्रयुक्ता रौद्रेण माया मायाविदा त्वयि ॥ १४ ॥ शोकस्ते विगतः सर्वः कल्याणं त्वामुपस्थितम् । ध्रुवं त्वां भजते लक्ष्मीः प्रियं प्रीतिकरं शृणु ॥ १५ ॥ उत्तीर्य सागरं रामः सह वानरसेनया । सन्निविष्टः समुद्रस्य तीरमासाद्य दक्षिणम् ॥ १६ ॥

कृत्येन अनर्हबुद्धिव्यापारेण । मायाशिरोदर्शनबुद्धेस्तत्कृत्यस्य चात्मलाघवहेतुत्वादिति भावः ॥ १४ ॥ भजते, भविष्यत्सामीप्ये लट्प्रयोगः । प्रियं प्रियवचनम् ॥ १५ ॥ सन्निविष्टः स्थितः ॥ १६ ॥

सर्ववानरहननमप्यशक्यमित्याह–न त्वेवेति ॥ १० ॥ आजानुबाहुत्वादिभाग्यलक्षणे धार्मिकत्वे पौरुषे नयज्ञतायां चेत्येतेषु विचारितेषु तस्य वध्यत्वमिह नास्तीत्याह–दीर्घवृत्तभुज इत्यादिश्लोकत्रयेण ॥ ११-१३ ॥ कथं तर्हि नदीयधनुर्शिरसोरानयनम् ? तत्राह–अयुक्तेति । अयुक्तबुद्धिकृत्येन अनर्हबुद्धिव्यापारेण ॥ १४ ॥ तव भाग्यलक्षणे विचार्यमाणे तव शोकोऽनर्ह इत्याशयेनाह–शोक इति । प्रियं प्रियवचनम् । भजते भजिष्यति ॥ १५ ॥ १६ ॥

स०–देवर्षभेण नारायणेन सुरा इव वानराः रामेण हि यतः सुरक्षिताः अतो न हन्तुं शक्या इत्यन्वयः ॥ १० ॥ प्रियं प्रियवचनम् । ते त्वां भजते, सर्वेऽपि प्रियवक्तारो भविष्यन्तीति भावः । ते तव विषये । प्रियं मम वचनं शृणु । त्वां ध्रुवं भजते, भव इति शेषः । लक्ष्मीश्च भजते । हे भवति । ते प्रियवचनमिति नागोजिभट्टव्याख्यानं मूलकोशेषु पञ्चषेषु भवतिपाठादर्शनात् । " श्रुवः शृ च " इति आदेशे शृणुशब्दो लक्ष्यादिरिति भवतीकारगौरवानापादक इति चासमञ्जसम् ॥ १५ ॥

सागरान्तस्थैः सागरतीरस्थैः ॥१७॥ तीर्णः तीर्णवान् । प्रवृत्तिर्वार्ता ॥१८॥ एष मन्त्रयत इति सान्निध्यद्योतनाय॥१९॥ सीतया सह शुश्रावेत्यन्वयः सर्वोद्योगेन सर्वप्रयत्नेन, जनितमिति शेषः । शब्दं सिंहनादम् ॥ २० ॥ दण्डनिर्घातवादिन्याः दण्डाहत्या शब्दायमानायाः ॥ २१ ॥ भेरिका, ताड्यत इति शेषः । तोयदनिस्वनं तोयदनिस्वनतुल्यम् ॥ २२ ॥ कल्प्यन्ते आकल्प्यन्ते, अलंक्रियन्त इत्यर्थः । युज्यन्ते रथवाजिनः रथेषु वाजिनो

दृष्टो मे परिपूर्णार्थः काकुत्स्थः सहलक्ष्मणः । स हि तैः सागरान्तस्थैर्बलैस्तिष्ठति रक्षितः ॥ १७ ॥ अनेन प्रेपिता ये च राक्षसा लघुविक्रमाः । राघवस्तीर्ण इत्येव प्रवृत्तिस्तैरिहाहृता ॥१८॥ स तां श्रुत्वा विशालाक्षि प्रवृत्तिं राक्षसाधिपः । एष मन्त्रयते सर्वैः सचिवैः सह रावणः ॥ १९ ॥ इति ब्रुवाणा सरमा राक्षसी सीतया सह । सर्वोद्योगेन सैन्यानां शब्दं शुश्राव भैरवम् ॥ २० ॥ दण्डनिर्घातवादिन्याः श्रुत्वा भेर्या महास्वनम् । उवाच सरमा सीतामिदं मधुरभाषिणी ॥२१॥ सन्नाहजननी ह्येषा भैरवा भीरु भेरिका । भेरीनादं च गम्भीरं शृणु तोयदनिस्वनम् ॥ २२ ॥ कल्प्यन्ते मत्तमातङ्गा युज्यन्ते रथवाजिनः । हृष्यन्ते तुरगारूढाः प्रासहस्ताः सहस्रशः ॥ २३ ॥ तत्र तत्र च सन्नद्धाः सम्पतन्ति पदातयः । आपूर्यन्ते राजमार्गाः सैन्यैरद्भुतदर्शनैः । वेगवद्भिर्नदद्भिश्च तोयौघैरिव सागरः ॥ २४ ॥ शस्त्राणां च प्रसन्नानां चर्मणां वर्मणां तथा । रथवाजिगजानां च भूषितानां च रक्षसाम् ॥ २५ ॥

युज्यन्त इत्यर्थः । रथेत्यविभक्तिकनिर्देशो वा । हृष्यन्ते हर्षव्यापारं कुर्वन्ति ॥ २३ ॥ तत्र तत्रेति सार्धश्लोकः । सम्पतन्ति सङ्घीभवन्ति । सैन्यैः सेनासमवेतरथगजतुरगपदातिभिः । अद्भुतदर्शनैः, अलङ्कारविशेषैरिति शेषः । वेगवद्भिर्नदद्भिश्चेति पाठः॥२४॥ शस्त्राणामित्यादिश्लोकद्वयम् । प्रसन्नानां

सागरान्तस्थैः सागरतीरस्थैः ॥१७॥१८॥ तां प्रवृत्तिं राघवस्य सबलोत्तरणवार्ताम् । इतो निर्गत्येति शेषः । मन्त्रयते विचारयति ॥१९॥ शब्दं सिंहनादम्॥२०॥२१॥ सन्नाहो युद्धाय सन्नहनम् ॥ २२-२४ ॥ चर्मणां फलकानाम् । प्रसन्नानां शाणोल्लेखेन निर्मलानाम् । चर्म फलकम् । वर्म कवचम् ॥ २५ ॥

स०-परिपूर्णार्थः अलक्ष्यीकृतरक्षोप्यक्षत्वात् । सहितैः मिलितैः सक्षेमैर्वा तिष्ठति यः स दृष्टः ॥१७॥ यदर्थं रावणः प्रहस्ताहूतो गतः तन्मे विदितमित्युक्तं, तदिदानीमावेदयति-अनेनेति । प्रवृत्तिः वार्ता ॥१८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्मलानाम् । चमर्णा फलकानाम् । भूषितानाम् अत एव प्रभां विसृजताम् उत्पादयताम् । उत्थिताम् ऊर्ध्वं प्रसृताम् । रूपं तेजः । नानौषधीवनदाहेन नानावर्णत्वं सिद्धम् । पश्येत्यत्रापि प्रभैव कर्म । यद्वा विसृज तामिति च्छेदः । तां प्रसिद्धाम् प्रभां पश्य । विसृज, शोकमिति शेषः ॥ २५ ॥ २६ ॥ घण्टानां गजघण्टानाम् । रथानां निस्वनं नेमिसङ्घट्टनजम् । हेषम् आणानामिति च्छेदः । आङ्पूर्वात् "अण शब्दे" इत्यस्माद्धातोः पचाद्यच् । आणानां शब्दायमानानाम् । हेषं शब्दम् । स्त्रीलिङ्गाभावः आर्षः । निस्वनमिति वा अनुवर्त्यते । तूर्यध्वनिं यथा तूर्यध्वनिमिव ॥२७॥ सम्भ्रमः सन्नाहः ।

प्रभां विसृजतां पश्य नानावर्णां समुत्थिताम् । वनं निर्दहतो घर्मे यथा रूपं विभावसोः ॥ २६ ॥ घण्टानां शृणु निर्घोषं रथानां शृणु निस्वनम् । हयानां हेषमाणानां शृणु तूर्यध्वनिं यथा ॥ २७ ॥ उद्यतायुधहस्तानां राक्षसेन्द्रानुयायिनाम् । सम्भ्रमो रक्षसामेष तुमुलो रोमहर्षणः ॥ २८ ॥ श्रीस्त्वां भजति शोकघ्नी रक्षसां भयमागतम् ॥ २९ ॥ रामः कमलपत्राक्षोऽदैत्यानामिव वासवः । विनिर्जित्य जितक्रोधस्त्वामचिन्त्यपराक्रमः । रावणं समरे हत्वा भर्ता त्वाऽधिगमिष्यति ॥ ३० ॥

तुमुलः सान्द्रः, दृश्यत इति शेषः ॥ २८ ॥ ध्रुवं त्वां भजते लक्ष्मीरित्युपक्रान्तमुपसंहरति–श्रीरिति । शोकघ्नी श्रीः विजयलक्ष्मीः भजति । भविष्यत्सामीप्ये लट्प्रयोगः ॥ २९ ॥ राम इत्यादिसार्द्धश्लोक एकान्वयः । कमलपत्राक्षः "श्रीर्न त्यजति रक्ताक्षम्" इति सामुद्रिकोक्तरीत्याऽवश्यं श्रीरुपतिष्ठति । तत्रापि श्रेष्ठे तत्रापि चक्षुषी इति नयनसौभाग्यलक्षणमव्यभिचारीति भावः । न केवलं सौभाग्यलक्षणेन श्रीः, प्रभावादपीत्याह अदैत्यानामिति । अदैत्यानां देवानां मध्ये वासव इव स्थितः । सर्वश्रेष्ठ इत्यर्थः । अचिन्त्यपराक्रमः एकेन शरेण मरुकान्तारवासिसकलदस्युवारणादप्रमेयपराक्रमः । तर्हि तादृशः किमिदानीं विलम्बत इत्यत्राह–जितक्रोध इति । रावणस्याभिमुखमनागमनात् क्रोधावकाशमलभमानस्तिष्ठतीति भावः । दैत्यानामिति द्वितीयार्थे षष्ठी वा । दैत्यान् वासव इव रावणं समरे हत्वा विनिर्जित्य शत्रुगृहादपनीय त्वामभिगमिष्यतीति योजना ॥ ३० ॥

प्रभां विसृजताम् उत्पादयताम् । पश्येत्यत्रापि प्रभैव कर्म ॥ २६–२९ ॥ राम इत्यादिसार्धश्लोक एकं वाक्यम् । वासवो यथा दैत्यानां निकटस्थां स्वीयलक्ष्मीमाहृतवान् एवं रामः रावणं समरे हत्वा विनिर्जित्य शत्रुगृहादपनीय त्वा त्वामधिगमिष्यतीति योजना ॥ ३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामानु०–दैत्यानामित्यत्रापि समरशब्दो योजनीयः ॥३०॥ विष्णुना उपेन्द्रेण॥३१॥एवं शंसन्त्यास्ते किं फलम् ? तत्राह–आगतस्येति। चिरप्रवासादागतस्य दयिता दर्शने कोऽपि विकासो भवेत्स मया द्रष्टव्य इति भावः ॥ ३२ ॥ महोरस इत्यत्र समासान्तविधेरनित्यत्वात् कबभावः । समागम्य परिष्वज्य स्थितस्य तस्योरसि अश्रूणि वर्तयिष्यसीति योजना ॥ ३३ ॥ जघनं गतां नितम्बावलम्बिनीम् । बहून् मासान् धृतां बहुमासैर्धृताम् । अत्यन्तसंयोगे द्वितीया ।

विक्रमिष्यति रक्षस्सु भर्ता ते सहलक्ष्मणः। यथा शत्रुषु शत्रुघ्नो विष्णुना सह वासवः ॥३१॥ आगतस्य हि रामस्य क्षिप्रमङ्कगतां सतीम् । अहं द्रक्ष्यामि सिद्धार्थां त्वां शत्रौ विनिपातिते ॥३२॥ अश्रूण्यानन्दजानि त्वं वर्तयिष्यसि शोभने। समागम्य परिष्वज्य तस्योरसि महोरसः ॥३३॥ अचिरान्मोक्ष्यते सीते देवि ते जघनं गताम्। धृतामेतां बहून् मासान् वेणीं रामो महाबलः ॥ ३४ ॥ तस्य दृष्ट्वा मुखं देवि पूर्णचन्द्रमिवोदितम् । मोक्ष्यसे शोकजं वारि निर्मोकमिव पन्नगी ॥ ३५ ॥ रावणं समरे हत्वा नचिरादेव मैथिलि । त्वया समग्रः प्रियया सुखार्हो लप्स्यते सुखम् ॥ ३६ ॥ समागता त्वं वीर्येण मोदिष्यसि महात्मना । सुवर्णेण समायुक्ता यथा सस्येन मेदिनी ॥ ३७॥ गिरिवरमभितोऽनुवर्तमानो हय इव मण्डलमाशु यः करोति । तमिह शरणमभ्युपेहि देवं दिवसकरं प्रभवो ह्ययं प्रजानाम् ॥ ३८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

रामवियोगात्प्रभृति बद्धामेतां वेणीं मोक्ष्यते मोक्षयिष्यति । आर्षमात्मनेपदम् ॥ ३४ ॥ निर्मोकं त्वचम् । निर्मोकदृष्टान्तेन शोकाश्रुणो निःशेष निवृत्तिरुच्यते । अश्रुमूलं शोकं त्यक्ष्यसीति भावः ॥ ३५ ॥ समग्रः संपूर्णमनोरथः ॥ ३६ ॥ सस्येन समायुक्ता मेदिनी सुवर्णेण यथा तथा महात्मना रामेण समायुक्ता त्वं वीर्येण तच्छौर्येण मोदिष्यसि ॥ ३७ ॥ अथानिष्टनिवारणाय इष्टप्राप्तये च सूर्यनमस्कारं विदधाति--गिरिवरमिति । यः देवः ।

विष्णुना उपेन्द्रेण ॥ ३१–३३ ॥ मोक्ष्यते मोक्ष्यति । जघनं गतां नितम्बपर्यन्तावलम्बिनीम् ॥३४॥ निर्मोकं त्वचम् ॥३५॥ समग्रः सम्पूर्णमनोरथः ॥ ३६ ॥ सस्येन समायुक्ता मेदिनी सुवर्णेण यथेति सम्बन्धः ॥ ३७ ॥ गिरिवरं मेरुम् । मण्डलं प्रदक्षिणम् ॥ ३८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रयस्त्रिंशः सर्गः ॥ ३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गिरिवरं मेरुम् । अभितः परितः । " अभितःपरितः-" इत्यादिना द्वितीया । अनुवर्तमानः आनुकूल्येन चरन्, प्रादक्षिण्येन चरन्नित्यर्थः । इयोऽश्व इव मण्डलं मण्डलगतिम् आशु त्रिंशन्मुहूर्तैनैव करोति । देवं द्योतमानम् । दिवसकरं शरणं रक्षणम् । अभ्युपेहि गच्छ । वरणीयत्वे हेतुमाह प्रभव इति । अयं दिवसकरः प्रजानां देवतिर्यङ्मनुष्यस्थावराणां प्रभवः कारणम् । हिः प्रसिद्धौ । वर्षादिद्वारा जगदाप्यायक इत्यर्थः । " अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥" इत्युक्तेः । न पुनरत्र जगत्कारणत्वोक्तिः । अश्वोपमानेन स्वातिरिक्तपुरुषप्रेर्यत्वाभिधानात् । " भीषाऽस्माद्वातः पवते, भीषोदेति सूर्यः" इति श्रुतेः ॥२८॥ इति श्रीगो० श्रीरामा० रत्न० युद्धकाण्ड० त्रयस्त्रिंशः सर्गः॥३३॥

अथ तां जातसन्तापां तेन वाक्येन मोहिताम् । सरमा ह्लादयामास पृथिवीं द्यौरिवाम्भसा ॥ १ ॥ ततस्तस्या हितं सख्याश्चिकीर्षन्ती सखी वचः । उवाच काले कालज्ञा स्मितपूर्वाभिभाषिणी ॥ २ ॥ उत्सहेयमहं गत्वा त्वद्वाक्यमसितेक्षणे । निवेद्य कुशलं रामे प्रतिच्छन्ना निवर्तितुम् ॥ ३॥ न हि मे क्रममाणाया निरालम्बे विहायसि। समर्थो गतिमन्वेतुं पवनो गरुडोऽपि वा ॥४॥ एवं ब्रुवाणां तां सीता सरमां पुनरब्रवीत् । मधुरं श्लक्ष्णया वाचा पूर्वं शोकाभिपन्नया ॥ ५ ॥ समर्था गगनं गन्तुमपि वा त्वं रसातलम् । अवगच्छाम्यकर्तव्यं कर्तव्यं ते मदन्तरे ॥ ६ ॥

अथ सरमया रावणाशयपरिज्ञानं चतुस्त्रिंशे-अथ तामित्यादि । अथेति प्रथमश्लोकेन पूर्वसर्गोक्तानुवादः । तेन वाक्येन ह्लादयामासेत्यन्वयः। यद्वा तेन वाक्येन रावणवाक्येन ॥ १ ॥ सख्याः सीतायाः । सखी सरमा ॥ २ ॥ कुशलं कुशलप्रतिपादकं त्वद्वाक्यमित्यन्वयः । निवर्तितुमुत्सहेयं समर्थेत्यर्थः ॥ ३ ॥ बहुदूरं कथं गन्तुमर्हसीत्यत्राह-न हीति । क्रममाणायाः गच्छन्त्याः ॥ ४ ॥ मधुरं मधुरार्थकम् । श्लक्ष्णयेति वाङ्माधुर्योक्तिः । पूर्वं शोकाभिपन्नया सम्प्रति हृष्टयेत्यर्थः ॥ ५ ॥ सन्देशमाहरिष्यामीति वदन्तीं सरमां प्रति न गन्तव्यमित्युक्ते सख्यहानिः, रामं प्रति प्रेषणं

अथेति । तेन वाक्येन ह्लादयामासेति सम्बन्धः ॥ १ ॥ सख्यं सखीकृत्यम् ॥ २ ॥ कुशलं कुशलप्रश्नरूपं त्वद्वाक्यम् ॥ ३ ॥ ४ ॥ एवमिति । पूर्वं समाश्वासनात्पूर्वम् । शोकाभिपन्नया वाचाऽब्रवीदिति ॥ ५ ॥ मदन्तरे मद्विषये । अकर्तव्यमपि कर्तुमशक्यमपि । ते त्वया कर्तव्यमित्यवगच्छामीति सम्बन्धः ॥ ६ ॥

For Private And Personal Use Only

"तत्तस्य सदृशं भवेत्" इति स्थितायाः सीताया न युक्तम्, अतो व्याजेन निपुणं परिहरति–समर्थेति । मदन्तरे मद्विषये । अन्यैरकर्तव्यं कर्तुमशक्यं कार्यं त्वया कर्तव्यं कर्तुं शक्यमित्यवगच्छामि । यद्वा मद्विषये ते कर्तव्यम् अवश्यकरणीयं जानामीत्यर्थः ॥ ६ ॥ रावणं गत्वा स किं करोतीति ज्ञातुमिच्छामि, त्वत्कर्तृकं रावणज्ञानमिच्छामीत्यर्थः ॥ ७ ॥ तस्य ज्ञानस्य किं प्रयोजनमित्यत्राह–स हीति । पीतमात्रा सद्यः पीता । वारुणी

मत्प्रियं यदि कर्तव्यं यदि बुद्धिः स्थिरा तव । ज्ञातुमिच्छामि तं गत्वा किं करोतीति रावणः ॥ ७ ॥
स हि मायाबलः क्रूरो रावणः शत्रुरावणः । मां मोहयति दुष्टात्मा पीतमात्रेव वारुणी ॥ ८ ॥ तर्जापयति मां नित्यं
भर्त्सापयति चासकृत् । राक्षसीभिः सुघोराभिर्या मां रक्षन्ति नित्यशः ॥ ९ ॥ उद्विग्ना शङ्किता चास्मि न स्वस्थं
च मनो मम । तद्भयाच्चाहमुद्विग्ना अशोकवनिकां गता ॥ १० ॥ यदि नाम कथा तस्य निश्चितं वापि यद्भवेत् ।
निवेदयेथाः सर्वं तत् परो मे स्यादनुग्रहः ॥ ११ ॥ सा त्वेवं ब्रुवतीं सीतां सरमा वल्गुभाषिणी । उवाच वदनं
तस्याः स्पृशन्ती बाष्पविक्लवम् ॥ १२ ॥

मद्यम् ॥ ८ ॥ तर्जापयति तर्जनं कारयति । भर्त्सापयति भर्त्सनं कारयति । आत्वपुगागमावार्षौ । या राक्षस्यो मां रक्षन्ति ताभिस्तर्जापयतीति सम्बन्धः । नासाग्रे अङ्गुलिन्यासनयनभ्रामणदन्तदर्शनप्रभृतिमुखचेष्टाभिर्भीजननं तर्जनम् । हनिष्यति दहिष्यतीत्यादिवाचा भीजननं भर्त्सनम् ॥ ९ ॥ कुत उद्विग्नेत्यत्राह तद्भयाच्चेति । कुतः शङ्कितेत्यत्राह अशोकवनिकां गतेति ॥ १० ॥ तस्य रावणस्य यदि नाम कथा यदि वार्ताऽस्ति । यच्च तस्य निश्चितम् अध्यवसाय इति यावत् । तत्सर्वं निवेदयेथाः । ततश्च मे परोऽनुग्रहः उपकारः कृतः स्यात् । या हि नामेति पाठः सम्यक् ॥ ११ ॥ सा त्विति । वल्गु सुन्दरं यथा तथा भाषितुं शीलमस्या अस्तीति वल्गुभाषिणी । बाष्पविक्लवं बाष्पव्याकुलम्, वदनं स्पृशन्ती परिमृजन्ती ॥ १२ ॥ रामानु०–उवाच

कर्तव्यमेवाह–मत्प्रियमिति । तं रावणं गत्वा रावणः किं करोतीति ज्ञातुमिच्छामि, त्वत्कर्तृकं रावणवृत्तान्तज्ञानमिच्छामीत्यर्थः ॥ ७ ॥ पीतमात्रेव वारुणी सद्यः पीता वारुणी, वारुणीपानहेतुना रावणो मां मोहयतीत्यर्थः ॥८–११॥ सा त्विति । बाष्पविक्लवं स्पृशन्ती बाष्पमोचनमपमार्जयन्ती ॥ १२–१९ ॥

वदनं तस्याः स्पृशन्ती बाष्पविक्लवमिति पाठः ॥ १२ ॥ एष त इति । तदा गच्छामीति पाठः । गृह्य ज्ञात्वा । उपावृत्तां च पुनरागतामेव पश्य तत्र सन्देहो नास्तीत्यर्थः ॥ १३–१५ ॥ स्वामेव आत्मानमेव, सरमामित्यर्थः । आत्मवाचिनः स्वशब्दस्य आबन्तत्वमार्षम् । भ्रष्टपद्मां पद्मासनहीनामित्यर्थः ॥ १६ ॥

एष ते यद्यभिप्रायस्तदा गच्छामि जानकि । गृह्य शत्रोरभिप्रायमुपावृत्तां च पश्य माम् ॥ १३ ॥ एवमुक्त्वा ततो गत्वा समीपं तस्य रक्षसः । शुश्राव कथितं तस्य रावणस्य समन्त्रिणः ॥१४॥ सा श्रुत्वा निश्चयं तस्य निश्चयज्ञा दुरात्मनः। पुनरेवागमत् क्षिप्रमशोकवनिकां तदा ॥१५॥ सा प्रविष्टा पुनस्तत्र ददर्श जनकात्मजाम्। प्रतीक्षमाणां स्वामेव भ्रष्टपद्मामिव श्रियम् ॥ १६ ॥ तां तु सीता पुनः प्राप्तां सरमां वल्गुभाषिणीम् । परिष्वज्य च सुस्निग्धं ददौ च स्वयमासनम् ॥ १७ ॥ इहासीना सुखं सर्वमाख्याहि मम तत्त्वतः । क्रूरस्य निश्चयं तस्य रावणस्य दुरात्मनः ॥१८॥ एवमुक्ता तु सरमा सीतया वेपमानया । कथितं सर्वमाचष्ट रावणस्य समन्त्रिणः ॥१९॥ जनन्या राक्षसेन्द्रो वै त्वन्मोक्षार्थं बृहद्वचः । अविद्धेन च वैदेहि मन्त्रिवृद्धेन बोधितः ॥ २० ॥ दीयतामभिसत्कृत्य मनुजेन्द्राय मैथिली । निदर्शनं ते पर्याप्तं जनस्थाने यदद्भुतम् ॥ २१ ॥

सुस्निग्ध स्नेहयुक्तं यथा तथा ॥ १७ ॥ इहेति । सुखमासीनेत्यन्वयः ॥ १८ ॥ वेपमानया किंवा भयं वक्ष्यतीति कम्पमानया ॥ १९ ॥ जनन्या कैकसीनाम्न्या अविद्धेन अविद्धाख्येन मन्त्रिवृद्धेन च राक्षसेन्द्रस्त्वन्मोक्षार्थं बृहद्वचनं बोधितः ॥ २० ॥ तदेव वचनं दर्शयति–दीयतामिति । जनस्थाने यदद्भुतं खरवधादिकं कृतं तदेव पर्याप्तं प्रमाणान्तरनिरपेक्षं निदर्शनं दृष्टान्तः, करिष्यमाणस्य रामपराक्रमस्येति शेषः ॥ २१ ॥

जनन्येति । जनन्या कैकस्या । अविद्धेन अविद्धाख्येन च मैथिली दीयतामिति बोधित इति सम्बन्धः ॥ २० ॥ जनस्थाने अद्भुतं खरादिवधं यत्कृतं तदेव पर्याप्तं ॥११२॥

स०–स्वामेव आत्मीयमाणतिम् । "आत्मीयायामिति । आत्मज्ञातिधनेषु तु स्वमेव नान्यीति भाव" इति मनोरमोक्तेरात्मवाचकत्वे स्वशब्दस्य स्त्रीलिङ्गत्वासम्भवात् । स्विकायामित्यादिश्रीहर्षादिप्रयोगाणामात्मीयत्वसञ्ज्ञावादिना निर्वाहस्य तत्रैवोक्तेश्च । "अर्थान्तरे तु न स्त्री" इति कौमुदीवाक्यं धृत्वा आत्मज्ञातिधनेष्वित्यर्थ इति तत्त्वसुबोधिन्यभिधानाच । भ्रष्टपद्मां कमलं कन्दुकीकृत्य खेलनसमये हस्ताद्विच्युतलतादिलीननालिकां श्रियं लक्ष्मीमिव ॥ १६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिष्ठतु रामः तद्भृत्यो हनुमानेव सर्वान् राक्षसान् जेतुं समर्थ इत्याशयेन तत्पराक्रमं वर्णयति–लङ्घनमिति । दर्शनं सीतादर्शनम् । मानुषः मनुष्यसम्बन्धी पुरुषः । कः कुर्यात् । "तस्येदम्" इत्यण् । स्वदूतमुखेनानेककार्यकारी रामो देव एवेति भावः ॥२२॥ अविद्धेन तन्नाम्ना । मन्त्रिवृद्धैरिति पूजायां बहुवचनम् । बह्विति क्रियाविशेषणम् ॥२३॥ हि यस्मात्सामात्यस्य एष निश्चयो वर्तते इति तस्मात् युद्धे अमृतः सन् त्वां मोक्तुं नोत्सहतीति । इतिर्हेतौ ।

लङ्घनं च समुद्रस्य दर्शनं च हनूमतः । वधं च रक्षसां युद्धे कः कुर्यान्मानुषो भुवि ॥ २२ ॥ एवं स मन्त्रिवृद्धैश्चाविद्धेन बहु भाषितः । न त्वामुत्सहते मोक्तुमर्थमर्थपरो यथा ॥ २३ ॥ नोत्सहत्यमृतो मोक्तुं युद्धे त्वामिति मैथिलि । सामात्यस्य नृशंसस्य निश्चयो ह्येष वर्तते ॥ २४ ॥ तदेषा निश्चिता बुद्धिर्मृत्युलोभादुपस्थिता । भयान्न शक्तस्त्वां मोक्तुमनिरस्तस्तु संयुगे । राक्षसानां च सर्वेषामात्मनश्च वधेन हि ॥२५॥ निहत्य रावणं सङ्ख्ये सर्वथा निशितैः शरैः । प्रतिनेष्यति रामस्त्वामयोध्यामसितेक्षणे ॥ २६ ॥

इति निश्चय इत्यन्वय इत्येके । इति मन्य इत्यपरे । इह मैथिलीति केषुचित्पाठः ॥ २४ ॥ रामानु०–नोत्सहतीति । इति मैथिलीत्यत्र इतिशब्दस्य निश्चय इत्यनेन सम्बन्धः ॥ २४ ॥ एतादृशाध्यवसायस्य किं निमित्तमित्यपेक्षायां मरणलोभ एवेत्याह–तदेषेत्यादिसार्धश्लोकः । तत् तस्येत्यर्थः । राक्षसानामात्मनश्च वधेन अनिरस्तः अनिराकृतः केवलभयात्त्वां मोक्तुं न शक्तः, नोत्सहत इत्यर्थः ॥ २५ ॥ कथं तर्हि मे निर्गमनमित्यत आह–निहत्येति । एतत्सर्वं प्रमाणान्तरानपेक्षम् । निदर्शनं करिष्यमाणस्य रघुनाथपराक्रमस्य दृष्टान्त इत्यर्थः ॥ २१ ॥ तिष्ठतु रघुनाथः, तदनुचरो हनुमानेव सर्वान राक्षसान जेतुं समर्थं इत्याशयेन तत्पराक्रमं वर्णयति–लङ्घनमिति । दर्शनम्, सीताया इति शेषः । मानुषः पुरुषः ॥ २२ ॥ २३ ॥ नोत्सहतीति । हि यस्मात् तस्य सामात्यस्य एष निश्चयः न त्यक्ष्यामीति निश्चयो वर्तते तस्माद्युद्धे अमृतस्सन् त्वां त्यक्तुं नोत्सहतीति मन्य इत्यर्थः ॥ २४ ॥ राक्षसानाम् आत्मनश्च वधेनानिरस्तः अनिराकृतः भयात्त्वां मोक्तुं न शक्तः नोत्सहत इत्यर्थः ॥ २५ ॥ तर्हि मम निर्गमो न सम्भवेदित्यत आह–निहत्येति ॥ २६ ॥ २७ ॥

स०-नोत्सहति । चुरादिरयमाधृषीयः परस्मैपदे वर्तते " स एवायं नागः सहति कलभेभ्यः परिभवम् " इत्यादिप्रयोगात् । सामात्यस्य अविन्ध्यादिव्यतिरिक्तमन्त्रिसहितस्य ॥ २४ ॥ मृत्युलोभात् मृत्युदेव्या एव विद्यमानाल्लोभात् ॥ २५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तव नेत्रसौभाग्यलक्षणादित्यभिप्रायेणाह–असितेक्षण इति ॥ २६ ॥ सरमोक्तस्योपश्रुतिनिमित्तं दर्शयन्नेव कथाशेषं दर्शयति–एतस्मिन्निति । अत्र भेर्यादिशब्दो भेर्यादिशब्दपरः । वानरसैन्यानामपि भेर्यादिकमस्तीति किष्किन्धाकाण्डे दर्शितम् ॥ २७ ॥ श्रुत्वेति । श्रेयो न पश्यन्ति नृपस्य दोष इति । रावणस्य दोषे निमित्तभूते जीवनभूतमात्मनः श्रेयो न पश्यन्ति॥२८॥ इति श्रीगो० श्रीरामा० रत्न० युद्धकाण्डव्याख्याने चतुस्त्रिंशः सर्गः॥३४॥

एतस्मिन्नन्तरे शब्दो भेरीशङ्खसमाकुलः । श्रुतो वानरसैन्यानां कम्पयन् धरणीतलम् ॥ २७ ॥ श्रुत्वा तु तद्वानर सैन्यशब्दं लङ्कागता राक्षसराजभृत्याः । नष्टौजसो दैन्यपरीतचेष्टाः श्रेयो न पश्यन्ति नृपस्य दोषे ॥ २८ ॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुस्त्रिंशः सर्गः ॥ ३४ ॥

तेन शङ्खविमिश्रेण भेरीशब्देन राघवः । उपयाति महाबाहू रामः परपुरञ्जयः ॥ १ ॥ तं निनादं निशम्याथ रावणो राक्षसेश्वरः । मुहूर्तं ध्यानमास्थाय सचिवानभ्युदैक्षत ॥ २ ॥ अथ तान् सचिवांस्तत्र सर्वानाभाष्य रावणः । सभां सन्नादयन् सर्वामित्युवाच महाबलः । जगत्सन्तापनः क्रूरो गर्हयन् राक्षसेश्वरः ॥ ३ ॥

अथ माल्यवदुपदेशः पञ्चत्रिंशे–तेनेति । शङ्खविमिश्रेण शङ्खशब्दविमिश्रेण । उपयाति उपाययौ ॥१॥ ध्यानमास्थाय किं मयेदानीं कर्तव्यमिति ध्यानं कृत्वेत्यर्थः ॥ २ ॥ अथेत्यादि । आभाष्य सम्बोध्य । सभाम् आस्थानमण्डपम् । उदीक्षणाशयमुद्घाटयति–गर्हयन्निति । गर्हयन्नुवाच गर्हात्मिकां वाच

श्रेयो न पश्यन्ति । नृपस्य रावणस्य दोषैः निमित्तभूतैः जीवनभूतमात्मनः श्रेयो नास्तीति मेनिर इत्यर्थः ॥ २८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुस्त्रिंशः सर्गः ॥ ३४ ॥ तेनेति । उपयाति उपयातः ॥ १ ॥ २ ॥ अथ तानित्यादिसार्धश्लोक एकं वाक्यम् । आभाष्य सम्बोध्य । गर्हयन्नुवाच सचिवगर्हात्मिकां वाचमुवाचेत्यर्थः ॥ ३ ॥

स०–भेरीशब्देन नादिना इति पाठः । नादिना प्रतिध्वनिमता । नादिना न विद्यन्ते आदिनो राक्षसा येन तादृशेन " आदिनो राक्षसाः प्रोक्ताः " इति भागवतदशमस्कन्धतात्पर्यात् । परपुरं वैरिनगरम् । महाबाहू राम उपयाति । जयश्च तमुपयाति । पुरमिति शेषो वा । एतत्पक्षे परपुरञ्जयेति समस्तम् ॥ १ ॥

For Private And Personal Use Only

मुवाचेत्यर्थः॥३॥ गर्हाप्रकारमाह श्लोकद्वयेन–तरणमिति। तूष्णीकान् तूष्णींशीलान्। "शीले को मलोपश्च" इति कप्रत्ययो मलोपश्च। "तूष्णींशीलस्तु तूष्णीकः" इत्यमरः। निरुत्साहानित्यर्थः॥४॥५॥ पितामहस्य पुत्रः पैतामहः। पितृव्य इत्यर्थः। कैकसी सुमालिपुत्रीत्युत्तररामायणेऽभिधानान्माल्यवतस्तद्भ्रातृत्वाच्च पितामहशब्दस्य नियतसापेक्षत्वान्नासामर्थ्यदोषः। पितेत्यर्थ इत्येके। वृद्धो मातामहोऽब्रवीदिति क्वचित्पाठः॥६॥ नीतिमार्गपर्यालोच

तरणं सागरस्यापि विक्रमं बलसञ्चयम्। यदुक्तवन्तो रामस्य भवन्तस्तन्मया श्रुतम्॥ ४ ॥
भवतश्चाप्यहं वेद्मि युद्धे सत्यपराक्रमान्। तूष्णीकानीक्षतोऽन्योन्यं विदित्वा रामविक्रमम्॥ ५ ॥
ततस्तु सुमहाप्राज्ञो माल्यवान् नाम राक्षसः। रावणस्य वचः श्रुत्वा मातुः पैतामहोऽब्रवीत्॥ ६ ॥
विद्यास्वभिविनीतो यो राजा राजन्नयानुगः। स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे॥ ७ ॥

नायां बलवता रामेण सन्धिः करणीय इत्यभिप्रायेण प्रथमं नयस्य श्रेयोहेतुत्वं दर्शयति–विद्येति। विद्यासु आन्वीक्षिकीत्रयीवार्तादण्डनीत्याख्यासु चतसृषु विद्यासु। अभिविनीतः अभितः शिक्षितः। अत एव नयानुगः नीतिशास्त्रानुसारी यो राजा सः चिरम् ऐश्वर्यम् ईश्वरत्वं शास्ति अधितिष्ठति। तमिममर्थं विशदमुक्तवान् कामन्दकः–"आन्वीक्षिकीं त्रयीं वार्तां दण्डनीतिं च पार्थिवः। तद्विद्भिस्तत्क्रियोपेतैश्चिन्तयेद्विनयान्वितः॥ आन्वीक्षिक्यात्मविज्ञानं धर्माधर्मौ त्रयीस्थितौ। अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ॥ विद्याश्चतस्र एवैता योगक्षेमाय देहिनाम्। विद्याविनीतो नृपतिर्न कृच्छ्रे

गर्हाप्रकारमेवाह–तरणमित्यादिश्लोकद्वयेन। तूष्णीकान् निरुत्साहान्। वेद्मीत्युवाचेति पूर्वेण सम्बन्धः॥ ४॥ ५॥ मातुः पैतामहः पितामहस्य पुत्रः पैतामहः, मातुः पितेति यावत्। रावणस्य वचः श्रुत्वा इति मातामहोऽब्रवीत्। इति क्वचित्पाठः। तत्र सन्ध्यभाव आर्षः॥ ६॥ नीतिमार्गपर्यालोचनायां बलवता रामेण सन्धिः करणीय इत्यभिप्रायेण प्रथमं नयस्य श्रेयोहेतुत्वं दर्शयति–विद्यास्विति। विद्यासु आन्वीक्षिकीत्रयीवार्तादण्डनीत्याख्यासु। नयानुगः नीतिमार्गानुसारी।

स०–अहय रामस्य। सागरस्य तरणविक्रमं बलेन सहितं पौरुषं चेति यदुक्तवन्तः तच्छ्रुतमिति गर्हयन्। गर्हणं चोक्तस्याश्नुक्तप्रायीकरणम्। सागरस्यास्य इति पाठः॥ ४॥ अथ आरामविक्रमं रामविषये वने मया कृतं भार्याहरणविक्रमम्। विदित्वा ज्ञात्वापि तूष्णीकान् तूष्णीं स्थितान् निरुत्साहानिति यावत्। अन्योन्यम् ईक्षतः ईक्षमाणान् वेद्मि, इदं किमिति शेषः। रामविक्रमं रामस्य विक्रमं लङ्काभूमिकापादविक्षेपम्, तन्मात्रमिति यावत्। युद्धमुखमनवलोक्यैवंभावो न कार्यवलोकित इति भावः॥ ६॥

ष्यवसीदति ॥" इति ॥ ७ ॥ नयानुग इत्युक्तं तत्र नयस्वरूपमाह–सन्दधान इति । कालेन स्वबलक्षयकालेन । सन्दधानः सन्धानं कुर्वन् । स्वबल वृद्धिकालेन विगृह्णन् विग्रहं कुर्वन् । ऐश्वर्येच्छुना कालानुरूपं सन्धिविग्रहौ कार्यावित्यर्थः । एवं कुर्वतः फलमाह स्वपक्षेति ॥ ८ ॥ सन्धेर्विग्रहस्य च कालं विविच्य दर्शयति–हीयमानेनेति । हीयमानेन हीयमानबलेन, समेन समबलेन च राज्ञा स्वशत्रुणा सह सन्धिः कर्तव्यः । न शत्रुमिति । ज्यायान्

सन्दधानो हि कालेन विगृह्णंश्चारिभिः सह । स्वपक्षवर्धनं कुर्वन् महदैश्वर्यमश्नुते ॥ ८ ॥ हीयमानेन कर्तव्यो राज्ञा सन्धिः समेन च । न शत्रुमवमन्येत ज्यायान् कुर्वीत विग्रहम् ॥९॥ तन्मह्यं रोचते सन्धिः सह रामेण रावण । यदर्थमभियुक्ताः स्म सीता तस्मै प्रदीयताम् ॥ १०॥ यस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः। विरोधं मा गमस्तेन सन्धिस्ते तेन रोचताम् ॥११॥ असृजद्भगवान् पक्षौ द्वावेव हि पितामहः । सुराणामसुराणां च धर्माधर्मौ तदाश्रयौ ॥१२॥

अधिकबलस्तु शत्रुं नावमन्येत नोपेक्षेत । किन्तु तेन सह विग्रहं कुर्वीत । हीयमानः समः सन्धिं कुर्यात् । अधिको विग्रहं कुर्यादित्यर्थः ॥ ९ ॥ अस्त्वेवं प्रस्तुते किमुपन्यस्तं तत्राह–तदिति । तत्तस्मात् । एवं नीतिशास्त्रस्थितेः हीयमानस्य तव बलवता रामेण सन्धिर्मह्यं रोचत इत्यर्थः । बलवता सन्धि र्दानेन विना न फलति । तच्च सीताप्रत्यर्पणादेव सेत्स्यतीत्याह–यदर्थमिति । यदर्थम् अभियुक्ताः स्म विरुद्धाः स्म । सा सीता तस्मै रामाय प्रदीयताम् ॥ १० ॥ कथं रामस्य बलवत्त्वम् ? तत्राह–यस्येति । देवाश्च ऋषयश्च देवर्षयः । ते तुभ्यम् । रामस्य देवबलवत्त्वात् बलवत्त्वमित्यर्थः ॥११॥ देवादीनां रामजयकाङ्क्षित्वे को हेतुरित्याशङ्क्य देवादीनां धर्मपक्षपातित्वाद्धर्मस्य रामाश्रयत्वादित्यभिप्रेत्याह–असृजदित्यादिना । भगवान् सर्वज्ञः पितामहः ।

शास्ति अधितिष्ठति ॥७॥ नयः कीदृश इत्यपेक्षायामाह–सन्दधान इति । कालेन सन्दधानः स्वबलक्षयकालेन सन्धानं कुर्वन् । कालेन विगृह्णन् स्वबलवृद्धिकालेन विग्रहं कुर्वन् । एवं कुर्वतः फलमाह स्वपक्षवर्द्धनमिति ॥८॥ संक्षेपोक्तं नयं विवृणोति–हीयमानेनेति । हीयमानेन समेन च राज्ञा शत्रुणा सह सन्धिः कर्तव्यः । सः राजा ज्यायान् अधिकश्चेत् शत्रुमवमन्येत तिरस्कुर्यात्, तेन सह विग्रहं च कुर्यादित्यर्थः । न शत्रुमवमन्येतेति पाठे–दुर्बलमपि शत्रुं नावमन्येतेत्यर्थः ॥ ९ ॥ प्रकृते किं कृतमित्यत्राह–तन्मह्यमिति । तस्मादेवं नीतिशास्त्रे स्थिते हीयमानस्य तव बलवता रामेण सन्धिः मह्यं रोचत इत्यर्थः । बलवता सह सन्धानं कथं घटत इत्या ॥११४॥ शङ्क्य तच्च सीताप्रत्यर्पणात् सेत्स्यतीत्याह यदर्थमिति । यदर्थं सीतार्थम् । अभियुक्ताः अभिनिवेशयुक्ताः । सा सीता तस्मै प्रदीयताम् । रामेण सन्धिर्मह्यं रोचत इत्यनेन रामस्य समुद्रबन्धनादिहेतुभूतपौरुषशक्तिवृद्धिः सूचिता ॥ १० ॥ न केवलं पौरुषबलम्, दैवबलमप्यस्तीत्याह–यस्येति । तेन दैवपौरुषबलयुक्तेन रामेण सन्धिस्तु रोचताम् । ते तुभ्यं दैवपुरुषबलहीनाय रोचताम् ॥११॥ अस्मान्विहाय देवानां तस्मिन्नेव पक्षपातः कथमित्याशङ्क्य स्वपक्षभूतधर्माश्रयणादिति प्रतिपाद

हि यस्मात्। सुराणाम् असुराणां च पक्षौ अवलम्बभूतौ। द्वावेव धर्माधर्मौ असृजत्। अतः धर्माधर्मौ तदाश्रयौ सुरासुराश्रयौ। असुरशब्देनात्रासुरप्रकृतयो राक्षसादयश्च विवक्षिताः॥ १२॥ अनयोः कतरः केषां पक्ष इत्यत्राह—धर्मो हीति। महात्मनामिति हेतुगर्भविशेषणम्। महास्वभावानामित्यर्थः। समीचीनप्रकृतीनामिति यावत्। अमहात्मनामित्यसुरादिविशेषणं चार्थसिद्धम्। तथा च धर्मस्य देवपक्षत्वाद्रामस्य तदाश्रयत्वाद्देवादयो रामपक्षपातिन

धर्मो हि श्रूयते पक्षो ह्यमराणां महात्मनाम्। अधर्मो रक्षसां पक्षो ह्यसुराणां च रावण॥ १३॥
धर्मो वै ग्रसतेऽधर्मं ततः कृतमभूद्युगम्। अधर्मो ग्रसते धर्मं ततस्तिष्यः प्रवर्तते॥ १४॥
तत्त्वया चरता लोकान् धर्मो विनिहतो महान्। अधर्मः प्रगृहीतश्च तेनास्मद्बलिनः परे॥ १५॥

इति भावः॥ १३॥ एवं देवादिपक्षपाताद्रामस्य बलीयस्त्वमुपपाद्य धर्मस्य प्राबल्यादपि तदाह—धर्म इति। अत्र यदेति शेषः। धर्मः अधर्मं यदा ग्रसते अभिभवति तदा कृतं युगम् अभूत् भवति पुरुषेषु प्रवर्तते। आर्षः कालव्यत्ययः। अधर्मो यदा धर्मं ग्रसते तदा तिष्यः कलिः प्रवर्तते। "तिष्यः कलौ च पुष्ये च" इत्यमरः॥१४॥ रामानु०—ततस्तिष्यः प्रवर्तत इति पाठः। अत्र यदेत्यध्याहार्यम्। यदा कृतं युगमभूत्। "तपः शौचं दया सत्यम्" इति श्रीभागवतोक्तप्रकारेण धर्मपादचतुष्टयविशिष्टं कृतयुगं भवति। धर्मवृद्धिर्भवतीत्यर्थः। तदा धर्मः अधर्मं ग्रसते। अनेन धर्मपक्षपातिनां वृद्धिरधर्मपक्षपातिनां हानिश्च सूचिता। यदा तिष्यः प्रवर्तते। "अधर्मं गौः" इत्यादिना श्रीभागवतोक्तसङ्गमदानृताद्यधर्मपादचतुष्टयविशिष्टं कलियुगं प्रवर्तते। अधर्मवृद्धिर्भवतीत्यर्थः। ततः तदा। अधर्मः अभिवृद्धाधर्मः धर्मं ग्रसते। अनेनाधर्मपक्षपातिनां वृद्धिः धर्मपक्षपातिनां हानिश्च सूचिता॥१४॥ ततः किमित्यपेक्षायां त्वय्यधर्मेण कलेः प्रवेशात्कृतापेक्षया कलेर्दुर्बलत्वादस्मदपेक्षया रामो बलवानित्याह—तदिति। लोकान् चरता, दिग्विजयार्थमिति शेषः। विनिहतः, परदारपरिग्रहार्थमिति शेषः। अस्मदिति पञ्चमीबहुवचनम्। परे शत्रवो रामादयो धार्मिकाः। यद्वा कृतं युगमिति

यितुं धर्माधर्मयोस्सुरासुरपक्षत्वं दर्शयति—असृजदित्यादिना। भगवान् पितामहः धर्माधर्मौ सुराणामसुराणां च द्वौ पक्षावसृजत अतो धर्माधर्मौ तदाश्रयौ तेषां सुराणामसुराणां च आश्रयावित्यर्थः॥ १२॥ १३॥ धर्माधर्मयोः को वा श्रेयानित्याकाङ्क्षायामाह—धर्म इति। अत्र यदाशब्दोऽध्याहर्तव्यः। धर्मो यदा अधर्मं ग्रसते नाशयति ततस्तदा कृतयुगमभूत्, अनेन धर्मपक्षपातिनां वृद्धिः अधर्मपक्षपातिनां हानिश्च सूचिता। यदा अधर्मो धर्मं ग्रसते तदा तिष्यः कलियुगं प्रवर्तते, अनेन अधर्मपक्षपातिनां वृद्धिः धर्मपक्षपातिनां हानिश्च सूचिता। अतो धर्म एव श्रेयानिति भावः॥ १४॥ अधर्मवृद्ध्या राक्षसानां प्राबल्यम्, धर्मवृद्ध्या सुराणां प्राबल्यं च क्रमेण प्रदर्शयति—तत्त्वयेत्यादिश्लोकद्वयेन। लोकान् चरता दिग्विजयार्थं लोकान् सञ्चरता त्वया धर्मो विनिहतः धर्मवृद्धिहेतुभूतयज्ञ

शब्दसमुदायेन शुभं लक्ष्यते । तिष्य इत्यनेनाशुभम् । यदा धर्मः अधर्मं ग्रसते तदा शुभं भवति । यदा अधर्मो धर्मं ग्रसते तदा अशुभं भवतीत्यर्थः । एवं भवतु मया किं कृतमित्यत्राह तदिति । तत् धर्माधर्मयोरेवंरूपत्वात् त्वया शुभहेतुधर्मो विनिहतः अशुभहेतुरधर्मश्च परिगृहीतः । तेन पराजयरूपाशुभहेत्वधर्मकृद्भ्योऽस्मज्जयरूपशुभहेतुधर्मपराः परे बलिन इत्यर्थः॥१५॥अधर्मं स्वीकृत्य धर्मे निहते तेषां सुराणां बलवत्त्वं कथमित्याशङ्क्याधर्मस्याश्रयनाशकत्वादित्यभिप्रायेणाह–स इति । सः अधर्मः । ते प्रमादात् अविमृश्यकरणात् । विवृद्धः । नः अस्मान् । ग्रसते नाशयति । सुरभावनः सुरा

स प्रमादाद्विवृद्धस्तेऽधर्मोऽभिग्रसते हि नः । विवर्धयति पक्षं च सुराणां सुरभावनः ॥ १६ ॥ विषयेषु प्रसक्तेन यत्किञ्चित्कारिणा त्वया । ऋषीणामग्निकल्पानामुद्वेगो जनितो महान् ॥ १७ ॥ तेषां प्रभावो दुर्धर्षः प्रदीप्त इव पावकः ॥ १८ ॥ तपसा भावितात्मानो धर्मस्यानुग्रहे रताः । मुख्यैर्यज्ञैर्यजन्त्येते नित्यं तैस्तैर्द्विजातयः ॥१९॥ जुह्वत्यग्नींश्च विधिवद्वेदांश्चोच्चैरधीयते । अभिभूय च रक्षांसि ब्रह्मघोषानुदैरयन् ॥ २० ॥

नुकूलः सन् सुराणां पक्षं विवर्धयति ॥ १६ ॥ स्वकृतस्याधर्मस्य सुरपक्षवृद्धिहेतुत्वं कथमित्याशङ्क्य ऋषीणामुद्वेगजननद्वारा धर्मप्रवर्तकत्वादित्याह–विषयेष्विति । विषयेषु प्रसक्तेन अत एव यत्किञ्चित्कारिणा देवर्षिप्रमुखानां कन्यापत्नीहरणादिकं कुर्वता । ऋषीणामुद्वेगः मनस्तापः । जनितः कृतः ॥ १७ ॥ अग्निकल्पत्वमुपपादयति–तेषामिति ॥ १८ ॥ उद्वेगात्किं कृतवन्तस्तत्राह–तपसेति । भावितात्मानः पूतात्मानः । धर्मस्यानुग्रहे संवर्धने

दानतपःप्रभृतयो विनाशिता इत्यर्थः । अधर्मः स्वपक्षभूताधर्मः प्रगृहीतः परहिंसापरदारपरद्रव्यापहरणादिना संवर्धितः इत्यर्थः । तत् तस्मात् परे त्वच्छत्रवः अस्मद्बलिनः अस्मत्तो बलिनोऽभूवन्नित्यर्थः ॥ १५ ॥ सुरभावनः सुरान् भावयति वर्धयतीति तथा । सः अधर्मः ते विषयासक्तस्य तव प्रमादात् यज्ञदानादीनां विघ्नकरणाद्धेतोः विवृद्धः स्यात् । इदानीं नः अधर्माश्रयानस्मान् ग्रसते हि ग्रसत एव सुराणां पक्षं विवर्द्धयति चेति योजना ॥ १६ ॥ रावणप्रमादजनिताधर्मवृद्धिप्रकारं विवृणोति–विषयेष्वित्यादिना । यत्किञ्चित्कारणात् यस्मात्कस्माच्चित्कारणात् विषयेषु प्रसक्तेन देवर्षिप्रमुखानां कन्यापत्नीहरणादिकं कुर्वता त्वया तेषामृषीणां प्रदीप्तः पावक इव दुर्द्धर्षः दुस्सहः उद्वेगः क्रोधो जनित इत्यर्थः ॥ १७ ॥ १८ ॥ उद्वेगात् किं कृतवन्तस्तत्राह–तपसेत्यादिना । तपसा भावितात्मानः पूतात्मानः धर्मस्यानुग्रहे धर्मसंवर्धने रताः ॥ १९ ॥ उदीरयन्निति पाठे अडभाव आर्षः । ब्रह्मघोषान् वेदघोषान् ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रताः । मुख्यैः श्रेष्ठैः । तैस्तैः अग्निष्टोममारभ्य विश्वसृजामयनपर्यन्तैः । अग्नीनुद्दिश्य जुह्वति होमं कुर्वन्ति । देवतोद्देशेन द्रव्यत्यागो यागः । त्यक्तस्याग्नौ प्रक्षेपो होम इत्यनयोर्भेदः । अभिभूय अगणयित्वा । ब्रह्मघोषान् उदेरयन् उच्चारयन्ति स्म । वेदांश्चोच्चैरधीयत इत्यस्य विवरणमिदम् ॥ १९ ॥ २० ॥ तपःप्रभृतिकर्मणः फलमाह—दिश इत्यादिना । सर्वा दिशः प्रति विद्रुताः, राक्षसा इति शेषः । उष्णगे ग्रीष्मे । स्तनयित्नुरिव मेघ इव । जातावेकवचनम् ॥ २१ ॥ २२ ॥ बलिनोऽपि देवाः ब्रह्मदत्तवरमहिम्नापि न प्रहर्तुं शक्नुयुरिति चेत्तत्राह—देवदानवेत्यादिना । देवदानवयक्षेभ्य एवावध्यत्ववरो गृहीतः ।

दिशोऽपि विद्रुताः सर्वाः स्तनयित्नुरिवोष्णगे । ऋषीणामग्निकल्पानामग्निहोत्रसमुत्थितः ॥ २१ ॥ आदत्ते रक्षसां तेजो धूमो व्याप्य दिशो दश । तेषु तेषु च देशेषु पुण्येष्वेव दृढव्रतैः । चर्यमाणं तपस्तीव्रं सन्तापयति राक्षसान् ॥ २२ ॥ देवदानवयक्षेभ्यो गृहीतश्च वरस्त्वया ॥ २३ ॥ मानुषा वानरा ऋक्षा गोलाङ्गूला महाबलाः । बलवन्त इहागम्य गर्जन्ति दृढविक्रमाः ॥ २४ ॥ उत्पातान् विविधान् दृष्ट्वा घोरान् बहुविधांस्तथा । विनाशमनुपश्यामि सर्वेषां रक्षसामहम् ॥२५॥ खराभिस्तनिता घोरा मेघाः प्रतिभयङ्कराः । शोणितेनाभिवर्षन्ति लङ्कामुष्णेन सर्वतः ॥२६॥

न तु मानुषादिभ्य इति भावः ॥ २३ ॥ तर्हि किमायातमित्यत्राह—मानुषा इति । द्वयोरपि बहुवचनं पूजायाम् । महाबलाः महासैन्याः । इह लङ्कायाम् ॥ २४॥ न केवलं परागमनेन किंत्वशुभनिमित्तदर्शनेनापि भयमुत्प्रेक्ष्यमित्याह—उत्पातानिति । उत्पातान् विविधान् दिव्यान्तरिक्षभौमभेदभिन्नान् । बहुविधान् भौमादिषु प्रत्येकं विविधान् । अनुपश्यामि तर्कयामि ॥ २५ ॥ खराभिस्तनिताः परुषगर्जिताः । घोराः विरूपाः । प्रतिभय

सर्वा दिशः विप्रद्रुताः, राक्षसा इति शेषः । विद्रवणे दृष्टान्तः स्तनयित्नुरिति । मेघ इव, जातावेकवचनम् । उष्णगे उष्णकाले ॥ २१ ॥ २२ ॥ तपोयागादिकं कामं कुर्वन्तु, ब्रह्मदत्तं सुरासुरैरवध्यत्वमस्ति खल्वित्याशङ्क्य, सत्यम्, रामसुग्रीवादयो न सुरासुरा इत्यभिप्रेत्याह—देवदानवेत्यादिसार्धेन । देवदानवेभ्य एवावध्यत्वं गृहीतम्, न मानुषादिभ्य इत्यभिप्रायः ॥ २३ ॥ २४ ॥ न केवलं परबलानुगमनेन भयम् किन्त्वशुभनिमित्तदर्शनेनापीत्याह—उत्पातानिति । विविधान् दिव्यन्तरिक्षभौमभेदभिन्नान् बहुविधान् ॥ २५--२७ ॥

स०—उष्णगे ग्रीष्मर्तुगते सूर्ये स्तनयित्नुर्वलाहक इव विप्रद्रुताः विप्रद्रुतानि रक्षांसि । पलायन एव पुरुषकार इति पुंसक्तिप्रयुक्तः पुँल्लिङ्गनिर्देशः रक्षांसीति प्रकृतत्वात् । राक्षसा इति शेषो वा ॥ २१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्रूराः प्रतीत्युपसर्गमात्रम्, भयंकरा इत्यर्थः ॥ २६ ॥ ध्वस्ताः धूसराः । अत एव विवर्णाः विगतवर्णाः ॥ २७ ॥ व्याला दुष्टाः । वाश्यन्ति वाशितं कुर्वन्ति, कुत्सितरुतं कुर्वन्तीत्यर्थः । समवायान् सङ्घान् ॥ २८ ॥ कालिकाः नीलवर्णाः स्त्रियः पूतनाप्रमुखा इति यावत् । शक्तय इत्येके । पाण्डरैर्दन्तैरुपलक्षिताः सत्यः । प्रतिभाष्य प्रतिकूलमाभाष्य । गृहाणि गृहस्थितवस्तूनि मुष्णन्त्यः हसन्ति । एवं दृश्यन्त इत्यर्थः ॥ २९ ॥ रामानु०—कालिकाः

रुदतां वाहनानां च प्रपतन्त्यस्रबिन्दवः । ध्वजा ध्वस्ता विवर्णाश्च न प्रभान्ति यथा पुरा ॥२७॥ व्याला गोमायवो गृध्रा वाश्यन्ति च सुभैरवम् । प्रविश्य लङ्कामनिशं समवायांश्च कुर्वते ॥ २८ ॥ कालिकाः पाण्डरैर्दन्तैः प्रहसन्त्यग्रतः स्थिताः । स्त्रियः स्वप्नेषु मुष्णन्त्यो गृहाणि प्रतिभाष्य च ॥ २९ ॥ गृहाणां बलिकर्माणि श्वानः पर्युपभुञ्जते । खरा गोषु प्रजायन्ते मूषिका नकुलैः सह ॥ ३० ॥ मार्जारा द्वीपिभिः सार्धं सूकराः शुनकैः सह । किन्नरा राक्षसैश्चापि समीयुर्मानुषैः सह ॥ ३१ ॥

शक्तयः । स्त्रियः स्त्रीः । प्रतिभाष्य प्रतिकूलमाभाष्य । स्वप्नेषु गृहाणि मुष्णन्ति अग्रतः स्थिता हसन्ति चेति सम्बन्धः ॥ २९ ॥ बलिकर्माणि बलिकर्मसाधनानि हवींषि । नकुलैः सह, वर्तन्त इति शेषः ॥ ३० ॥ समीयुः संयन्ति । द्वीपिभिः व्याघ्रैः । मानुषैः, राक्षसा इति शेषः । मानुषाश्चात्रोत्पातजनिता एव ॥ ३१ ॥ रामानु०—बलिकर्माणि बलिद्रव्याणि । किन्नरा राक्षसैश्चापि समीयुर्मानुषैः सहेत्यर्धं केषुचित्कोशेषु दृश्यते । तस्मिन्विरोधोऽस्ति लङ्कायां मानुषाभावात् ॥ ३१ ॥

तेषामेव प्रत्येकं बहुविधत्वं दर्शयति—व्याला इति । समवायान् समूहान् ॥ २८ ॥ कालिकाः पूतनाप्रमुखशक्तयः । पाण्डरैः दन्तैः उपलक्षिताः स्त्रियः स्त्रीः प्रतिभाष्य प्रतिकूलमाभाष्य प्रत्याख्याय । स्वप्नेषु गृहाणि गृहवर्तीनि द्रव्याणि मुष्णन्त्योऽग्रतः स्थिता हसन्तीति सम्बन्धः ॥ २९ ॥ बलिकर्माणि बलिकर्म

स०—कालिकाः ग्रामस्थाः महाकालीभद्रकालीत्यादयः । प्रतिभाष्य श्रोतृभयदायिभाषां कृत्वा । पाण्डरैर्दन्तैः अग्रतः स्थिताः सत्यः प्रहसन्ति । दन्तानां पाण्डरत्वोक्त्या उक्त्या च विरुद्धभाषणमोषणहसनादीनां निश्चितं मरणम् । किञ्चिद्व्यवधानेन भविष्यतीति सूचयति ॥ २९ ॥ श्वानः सारमेयाः । पर्युपसेवत इति पाठः । उपसेवते उपसेवन्ते न वायसाः । "पुनः श्वानो भविष्यति" "श्वानसूकरमार्जार—" इत्यादि प्रयोगादकारान्तो वा श्वानशब्दः । श्वा नः अस्माकमिदमिति पर्युपसेवते । नः बलिकर्माणि श्वा उपसेवते इति वा ॥ ३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालचोदिताः दैवप्रेरिताः। विनाशाय विनाशसूचनायेत्यर्थः। "वाताय कपिला विद्युत्" इत्यादिवत् । कपोताः कपोताख्या विहङ्गा इत्यन्वयः ॥ ३२ ॥ वेश्मसु मधुरसँल्लापार्थं पोषिताः शारिकाः मधुरभाषणानि विहाय वीचीकूचीति क्रूरं वाश्यन्तीत्यर्थः ॥ ३३ ॥ पक्षिणः काकादयः मृगाश्च पूर्वं निर्जिता अपि पुनः कलहैषिणः सन्तः। ग्रथिताः पुञ्जीभूताः। पतन्ति धावन्ति। प्रत्यादित्यं रुदन्ति चेत्यन्वयः ॥ ३४ ॥ कराल इति। करालः

पाण्डुरा रक्तपादाश्च विहङ्गाः कालचोदिताः। राक्षसानां विनाशाय कपोता विचरन्ति च ॥ ३२ ॥ वीचीकूचीति वाश्यन्त्यः शारिका वेश्मसु स्थिताः ॥ ३३ ॥ पतन्ति ग्रथिताश्चापि निर्जिताः कलहैषिणः। पक्षिणश्च मृगाः सर्वे प्रत्यादित्यं रुदन्ति च ॥ ३४ ॥ करालो विकटो मुण्डः परुषः कृष्णपिङ्गलः। कालो गृहाणि सर्वेषां काले कालेऽन्ववेक्षते ॥ ३५ ॥ एतान्यन्यानि दुष्टानि निमित्तान्युत्पतन्ति च । ज्ञात्वा प्रधार्य कार्याणि क्रियतामायतिक्षमम् ॥३६॥ * इदं वचस्तत्र निशम्य माल्यवान् परीक्ष्य रक्षोधिपतेर्मनः पुनः। अनुत्तमेषूत्तमपौरुषो बली बभूव तूष्णीं समवेक्ष्य रावणम् ॥३७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चत्रिंशः सर्गः ॥३५॥

भयङ्करः। विकटः विकटाङ्गः। विकल इति पाठे हीनाङ्ग इत्यर्थः। परुषः परुषवर्णः। कालः मृत्युः। काले काले सायं प्रातश्च। गृहाण्यन्ववेक्षते, अन्वीक्षमाण इव दृश्यत इत्यर्थः ॥ ३५ ॥ एतानि ज्ञात्वा कर्माणि कर्तव्यानि। प्रधार्य निर्धार्य। यत् आयतिक्षमम् उत्तरकालार्हम् तत्क्रियताम्। कर्माणि ७ सीताप्रदानादीनि ॥ ३६ ॥ इदमिति। अनुत्तमेषु मन्त्रिश्रेष्ठेषु। उत्तमपौरुषो माल्यवान्। इदं वचः तत्र सभायाम्। निशम्य श्रावयित्वा।

साधनद्रव्याणि ॥ ३०–३३ ॥ प्रत्यादित्यं रुदन्ति आदित्यमवलोक्य रुदन्तीत्यर्थः ॥ ३४ ॥ करालो भयङ्करः। विकलः विकलाङ्गः। कालो मृत्युः ॥ ३५ ॥ एतानि ज्ञात्वा कार्याणि कर्तव्यानि। प्रधार्य निर्धार्य। यदायतिक्षमम् उत्तरकालोचितम् तत् क्रियतामित्यर्थः ॥ ३६ ॥ इदमिति। अनुत्तमेषु निकृष्टेषु राक्षसेषु। उत्तम

स०–इदं वचः रावणं प्रति निगद्य तस्य रक्षोधिपतेः मनः पुनः पुनः परीक्ष्य अनिवर्तनं ज्ञात्वा रावणं समवेक्ष्य तूष्णीं बभूवेत्यन्वयः। "अर्थनिबन्धनेयं संज्ञा" इत्युक्तेः वचो रावणं निगद्येति द्विकर्मकता। अनुत्तमेषु असदृशेषु राक्षसेषु। यद्वा अनुत्तमेषु नीचेषु रक्षोधिपतेः मनः परीक्ष्य स्वयमुत्तमपौरुष इति तूष्णीं बभूव ॥ ३७ ॥

---

* विष्णुं मन्यामहे रामं मानुषं रूपमास्थितम्। न हि मानुषमात्रोऽसौ राघवो दृढविक्रमः ॥ येन बद्धः समुद्रस्य स सेतुः परमाद्भुतः। कुरुष्व नरराजेन सन्धिं रामेण रावण ॥ इति श्लोकद्वयं प्राक्षप्तमिति प्राचीनैर्न व्याख्यातमिति कतकः ॥ सत्यतीर्थैस्तु–सः चारैः कथितः। येन सेतुर्बद्धः तेन रामेण सन्धिं कुरुष्व ॥ इति व्याख्यातम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्तर्भावितण्यर्थोऽयम् । रावणं रावणाकारम् । समवेक्ष्य इङ्गितादिदर्शनपुरःसरं दृष्ट्वा रक्षोधिपतेर्मनः परीक्ष्य अनिवर्त्यं ज्ञात्वा तूष्णीं बभूव । उपदेशाद्विररामेत्यर्थः ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चत्रिंशः सर्गः ॥ ३५ ॥

अथ लङ्कागुप्तिकरणं षट्त्रिंशे—तत्त्विति । हितमुक्तं हितं यथा भवति तथा उक्तम् । न मर्षयति नामर्षयत् ॥ १ ॥ परिवृत्ताक्षः घूर्णिताक्षः ॥ २ ॥ पर

तत्तु माल्यवतो वाक्यं हितमुक्तं दशाननः । न मर्षयति दुष्टात्मा कालस्य वशमागतः ॥ १ ॥ स बद्ध्वा भ्रुकुटिं वक्त्रे क्रोधस्य वशमागतः । अमर्षात् परिवृत्ताक्षो माल्यवन्तमथाब्रवीत् ॥ २ ॥ हितबुद्ध्या यदहितं वचः परुषमुच्यते । परपक्षं प्रविश्यैव नैतच्छ्रोत्रं गतं मम ॥ ३ ॥ मानुषं कृपणं राममेकं शाखामृगाश्रयम् । समर्थं मन्यसे केन त्यक्तं पित्रा वनालयम् ॥ ४ ॥ रक्षसामीश्वरं मां च देवतानां भयङ्करम् । हीनं मां मन्यसे केन ह्यहीनं सर्वविक्रमैः ॥ ५ ॥ वीरद्वेषेण वा शङ्के पक्षपातेन वा रिपोः । त्वयाऽहं परुषाण्युक्तः परप्रोत्साहनेन वा ॥ ६ ॥

पक्षं प्रविश्यैव शत्रुषु स्नेहमनुसृत्यैव । हितबुद्ध्या हितमित्ययं ज्ञास्यतीति बुद्ध्या । अहितं परुषं च यद्वच उक्तम् एतत् मम श्रोत्रं न गतमित्यन्वयः ॥ ३ ॥ भवतः परपक्षानुसारश्च न युक्त इत्याह—मानुषमिति । मानुषं जात्या हीनबलम् । कृपणं प्रकृत्या हीनम् । एकम् असहायम् । शाखामृगाश्रयं क्षुद्रसहायम् । पित्रा त्यक्तं निर्धनम् । वनालयं राज्यहीनम् । रामं केन कथंप्रकारेण समर्थं प्रबलं मन्यसे ॥ ४ ॥ स्वस्मिन् तद्वैपरीत्यमाह—रक्षसामिति । हीनं दुर्बलम् ॥ ५ ॥ एवं परप्राबल्यस्वदौर्बल्ययोरभावेऽपि परुषोक्तौ हेतुमाशङ्कते—वीरद्वेषेणेति । वीरद्वेषेण सजातीयविरद्वेषेण । रिपोः पक्ष

पौरुषो माल्यवान् । तत्र सभायाम् । निगद्येति पाठेऽपि श्रावयित्वा रावणं समवेक्ष्य रक्षोधिपतेर्मनः परीक्ष्य अनिवर्तनं ज्ञात्वा तूष्णीं बभूव, किमपि नोवाचेत्यर्थः ॥ ३७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चत्रिंशः सर्गः ॥ ३५ ॥ १ ॥ २ ॥ हितबुद्ध्येति । परपक्षं प्रविश्य अनुसृत्य ॥ ३ ॥ मानुषमित्यादिश्लोकद्वयस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु—वनालयं वनं जलमुदधिः आलयः शयनस्थानं यस्य तम्, वटपत्रशायिनं नारायणमित्यर्थः । अत एव पित्रा त्यक्तम्, जन्मादिरहितमित्यर्थः । ईश्वरस्य जन्माद्यभावादेव पित्राद्यभावः । अत एव एकम् अद्वितीयम् । अत एव शाखामृगाश्रयं शाखाभिः वेदशाखाभिर्मृग्यत इति शाखामृगः वेदवेद्यः सर्वेश्वरः स चासावाश्रयश्चेति तम् । तथापि केनापि हेतुना मानुषं मनुष्यरूपेणावतीर्णम् अत एव कृपणं कृपालुं रामं समर्थं मन्यसे किल, तद्युक्तमेव । केन हेतुना रक्षसामीश्वरं सर्वपराक्रमैर्हीनं मामहीनं मन्यस इत्यर्थः ॥ ४–७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पातेन शत्रौ पक्षपातेन ॥ ६ ॥ परप्रोत्साहनेनेत्येतदुपपादयति–प्रभवन्तमिति । प्रभवन्तं प्रभावयुक्तम् । पदस्थं परिपक्वबुद्धिम् । परप्रोत्साहनाभावे पण्डितस्य पदस्थविषयकपरुषवचनं नोपपद्यत इत्यर्थः ॥ ७ ॥ अस्तु त्वदुक्तं परमार्थः, तथापि दुर्लभवस्तुविशेषः कथं त्याज्य इत्याह–आनीयेति ।

प्रभवन्तं पदस्थं हि परुषं कोऽभिधास्यति । पण्डितः शास्त्रतत्त्वज्ञो विना प्रोत्साहनाद्रिपोः ॥७॥ आनीय च वनात् सीतां पद्महीनामिव श्रियम् । किमर्थं प्रतिदास्यामि राघवस्य भयादहम् ॥८॥ वृतं वानरकोटीभिः ससुग्रीवं सलक्ष्मणम् । पश्य कैश्चिदहोभिस्त्वं राघवं निहतं मया ॥ ९ ॥ द्वन्द्वे यस्य न तिष्ठन्ति दैवतान्यपि संयुगे । स कस्माद्रावणो युद्धे भयमाहारयिष्यति ॥१०॥ द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित् । एष मे सहजो दोषः स्वभावो दुरतिक्रमः ॥ ११ ॥ यदि तावत् समुद्रे तु सेतुर्बद्धो यदृच्छया । रामेण विस्मयः कोऽत्र येन ते भयमागतम् ॥ १२ ॥

किमर्थं केन हेतुना । राघवस्य राघवात् ॥ ८ ॥ ९ ॥ द्वन्द्वे द्वन्द्वयुद्धे । युद्धे रामयुद्धे ॥ १० ॥ अत्यन्तहितपरं वृद्धं मातामहं कथमेवं परुषमुक्तवानस्मीत्यनुतापेनाह--द्विधेति । राम आगत्य भयं जनयिष्यतीति त्वयोक्तम् । न केवलं भयमात्रम् । द्विधा भज्येयं शिरश्छेदं प्राप्नुयाम् । एवमपि न नमेयम् । कस्यचित् न केवलं रामस्य ततोऽपि शतगुणबलवतोऽपि द्विधा भङ्गादपि कस्यचिन्नमनमत्यन्तदुस्सहमित्यर्थः । तर्हि हीयमानेन सन्धिः कार्यः इति नीतिशास्त्रविरोधः स्यात्तत्राह एष मे सहजो दोष इति । यदि दोषत्वमनुमतं तर्हि स त्याज्य एवेत्याशङ्कयाह स्वभाव इति । न हि तिक्तो निम्बो मधुरायत इति भावः ॥ ११ ॥ अथ सेतुबन्धेन विस्मयसे चेत् तदपि काकतालीयम् अतो मा भूत्ते भयमित्याह–यदीति । तावत् समुद्रे स्वल्पसमुद्रे

आनीय च वनादित्यादिश्लोकद्वयस्य प्रातीतिकार्थः स्पष्टः । रामहस्ताद्वधेच्छयैव वनात्सीतामानीय राघवस्य भयात् किमर्थं प्रतिदास्यामीत्यर्थः ॥ ८ ॥ एवं चेदत्र राम आयास्यति किम् ? तत्राह–वृतमिति । कैश्चिदहोभिः मया हेतुना निहतम् आगतमित्यर्थः । "हन हिंसागत्योः" इति धातोरेवमर्थः । वानरकोटीभिर्वृतं ससुग्रीवं सलक्ष्मणं राघवं पश्य, द्रक्ष्यसीत्यर्थः ॥ ९ ॥ एवं चेत्तर्हि कथं न बिभेषीत्यत्राह–द्वन्द्व इति । यस्य मम ॥ १० ॥ मानहानिकरं त्वद्वाक्यं न ग्राह्यमित्याशयेनाह–द्विधेति । एवमनया रीत्या द्विधा भज्येयमपि शत्रुणा भज्यमानोऽपि कस्यचिदपि न नमेयं तु न नमेयमेव । तदेतन्नयविरुद्धम्, तत्राह एष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यर्थः ॥ १२ ॥ अर्णवं तीर्त्वा स्थितो राम इत्यर्थः ॥ १३ ॥ संरब्धम् अहङ्कारयुक्तम् । व्रीडित इति । स्वोपदेशवैफल्यादिति भावः ॥ १४ ॥ यथोचितमिति । प्रत्युत्थानादिनेति भावः ॥ १५ ॥ मन्त्रयित्वा कर्तव्यं विचार्य । विमृश्य निश्चित्य ॥ १६ ॥ स इति । व्यादिदेश, रक्षणायेति

स तु तीर्त्वार्णवं रामः सह वानरसेनया । प्रतिजानामि ते सत्यं न जीवन् प्रतियास्यति ॥ १३ ॥ एवं ब्रुवाणं संरब्धं रुष्टं विज्ञाय रावणम् । व्रीडितो माल्यवान् वाक्यं नोत्तरं प्रत्यपद्यत ॥ १४ ॥ जयाशिषा च राजानं वर्धयित्वा यथोचितम् । माल्यवानभ्यनुज्ञातो जगाम स्वं निवेशनम् ॥ १५ ॥ रावणस्तु सहामात्यो मन्त्रयित्वा विमृश्य च । लङ्कायामतुलां गुप्तिं कारयामास राक्षसः ॥ १६ ॥ स व्यादिदेश पूर्वस्यां प्रहस्तं द्वारि राक्षसम् । दक्षिणस्यां महावीर्यौ महापार्श्वमहोदरौ ॥ १७ ॥ पश्चिमायामथो द्वारि पुत्रमिन्द्रजितं तथा । व्यादिदेश महामायं बहुभी राक्षसैर्वृतम् ॥ १८ ॥ उत्तरस्यां पुरद्वारि व्यादिश्य शुकसारणौ । स्वयं चात्र भविष्यामि मन्त्रिणस्तानुवाच ह ॥ १९ ॥ राक्षसं तु विरूपाक्षं महावीर्यपराक्रमम् । मध्यमेऽस्थापयद् गुल्मे बहुभिः सह राक्षसैः ॥ २० ॥ एवं विधानं लङ्कायाः कृत्वा राक्षसपुङ्गवः । कृतकृत्यमिवात्मानं मन्यते कालचोदितः ॥ २१ ॥ विसर्जयामास ततः स मन्त्रिणो विधानमाज्ञाप्य पुरस्य पुष्कलम् । जयाशिषा मन्त्रिगणेन पूजितो विवेश चान्तःपुरमृद्धिमन्महत् ॥ २२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षट्त्रिंशः सर्गः ॥ ३६ ॥

शेषः ॥ १७ ॥ १८ ॥ उत्तरस्यामिति । भविष्यामीत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ १९ ॥ मध्यमे गुल्म इति । गुल्मो नाम नगरमध्यचैत्यस्थानम् ॥ २० ॥ विधानं रक्षणसंविधानम् ॥ २१ ॥ पुष्कलं समग्रम् ॥ २२ ॥ इति श्रीगोविन्द० श्रीरामा० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्त्रिंशः सर्गः ॥ ३६ ॥

इति । दोषश्चेत् किमिति न त्यज्यते ? तत्राह स्वभाव इति ॥ ११ ॥ १२ ॥ स त्वित्यस्य वास्तवार्थस्तु—रामः वानरसेनया सह अर्णवं तीर्त्वा जीवन् प्रतियास्यतीति ते सत्यं प्रतिजानामि न सन्देहः । अथापि मे स्वभावो दुरतिक्रमः इति पूर्वेण सम्बन्धः ॥ १३–१८ ॥ उत्तरस्यामिति । स्वयं चात्र भविष्यामीत्यत्र इतिकरणं द्रष्टव्यम् ॥ १९–२२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षट्त्रिंशः सर्गः ॥ ३६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रामस्य सेनागुप्तिविधानं सप्तत्रिंशे—नरवानरेत्यादिश्लोकत्रयमेकान्वयम् । सहदायादः सबान्धवः । "दायादौ सुतबान्धवौ" इत्यमरः । इदं विशेषणं सर्वत्र यथार्हमन्वेति । अमित्रविषयं शत्रुदेशम् । समर्थयन् अमन्त्रयन् ॥ १–३ ॥ रामानु०—समर्थयन् अमन्त्रयन् । अडभाव आर्षः ॥ ३ ॥ अथ विचारप्रकारमेवाह—इयमित्यादिना । सा हनुमता पूर्वमुक्ता । कार्यसिद्धिं विजयसिद्धिम् । पुरस्कृत्य प्रधानीकृत्य । विनिर्णये निमित्ते मन्त्रयध्वम् । विजयसाधक

नरवानरराजौ तौ स च वायुसुतः कपिः । जाम्बवानृक्षराजश्च राक्षसश्च विभीषणः ॥ १ ॥ अङ्गदो वालिपुत्रश्च सौमित्रिः शलभः कपिः । सुषेणः सहदायादो मैन्दो द्विविद एव च ॥ २ ॥ गजो गवाक्षः कुमुदो नलोऽथ पनसस्तथा । अमित्रविषयं प्राप्ताः समवेताः समर्थयन् ॥ ३ ॥ इयं सा लक्ष्यते लङ्का पुरी रावणपालिता । सासुरोरगगन्धर्वैरमरैरपि दुर्जया ॥ ४ ॥ कार्यसिद्धिं पुरस्कृत्य मन्त्रयध्वं विनिर्णये । नित्यं सन्निहितो ह्यत्र रावणो राक्षसाधिपः ॥ ५ ॥ तथा तेषु ब्रुवाणेषु रावणावरजोऽब्रवीत् । वाक्यमग्राम्यपदवत् पुष्कलार्थं विभीषणः ॥ ६ ॥ अनलः शरभश्चैव सम्पातिः प्रघसस्तथा । गत्वा लङ्कां ममामात्याः पुरीं पुनरिहागताः ॥ ७ ॥ भूत्वा शकुनयः सर्वे प्रविष्टाश्च रिपोर्बलम् । विधानं विहितं यच्च तद्दृष्ट्वा समुपस्थिताः ॥ ८ ॥ संविधानं यदाहुस्ते रावणस्य दुरात्मनः । राम तद्ब्रुवतः सर्वं यथातत्त्वेन मे शृणु ॥ ९ ॥ पूर्वं प्रहस्तः सबलो द्वारमासाद्य तिष्ठति । दक्षिणं च महावीर्यौ महापार्श्वमहोदरौ ॥ १० ॥

कार्यनिर्णयाय मन्त्रः प्रवर्त्यतामित्यर्थः ॥ ४ ॥ ५ ॥ अग्राम्यपदवत् संस्कृतपदवत् । सर्वेषां स्फुटप्रतिपत्तये स्वदेशभाषापदरहितमुक्तवानित्यर्थः ॥६॥ अनल इत्यादिश्लोकत्रयम् । विधानं नगररक्षणसंविधानम् । ते दुरात्मनो रावणस्य यत्संविधानमाहुः तद्यथातत्त्वेन याथार्थ्येन ब्रुवतः मे मत्तः शृणु ॥ ७–९ ॥ पूर्वमिति । स्पष्टः ॥ १० ॥

॥ १ ॥ सहदायादः सबन्धुवर्गः ॥ २ ॥ अमित्रविषयं शत्रुदेशम् । समर्थयन् अमन्त्रयन् ॥ ३ ॥ या दुरासदेति श्रूयते सेयं लङ्केत्यर्थः ॥ ४ ॥ कार्यसिद्धिं पुरस्कृत्य विनिर्णये निमित्ते मन्त्रयध्वं शत्रुहननकार्यनिश्चयाय मन्त्रः क्रियतामित्यर्थः ॥ ५ ॥ अग्राम्यपदवत् अग्राम्यार्थपदवत् ॥ ६ ॥ ७ ॥ विधानं लङ्कारक्षणम् ॥ ८–१४ ॥

For Private And Personal Use Only

पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः । बहुभी राक्षसैः प्रधानराक्षसैर्वृतः । नानाप्रहरणैः शूरैरावृतः । रावणात्मजः इन्द्रजित् पश्चिमद्वारम्, आसाद्य तिष्ठतीत्यनुकृष्यते ॥ ११ ॥ असंविग्नः अकम्पितहृदयः । राक्षसैः प्रधानभूतैः ॥ १२ ॥ १३ ॥ बलेन सेनया । राक्षसैः मुख्यैः ॥ १४ ॥

इन्द्रजित् पश्चिमद्वारं राक्षसैर्बहुभिर्वृतः । पट्टिशासिधनुष्मद्भिः शूलमुद्गरपाणिभिः । नानाप्रहरणैः शूरैरावृतो रावणात्मजः ॥ ११ ॥ राक्षसानां सहस्रैस्तु बहुभिः शस्त्रपाणिभिः । युक्तः परमसंविग्नो राक्षसैर्बहुभिर्वृतः ॥ १२ ॥ उत्तरं नगरद्वारं रावणः स्वयमास्थितः ॥ १३ ॥ विरूपाक्षस्तु महता शूलखड्गधनुष्मता । बलेन राक्षसैः सार्धं मध्यमं गुल्ममास्थितः ॥ १४ ॥ एतानेवंविधान् गुल्मान् लङ्कायां समुदीक्ष्य ते । मामकाः सचिवाः सर्वे पुनः शीघ्रमिहागताः ॥ १५ ॥ गजानां च सहस्रं च रथानामयुतं पुरे । हयानामयुते द्वे च साग्रकोटिश्च रक्षसाम् ॥ १६ ॥ विक्रान्ता बलवन्तश्च संयुगेष्वाततायिनः । इष्टा राक्षसराजस्य नित्यमेते निशाचराः ॥ १७ ॥

गुल्मान् सेनाः । " गुल्मो रुक्स्तम्बसेनासु " इत्यमरः ॥ १५ ॥ गजानां गजयोधिनाम् । रथानां हयानामित्यत्राप्येवं द्रष्टव्यम् । हयानां साग्रकोटिः द्वे अयुते चेत्यन्वयः । एते एतावन्तः । यद्वा गजानामित्यादिशब्दा गजादिपराः । एवमुत्तरोत्तराधिकसङ्ख्योच्यते । हयानां द्वे अयुते । रक्षसां साग्रकोटिः पूर्णा कोटिः । एते रावणस्येष्टा अन्तरङ्गाः, स्वसेविन इत्यर्थः ॥ १६ ॥ आततायिनः क्रूरा इत्यर्थः ॥ १७ ॥

एतानिति । गुल्मान् गणान् ॥ १५ ॥ गजानां गजयोधिनाम् । सहस्रं, सन्नद्धमिति शेषः । रथानां रथिनाम् अयुतम्, अत्रापि सन्नद्धमिति शेषः । हयानामयुते द्वे सन्नद्धे रक्षसां साग्रकोटिस्सन्नद्धेत्यर्थः ॥ १६ ॥ १७ ॥

स०–परमसंविग्नः परं यथा भवति तथा असंविग्नः विभीः तिष्ठतीत्यन्वयः । शुकसारणावेदितमहाबलस्मरणादन्तःकरणे भीत इति व्याख्या स्तुतिप्रस्तावाननुगुणा । यदि वक्तव्या भीतिस्तर्हि हनुमतैकेन कृतस्य कर्मणो दृष्टत्वेन वक्तव्या । श्रवणापेक्षया स्वसाक्षिणः प्राबल्यात् ॥ १२ ॥ आततायिनः स्वयमेव सीतोपरोधापराधं कृत्वा शस्त्रपाणय इत्याततायिनः । यद्वा संयुगे युद्धे इषवः आयन्ते सदा सम्यक् क्षिप्यन्ते येन तदिष्वातं धनुः तेन तायन्ते पालयन्ति जनानिति संयुगेष्वाततायिनः । " तायृ सन्तानपालनयोः " इति धातोः । यद्वा परदारापहर्तृसम्बन्धित्वादाततायिनः । " क्षेत्रदारापहर्ता च " इत्युक्तेः । निशाचराः पृथपाः ॥ १७ ॥ ॥११९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अत्र राक्षसेषु । एकैकस्य राक्षसस्य । सहस्राणां सहस्रं दशलक्षसङ्ख्याविशिष्टः परिवारः । इदानीं युद्धार्थे युद्धनिमित्तम् उपतिष्ठत इत्यन्वयः ॥ १८ ॥ एतामिति सार्धश्लोकः । तान् मन्त्रिभूतान् । दर्शनानन्तरं सचिवैः प्रयोज्यकर्तृभिः । लङ्कायां सर्वां प्रवृत्तिमित्यनुषज्यते । रामाय प्रत्यवेदयत्, सचिवैरपि तं वृत्तान्तमावेदयदित्यर्थः ॥ १९ ॥ राममित्यादि श्लोकत्रयम् । उत्तरम् अनन्तरवक्तव्यम् ॥ २० ॥ दिग्विजयकालिकबलादाधुनिक

एकैकस्यात्र युद्धार्थे राक्षसस्य विशांपते । परिवारः सहस्राणां सहस्रमुपतिष्ठते ॥ १८ ॥ एतां प्रवृत्तिं लङ्कायां मन्त्रिप्रोक्तां विभीषणः । एवमुक्त्वा महाबाहू राक्षसांस्तानदर्शयत् । लङ्कायां सचिवैः सर्वां रामाय प्रत्यवेदयत् ॥ १९ ॥ रामं कमलपत्राक्षमिदमुत्तरमब्रवीत् । रावणावरजः श्रीमान् रामप्रियचिकीर्षया ॥ २० ॥ कुबेरं तु यदा राम रावणः प्रत्ययुद्ध्यत । षष्टिः शतसहस्राणि तदा निर्यान्ति राक्षसाः ॥ २१ ॥ पराक्रमेण वीर्येण तेजसा सत्त्वगौरवात् । सदृशा येऽत्र दर्पेण रावणस्य दुरात्मनः ॥ २२ ॥ अत्र मन्युर्न कर्तव्यो रोषये त्वां न भीषये । समर्थो ह्यसि वीर्येण सुराणामपि निग्रहे ॥ २३ ॥

बलमधिकमिति कथयितुं पूर्वबलं परिगणयति—कुबेरमिति । निर्यान्ति निर्ययुः । पराक्रमेण पराभिभवसामर्थ्येन । वीर्येण युद्धे स्वयमविकृतत्वेन । तेजसा प्रतापेन । सत्त्वगौरवात् धैर्यातिशयेनेत्यर्थः । दर्पेण च । रावणस्य अत्र ये सदृशास्तादृशा राक्षसा इति पूर्वेणान्वयः ॥ २१ ॥ २२ ॥ स्वामिसन्निधौ शत्रुबलवर्णनमयुक्तमित्याशङ्क्य परिहरति—अत्रेति । अत्र बलवर्णने सति । मन्युः क्रोधः न कर्तव्यः । रोषये शत्रुनिरसनाय रोष

एकैकस्येति । अत्र परिगणितगजपोधिमभृतिचतुर्विधराक्षसेषु एकैकस्य राक्षसस्य सहस्राणां सहस्रं परिवारो युद्धार्थमुपतिष्ठते उपतिष्ठतीति सम्बन्धः ॥ १८ ॥ विभीषणः मन्त्रिप्रोक्तां लङ्कायां प्रवृत्तिम् एवमुक्त्वा तान् राक्षसान् मन्त्रीन् अदर्शयदित्यर्थः । लङ्कायां सर्वां, प्रवृत्तिमिति शेषः । सचिवैस्तैरेव मन्त्रिभिः रामाय प्रत्यवेदयत् ॥ १९ ॥ राममिति । ततो राममिदमुत्तरमब्रवीदिति सम्बन्धः ॥ २० ॥ रावणस्येदानीन्तनबलं प्रभूततरमिति ज्ञापयितुं तस्य पुरातनबलस्य इयत्तामाह—कुबेरमिति द्वाभ्याम् । सत्त्वगौरवात् धैर्यातिशयेन । अत्र लङ्कायाम्, स्थिता इति शेषः ॥२१॥२२॥ अत्र रावणबलवर्णनविषये मन्युर्न कर्तव्यः । रोषये रोषमुत्पादये ।

For Private And Personal Use Only

मुत्पादये। न भीषये शत्रुबलवर्णनेन न भीतिमुत्पादये। रोषोत्पादनस्य फलमाह समर्थो हीति ॥ २३ ॥ तत् राक्षसबलस्य व्यूढत्वात् ।
महता बलेन वृतो भवानपि। चतुरङ्गेण रावणसेनायाश्चतुरवयवेन। व्यूह्य विभज्य। निर्मथिष्यसि। मध्यमपुरुषत्वमार्षम्। चतुरङ्गकार्यकरत्वाच्चतुरङ्गत्व

तद्भवांश्चतुरङ्गेण बलेन महता वृतः। व्यूह्येदं वानरानीकं निर्मथिष्यसि रावणम् ॥ २४ ॥ रावणावरजे वाक्यमेवं ब्रुवति राघवः। शत्रूणां प्रतिघातार्थमिदं वचनमब्रवीत् ॥ २५ ॥ पूर्वद्वारे तु लङ्काया नीलो वानरपुङ्गवः। प्रहस्तप्रतियोद्धा स्याद्वानरैर्बहुभिर्वृतः ॥ २६ ॥ अङ्गदो वालिपुत्रस्तु बलेन महता वृतः। दक्षिणे बाधतां द्वारे महापार्श्वमहोदरौ ॥ २७ ॥ हनुमान् पश्चिमद्वारं निपीड्य पवनात्मजः। प्रविशत्वप्रमेयात्मा बहुभिः कपिभिर्वृतः ॥ २८ ॥ दैत्यदानवसङ्घानामृषीणां च महात्मनाम्। विप्रकारप्रियः क्षुद्रो वरदानबलान्वितः ॥ २९ ॥ परिक्रामति यः सर्वान् लोकान् सन्तापयन् प्रजाः। तस्याहं राक्षसेन्द्रस्य स्वयमेव वधे धृतः ॥ ३० ॥ उत्तरं नगरद्वारमहं सौमित्रिणा सह। निपीड्याभिप्रवेक्ष्यामि सबलो यत्र रावणः ॥ ३१ ॥ वानरेन्द्रश्च बलवानृक्षराजश्च वीर्यवान्। राक्षसेन्द्रानुजश्चैव गुल्मो भवतु मध्यमः ॥ ३२ ॥

मित्यन्ये ॥२४॥ प्रतिघातार्थं प्रतिक्रियार्थम् ॥२५॥ पूर्वद्वारे, स्थित्वेति शेषः ॥ २६॥२७॥ अप्रमेयात्मेति। मायाविन इन्द्रजितोऽयमेवार्ह इति भावः ॥ २८ ॥ स्वस्य चोत्तरद्वारनिरोधहेतुमाह—दैत्यदानवेत्यादि श्लोकत्रयम्। विप्रकारप्रियः प्रियविप्रकारः। "वा प्रियस्य" इति पूर्वनिपातः। विप्रकारः पीडा क्षुद्रः क्षुद्रबुद्धिः। प्रजाः सन्तापयन् लोकान् परिक्रामतीत्यन्वयः। तस्याहमिति श्लोके यत्तच्छब्दाध्याहारेणाहंशब्दद्वयनिर्वाहः। योऽहं धृतः निश्चितः सोऽहं प्रवेक्ष्यामीत्यन्वयः। स्वयमेव अद्वारेण। यद्वा तस्याहमित्यर्धान्तमेकं वाक्यम्। उत्तरमित्यादि भिन्नं वाक्यम् ॥२९–३१॥ गुल्मो भवतु

रोषोत्पादनफलमाह—समर्थो हीति ॥ २३ ॥ चतुरङ्गेण बलेन चतुरङ्गनिर्वाह्यकार्यकरणसद्भावाद्वानरबलस्य चतुरङ्गत्वोक्तिः ॥ २४ ॥ २५ ॥ पूर्वद्वारे नीलः, तिष्ठत्विति शेषः ॥ २६–३१ ॥ वानरेन्द्र इति। गुल्मो भवतु मध्यमः बलवद्भ्यां रावणेन्द्रजिद्भ्यामधिष्ठितयोरुत्तरपश्चिमयोर्मध्ये भवत्वित्यभिप्रायः ॥ ३२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मध्यमः, मध्यमसेना भवत्वित्यर्थः। बलवद्भ्यां रावणेन्द्रजिद्भ्यामधिष्ठितयोरुत्तरपश्चिमयोः मध्यमगुल्मो भवत्वित्यर्थः ॥ ३२ ॥ न चैवेति । संज्ञा सङ्केतः ॥ ३३ ॥ अस्य प्रयोजनमाह—वानरा इति । नः अस्माकम् । वानरा एवास्मिन् स्वजने चिह्नं भविष्यतीति, अस्माकं वानरत्वमेवात्मीयत्व ज्ञापकं भविष्यतीत्यर्थः । यदि वानरा अपि कामरूपधारणेन युद्ध्येयुः । राक्षसानामपि तादृशत्वादात्मपरविवेको न स्यात् । वानरत्वन्तु जघन्यतया

न चैव मानुषं रूपं कार्यं हरिभिराहवे। एषा भवतु संज्ञा नो युद्धेऽस्मिन् वानरे बले ॥ ३३ ॥ वानरा एव नश्चिह्नं स्वजनेऽस्मिन् भविष्यति ॥ ३४ ॥ वयं तु मानुषेणैव सप्त योत्स्यामहे परान्। अहमेष सह भ्रात्रा लक्ष्मणेन महौजसा। आत्मना पञ्चमश्चायं सखा मम विभीषणः ॥ ३५ ॥ स रामः कृत्यसिद्ध्यर्थमेवमुक्त्वा विभीषणम्। सुवेलारोहणे बुद्धिश्चकार मतिमान् मतिम्। रमणीयतरं दृष्ट्वा सुवेलस्य गिरेस्तटम् ॥ ३६ ॥ ततस्तु रामो महता बलेन प्रच्छाद्य सर्वां पृथिवीं महात्मा । प्रहृष्टरूपोऽभिजगाम लङ्कां कृत्वा मतिं सोऽरिवधे महात्मा ॥ ३७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तत्रिंशः सर्गः ॥ ३७ ॥

न ते भजिष्यन्तीति भावः । इदानीं मानुषरूपपरिग्रहप्रतिषेधसामर्थ्यादितः पूर्वं मानुषरूपं परिगृह्य स्थिता इति गम्यते ॥ ३४ ॥ वयं त्विति । मानुषेण मनुष्यसंबन्धिना, रूपेणेति शेषः । विभीषणादीनामपि मानुषरूपसंस्थानसादृश्यादेवमुच्यते ॥ ३५ ॥ स राम इत्यादिसार्धश्लोक एकान्वयः । कृत्यसिद्ध्यर्थं कार्यसिद्ध्यर्थम् । सुवेलारोहणे विषये बुद्धिः बुद्धिमान् । मतुब्लोप आर्षः । मतिम् इच्छाम् । सुवेलारोहणे बुद्धिं चकार मतिमान् मतिमिति च पाठः । सुवेलारोहणबुद्धिमेव मतिं चकार, नान्यामित्यर्थः । आरोहणेच्छाहेतुमाह रमणीयतरमिति । सौन्दर्यावलोकनमेव तदारोहण

संज्ञा सङ्केतः ॥ ३३ ॥ किमर्थमत आह—वानरा इति । नः अस्माकं वानरा एव अस्मिन् स्वजने चिह्नं भविष्यति अस्माकं वानरत्वमेवात्मीयत्वज्ञापकं भविष्यतीत्यर्थः । यदि वानरा अपि कामरूपधारणेन युद्ध्येयुः राक्षसानामपि तादृक्त्वादात्मपरबलविवेको न स्यादिति भावः ॥ ३४ ॥ वयमिति । मानुषेण, रूपेणेति शेषः । वि[illegible]णादीनां मानुषरूपसंस्थानसादृश्यादेवमुच्यते ॥ ३५ ॥ कृत्यसिद्ध्यर्थं कृत्यं कर्तव्यमेव सिद्धिः प्रयोजनं यस्य तम् । विभीषणविशेषणमिदम् । सुवेलारोहणेबु[illegible]श्चकार मतिमान् मतिं सुवेलारोहणे प्रवृत्ता बुद्धिर्यस्य सः सुवेलारोहणेबुद्धिः । अलुक्समासः आर्षम् । मतिमान् आगामिगोचरबुद्धिमान् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हेतुः, ननु लङ्काप्राप्तिः । अत एव लङ्कोपरोधायावरोहणं वक्ष्यति ततस्त्विति । पृथिवीं सुवेलकटकभूमिम् । महात्मा महाबुद्धिः । प्रहृष्टरूपः अतिशयेन प्रहृष्टः । "प्रशंसायां रूपप्" । लङ्कां लङ्कैकदेशसुवेलम् । महात्मा महाधृतिरिति द्वितीयमहात्मशब्दार्थः । अभिजगाम आरोहणायेति भावः ॥ ३६ ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तत्रिंशः सर्गः ॥ ३७ ॥

स तु कृत्वा सुवेलस्य मतिमारोहणं प्रति । लक्ष्मणानुगतो रामः सुग्रीवमिदमब्रवीत् ॥ १ ॥
विभीषणं च धर्मज्ञमनुरक्तं निशाचरम् । मन्त्रज्ञं च विधिज्ञं च श्लक्ष्णया परया गिरा ॥ २ ॥
सुवेलं साधुशैलेन्द्रमिमं धातुशतैश्चितम् । अध्यारोहामहे सर्वे वत्स्यामोऽत्र निशामिमाम् ॥ ३ ॥
लङ्कां चालोकयिष्यामो निलयं तस्य रक्षसः । येन मे मरणान्ताय हृता भार्या दुरात्मना ॥ ४ ॥
येन धर्मो न विज्ञातो न तद्वृत्तं कुलं तथा । राक्षस्या नीचया बुद्ध्या येन तद् गर्हितं कृतम् ॥ ५ ॥

अथ लङ्कादर्शनार्थं सुवेलारोहणमष्टात्रिंशे–स त्वित्यादिश्लोकद्वयमेकान्वयम् । धर्मज्ञत्वादि सुग्रीवस्यापि विशेषणम् । सुवेलो नाम लङ्कासमतुङ्गताको गिरिविशेषः ॥ १ ॥ विधिज्ञं कार्यज्ञम् ॥ २ ॥ चितं व्याप्तम् । अध्यारोहामहे आरोक्ष्यामः । अयं च समुद्रतरणदिवसवृत्तान्तः पूर्वं सङ्ग्रहेणोक्तः, अद्य सविशेषमुच्यते ॥ ३ ॥ लङ्कामित्यादिश्लोकद्वयमेकान्वयम् । लङ्कालोकने निमित्तमाह–निलयमिति । मे भार्येति सम्बन्धः । मरणान्ताय मरणरूपफलाय । तत् प्रसिद्धम् । वृत्तं धर्मशास्त्रविहितस्वकुलाचारः । कुलं स्वकुलातिशयः । एतत्सर्वं भार्यापहरणनिवृत्तिहेतुः तन्नासीदित्यर्थः ॥४॥ तर्हि केन

मतिं चकार सुवेलारोहणेच्छां चकारेत्यर्थः । बुद्धिमिति द्वितीयान्तपाठे तु सुवेलारोहणे मतिं मननात्मिकाम् । बुद्धिं निश्चयात्मिकां चकारेत्यर्थः । यद्वा बुद्धिं तात्कालिकरूपां मतिं चकार अर्थनिर्धारणरूपां चकारेत्यर्थः । 'अर्थनिर्धारणं मतिः' इति तज्ज्ञाः ॥ ३६ ॥ ३७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तत्रिंशः सर्गः ॥ ३७ ॥ १ ॥ विधिज्ञं कार्यविदम् ॥ २ ॥ अध्यारोहामहे आरोक्ष्यामहे ॥ ३ ॥ मरणान्ताय मरणरूपफलायेत्यर्थः ॥ ४ ॥ नीचया क्रूरया । राक्षस्या राक्षससम्बन्धिन्या । बुद्ध्या हेतुना येन रावणेन धर्मादिकं न ज्ञातं तेन तत्कुलं गर्हितमिति सम्बन्धः ॥ ५–१२ ॥ ॥१२१॥

स०–मरणान्ताय मरणेन रक्षःकुलस्य सहितोऽन्तो नाशः स्वस्य तस्मै ॥४॥ वृत्तं सदाचारः अस्मद्विज्ञातारो वा । राक्षस्या राक्षससम्बन्धिन्या । तथापि नीचया । विभीषणं सुग्रीवीकर्तनियमुक्तिः ॥५॥

हेतुना कृतमित्यत्राह राक्षस्येति । तत् भार्यापहरणम् ॥ ५ ॥ एतादृशस्य निलयदर्शने किं फलम् ? तत्राह–तस्मिन्निति । वर्तते उत्पद्यते । तर्हि तन्मात्रवधे यत्नः क्रियतामित्यत्राह–यस्येति ॥ ६ ॥ अन्यस्य दोषेणान्यवधः किमर्थं क्रियत इत्यत्राह–एक इति । एकः पापं कुरुते नीचेन तेन कर्त्रा आत्मापचारेण तद्दोषेण कारणेन कुलं तत्संबन्धिनः सर्वे विनश्यन्ति ॥ ७ ॥ संमन्त्रयन् वदन् । उपारुहत् उपारुक्षत् ॥ ८ ॥ पृष्ठत इत्यादि सार्धश्लोकः ।

तस्मिन् मे वर्तते रोषः कीर्तिते राक्षसाधमे । यस्यापराधान्नीचस्य वधं द्रक्ष्यामि रक्षसाम् ॥ ६ ॥ एको हि कुरुते पापं कालपाशवशं गतः । नीचेनात्मापचारेण कुलं तेन विनश्यति ॥ ७ ॥ एवं सम्मन्त्रयन्नेव सक्रोधो रावणं प्रति । रामः सुवेलं वासाय चित्रसानुमुपारुहत् ॥ ८ ॥ पृष्ठतो लक्ष्मणश्चैनमन्वगच्छत् समाहितः । सशरं चापमुद्यम्य सुमहद्विक्रमे रतः । तमन्वरोहत् सुग्रीवः सामात्यः स विभीषणः ॥ ९ ॥ हनुमानङ्गदो नीलो मैन्दो द्विविद एव च ॥ १० ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः । पनसः कुमुदश्चैव हरो रम्भश्च यूथपः ॥ ११ ॥ जाम्बवांश्च सुषेणश्च ऋषभश्च महामतिः । दुर्मुखश्च महातेजास्तथा शतवलिः कपिः ॥ १२ ॥ एते चान्ये च बहवो वानराः शीघ्रगामिनः । ते वायुवेगप्रवणास्तं गिरिं गिरिचारिणः । अध्यारोहन्त शतशः सुवेलं यत्र राघवः ॥ १३ ॥ ते त्वदीर्घेण कालेन गिरिमारुह्य सर्वतः । ददृशुः शिखरे तस्य विषक्तामिव खे पुरीम् ॥ १४ ॥

समाहितः सावधानः ॥ ९ ॥ सामात्य इत्युक्तं विवृणोति–हनुमानित्यादिचतुःश्लोकी । हनुमानिति पृथगुक्त्या रामलक्ष्मणौ पृष्ठ्यामेवारूढाविति गम्यते ॥ १०–१२ ॥ ते प्रसिद्धाः । एते चान्ये च । वायुवेगप्रवणाः वायुवेगेन गच्छन्तः । "प्रुङ् गतौ" इति धातोर्बहुलग्रहणात्कर्तरि ल्युट् । अत एव शीघ्रगामिनः सन्तः अध्यारोहन्त ॥ १३ ॥ ते रामादयः । तस्य प्रसिद्धस्य त्रिकूटस्य । खे विषक्ताम् आकाशे लम्बमानामिव स्थिताम् । पुरीं लङ्कां

वायुवेगप्रवणाः वायुवेगगतयः "प्रुङ् गतौ" इति धातोः रूपम् ॥ १३ ॥ तस्य प्रसिद्धस्य त्रिकूटाद्रेः शिखरे विषक्तां खे चरन्तीमिव स्थितां पुरीं ददृशुरिति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वतो ददृशुः ॥ १४ ॥ वानराश्च ददृशुरित्याह–तामिति । स्पष्टः ॥ १५ ॥ प्राकारस्य चयः वप्रम्, तत्र स्थितैः । "स्याच्चयो वप्रमस्त्रियाम्" इत्यमरः ॥ १६ ॥ १७ ॥ प्रतिरञ्जितः रक्तवर्णीकृतः । पूर्णचन्द्रप्रदीप्तेति । अनेन पौर्णमास्यां सुवेलारोहणमित्युक्तम् । प्रथमायां युद्धारम्भ इत्याहुः । यद्वा पूर्णचन्द्रतुल्यप्रदीपवतीति वाऽर्थः । सम्भवन्ति हि वानरसेनायामपि प्रकाशार्थमारोपिता दीपाः ॥१८॥ हरि वाहिनीपतिः । वानरसेनानिर्वाहकः ॥१९॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टात्रिंशः सर्गः ॥ ३८ ॥

तां शुभां प्रवरद्वारां प्राकारपरिशोभिताम् । लङ्कां राक्षससम्पूर्णां ददृशुर्हरियूथपाः ॥ १५ ॥ प्राकारचयसंस्थैश्च तदा नीलैर्निशाचरैः । ददृशुस्ते हरिश्रेष्ठाः प्राकारमपरं कृतम् ॥ १६॥ ते दृष्ट्वा वानराः सर्वे राक्षसान् युद्धकांक्षिणः । मुमुचुर्विविधान्नादांस्तत्र रामस्य पश्यतः ॥ १७ ॥ ततोऽस्तमगमत् सूर्यः सन्ध्यया प्रतिरञ्जितः । पूर्णचन्द्रप्रदीप्ता च क्षपा समभिवर्तते ॥ १८ ॥ ततः स रामो हरिवाहिनीपतिर्विभीषणेन प्रतिनन्द्य सत्कृतः । सलक्ष्मणो यूथपयूथसंवृतः सुवेलपृष्ठे न्यवसद्यथासुखम् ॥ १९ ॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे अष्टात्रिंशः सर्गः ॥ ३८ ॥

तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः । लङ्कायां ददृशुर्वीरा वनान्युपवनानि च ॥ १ ॥
समसौम्यानि रम्याणि विशालान्यायतानि च । दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः ॥ २ ॥

अथ लङ्कादर्शनमेकोनचत्वारिंशे–तामिति । तां रात्रिमित्यत्यन्तसंयोगे द्वितीया । ददृशुः प्रातरिति सिद्धम् । वनानि अकृत्रिमाणि । उपवनानि कृत्रिमाणि ॥ १ ॥ समानि च तानि सौम्यानि च समसौम्यानि निम्नोन्नतत्वरहितानि स्निग्धानि चेत्यर्थः । अत एव रम्याणि रमणीयानि । विशालानि विपुलानि ।

सम्बन्धः ॥ १४ ॥ १५ ॥ प्राकारचयसंस्थैः प्राकारस्य चयो वप्रं तत्र संस्थैः नीलैर्निशाचरैः कृतमपरं प्राकारमिव ददृशुः, प्राकारचयस्थान् निशाचरान् प्राकारबुद्ध्या ददृशुरित्यर्थः ॥ १६ ॥ १७ ॥ पूर्णचन्द्रप्रदीप्तेति विशेषणात्सुवेलारोहणं पौर्णमास्यामित्यवगम्यते, तेन प्रतिपदि युद्धारम्भः ॥ १८ ॥ १९ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायाम् अष्टात्रिंशः सर्गः ॥ ३८ ॥ १ ॥ समसौम्यानि समानि सौम्यानीत्यर्थः । दैर्घ्यविशालैस्समानि दुष्टमृगाद्युपद्रवराहित्येन

For Private And Personal Use Only

आयतानि दीर्घाणि । दृष्टिरम्याणि नयनाकर्षणानि वनान्युपवनानि चेत्याकृष्यान्वयः ॥२॥ चम्पकेत्यादिश्लोकचतुष्टयमेकान्वयम् । नागमाला नागकेसरमाला ॥ ३॥ हिन्तालैरित्यादि । उपलक्षितेति शेषः ॥४॥ दिव्यैः पारिजातादिभिः । अत्राप्युपलक्षितेति शेषः । विचित्रेत्यादि पदद्वयमपि दिव्यद्रुम विशेषणम् । शाद्वलैरित्यादावप्युपलक्षणे तृतीया । लङ्काशब्दश्चात्र सुवेलपरः । उत्तरत्र वानरप्रवेशोक्तेः । शुशुभे शोभमाना दृश्यत इत्यन्वयः ॥ ५ ॥ ६ ॥

चम्पकाशोकपुन्नागसालतालसमाकुला । तमालवनसञ्छन्ना नागमालासमावृता ॥ ३ ॥ हिन्तालैरर्जुनैर्नीपैः सप्तपर्णैश्च पुष्पितैः । तिलकैः कर्णिकारैश्च पाटलैश्च समन्ततः ॥ ४ ॥ शुशुभे पुष्पिताग्रैश्च लतापरिगतैर्द्रुमैः । लङ्का बहुविधैर्दिव्यैर्यथेन्द्रस्यामरावती ॥ ५ ॥ विचित्रकुसुमोपेतै रक्तकोमलपल्लवैः । शाद्वलैश्च तथा नीलैश्चित्राभिर्वनराजिभिः ॥ ६ ॥ गन्धाढ्यान्यभिरम्याणि पुष्पाणि च फलानि च । धारयन्त्यगमास्तत्र भूषणानीव मानवाः ॥७॥ तच्चैत्ररथसङ्काशं मनोज्ञं नन्दनोपमम् । वनं सर्वर्तुकं रम्यं शुशुभे षट्पदायुतम् ॥ ८ ॥ नत्यूहकोयष्टिभकैर्नृत्यमानैश्च बर्हिभिः । रुतं परभृतानां च शुश्रुवुर्वननिर्झरे ॥ ९ ॥ नित्यमत्तविहङ्गानि भ्रमराचरितानि च । कोकिलाकुलषण्डानि विहगाभिरुतानि च ॥ १० ॥ भृङ्गराजाभिगीतानि भ्रमरैः सेवितानि च । कोणालकविघुष्टानि सारसाभिरुतानि च ॥११॥ विविशुस्ते ततस्तानि वनान्युपवनानि च । हृष्टाः प्रमुदिता वीरा हरयः कामरूपिणः॥ १२

गन्धेति । तत्र वनेषु धारयन्ति अधारयन् । अगमाः वृक्षाः ॥७॥ सर्वे ऋतवो यस्मिन् तत्सर्वर्तुकम् । "शेषाद्विभाषा" इति कप्प्रत्ययः । षट्पदायुतं षट्पदैः आ समन्ताद्युतम् ॥८॥ वननिर्झरे नत्यूहैः कोयष्टिभकैः जलकुक्कुटविशेषैः नृत्यमानैः नृत्यद्भिः बर्हिणैश्च सहितानां परभृतानां रुतं शुश्रुवुरिति योजना॥९॥ वनरामणीयकाकृष्टास्तत्र विविशुरित्याह–नित्येत्यादिना कामरूपिण इत्यन्तेन श्लोकत्रयेण । विहङ्गाः वक्ष्यमाणकोकिलादिव्यतिरिक्ताः । षण्डाः वृक्षसमूहाः । विहङ्गभृङ्गसञ्चारस्य तन्नादस्य च वनशोभाहेतुत्वात्तत्सञ्चारमुक्त्वा तन्नादमाह–विहगेत्यादिना । विहगानामभिरुतं येषु तानि विहगाभिरुतानि । एवमुत्तरत्रापि विग्रहः॥ १० ॥ कोणालकः खञ्जनः । सारसाभिरुतानीत्यनेन वनादीनां सरस्समीपवर्तित्वमुक्तम् ॥ ११ ॥ हृष्टाः पुलकिताः । सौम्यानीति यावत ॥२-७॥ सर्वर्तुकं सर्वे ऋतवो यस्मिन् तत् सर्वर्तुकम्॥८॥ नृत्यमानैः नृत्यद्भिः बर्हिणैर्युक्तं वनं शुशुभ इति सम्बन्धः ॥९॥ कोकिलाकुलषण्डानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रमुदिताः सन्तुष्टाः । वीराः शत्रुवनप्रवेशेऽपि निर्भयाः । कामरूपिणः सूक्ष्मविपुलप्रवेशानुगुणस्थूलसूक्ष्मशरीरवन्तः ॥ १२ ॥ तेषामिति । स्पष्टः ॥१३॥ अन्ये त्वित्यादिसार्धश्लोकद्वयमेकान्वयम् । स्पष्टम् ॥ १४ ॥ १५ ॥ रजश्चेत्यर्धमेकं वाक्यम् । चरणोत्थितं वानरपादाहतिजनितम् । रजः ऊर्ध्वं जगाम उत्थितमित्यर्थः ॥१६॥ अत्र ऋक्षादयो लङ्कावनवासिनः । भीताः दर्शनादेव भीताः । तेन शब्देन वित्रस्ताः विशेषेण त्रस्ताः । दश दिशो जग्मुः, यथायथं

तेषां प्रविशतां तत्र वानराणां महौजसाम् । पुष्पसंसर्गसुरभिर्ववौ घ्राणसुखोऽनिलः ॥ १३ ॥ अन्ये तु हरिवीराणां यूथान्निष्क्रम्य यूथपाः । सुग्रीवेणाभ्यनुज्ञाता लङ्कां जग्मुः पताकिनीम् ॥ १४ ॥ वित्रासयन्तो विहगांस्त्रासयन्तो मृगद्विपान् । कम्पयन्तश्च तां लङ्कां नादैस्ते नदतां वराः । कुर्वन्तस्ते महावेगा महीं चरणपीडिताम् ॥१५॥ रजश्च सहसैवोर्ध्वं जगाम चरणोत्थितम् ॥ १६ ॥ ऋक्षाः सिंहा वराहाश्च महिषा वारणा मृगाः । तेन शब्देन वित्रस्ता जग्मुर्भीता दिशो दश ॥ १७ ॥ शिखरं तत् त्रिकूटस्य प्रांशु चैकं दिविस्पृशम् । समन्तात् पुष्पसञ्छन्नं महारजतसन्निभम् ॥ १८ ॥ शतयोजनविस्तीर्णं विमलं चारुदर्शनम् । श्लक्ष्णं श्रीमन्महच्चैव दुष्प्रापं शकुनैरपि । मनसाऽपि दुरारोहं किं पुनः कर्मणा जनैः ॥ १९ ॥

जग्मुरित्यर्थः ॥ १७ ॥ एवं त्रिकूटस्य प्रथमशिखरं सुवेलाख्यमुक्त्वा मध्यमशिखरं वर्णयति–शिखरं तदित्यादिना । सार्धश्लोकद्वयमेकान्वयम् । तत् प्रसिद्धम् । प्रांशु पार्श्ववर्तिशिखरद्वयापेक्षया उन्नतम् । एकम् अद्वितीयम्, मध्यममित्यर्थः । स्पृशतीति स्पृशम् । इगुपधलक्षणः कप्रत्ययः । समन्तात् पुष्पसञ्छन्नम् अत एव महारजतसन्निभं पृथुरजतसन्निभम् । यद्वा सुवर्णसन्निभमिति स्वरूपोक्तिः । चारुदर्शनं सुन्दरदर्शनम् । एवंभूतं शिखरम् अदृश्यतेत्यध्याहारः ॥ १८ ॥ १९ ॥

कोकिलाकुलाः षण्डा वृक्षषण्डा येषु तानि॥१०–१७॥ दिवं स्पृशतीति दिविस्पृशम् । समन्तात्पुष्पसञ्छन्नम् अत एव महारजतसन्निभं, महारजतं काञ्चनम्॥१८–२ ॥

For Private And Personal Use Only

निविष्टेत्यादिश्लोकपञ्चकमेकान्वयम् । सालेन प्राकारेण । प्रासादैरिति । प्रासादादिलक्षणं प्रागेव लिखितम् । आतपापाये वर्षारम्भसमये । मध्यमं वैष्णवं पदमिति । त्रिविक्रमावतारे त्रिभिः पदैः सर्वलोकक्रमणे मध्यमपदेनान्तरिक्षं क्रान्तमिति आकाशं मध्यमं वैष्णवं पदमित्युच्यते ॥ २०–२२ ॥

निविष्टा तत्र शिखरे लङ्का रावणपालिता । शतयोजनविस्तीर्णा त्रिंशद्योजनमायता ॥ २० ॥ सा पुरी गोपुरैरुच्चैः पाण्डराम्बुदसन्निभैः । काञ्चनेन च सालेन राजतेन च शोभिता ॥ २१ ॥ प्रासादैश्च विमानैश्च लङ्का परम भूषिता । घनैरिवातपापाये मध्यमं वैष्णवं पदम् ॥२२॥ यस्यां स्तम्भसहस्रेण प्रासादः समलंकृतः । कैलासशिखराकारो दृश्यते खमिवोल्लिखन् ॥ २३ ॥ चैत्यः स राक्षसेन्द्रस्य बभूव पुरभूषणम् । बलेन रक्षसां नित्यं यः समग्रेण रक्ष्यते ॥२४॥ मनोज्ञां काननवतीं पर्वतैरुपशोभिताम् । नानाधातुविचित्रैश्च उद्यानैरुपशोभिताम् ॥२५॥ नानाविहगसंघुष्टां नानामृगनिषेविताम् । नानाकाननसन्तानां नानाराक्षससेविताम् ॥ २६ ॥ तां समृद्धां समृद्धार्थां लक्ष्मीवान् लक्ष्मणाग्रजः । रावणस्य पुरीं रामो ददर्श सह वानरैः ॥२७॥ तां महागृहसम्बाधां दृष्ट्वा लक्ष्मणपूर्वजः । नगरीममरप्रख्यो विस्मयं प्राप वीर्यवान् ॥ २८ ॥

यस्यामिति । उल्लिखन् व्याप्नुवन् ॥ २३ ॥ चैत्य इति । नगरमध्यचतुष्पथं चैत्यम्, तत्र भवश्चैत्यः । राक्षसेन्द्रस्य पुरभूषणमित्यन्वयः । यः समग्रेण रक्षसां शतेन नित्यं रक्ष्यते । यश्च राक्षसेन्द्रस्य पुरभूषणं बभूव । स्तम्भसहस्रेण समलंकृतः कैलासशिखराकारः खमुल्लिखन्निव स्थितः चैत्यः स प्रासादः यस्यां दृश्यते तादृशी रावणपालितत्वादिविशेषणविशिष्टा तत्र शिखरे निविष्टा लङ्का अदृश्यतेत्यध्याहारेणान्वयः ॥ २४ ॥ एवं वानराणां मध्यगतानां लङ्कादर्शनमुक्त्वा रामस्यापि तद्दर्शनमाह–मनोज्ञामित्यादि श्लोकत्रयमेकान्वयम् । पर्वतैः क्रीडाशैलैः । नानाधातुविचित्रैः इति पर्वतविशेषणम् । उद्यानैः कृत्रिमवनैः ॥ २५ ॥ नानाकाननेति । पूर्वं काननवत्त्वमुक्तम्, अत्र तन्नानात्वमिति भिदा ॥ २६ ॥ समृद्धाम् उन्नताम् । समृद्धार्थां समृद्धद्रव्याम् । लक्ष्मीवान् नगरदर्शनजप्रीतिविकसितकान्तिः ॥ २७ ॥ अमरप्रख्यः देवसदृशः ॥ २८ ॥

सा पुरीति । सालेन प्राकारेण ॥ २१ ॥ प्रासादैरिति । आतपापाये वर्षाकाले । मध्यमं वैष्णवं पदम् आकाशम् ॥ २२–२८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुनः सङ्ग्रहेणाह—तामिति । रत्नानि श्रेष्ठवस्तूनि । संविधानं रक्षणम् ॥२९॥ इति श्रीगो० श्रीरामा० रत्न० युद्धकाण्ड० एकोनचत्वारिंशः सर्गः ॥३९॥
अथ सुग्रीवरावणयोर्द्वन्द्वयुद्धकथनं चत्वारिंशे । अत्र प्रथमश्लोकः पूर्वोक्तानुवादः–तत इति । योजनद्वयमण्डलं योजनद्वयविस्तारमण्डलम् ॥१॥ स्थित्वे
त्यादि । सुन्यस्तां सुष्ठु निवेशिताम् ॥ २ ॥ तस्यामित्यादि सार्द्धश्लोकत्रयमेकान्वयम् । अत्र ददर्शेत्यनुषज्यते । श्वेते चामरे पर्यन्ते पार्श्वद्वये यस्य सः

तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलंकृतां च । पुरीं महायन्त्रकवाटमुख्यां ददर्श रामो महता बलेन ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

ततो रामः सुवेलाग्रं योजनद्वयमण्डलम् । आरुरोह ससुग्रीवो हरियूथपसंवृतः ॥ १ ॥ स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन् । त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा । ददर्श लङ्कां सुन्यस्तां रम्यकाननशोभिताम् ॥ २ ॥ तस्यां गोपुरशृङ्गस्थं राक्षसेन्द्रं दुरासदम् ॥ ३ ॥ श्वेतचामरपर्यन्तं विजयच्छत्रशोभितम् । रक्तचन्दनसंलिप्तं रत्नाभरणभूषितम् ॥ ४ ॥ नीलजीमूतसङ्काशं हेमसञ्छादिताम्बरम् । ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम् ॥ ५ ॥ शशलोहितरागेण संवीतं रक्तवाससा । सन्ध्यातपेन संवीतं मेघराशिमिवाम्बरे ॥ ६ ॥ पश्यतां वानरेन्द्राणां राघवस्यापि पश्यतः । दर्शनाद्राक्षसेन्द्रस्य सुग्रीवः सहसोत्थितः ॥ ७ ॥

श्वेतचामरपर्यन्तः, उभयतो वीज्यमानचामर इत्यर्थः । विजयच्छत्रं विजयसूचकच्छत्रम् । रत्नाभरणं पद्मरागाभरणम् । हेमसञ्छादिताम्बरं तत्र तत्र सुवर्णचित्राम्बरम् । सुवर्णसूत्रिताम्बरमिति वाऽर्थः । उत्कृष्टकिणवक्षसम् उपपादितकिणवक्षसम् । उत्कृष्टस्य उल्लिखितस्य किणः वक्षसि यस्य स तथेति वाऽर्थः । शशलोहितरागेण शशरुधिरसमानरागेण । रक्तशब्दविवरणमिदम् । रक्तवाससा उत्तरीयेण संवीतं परिवीतम् ॥३–६॥ " हतं च रावणं सङ्ख्ये

॥ २९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायामेकोनचत्वारिंशस्सर्गः ॥ ३९ ॥ तत इति । योजनद्वयमण्डलं योजनद्वयप्रमाणविस्तारम् ॥१–४॥ हेमसञ्छादिताम्बरं तत्रतत्र हेमचित्रिताम्बरम् । उत्कृष्टकिणवक्षसम् उत्कृष्टा उत्पादिताः किणाः प्रहारकिणाः वक्षसि यस्य तम् ॥ ५ ॥ शशलोहितं शशरुधिरम् । एतादृशविशेषणविशिष्टं राक्षसेन्द्रं, दृष्ट्वेति शेषः ॥६॥ पश्यतामिति श्लोकद्वयमेकं वाक्यम् । पश्यतामित्यादावनादरे षष्ठी ॥७॥

For Private And Personal Use Only

दर्शनादवधारय" इति रामसन्निधौ पूर्वं प्रतिज्ञातमर्थं साधयितुमुत्थितः सुग्रीव इत्याह–पश्यतामित्यादिना। पश्यतामित्यनादरे षष्ठी। अत्रानादरणमनुक्त्वा गमनम्। सप्तम्यर्थे षष्ठी वा। दर्शनात् दर्शनमात्रात् ॥ ७॥ क्रोधवेगेन, कथं मत्स्वामिनोऽग्रे स्वयं राजोपचारेण तिष्ठति दुरात्मेति कोपातिशयेनेत्यर्थः। सत्त्वेन मनोबलेन। बलेन कायबलेन। पुप्लुवे, गोपुरमुद्दिश्येति शेषः ॥ ८ ॥ गोपुरस्थले स्थित्वेत्यन्वयः। अन्तरात्मना मनसा ॥९॥ रामाभिप्रायेण

क्रोधवेगेन संयुक्तः सत्त्वेन च बलेन च। अचलाग्रादथोत्थाय पुप्लुवे गोपुरस्थले ॥ ८ ॥ स्थित्वा मुहूर्तं सम्प्रेक्ष्य निर्भयेनान्तरात्मना। तृणीकृत्य च तद्रक्षः सोऽब्रवीत् परुषं वचः ॥ ९ ॥ लोकनाथस्य रामस्य सखा दासोऽस्मि राक्षस। न मया मोक्ष्यसेऽद्य त्वं पार्थिवेन्द्रस्य तेजसा ॥ १० ॥ इत्युक्त्वा सहसोत्पत्य पुप्लुवे तस्य चोपरि। आकृष्य मुकुटं चित्रं पातयित्वाऽपतद्भुवि ॥ ११ ॥ समीक्ष्य तूर्णमायान्तमाबभाषे निशाचरः। सुग्रीवस्त्वं परोक्षं मे हीनग्रीवो भविष्यसि ॥ १२ ॥ इत्युक्त्वोत्थाय तं क्षिप्रं बाहुभ्यामाक्षिपत्तले। कन्तुवत्तं समुत्थाय बाहुभ्यामाक्षिपद्धरिः ॥ १३ ॥ परस्परं स्वेदविदिग्धगात्रौ परस्परं शोणितदिग्धदेहौ। परस्परं श्लिष्टनिरुद्धचेष्टौ परस्परं शाल्मलिकिंशुकौ यथा ॥ १४ ॥

सखा, वस्तुतो दासोऽस्मीति भावः। मया मत्तः। औद्धत्यं परिहरति पार्थिवेन्द्रस्य तेजसेति ॥ १० ॥ ११ ॥ आयान्तं, सुग्रीवमिति शेषः। परोक्षं ममासन्निधाने त्वं सुग्रीवः शोभनग्रीवः, प्रत्यक्षं तु हीनग्रीवो भविष्यसीत्यर्थः ॥१२॥ तले गोपुरतले। आक्षिपत् अपातयत्। कन्तुवत्समुत्थाय कन्तुकवज्झटित्युत्पत्येत्यर्थः ॥ १३ ॥ परस्परमित्यादि श्लोकद्वयमेकान्वयम्। आरम्भे दृढपरीरम्भेण स्वेदसिक्तगात्रौ। ततः खरतरनखक्षतेन शोणितलिप्त

पुप्लुवे, गोपुरमुद्दिश्येति शेषः। गोपुरस्थल इत्यस्य स्थित्वेत्युत्तरेण सम्बन्धः ॥ ८ ॥ ९ ॥ लोकनाथस्येति। रामाभिप्रायेण सखित्वम्, सुग्रीवाभिप्रायेण दासत्वमिति भावः ॥१०॥११॥ त्वं मे परोक्षे असन्निधाने सुग्रीवः शोभनग्रीवः। इदानीं सन्निधाने तु हीनग्रीवो भविष्यसीत्यर्थः ॥ १२ ॥ कन्तुवत् समुत्थायेति सम्बन्धः ॥ १३ ॥ परस्परं शाल्मलिकिंशुकौ यथा शाल्मलिकिंशुकाविव ॥ १४ ॥

शरीरौ । ततो दृढाश्लिष्टतया निरुद्धचेष्टौ निष्पन्दौ । ततः परस्परत्यागे कुसुमितशाल्मलीकिंशुकाविव स्थितौ । तौ वानरराक्षसेन्द्रौ । मुष्टिप्रहारैः । मुष्टीनां व्यथायां तलप्रहारैः । तत्पीडायाम् अरत्निघातैः निष्कनिष्ठमुष्टियुक्तप्रकोष्ठप्रहारैः । "अरत्निस्तु निष्कनिष्ठेन मुष्टिना" इत्यमरः । तद्बाधायां कराग्रघातैः । असह्यरूपम् अत्यन्तासह्यम् । प्रशंसायां रूपप्प्रत्ययः । युद्धं चक्रतुः ॥ १४ ॥ १५ ॥ कृत्वेत्यादिसार्धश्लोक एकान्वयः । नियुद्धं मल्लयुद्धं

मुष्टिप्रहारैश्च तलप्रहारैररत्निघातैश्च कराग्रघातैः । तौ चक्रतुर्युद्धमसह्यरूपं महाबलौ वानरराक्षसेन्द्रौ ॥ १५ ॥
कृत्वा नियुद्धं भृशमुग्रवेगौ कालं चिरं गोपुरवेदिमध्ये । उत्क्षिप्य चाक्षिप्य विनम्य देहौ पादक्रमाद्गोपुरवेदिलग्नौ ।
अन्योन्यमाविध्य विलग्नदेहौ तौ पेततुः सालनिखातमध्ये ॥ १६ ॥ उत्पेततुर्भूतलमस्पृशन्तौ स्थित्वा मुहूर्तं त्वभि
निश्वसन्तौ । आलिङ्ग्य चावल्ग्य च बाहुयोक्त्रैः संयोजयामासतुराहवे तौ ॥ १७ ॥ संरम्भशिक्षाबलसम्प्रयुक्तौ
सञ्चेरतुः सम्प्रतियुद्धमार्गैः । शार्दूलसिंहाविव जातदर्पौ गजेन्द्रपोताविव सम्प्रयुक्तौ ॥ १८ ॥

बाहुयुद्धं वा । "नियुद्धं बाहुयुद्धं स्यात्" इत्यमरः । गोपुरवेदिमध्ये चिरं कालं नियुद्धं कृत्वा । तत उत्क्षिप्य परस्परमूर्ध्वं क्षिप्त्वा । आक्षिप्य आकृष्य । परस्परं देहौ विनम्य विनाम्य । पादक्रमात् पादविन्यासविशेषात् । गोपुरवेदिलग्नौ पदात्पदं पश्चाच्चलित्वा पुनर्युद्धार्थमवसरप्रतीक्षतया गोपुरवेदिकायां निश्चलं स्थिताविवत्यर्थः । आविध्य बाहुभ्यां संवेष्ट्य विलग्नदेहौ श्लिष्टदेहौ सन्तौ । सालनिखातयोः प्राकारपरिखयोर्मध्ये पेततुः ॥ १६ ॥ लाघवातिशयेन भूतलमस्पृष्ट्वैव उत्पेततुः । ततो मुहूर्तं तूष्णीं स्थित्वा श्रमवशादभिनिश्वसन्तौ पुनरालिङ्ग्य स्वयमेव स्वशरीरमालिङ्ग्य आवल्ग्य आप्लुत्य बाहुयोक्त्रैः बाहुपाशैः संयोजयामासतुः, देहाविति शेषः । निबिडं बबन्धतुरित्यर्थः ॥ १७ ॥ संरम्भः अभिनिवेशः । शिक्षा अभ्यासः । बलं शक्तिः । एतैः संप्रयुक्तौ संयुक्तौ सन्तौ सम्प्रतियुद्धमार्गैः चातुर्येण परस्परग्रहणानुकूलक्रमैरित्यर्थः । सम्प्रति तदानीमित्यर्थ इत्येके । शार्दूलसिंहौ शार्दूलश्रेष्ठौ ।

अरत्निघातैः निष्कनिष्ठमुष्टियुक्तप्रकोष्ठप्रहारैः । असह्यरूपम् अत्यन्तासह्यम् । प्रशंसायां रूपप् ॥१५॥ नियुद्धं बाहुयुद्धम् । विनम्य विनाम्य । पदक्रमात् पादविन्यासविशेषात् ॥ १६ ॥ उत्पेततुरिति । निपतनानन्तरं लाघवातिशयेन भूतलमस्पृशन्तावेवोत्प्लुत्य तदनन्तरं श्रमात् श्रमवशादभिनिश्वसन्तौ मुहूर्तं तूष्णीं स्थित्वा पुनरावल्ग्य आलिङ्ग्य च बाहुयोक्त्रैः बहुपाशैः परस्परं संयोजयामासतुः निबिडं बबन्धतुरित्यर्थः ॥ १७ ॥ संरम्भोऽभिनिवेशः । शिक्षा अभ्यासः । बलं शक्तिः। ॥१२५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संप्रयुक्तौ सन्तौ । गजेन्द्रपोतौ कलभौ ॥१८॥ संहत्य संयोज्य । उरोभ्यामन्योन्यमापीड्य धरण्यां युगपन्निपेततुः । अथ उद्यम्य उद्धृत्य अधिक्षिपन्तौ पातयन्तौ । एवं बहुयुद्धमार्गैः बहुयुद्धप्रकारैः संचक्रमाते सञ्चेरतुः॥ १९॥ खुरल्यां श्रमजयाय कृतोऽभ्यासो व्यायामः, तद्रूपा या शिक्षा तद्बलेन तदति शयेन संप्रयुक्तौ संयुक्तौ । वार्यन्ते एभिरिति वारणाः आलानस्तम्भाः । वारणवारणाभैः बाहूत्तमैः अन्योन्यमाशु निवारयन्तावपि क्लमं श्रमं न जग्मतुः ॥ २० ॥ चिरेणेत्यर्द्धम् । चिरेण कालेन बहुकालेन । संप्रयुक्तौ युद्ध्यमानौ तौ । मण्डलमार्गं चक्राकारमार्गम् । चेरतुः चक्रतुरित्यर्थः । अयं च वक्ष्यमाण

संहत्य चापीड्य च तावुरोभ्यां निपेततुर्वै युगपद्धरण्याम् । उद्यम्य चान्योन्यमधिक्षिपन्तौ सञ्चक्रमाते बहुयुद्ध मार्गैः ॥ १९ ॥ व्यायामशिक्षाबलसम्प्रयुक्तौ क्लमं न तौ जग्मतुराशु वीरौ । बाहूत्तमैर्वारणवारणाभैर्निवारयन्तौ वरवारणाभौ ॥ २० ॥ चिरेण कालेन तु सम्प्रयुक्तौ सञ्चेरतुर्मण्डलमार्गमाशु ॥ २१ ॥ तौ परस्परमासाद्य यत्ता वन्योन्यसूदने । मार्जाराविव भक्षार्थे वितस्थाते मुहुर्मुहुः ॥२२॥ मण्डलानि विचित्राणि स्थानानि विविधानि च । गोमूत्रिकाणि चित्राणि गतप्रत्यागतानि च ॥ २३ ॥

मार्गान्तराणामप्युपलक्षणम् ॥२१॥ तदेव प्रपञ्चयति–तावित्यादिना । परस्परमासाद्य अन्योन्यसूदने अन्योन्यहिंसने यत्तौ यत्नवन्तौ । भक्ष्यत इति भक्षः भक्ष्यद्रव्यम् । तदर्थे तन्निमित्तम् । मार्जाराविव वितस्थाते विशेषेण तस्थतुः । "समवप्रविभ्यः स्थः" इत्यात्मनेपदम् । भक्षग्रहणदत्तावधानौ मार्जाराविव निश्चलं तस्थतुरित्यर्थः । मुहुर्मुहुरित्यनेन मध्ये मध्ये मण्डलादिसञ्चारो व्यज्यते ॥२२ ॥ मण्डलानीत्यादिचतुःश्लोक्येकान्वया । मण्डलानि परिभ्रमणविशेषान् । यथाह भरतः–" एकपादप्रचारो यः स चारीत्यभिधीयते । द्विपादक्रमणं यत्तु करणं नाम तद्भवेत् । करणानां समायोगात् खण्डमित्यभिधीयते । खण्डैस्त्रिभिश्चतुर्भिर्वा संयुक्तं मण्डलं भवेत् ॥" इति । विचित्राणि सव्यमपसव्यं सव्यापसव्यमर्द्धभ्रमणमित्यादिभेदाद्भिन्नानि ।

एतैः संयुक्तौ ॥ १८ ॥ व्यायामशिक्षाबलसंप्रयुक्तौ युद्धसञ्चाराभ्यासबलयुक्तौ । वारणवारणाभैः वारणा गजाः तेषां वारणानि अर्गलानि तत्सदृशैः । मण्डलमार्गं पादभ्रमणविशेषमार्गं सञ्चेरतुः । मण्डलस्य लक्षणं भरतेनोक्तम्–" एकपादप्रचारो यस्स चारीत्यभिधीयते । द्विपादक्रमणं यत्तु करणं नाम तद्भवेत् । करणानां समायोगात्खण्डमित्यभिधीयते । खण्डैस्त्रिभिश्चतुर्भिर्वा संयुक्तं मण्डलं भवेत् । गदायुद्धे नियुद्धे च चक्रशक्त्यादिमोचनें ॥" इति ॥१९–२२॥ स्थानानि विविधानि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्थानानि व्याघ्रसिंहादितुल्यावस्थानानि वैष्णवादिस्थानानि । पादयोः पूर्वापरतिर्यग्विक्षेपादिका विन्यासविशेषा इति यावत् । तदाह भरतः–"वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमथालीढं स्थानान्येतानि षण्नृणाम् ॥" इति । पञ्चेति धनुर्वेदे । एषां लक्षणादिकथने ग्रन्थगौरवं स्यादिति तन्नाद्रियते । गोमूत्रिकाणि गोमूत्रसरणिसदृशानि गमनानि । गोमूत्रशब्दात्तदाकारगमनवाचकान्मत्वर्थे ठन्प्रत्ययः । गोमूत्रिकाणां चित्रत्वं गमनागमनादिभेदात् । गतप्रत्यागतानि उपसर्पणापसर्पणानि । एते उभयगतिप्रचारभेदाः ॥ २३ ॥ तिरश्चीनगतानि तिर्यग्गमनानि । वक्रगतानि सव्यापसव्यसञ्चरणानि । परिमोक्षं स्थानचालनेन प्रहाराणां मोघकरणम् । वर्जनं प्रतिप्रयोगेन परिहरणम् । परिधावनम् एकस्य तिष्ठतः समन्तादन्यस्य गमनागमनम् ॥ २४ ॥ अभिद्रवणम् आभिमुख्येन शीघ्रं गमनम् । आप्लावम् अल्पाङ्गत्वानल्पाङ्गत्वादिभिर्विनम्य गमनम्, ईषद्गमनं वा मण्डूकवद् गमनमित्यर्थः । आस्थानं च सविग्रहं विग्रहसहितमास्थानम् । विगृह्य केवलासनं प्रगृह्य निर्भयावस्थानमिति वाऽर्थः । परावृत्तं पराङ्मुखगमनम् । अपावृत्तं स्थित्वैव पश्चाच्चलनम् । अवद्रुतं जिघृक्षया शरीरं सङ्कुच्यावनम्य गमनम् । अवप्लुतं प्रतियोधिनं पादेन प्रहर्तुमधोमुखेन प्लवनम् ॥ २५ ॥ उपन्यस्तं प्रतियोधिबाहुग्रहणार्थं स्वबाहुप्रसारणम् । अपन्यस्तं प्रतियोधिग्रहणवञ्चनार्थं स्वबाहोरपक्षेपणम् । एवं खड्गविद्या मल्लशास्त्रादिषूपदिश्यते ।

तिरश्चीनगतान्येव तथा वक्रगतानि च । परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ २४ ॥
अभिद्रवणमाप्लावमास्थानं च सविग्रहम् । परावृत्तमपावृत्तमवद्रुतमवप्लुतम् ॥ २५ ॥
उपन्यस्तमपन्यस्तं युद्धमार्गविशारदौ । तौ सञ्चेरतुरन्योन्यं वानरेन्द्रश्च रावणः ॥ २६ ॥

पादयोः पूर्वापरविक्षेपादिविन्यासविशेषाः । तदुक्तं भरतेन–" वैष्णवं समपादं च वैशाखं मण्डलं तथा । प्रत्यालीढमनाविद्धं स्थानान्येतानि षण्नृणाम् ॥" इति । गोमूत्रिकाणि गोमूत्ररेखाकारकुटिलगमनविशेषान् । गतप्रत्यागतानि उपसर्पणापसर्पणानि ॥ २३ ॥ तिरश्चीनगतानि तिर्यग्गमनानि । वक्रगतानि सव्यापसव्यसंचरणानि । परिमोक्षं प्रहाराणां परप्रयुक्तप्रहाराणां स्थानचलनादिना वितथीकरणम् । वर्जनं स्वप्रहारवैकल्यापादकस्थाने स्वकर्तृकप्रहारवर्जनम् । परिधावनम् एकस्य तिष्ठतः समन्तादन्यस्य भ्रमणम् ॥२४॥ अभिद्रवणम् आभिमुख्येन शीघ्रगमनम् । आप्लावमीषद्गमनम्, अवस्थानं कृत्वा गमनमिति यावत् । आस्थानं च सविग्रहं विगृह्याभिमुख्येनावस्थानम् । परावृत्तं पराङ्मुखगमनम् । अपावृत्तं स्थित्वैव पार्श्वतोऽपसर्पणम् । अवद्रुतं जिघृक्षया झटिति नम्रीभूय गमनम् । अवप्लुतं प्रतियोधिनं पादे प्रहर्तुमधोमुखेन प्लवनम् ॥२५॥ उपन्यस्तं प्रतियोधिबाहुग्रहणार्थं स्वबाहुप्रसारणम् । अपन्यस्तं प्रतियोधिग्रहणवञ्चनार्थं स्वबाहोरपक्षेपणम् ॥२६॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्तन्निदर्शने नितान्तं ग्रन्थगौरवं स्यात् । अतस्तदुपेक्ष्यते ॥ २६ ॥ एतस्मिन्नित्यादिश्लोकद्वयमेकान्वयम् । अन्तरे अवकाशे । मायाबलं परितोऽनेकरावणप्रदर्शनम् । आरब्धुमुपसंपेदे कर्तुमुपचक्रमे । तं मायोपक्रमम् । जितेन जयेन काशते प्रकाशत इति जितकाशी । रावणस्य मायाबलोपक्रम एव निर्मायं युद्ध्यमानस्य सुग्रीवस्य जय इति ज्ञेयम् । जितक्लमः जितश्रमः । बलिना चिरं मल्लयुद्धकरणादिति भावः । अत्र प्रासादे स्थित एव रावणो वञ्चितः

एतस्मिन्नन्तरे रक्षो मायाबलमथात्मनः । आरब्धुमुपसम्पेदे ज्ञात्वा तं वानराधिपः ॥ २७ ॥ उत्पपात तदाऽऽकाशं जितकाशी जितक्लमः । रावणः स्थित एवात्र हरिराजेन वञ्चितः ॥ २८ ॥ अथ हरिवरनाथः प्राप्य सङ्ग्रामकीर्तिं निशिचरपतिमाजौ योजयित्वा श्रमेण । गगनमतिविशालं लङ्घयित्वाऽर्कसूनुर्हरिवरगणमध्ये रामपार्श्वं जगाम ॥२९॥ इति स सवितृसूनुस्तत्र तत्कर्म कृत्वा पवनगतिरनीकं प्राविशत् सम्प्रहृष्टः । रघुवरनृपसूनोर्वर्धयन् युद्धहर्षं तरुमृगगणमुख्यैः पूज्यमानो हरीन्द्रः ॥३०॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे चत्वारिंशः सर्गः ॥ ४० ॥

पुनरागमने प्रतारितः ॥ २७ ॥ २८ ॥ अथेति । हरिवरनाथः क्षणेन रावणहरणादिपरिकरनियन्ता । रामभक्तिरेव स्वयंगमनहेतुरिति भावः । प्राप्य सङ्ग्रामकीर्तिम्, रामस्य युद्धादागतां कीर्तिं स्वयमाजहारेति भावः । निशिचरपतिम्, तत्सदृशेष्वनेकेषु विद्यमानेष्वपि तान् तृणीकृत्य तेनैव युद्धं कृतवानिति भावः । आजौ, रावणवन्न च्छद्मना युद्धकृत् किन्तु मर्यादयेति भावः । योजयित्वा श्रमेण इतः पूर्वं तदज्ञातेन श्रमेण योजयित्वा । योजनं हि पूर्वमसम्भावितस्यैव रावणस्य श्रमफलम् । आत्मनस्तु कीर्तिरिति भावः । गगनमतिविशालं लङ्घयित्वाऽर्कसूनुः स्वस्यादित्यपुत्रत्वज्ञापनायाकाशमयनेनालङ्घयत् । अर्कसूनुः अज्ञातगमनवेगः । हरिवरगणमध्ये विनयेन स्वातिशयमप्रकाशयन् वानरेष्वन्यतम इति स्थितः । रामपार्श्वं जगाम रावणशिरोऽनादायागतोऽहं कथमस्याग्रे तिष्ठेयमिति पार्श्वे स्थितः । निशिचरपतिं श्रमेण योजयित्वा जगामेत्यनेन रामस्य प्रतिज्ञाहानिर्मा प्रसाङ्क्षीदिति रावणमहत्त्वैवागत इति सूचितम् । मायाप्रयोगारम्भे समागमनं स्वेनापि मायाप्रयोगे रामस्य कोपः स्यादित्याशयात् ॥ २९ ॥ इतीति । रघुवरनृपसूनोः रामस्य । तरुमृगगणमुख्यैः वानरगणमुख्यैः ॥ ३० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामाय० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चत्वारिंशः सर्गः ॥ ४० ॥

आरब्धुमुपसम्पेदे कर्तुमुद्युक्तवान् ॥२७–३०॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चत्वारिंशः सर्गः ॥ ४० ॥

For Private And Personal Use Only

अथ लङ्कावरोध एकचत्वारिंशे–अथेति । तस्मिन्सुग्रीवे । निमित्तानि युद्धचिह्नानि । "निमित्तं हेतुलक्ष्मणोः" इत्यमरः ॥ १ ॥ असंमन्त्र्येति । जनेश्वराः राजानः । न कुर्वन्ति अस्मादृशपरिजने विद्यमाने न कुर्वन्तीत्यादरोक्तिः ॥ २ ॥ संशये संशयपदे । त्वत्साहसेऽस्मदादीनां जीवनं दुर्लभमिति भावः ॥ ३ ॥ इदानीमित्यादि श्लोकद्वयम् । इदानीम् अद्यप्रभृति । अचिन्तितम् अविचारितम् । एवंविधं साहसं मा कृथाः । कुत इत्यत्राह त्वयीति । त्वयि

अथ तस्मिन्निमित्तानि दृष्ट्वा लक्ष्मणपूर्वजः । सुग्रीवं सम्परिष्वज्य तदा वचनमब्रवीत् ॥ १ ॥ असंमन्त्र्य मया सार्द्धं तदिदं साहसं कृतम् । एवं साहसकर्माणि न कुर्वन्ति जनेश्वराः ॥ २ ॥ संशये स्थाप्य मां चेदं बलं च सविभीषणम् । कष्टं कृतमिदं वीर साहसं साहसप्रिय ॥ ३ ॥ इदानीं मा कृथा वीर एवंविधमचिन्तितम् । त्वयि किंचित् समापन्ने किं कार्यं सीतया मम ॥४॥ भरतेन महाबाहो लक्ष्मणेन यवीयसा । शत्रुघ्नेन च शत्रुघ्न स्वशरीरेण वा पुनः ॥ ५ ॥ त्वयि चानागते पूर्वमिति मे निश्चिता मतिः । जानतश्चापि ते वीर्यं महेन्द्रवरुणोपम ॥६॥ हत्वाऽहं रावणं युद्धे सपुत्रबलवाहनम् । अभिषिच्य च लङ्कायां विभीषणमथापि च । भरते राज्यमावेश्य त्यक्ष्ये देहं महाबल ॥७॥

किञ्चित्समापन्ने, वानरेति संबोधनं प्राप्ते मम सीतया किं कार्यं किं प्रयोजनम् ? अभिनववत्सवात्सल्येन पूर्ववत्समनभिलषन्ती वत्सला गौरिव नित्यानपायिनीमपि सीतामनादृत्य तदानीमाश्रिते वानरमात्रेऽत्यभिनिवेशं कुर्वतो रामस्य वात्सल्यातिशय उच्यते । सीतया "अर्धो वा एष आत्मनो यत्पत्नी" इत्यर्धशरीरभूतया न मे किञ्चित्कार्यम् ॥ ४ ॥ भरतेन यवीयसेति कनिष्ठत्वमुच्यते । "भ्राता स्वा मूर्तिरात्मनः" इत्युक्तभरतादिनाऽपि न मे किञ्चित्प्रयोजनम् । स्वशरीरेण वा, "आत्मानं सर्वथा रक्षेद्दारैरपि धनैरपि" इत्युक्तशरीरेण वा किं क्रियते ? ॥५॥ एतदेव प्रपञ्चयति–त्वयीत्यादिना । पूर्वं त्वय्यनागते सति । इति वक्ष्यमाणप्रकारेण मे मतिः निश्चिता आसीत् । जानतश्चापीति विशेषणेन अस्थाने भयशङ्कित्वोक्त्या वात्सल्यातिशय उक्तः॥६॥ इतिशब्दार्थमाह–हत्वेति । प्रतिज्ञानिर्वाहार्थमिति भावः । अभिषिच्येति । अन्यथा शरणागतिवैफल्यादिति भवः । भरत इति । अन्यथा कुलधर्मोच्छेदा ॥१२७॥

अथेति । तस्मिन् सुग्रीवे । निमित्तानि युद्धलक्षणानि दृष्ट्वा । "निमित्तं हेतुलक्ष्मणोः" इत्यमरः ॥ १ ॥ २ ॥ संशये सन्देहपदे ॥ ३ ॥ इदानीमद्यप्रभृति । त्वयि किञ्चित्समापन्ने हानिं गते सतीत्यर्थः ॥४॥५॥ त्वयि अनागते रावणवधादिकं कृत्वा देहं त्यक्ष्य इति ते वीर्यं जानतश्चापि मे मतिः पूर्वं निश्चितेत्यन्वयः ॥ ६–८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दिति भावः । महाबलेत्यनन्तरमितिकरणस्यान्वयः ॥ ७ ॥ तमेवमित्यादिसार्धश्लोकः । पौरुषं त्वद्दास्यरूपं पुरुषधर्ममित्यर्थः । अत एव हि पूर्वं रावणान्तिके दासोस्मीत्युक्तवान् । जानान्नित्यनेन दासस्य कर्मैवेदं न तु साहसमित्युच्यते ॥ ८॥ ९॥ अथ रामस्योत्साहविशेषं दर्शयति–इत्येवमिति । लक्ष्मिसम्पन्नमित्यत्र " इको ह्रस्वोऽङ्यो गालवस्य " इति ह्रस्वः । लक्ष्मीरत्र निमित्तदर्शनजः सन्तोषः ॥ १० ॥ परिगृह्योति । संविभज्य तत्तद्यूथपा

तमेवंवादिनं रामं सुग्रीवः प्रत्यभाषत ॥ ८ ॥ तव भार्यापहर्तारं दृष्ट्वा राघव रावणम् । मर्षयामि कथं वीर जानन् पौरुषमात्मनः ॥९॥ इत्येवंवादिनं वीरमभिनन्द्य स राघवः । लक्ष्मणं लक्ष्मिसम्पन्नमिदं वचनमब्रवीत् ॥ १० ॥ परिगृह्योदकं शीतं वनानि फलवन्ति च । बलौघं संविभज्येमं व्यूह्य तिष्ठेम लक्ष्मण ॥ ११॥ लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् । निबर्हणं प्रवीराणामृक्षवानररक्षसाम् ॥ १२ ॥ वाताश्च परुषा वान्ति कम्पते च वसुन्धरा । पर्वताग्राणि वेपन्ते पतन्ति धरणीरुहाः ॥ १३ ॥ मेघाः क्रव्यादसङ्काशाः परुषाः परुषस्वनाः । क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥ १४ ॥ रक्तचन्दनसङ्काशा सन्ध्या परमदारुणा । ज्वलच्च निपतत्येतदादित्यादग्निमण्डलम् ॥ १५ ॥ आदित्यमभिवाश्यन्ति जनयन्तो महद्भयम् । दीना दीनस्वरा घोरा अप्रशस्ता मृगद्विजाः ॥ १६ ॥ रजन्यामप्रकाशश्च सन्तापयति चन्द्रमाः । कृष्णरक्तान्तपर्यन्तो यथा लोकस्य संक्षये ॥ १७ ॥

धीनं कृत्वा । व्यूह्य गरुडादिरूपेण स्थापयित्वा ॥ ११ ॥ लोकक्षयकरं लोकक्षयसूचकम् । भीमं भयंकरम् । भयं भयनिमित्तम् । न केवलं लोकस्य, प्रवीराणां चेत्याह–निबर्हणमिति । विनाशसूचकमित्यर्थः ॥ १२ ॥ तदेव भयनिमित्तं प्रपञ्चयति–वाता इति । पतन्ति, अनिमित्तामिति शेषः ॥ १३ ॥ क्रव्यादसङ्काशाः श्येनादिसदृशसंस्थानाः । परुषाः क्रूरवेषाः । क्रूराः लोकक्षयसूचकाः । मिश्रं, जलमिति शेषः ॥ १४ ॥ १५ ॥ आदित्यमभि आदित्याभिमुखम् । दीनाः दीनवेषाः । दीनस्वराः दैन्यसूचकस्वरवन्तः । अत एव घोराः भयङ्कराः । अप्रशस्ताः हीनाः शिवादयः ॥ १६ ॥ कृष्णरक्तान्त

जानन्विक्रममात्मनः स्वस्य परपराक्रमसंहारसामर्थ्यं जानन् स्वानुभवेनावगच्छन् कथं मर्षयामि ? ॥९॥ अभिनन्द्य सौहृदस्यातिबलसम्पत्तेरिदमेव युक्तमिति श्लाघां कृत्वेत्यर्थः ॥ १० ॥ शीतमुदकम्, तद्वतो जलाशयान् ॥ ११–१८ ॥

For Private And Personal Use Only

पर्यन्तः कृष्णान्तो रक्तपर्यन्तश्चेत्यर्थः ॥ १७ ॥ ह्रस्वः व्याममात्रः । रूक्षः भयङ्करः । अप्रशस्तः अशुभकरः । सुलोहितः रक्तमध्यः । परिवेषः लोकस्य संक्षये यथा, तथा दृश्यत इति शेषः ॥ १८ ॥ आदित्येत्यादिसार्धश्लोकः । लक्ष्म चन्द्रकलङ्क इवेत्यर्थः । तथैव छान्दोग्ये-" यदादित्यस्य कृष्णं रूपम् " इत्यत्र उत्पातकाले तथा दृश्यत इति व्याख्यातम् । नक्षत्राणि यथावत् यथाप्रकारेण न दृश्यन्ते, मलिनानि दृश्यन्त इत्यर्थः । उक्तं निमित्तजातं लोकस्य युगान्तं शंसतीवाभिवर्तत इति योजना ॥ १९ ॥ नीचैः ह्रस्वं वेदिकास्थानं परिपतन्ति प्राप्नुवन्ति । शिवा इति अप्रशस्तमृग

ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः ॥ १८ ॥ आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृश्यते । दृश्यन्ते न यथावच्च नक्षत्राण्यभिवर्तते । युगान्तमिव लोकस्य पश्य लक्ष्मण शंसति ॥ १९ ॥ काकाः श्येनास्तथा गृध्रा नीचैः परिपतन्ति च । शिवाश्चाप्यशिवा वाचः प्रवदन्ति महास्वनाः ॥ २० ॥ क्षिप्रमद्य दुराधर्षां लङ्कां रावणपालिताम् । अभियाम जवेनैव सर्वतो हरिभिर्वृताः ॥ २१ ॥ इत्येवं संवदन् वीरो लक्ष्मणं लक्ष्मणाग्रजः । तस्मादवातरच्छीघ्रं पर्वताग्रान्महाबलः ॥ २२ ॥ अवतीर्य च धर्मात्मा तस्माच्छैलात् स राघवः । परैः परमदुर्धर्षं ददर्श बलमात्मनः ॥ २३ ॥ सन्नह्य तु ससुग्रीवः कपिराजबलं महत् । कालज्ञो राघवः काले संयुगायाभ्यचोदयत् ॥ २४ ॥ ततः काले महाबाहुर्बलेन महता वृतः । प्रस्थितः पुरतो धन्वी लङ्कामभिमुखः पुरीम् ॥ २५ ॥ तं विभीषणसुग्रीवौ हनुमान् जाम्बवान्नलः । ऋक्षराजस्तथा नीलो लक्ष्मणश्चान्वयुस्तदा ॥ २६ ॥

जात्युक्तावपि पुनरुक्तिरशुभाधिक्यात् ॥ २० ॥ क्षिप्रमिति । अभियामेति वर्तमानकाले लोट् ॥ २१ ॥ २२ ॥ तस्मात्सुवेलात् । बलमित्यनेन सर्वं बलं न सुवेलमारुरुहदिति गम्यते ॥ २३ ॥ राघवः ससुग्रीवः सन् । कपिराजबलं कपिश्रेष्ठानां बलम् । सन्नह्य प्रोत्साह्य । काले युद्धकाले । संयुगाय युद्धाय अभ्यचोदयत् ॥ २४ ॥ काले प्रातःकाले ॥ २५ ॥ २६ ॥

नक्षत्राणि यथावत् स्वरूपेण न दृश्यन्ते । उक्तं दुर्निमित्तजातं लोकस्य युगान्तं शंसतीव अभिवर्तत इति सम्बन्धः ॥ १९ ॥ नीचैः क्षुद्रजन्तुभिस्सह ॥ २०--२३ ॥ सन्नह्येति । सन्नह्य युद्धसन्नाहं कृत्वा । काले युद्धयोग्यसमये ॥ २४--२६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

पृतना सेना ॥ २७ ॥ कुञ्जरप्रख्याः गजतुल्याः । परवारणाः शत्रुवारकाः ॥ २८ ॥ २९ ॥ पताकेत्यादिश्लोकद्वयम् । पताकमालिनीमित्यत्र " ङ्यापोः संज्ञाछन्दसोर्बहुलम् " इति ह्रस्वः । उद्यानं कृत्रिमवनम् । चित्रवप्रां चित्रचयाम् । यथानिवेशं यथास्थानम्, रामवचोऽन्यूनं स्वं स्वं

ततः पश्चात् सुमहती पृतनर्क्षवनौकसाम् । प्रच्छाद्य महतीं भूमिमनुयाति स्म राघवम् ॥ २७ ॥ शैलशृङ्गाणि शतशः प्रवृद्धांश्च महीरुहान् । जगृहुः कुञ्जरप्रख्या वानराः परवारणाः ॥ २८ ॥ तौ तु दीर्घेण कालेन भ्रातरौ रामलक्ष्मणौ । रावणस्य पुरीं लङ्कामासेदतुररिन्दमौ ॥२९॥ पताकमालिनीं रम्यामुद्यानवनशोभिताम् । चित्रवप्रां सुदुष्प्रापामुच्चैःप्राकारतोरणाम् ॥ ३० ॥ तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः । यथानिवेशं सम्पीड्य न्यविशन्त वनौकसः ॥ ३१ ॥ लङ्कायास्तूत्तरद्वारं शैलशृङ्गमिवोन्नतम् । रामः सहानुजो धन्वी जुगोप च रुरोध च ॥ ३२ ॥ लङ्कामुपनिविष्टश्च रामो दशरथात्मजः । लक्ष्मणानुचरो वीरः पुरीं रावणपालिताम् । उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः ॥ ३३ ॥ नान्यो रामाद्धि तद्द्वारं समर्थः परिरक्षितुम् । रावणाधिष्ठितं भीमं वरुणेनेव सागरम् ॥३४॥ सायुधैं राक्षसैर्भीमैरभिगुप्तं समन्ततः । लघूनां त्रासजननं पातालमिव दानवैः ॥ ३५ ॥

स्थानमनतिक्रम्येत्यर्थः । संपीड्य उपरुध्य ॥ ३० ॥ ३१ ॥ जुगोप परपरिभवादात्मीयं बलं ररक्षेत्यर्थः । रुरोधेत्यनेन ' शिखरं तत्त्रिकूटस्य प्रांशु चैकं दिविस्पृशम् ' इत्युक्तत्रिकूटशिखरारोहणमर्थसिद्धम् ॥ २२ ॥ लङ्कामित्यादिसार्द्धश्लोक एकान्वयः । लक्ष्मणानुचरो वीर इति पाठः । रावणो यत्र तिष्ठति तदुत्तरद्वारमासाद्य लङ्कामुपनिविष्ट इत्यन्वयः ॥ ३३ ॥ रामानु०—लक्ष्मणानुचरो राम इति पाठे रमयतीति व्युत्पत्त्या रामविशेषणम् ॥ ३३ ॥ रामेणैव निरोद्धव्यत्वे हेतुमाह—नान्य इत्यादिश्लोकद्वयेन । लघूनाम् अल्पसाराणाम् ॥ ३४ ॥ ३५ ॥

ऋक्षवनौकसां पृतना ॥ २७–३० ॥ यथानिवेशं रामनिदेशमनतिक्रम्य । सम्पीड्य लङ्कां रुद्ध्वा ॥ ३१ ॥ उत्तरद्वारं रुरोध । जुगोप, आत्मीयबलमिति शेषः ॥ ३२–३४ ॥ तद्द्वारं तद्द्वाररोधिकां सेनाम् । लघूनाम् अधीराणाम् ॥ ३५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विन्यस्तानि, द्वारोपान्तवेदिकादिष्विति शेषः ॥ ३६ ॥ मैन्देन द्विविदेन चेत्यादिना प्रतिद्वारमधिकयूथपतिगमनस्यात्रोक्तत्वात् पूर्वं रामेण ते नियुक्ताः इति ज्ञेयम् ॥ ३७–३९ ॥ मध्यम इति । दुर्जयरावणेन्द्रजिदाधिष्ठितयोरुत्तरपश्चिमद्वारयोर्मध्ये तदुभयद्वारनिरोधकानां काकाक्षिन्यायेन साहाय्यं कर्तुं सुग्रीवः स्वयमतिष्ठदिति ज्ञेयम् । " पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् । अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः ॥ " इति वक्ष्यमाणत्वात् ।

विन्यस्तानि च योधानां बहूनि विविधानि च । ददर्शायुधजालानि तत्रैव कवचानि च ॥ ३६ ॥ पूर्वं तु द्वारमासाद्य नीलो हरिचमूपतिः । अतिष्ठत् सह मैन्देन द्विविदेन च वीर्यवान् ॥३७॥ अङ्गदो दक्षिणद्वारं जग्राह सुमहाबलः । ऋषभेण गवाक्षेण गजेन गवयेन च ॥ ३८ ॥ हनुमान् पश्चिमद्वारं ररक्ष बलवान् कपिः । प्रमाथिप्रघसाभ्यां च वीरैरन्यैश्च सङ्गतः ॥ ३९ ॥ मध्यमे च स्वयं गुल्मे सुग्रीवः समतिष्ठत । सह सर्वैर्हरिश्रेष्ठैः सुपर्णश्वसनोपमैः ॥ ४० ॥ वानराणां तु षट्त्रिंशत् कोट्यः प्रख्यातयूथपाः । निपीड्योपनिविष्टाश्च सुग्रीवो यत्र वानरः ॥ ४१ ॥ शासनेन तु रामस्य लक्ष्मणः सविभीषणः । द्वारे द्वारे हरीणां तु कोटिं कोटिं न्यवेशयत् ॥ ४२ ॥ पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् । अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः ॥ ४३ ॥ ते तु वानरशार्दूलाः शार्दूला इव दंष्ट्रिणः । गृहीत्वा द्रुमशैलाग्रान् हृष्टा युद्धाय तस्थिरे ॥ ४४ ॥ सर्वे विकृतलाङ्गूलाः सर्वे दंष्ट्रानखायुधाः । सर्वे विकृतचित्राङ्गाः सर्वे च विकृताननाः ॥ ४५ ॥

सुपर्णः गरुडः ॥ ४०–४३ ॥ वानरशार्दूलाः वानरश्रेष्ठाः । शैलाग्रानिति पुंस्त्वमार्षम् ॥ ४४ ॥ विकृतलाङ्गूलाः ऊर्ध्वं प्रसारितपुच्छाः । विकृत

विन्यस्तानि, प्राकारोपरिप्रदेशेष्विति शेषः ॥ ३६–३९ ॥ मध्यमे गुल्म इति । अतिदुर्जयरावणेन्द्रजिदधिष्ठितयोरुत्तरपश्चिमद्वारयोर्मध्ये वायुदिशि तदुभयद्वारनिरोधकानां काकाक्षिन्यायेन साहाय्यं कर्तुं सुग्रीवः स्वयं समतिष्ठतेत्यर्थः ॥ ४० ॥ प्रख्यातयूथपाः षट्त्रिंशत्कोट्यः । अप्रख्यातानां यूथपानां तत्सेनानां च गणनाभाव इति भावः ॥ ४१ ॥ ४२ ॥ अदूरात्पश्चिमेन आसन्नपृष्ठभागावष्टम्भेन ॥ ४३–४५ ॥

For Private And Personal Use Only

चित्राङ्गा इत्यत्र विकृतत्वं कोपरक्तमुखनेत्रत्वम् । अत एव चित्रं चित्रवर्णम् अङ्गं येषां ते तथोक्ता इति विग्रहः । विकृताननाः राक्षसविडम्बनाय कुटिलितमुखाः ॥ ४५ ॥ दशगुणोत्तराः शतनागबला इत्यर्थः ॥ ४६ ॥ सन्तीति । ओघबलाः ओघसङ्ख्याकनागबलाः । शतगुणोत्तराः ओघसङ्ख्याकनागबलेभ्यः शतगुणेन उत्तराः श्रेष्ठा इत्यर्थः । अप्रमेयबलाः अपरिच्छेद्यबलाः ॥४७॥ अद्भुतः आश्चर्यभूतः । विचित्रः वानरगोपुच्छभल्लूकजुष्टतया

दशनागबलाः केचित् केचिद्दशगुणोत्तराः । केचिन्नागसहस्रस्य बभूवुस्तुल्यविक्रमाः ॥ ४६ ॥ सन्ति चौघबलाः केचित् केचिच्छतगुणोत्तराः । अप्रमेयबलाश्चान्ये तत्रासन् हरियूथपाः ॥ ४७ ॥ अद्भुतश्च विचित्रश्च तेषामासीत् समागमः । तत्र वानरसैन्यानां शलभानामिवोद्यमः ॥ ४८ ॥ परिपूर्णमिवाकाशं सञ्छन्नेव च मेदिनी । लङ्कामुपनिविष्टैश्च सम्पतद्भिश्च वानरैः ॥ ४९ ॥ शतं शतसहस्राणां पृथगृक्षवनौकसाम् । लङ्काद्वाराण्युपाजग्मुरन्ये योद्धुं समन्ततः ॥५०॥ आवृतः स गिरिः सर्वैस्तैः समन्तात् प्लवङ्गमैः ॥ ५१ ॥ अयुतानां सहस्रं च पुरीं तामभ्यवर्तत ॥ ५२ ॥ वानरैर्बलवद्भिश्च बभूव द्रुमपाणिभिः । संवृता सर्वतो लङ्का दुष्प्रवेशापि वायुना ॥ ५३ ॥

नानावर्णः । तत्र लङ्कायाम् । तेषां वानरसैन्यानां समागमः आगमनं शलभानां शरभाणाम् अष्टापदमृगाणाम् उद्यमः समागम इव आसीत्, तथा भयङ्करोऽभूदित्यर्थः । यद्वा यथा शलभानां समागमो युगपत् भवति तथेति युगपत्पतने दृष्टान्तः ॥ ४८ ॥ परिपूर्णमिति । अत्र इवशब्दद्वयमपि वाक्यालङ्कारे । उपनिविष्टैः पृथिवी पूर्णा । सम्पतद्भिः आगच्छद्भिस्तु आकाशं पूर्णम् । भूमाववकाशाभावादिति भावः ॥ ४९ ॥ शतसहस्राणाम् ऋक्षवनौकसां शतं पूर्वनियुक्तेभ्योऽतिरिक्तं लङ्काद्वाराण्युपाजगाम । अन्ये वानराः समन्ततः युद्धार्थमुपाजग्मुरित्यन्वयः ॥५०॥ आवृत इत्यर्धमेकं वाक्यम् । स गिरिः त्रिकूटः ॥ ५१ ॥ अयुतानामित्यर्धम् । अयुतानां सहस्रं च तां पुरीमभ्यवर्ततेत्यनेन पूर्वोक्तस्य द्वारावरणस्यानन्तरम् अयुतानां सहस्रं च पुरीं तां पर्यवारयदित्युच्यते ॥ ५२ ॥ दुष्प्रवेशा बभूवेत्यन्वयः ॥ ५३ ॥

दशगुणोत्तराः दशगुणाधिकाः ॥ ४६ ॥ ओघबलाः ओघसङ्ख्याकनागबलाः ॥ ४७–४९ ॥ शतसहस्राणां शतम् ऋक्षवनौकसः पूर्वनियुक्तव्यतिरिक्ताः । योद्धुं लङ्काद्वाराणि पृथक् पृथगुपाजग्मुः, अन्ये समन्ततः उपाजग्मुरिति योजना ॥ ५० ॥ आवृत इति । स गिरिः त्रिकूटः ॥ ५१–५४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिनिपीडिताः उपरुद्धाः राक्षसाः । विस्मयमाश्चर्यं जग्मुः ॥ ५४ ॥ तत्र त्रिकूटशिखरे । भिन्नस्य भिन्नमर्यादस्य सागरस्येव अभिवर्ततः अभिवर्तमानस्य बलौघस्य । सलिलस्वनो यथा स्यात् तथा महाञ्छब्दो बभूवेति योजना । अतो न यथाशब्दवैयर्थ्यम् ॥ ५५ ॥ तेनेति । सशैलवन काननेत्यत्र वनम् उद्यानम् ॥ ५६ ॥ सुग्रीवेणेति रक्ष्यसाहित्यमुच्यते ॥ ५७ ॥ राघव इत्यादि सार्धश्लोकद्वयमेकान्वयम् । वधे विषये । आनन्तर्यम्

राक्षसा विस्मयं जग्मुः सहसाऽभिनिपीडिताः । वानरैर्मेघसङ्काशैः शक्रतुल्यपराक्रमैः ॥ ५४ ॥ महान् शब्दोऽभवत्तत्र बलौघस्याभिवर्ततः । सागरस्येव भिन्नस्य यथा स्यात् सलिलस्वनः ॥ ५५ ॥ तेन शब्देन महता सप्राकारा सतोरणा। लङ्का प्रचलिता सर्वा सशैलवनकानना ॥ ५६ ॥ रामलक्ष्मणगुप्ता सा सुग्रीवेण च वाहिनी । बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः ॥ ५७ ॥ राघवः सन्निवेश्यैव सैन्यं स्वं रक्षसां वधे । सम्मन्त्र्य मन्त्रिभिः सार्धं निश्चित्य च पुनः पुनः । आनन्तर्यमभिप्रेप्सुः क्रमयोगार्थतत्त्ववित् ॥ ५८ ॥ विभीषणस्यानुमते राजधर्ममनुस्मरन् । अङ्गदं वालितनयं समाहूयेदमब्रवीत् ॥ ५९ ॥

अनन्तरकर्तव्यम् । अभिप्रेप्सुः प्राप्तुमिच्छुः । संमन्त्र्य दूतः प्रेषणीय इति विचार्य । निश्चित्य अङ्गद एव प्रेषणीय इति निर्धार्य । क्रमयोगार्थतत्त्ववित् क्रमयुक्ता योगाः सामाद्युपायाः तेषामर्थः फलं तस्य तत्त्वं याथार्थ्यं वेत्तीति तथोक्तः । राजधर्ममनुस्मरन् युयुत्सया शत्रुपुरं प्रत्यागता राजानः युद्धार्थं दूतमुखेन प्रथममाह्वयन्तीत्येवंरूपं राजधर्ममनुस्मरन् । विभीषणस्यानुमते अनुमतौ सत्याम् अङ्गदं समाहूयेदमब्रवीदिति सम्बन्धः ॥ ५८ ॥ ५९ ॥

महानिति । तत्र त्रिकूटशिखरे । भिन्नस्य सागरस्येवाभिवर्तनः अभिवर्तमानस्य बलौघस्य सलिलस्वनो यथा स्यात् तथा महान्निस्वनोऽभवदिति योजना ॥५५–५७॥ राघव इत्यादि सार्धश्लोकद्वयमेकम् । आनन्तर्यम् अनन्तरकर्तव्यम् । अभिप्रेप्सुः प्राप्तुमिच्छुः । क्रमयोगार्थतत्त्ववित् क्रमो नीतिः, योगाः सामाद्युपायाः, तेषामर्थं फलम्, तस्य तत्त्वं याथार्थ्यं च वेत्तीति तथा । राजधर्ममनुस्मरन् युयुत्सया शत्रुपुरं प्रत्यागता राजानो युद्धार्थं दूतमुखेन प्रथमं शत्रुमाह्वयन्तीत्येवंरूपं राजधर्ममनुस्मरन्नित्यर्थः। धर्मराजमनुस्मरन्निति पाठे–राजदन्तादित्वात् धर्मशब्दस्य पूर्वनिपातः । विभीषणस्य अनुमते अनुमतौ सत्याम अङ्गदं समाहूयेदमब्रवीदिति सम्बन्धः । विभीषणमते स्थित्वेति पाठे–युद्धे रावणो भवन्तं शरणं प्राप्तुयादि तदा लङ्काराज्यं तस्यैव दातव्यमित्येवंरूपे विभीषणमते स्थित्वेत्यर्थः॥५८–५९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हे सौम्य ! गतव्यथः गतश्रमः सन् । लङ्कां पुरीं तत्प्राकारं लङ्घयित्वा भयं त्यक्त्वा दशग्रीवं मद्वचनात् ब्रूहि, मयोक्तमिति ब्रूहीत्यर्थः । कपे इत्यनेन लङ्घनसामर्थ्यं द्योतयति ॥ ६० ॥ भ्रष्टश्रीक भ्रष्टप्रायद्रविण ! गतैश्वर्य गतप्रायनियन्तृत्व ! सम्पदि भ्रष्टायामपि लोके नियन्तृत्वं सम्भवति तदपि नास्तीत्यर्थः । तदुभयाभावेपि जीवनाशा सम्भवति सापि नास्तीत्याह मुमूर्षो इति । तदानीमपि ज्ञानं संभवति तदपि नास्तीत्याह नष्टचेतनेति ॥ ६१ ॥

गत्वा सौम्य दशग्रीवं ब्रूहि मद्वचनात् कपे । लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गतव्यथः ॥ ६० ॥ भ्रष्टश्रीक गतैश्वर्य मुमूर्षो नष्टचेतन । ऋषीणां देवतानां च गन्धर्वाप्सरसां तथा ॥ ६१ ॥ नागानामथ यक्षाणां राज्ञां च रजनीचर । यच्च पापं कृतं मोहादवलिप्तेन राक्षस ॥ [तस्य पापस्य सम्प्राप्ता व्युष्टिरद्य दुरासदा]॥ ६२ ॥ नूनमद्य गतो दर्पः स्वयम्भूवरदानजः । यस्य दण्डधरस्तेऽहं दाराहरणकर्शितः । दण्डं धारयमाणस्तु लङ्काद्वारे व्यवस्थितः ॥ ६३ ॥ पदवीं देवतानां च महर्षीणां च राक्षस । राजर्षीणां च सर्वेषां गमिष्यसि मया हतः ॥ ६४ ॥ बलेन येन वै सीतां मायया राक्षसाधम । मामतिक्रामयित्वा त्वं हृतवांस्तन्निदर्शय ॥ ६५ ॥

नागानां सर्पाणाम् । अवलिप्तेन गर्वितेन त्वया ऋषिप्रमुखानां यत्पापं कृतं यो द्रोहः कृतः । तस्य कारणभूतः स्वयंभूवरदानजो दर्पो गतः गतप्राय इत्यन्वयः । तत्र हेतुमाह यस्येति । दण्डधरः नियन्ता अहं यस्य ते दण्डं धारयमाणः कारिष्यमाण इत्यर्थः ॥ ६२ ॥ ६३ ॥ एवंविधस्य नियमने तव किं भविष्यतीत्यत्राह–पदवीमिति । पदवीं तेषु कृतं परिभवं तमपि गमिष्यसीत्यर्थः । यद्वा पदवीं लोकम् । युद्धे स्थितः सन् तेषां लोकं गमिष्यसि । युद्धे स्थित्वा सर्वपापविशुद्धः सन् गतिं गमिष्यसि । ततस्तूर्णमागच्छेति भावः ॥ ६४ ॥ मायया मारीचमायया । माम् अतिकामयित्वा अपवाह्य । ल्यबभाव आर्षः । येन बलेन यद्बलमवलम्ब्य सीतां हृतवानसि तद्बलं निदर्शयेत्यन्वयः ॥ ६५ ॥

गतव्यथः गतश्रमः ॥ ६० ॥ नागानामित्यादिसार्धश्लोक एकं वाक्यम् । हे रजनीचर ! नागानां यक्षाणां च अवलिप्तेन त्वया यच्च पापं कृतं यो द्रोहः कृतः, तस्य कारणभूतः स्वयम्भूवरदानजो यो दर्पः अद्य गत इति योजना । तत्र हेतुमाह यस्येति । यस्य ते तव दण्डं धारयमाणः करिष्यमाणः लङ्काद्वारे व्यवस्थित इति सम्बन्धः ॥ ६१–६३ ॥ एवंविधस्य मम नियमने तव किं भविष्यतीत्यत्राह–पदवीमिति । युद्धे स्थितस्सन् देवतादीनां पदवीं पुण्यलोकं गमिष्यसीति सम्बन्धः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मैथिलीमुपादाय समर्प्य मां शरणं नाभ्येषि चेदिमं लोकमराक्षसं कर्तास्मि । शरणागतो तु सर्वं क्षमिष्य इति भावः । मैथिलीमुपादायेत्यनेन स्वर्ण स्तेये स्वर्णप्रत्यर्पणमन्तरेण प्रायश्चित्तानधिकारवत्सीताप्रत्यर्पणाभावे शरणागतौ तु नाधिकार इत्युक्तम् । रावणेन शरणागतौ कृतायां विभीषणाय कोसलराज्यं दास्यामीत्यभिप्रायः ॥ ६६ ॥ शरणागत्यकरणे स्वकर्तव्यमाह–धर्मात्मेति । यद्वा शरणागतो प्राणत्राणं करिष्यामि न तु राज्यं

अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः । न चेच्छरणमभ्येषि मामुपादाय मैथिलीम् ॥ ६६ ॥
धर्मात्मा रक्षसां श्रेष्ठः सम्प्राप्तोऽयं विभीषणः । लङ्कैश्वर्यं ध्रुवं श्रीमानयं प्राप्नोत्यकण्टकम् ॥ ६७ ॥
न हि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया । शक्यं मूर्खसहायेन पापेनाविदितात्मना ॥ ६८ ॥
युद्धयस्व वा धृतिं कृत्वा शौर्यमालम्ब्य राक्षस । मच्छरैस्त्वं रणे शान्तस्ततः पूतो भविष्यसि ॥ ६९ ॥
यद्यपि विशसि लोकांस्त्रीन् पक्षिभूतो मनोजवः । मम चक्षुष्पथं प्राप्य न जीवन् प्रतियास्यसि ॥ ७० ॥

दास्यामीत्यभिप्रायेणाह धर्मात्मेति । धर्मात्मा धर्मबुद्धिः । रक्षसां श्रेष्ठः राक्षसनायक इत्यर्थः । अयं विभीषणः । सम्प्राप्तः मां प्रपन्नः । तस्मात् लङ्कैश्वर्यमयं प्राप्नोति उत्तरक्षणे प्राप्स्यतीत्यर्थः । श्रीमान् तदनुगुणानुकूल्यवान् । एवं क्रियाभेदादयंशब्दद्वयोपपत्तिः ॥ ६७ ॥ एवं विभीषणस्य राज्ययोग्यतामुक्त्वा रावणस्य तदभावमाह–न हीति । अधर्मेण धर्मरहितेन । अत एव पापेन पापिष्ठेन । अत एवाविदितात्मना अस्वाधीनमनस्केन । मूर्खसहायेन त्वया न शक्यमित्यन्वयः ॥ ६८ ॥ सीतामादाय शरणमागतोऽसि चेद्विभीषणाय राज्यं दत्त्वा त्वत्प्राणान् रक्षामि अन्यथा युद्ध्यस्वेत्याह–

"राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा । राजा त्वशासन् पापस्य तदवाप्नोति किल्बिषम् ॥" इति वचनात् उभयोरपि रूपं फलं भविष्यतीति भावः ॥ ६४ ॥ ६५ ॥ यदि मरणभीत्या युयुत्सा नास्ति तदापि ते हितं ब्रवीमीत्याह–अराक्षसमिति ॥ ६६ ॥ शरणागतिरपि राज्यकाङ्क्षया न कर्तव्येत्यभिप्रायेणाह–धर्मात्मेति । अयं विभीषणः सम्प्राप्तः, मामिति शेषः । लङ्कैश्वर्यं श्रीमानयम् अकण्टकं ध्रुवं प्राप्तो हि प्राप्त एवेति वाक्यभेदेन अयंशब्दद्वयनिर्वाहः ॥ ६७ ॥ ६८ ॥ यदि शरणव्रजनं तवानभिमतं तर्हि युद्ध्यस्वेत्याह–युद्ध्यस्वेति । शान्तः हतः ॥ ६९ ॥ ७० ॥ ॥१२१॥

स०–मूर्खसहायेन अनेन महान्तो न सन्ति वक्तारस्तव समीप इति सूच्यते । एतावत्कालपर्यन्तं राज्यभोजकादृष्टेन भुक्तं नक्तञ्चरराज्यम् । इतः परमवर्मशासके मय्युपायातं तद्भोगयोगस्तव कथं स्यादिति भावः ॥ ६७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युद्धयस्वेति । शान्तः मृतः। पूत इति। युद्धे अपरावृत्त्या मृतेः सर्वपापप्रायश्चित्तत्वादिति भावः ॥ ६९ ॥ ७० ॥ क्रियतामौर्ध्वदैहिकमिति अराक्षसकरणेन श्राद्धकर्त्रभावात्स्वयमेव जीवच्छ्राद्धं कुर्वित्यर्थः । सुदृष्टेति । म्रियमाणा हि चापलेन पुत्रकलत्रादिमुखदर्शनं कुर्वन्ति तद्वदिति भावः । मयि स्थितं मदायत्तम्, अवश्यं त्वां नाशयामीत्यर्थः ॥ ७१ ॥ मूर्तिमान् करचरणादिसंस्थानवान् । हव्यवाट् अग्निः ॥ ७२ ॥ अतिपत्य

ब्रवीमि त्वां हितं वाक्यं क्रियतामौर्ध्वदैहिकम् । सुदृष्टा क्रियतां लङ्का जीवितं ते मयि स्थितम् ॥ ७१ ॥ इत्युक्तः स तु तारेयो रामेणाक्लिष्टकर्मणा । जगामाकाशमाविश्य मूर्तिमानिव हव्यवाट् ॥ ७२ ॥ सोऽतिपत्य मुहूर्तेन श्रीमान्रावणमन्दिरम् । ददर्शासीनमव्यग्रं रावणं सचिवैः सह ॥ ७३ ॥ ततस्तस्याविदूरे स निपत्य हरिपुङ्गवः । दीप्ताग्निसदृशस्तस्थावङ्गदः कनकाङ्गदः ॥ ७४ ॥ तद्रामवचनं सर्वमन्यूनाधिकमुत्तमम् । सामात्यं श्रावयामास निवेद्यात्मानमात्मना ॥ ७५ ॥ दूतोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः । वालिपुत्रोऽङ्गदो नाम यदि ते श्रोत्रमागतः ॥ ७६ ॥ आह त्वां राघवो रामः कौसल्यानन्दवर्धनः । निष्पत्य प्रतियुद्धयस्व नृशंस पुरुषो भव ॥७७॥

प्राप्य । अव्यग्रं ददर्शेत्यन्वयः । श्रीमानित्यनेन हर्षवत्त्वमुच्यते ॥ ७३ ॥ ७४ ॥ तदिति । उत्तमं पथ्यम् । सामात्यं, रावणमिति शेषः । आत्मना स्वयम् । आत्मानं निवेद्य आत्मनो वालिपुत्रत्वादिनिवेदनपूर्वकं रामवचनं कथयामासेत्यर्थः ॥ ७५ ॥ दूत इति । यदि ते श्रोत्रमागतः, मां श्रुतवानसि किमित्यर्थः ॥७६॥ आह त्वामिति । राघव इत्यादिना छद्मना न योत्स्यत इत्युक्तम् । कौसल्यानन्दवर्धन इत्यनेन बहुतपःप्रभावजनिततया धार्मिकत्वमुक्तम् । निष्पत्य पुरान्निर्गत्य। पुरुषो भव शूरो भवेत्यर्थः। पुरुषाधमेति पाठे—पुरोपरोधेऽप्यनिर्गमने नूनं पुरुषाधम एवासीति भावः ॥ ७७ ॥

सुदृष्टा क्रियताम्, दुर्गसंरक्षणादिभिरिति शेषः ॥ ७१ ॥ मूर्तिमान् हव्यवाट्, वानरवेषोऽग्निरित्यर्थः ॥ ७२ ॥ अतिपत्य अतिक्रम्य, मार्गमिति शेषः ॥ ७३ ॥ ७४ ॥ तद्रामवचनमिति संक्षेपकथनं वक्ष्यमाणस्य ॥ ७५ ॥ तस्यैव प्रपञ्चः—दूतोऽहमिति । यदीत्यसन्दिग्धे सन्दिग्धवचनं वेदाः प्रमाणं चेदितिवत् । श्रोत्रमागत एव, एतेन स्वस्य स्वीयानां च बलादि तुभ्यं न वाच्यमेव, त्वया ज्ञातत्वादिति भावः ॥ ७६ ॥ निष्पत्य पुराद्विनिष्क्रम्य । पुरुषो भव शूरो भव ॥ ७७ ॥

स०–और्ध्वदैहिकं मृत्यनन्तरं लोकान्तरे सुखप्रापकं दानादिकं क्रियताम् । अनुशतिकादित्वादुभयपदवृद्धिः । अनेन पुत्रा अप्यसन्त इति सर्वनाशे कर्ता कोऽपि न जीविष्यतीति द्योत्यते । "प्रियैर्दत्तं प्रियं भवेत्" इति दशरथोक्तिविभीषणेन कृतं सदपि तव सम्मतं न भवेदित्येवमुक्तिः ॥ ७१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हन्तेति, अहमिति शेषः । निरुद्विग्नाः निर्भयाः ॥७८॥ उद्धरिष्यामि उन्मूलयिष्यामि। कण्टकं बाधकमित्यर्थः ॥७९॥८०॥ आपन्नः प्राप्तः बभूव ॥८१॥ दुर्मेधाः दुर्बुद्धिः, न दूतो वध्य इति शास्त्रानभिज्ञ इत्यर्थः । असकृच्छशासेत्यन्वयः । यद्वा दुर्मेधा इत्यङ्गदमेवाह ॥ ८२ ॥ ८३ ॥ यातुधानगणे विषये

हन्तास्मि त्वां सहामात्यं सपुत्रज्ञातिबान्धवम् । निरुद्विग्नास्त्रयो लोका भविष्यन्ति हते त्वयि ॥ ७८ ॥ देवदानवयक्षाणां गन्धर्वोरगरक्षसाम् । शत्रुमद्योद्धरिष्यामि त्वामृषीणां च कण्टकम् ॥ ७९ ॥ विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि । न चेत् सत्कृत्य वैदेहीं प्रणिपत्य प्रदास्यसि ॥ ८० ॥ इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुङ्गवे । अमर्षवशमापन्नो निशाचरगणेश्वरः ॥ ८१ ॥ ततः स रोषताम्राक्षः शशास सचिवांस्तदा । गृह्यतामेष दुर्मेधा वध्यतामिति चासकृत् ॥ ८२ ॥ रावणस्य वचः श्रुत्वा दीप्ताग्निसमतेजसः । जगृहुस्तं ततो घोराश्चत्वारो रजनीचराः ॥ ८३ ॥ ग्राहयामास तारेयः स्वयमात्मानमात्मवान् । बलं दर्शयितुं वीरो यातुधानगणे तदा ॥ ८४ ॥ स तान् बाहुद्वये सक्तानादाय पतगानिव । प्रासादं शैलसङ्काशमुत्पपाताङ्गदस्तदा ॥ ८५ ॥ तेऽन्तरिक्षाद्विनिर्धूतास्तस्य वेगेन राक्षसाः । भूमौ निपतिताः सर्वे राक्षसेन्द्रस्य पश्यतः ॥ ८६ ॥ ततः प्रासादशिखरं शैलशृङ्गमिवोन्नतम् । ददर्श राक्षसेन्द्रस्य वालिपुत्रः प्रतापवान् ॥ ८७ ॥ तत्पफाल पदाक्रान्तं दशग्रीवस्य पश्यतः । पुरा हिमवतः शृङ्गं वज्रिणेव विदारितम् ॥ ८८ ॥

स्वबलं दर्शयितुम् । आत्मवान् धृतिमान् । स्वयम् आत्मानं ग्राहयामास ग्रहीतुमनुमेने ॥ ८४–८७ ॥ पफाल व्यशीर्यत ॥ ८८ ॥

निरुद्विग्नाः निर्भयाः ॥ ७८ ॥ ७९ ॥ सत्कृत्य प्रणिपत्य, मामिति शेषः । वैदेहीं न प्रदास्यसि चेत् त्वयि हते विभीषणस्यैश्वर्यं भविष्यतीति योजना । वैदेहीं न प्रदास्यसि चेत्त्वां हत्वा विभीषणाय राज्यं दास्यामीत्यर्थः ॥ ८०–८६ ॥ प्रासादशिखरं, ददर्शेति शेषः । दृष्ट्वा तच्चक्राम पदाक्रान्तधाम । चक्राम राक्षसेन्द्रस्य इति पाठः ॥ ७ ॥ तदाक्रान्तं च प्रासादशिखरं पफाल शतधा विशीर्णमभूत् ॥ ८८–९० ॥

For Private And Personal Use Only

विश्राव्य विशेषेण श्रावयित्वा ॥ ८९ ॥ ९० ॥ प्रासादधर्षणात् प्रासादभञ्जनात् । पश्यन् तर्कयन् । निश्वासपरमः आधिकनिश्वासः ॥९१॥ राम इति । अङ्गदागमनं, दृष्ट्वेति शेषः ॥ ९२ ॥ संवृतः, बभूवेति शेषः । उत्तरश्लोकेनैकवाक्यत्वे हरिकपिशब्दयोः पौनरुक्त्यं स्यात् ॥ ९३ ॥ न्यूनताव्यावृत्त्यर्थं सर्वाणीत्युक्तम् । कपिः सुषेणः । पर्यक्रामत परितश्चचार । नक्षत्राणि नक्षत्रनिरूपितराशीनित्यर्थः ॥ ९४ ॥ तेषामित्यादि । अक्षौहिणिशतमित्यत्र

भङ्क्त्वा प्रासादशिखरं नाम विश्राव्य चात्मनः । विनद्य सुमहानादमुत्पपात विहायसम् ॥ ८९ ॥ व्यथयन् राक्षसान् सर्वान् हर्षयंश्चापि वानरान् । स वानराणां मध्ये तु रामपार्श्वमुपागतः ॥ ९० ॥ रावणस्तु परं चक्रे क्रोधं प्रासादधर्षणात् । विनाशं चात्मनः पश्यन्निश्वासपरमोऽभवत् ॥ ९१ ॥ रामस्तु बहुभिर्हृष्टैर्निनदद्भिः प्लवङ्गमैः । वृतो रिपुवधाकाङ्क्षी युद्धायैवाभ्यवर्तत ॥ ९२ ॥ सुषेणस्तु महावीर्यो गिरिकूटोपमो हरिः । बहुभिः संवृतस्तत्र वानरैः कामरूपिभिः ॥९३॥ चतुर्द्वाराणि सर्वाणि सुग्रीववचनात् कपिः । पर्यक्रामत दुर्धर्षो नक्षत्राणीव चन्द्रमाः ॥ ९४ ॥ तेषामक्षौहिणिशतं समवेक्ष्य वनौकसाम् । लङ्कामुपनिविष्टानां सागरं चाभिवर्तताम् ॥ ९५ ॥ राक्षसा विस्मयं जग्मुस्त्रासं जग्मुस्तथाऽपरे । अपरे समरोद्धर्षाद्धर्षमेव प्रपेदिरे ॥ ९६ ॥ कृत्स्नं हि कपिभिर्व्याप्तं प्राकारपरिखान्तरम् । ददृशू राक्षसा दीनाः प्राकारं वानरीकृतम् ॥ ९७ ॥

" ङ्यापोः संज्ञाछन्दसोर्बहुलम् " इति ह्रस्वः । अनेकाक्षौहिणीमित्यर्थः । सागरं चाभिवर्तताम् सागरसमीपे वर्तमानानामित्यर्थः ॥ ९५ ॥ राक्षसाः, धीरा इति शेषः । अपरे अधीरा इत्यर्थः । उद्धर्षात् गर्वात् ॥ ९६ ॥ कृत्स्नमिति । हरिभिर्व्याप्तं प्राकारपरिखान्तरं प्राकारपरिखयोरन्तरालम् । वानरीकृतं वानरप्रचुरतया कृतम्, अपरमिव प्राकारं ददृशुरित्यर्थः ॥ ९७ ॥

पश्यन् एकोऽपि समग्रं मम बलं पराभूय निर्भयं गच्छति । एवंविधेष्वनेकेषु मन्नाशोद्यतेषु कथं जीवनमिति पर्यालोचयन्नित्यर्थः ॥ ९१-९३ ॥ पर्यक्रामत सर्व बलरक्षार्थं सर्वद्वारवृत्तान्तग्रहणार्थं च परितश्चचार ॥ ९४ ॥ अक्षौहिणिशतम् " अक्षादूहिन्याम्-" इति वृद्धिः । आर्षो ह्रस्वः । यावन्तोऽक्षौहिण्यां गजाश्वरथ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हाहेत्यर्धम् ॥ ९८ ॥ तस्मिन्निति । स्पष्टः ॥९९॥ इति श्रीगोविन्द० श्रीरामायण० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकचत्वारिंशः सर्गः ॥४१॥
अथ युद्धारम्भो द्विचत्वारिंशे–तत इति । तत्र तस्मिन् काले ॥ १ ॥ विधानं रक्षणविधिम् । द्विगुणं पूर्वस्मादधिकम् ॥ २ ॥ स इति ।

हाहाकारं प्रकुर्वन्ति राक्षसा भयमोहिताः ॥ ९८ ॥ तस्मिन् महाभीषणके प्रवृत्ते कोलाहले राक्षसराजधान्याम् ।
प्रगृह्य रक्षांसि महायुधानि युगान्तवाता इव संविचेरुः ॥९९॥ इत्यार्षे० श्रीमद्युद्धकाण्डे एकचत्वारिंशः सर्गः ॥४१॥
ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम् । न्यवेदयन् पुरीं रुद्धां रामेण सह वानरैः ॥ १ ॥ रुद्धां तु नगरीं श्रुत्वा
जातक्रोधो निशाचरः । विधानं द्विगुणं कृत्वा प्रासादं सोऽध्यरोहत ॥ २ ॥ स ददर्शावृतां लङ्कां सशैलवनकान
नाम् । असङ्ख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः ॥ ३ ॥ स दृष्ट्वा वानरैः सर्वां वसुधां कवलीकृताम् । कथं क्षपयि
तव्याः स्युरिति चिन्तापरोऽभवत् ॥ ४ ॥ स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावणः । राघवं हरियूथांश्च ददर्शा
यतलोचनः ॥ ५ ॥ राघवः सह सैन्येन मुदितो नाम पुप्लुवे । लङ्कां ददर्श गुप्तां वै सर्वतो राक्षसैर्वृताम् ॥ ६ ॥
दृष्ट्वा दाशरथिर्लङ्कां चित्रध्वजपताकिनीम् । जगाम सहसा सीतां दूयमानेन चेतसा ॥ ७ ॥ अत्र सा मृगशावाक्षी
मत्कृते जनकात्मजा । पीड्यते शोकसन्तप्ता कृशा स्थण्डिलशायिनी ॥ ८ ॥

सर्वत आवृतामित्यन्वयः ॥ ३ ॥ कवलीकृताम् आच्छादितम् । कपिलीकृतामिति पाठे–वानरवर्णेन कपिलीकृताम् । क्षपयितव्याः नाशयि
तव्याः, एत इति शेषः ॥ ४ ॥ आयतलोचन इत्यनेन विस्मयातिशय उच्यते ॥ ५ ॥ पुप्लुवे नाम पूर्वस्थानात् प्राकारसन्निकृष्टं प्रदेशं प्राप्त इत्यर्थः
॥ ६ ॥ दूयमानेनेति । सीतां स्मृत्वा दुःखितोऽभूदित्यर्थः ॥ ७ ॥ मृगशावाक्षीत्यनेन शोकानर्हत्वमुच्यते । स्थण्डिलशायिनी भूतलशायिनी ॥ ८ ॥

पदातयस्तत्सङ्ख्या वानरा इत्यर्थः । शतशब्दोऽनन्तवाची । सागरं चाभिवर्तन्तो सागरपर्यन्तमभिव्याप्य वर्तमानानामित्यर्थः ॥ ९५–९९ ॥ इति श्रीमहेश्वर
तीर्थविरचितायां श्रीरामायण० युद्धकाण्ड० एकचत्वारिंशः सर्गः ॥ ४१ ॥ १ ॥ रुद्धामिति । विधानं दुर्गसंरक्षणम् ॥ २ ॥ ३ ॥ कपिलीकृताम् कपिलवर्णतया ही
कृताम् ॥ ४ ॥ ५ ॥ पुप्लुवे वेगेन प्राकारसमीपं प्राप्त इत्यर्थः ॥ ६ ॥ दूयमानेन सन्तप्यमानेन चेतसा उपलक्षितः । मनसा जगाम सस्मारेत्यर्थः ॥ ७ ॥ मत्कृते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पीड्यमानां, राक्षसीभिरिति शेषः । धर्मात्मेत्यनेन दयालुत्वमुच्यते ॥ ९ ॥ वचने आज्ञापनरूपे । सङ्घर्षमाणाः स्पर्धमानाः । अनादयन् लङ्कामिति शेषः ॥ १० ॥ विकिराम चूर्णयाम । मनांसि दधिरे निश्चयं चक्रुरित्यर्थः ॥ ११ ॥ शिखराणि पर्वतखण्डान् । 'शिखरं शैलखण्डकम्' इति सङ्ग्रहकारः । तिष्ठन्ति अतिष्ठन् ॥ १२ ॥ प्रेक्षतः प्रेक्षमाणमनादृत्य तान्यनीकानि वानरानीकानि । भागशः स्वस्वनियुक्तप्रदेशे । लङ्कां लङ्काप्राकारम् । राघवप्रिय

पीड्यमानां स धर्मात्मा वैदेहीमनुचिन्तयन् । क्षिप्रमाज्ञापयामास वानरान् द्विषतां वधे ॥ ९ ॥ एवमुक्ते तु वचने रामेणाक्लिष्टकर्मणा । सङ्घर्षमाणाः प्लवगाः सिंहनादैरनादयन् ॥ १० ॥ शिखरैर्विकिरामैनां लङ्कां मुष्टिभिरेव वा । इति स्म दधिरे सर्वे मनांसि हरियूथपाः ॥ ११ ॥ उद्यम्य गिरिशृङ्गाणि शिखराणि महान्ति च । तरूंश्चोत्पाट्य विविधांस्तिष्ठन्ति हरियूथपाः ॥ १२ ॥ प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागशः । राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा ॥ १३ ॥ ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविताः । लङ्कामेवाभ्यवर्तन्त सालतालशिलायुधाः ॥ १४ ॥ ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः । प्राकाराग्राण्यरण्यानि ममन्थुस्तोरणानि च ॥ १५ ॥ परिखाः पूरयन्ति स्म प्रसन्नसलिलायुताः । पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः ॥ १६ ॥ ततः सहस्रयूथाश्च कोटीयूथाश्च वानराः । कोटीशतयुताश्चान्ये लङ्कामारुरुहुस्तदा ॥ १७ ॥ काञ्चनानि प्रमृद्नन्तस्तोरणानि प्लवङ्गमाः । कैलासशिखराभाणि गोपुराणि प्रमथ्य च ॥ १८ ॥

कामार्थं रामप्रीतिसिद्ध्यर्थमित्यर्थः ॥ १३ ॥ त्यक्तजीविताः "आशंसायां भूतवच्च" इति क्तः ॥ १४ ॥ अरण्यानि उद्यानानि । तोरणानि बहिर्द्वाराणि । ममन्थुः बभञ्जुरित्यर्थः ॥ १५ ॥ १६ ॥ कोटीशतयुताः कोटीशतयूथयुताः ॥ १७ ॥ काञ्चनानीत्यादिश्लोकद्वयम् । काञ्चनानि काञ्चननिर्मितम् । शोकसन्तप्तापि पीड्यते मदर्थं रामस्य महान् क्लेशो जायत इति खिन्ना भवतीत्यर्थः ॥ ८ ॥ ९ ॥ सङ्घर्षमाणाः अग्रे भवितुं परस्परं स्पर्धमानाः ॥१०॥ विकिराम विक्षारयाम ॥ ११ ॥ शिखराणि पर्वतखण्डान् "शृङ्गं स्यात्पर्वतस्याग्रं शिखरं खण्डशैलकम्" इति यादवः ॥ १२ ॥ राघवप्रियकामार्थं प्रियविषयः कामो मनोरथः तत्सिद्ध्यर्थम्, राघवस्य प्रियविषयमनोरथसिद्धये इत्यर्थः ॥ १३–१८ ॥

For Private And Personal Use Only

कृतानि । प्रमृद्नन्तः चूर्णयन्तः । आप्लुवन्तः प्लुवन्तश्च गमनागमने कुर्वन्तः ॥ १८–२० ॥ इत्येवमिति । घोषयन्तः घुष्यन्तः । गर्जन्तः सिंहनादं कुर्वन्तः ॥ २१ ॥ वीरबाहुरित्यादिसार्धश्लोक एकान्वयः । एतस्मिन्नन्तरे प्रसिद्धाः वीरबाह्वादयः प्राकारं निपीड्योपनिविष्टाः सन्तः । स्कन्धावारस्य

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः । लङ्कां तामभिधावन्ति महावारणसन्निभाः ॥ १९ ॥ जयत्यतिबलो रामो लक्ष्मणश्च महाबलः । राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ २० ॥ इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः । अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः ॥ २१ ॥ वीरबाहुः सुबाहुश्च नलश्च वनगोचरः । निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः । एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥ २२ ॥ पूर्वद्वारं तु कुमुदः कोटीभिर्दशभिर्वृतः । आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः ॥ २३ ॥ साहाय्यार्थं तु तस्यैव निविष्टः प्रघसो हरिः । पनसश्च महाबाहुर्वानरैर्बहुभिर्वृतः ॥ २४ ॥ दक्षिणं द्वारमागम्य वीरः शतवलिः कपिः । आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः ॥ २५ ॥ सुषेणः पश्चिमद्वारं गतस्तारापिता हरिः । आवृत्य बलवांस्तस्थौ षष्टिकोटिभिरावृतः ॥ २६ ॥

शिबिरस्य, निवेशनं निर्माणं चक्रुः । युद्धेऽन्तरान्तरा विश्रमार्थं वासस्थानं स्कन्धावारः । यद्वा व्यूहीभावेन सेनास्थापनं स्कन्धावारः ॥ २२ ॥ निवेशनप्रकारमेवाह–पूर्वद्वारमित्यादिना । कुमुदः पूर्वद्वारमावृत्य तस्थौ । ईशानकोणे स्थित्वा पूर्वद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २३ ॥ २४ ॥ शतवलिः दक्षिणद्वारमावृत्य तस्थौ । आग्नेयकोणे स्थित्वा दक्षिणद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २५ ॥ सुषेणः पश्चिमद्वारं गतः आवृत्य तस्थौ ।

आप्लवन्तः समन्तात्प्लवन्तः । प्लवन्तः प्राकाराभिमुखं प्लवन्तः ॥ १९–२१ ॥ स्कन्धावारनिवेशनं स्कन्धावारस्थ सेनानिवेशस्य निवेशनं व्यूहीभावेन स्थापनम् ॥ २२ ॥ स्कन्धावारनिवेशप्रकारमाह–पूर्वद्वारमित्यादिना । कुमुदः पूर्वद्वारमावृत्य तस्थौ, ईशानकोणे स्थित्वा पूर्वद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २३ ॥ २४ ॥ शतवलिर्दक्षिणद्वारमावृत्य तस्थौ आग्नेयकोणे स्थित्वा दक्षिणद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २५ ॥ सुषेणः पश्चिमद्वारं प्राप्तः आवृत्य तस्थौ नैर्ऋतकोणे स्थित्वा ॥१३४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नैर्ऋतकोणे स्थित्वा पश्चिमद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २६ ॥ सुग्रीवश्चोत्तरं द्वारमावृत्य तस्थौ । "पश्चिमेन तु रामस्य सुग्रीवः सहजाम्बवान् अदूरान्मध्यमे गुल्मे तस्थौ बहुबलानुगः ॥" इत्युक्तप्रकारेण वायव्यकोणे स्थितस्य सुग्रीवस्य उत्तरद्वारनिरोधकत्वाभिधानादेतदनुसारेण कुमुदादीनां तत्तत्कोणावस्थितत्वेन तत्तद्वारनिरोधकत्वमिति व्याख्यातम् ॥ २७–३० ॥ गजो गवाक्ष इति । रामपार्श्वस्थात् गवाक्षादन्यो ज्ञेयः ॥ ३१ ॥ ततः

उत्तरं द्वारमासाद्य रामः सौमित्रिणा सह । आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः ॥ २७ ॥ गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः । वृतः कोटया महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २८ ॥ ऋक्षाणां भीमवेगानां धूम्रः शत्रुनिबर्हणः । वृतः कोटया महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २९ ॥ सन्नद्धस्तु महावीर्यो गदापाणिर्विभीषणः । वृतो यत्तैस्तु सचिवैस्तस्थौ तत्र महाबलः ॥ ३० ॥ गजो गवाक्षो गवयः शरभो गन्धमादनः । समन्तात् परिधावन्तो ररक्षुर्हरिवाहिनीम् ॥ ३१ ॥ ततः कोपपरीतात्मा रावणो राक्षसेश्वरः । निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ॥ ३२ ॥ एतच्छ्रुत्वा ततो वाक्यं रावणस्य मुखोद्गतम् । सहसा भीमनिर्घोषमुद्घुष्टं रजनीचरैः ॥ ३३ ॥ ततः प्रचोदिता भेर्यश्चन्द्रपाण्डरपुष्कराः । हेमकोणाहता भीमा राक्षसानां समन्ततः ॥ ३४ ॥ विनेदुश्च महाघोषाः शङ्खाः शतसहस्रशः । राक्षसानां सुघोराणां मुखमारुतपूरिताः ॥ ३५ ॥

वानरसेनासन्निवेशाद्धेतोः । तदा तस्मिन् सन्निवेशकाले ॥ ३२ ॥ एतदिति । भीमनिर्घोषं यथा भवति तथा उद्घुष्टम् उच्चैः सिंहनादः कृत इत्यर्थः ॥ ३३ ॥ प्रचोदिताः सेनाग्रे प्रेरिताः । चन्द्रपाण्डरपुष्कराः चन्द्रशुभ्रमुखाः । संमार्जनसंस्कारविशेषेण तासां शुभ्रत्वम् । " पुष्करं करिहस्ताग्रे

पश्चिमद्वारमाक्रम्य स्थितवानित्यर्थः ॥ २६ ॥ सुग्रीवश्चोत्तरद्वारमागत्य आवृत्य 'पश्चिमेन तु रामस्य सुग्रीवस्सहजाम्बवान्' इत्याद्युक्तप्रकारेण वायव्यकोणे स्थितः । सुग्रीवस्योत्तरद्वारनिरोधकत्वाभिधानात्तदनुसारेण कुमुदादीनां तत्तत्कोणावस्थितत्वेन तत्तद्वारनिरोधकत्वमाख्यातम् ॥ २७–२९ ॥ यत्र महाबलो रामस्तत्र तस्थावित्यन्वयः ॥ ३० ॥ गजो गवाक्ष इति । अयं गवाक्षो रामपार्श्वस्थगवाक्षादन्यः ॥ ३१–३३ ॥ चन्द्रपाण्डरपुष्कराः चन्द्रवत्पाण्डरमुखाः । " पुष्करं करिहस्ताग्रे

For Private And Personal Use Only

वाद्यभाण्डमुखे जले" इत्यमरः । कोणो वाद्यताडनदण्डः । विनेदुरित्यनुकर्षः । अथवा प्रचोदिताः सस्वनुरित्यर्थः ॥२४॥२५॥ शुभनीलाङ्गाः आभरणप्रभाभिः शोभमानानि नीलानि चाङ्गानि येषां ते । अत एव विद्युन्मण्डलसन्नद्धा इति नाधिकोपमा । विद्युन्मण्डलसन्नद्धा इत्युपमानविशेषणेन उपमेयेषु राक्षसेषु सभूषणत्वं गम्यत इत्यप्याहुः ॥ २६ ॥ सैन्याः सेनायां समवेता जनाः । "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः ।

ते बभुः शुभनीलाङ्गाः सशङ्गा रजनीचराः । विद्युन्मण्डलसन्नद्धाः सबलाका इवाम्बुदाः ॥ २६ ॥ निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः । समये पूर्यमाणस्य वेगा इव महोदधेः ॥ ३७ ॥ ततो वानरसैन्येन मुक्तो नादः समन्ततः । मलयः पूरितो येन स सानुप्रस्थकन्दरः ॥३८॥ शङ्खदुन्दुभिसंघुष्टः सिंहनादस्तरस्विनाम् । पृथिवीं चान्तरिक्षं च सागरं चैव नादयन् ॥ ३९ ॥ गजानां बृंहितैः सार्धं हयानां हेषितैरपि । रथानां नेमिघोषैश्च रक्षसां वदनस्वनः ॥४०॥ एतस्मिन्नन्तरे घोरः सङ्ग्रामः समवर्तत । रक्षसां वानराणां च यथा देवासुरे पुरा ॥४१॥ ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः । निजघ्नुर्वानरान् घोराः कथयन्तः स्वविक्रमान् ॥ ४२ ॥ [वानराश्च महावीर्या राक्षसान् जघ्नुराहवे । जयत्यतिबलो रामो लक्ष्मणश्च महाबलः] राजा जयति सुग्रीव इति शब्दो महानभूत् ॥४३॥

समये प्रलये, चन्द्रोदये वा । वेगाः पूराः ॥ ३७ ॥ मलयः त्रिकूटः । सः प्रसिद्धः । सानुप्रस्थकन्दरः अनुप्रस्थं प्रस्थे प्रस्थे स्थिताः याः कन्दराः ताभिः सह वर्तत इति विग्रहः । यद्वा सानुः समः प्रस्थः तटः कन्दरा गुहेत्यर्थः । सानुः महाप्रस्थः प्रस्थः क्षुद्रतटः कन्दरः दरी तैः सह वर्तत इति ससानुप्रस्थकन्दर इत्यप्याहुः ॥ ३८ ॥ शङ्खदुन्दुभीत्यादिश्लोकद्वयम् । शङ्खदुन्दुभिसंघुष्टः शङ्खदुन्दुभिसङ्घोषयुक्तः । तरस्विनां बलवताम् । सिंहनादः गजबृंहितादिभिः सह पृथिव्यादिकं नादयन् अनादयत् ॥ ३९ ॥ ४० ॥ देवासुरे यथा देवासुरविरोधे देवानामसुराणामिवेत्यर्थः । यद्वा षष्ठीबहुवचनस्य

वाद्यभाण्डमुखे जले" इत्यमरः । हेमकोणाहताः सुवर्णमयवादनदण्डाहताः ॥ ३४-३६ ॥ सैन्याः "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः । समये प्रलयकाले ॥ ३७ ॥ ससानुप्रस्थकन्दरः सानुर्महाप्रस्थः, प्रस्थः क्षुद्रतटः । कन्दरः दरी ॥ ३८ ॥ नादयन्, उदभूदिति शेषः ॥ ३९ ॥ गजानामित्यादि श्लोकद्वयमेकं वाक्यम् । एतस्मिन् समये गजानां बृंहितादिभिस्सह रक्षसां वानराणां च पुरा देवासुराणां विरोधे सति यथा तथा घोरस्सङ्ग्रामः समपद्यतेति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"सुपां सुलुक्–" इत्यादिना शेआदेशः॥ राजेत्यर्धम् । स्पष्टम् ॥४१–४२॥ राजन्नित्यादिसार्धश्लोकः । स्वस्वनामकथां तत इति । नामकथां चोक्त्वा ततो निजघ्नुरित्युत्तरत्रान्वयः । नामकथानाम् अन्ततः अन्ते इति वा योजना । वेगिताः सञ्जातवेगाः । वेपिता इति पाठे-कोपेन कम्पमाना इत्यर्थः ॥४४॥ भिन्दिपालैः गदाभेदैः ॥ ४५ ॥ समाप्लुत्य प्राकाराग्रपर्यन्तमुत्पत्य । प्लवनं प्लुतगतिं गच्छन्तीति प्लवङ्गमाः । असंज्ञायामपि सशार्षः । अनेन प्लुतगति

राजन् जय जयेत्युक्त्वा स्वस्वनामकथान्ततः । तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः । निजघ्नुस्तानि रक्षांसि नखैर्दन्तैश्च वेगिताः ॥ ४४ ॥ राक्षसास्त्वपरे भीमाः प्राकारस्था महीगतान् । भिन्दिपालैश्च खड्गैश्च शूलैश्चैव व्यदारयन् ॥४५॥ वानराश्चापि संक्रुद्धाः प्राकारस्थान् महीगताः । राक्षसान् पातयामासुः समाप्लुत्य प्लवङ्गमाः ॥ ४६ ॥ स सम्प्रहारस्तुमुलो मांसशोणितकर्दमः । रक्षसां वानराणां च सम्बभूवाद्भुतोपमः ॥ ४७ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्विचत्वारिंशः सर्गः ॥ ४२ ॥

मत्त्वमुक्तम् । अतो न वानरशब्देन पुनरुक्तिः ॥ ४६ ॥ सम्प्रहारः युद्धम् । तुमुलः परस्परसङ्कुलः । मांसशोणितान्येव कर्दमो यस्मिन् स मांसशोणितकर्दमः । अद्भुतोपमः दुर्लभोपम इति यावत् ॥४७॥ इति श्रीगोविन्द० श्रीरामायण० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विचत्वारिंशः सर्गः ॥४२॥

सम्बन्धः ॥ ४०–४३ ॥ स्वस्वनामकथान्ततः स्वस्वनामकथान्ते निजघ्नुरिति सम्बन्धः ॥ ४४ ॥ (राक्षसास्त्वपरे इत्यर्धं प्रक्षिप्तमिति कतकः ॥ ४५ ॥) प्लवङ्गमाः प्लवैर्गमनशीलाः ॥ ४६ ॥ स सम्प्रहार इति । एतद्युद्धोत्तरं प्रत्यवहारस्सेनाया इति भारताल्लभ्यते । " ततः प्रत्यवहारोऽभूत्सैन्यानां राघवाज्ञया " इत्यादि तत्रोक्तम् ॥ ४७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्विचत्वारिंशः सर्गः ॥ ४२ ॥

स०—सेनाप्रत्यवहारोऽत्रानुक्तोऽपि " ततः प्रत्यवहारोऽभूत्सैन्यानां राघवाज्ञया ॥ ततो निविशमानांस्तान् सैनिकान्रावणानुगाः । अभिजग्मुर्गणा एके पिशाचक्षुद्ररक्षसाम् ॥ ततोऽभिपततां तेषामदृश्यानां दुरात्मनाम् । अन्तर्धानवधं तज्ज्ञश्चकार स विभीषणः ॥ " इति भारतवनपर्वोक्तोऽनुसन्धेयः ॥ ४७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ द्वन्द्वयुद्धं वर्णयति त्रिचत्वारिंशे–युद्धयतां त्वित्यादि। वानराणां युद्धयतां वानरेषु युद्धयमानेषु। बलकोपः सेनायाः कोपः। बलेत्यविभक्तिक निर्देशः ॥ १ ॥ ते हयैरित्यादिश्लोकद्वयमेकान्वयम्। काञ्चनापीडैः स्वर्णमयशेखरैः। हयैरित्याद्युपलक्षणे तृतीया। राक्षसव्याघ्राः राक्षसश्रेष्ठाः। राक्षस

युद्धयतां तु ततस्तेषां वानराणां महात्मनाम्। रक्षसां सम्बभूवाथ बलकोपः सुदारुणः ॥१॥ ते हयैः काञ्चनापीडैर्ध्वजैश्चाग्निशिखोपमैः। रथैश्चादित्यसङ्काशैः कवचैश्च मनोरमैः ॥ २ ॥ निर्ययू राक्षसव्याघ्रा नादयन्तो दिशो दश। राक्षसा भीमकर्माणो रावणस्य जयैषिणः ॥ ३ ॥ वानराणामपि चमूर्बृहती जयमिच्छताम्। अभ्यधावत तां सेनां रक्षसां कामरूपिणाम् ॥ ४ ॥ एतस्मिन्नन्तरे तेषामन्योन्यमभिधावताम्। रक्षसां वानराणां च द्वन्द्वयुद्धमवर्तत ॥ ५ ॥ अङ्गदेनेन्द्रजित् सार्धं वालिपुत्रेण राक्षसः। अयुध्यत महातेजास्त्र्यम्बकेण यथाऽन्तकः ॥६॥ प्रजङ्घेन च सम्पातिर्नित्यं दुर्मर्षणो रणे। जम्बुमालिनमारब्धो हनुमानपि वानरः ॥ ७ ॥ सङ्गतः सुमहाक्रोधो राक्षसो रावणानुजः। समरे तीक्ष्णवेगेन मित्रघ्नेन विभीषणः ॥ ८ ॥ तपनेन गजः सार्धं राक्षसेन महाबलः। निकुम्भेन महातेजा नीलोऽपि समयुद्धयत ॥९॥ वानरेन्द्रस्तु सुग्रीवः प्रघसेन समागतः। सङ्गतः समरे श्रीमान् विरूपाक्षेण लक्ष्मणः ॥ १० ॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः। सुप्तघ्नो यज्ञकोपश्च रामेण सह सङ्गताः ॥ ११ ॥ वज्रमुष्टिस्तु मैन्देन द्विविदेनाशनिप्रभः। राक्षसाभ्यां सुघोराभ्यां कपिमुख्यौ समागतौ ॥ १२ ॥

श्रेष्ठत्वेऽपि जात्यन्तरत्वं संभवतीति राक्षसा इत्युक्तम् ॥ २–६ ॥ दुर्मर्षणः दुःसहः। प्रजङ्घो राक्षसः। सम्पातिः विभीषणसचिवः। आरब्धः, हन्तुमिति शेषः ॥७–१०॥ सुप्तघ्नयज्ञकोपौ चेति वा पाठः ॥११॥ राक्षसाभ्यां वज्रमुष्ट्यशनिप्रभाभ्याम्। कपिमुख्यौ मैन्दद्विविदौ। अनेन परस्परसङ्गतिरुक्ता ॥१२॥ ॥१२६॥

युद्धयतामिति। बलकोपः बलस्य कोपः ॥ १ ॥ काञ्चनापीडैः काञ्चनभूषणवद्भिः। अग्निशिखोपमैः तद्वद्दुर्धर्षैः ॥ २–४ ॥ अन्योन्यमभिधावतां द्वन्द्वयुद्धार्थमिति भावः ॥ ५ ॥ ६ ॥ दुर्मर्षणः दुस्सहः। आरब्धः, महर्तुमिति शेषः ॥ ७–१६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रणदुर्धरः रणे दुर्निग्रहः ॥ १२ ॥ १४ ॥ द्वन्द्वं द्वन्द्वत्वम् । बहुधा युद्धाय शस्त्रास्त्रबाहुचरणप्रभृतिभिर्युद्धाय । बहुभिरिति राक्षसविशेषणाद्वानराश्चेत्यत्रापि बहव इति विशेषणं विज्ञेयम् ॥ १५ ॥ तुमुलं व्याकुलम् ॥ १६ ॥ केशशाद्वलाः केशैः शाद्वलवत्यः । सङ्घाटः काष्ठसञ्चयः ॥ १७ ॥ आजघान

वीरः प्रतपनो घोरो राक्षसो रणदुर्धरः । समरे तीक्ष्णवेगेन नलेन समयुद्धयत ॥ १३ ॥ धर्मस्य पुत्रो बलवान् सुषेण इति विश्रुतः । स विद्युन्मालिना सार्धमयुध्यत महाकपिः ॥ १४ ॥ वानराश्चापरे भीमा राक्षसैरपरैः सह । द्वन्द्वं समीयुर्बहुधा युद्धाय बहुभिः सह ॥ १५ ॥ तत्रासीत् सुमहद्युद्धं तुमुलं रोमहर्षणम् । रक्षसां वानराणां च वीराणां जयमिच्छताम् ॥१६॥ हरिराक्षसदेहेभ्यः प्रभूताः केशशाद्वलाः । शरीरसङ्घाटवहाः प्रसस्रुः शोणितापगाः ॥१७॥ आजघानेन्द्रजित् क्रुद्धो वज्रेणेव शतक्रतुः । अङ्गदं गदया वीरं शत्रुसैन्यविदारणम् ॥१८॥ तस्य काञ्चनचित्राङ्गं रथं साश्वं ससारथिम् । जघान समरे श्रीमानङ्गदो वेगवान् कपिः ॥ १९ ॥ सम्पातिस्तु त्रिभिर्बाणैः प्रजङ्घेन समाहतः । निजघानाश्वकर्णेन प्रजङ्घं रणमूर्धनि ॥ २० ॥ जम्बुमाली रथस्थस्तु रथशक्त्या महाबलः । बिभेद समरे क्रुद्धो हनूमन्तं स्तनान्तरे ॥ २१ ॥ तस्य तं रथमास्थाय हनूमान् मारुतात्मजः । प्रममाथ तलेनाशु सह तेनैव रक्षसा ॥ २२ ॥ नदन् प्रतपनो घोरो नलं सोऽप्यन्वधावत ॥२३॥ नलः प्रतपनस्याशु पातयामास चक्षुषी । भिन्नगात्रः शरैस्तीक्ष्णैः क्षिप्रहस्तेन रक्षसा ॥ २४ ॥

ताडयामास ॥ १८–२० ॥ रथशक्त्या रथ एव सदा वर्तमानया शक्त्या ॥ २१ ॥ आस्थाय आरुह्य ॥ २२ ॥ नदन्नित्यर्धमेकं वाक्यम् ॥ २३ ॥ रक्षसा प्रतपनेन । भिन्नगात्र इत्यस्य पूर्वेणान्वयः ॥ २४ ॥

हरिराक्षसेति । केशैः शाद्वलाः शाद्वलवत्यः । शरीरसङ्घाटवहाः शरीराण्येव सङ्घाटाः काष्ठसञ्चयाः तान् वहन्तीति तथा ॥ १७–२० ॥ रथशक्त्या रथस्थशक्त्या ॥ २१–२३ ॥ रक्षसा भिन्नगात्रो नलः प्रतपनस्य चक्षुषी पातयामासेति सम्बन्धः ॥ २४–३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सप्तपर्णेन सप्तपर्णवृक्षेण ॥ २५ ॥ २६ ॥ अग्निशिखोपमैः अग्निज्वालोपमैः ॥ २७ ॥ पुराट्टः पुरवलभिः ॥ २८ ॥ २९ ॥ क्षिप्रहस्तः क्षिप्रकारिहस्तः । निकुम्भः प्रजहास चेति पाठः सम्यक् ॥ ३० ॥ शिरश्चिच्छेद सारथेरित्यनन्तरं वज्राशनिसमस्पर्श इति श्लोकः । ततो द्विविदं वानरेन्द्रं त्विति

ग्रसन्तमिव सैन्यानि प्रघसं वानराधिपः । सुग्रीवः सप्तपर्णेन निर्बिभेद जघान च ॥२५॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च राक्षसः । सुप्तघ्नो यज्ञकोपश्च रामं निर्बिभिदुः शरैः ॥ २६ ॥ तेषां चतुर्णां रामस्तु शिरांसि निशितैः शरैः । क्रुद्धश्चतुर्भिश्चिच्छेद घोरैरग्निशिखोपमैः ॥२७॥ वज्रमुष्टिस्तु मैन्देन मुष्टिना निहतो रणे । पपात सरथः साश्वः पुराट्ट इव भूतले ॥ २८ ॥ निकुम्भस्तु रणे नीलं नीलाञ्जनचयप्रभम् । निर्बिभेद शरैस्तीक्ष्णैः करैर्मेघमिवांशुमान् ॥ २९ ॥ पुनः शरशतेनाथ क्षिप्रहस्तो निशाचरः । बिभेद समरे नीलं निकुम्भः प्रजहास च ॥ ३० ॥ तस्यैव रथचक्रेण नीलो विष्णुरिवाहवे । शिरश्चिच्छेद समरे निकुम्भस्य च सारथेः ॥ ३१ ॥ वज्राशनिसमस्पर्शो द्विविदोऽप्यशनिप्रभम् । जघान गिरिशृङ्गेण मिषतां सर्वरक्षसाम् ॥३२॥ द्विविदं वानरेन्द्रं तु नगयोधिनमाहवे । शरैरशनिसङ्काशैः स विव्याधाशनिप्रभः ॥ ३३ ॥ स शरैरतिविद्धाङ्गो द्विविदः क्रोधमूर्च्छितः । सालेन सरथं साश्वं निजघानाशनिप्रभम् ॥ ३४ ॥ विद्युन्माली रथस्थस्तु शरैः काञ्चनभूषणैः । सुषेणं ताडयामास ननाद च मुहुर्मुहुः ॥ ३५ ॥ तं रथस्थमथो दृष्ट्वा सुषेणो वानरोत्तमः । गिरिशृङ्गेण महता रथमाशु न्यपातयत् ॥ ३६ ॥ लाघवेन तु संयुक्तो विद्युन्माली निशाचरः । अपक्रम्य रथात्तूर्णं गदापाणिः क्षितौ स्थितः ॥ ३७ ॥ ततः क्रोधसमाविष्टः सुषेणो हरिपुङ्गवः । शिलां सुमहतीं गृह्य निशाचरमभिद्रवत् ॥ ३८ ॥

श्लोकः ॥ ३१–३६ ॥ अपक्रम्य अवप्लुत्य ॥ ३७ ॥ अभिद्रवत् अभ्यद्रवत् ॥ ३८ ॥ ३९ ॥

ततः क्रोधेति । अभिद्रवत् अभ्यद्रवत् ॥ ३८–४१ ॥ स०–आहवे चक्रेण विष्णुरिव समरे निकुम्भस्य सारथेः शिरश्चिच्छेदेत्यन्वयः ॥ ३१ ॥

For Private And Personal Use Only

अचिन्त्य अचिन्तयित्वा ॥ ४० ॥ ४१ ॥ दिवौकसैरित्यकारान्तत्वमार्षम् ॥ ४२ ॥ भग्नैरित्यादि सार्द्धश्लोकद्वयमेकान्वयम् । अपविद्धैरिति रथविशेषणम् । भिन्नैरिति हयविशेषणम् । साङ्ग्रामिकैः सङ्ग्रामे साधुभिः । अक्षं चक्रस्तम्भम् । युगदण्डः अश्वबन्धनदण्डः ॥ ४३ ॥ ४४ ॥ कबन्धानि शिरो

तमापतन्तं गदया विद्युन्माली निशाचरः । वक्षस्यभिजघानाशु सुषेणं हरिसत्तमम् ॥ ३९ ॥ गदाप्रहारं तं घोरमचिन्त्य प्लवगोत्तमः । तां शिलां पातयामास तस्योरसि महामृधे ॥ ४० ॥ शिलाप्रहाराभिहतो विद्युन्माली निशाचरः । निष्पिष्टहृदयो भूमौ गतासुर्निपपात ह ॥ ४१ ॥ एवं तैर्वानरैः शूरैः शूरास्ते रजनीचराः । द्वन्द्वे विमृदितास्तत्र दैत्या इव दिवौकसैः ॥ ४२ ॥ भग्नैः खड्गैर्गदाभिश्च शक्तितोमरपट्टिशैः । अपविद्धैश्च भिन्नैश्च रथैः साङ्ग्रामिकैर्हयैः ॥ ४३ ॥ निहतैः कुञ्जरैर्मत्तैस्तथा वानरराक्षसैः । चक्राक्षयुगदण्डैश्च भग्नैर्धरणिसंश्रितैः । बभूवायोधनं घोरं गोमायुगणसङ्कुलम् ॥ ४४ ॥ कबन्धानि समुत्पेतुर्दिक्षु वानररक्षसाम् । विमर्दे तुमुले तस्मिन् देवासुररणोपमे ॥ ४५ ॥ विदार्यमाणा हरिपुङ्गवैस्तदा निशाचराः शोणितदिग्धगात्राः । पुनः सुयुद्धं तरसा समास्थिता दिवाकरस्यास्तमयाभिकाङ्क्षिणः ॥४६॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे त्रिचत्वारिंशः सर्गः॥४३॥

युद्ध्यतामेव तेषां तु तदा वानररक्षसाम् । रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ १ ॥

रहितशरीराणि । विमर्दे युद्धे ॥ ४५ ॥ दिवाकरस्येति । रात्रौ राक्षसानां बलाधिक्यादिति भावः ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिचत्वारिंशः सर्गः ॥ ४३ ॥ अथ रात्रियुद्धप्रवृत्तिश्चतुश्चत्वारिंशे—युद्ध्यतामेवेत्यादि । युद्ध्यतां युद्ध्यमानेषु । एवमिति । दिवौकसैरिति अकारान्तत्वमार्षम् ॥४२–४५॥ इति श्रीमहेश्वर० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रिचत्वारिंशः सर्गः ॥४३॥१–४॥

स०–प्राणहारिणी " पौषपौर्णमास्यां सुवेलारोहः, सममपौषातिक्रमणं सेनाविभागकरणम् । प्रतिपदि मध्याह्ने युद्धप्रारम्भः । बहुदिनं युद्धकरणम् । तदुपरि निशायुद्धमिति सान्धकारतया परस्परादर्शनात् " ततो जज्ञे महायुद्धं सङ्कुलं कपिरक्षसाम् । मध्याह्ने प्रथमं युद्धं प्रारब्धं प्रतिपद्यभूत् ॥ " इति पाद्मोक्तेः । अत्र तत्त्वं वक्ष्यामः" इति नागोजिभट्टः । पद्मपुराणे पद्मवेषु पुस्तकेषु एतत्पद्यादर्शनेन " अत्र युद्धं महद्वृत्तं चैत्रशुक्लचतुर्दशीम् । अष्टचत्वारिंशद्दिनं यत्रासौ रावणो हतः " इत्यन्यपद्यादर्शनेन च तच्चिन्त्यम् । चैत्रशुक्लचतुर्दशीतः प्राक् सप्तचत्वारिंशद्दिनी प्राह्या । चतुर्दश्या सहाष्टचत्वारिंशद्दिनी भवति । भवति फाल्गुनकृष्णे रात्रियुद्धमित्यन्ये ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्राणहारिणी, वानराणामिति शेषः ॥ १ ॥ २ ॥ हरिश्चासीति राक्षसा इति । दारुणतमस्कत्वेन रक्षसामपि मोहोऽभूदिति भावः ॥ ३ ॥ ४ ॥ कालाः नीलाः । काञ्चनसन्नाहाः काञ्चनकवचाः । दीप्तौषधिवनाः दीप्ततृणज्योतिर्वनाः ॥ ५ ॥ परिपेतुः सञ्चेरुः ॥ ६ ॥ ते वानराः काञ्चनापीडान्

अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् । सम्प्रवृत्तं निशायुद्धं तदा वानररक्षसाम् ॥२॥ राक्षसोऽसीति हरयो हरिश्चासीति राक्षसाः । अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ ३ ॥ जहि दारय चैहीति कथं विद्रवसीति च । एवं सुतुमुलः शब्दस्तस्मिंस्तमसि शुश्रुवे ॥ ४ ॥ कालाः काञ्चनसन्नाहास्तस्मिंस्तमसि राक्षसाः । सम्प्रादृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव ॥ ५ ॥ तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्च्छिताः । परिपेतुर्महावेगा भक्षयन्तः प्लवङ्गमान् ॥ ६ ॥ ते हयान् काञ्चनापीडान् ध्वजांश्चाग्निशिखोपमान् । आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ॥७॥ वानरा बलिनो युद्धेऽक्षोभयन् राक्षसीं चमूम् । कुञ्जरान् कुञ्जरारोहान् पताकाध्वजिनो रथान् । चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्च्छिताः ॥ ८ ॥ लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः । दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतुः ॥ ९ ॥ तुरङ्गखुरविध्वस्तं रथनेमिसमुत्थितम् । रुरोध कर्णनेत्राणि युद्ध्यतां धरणीरजः ॥ १० ॥ वर्तमाने महाघोरे सङ्ग्रामे रोमहर्षणे । रुधिरोदा महाघोरा नद्यस्तत्र प्रसुस्रुवुः ॥ ११ ॥ ततो भेरीमृदङ्गानां पणवानां च निस्वनः । शङ्खवेणुस्वनोन्मिश्रः सम्बभूवाद्भुतोपमः ॥ [विमर्दे तुमुले तस्मिन् देवासुररणोपमे ।] ॥ १२॥ हतानां स्तनमानानां राक्षसानां च निस्वनः । शस्तानां वानराणां च सम्बभूवातिदारुणः ॥ १३ ॥

सुवर्णशेखरान् ॥ ७ ॥ वानरा इत्यादिसार्द्धश्लोकः । युद्धेक्षोभयन्नित्यत्र अक्षोभयन्निति पदच्छेदः ॥ ८ ॥ दृश्यादृश्यानि ईषद्दृश्यानीत्यर्थः ॥ ९ ॥ विध्वस्तं चूर्णितम् ॥१०॥ रुधिरोदाः । असंज्ञायामप्युदकशब्दस्योदादेशः आर्षः ॥११॥१२॥ स्तनमानानां स्तनताम् । शस्तानां हिंसितानाम् ॥१३॥

कालाः नीलाः । काञ्चनसन्नाहाः सुवर्णकवचाः ॥ ५–७ ॥ वानरा इति । युद्धे अक्षोभयन्निति च्छेदः ॥ ८–१४ ॥

For Private And Personal Use Only

हतैरित्यादिश्लोकद्वयमेकान्वयम् । निहतैरिति राक्षसविशेषणम् । पर्वताग्रैः वानरप्रेरितैः । उपलक्षणे तृतीया । शस्त्राण्येव पुष्पोपहाराः पुष्पबलयो यस्यां सा । तत्र तदा । दुर्ज्ञेया कृच्छ्रज्ञेया । प्रतियोधिनः दुर्निवेशा दुष्प्रवेशा ॥ १४ ॥ १५ ॥ कालरात्रिः भीमरथिरात्रिः, " रात्रिर्भीमरथिर्नाम

हतैर्वानरवीरैश्च शक्तिशूलपरश्वधैः । निहतैः पर्वताग्रैश्च राक्षसैः कामरूपिभिः ॥ १४ ॥ शस्त्रपुष्पोपहारा च तत्रासीद्युद्धमेदिनी । दुर्ज्ञेया दुर्निवेशा च शोणितास्त्रावकर्दमा ॥ १५ ॥ सा बभूव निशा घोरा हरिराक्षसहारिणी । कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा ॥ १६ ॥ ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे । राममेवाभ्यवर्तन्त संसृष्टाः शरवृष्टिभिः ॥ १७ ॥ तेषामापततां शब्दः क्रुद्धानामपि गर्जताम् । उद्वर्त इव सप्तानां समुद्राणां प्रशुश्रुवे ॥ १८ ॥ तेषां रामः शरैष्षड्भिष्षड् जघान निशाचरान् । निमेषान्तरमात्रेण शितैरग्निशिखोपमैः ॥ १९ ॥ यमशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ । वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ ॥ २० ॥ ते तु रामेण बाणौघैः सर्वे मर्मसु ताडिताः । युद्धादपसृतास्तत्र सावशेषायुषोऽभवन् ॥ २१ ॥ तत्र काञ्चनचित्राङ्गैः शरैरग्निशिखोपमैः । दिशश्चकार विमलाः प्रदिशश्च महाबलः ॥ [रामनामाङ्कितैर्बाणैर्व्याप्तं तद्रणमण्डलम्] ॥ २२ ॥

सर्वप्राणिभयावहा" इत्युक्तेः । शक्तिर्वा, " सती च कालरात्रिश्च भैरवी गणनायिका " इत्युक्तेः ॥ १६ ॥ तत इति । संसृष्टाः संमिलिताः ॥ १७ ॥ तेषामिति । उद्वर्ते अभिवृद्धौ प्रलये वा ॥ १८ ॥ रामानु०–उद्वर्ते संवर्ते ॥ १८ ॥ तेषां राक्षसानां मध्ये षट् निशाचरान् अग्निशिखोपमैः शितैः शरैः जघान ॥ १९ ॥ रामानु०–शितैरग्निशिखोपमैरिति पाठः ॥ १९ ॥ के ते षडित्यपेक्षायामाह–यमेति । दुर्धर्षः धर्षितुमशक्यः यमशत्रुः । महोदरमहापार्श्वौ । महाकायः वज्रदंष्ट्रः । तौ उत्तरद्वाररक्षकत्वेन पूर्वोक्तौ उभौ शुकसारणौ चेति षट् । अत्र महाकाय इति वज्रदंष्ट्रविशेषणम् । अपसृताः पलायिताः । सावशेषायुषः आयुश्शेषयुक्ता इति जीवने हेतुः ॥ २० ॥ २१ ॥ तत्रेति । महाबलः रामः ॥ २२ ॥

शस्त्रपुष्पोपहारा शस्त्राण्येव पुष्पोपहाराः यस्यास्सा ॥ १५--१७ ॥ उद्वर्ते प्रलयकाले ॥ १८--२५ ॥

ये त्विति । पावकं समासाद्येत्यन्वयः ॥२३॥२४॥ राक्षसानामिति । पूर्वमेव घोरा सा भूयः विशिष्य घोरतरा बभूव ॥ २५ ॥ प्रव्याहरदिव प्रतिव्याहरदिवेत्यर्थः ॥२६॥ भक्षयन् अभक्षयन् ॥ २७ ॥ पूर्वप्रसक्तस्याङ्गदेन्द्रजितोर्द्वन्द्वयुद्धस्य शेषं वक्तुमुपक्रमते–अङ्गदस्त्वित्यादिना ॥ २८ ॥ तत्रैव तस्मिन्

ये त्वन्ये राक्षसा भीमा रामस्याभिमुखे स्थिताः । तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम् ॥ २३ ॥ सुवर्णपुङ्खैर्विशिखैः सम्पतद्भिः सहस्रशः । बभूव रजनी चित्रा खद्योतैरिव शारदी ॥ २४ ॥ राक्षसानां च निनदैर्हरीणां चापि निस्वनैः । सा बभूव निशा घोरा भूयो घोरतरा तदा ॥२५॥ तेन शब्देन महता प्रवृद्धेन समन्ततः । त्रिकूटः कन्दराकीर्णः प्रव्याहरदिवाचलः ॥ २६ ॥ गोलाङ्गूला महाकायास्तमसा तुल्यवर्चसः । सम्परिष्वज्य बाहुभ्यां भक्षयन् रजनीचरान् ॥२७॥ अङ्गदस्तु रणे शत्रुं निहन्तुं समुपस्थितः । रावणिं निजघानाशु सारथिं च हयानपि ॥ २८ ॥ वर्तमाने तदा घोरे सङ्ग्रामे भृशदारुणे । इन्द्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः । अङ्गदेन महाकायस्तत्रैवान्तरधीयत ॥ २९ ॥ तत्कर्म वालिपुत्रस्य सर्वे देवाः सहर्षिभिः । तुष्टुवुः पूजनार्हस्य तौ चोभौ रामलक्ष्मणौ ॥ ३० ॥ प्रभावं सर्वभूतानि विदुरिन्द्रजितो युधि । [अदृश्यः सर्वभूतानां योऽभवद्युधि दुर्जयः ।] तेन ते तं महात्मानं तुष्टा दृष्ट्वा प्रधर्षितम् ॥ ३१ ॥ ततः प्रहृष्टाः कपयः ससुग्रीवविभीषणाः । साधु साध्विति नेदुश्च दृष्ट्वा शत्रुं प्रधर्षितम् ॥३२॥ इन्द्रजित्तु तदा तेन निर्जितो भीमकर्मणा । संयुगे वालिपुत्रेण क्रोधं चक्रे सुदारुणम् ॥३३॥ एतस्मिन्नन्तरे रामो वानरान् वाक्यमब्रवीत् ॥ ३४ ॥ सर्वे भवन्तस्तिष्ठन्तु कपिराजेन सङ्गताः ॥ ३५ ॥

देश एव ॥ २९ ॥ पूजनार्हस्य स्तुत्यर्हस्य ॥ ३० ॥ ते तानि । लिङ्गव्यत्यय आर्षः । महात्मानं महाधैर्यम् । तेन अङ्गदेन । प्रधर्षितं पराजितम् । दृष्ट्वा तुष्टाः ॥ ३१–३३ ॥ एतस्मिन्नित्यर्धम् ॥ ३४ ॥ सर्व इत्यर्धम् ॥ ३५ ॥ ३६ ॥

तेन शब्देनेति । प्रव्याहरत् प्रतिव्याहरदिव ॥ २६–३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स इति । अन्तर्धानगतः अन्तर्धानविद्यां प्राप्तः ॥ ३७ ॥ सर्वगात्रेषु सर्वावयवेषु ॥ ३८ ॥ मायया संवृतः मायया युक्तः । अत एव अदृश्यः । कूटयोधी कपटयोधी । राघवौ रघुकुलोद्भवौ रामलक्ष्मणौ । शरबन्धेन शररूपबन्धकेन बबन्ध । वेष्टनदंशनादिना नागमयत्वम् । वेदनादिना शरमयत्वम्

स ब्रह्मणा दत्तवरस्त्रैलोक्यं बाधते भृशम् । भवतामर्थसिद्ध्यर्थं कालेन स समागतः । अत्रैव क्षमितव्यं मे भवन्तो विगतज्वराः ॥ ३६ ॥ सोऽन्तर्धानगतः पापो रावणी रणकर्कशः । अदृश्यो निशितान् बाणान् मुमोचाशनिवर्चसः ॥३७॥ स रामं लक्ष्मणं चैव घोरैर्नागमयैः शरैः । बिभेद समरे क्रुद्धः सर्वगात्रेषु राक्षसः ॥३८॥ मायया संवृतस्तत्र मोहयन् राघवौ युधि । अदृश्यः सर्वभूतानां कूटयोधी निशाचरः । बबन्ध शरबन्धेन भ्रातरौ रामलक्ष्मणौ ॥३९॥ तौ तेन पुरुषव्याघ्रौ क्रुद्धेनाशीविषैः शरैः । सहसा निहतौ वीरौ तदा प्रैक्षन्त वानराः ॥ ४० ॥ प्रकाशरूपस्तु यदा न शक्तस्तौ बाधितुं राक्षसराजपुत्रः । मायां प्रयोक्तुं समुपाजगाम बबन्ध तौ राजसुतौ महात्मा ॥ ४१ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

॥ ३९ ॥ ४० ॥ मायाप्रयोगः किमर्थस्तत्राह–प्रकाशेति । समुपाजगाम उपचक्रमे । बबन्ध च । महात्मा महाबुद्धिः ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

सः इन्द्रजित ब्रह्मणा दत्तवरस्सन् त्रैलोक्यं बाधते । किञ्च कालेन कालबलेन भवतामर्थसिद्ध्यर्थं समागतः कालबलेन भवतो जेतुं समागत इत्यर्थः । अत्रैव मे मया क्षमितव्यं ब्रह्मणो मान्यत्वादिति भावः । भवन्तो विगतज्वरास्तिष्ठन्त्विति पूर्वेण सम्बन्धः ॥ ३६--४० ॥ समुपाजगाम उपचक्रमे । रामकर्तृकेन्द्रजित्प्रयुक्तनागपाशबन्धनसहनस्यायमाशयः–ईषद्भ्रूभङ्गमात्रेण सर्वजगत्संहर्तुस्सर्वेश्वरस्य श्रीरामस्य इन्द्रजित्प्रयुक्तनागपाशबन्धनसहनं स्वकृतमर्यादारूपब्रह्मवरदानपालनार्थं ब्रह्मणो मान्यतार्थं चेति ज्ञातव्यम् । अस्मिन् काण्डेऽन्यत्राप्येतादृशस्थलेष्वेवमेवानुसन्धेयम् ॥ ४१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ नागपाशबन्धः पञ्चचत्वारिंशे–स तस्येत्यादि । गम्यत इति गतिः स्थानम् ॥ १ ॥ तानेव दश यूथपान् दर्शयति–द्वावित्यादिना । दायादौ पुत्रौ । "दायादौ सुतबान्धवौ" इत्यमरः ॥ २ ॥ ३ ॥ मार्गमाणाः मार्गितुमित्यर्थः ॥ ४ ॥ परमास्त्रैरिषुभिः परमास्त्ररूपैरिषुभिः ॥ ५ ॥ ६ ॥ रामेति । भृशं सर्वदेहभिदः शरान् रामलक्ष्मणयोरेवाधिकरणयोरावेशयामास ॥ ७ ॥ निरन्तरशरीरौ, कृताविति शेषः । शरतां गतैः शरकार्यं भेदनादिकं कुर्वद्भिरित्यर्थः ॥ ८ ॥ रामानु०–पन्नगैः शरतां गतैः । शरकार्यं भेदनं पन्नगकार्यं संवेष्टनं च कुर्वद्भिरित्यर्थः ॥ ८ ॥ तयोरिति । क्षतेन जातो मार्गः क्षतजमार्गः । ननु "न भूत

स तस्य गतिमन्विच्छन् राजपुत्रः प्रतापवान् । दिदेशातिबलो रामो दश वानरयूथपान् ॥ १ ॥ द्वौ सुषेणस्य दायादौ नीलं च प्लवगर्षभम् । अङ्गदं वालिपुत्रं च शरभं च तरस्विनम् ॥ २ ॥ विनतं जाम्बवन्तं च सानुप्रस्थं महाबलम् । ऋषभं चर्षभस्कन्धमादिदेश परन्तपः ॥ ३ ॥ ते सम्प्रहृष्टा हरयो भीमानुद्यम्य पादपान् । आकाशं विविशुः सर्वे मार्गमाणा दिशो दश ॥ ४ ॥ तेषां वेगवतां वेगमिषुभिर्वेगवत्तरैः । अस्त्रवित् परमास्त्रैस्तु वारयामास रावणिः ॥ ५ ॥ तं भीमवेगा हरयो नाराचैः क्षतविग्रहाः । अन्धकारे न ददृशुर्मेघैः सूर्यमिवावृतम् ॥ ६ ॥ रामलक्ष्मणयोरेव सर्वदेहभिदः शरान् । भृशमावेशयामास रावणिः समितिञ्जयः ॥ ७ ॥ निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ । क्रुद्धेनेन्द्रजिता वीरौ पन्नगैः शरतां गतैः ॥ ८ ॥ तयोः क्षतजमार्गेण सुस्राव रुधिरं बहु । तावुभौ च प्रकाशेते पुष्पिताविव किंशुकौ ॥ ९ ॥

सङ्घसंस्थानो देहोऽस्य परमात्मनः ॥ न तस्य प्राकृता मूर्तिर्मांसमेदोऽस्थिसम्भवा ॥" इत्यादिभिः रामलक्ष्मणयोर्दिव्यविग्रहस्याप्राकृतत्वस्मरणात्कथं रुधिरोद्गम इति चेदत्राहुः । वस्तुतोऽनयो रुधिराभावेऽपि मनुष्यभावनानुरोधेन नट इव रुधिराणि दर्शयतः स्म । नन्वेवं निर्बन्धेन मनुष्यभावं भावयतः किं प्रयोजनम् ? शृणु; सर्वात्मना मनुष्यभावनाननुरोधे जन एवं मन्येत–नायं मर्त्यः किं तु देवः तेन तद्वदस्माकं न शक्यमनुष्ठातुं धर्मानिति । सर्वथा मनुष्य ॥१४०॥

स इति । तस्य इन्द्रजितः गतिम् अवस्थानप्रदेशम् अन्विच्छन् ज्ञातुमिच्छन् दिदेश आदिदेश ॥ १–४ ॥ तेषामिति । परमास्त्रेण ब्रह्मास्त्रमन्त्रेण अभिमन्त्रितैरिषुभिर्वारयामासेति सम्बन्धः ॥ ५–८ ॥ तयोरिति । क्षतजमार्गेण क्षतेन व्रणेन जातो मार्गः तेन ॥ ९ ॥ १० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावनायां तु महाजनानुष्ठानदर्शनेन स्वयमनुष्ठास्यति लोक इति रहस्यम् । रावणस्य मनुष्यैकवध्यत्वेन तद्भावनेत्यप्याहुः । नागपाशबद्धतयाऽवस्थानं तु धर्मनिरतानामपि कदाचिदापदुपतिष्ठति निवर्तते च झटितीति लोकानां प्रदर्शनायेति । एवं मोहादिष्वपि द्रष्टव्यम् ॥ ९ ॥ पर्यन्तरक्ताक्ष इत्यनेन ईषत्कोपवत्त्वं लक्ष्यते ॥ १० ॥ अनालक्ष्यं यथा भवति तथा युद्ध्यमानं मां शक्रस्त्रिदशेश्वरोऽपि द्रष्टुं मायया बलान्तरेण आसादितुं वापि न शक्तः । किं पुनर्युवां मानुषावित्यर्थः ॥११॥ राघवाविति संबोधनम् । अत्रापि युवामिति द्वितीयान्ततया विपरिणम्यानुषञ्जनीयम् । कङ्कपत्रिणा कङ्कपत्रवता ।

ततः पर्यन्तरक्ताक्षो भिन्नाञ्जनचयोपमः । रावणिर्भ्रातरौ वाक्यमन्तर्धानगतोऽब्रवीत् ॥ १० ॥ युद्ध्यमानमनालक्ष्यं शक्रोऽपि त्रिदशेश्वरः । द्रष्टुमासादितुं वापि न शक्तः किं पुनर्युवाम् ॥११॥ प्रावृताविषुजालेन राघवौ कङ्कपत्रिणा । एष रोषपरीतात्मा नयामि यमसादनम् ॥१२॥ एवमुक्त्वा तु धर्मज्ञौ भ्रातरौ रामलक्ष्मणौ । निर्बिभेद शितैर्बाणैः प्रजहर्ष ननाद च ॥ १३ ॥ भिन्नाञ्जनचयश्यामो विस्फार्य विपुलं धनुः । भूयो भूयः शरान् घोरान् विससर्ज महामृधे ॥ १४ ॥ ततो मर्मसु मर्मज्ञो मज्जयन्निशितान् शरान् । रामलक्ष्मणयोर्वीरो ननाद च मुहुर्मुहुः ॥ १५ ॥ बद्धौ तु शरबन्धेन तावुभौ रणमूर्धनि । निमेषान्तरमात्रेण न शेकतुरुदीक्षितुम् ॥ १६ ॥ ततो विभिन्नसर्वाङ्गौ शरशल्याचितावुभौ । ध्वजाविव महेन्द्रस्य रज्जुमुक्तौ प्रकम्पितौ ॥ १७ ॥ तौ सम्प्रचलितौ वीरौ मर्मभेदेन कर्शितौ । निपेततुर्महेष्वासौ जगत्यां जगतीपती ॥ १८ ॥

एष इत्यव्यवधानद्योतनाय ॥ १२ ॥ एवमिति । धर्मज्ञाविति शब्दवेधप्रयोगासहिष्णू इत्यर्थः ॥१३॥ अञ्जनोपरिप्रदेशस्य धूसरत्वसंभवात् भिन्नेत्युक्तम् ॥ १४ ॥ १५ ॥ निमेषान्तरमात्रेण निमेषावकाशमात्रेण, क्षणमात्रेणेत्यर्थः ॥ १६ ॥ शरशल्याचितौ शराग्रप्रोतौ कृतौ । रज्जुमुक्तौ मुक्तरज्जू । अत एव प्रकम्पितौ महेन्द्रस्य ध्वजाविव कृतौ । जगत्यां भूमौ । जगतीपती भूपती ॥ १७॥ १८ ॥

अनालक्ष्य अन्तर्धाय ॥ ११ ॥ प्रावृताविषुजालेनेत्यस्य प्रातीतिकार्थः स्पष्टः ॥ वस्तुतस्तु–राघवौ इषुजालेन प्रावृतौ केवलम्, यमसादनं नयामि, वानरानिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताविति । वीराः शेरतेऽस्मिन्निति वीरशयनं रणभूमिः, शरतल्पं वा । शरवेष्टितसर्वाङ्गौ शरभूतसर्पवेष्टितसर्वाङ्गौ । आर्तौ मनःपीडावन्तौ । परमपीडितौ शारीरकपीडावन्तौ, अभूतामिति शेषः ॥ १९ ॥ अङ्गुलम् अङ्गुलिप्रमाणम् । अथवा "अङ्गुलिरङ्गुलम्" इति त्रिकाण्डीस्मरणात् अङ्गुलिप्रमाणवाच्यङ्गुलशब्दोऽकारान्तोऽप्यस्ति । तयोर्गात्रमङ्गुलमात्रेऽप्यवकाशे अविद्धं नाभूदिति भावः । यद्वा तयोर्गात्रम् अङ्गुलम् अङ्गुलसम्बन्ध्यपि

तौ वीरशयने वीरौ शयानौ रुधिरोक्षितौ । शरवेष्टितसर्वाङ्गावार्तौ परमपीडितौ ॥ १९ ॥ न ह्यविद्धं तयोर्गात्रे बभूवाङ्गुलमन्तरम् । नानिर्भिन्नं न चास्तब्धमाकराग्रादजिह्मगैः ॥ २० ॥ तौ तु क्रूरेण निहतौ रक्षसा कामरूपिणा । असृक् सुस्रुवतुस्तीव्रं जलं प्रस्रवणाविव ॥ २१ ॥ पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः । क्रोधादिन्द्रजिता येन पुरा शक्रो विनिर्जितः ॥२२॥ रुक्मपुङ्खैः प्रसन्नाग्रैरधोगतिभिराशुगैः । नाराचैरर्धनाराचैर्भल्लैरञ्जलिकैरपि । विव्याध वत्सदन्तैश्च सिंहदंष्ट्रैः क्षुरैस्तथा ॥ २३ ॥

अन्तरमवकाशः । आकराग्रात्कराग्रपर्यन्तम् । अजिह्मगैः सर्परूपशरैः । अविद्धं न बभूव । अस्तब्धम् अनिश्चलं च न बभूव । अनिर्भिन्नं च न बभूव ॥ २० ॥ तीव्रम् अत्यन्तम् । प्रस्रवणौ गिरिविशेषौ ॥ २१ ॥ पपातेति । इन्द्रजित्त्वं निर्वक्ति येनेति ॥ २२ ॥ नागास्त्रप्रयोगानन्तरं केवलशरैरपि विव्याधेत्याह—रुक्मपुङ्खैरित्यादिना । प्रसन्नाग्रैः उन्मृष्टाग्रैरित्यर्थः । प्रहर्तुराकाशस्थत्वेनाधोगतिभिः । आशुगैः वक्ष्यमाणविशेषभिन्नैः । नाराचैः ऋजुवृत्ताग्रैः । अर्धनाराचैः मध्ये भिन्ननाराचतुल्यैः । भल्लैः परश्वधाग्रैः । अञ्जलिकैः अञ्जलिसदृशाग्रैः । वत्सदन्तैः वत्सदन्तसदृशाग्रैः । सिंहदंष्ट्रैः सिंहदंष्ट्रासदृशाग्रैः । क्षुरैः क्षुराग्रैः । अत्रेन्द्रजिदित्यध्याहार्यम् ॥ २३ ॥ रामानु०—क्षुरैः क्षुराकारमुखैः ॥ २३ ॥

शेषः ॥ १२–१८ ॥ वीरशयने वीरा अस्मिन् शेरत इति वीरशयनम्, युद्धभूमावित्यर्थः । शरवेष्टितसर्वाङ्गौ शरभूतसर्पवेष्टितसर्वगात्रौ ॥ १९ ॥ अङ्गुलम् अङ्गुलप्रमाणम् । अस्तब्धं चेष्टावत् । जिह्मगैः बाणैः ॥ २० ॥ प्रस्रवणौ प्रस्रवणाख्यपर्वतौ ॥ २१ ॥ २२ ॥ रजोगतिभिः वायुना विस्तार्यमाणरजोवच्छीघ्रं सम्पतद्भिरित्यर्थः । प्रसन्नाग्रै रजोगतिभिः इति पाठः । अञ्जलिकैः अञ्जलिसदृशानि कानि शिरांस्यग्राणि येषां तैः । वत्सदन्तैः वत्सदन्ताकारैः ॥ २३ ॥ ॥१४१॥

For Private And Personal Use Only

भिन्नमुष्टिपरीणाहं शिथिलमुष्टिबन्धम् । त्रिनतं त्रिषु स्थानेषु पार्श्वयोर्मध्ये च नतम् । रुक्मभूषितं रुक्मपट्टबन्धम् । विज्यं शरसन्धानप्रसङ्गाभावाद्विगतज्यम् । कार्मुकं धनुः । आदाय अवलम्ब्य । वीरशयने रणभूमौ शिश्ये ॥ २४ ॥ बाणेति । बाणपातान्तरे शरतल्पे ॥ २५ ॥ राममिति । शरबन्धपरिक्षतम् । बन्धः क्षतश्चेति द्वयमत्र शरकार्यमुच्यते ॥ २६ ॥ हरयश्चेत्यर्धम् ॥ २७ ॥ बद्धाविति । आदौ नागपाशबद्धौ । अथ शयानौ

स वीरशयने शिश्ये विज्यमादाय कार्मुकम् । भिन्नमुष्टिपरीणाहं त्रिनतं रत्नभूषितम् ॥ २४ ॥ बाणपातान्तरे रामं पतितं पुरुषर्षभम् । स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेऽभवत् ॥ २५ ॥ रामं कमलपत्राक्षं शरबन्धपरिक्षतम् । शुशोच भ्रातरं दृष्ट्वा पतितं धरणीतले ॥ २६ ॥ हरयश्चापि तं दृष्ट्वा सन्तापं परमं गताः ॥ २७ ॥ बद्धौ तु वीरौ पतितौ शयानौ तौ वानराः सम्परिवार्य तस्थुः । समागता वायुसुतप्रमुख्या विषादमार्ताः परमं च जग्मुः ॥ २८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥

ततो द्यां पृथिवीं चैव वीक्षमाणा वनौकसः । ददृशुः सन्ततौ बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १ ॥
वृष्ट्वेवोपरते देवे कृतकर्मणि राक्षसे । आजगामाथ तं देशं ससुग्रीवो विभीषणः ॥ २ ॥
नीलद्विविदमैन्दाश्च सुषेणकुमुदाङ्गदाः । तूर्णं हनुमता सार्धमन्वशोचन्त राघवौ ॥ ३ ॥

तु तौ वीरौ सम्परिवार्य वायुसुतादयो वानरास्तस्थुः । विषादं दुःखं जग्मुश्चेत्यन्वयः ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चचत्वारिंशः सर्गः ॥४५॥ अथ पूर्वसर्गोक्तमनुवदति—तत इत्यादि । द्याम् आकाशम् । सन्ततौ व्याप्तौ ॥१॥ वृष्ट्वा उपरते देव इव स्थिते राक्षसे । कृतकर्मणि कृतशरवर्षरूपकर्मणि सति । तं देशं रामस्थानम् ॥ २ ॥ नीलादयः सुग्रीवात्पूर्वमेवागताः ॥ ३ ॥

भिन्नमुष्टिपरीणाहं भिन्नः मुष्टिपरीणाहो मुष्टिग्रहणप्रदेशो यस्य तम् ॥ २४ ॥ बाणपातान्तरे बाणतल्पमध्ये ॥ २५–२८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चचत्वारिंशः सर्गः ॥ ४५ ॥ १–९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अचेष्टावित्यादिचतुःश्लोक्येकान्वया । अचेष्टौ अत एव स्तब्धौ निश्चलौ । मध्ये मध्ये मन्दनिश्वासौ मध्ये मध्ये निश्चेष्टौ । कदाचित्सर्पाविव निश्वसन्तौ कदाचिन्मन्दचेष्टितौ च । अत्र पुनरुक्तयो दुःखातिरेकात् । यद्वा अचेष्टाविति श्लोकः पूर्वश्लोकेनान्वितः ॥ ४–७ ॥ अन्तरिक्षमिति । स्पष्टः ॥ ८ ॥

अचेष्टौ मन्दनिश्वासौ शोणितौघपरिप्लुतौ । शरजालाचितौ स्तब्धौ शयानौ शरतल्पयोः ॥ ४ ॥ निश्वसन्तौ यथा सर्पौ निश्चेष्टौ मन्दविक्रमौ । रुधिरस्रावदिग्धाङ्गौ तापनीयाविव ध्वजौ ॥ ५ ॥ तौ वीरशयने वीरौ शयानौ मन्दचेष्टितौ । यूथपैस्तैः परिवृतौ बाष्पव्याकुललोचनैः ॥ ६ ॥ राघवौ पतितौ दृष्ट्वा शरजालसमावृतौ । बभूवुर्व्यथिताः सर्वे वानराः सविभीषणाः ॥ ७ ॥ अन्तरिक्षं निरीक्षन्तो दिशः सर्वाश्च वानराः । न चैनं मायया च्छन्नं ददृशू रावणिं रणे ॥ ८ ॥ त तु मायाप्रतिच्छन्नं माययैव विभीषणः । वीक्षमाणो ददर्शाथ भ्रातुः पुत्रमवस्थितम् ॥ ९ ॥ तमप्रतिमकर्माणमप्रतिद्वन्द्वमाहवे । ददर्शान्तर्हितं वीरं वरदानाद् विभीषणः ॥ १० ॥ तेजसा यशसा चैव विक्रमेण च संयुतम् ॥ ११ ॥ इन्द्रजित्त्वात्मनः कर्म तौ शयानौ समीक्ष्य च । उवाच परमप्रीतो हर्षयन् सर्व नैर्ऋतान् ॥ १२ ॥ दूषणस्य च हन्तारौ खरस्य च महाबलौ । सादितौ मामकैर्बाणैर्भ्रातरौ रामलक्ष्मणौ ॥ १३ ॥ नेमौ मोक्षयितुं शक्यावेतस्मादिषुबन्धनात् । सर्वैरपि समागम्य सर्षिसङ्घैः सुरासुरैः ॥ १४ ॥

तं त्विति । माययैवेति अन्तर्हितवस्तुदर्शनहेतुभूतया विद्ययेत्यर्थः ॥ ९ ॥ तमिति । अप्रतिद्वन्द्वं निस्समम् । वरदानादन्तर्हितमित्यन्वयः । तेजसेत्यर्धं पूर्वेणान्वेति ॥ १० ॥ ११ ॥ आत्मनः कर्म नागास्त्रबन्धरूपम् । शयानौ तौ च वीक्ष्येत्यन्वयः ॥ १२ ॥ दूषणस्येति । सादितौ, पश्यतेति शेषः ॥ १३ ॥ नेमाविति । समागम्य सङ्घीभूय ॥ १४ ॥

तमप्रतिमकर्माणमिति । अदर्शनहेतुभूतया विद्यया वरदानादन्तर्हितमिति सम्बन्धः ॥ १०–१४ ॥

स०–दूषणस्य च हन्तारा वित्यार्षत्वादिरूपेण । रामस्यैतदनूदितवान् ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्कृते यन्निमित्तम् । गात्रैः शयनमस्पृष्ट्वा चिन्तयानस्यैव मम पितुः त्रियामा याति । यत्पौरुषभयान्मम पिता शर्वर्यामेकस्मिन्नपि यामे न निद्रातीत्यर्थः ॥ १५ ॥ लङ्का लङ्कास्थजनः । आकुला नदीपक्षे आविलेत्यर्थः । लङ्कापक्षे व्यग्रेत्यर्थः । सर्वेषामस्माकं मूलहरः अनर्थः अनर्थकरो रामः ॥ १६ ॥

यत्कृते चिन्तयानस्य शोकार्तस्य पितुर्मम । अस्पृष्ट्वा शयनं गात्रैस्त्रियामा याति शर्वरी ॥ १५ ॥ कृत्स्नेयं यत्कृते लङ्का नदी वर्षास्विवाकुला । सोऽयं मूलहरोऽनर्थः सर्वेषां निहतो मया ॥ १६ ॥ रामस्य लक्ष्मणस्यापि सर्वेषां च वनौकसाम् । विक्रमा निष्फलाः सर्वे यथा शरदि तोयदाः ॥ १७ ॥ एवमुक्त्वा तु तान् सर्वान् राक्षसान् परिपार्श्वतः । यूथपानपि तान् सर्वांस्ताडयामास रावणिः ॥ १८ ॥ नीलं नवभिराहत्य मैन्दं च द्विविदं तथा । त्रिभिस्त्रिभिरमित्रघ्नस्तताप प्रवरेषुभिः ॥ १९ ॥ जाम्बवन्तं महेष्वासो विद्ध्वा बाणेन वक्षसि । हनूमतो वेगवतो विससर्ज शरान् दश ॥ २० ॥ गवाक्षं शरभं चैव द्वावप्यमिततेजसौ । द्वाभ्यां द्वाभ्यां महावेगो विव्याध युधि रावणिः ॥ २१ ॥ गोलाङ्गूलेश्वरं चैव वालिपुत्रमथाङ्गदम् । विव्याध बहुभिर्बाणैस्त्वरमाणोऽथ रावणिः ॥ २२ ॥ तान् वानरवरान् भित्त्वा शरैरग्निशिखोपमैः । ननाद बलवांस्तत्र महासत्त्वः स रावणिः ॥ २३ ॥ तानर्दयित्वा बाणौघैस्त्रासयित्वा च वानरान् । प्रजहास महाबाहुर्वचनं चेदमब्रवीत् ॥ २४ ॥ शरबन्धेन घोरेण मया बद्धौ चमूमुखे । सहितौ भ्रातरावेतौ निशामयत राक्षसाः ॥ २५ ॥

विक्रमाः सेतुबन्धनादयः ॥ १७ ॥ परिपार्श्वतः समीपतः ॥ १८ ॥ १९ ॥ हनूमतः हनूमदर्थमित्यर्थः । सम्बन्धसामान्ये षष्ठी ॥२०॥२१॥ गोलाङ्गूलेश्वरं गवाक्षम् ॥ २२–२४ ॥ निशामयत पश्यत ॥ २५ ॥

यत्कृते यस्य कृतं करणं पौरुषमिति यावत् । तस्मिन्निमित्ते सति गात्रैः शयनमस्पृष्ट्वा चिन्तयानस्य मत्पितुः त्रियामा रात्रिः याति यत्पौरुषभयाच्छर्वर्यामेकस्मिन्नपि यामे न निद्रातीत्यर्थः ॥ १५–२१ ॥ गोलाङ्गूलेश्वरं गवाक्षम् ॥ २२–२४ ॥ निशामयत पश्यत ॥ २५–२९ ॥

स०–यत्कृते यस्य रामस्य निमित्तं शोकार्तस्य । त्रिया मन्दोदर्या अमा सह शयनं शय्यां गात्रैरस्पृष्ट्वेव चिन्तयानस्य मम पितुः शर्वरी याति । शार्वरीत्यपि कश्चित्पाठः । प्रज्ञादणि शार्वर्यपि " शार्वरी शर्वरी शर्या " इति शब्दार्णवः इत्यमरव्याख्यायां भानुदीक्षितः । "अमा सहार्थान्तिकयोः " इति विश्वः ॥ १९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवमिति । कूटयोधिनः कपटयोधिनः ॥ २६–२९ ॥ शरीरे इति प्रत्येकापेक्षया द्विवचनम् । अङ्गानि करादीनि । उपाङ्गानि अङ्गुल्यादीनि । अत्रापि शरैश्चितानीति योज्यम् । दृष्ट्वा स्थित इति सुग्रीवो विशेषणीयः ॥ ३० ॥ ३१ ॥ अलमिति । एवंप्रायाणि एवंविधानि । " प्रायश्चानशने मृत्यौ तुल्य

एवमुक्तास्तु ते सर्वे राक्षसाः कूटयोधिनः । परं विस्मयमाजग्मुः कर्मणा तेन हर्षिताः ॥ २६ ॥ विनेदुश्च महा नादान् सर्वतो जलदोपमाः । हतो राम इति ज्ञात्वा रावणिं समपूजयन् ॥ २७ ॥ निष्पन्दौ तु तदा दृष्ट्वा तावुभौ रामलक्ष्मणौ । वसुधायां निरुच्छ्वासौ हतावित्यन्वमन्यत ॥ २८ ॥ हर्षेण तु समाविष्ट इन्द्रजित् समितिञ्जयः । प्रविवेश पुरीं लङ्कां हर्षयन् सर्वराक्षसान् ॥ २९ ॥ रामलक्ष्मणयोर्दृष्ट्वा शरीरे सायकैश्चिते । सर्वाणि चाङ्गोपा ङ्गानि सुग्रीवं भयमाविशत् ॥ ३० ॥ तमुवाच परित्रस्तं वानरेन्द्रं विभीषणः । सबाष्पवदनं दीनं शोकव्याकुल लोचनम् ॥ ३१ ॥ अलं त्रासेन सुग्रीव बाष्पवेगो निगृह्यताम् । एवंप्रायाणि युद्धानि विजयो नास्ति नैष्ठिकः ॥ ३२ ॥ सशेषभाग्यताऽस्माकं यदि वीर भविष्यति । मोहमेतौ प्रहास्येते महात्मानौ महाबलौ ॥ ३३ ॥ पर्यवस्थापयात्मान मनाथं मां च वानर । सत्यधर्माभिरक्तानां नास्ति मृत्युकृतं भयम् ॥ ३४ ॥ एवमुक्त्वा ततस्तस्य जलक्लिन्नेन पाणिना । सुग्रीवस्य शुभे नेत्रे प्रममार्ज विभीषणः ॥ ३५ ॥

बाहुल्ययोरपि" इति विश्वः । नैष्ठिकः नियतः ॥ ३२ ॥ सशेषभाग्यतेति । अस्माकं भाग्यशेषं यद्यस्तीत्यर्थः ॥ ३३ ॥ पर्यवस्थापयात्मानं मनो निश्चलं कुरु । स्वात्मपर्यवस्थापनेन मां च पर्यवस्थापय, धैर्यं कारयेत्यर्थः । पर्यवस्थापने हेतुमाह सत्येति । मृत्युकृतम् अपमृत्युकृतम् ॥ ३४ ॥ जल

रामलक्ष्मणयोरिति । सायकैः चिते शरीरे सायकचितान्यङ्गोपाङ्गानि च दृष्ट्वेति वचनव्यत्ययेन योजनीयम् ॥ ३० ॥ ३१ ॥ एवंप्रायाणि एवंविधः प्रायो बाहुल्यं येषां तानि, प्रायेणैवंविधानीत्यर्थः । नैष्ठिकः नियतः विजयो नास्तीति सम्बन्धः ॥ ३२ ॥ ३३ ॥ पर्यवस्थापय स्थैर्यवन्तं कुरु । रघुसिंहयोरेवं स्थितयोः पर्यवस्थापनं कथमित्यत्राह–सत्यधर्मेति ॥ स०–अनाथमित्यनेन पलायितस्य तव राज्यमस्ति न तथा ममेति सूचयति ॥ ३४ ॥ ३५ ॥

For Private And Personal Use Only

क्लिन्नेन जलसिक्तेन ॥ ३५ ॥ एवममाङ्गल्यनिवृत्त्यर्थं श्रान्तिनिवृत्त्यर्थं वा नेत्रे प्रमृज्य राक्षसमायापरिज्ञानेनाप्यस्य धैर्यसम्पादनाभिप्रायेण विद्याभिमन्त्रितजलेनापि ममार्जेत्याह–तत इति । विद्यया राक्षसमायादर्शनहेतुमन्त्रेण । परिजप्य अभिमन्त्र्य ॥ ३६ ॥ कालसम्प्राप्तं तत्कालोचितम् । असंभ्रमम् अव्याकुलमिति क्रियाविशेषणम् ॥ ३७ ॥ वैक्लव्यम् अधैर्यम् । किं करोमि अतिस्नेह एवं बाधत इत्यत्राह अतिस्नेहोऽपीति ॥ ३८ ॥ एवं

ततः सलिलमादाय विद्यया परिजप्य च । सुग्रीवनेत्रे धर्मात्मा स ममार्ज विभीषणः ॥ ३६ ॥ प्रमृज्य वदनं तस्य कपिराजस्य धीमतः । अब्रवीत् कालसम्प्राप्तमसम्भ्रममिदं वचः ॥ ३७ ॥ न कालः कपिराजेन्द्र वैक्लव्यमनुवर्तितुम् । अतिस्नेहोऽप्यकालेऽस्मिन् मरणायोपकल्पते ॥ ३८ ॥ तस्मादुत्सृज्य वैक्लव्यं सर्वकार्यविनाशनम् । हितं रामपुरोगाणां सैन्यानामनुचिन्त्यताम् ॥ ३९ ॥ अथवा रक्ष्यतां रामो यावत् संज्ञाविपर्ययः । लब्धसंज्ञौ हि काकुत्स्थौ भयं नो व्यपनेष्यतः ॥ ४० ॥ नैतत् किंचन रामस्य न च रामो मुमूर्षति । न ह्येनं हास्यते लक्ष्मी दुर्लभा या गतायुषाम् ॥ ४१ ॥

त्यक्तव्यमुक्त्वा कर्तव्यमुपदिशति–तस्मादिति । वैक्लव्यमिति स्नेहस्याप्युपलक्षणम् । रामपुरोगाणां रामप्रभृतीनाम् । रामशरण्यानामित्यर्थः ॥३९ ॥ संज्ञाविपर्ययः मूर्च्छा यावदनुवर्तते तावद्रक्ष्यतामित्यर्थः ॥ ४० ॥ एवंभूतयोः कथं संज्ञाप्राप्तिस्तत्राह–नैतदिति । एतत् शस्त्रबन्धनम् । रामस्य न किंचन । इदमसत्प्रायम्, बाधकं न भवतीत्यर्थः । अतो न मुमूर्षति, मरिष्यतीति शङ्का न कर्तव्येत्यर्थः । "आशङ्कायामुपसङ्ख्यानम्" इति म्रियतेः सन् । एतच्च जीवनलिङ्गशरीरसौभाग्येन निश्चीयत इत्याह–न हीति । गतायुषां मृतानां या लक्ष्मीः मुखकान्तिः दुर्लभा । सा च एनं न हास्यते, न जहातीत्यर्थः । जीवनानुकूला लक्ष्मीर्दृश्यत इत्यर्थः ॥ ४१ ॥

स्थममममाङ्गल्यनिरासार्थम् अद्भिः प्रमृज्य पश्चाद्राक्षसमायापरिज्ञानेनास्य धैर्यसम्पादनाभिप्रायेण विद्याभिमन्त्रितजलेन ममार्जेत्याह–तत इति । विद्यया शोकनिवारकविद्यया ॥ ३६ ॥ ३७ ॥ अकाले विषमकाले ॥ ३८ ॥ ३९ ॥ अथवेति । रामः यावत्कालं संज्ञाविपर्ययः संज्ञया विपरीतः तावत् रक्ष्यताम् । ततो लब्धसंज्ञौ नो भयं व्यपनेष्यत इति सम्बन्धः ॥ ४० ॥ ननु मुमूर्षु रामः कथमस्मान् रक्षिष्यतीत्यत आह–नैतदिति । मुमूर्षाभावे लिङ्गमाह न ह्येनमिति ॥ ४१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यावत् यावत्पर्यन्तम्। सर्वाणि कार्याणि कर्तव्यानि पुनः संस्थापयामि तावत्पर्यन्तमाश्वासयेत्यन्वयः। केचित्तु यावत्कार्याणि यावन्ति कर्तव्यानि तानि सर्वाणीत्याहुः ॥४२॥ पर्यवस्थापनं किमर्थमित्यत्राह–एते हीति। आगतसाध्वसाः प्राप्तभयविकाराः। ते च विकाराः पुलकादयः। प्रकथिताः पलायनार्थं प्रवृत्तकथा इत्यर्थः ॥४३॥ संप्रहर्षितुमित्यनन्तरम् अर्हसीत्यध्याहार्यम्। प्रधावन्तम् इन्द्रजिद्भ्रमेणेति भावः। इदमनीकविशेषणम्। गच्छामीति

तस्मादाश्वासयात्मानं बलं चाश्वासय स्वकम्। यावत् कार्याणि सर्वाणि पुनः संस्थापयाम्यहम् ॥ ४२ ॥ एते हि फुल्लनयनास्त्रासादागतसाध्वसाः। कर्णे कर्णे प्रकथिता हरयो हरिसत्तम ॥ ४३ ॥ मां तु दृष्ट्वा प्रधावन्तमनीकं सम्प्रहर्षितुम्। त्यजन्तु हरयस्त्रासं भुक्तपूर्वामिव स्रजम् ॥ ४४ ॥ समाश्वास्य तु सुग्रीवं राक्षसेन्द्रो विभीषणः। विद्रुतं वानरानीकं तत्समाश्वासयत् पुनः ॥ ४५ ॥ इन्द्रजित्तु महामायः सर्वसैन्यसमावृतः। विवेश नगरीं लङ्कां पितरं चाभ्युपागमत् ॥ ४६ ॥ तत्र रावणमासीनमभिवाद्य कृताञ्जलिः। आचचक्षे प्रियं पित्रे निहतौ रामलक्ष्मणौ ॥४७॥ उत्पपात ततो हृष्टः पुत्रं च परिषस्वजे। रावणो रक्षसां मध्ये श्रुत्वा शत्रू निपातितौ। उपाघ्राय स मूर्ध्न्येनं पप्रच्छ प्रीतमानसः ॥४८॥ पृच्छते च यथावृत्तं पित्रे सर्वं न्यवेदयत्। यथा तौ शरबन्धेन निश्चेष्टौ निष्प्रभौ कृतौ ॥४९॥ स हर्षवेगानुगतान्तरात्मा श्रुत्वा वचस्तस्य महारथस्य। जहौ ज्वरं दाशरथेः समुत्थितं प्रहृष्य वाचाऽभिननन्द पुत्रम् ॥५०॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षट्चत्वारिंशः सर्गः ॥ ४६ ॥

वाऽध्याहार्यम्। संप्रहर्षितुं भयान्निवर्तयितुमिति यावत्। तदेवाह त्यजन्त्विति ॥ ४४ ॥ समाश्वासयत् नाहमिन्द्रजित्, किन्तु विभीषण इति समाश्वासयदित्यर्थः ॥४५॥ कथासङ्घट्टनाय पूर्वोक्तमनुवदति–इन्द्रजित्त्विति ॥ ४६ ॥ रामलक्ष्मणावित्यनन्तरमितिकरणं ज्ञेयम् ॥ ४७॥ उत्पपात, आसनादिति शेषः ॥ ४८ ॥ यथावृत्तं वृत्तमनतिक्रम्य। इदमेव विवृणोति यथा ताविति ॥ ४९ ॥ हर्षवेगः हर्षातिशयः तेनानुगतो व्याप्तः अन्तरात्मा मनो यस्य सः यावत्कार्याणि यावन्ति कर्तव्यानि तानि सर्वाणि, पुनस्संस्थापयामीत्यर्थः ॥४२॥ अनीकं सम्प्रहर्षितुं धावन्तं मां दृष्ट्वा आगतसाध्वसाः प्राप्तभयविकाराः हरयः कर्णे कर्णे प्रकथिताः पलायनार्थं प्रवृत्तकथा अभवन्नित्यर्थः ॥ ४३–४९ ॥ स हर्षवेगानुगतेत्यस्य प्रातीतिकार्थः स्पष्टः। वस्तुतस्तु–स रावणः हर्षवेगानुगतान्तरात्मा

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथोक्तः । दाशरथेः निमित्तात् । ज्वरं चिन्तासन्तापम् । अनया रात्र्या प्रतिपद्गतेत्यूचुः ॥५०॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्चत्वारिंशः सर्गः ॥ ४६ ॥ अथ सीतायै वीरशयनस्थरामलक्ष्मणप्रदर्शनं सप्तचत्वारिंशे—प्रतिप्रविष्ट इत्यादि ॥ १ ॥

प्रतिप्रविष्टे लङ्कां तु कृतार्थे रावणात्मजे । राघवं परिवार्यार्ता ररक्षुर्वानरर्षभाः ॥ १ ॥ हनुमानङ्गदो नीलः सुषेणः कुमुदो नलः । गजो गवाक्षो गवयः शरभो गन्धमादनः । जाम्बवानृषभः स्कन्धो रम्भः शतवलिः पृथुः ॥ २ ॥ व्यूढानीकाश्च यत्ताश्च द्रुमानादाय सर्वतः । वीक्षमाणा दिशः सर्वास्तिर्यगूर्ध्वं च वानराः । तृणेष्वपि च चेष्टत्सु राक्षसा इति मेनिरे ॥ ३ ॥ रावणश्चापि संहृष्टो विसृज्येन्द्रजितं सुतम् । आजुहाव ततः सीतारक्षिणी राक्षसीस्तदा ॥ ४ ॥ राक्षस्यस्त्रिजटा चैव शासनात् समुपस्थिताः ॥ ५ ॥ ता उवाच ततो हृष्टो राक्षसी राक्षसाधिपः ॥६॥ हताविन्द्रजिताऽऽख्यात वैदेह्या रामलक्ष्मणौ । पुष्पकं च समारोप्य दर्शयध्वं हतौ रणे ॥ ७ ॥ यदाश्रयादवष्टब्धा नेयं मामुपतिष्ठति । सोऽस्या भर्त्ता सह भ्रात्रा निरस्तो रणमूर्धनि ॥ ८ ॥ निर्विशङ्का निरुद्विग्ना निरपेक्षा च मैथिली । मामुपस्थास्यते सीता सर्वाभरणभूषिता ॥ ९ ॥

ये ररक्षुस्तानाह—हनुमानित्यादिना ॥ २ ॥ अन्यान् वानरानाह—व्यूढानीकाश्चेति । व्यूढानीकाः कृतव्यूहसेनावन्तः । चेष्टत्सु चेष्टमानेषु ॥ ३ ॥ ४ ॥ राक्षस्य इत्यर्धम् ॥ ५ ॥ ता उवाचेत्यर्धम् ॥ ६ ॥ आख्यात कथयत ॥ ७ ॥ अवष्टब्धा गर्विता ॥ ८ ॥ निर्विशङ्का निर्विचारा । निरुद्विग्ना निःशोका ।

दाशरथेः समुत्थितं ज्वरं जहौ तस्य वचः श्रुत्वा तं पुत्रमिन्द्रजितं प्रहृष्य वाचाऽभिननन्द पुत्रप्रीत्यै केवलं तं वाङ्मात्रेण ननन्द न तु परमार्थतः । " कालज्ञो राघवः काले संयुगायाभ्यचोदयत " इत्यारभ्य " इन्द्रजित्तु-महामायस्सर्वसैन्यसमावृतः । विवेश नगरीं लङ्काम् " इत्यन्तेन वानररक्षसां प्रतिपत्प्रवृत्तं युद्धमुक्तम् ॥५०॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षट्चत्वारिंशः सर्गः ॥ ४६ ॥ ॥ १ ॥ २ ॥ व्यूढानीकाः व्यूढानि गरुडादिव्यूहाकाराणि अनीकानि येषां ते ॥ ३ ॥ रावणश्चापीत्यस्य वास्तवार्थे संहृष्टः इतरराक्षसदृष्ट्या ॥ ४–७ ॥ अवष्टब्धा गर्विता ॥ ८ ॥ निर्विशङ्का निर्विकारा ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भावे निष्ठा । निरपेक्षा रामः समेष्यतीत्याशारहिता ॥ ९ ॥ अथेत्यादिसार्धश्लोक एकान्वयः । अन्यां गतिं चापश्यती । आगमशासनस्यानित्यत्वान्नु
मभावः । अन्यां मत्तोऽन्याम् । गम्यत इति गतिः प्राप्यम् । विनिवृत्ताशा रामाद्विनिवृत्तभावा ॥ १० ॥ रामानु०-अवेति । अन्यां गतिं चापश्यती । अन्यां
मत्तोऽन्याम् । गम्यत इति गतिः प्राप्यम् । रामरूपं प्रियं प्राप्यमपश्यतीति यावत । राममवेक्ष्य विनिवृत्ताशा सा स्वयं मामुपस्थास्यत इति संबन्धः ॥ १० ॥ तस्येत्यादिः स्पष्टः

अद्य कालवशं प्राप्तं रणे रामं सलक्ष्मणम् । अवेक्ष्य विनिवृत्ताशा चान्यां गतिमपश्यती । निरपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम् ॥ १० ॥ तस्य तद्वचनं च श्रुत्वा रावणस्य दुरात्मनः । राक्षस्यस्तास्तथेत्युक्त्वा जग्मुर्वै यत्र पुष्पकम् ॥ ११ ॥ ततः पुष्पकमादाय राक्षस्यो रावणाज्ञया । अशोकवनिकास्थां तां मैथिलीं समुपानयन् ॥ १२ ॥ तामादाय तु राक्षस्यो भर्तृशोकपराजिताम् । सीतामारोपयामासुर्विमानं पुष्पकं तदा ॥ १३ ॥ ततः पुष्पकमारोप्य सीतां त्रिजटया सह । जग्मुर्दर्शयितुं तस्यै राक्षस्यो रामलक्ष्मणौ ॥ १४ ॥ रावणोऽकारयल्लङ्कां पताकाध्वजमालिनीम् । प्राघोषयत हृष्टश्च लङ्कायां राक्षसेश्वरः । राघवो लक्ष्मणश्चैव हताविन्द्रजिता रणे ॥ १५ ॥

॥११-१२॥ त्रिजटया सह सीतामारोप्य । उभयोरेव विमानारोहणमनुज्ञायेत्यर्थः । पुत्रीत्वान्निपुणतया च त्रिजटाया विमानारोहणानुज्ञा ॥१४॥ इन्द्रजिता

निरुद्विग्ना निश्शोका । निरपेक्षा रामस्समेष्यतीत्याशारहिता ॥ ९ ॥ अन्यां गतिं चापश्यती अन्यां मत्तोऽन्यां गम्यत इति गतिः प्राप्यम्, रामरूपं प्रियं न पश्यतीति यावत् । राममवेक्ष्य विनिवृत्ताशा सा स्वयं मामुपस्थास्यत इति सम्बन्धः ॥ " ता उवाच ततो हृष्टा राक्षसीः-" इत्यारभ्य " अनपेक्षा विशालाक्षी मामुपस्थास्यते स्वयम् " इत्यन्तस्य वास्तवार्थस्तु-वैदेह्या रामलक्ष्मणवृत्तान्तजिज्ञासायां तद्वृत्तान्तं तस्यै कथयतेति रावणो राक्षसीर्नियोजयति-ता उवाचेत्या रभ्य अनपेक्षा विशालाक्षीत्यन्तेन । रणे रामलक्ष्मणौ इन्द्रजिता सह, युद्धायेति शेषः । हतौ आगतावित्यर्थः । " हन हिंसागत्योः " इति धातोरेवमर्थः । वैदेह्या आख्यात तस्यास्तद्दर्शनेच्छायां सत्यां पुष्पकं समारोप्य हतौ आगतौ तौ दर्शयध्वं चेत्यर्थः । तस्यै पतिदर्शनेन किं भविष्यतीति चेत्तत्राह-यदाश्रया दित्यादिश्लोकद्वयेन । हे अवष्टब्धाः गर्विताः राक्षस्यः ! इयं यदाश्रयात् यस्य रामस्याश्रयाद्धेतोः । मां लक्ष्मीं, मदीयामिति शेषः । नोपतिष्ठति नानुभवतीत्यर्थः । अस्या भर्ता रणमूर्द्धनि भ्रात्रा सह निहतः आगतः खलु, तं दृष्ट्वा इतः परं निर्विशङ्का निरुद्विग्ना एतावत्पर्यन्तं निरपेक्षापि मैथिली

॥१४५॥

रणे इत्यनन्तरमितिकरणं बोध्यम् ॥ १५–१७ ॥ ततः सीतेत्यादिश्लोकद्वयम् । विप्रविद्धशरासनौ भ्रष्टचापौ । सायकैश्छिन्नसर्वाङ्गौ अत एव शरस्तम्बमयौ शरगुल्ममयौ । स्तम्बः समूह इत्येके । क्षितौ शरतल्पयोः शयानाविति सम्बन्धः ॥ १८ ॥ १९ ॥ तावित्यादिश्लोकद्वयम् । पावकी

विमानेनापि सीता तु गत्वा त्रिजटया सह । ददर्श वानराणां तु सर्वं सैन्यं निपातितम् ॥ १६ ॥ प्रहृष्टमनसश्चापि ददर्श पिशिताशनान् । वानरांश्चापि दुःखार्तान् रामलक्ष्मणपार्श्वतः ॥ १७ ॥ ततः सीता ददर्शोभौ शयानौ शरतल्पयोः । लक्ष्मणं चापि रामं च विसंज्ञौ शरपीडितौ ॥ १८ ॥ विध्वस्तकवचौ वीरौ विप्रविद्धशरासनौ । सायकैश्छिन्नसर्वाङ्गौ शरस्तम्बमयौ क्षितौ ॥ १९ ॥ तौ दृष्ट्वा भ्रातरौ तत्र वीरौ सा पुरुषर्षभौ । शयानौ पुण्डरीकाक्षौ कुमाराविव पावकी ॥ २० ॥ शरतल्पगतौ वीरौ तथाभूतौ नरर्षभौ । दुःखार्ता सुभृशं सीता सुचिरं विललाप ह । ॥ २१ ॥ भर्तारमनवद्याङ्गी लक्ष्मणं चासितेक्षणा । प्रेक्ष्य पांसुषु वेष्टन्तौ रुरोद जनकात्मजा ॥ २२ ॥ सा बाष्पशोकाभिहता समीक्ष्य तौ भ्रातरौ देवसमप्रभावौ । वितर्कयन्ती निधनं तयोः सा दुःखान्विता वाक्यमिदं जगाद ॥ २३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

पावकपुत्रौ स्कन्दविशाखौ । अत्रोत्तरो वीरशब्दः कुमारावित्यस्य विशेषणम् ॥ २०॥ २१ ॥ भर्तारमिति । स्पष्टः ॥ २२ ॥ सेति । अत्र वीक्षणगदनरूपक्रियाभेदात्तच्छब्दद्वयम् ॥ २३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तचत्वारिंशः सर्गः ॥ ४७॥

सर्वाभरणभूषिता सती मां मदीयां लक्ष्मीं निवेदितां लक्ष्मीमित्यर्थः । उपस्थास्यते अनुभविष्यतीत्यर्थः । ननु कथं तत्समागमं विना तस्य दर्शनमात्रेण सीता त्वदर्पितैश्वर्यमनुभविष्यतीत्यत्राह–अद्येत्यादिसार्धश्लोकेन । कालवशं कालो वशो यस्य तम् । सलक्ष्मणं रणे मातं राममवेक्ष्य अन्यां गतिमपश्यती रामव्यतिरिक्तमाश्रयं न पश्यती सती, परमपतिव्रतेत्यर्थः । अत एवानपेक्षा अत एव विनिवृत्ताशा एतादृश्यपि । 'सर्वं वाक्यं सावधारणम्' इति न्यायात् अद्यैव स्वयमेव मां लक्ष्मीम्, मदर्पितां लक्ष्मीमुपस्थास्यतीत्यर्थः ॥ १०–१८ ॥ विप्रविद्धशरासनौ भ्रष्टधनुष्कौ । शरस्तम्बमयौ शरस्तम्बः शरसमूहः तन्मयौ ॥ १९–२३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तचत्वारिंशः सर्गः ॥ ४७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ सीताप्रलापोऽष्टचत्वारिंशे–भर्तारमिति । करुणं यथा तथा विललाप ॥ १ ॥ लक्षणिन इति । लक्षणशब्देनात्र लक्षणज्ञा लक्ष्यन्ते तदेषामस्तीति लक्षणिनः । षडुत्तरषष्टिलक्षणसामुद्रिकशास्त्रज्ञा इत्यर्थः । " षष्टिष्षडुत्तरा योषिदङ्गलक्षणमीरितम् " इत्युक्तेः । अत एवाविधवा विधवालक्षणरहिता । "निर्लोम हृदयं यस्याः समं निम्नत्ववर्जितम् । ऐश्वर्यं चाप्यवैधव्यं प्रियप्रेम च सा लभेत् ॥" इत्युक्तलक्षणेत्यर्थः । पुत्रिणी पुत्रलाभलक्षणवती । "दीर्घाङ्गुलिश्च या नारी दीर्घकेशी च या भवेत् । दीर्घमायुरवाप्नोति पुत्रैश्च सह वर्तते ॥" इत्युक्तलक्षणवतीत्यर्थः । ज्ञानिनो लक्षणज्ञानवन्तः । अनृतवादिनः,

भर्तारं निहतं दृष्ट्वा लक्ष्मणं च महाबलम् । विललाप भृशं सीता करुणं शोककर्शिता ॥ १ ॥
ऊचुर्लक्षणिनो ये मां पुत्रिण्यविधवेति च । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ २ ॥
यज्वनो महिषीं ये मामूचुः पत्नीं च सत्रिणः । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ २ ॥
ऊचुः संश्रवणे ये मां द्विजाः कार्तान्तिकाः शुभाम् । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ४ ॥

आसन्निति शेषः ॥ २ ॥ यज्वन इति । यज्वनः कृताश्वमेधादिकस्य । "यज्वा तु विधिनेष्टवान्" इत्यमरः । बहुयजमानकानि गवामयनप्रभृतीनि सत्राणि तत्कर्ता सत्री तस्य महिषीं कृताभिषेकाम् । " कृताभिषेका महिषी" इत्यमरः । पत्नीं यज्ञसंयोगवतीम् । " पत्युर्नो यज्ञसंयोगे " इति पतिशब्दस्य नकारान्तादेशः । ततो " ऋन्नेभ्यो ङीप " इति ङीप् ॥ ३ ॥ ऊचुरिति । संश्रवणे मम सम्यक् श्रवणे, मयि शृण्वन्त्यामित्यर्थः । यद्वा सम्यक् श्रवणमस्मिन्निति संश्रवणः सन्निधिः, मत्सन्निधावित्यर्थः । मात्रादिसमीप इति शेषः । कृतान्तः कालः तद्विदः कार्तान्तिकाः । "स्युर्मौहूर्तिकमौहूर्तज्ञानिकार्तान्तिका अपि" इत्यमरः । शुभां नित्यमङ्गलाम् । "स्मितं प्रशस्तं सुदृशामनिमीलितलोचनम् । समवृत्तपुटा नासा लघुच्छिद्रा शुभावहा ॥" इत्याद्युक्तलक्षणैः

भर्तारं निहतमित्यादिसीताप्रलापवाक्यानां वास्तवार्थेऽयमाशयः सर्वेश्वरा सर्वज्ञा देवी रामलक्ष्मणयोः कापि हानिर्नास्तीति ज्ञात्वाऽपि राक्षसान् वञ्चयितुं बहुविधं प्रलपतीति । निहतं निहतमिव स्थितमित्यर्थः ॥ १ ॥ तेऽद्य सर्वे हते राम इत्यादिसर्वस्थलेषु रामे हते, हत इव स्थित इत्यर्थः । लक्षणिनः सामुद्रिकाः ॥ २ ॥ यज्वनः पत्नीं कृताश्वमेधादिकस्य महिषीम् । सत्रिणः बहुवर्षसाध्यो बहुकर्तृको यागः सत्रम्, तत्कर्तुः ॥ ३ ॥ संश्रवणे सम्यक् श्रवणमस्मिन्निति संश्रवणं सन्निधिः तस्मिन्, मत्सन्निधावित्यर्थः । कार्तान्तिकाः कृतान्तः कालः तद्विदः कार्तान्तिकाः, मौहूर्तिका इति यावत् । शुभां मङ्गलात्मिकामाहुः ॥ ४ ॥ ५ ॥ ॥१४६॥

For Private And Personal Use Only

इति शेषः ॥ ४ ॥ वीरेति । त्वं वीरपार्थिवपत्नी धन्या चेति ये विदुः, विदित्वा ऊचुरित्यर्थः । तेऽप्यनृतवादिन इति पूर्वेणान्वयः ॥५॥ इमानीति । यैः पद्मैरुपलक्षिताः स्त्रियः आधिराज्येऽभिषिच्यन्ते किलेत्यैतिह्ये । तानीमानि पद्मानि रेखारूपाणि, दृश्यन्त इति शेषः । खल्विति प्रसिद्धौ । स्पष्टं दृश्यन्त इत्यर्थः । कथमेषां निष्फलत्वमिति भावः ॥६॥ वैधव्यमिति । भाग्यदुर्लभाः दुर्लभभाग्याः नार्यः यैर्लक्षणैर्वैधव्यं यान्ति तानि लक्षणानि पश्यन्ती विमृशन्ती

वीरपार्थिवपत्नी त्वं ये धन्येति च मां विदुः । तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृतवादिनः ॥ ५ ॥
इमानि खलु पद्मानि पादयोर्यैः किल स्त्रियः । आधिराज्येऽभिषिच्यन्ते नरेन्द्रैः पतिभिः सह ॥ ६ ॥
वैधव्यं यान्ति यैर्नार्यो लक्षणैर्भाग्यदुर्लभाः । नात्मनस्तानि पश्यामि पश्यन्ती हतलक्षणा ॥ ७ ॥
सत्यनामानि पद्मानि स्त्रीणामुक्तानि लक्षणैः । तान्यद्य निहते रामे वितथानि भवन्ति मे ॥ ८ ॥
केशाः सूक्ष्माः समा नीला भ्रुवौ चासङ्गते मम । वृत्ते चारोमशे जङ्घे दन्ताश्चाविरला मम ॥ ९ ॥

न पश्यामि, कुत्रापि वैधव्यहेतुदुर्लक्षणं न पश्यामीत्यर्थः । किंतु केवलं हतलक्षणा निष्फललक्षणाऽस्मीत्यर्थः । तादृशलक्षणानि च सामुद्रिकोक्तानि–" परस्परं समारूढाः पादाङ्गुल्यो भवन्ति चेत् । हत्वा बहूनपि पतीन् परप्रेष्या तथा भवेत् ॥ यस्याः कनिष्ठिका भूमिं न गच्छन्त्याः परिस्पृशेत् । पतिद्वयं निहन्त्याद्या द्वितीया च पतित्रयम् ॥ एकरोमा राजपत्नी द्विरोमाऽतिसुखान्विता । त्रिरोमा रोमकूपेषु भवेद्वैधव्यदुःखभाक्" इत्यादिना ॥ ७ ॥ पदि पदे मा श्रीर्येषां तानि पद्मानीत्येवं सत्यनामानि, पदश्रीकराणीत्यर्थः । यद्वा पद्मवत्त्वात् पद्मशब्दवाच्यानि रेखारूपाणि यानि पद्मानि । सत्यनामानि अन्वर्थनामानि । पद्माशब्दादर्शआद्यचि कृते रूपम् । केचित्सत्यनामानि अमोघफलानीत्याहुः । लक्षणैः ध्वजादिलक्षणैः सह यानि सत्यनामानि पद्मान्युक्तानि तानि मे वितथानि निष्फलानि भवन्तीति योजना ॥ ८ ॥ केशा इत्यादिचतुःश्लोक्येकान्वया । अहं सूक्ष्मकेशत्वादिलक्षणलक्षिताऽस्मि,

यैर्लक्षणैः स्त्रियः नरेन्द्रैः पतिभिः सह आधिराज्ये अभिषिच्यन्ते किल तानीमानि पद्मानि खलुः, पादयोवर्तन्त इति शेषः ॥६॥ वैधव्यमिति । लक्षणैरिति छेदः । भाग्यदुर्लभाः दुर्लभभाग्याः नार्यः यैर्लक्षणैर्वैधव्यं यान्ति तानि आत्मनो न पश्यामि सुलक्षणान्येव पश्यन्त्यहं हतलक्षणा निष्फललक्षणा, जाताऽस्मीति शेषः॥७॥ सत्यनामानि अमोघफलानि पद्मानि पद्माकाररेखाः लक्षणैः लक्षणशास्त्रैरुक्तानि ॥ ८ ॥ ९ ॥

अतो मां शुभलक्षणामूचुरित्यन्वयः । समाः न्यूनाधिक्यरहिताः । असङ्गते परस्परमसंयुक्ते । अरोमशे रोमरहिते । वृत्ते वर्तुले । अत्र स्कान्दम्–"रोमहीने शुभे स्निग्धे यज्जङ्घे क्रमवर्तुले । सा राजपत्नी भवति विशिरे सुमनोहरा ॥" इति ॥ ९ ॥ शङ्खे नेत्रोपान्तभूतललाटपार्श्वे । चितौ उपचितौ । एतच्छङ्खे नेत्रे इत्यत्र लिङ्गव्यत्ययेन योजनीयम् । अनुवृत्तनखाः वृत्तनखाः । अङ्गुलयः पादहस्ताङ्गुलयः । तदुक्तं स्कान्दे–"स्निग्धाः समुन्नतास्तत्र वृत्ताः पाद

शङ्खे नेत्रे करौ पादौ गुल्फावूरू च मे चितौ । अनुवृत्तनखाः स्निग्धाः समाश्चाङ्गुलयो मम ॥ १० ॥ स्तनौ चाविरलौ पीनौ ममेमौ मग्नचूचुकौ । मग्ना चोत्सङ्गिनी नाभिः पार्श्वोरस्काश्च मे चिताः ॥ ११ ॥ मम वर्णो मणिनिभो मृदून्यङ्गरुहाणि च । प्रतिष्ठितां द्वादशभिर्मामूचुः शुभलक्षणाम् ॥ १२ ॥ समग्रयवमच्छिद्रं पाणिपादं च वर्णवत् । मन्दस्मितेत्येव च मां कन्यालक्षणिनो द्विजाः ॥ १३ ॥ आधिराज्येऽभिषेको मे ब्राह्मणैः पतिना सह । कृतान्तकुशलैरुक्तं तत्सर्वं वितथीकृतम् ॥ १४ ॥

नखाः शुभाः" इति । समाः हस्तपरिमाणसदृशाः । नातिदीर्घा नातिह्रस्वा इत्यर्थः । यद्वा एकहस्तवद्धस्तान्तरेऽपि तुल्यपरिमाणा इत्यर्थः । अन्यूनाधिकसङ्ख्याका इति वाऽर्थः ॥ १० ॥ अविरलौ निरन्तरौ । मग्नचूचुकौ ईषन्मग्नाग्रौ । मग्ना गम्भीरा । उत्सङ्गिनी उन्नतपर्यन्तप्रदेशः । पार्श्वोरस्काः पार्श्वे च उरस्कं च । आर्षो लिङ्गव्यत्ययः । चिताः उचिताः ॥ ११ ॥ मणिनिभः मणिवत्स्निग्धवर्णः । प्रतिष्ठितां द्वादशभिः, दशभिः पादाङ्गुलिभिः द्वाभ्यां पादतलाभ्यां च भूमौ सुप्रतिष्ठिताम् ॥ १२ ॥ समग्रयवं सम्पूर्णयवाकाररेखम् । अच्छिद्रं श्लिष्टाङ्गुल्यन्तरालम् । वर्णवत् अरुणवर्णम् । मामूचुरित्यनुषञ्जनीयम् । मन्दस्मितेत्येवेत्येवकारः अयोगव्यवच्छेदार्थः । नित्यमन्दस्मितेत्यर्थः ॥ १३ ॥ कृतान्तकुशलैः ज्यौतिषिकसिद्धान्तनिपुणैः । अत्र इतिकरणं द्रष्टव्यम् ।

शङ्खे नयनोपान्तभागे । चितौ, चितावित्येतत् नेत्रादिष्वपि लिङ्गव्यत्ययेन योजनीयम् । अनुवृत्तनखाः अनुवृत्ताः अनुपूर्वाः नखा येषां ते तथोक्ताः । समाः अन्यूनाधिकाः ॥ १० ॥ उत्सङ्गिनी उन्नतपर्यन्तप्रदेशः । पार्श्वे च उरश्च पार्श्वोरस्काः । प्राण्यङ्गत्वेऽप्यार्षो लिङ्गवचनव्यत्ययः । चिताः उचिताः ॥ ११ ॥ प्रतिष्ठितां द्वादशभिः पादतलाभ्यां दशभिः पादाङ्गुलिभिश्च भूमौ प्रतिष्ठितां मामूचुः ॥ १२ ॥ समग्रयवं सम्पूर्णयवाकाररेखम् । अच्छिद्रं नीरन्ध्राङ्गुल्यन्तरालम् । वर्णवत् प्रशस्तवर्णम् ॥ १३ ॥ कृतान्तकुशलैः ज्योतिश्शास्त्रसिद्धान्तनिपुणैः ॥ १४ ॥

स०–पतिना पत्या । पतिरित्याख्यातः पतिरिति लाक्षणिकः, न प्रतिपदोक्तोऽतः पतिसूत्राग्रहीत इति पतिनेति ' पतिते पतौ ' ' कृष्णस्य सखिरर्जुनः ' इत्यादिवत्सम्भवतीति वा ज्ञेयम् ॥ १४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभिषेक इत्युक्तमित्यन्वयः । "चक्रवर्तिस्त्रियः पाणौ नन्द्यावर्तः प्रदक्षिणः" इत्याद्युक्तनन्द्यावर्तादिलक्षणैरिति भावः । सर्वं वितथीकृतमित्यतः परं "यज्वनो महिर्षीं ये माम्" इत्यधस्तनश्लोकः केषुचित्कोशेषु दृश्यते । स तु लेखकप्रमादकृतः ॥ १४ ॥ शोधयित्वा अन्विष्य । प्रवृत्तिं वृत्तान्तम् । गोष्पदे इन्द्रजिन्मायामात्र इति भावः ॥१५॥ ब्रह्मशिरः अस्त्रविशेषः । प्रत्यपद्यतां नन्वित्यन्वयः । परस्मैपदमार्षम् । नन्विति प्रसिद्धौ आमन्त्रणे वा । "प्रश्ना

शोधयित्वा जनस्थानं प्रवृत्तिमुपलभ्य च । तीर्त्वा सागरमक्षोभ्यं भ्रातरौ गोष्पदे हतौ ॥ १५ ॥ ननु वारुणमाग्नेय मैन्द्रं वायव्यमेव च । अस्त्रं ब्रह्मशिरश्चैव राघवौ प्रत्यपद्यताम् ॥ १६ ॥ अदृश्यमानेन रणे मायया वासवोपमौ । मम नाथावनाथाया निहतौ रामलक्ष्मणौ ॥ १७ ॥ न हि दृष्टिपथं प्राप्य राघवस्य रणे रिपुः । जीवन् प्रतिनिवर्तेत यद्यपि स्यान्मनोजवः ॥ १८ ॥ न कालस्यातिभारोऽस्ति कृतान्तश्च सुदुर्जयः । यत्र रामः सह भ्रात्रा शेते युधि निपातितः ॥ १९ ॥ न शोचामि तथा रामं लक्ष्मणं च महाबलम् । नात्मानं जननीं चापि यथा श्वश्रूं तपस्विनीम् ॥२०॥ साऽनुचिन्तयते नित्यं समाप्तव्रतमागतम् । कदा द्रक्ष्यामि सीतां च लक्ष्मणं च सराघवम् ॥ २१ ॥

वधारणानुज्ञानुनयामन्त्रणे ननु" इत्यमरः । प्रलापे निर्निमित्तमामन्त्रणं सम्भवति ॥१६ ॥१७॥ दृश्यमानत्वे नैवं हन्तुं शक्नुयादित्याह–न हीति ॥१८॥ नेति । शुभाशुभप्रापकस्य कालस्यातिभारो नास्ति, अशक्यार्थो नास्तीत्यर्थः । कृतान्तः दैवम् । यत्र यतः । रामः अतिबलपराक्रमशाल्यपीति भावः ॥ १९ ॥ जननीं मन्मातरम् ॥ २० ॥ उक्तार्थे हेतुमाह–सेति । समाप्तव्रतम् अथ आगतं सराघवं लक्ष्मणं सीतां च कदा द्रक्ष्यामीति अनु

जनस्थानं शोधयित्वा नाशं नीत्वा ॥१५॥ प्रत्यपद्यतां प्रत्यपद्येताम् ॥१६–१८॥ न कालस्यातिभारोऽस्ति शुभाशुभप्रापककालस्याशक्योऽर्थो नास्तीत्यर्थः । कृतान्तो यमः । यत्र यस्मात् ॥ १९–२१ ॥

स॰–राघवौ रामलक्ष्मणौ प्रत्यपद्यत प्रत्यपद्येताम् । विश्वामित्रादिति शेषः । राघवश्च राघवश्चेति एतद्विग्रहशक्यैकवचनापेक्षया पृथक्पृथगन्वयो वा । विश्वामित्रो वसिष्ठो वा राघवौ प्रत्यपद्यत प्रत्यपादयत् प्राहयामासेति वा । ननुना सर्वम् एतदादि विस्मृतं वा मायाः प्रबलेति वा कल्पनां द्योतयति ॥ १९ ॥

For Private And Personal Use Only

चिन्तयत इत्यन्वयः ॥ २१ ॥ परिदेवयमानां विलपन्तीम् ॥ २२ ॥ मा विषादमित्यर्धम् ॥ २३ ॥ इमौ रामलक्ष्मणौ जीवत इति यथा ज्ञातुं शक्यते तथा । महान्ति स्फुटानि । सदृशानि पूर्वानुभूततुल्यानि । दृष्टसंवादानीति यावत् । कारणानि हेतून् वक्ष्यामीत्यन्वयः ॥ २४ ॥ तान्येव कारणानि

परिदेवयमानां तां राक्षसी त्रिजटाऽब्रवीत् ॥ २२ ॥ मा विषादं कृथा देवि भर्ताऽयं तव जीवति ॥ २३ ॥ कारणानि च वक्ष्यामि महान्ति सदृशानि च । यथेमौ जीवतो देवि भ्रातरौ रामलक्ष्मणौ ॥ २४ ॥ नहि कोपपरीतानि हर्षपर्युत्सुकानि च । भवन्ति युधि योधानां मुखानि निहते पतौ ॥ २५ ॥ इदं विमानं वैदेहि पुष्पकं नाम नामतः । दिव्यं त्वां धारयेन्नैवं यद्येतौ गतजीवितौ ॥ २६ ॥ हतवीरप्रधाना हि हतोत्साहा निरुद्यमा । सेना भ्रमति सङ्ख्येषु हतकर्णेव नौर्जले ॥ २७ ॥ इयं पुनरसम्भ्रान्ता निरुद्विग्ना तरस्विनी । सेना रक्षति काकुत्स्थौ मया प्रीत्या निवेदितौ ॥ २८ ॥ सा त्वं भव सुविस्रब्धा अनुमानैः सुखोदयैः । अहतौ पश्य काकुत्स्थौ स्नेहादेतद्ब्रवीमि ते ॥ २९ ॥ अनृतं नोक्तपूर्वं मे न च वक्ष्ये कदाचन । चारित्रसुखशीलत्वात् प्रविष्टाऽसि मनो मम ॥ ३० ॥ नेमौ शक्यौ रणे जेतुं सेन्द्रैरपि सुरासुरैः । तादृशं दर्शनं दृष्ट्वा मया चावेदितं तव । इदं च सुमहच्चिह्नं शनैः पश्यस्व मैथिलि ॥ ३१ ॥

व्यतिरेकमुखेनाह—न हीति । हर्षेण पर्युत्सुकानि, प्रसन्नानीति यावत् ॥ २५ ॥ २६ ॥ हतकर्णा हतकर्णधारा ॥ २७ ॥ निवेदितौ निवेदितजीवितौ ॥ २८ ॥ सा त्वमित्यादि । अनुमानैः चिह्नैः । सुखोदयैः सुखज्ञैरित्यर्थः ॥ २९ ॥ चारित्रसुखशीलत्वात् । चरित्रमेव चारित्रं पातिव्रत्यम्, तदेव सुखं प्रियं शीलं स्वभावः यस्याः सा तस्या भावश्चारित्रसुखशीलत्वं तस्मात् । यद्वा चारित्रेणाह्लादकस्वभावत्वादित्यर्थः । प्रविष्टासि मनो मम, त्वयि मम स्नेहो वर्तत इत्यर्थः ॥ ३० ॥ तादृशं तादृग्विधम्, जीवनव्यञ्जकमिति यावत् । दृश्यते ज्ञायतेऽनेनेति दर्शनं सैन्यमुखप्रसादादिकम् । पूर्वदृष्टं

रामलक्ष्मणौ जीवत इति यथा यैः ज्ञातुं शक्यते महान्ति स्फुटानि सदृशानि अनुभूततुल्यानि, दृष्टसंवादानीति यावत् । कारणानि हेतून् पश्यामीत्यर्थः ॥२४॥ तान्येव कारणानि व्यतिरेकमुखेनाह—नहीति ॥ २५ ॥ २६ ॥ हतकर्णा हतकर्णधारा ॥ २७ ॥ निवेदितौ निवेदितजीवितावित्यर्थः ॥ २८ ॥ अनुमानैर्लक्षणैः । चारित्रसुखशीलत्वात् चरित्रमेव चारित्रं पातिव्रत्यं तदेव सुखं प्रियं शीलं स्वभावो यस्यास्सा तस्या भावश्चारित्रसुखशीलत्वं तस्मात् ॥ २९ ॥ ३० ॥ तादृशं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वममिति वाऽर्थः । शनैः पश्यस्व सावधानेन पश्येत्यर्थः ॥ ३१ ॥ न वियुज्यते न जहाति । गतायुषाम् अत एव गतसत्त्वानां गतप्राणानाम् । "द्रव्या सुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु " इत्यमरः । वैकृतं विकृतिः ॥ ३२ ॥ रामलक्ष्मणयोरर्थे शोकं शोककृतं मुखविकारम् । मोहं विपरीतबुद्धिम् । दुःखं मनोव्यथां च त्यज । अजीवितुं न शक्यं जीवितुं शक्यमेवेत्यर्थः ॥ ३३ ॥ कृताञ्जलिरित्यनेन भगवद्विषयोपदेष्टा योपि कोप्यादरणीय इत्युक्तम् ।

निस्संज्ञावप्युभावेतौ नैव लक्ष्मीर्वियुज्यते । प्रायेण गतसत्त्वानां पुरुषाणां गतायुषाम् । दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥ ३२ ॥ त्यज शोकं च मोहं च दुःखं च जनकात्मजे । रामलक्ष्मणयोरर्थे नाद्य शक्यमजीवितुम् ॥ ३३ ॥ श्रुत्वा तु वचनं तस्याः सीता सुरसुतोपमा । कृताञ्जलिरुवाचेदमेवमस्त्विति मैथिली ॥ ३४ ॥ विमानं पुष्पकं तत्तु सन्निवर्त्य मनोजवम् । दीना त्रिजटया सीता लङ्कामेव प्रवेशिता ॥ ३५ ॥ ततस्त्रिजटया सार्धं पुष्पकादवरुह्य सा । अशोकवनिकामेव राक्षसीभिः प्रवेशिता ॥ ३६ ॥ प्रविश्य सीता बहुवृक्षषण्डां तां राक्षसेन्द्रस्य विहारभूमिम् । सम्प्रेक्ष्य सञ्चिन्त्य च राजपुत्रौ परं विषादं समुपाजगाम ॥३७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

इदंशब्दविवरणम् एवमस्त्विति ॥ ३४ ॥ विमानमिति । सन्निवर्तने प्रवेशने च त्रिजटैव कर्त्री ॥ ३५ ॥ राक्षसीभिरित्यनेन त्रिजटादर्शनायानीतेति गम्यते ॥ ३६ ॥ विहारभूमिं प्रमदावनम् । सम्प्रेक्ष्य संचिन्त्य । प्रेक्षितप्रकारेण संचिन्त्येत्यर्थः । यद्वा भावनाप्रकर्षात्पुरःस्थितौ सम्प्रेक्ष्येत्यर्थः॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

तथाविधम्, जीवनव्यञ्जकमिति यावत् । दृश्यतेऽनेनेति दर्शनम्, सैन्यमुखप्रसादादिकम् । शनैः पश्यस्व सावधानेन पश्येत्यर्थः । एतौ लक्ष्मीर्न वियुज्यते न विमुञ्चति ॥ ३१ ॥ ३२ ॥ रामलक्ष्मणयोरर्थे शोकादिकं त्यज, एतावजीवितुम् अजीवयितुं न शक्यमिति सम्बन्धः ॥ ३३-३७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टचत्वारिंशः सर्गः ॥ ४८ ॥

For Private And Personal Use Only

अथ रामप्रबोधनमेकोनपञ्चाशे–घोरेणेत्यादिश्लोकद्वयमेकान्वयम् । नागौ यथा नागाविव निश्वसन्तावित्यन्वयः । शोकपरिप्लुताः शोकपूर्णाः ॥१॥२॥ स्थिरत्वात् धीरत्वात् । सत्त्वयोगाद्बलयोगात् । सन्दानितोऽपि बद्धोऽपि । "बद्धे सन्दानितं मूतम्" इत्यमरः ॥ ३ ॥ अर्पितं, शरैरिति शेषः ॥ ४ ॥

घोरेण शरबन्धेन बद्धौ दशरथात्मजौ । निश्वसन्तौ यथा नागौ शयानौ रुधिरोक्षितौ ॥ १ ॥ सर्वे ते वानरश्रेष्ठाः ससुग्रीवा महाबलाः । परिवार्य महात्मानौ तस्थुः शोकपरिप्लुताः ॥ २ ॥ एतस्मिन्नन्तरे रामः प्रत्यबुध्यत वीर्यवान् । स्थिरत्वात् सत्त्वयोगाच्च शरैः सन्दानितोऽपि सन् ॥ ३ ॥ ततो दृष्ट्वा सरुधिरं विषण्णं गाढमर्पितम् । भ्रातरं दीनवदनं पर्यदेवयदातुरः ॥४॥ किं नु मे सीतया कार्यं किं कार्यं जीवितेन वा । शयानं योऽद्य पश्यामि भ्रातरं युधि निर्जितम् ॥५॥ शक्या सीतासमा नारी मर्त्यलोके विचिन्वता । न लक्ष्मणसमो भ्राता सचिवः साम्परायिकः ॥ ६ ॥ परित्यक्ष्याम्यहं प्राणं वानराणां तु पश्यताम् । यदि पञ्चत्वमापन्नः सुमित्रानन्दवर्धनः ॥ ७ ॥ किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम् । कथमम्बां सुमित्रां च पुत्रदर्शनलालसाम् ॥ ८ ॥ विवत्सां वेपमानां च क्रोशन्तीं कुररीमिव । कथमाश्वासयिष्यामि यदा यास्यामि तं विना ॥९॥ कथं वक्ष्यामि शत्रुघ्नं भरतं च यशस्विनम् ॥ १० ॥ मया सह वनं यातो विना तेन गतः पुनः । उपालम्भं न शक्ष्यामि सोढुं बत सुमित्रया ॥ ११ ॥

किं न्वित्यादिश्लोकद्वयम् । विचिन्वता, मयेति शेषः । सचिवः सहायः । साम्परायिकः युद्धे साधुः । "युद्धायत्योः सम्परायः" इत्यमरः ॥५॥६॥ पञ्चत्वं मृतिम् ॥ ७ ॥ किं न्वित्यादिश्लोकद्वयमेकान्वयम् । अहं तं लक्ष्मणं विना अयोध्यां यदा यास्यामि तदा कौसल्यां कैकयीं च किं वक्ष्यामि । सुमित्रां कथमाश्वासयिष्यामि ॥ ८ ॥ ९ ॥ कथमित्यर्धम् । यशस्विनमित्यनेन तद्यशो मया न लब्धमिति खिद्यति ॥ १० ॥ यो मया सह वनं यातः तेन विना

॥ १ ॥ २ ॥ एतस्मिन्निति । सन्दानितो बद्धोऽपि "बद्धे सन्दानितं मूतम्" इत्यमरः । स्थिरत्वात् धीरत्वात् ॥ ३–५ ॥ साम्परायिकः सम्पराये युद्धे साधुः । "युद्धा

स०–प्रत्यबुध्यत । तत्र निमित्तमाह–स्थिरत्वात् प्रलयादावप्येकस्यैव स्थैर्यात् नित्यनित्यत्वादिति यावत् । सत्त्वयोगात् बलोपायात् सन्दानितो बद्धस्सन् । एतेन असुरमोहनाय रामः स्वेच्छयैव सन्दानित इति ज्ञायते ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अयोध्यां गतोऽहं सुमित्रया कृतमुपालम्भम् उक्तप्रकारं सोढुं कथं शक्ष्यामि ॥ ११ ॥ इहैवेत्यर्धम् ॥ १२ ॥ धिगिति । दुष्कृतकर्माणं लक्ष्मणवनानयनमेव दुष्कृतं कर्म ॥ १३ ॥ त्वामिति । स त्वमित्यन्वयः ॥ १४ ॥ १५ ॥ शयान इति । अयमिति शेषः । अत्र शरतल्पस्थानीयोऽस्तगिरिः । शरस्थाने किरणाः । शोणितस्थाने रक्तवर्णत्वम् ॥ १६ ॥ रुजा व्यथा । दृष्टिरागेण वीक्षणप्रेम्णा ॥ १७ ॥ तथैव तेन प्रकारेण, मात्रादिस्नेहमविचार्येत्यर्थः ।

इहैव देहं त्यक्ष्यामि न हि जीवितुमुत्सहे ॥ १२ ॥ धिङ् मां दुष्कृतकर्माणमनार्यं यत्कृते ह्यसौ । लक्ष्मणः पतितः शेते शरतल्पे गतासुवत् ॥ १३ ॥ त्वं नित्यं स विषण्णं मामाश्वासयसि लक्ष्मण । गतासुर्नाद्य शक्नोषि मामार्तमभिभाषितुम् ॥ १४ ॥ येनाद्य निहता युद्धे राक्षसा विनिपातिताः । तस्यामेव क्षितौ वीरः स शेते निहतः परैः ॥ १५ ॥ शयानः शरतल्पेऽस्मिन् स्वशोणितपरिप्लुतः । शरजालैश्चितो भाति भास्करोऽस्तमिव व्रजन् ॥ १६ ॥ बाणाभिहतमर्मत्वान्न शक्नोत्यभिभाषितुम् । रुजा चाब्रुवतोऽप्यस्य दृष्टिरागेण सूच्यते ॥ १७ ॥ यथैव मां वनं यान्तमनुयातो महाद्युतिः । अहमप्यनुयास्यामि तथैवैनं यमक्षयम् ॥ १८ ॥ इष्टबन्धुजनो नित्यं मां च नित्यमनुव्रतः । इमामद्य गतोऽवस्थां ममानार्यस्य दुर्नयैः ॥ १९ ॥ सुरुष्टेनापि वीरेण लक्ष्मणेन न संस्मरे । परुषं विप्रियं वापि श्रावितं तु कदाचन ॥ २० ॥

यमक्षयमित्यत्रापि यान्तमित्यनुषज्यते ॥ १८ ॥ १९ ॥ सुरुष्टेनेति । विप्रियम् अहितम् । सुरुष्टेनापि लक्ष्मणेन श्रावितं विप्रियं परुषं वाक्यं न स्मरामि

यत्योस्सम्परायः " इत्यमरः ॥ ९–१६ ॥ बाणाभिहतेति । रुजा व्यथा ॥ १७ ॥ वनं यान्तं मां यथैव मात्रादिषु स्नेहमकृत्वैव अनुयातः अहमपि एनमनु तथैव मात्रादिस्नेहमकृत्वैव यास्यामीति सम्बन्धः ॥ १८ ॥ १९ ॥ विप्रियम् अहितम् ॥ २० ॥

स०–सुरुष्टेनापि येनकेनचित् । परुषं निष्ठुरम् अप्रियं कदाचन, उक्तमिति शेषः । न संस्मरे न संस्मरामीत्येव श्रावितम् । अन्यथा परुषाप्रियश्रावणापेक्षयाऽन्तर्निगूढस्य रोषस्याल्पता प्रतीयेत । तत्र वैदिकलौकिकाननुकूलमित्येवमेवान्वयः समञ्जसः ॥ २० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यर्थः ॥२०॥ यः कार्तवीर्यः । एकेन वेगेन एकप्रयत्नेन । सहस्रबाहुः कार्तवीर्यः । यावता कालेन पञ्चबाणशतानि विससर्ज प्रायुङ्क्त । द्विभुजोऽप्ययं लक्ष्मणः तावतैव कालेन तावतो बाणान् विसृजन्, इष्वस्त्रेषु विषये तस्मात्कार्तवीर्यादधिक इत्यर्थः ॥२१॥ हन्यात् हन्तुं शक्तः । शकि लिङ् ॥२२॥ यत् यस्मात् । विभीषणो राक्षसानां राजा न कृतः । तस्मात् मिथ्याप्रलप्तम् "राजानं त्वां करिष्यामि" इति मिथ्याप्रलपितं मां प्रधक्ष्यति दहतीत्यर्थः ।

विससर्जैकवेगेन पञ्चबाणशतानि यः । इष्वस्त्रेष्वधिकस्तस्मात् कार्तवीर्याच्च लक्ष्मणः ॥ २१ ॥ अस्त्रैरस्त्राणि यो हन्याच्छक्रस्यापि महात्मनः । सोऽयमुर्व्यां हतः शेते महार्हशयनोचितः ॥ २२ ॥ यन्मया न कृतो राजा राक्षसानां विभीषणः । तच्च मिथ्याप्रलप्तं मां प्रधक्ष्यति न संशयः ॥ २३ ॥ अस्मिन्मुहूर्ते सुग्रीव प्रतियातुमितोऽर्हसि । मत्वा हीनं मया राजन् रावणोऽभिद्रवेद्बली ॥ २४ ॥ अङ्गदं तु पुरस्कृत्य ससैन्यः ससुहृज्जनः । सागरं तर सुग्रीव नीलेन च नलेन च ॥२५॥ कृतं हनुमता कार्यं यदन्यैर्दुष्करं रणे । ऋक्षराजेन तुष्यामि गोलाङ्गूलाधिपेन च ॥ २६ ॥ अङ्गदेन कृतं कर्म मैन्देन द्विविदेन च । युद्धं केसरिणा सङ्ख्ये घोरं सम्पातिना कृतम् ॥ २७ ॥ गवयेन गवाक्षेण शरभेण गजेन च । अन्यैश्च हरिभिर्युद्धं मदर्थे त्यक्तजीवितैः । न चातिक्रमितुं शक्यं दैवं सुग्रीव मानुषैः ॥ २८ ॥ यत्तु शक्यं वयस्येन सुहृदा च परन्तप । कृतं सुग्रीव तत्सर्वं भवता धर्मभीरुणा ॥ २९ ॥ मित्रकार्यं कृतमिदं भवद्भिर्वानरर्षभाः । अनुज्ञाता मया सर्वे यथेष्टं गन्तुमर्हथ ॥ ३० ॥

आश्रुतकार्यनिर्वाहाभावेन मिथ्येत्युच्यते । आश्रुतं प्रतिज्ञातम् ॥२३॥ अस्मिन्निति । प्रतियातुं, किष्किन्धामिति शेषः । हीनं, त्वामिति शेषः ॥२४॥२५॥ कृतमित्यादिसार्धश्लोकत्रयम् । सम्पातिना वानरेण ॥ २६–२८ ॥ वयस्येन मित्रेण । सुहृदा च शोभनहृदयेन वा । चशब्दो वाशब्दार्थकः । धर्म

यः कार्तवीर्यः एकेन वेगेन एकप्रयत्नेन इष्वस्त्रेषु विषये सहस्रबाहुर्यावता कालेन पञ्चबाणशतानि प्रायुङ्क्त अयं द्विबाहुस्तावता कालेन तावतो बाणान् विसृजन् तस्मादधिक इत्यर्थः ॥ २१ ॥ २२ ॥ तन्मिथ्याप्रलप्तं विभीषणमभिषेक्ष्यामीत्येवंरूपो मिथ्याप्रलापः कर्ता ॥ २३ ॥ २४ ॥ अङ्गदमिति । नीलेन नलेन च सहेत्यर्थः ॥ २५–२७ ॥ हरिभिर्युद्धं कृतमिति पूर्वेण सम्बन्धः ॥ २८ ॥ यत्त्विति । अधर्मभीरुणेति छेदः ॥ २९ ॥ ३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भीरुणा धर्मो नश्यतीति भीरुणेत्यर्थः । अधर्मभीरुणेति वा पदच्छेदः ॥ २९ ॥ ३० ॥ शुश्रुवुरिति । वर्तयांचक्रुः प्रवर्तयांचक्रुः । कृष्णतरेक्षणाः रक्तेक्षणा इत्यर्थः ॥ ३१ ॥ तत इत्यादिश्लोकद्वयम् ॥ ३२ ॥ ३३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनपञ्चाशः सर्गः ॥४९॥ अथ रामस्य नागपाशविमोचनं पञ्चाशे–अथोवाचेत्यादि । तादात्विकसेनापलायननिमित्तमजानानः पृच्छति–किमिति ।

शुश्रुवुस्तस्य ते सर्वे वानराः परिदेवनम् । वर्तयाञ्चक्रुरश्रूणि नेत्रैः कृष्णेतरेक्षणाः ॥ ३१ ॥ ततः सर्वाण्यनीकानि स्थापयित्वा विभीषणः । आजगाम गदापाणिस्त्वरितो यत्र राघवः ॥ ३२ ॥ तं दृष्ट्वा त्वरितं यान्तंनीलाञ्जनचयोपमम् । वानरा दुद्रुवुः सर्वे मन्यमानास्तु रावणिम्* ॥ ३३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनपञ्चाशः सर्गः ॥ ४९ ॥

अथोवाच महातेजा हरिराजो महाबलः । किमियं व्यथिता सेना मूढवातेव नौर्जले ॥ १ ॥ सुग्रीवस्य वचः श्रुत्वा वालिपुत्रोऽङ्गदोऽब्रवीत् ॥ २ ॥ न त्वं पश्यसि रामं च लक्ष्मणं च महाबलम् । शरजालाचितौ वीरावुभौ दशरथात्मजौ । शरतल्पे महात्मानौ शयानौ रुधिरोक्षितौ ॥ ३ ॥ अथाब्रवीद्वानरेन्द्रः सुग्रीवः पुत्रमङ्गदम् । नानिमित्तमिदं मन्ये भवितव्यं भयेन तु ॥ ४ ॥

किं किमर्थम् । उवाच, वानरानिति शेषः । मूढः मूर्च्छितः । विरुद्धदिग्वाय्वन्तराभिहत इत्यर्थः । वात्याहतेति यावत् ॥ १ ॥ सुग्रीवस्येत्यर्धम् ॥ २ ॥ रामव्यथां विना किमन्यन्निमित्तमित्युत्तरयति–न त्वमिति । अत्र काकुः । त्वं न पश्यसि किमित्यर्थः । रामं लक्ष्मणं चेत्युभावित्यन्वयः ॥ ३ ॥ स्वयमुद्घाटयति–

तस्य रामस्य । कृष्णेतरेक्षणा रक्तेक्षणा इत्यर्थः । नेत्रैरश्रूणि वर्तयाञ्चक्रुः नेत्रैरश्रूणि मुमुचुरित्यर्थः ॥ ३१–३३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायामेकोनपञ्चाशः सर्गः ॥ ४९ ॥ अथेति । मूढवातेन मूढो मूर्च्छितो विरुद्धदिग्वायुः तादृशो यस्यास्सा, वात्याभिहतेति यावत् ॥ १ ॥ २ ॥ त्वं न पश्यसि किं ? पश्यता त्वयैवं वक्तुमयुक्तमिति भावः ॥३॥ तदानीन्तनकपिपलायनहेतुप्रश्नरूपवाक्याभिप्रायमजानताऽङ्गदेन विपरीतोत्तरे

स०–इदं कपिपलायनम् अनिमित्तम् अकारणकं न मन्ये । पलायनप्रयोजकेन भयेन त्वदुक्तेतरेण भवितव्यमित्यङ्गदमब्रवीत् ॥ ४ ॥

---

* निश्चेष्टौ विगतज्ञानौ रणरेणुसमुक्षितौ । शयानौ शरतल्पस्थौ द्रष्टुमायाद्विभीषणः ॥ तं राक्षसेन्द्रात्मजशङ्कया ते निपातितौ राजसुतौ च दृष्ट्वा । विभीषणं विव्यथिरे च दृष्ट्वा मेघा यथा वायुहताः प्लवङ्गमाः ॥ इ०अ० ।

For Private And Personal Use Only

अथेत्यादिना। इदं रघुसिंहयोः शरतल्पशयनम् अनिमित्तं न भवतीति मन्ये। अन्येन भयनिमित्तेन भवितव्यमित्यर्थः॥४॥तत्र हेतुमाह–विषण्णेत्यादिना।

विषण्णवदना ह्येते त्यक्तप्रहरणा दिशः। प्रपलायन्ति हरयस्त्रासादुत्फुल्ललोचनाः ॥ ५ ॥ अन्योन्यस्य न लज्जन्ते न निरीक्षन्ति पृष्ठतः। विप्रकर्षन्ति चान्योन्यं पतितं लङ्घयन्ति च ॥ ६ ॥ एतस्मिन्नन्तरे वीरो गदापाणिर्विभीषणः। सुग्रीवं वर्धयामास राघवं च निरैक्षत ॥ ७ ॥ विभीषणं तं सुग्रीवो दृष्ट्वा वानरभीषणम्। ऋक्षराजं समीपस्थं जाम्बवन्तमुवाच ह ॥ ८ ॥ विभीषणोऽयं सम्प्राप्तो यं दृष्ट्वा वानरर्षभाः। विद्रवन्ति परित्रस्ता रावणात्मजशङ्कया ॥ ९ ॥ शीघ्रमेतान् सुसन्त्रस्तान् बहुधा विप्रधावितान्। पर्यवस्थापयाख्याहि विभीषणमुपस्थितम् ॥ १० ॥ सुग्रीवेणैवमुक्तस्तु जाम्बवानृक्षपार्थिवः। वानरान् सान्त्वयामास सन्निरुध्य प्रधावतः ॥ ११ ॥ ते निवृत्ताः पुनः सर्वे वानरास्त्यक्तसम्भ्रमाः। ऋक्षराजवचः श्रुत्वा तं च दृष्ट्वा विभीषणम् ॥ १२ ॥ विभीषणस्तु रामस्य दृष्ट्वा गात्रं शरैश्चितम्। लक्ष्मणस्य च धर्मात्मा बभूव व्यथितेन्द्रियः ॥ १३ ॥ जलक्लिन्नेन हस्तेन तयोर्नेत्रे प्रमृज्य च। शोकसम्पीडितमना रुरोद विललाप च ॥१४॥ इमौ तौ सत्त्वसम्पन्नौ विक्रान्तौ प्रियसंयुगौ। इमामवस्थां गमितौ राक्षसैः कूटयोधिभिः ॥ १५ ॥ भ्रातुः पुत्रेण मे तेन दुष्पुत्रेण दुरात्मना। राक्षस्या जिह्मया बुद्ध्या चालितावृजुविक्रमौ ॥ १६ ॥

त्यक्तप्रहरणाः त्यक्तशिलाद्यायुधाः। अन्योन्यस्य अन्योन्यम्। विप्रकर्षन्ति द्रुतगमनार्थमाकर्षन्ति ॥५–९॥ विप्रधावितान् पलायमानान् ॥ १०–१५ ॥ दुष्पुत्रेण कपटयुद्धेन पितुरयशावहेन। चालितौ वञ्चितौ। ऋजुविक्रमौ अकपटविक्रमौ ॥ १६ ॥

दत्ते सुग्रीवः स्वाभिप्रायमुद्घाटयति–अथेत्यादि। इदं रघुसिंहयोश्शरतल्पशयनमनिमित्तं न भवतीति मन्ये किन्तु भयेनान्यभयहेतुनाऽत्र भवितव्यमित्यर्थः। यद्वा इदं पलायनमनिमित्तं न मन्ये निमित्तशून्यं न मन्ये, किन्तु भयेन अपूर्वभयनिमित्तेनात्र भवितव्यमित्यर्थः ॥ ४–२१ ॥

स०–त्रासात् नूतनभीतेः ॥ ५ ॥ वानरभीषणम् इन्द्रजिद्भ्रमजनकतया ॥ ८ ॥ भ्रातुः रावणस्य पुत्रेण। नोभयोः पितापुत्रयोरैवैतादृक्कूटयोधित्वं किन्तु परम्परैवेदृशीत्याह–दुष्पुत्रेणेति। दुर्दुष्टः पुत्रो यस्यासौ तथा ॥ १६ ॥

सुप्तौ सुप्तसदृशौ। शल्यकौ कण्टकिवराहौ ॥ १७॥ ययोरित्यादिचतुःश्लोकी। अत्र वक्तव्यं सर्वमभयप्रदाने दर्शितम् ॥ १८–२१ ॥ न रुजापीडितौ

शरैरिमावलं विद्धौ रुधिरेण समुक्षितौ। वसुधायामिमौ सुप्तौ दृश्येते शल्यकाविव ॥ १७॥ ययोर्वीर्यमुपाश्रित्य प्रतिष्ठा काङ्क्षिता मया। तावुभौ देहनाशाय प्रसुप्तौ पुरुषर्षभौ ॥ १८ ॥ जीवन्नद्य विपन्नोऽस्मि नष्टराज्यमनोरथः। प्राप्तप्रतिज्ञश्च रिपुः सकामो रावणः कृतः ॥ १९ ॥ एवं विलपमानं तं परिष्वज्य विभीषणम्। सुग्रीवः सत्त्वसम्पन्नो हरिराजोऽब्रवीदिदम् ॥ २० ॥ राज्यं प्राप्स्यसि धर्मज्ञ लङ्कायां नात्र संशयः। रावणः सह पुत्रेण सकामं नेह लप्स्यते ॥ २१ ॥ न रुजापीडितावेतावुभौ राघवलक्ष्मणौ । त्यक्त्वा मोहं वधिष्येते सगणं रावणं रणे ॥ २२ ॥ तमेनं सान्त्वयित्वा तु समाश्वास्य च राक्षसम्। सुषेणं श्वशुरं पार्श्वे सुग्रीवस्तमुवाच ह ॥ २३ ॥ सह शूरैर्हरिगणैर्लब्धसंज्ञावरिन्दमौ। गच्छ त्वं भ्रातरौ गृह्य किष्किन्धां रामलक्ष्मणौ ॥ २४ ॥

इयं रुजा अनयोरात्यन्तिकहानिकरी न भवति। किंतु मोहमात्रकारिणीत्यर्थः ॥ २२–२५ ॥

न रुजा पीडितौ मरणपर्यवसायिरुजा पीडितौ न भवतः, किन्तु मोहमात्रं प्राप्तावित्यर्थः ॥२२॥२३॥ हरिगणैस्सह लब्धसंज्ञौ भ्रातरौ गृह्य गच्छेति सम्बन्धः ॥२४॥२५॥

स०–इमौ अलं विद्धौ इमौ सुप्तावित्यन्वयः पृथक्पृथगिति नान्यतरवैयर्थ्यम्। यद्वा इः कामः तस्यापि मा शोभा याभ्यां तौ। एवमपि शोभा गता नेति भावः। छत्रिन्यायेनेमाविति वा। कामात्कामपालस्योत्पन्नत्वाल्लक्ष्मणस्य वा इमाविति सम्भवति। "इः कामदेवे त्वनव्ययम्" इति विश्वः ॥ १७ ॥ देहनाशाय स्वदेहनाशाय। यद्वा मद्देहनाशाय। एतयोरियानन र्थो यदि तर्हि मम राज्याशीकत्र तिष्ठतु रावणोऽपितु प्राक्तनकोपेन मारयेदिति द्योतयत्यनेनेति ज्ञेयम् ॥ १८ ॥ प्रतिज्ञायत इति प्रतिज्ञा प्रतिज्ञातोऽर्थः सीतापरित्यागाभावरूपः प्राप्तो येन स तथा। सकामः मन्नाशेन निष्कण्टकराज्यप्राप्त्या कृतः। अनयोरेवं करणेनेति शेषः ॥ १९ ॥ विलपमानं विलपन्तम्। पदव्यत्यासेन विलापफलकस्य विभीषणोत्प्रेक्षितस्य व्यत्यासं कविरागमयामासेति ज्ञेयम् ॥ २० ॥ गरुडाधिष्ठितावेतौ इति पाठः। गरुडाधिष्ठितौ गरुडे अधिष्ठितौ गरुडवाहनौ रामश्च। अधिष्ठानमधिष्ठितं गरुडस्यैवाधिष्ठानं यस्येति चान्यश्चेति गरुडाधिष्ठितौ रामलक्ष्मणौ। मोहं नागपाशासादनजम्। अयमेव पाठो न्याय्यः। गरुडागमनेन नागपाशवियोगस्याग्रोत्तरत्रेव बहुपुराणेषु श्रवणात्। तानि च स्वावसरे वक्ष्यामः। 'न रुजा पीडिताविति पठित्वा' इति तीर्थपाठस्य तदुत्प्रेक्षितत्वं व्यवस्थनागोजिभट्टः स्वयं पाठान्तं गरुडाधिष्ठितौ इति पठित्वा 'गरुडोपासकतया विदितौ' इति निर्मूलमर्थं वदंस्तादृश एवेति सन्तोष्टव्यम् ॥ २२ ॥ उत्तरश्लोकद्वयमेकान्वयि। राक्षसं विभीषणम्। सान्त्वयित्वा सुषेणं च समाश्वास्य च गच्छेत्यब्रवीदिति च सम्बन्धः। एतेनान्यतरातिरेकशङ्कया 'सान्त्वयित्वेत्यस्यैवार्थकथनं समाश्वास्य त्विति' इति वदतो नागोजिभट्टस्य बहुस्थलेषु त्रिचतुरादीनां श्लोकानामेकान्वयं ब्रुवतोऽन्वयज्ञानदारिद्र्यं द्योत्यते। 'सान्त्वयित्वा गरुडानुग्रहसम्भावनयेत्यर्थः। अनेन सुग्रीववाक्येन रामविषये स्वस्य भगवदवतारत्वज्ञानं सूचितम्' इति तद्वचनं 'गरुडोपासकतया विदितौ' इति 'गरुडानुग्रहसम्भावनया' इति स्ववचनव्याहतमित्युपेक्ष्यम्। तेन भगवदवतारत्वहेतोरुपासकत्वस्य तदनुग्रहपात्रत्वस्यैव च प्रतीतेः ॥ २३ ॥ २४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनुभूतं मया ज्ञातम् । शरसंस्पर्शकोविदाः शरप्रयोगसमर्थाः । स्पर्शो दानमिति पर्यायः ॥ २६ ॥ २७ ॥ तानिति । मन्त्रयुक्ताभिः मन्त्रप्रचुराभिः । विद्याभिर्मृतसञ्जीविनीप्रभृतिभिः । चिकित्सति अचिकित्सत ॥ २८ ॥ तान्यौषधानीत्यादिसार्धश्लोकः । स्पष्टः ॥ २९ ॥ संजीवकरणीमित्यर्धमेकं वाक्यम् । अत्रानयितुं यान्त्वित्यनुषज्यते । पूर्वोक्तक्षीरोदमध्ये संजीवकरणीं विशल्यां चानयितुं यान्त्वित्यर्थः । तयोरेवात्रोपयोगा

अहं तु रावणं हत्वा सपुत्रं सहबान्धवम् । मैथिलीमानयिष्यामि शक्रो नष्टामिव श्रियम् । श्रुत्वैतद्वानरेन्द्रस्य सुषेणो वाक्यमब्रवीत् ॥ २५ ॥ दैवासुरं महद्युद्धमनुभूतं सुदारुणम् । तदा स्म दानवा देवान् शरसंस्पर्शकोविदाः ॥ २६ ॥ निजघ्नुः शस्त्रविदुषश्छादयन्तो मुहुर्मुहुः ॥ २७ ॥ तानार्तान्नष्टसंज्ञांश्च परासूंश्च बृहस्पतिः । विद्याभिर्मन्त्रयुक्ताभिरोषधीभिश्चिकित्सति ॥ २८ ॥ तान्यौषधान्यानयितुं क्षीरोदं यान्तु सागरम् । जवेन वानराः शीघ्रं सम्पातिपनसादयः । हरयस्तु विजानन्ति पार्वतीस्ता महौषधीः ॥ २९ ॥ सञ्जीवकरणीं दिव्यां विशल्यां देवनिर्मिताम् ॥ ३० ॥ चन्द्रश्च नाम द्रोणश्च क्षीरोदे सागरोत्तमे । अमृतं यत्र मथितं तत्र ते परमौषधी ॥ ३१ ॥ अयं वायुसुतो राजन् हनुमांस्तत्र गच्छतु ॥ ३२ ॥

दिति भावः ॥ ३० ॥ ते कुत्र विद्येते इत्यत्राह–चन्द्रश्चेत्यादिना । सागरोत्तमे क्षीरोदे यत्र प्रदेशे अमृतं मथितं तत्र चन्द्रद्रोणाख्यौ पर्वतौ स्तः तयोस्ते महौषधी स्त इत्यर्थः । तत्रावस्थाने हेतुमाह ते तत्रेति । पर्वते पर्वतयोः जात्येकवचनम् ॥ ३१ ॥ अयमित्यर्धम् । औषध्यन्तरानयने पनसादयो गच्छन्तु । संजीवविशल्यानयने तु हनुमान् गच्छत्विति विज्ञेयम् ॥ ३२ ॥

शरसंस्पर्शकोविदाः शरैः संस्पर्शो लक्ष्यवेधनं तत्र कोविदाः ॥ २६ ॥ २७ ॥ मन्त्रयुक्ताभिः मन्त्रप्रचुराभिरित्यर्थः । विद्याभिः मृतसञ्जीविनीप्रभृतिभिर्विद्याभिः परासून्नष्टप्राणान् चिकित्सति अचिकित्सत ॥ २८ ॥ २९ ॥ सञ्जीवकरणीमित्यर्धमेकं वाक्यम् । अत्रानयितुं यान्त्वित्यनुषज्यते । तत्र तयोरेवोपयोगादिति भावः ॥ ३० ॥ ते कुत्र विद्येते इत्यत्राह–चन्द्रश्चेत्यादि । सागरोत्तमे क्षीरोदे । यत्र प्रदेशे अमृतं मथितं तत्र चन्द्रद्रोणपर्वतौ स्तः तयोस्ते ओषधी स्त इत्यर्थः । तत्रावस्थाने हेतुमाह ते तत्रेति । पर्वते पर्वतप्रदेशे ॥ ३१ ॥ ३२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेघान् सागरतोयं च पर्यस्यन् पर्वतान् कम्पयन्निव, गरुडपक्षवायुरुदभूदिति शेषः ॥ ३३ ॥ सर्वद्वीपमहाद्रुमाः, सर्वपदं द्रुमविशेषणम् । द्वीपं च लङ्का । लवणाम्भसि लवणसमुद्रे ॥ ३४ ॥ भोगिनः प्रशस्तकायाः । तत्रवासिनः लङ्काद्वीपवासिनः । यादांसि जलजन्तवश्च । लवणार्णवं लवणार्णवमध्यम् ।

एतस्मिन्नन्तरे वायुर्मेघांश्चापि सविद्युतः । पर्यस्यन् सागरे तोयं कम्पयन्निव मेदिनीम् ॥ ३३ ॥ महता पक्षवातेन सर्वद्वीपमहाद्रुमाः । निपेतुर्भिन्नविटपाः समूला लवणाम्भसि ॥३४॥ अभवन् पन्नगास्त्रस्ता भोगिनस्तत्रवासिनः । शीघ्रं सर्वाणि यादांसि जग्मुश्च लवणार्णवम् ॥ ३५ ॥ ततो मुहूर्ताद्गरुडं वैनतेयं महाबलम् । वानरा ददृशुः सर्वे ज्वलन्तमिव पावकम् ॥ ३६ ॥ तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः । यैस्तौ सत्पुरुषौ बद्धौ शरभूतैर्महाबलौ ॥३७॥ ततः सुपर्णः काकुत्स्थौ दृष्ट्वा प्रत्यभिनन्दितः । विममर्श च पाणिभ्यां मुखे चन्द्रसमप्रभे ॥३८॥ वैनतेयेन संस्पृष्टास्तयोः संरुरुहुर्व्रणाः । सुवर्णे च तनू स्निग्धे तयोराशु बभूवतुः ॥ ३९ ॥ तेजो वीर्यं बलं चौज उत्साहश्च महागुणः । प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणं तयोः ॥ ४० ॥

भयादन्तर्मग्नाः इत्यर्थः ॥ ३५–३८ ॥ व्रणाः क्षतानि । संरुरुहुः संरूढाः, अज्ञातस्वरूपा बभूवुरित्यर्थः ॥ ३९ ॥ तेजः पराभिभवनसामर्थ्यम् पराधिक्षेपासहनं वा । वीर्यं पराक्रमः । बलं शारीरम् । ओजः कान्तिः । उत्साहः लोकोत्तरकार्येषु स्थिरतरप्रयत्नः । प्रदर्शनं सूक्ष्मार्थपरिज्ञानम् । बुद्धिः विवेकः । स्मृतिः अनुभूतार्थाविस्मरणम् । एतत् सर्वं द्विगुणं वैनतेयसंस्पर्शवशात् पूर्वतोऽप्यधिकं जातमित्यर्थः । अत्र धिरिति गायत्र्याः सप्तदशा

एतस्मिन्निति । सविद्युतो मेघान् सागरे तोयं च पर्यस्य परित उत्क्षिप्य पर्वतान् कम्पयन्निव, पक्षवायुरुदभूदिति शेषः ॥३३॥ पक्षवातेन निमित्तेन द्रुमाः निपेतुरिति सम्बन्धः ॥३४॥ भोगिनो महाकायाः । तत्रवासिनः समुद्रवासिनः । लवणार्णवमाजग्मुः, भयादन्तर्मग्ना इत्यर्थः ॥३५–३८॥ व्रणाः क्षतानि । संरुरुहुः संरूढाः तयोस्तनू सुवर्णे स्निग्धे च बभूवतुः । तयोस्तच्छरीरे व्रणात्यन्ताभावाधिकरणे इवाभूतामित्यर्थः ॥ ३९ ॥ तेजः पराभिभवनसामर्थ्यम् । वीर्यं पराक्रमः । बलं शारीरमलम् । ओजः कान्तिः । उत्साहः उत्तरोत्तरकार्येषु स्थिरतरप्रयत्नः । अत्र धिरिति गायत्र्याःसप्तदशाक्षरं प्रदर्शनं चेत्यस्य श्लोकस्य सप्तमाक्षरेण धीत्यनेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षरम् । षोडशसहस्रश्लोका गताः ॥ ४० ॥ ताविति । क्रियाभेदात्तच्छब्दद्वयम् ॥ ४१ ॥ व्यतिक्रान्तौ लङ्घितवन्तौ । गत्यर्थत्वात् कर्तरि क्तः ॥ ४२ ॥ ४३ ॥ विरजे निर्मले ॥ ४४ ॥ ४५ ॥ सखा वाहनत्वेन सहाय इति गूढोक्तिः । युवाभ्यां युवयोः । षष्ठ्यर्थे तृतीया । साह्यकारणात् साहाय्या

तावुत्थाप्य महावीर्यौ गरुडो वासवोपमौ । उभौ तौ सस्वजे हृष्टो रामश्चैनमुवाच ह ॥ ४१ ॥ भवत्प्रसादाद्व्यसनं रावणिप्रभवं महत् । आवामिह व्यतिक्रान्तौ पूर्ववद्बलिनौ कृतौ ॥ ४२ ॥ यथा तातं दशरथं यथाऽजं च पितामहम् । तथा भवन्तमासाद्य हृदयं मे प्रसीदति ॥ ४३ ॥ को भवान् रूपसम्पन्नो दिव्यस्रगनुलेपनः । वसानो विरजे वस्त्रे दिव्याभरणभूषितः ॥४४॥ तमुवाच महातेजा वैनतेयो महाबलः । पतत्रिराजः प्रीतात्मा हर्षपर्याकुलेक्षणः ॥ ४५ ॥ अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः । गरुत्मानिह सम्प्राप्तो युवाभ्यां साह्यकारणात् ॥ ४६ ॥ असुरा वा महावीर्या दानवा वा महाबलाः । सुराश्चापि सगन्धर्वाः पुरस्कृत्य शतक्रतुम् ॥ ४७ ॥ नेमं मोक्षयितुं शक्ताः शरबन्धं सुदारुणम् । मायाबलादिन्द्रजिता निर्मितं क्रूरकर्मणा ॥ ४८ ॥ एते नागाः काद्रवेयास्तीक्ष्णदंष्ट्रा विषोल्बणाः । रक्षोमायाप्रभावेन शरा भूत्वा त्वदाश्रिताः ॥ ४९ ॥

र्थम् ॥ ४६–४८ ॥ काद्रवेयाः कद्रूपुत्राः । मायाबलात् आश्चर्यशक्तिरूपबलात् ॥ ४९ ॥ ५० ॥

सङ्गृह्णाति । मदर्शनं सूक्ष्मार्थविषयज्ञानम् । बुद्धिः अध्यवसायः, स्मृतिरनुभूतार्थाविस्मरणम् । एतदादिकं सर्वं द्विगुणं वैनतेयस्पर्शात्पूर्वतोप्यधिकं जातमित्यर्थः ॥ ४० ॥ ४१ ॥ व्यतिक्रान्तौ लङ्घितवन्तौ ॥ ४२ ॥ ४३ ॥ विरजे निर्मले वस्त्रे वसानः ॥ ४४॥४५ ॥ युवाभ्यामिति षष्ठ्यर्थे तृतीया ॥ ४६–४८ ॥ काद्रवेयाः

स०–तं ते इति पूर्वमुक्तवतो गरुडस्य सेवकस्य त इत्युक्तौ जिह्वा जिहेतीति सूचयति युवयोरित्युक्त्या । एवं सति सति च च्छत्रिन्यायावकाशे न प्रत्यवेयाद्वैनतेय इति भावोऽपि कवेर्ज्ञातव्यः । सखित्वं त्वत्रोत्तरत्रेव–" विष्णुना च तदाकाशे वैनतेयस्समेयिवान् । तस्य नारायणस्तुष्टस्तेनालौल्येन कर्मणा । तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरम् । स वव्रे तव तिष्ठेयमुपरीत्यन्तरिक्षगः । उवाच चैनं भूयोऽपि नारायणमिदं वचः । अजरश्चामरश्च स्याममृतेन विनाप्यहम् । एवमस्त्विति तं विष्णुरुवाच विनतासुतम् । प्रतिगृह्य वरौ तौ तु गरुडो विष्णुमब्रवीत् । भवतेऽपि वरं दद्मि वृणोतु भगवानपि । तं वव्रे वाहनं विष्णुर्गरुत्मन्तं महाबलम् । ध्वजं च चक्रे भगवानुपरि स्थास्यसीति तम् । एवमस्त्विति तं देवमुक्त्वा नारायणं खगः । वव्राज" इति भारतादिपर्वसौपर्णाख्याने चोक्तमनुसन्धेयम् । इदं सर्वं भक्तभक्तिपारवश्येनेति मन्तव्यम् ॥ ४६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहसा जवेन ॥ ५१ ॥ अप्रमादश्च कर्तव्य इति । तत्तदवस्थानुगुणभत्यस्त्रप्रयोगेषु सावधानाभ्यां भवितव्यमित्यर्थः ॥ ५२ ॥ प्रकृत्येत्यादिश्लोकद्वयम् । एतेनैवोपमानेनेति । अनेन दृष्टान्तेन राक्षसा जिह्मा ज्ञेया इत्यर्थः ॥ ५३–५५ ॥ सख इति । रिपूणामपि वत्सलेत्यनेन इन्द्रजिद्वधोपायो

सभाग्यश्चासि धर्मज्ञ राम सत्यपराक्रम । लक्ष्मणेन सह भ्रात्रा समरे रिपुघातिना ॥ ५० ॥ इमं श्रुत्वा तु वृत्तान्तं त्वरमाणोऽहमागतः । सहसा युवयोः स्नेहात् सखित्वमनुपालयन् ॥ ५१ ॥ मोक्षितौ च महाघोरादस्मात् सायकबन्धनात् । अप्रमादश्च कर्तव्यो युवाभ्यां नित्यमेव हि ॥ ५२ ॥ प्रकृत्या राक्षसाः सर्वे सङ्ग्रामे कूटयोधिनः । शूराणां शुद्धभावानां भवतामार्जवं बलम् ॥ ५३ ॥ तन्न विश्वसितव्यं वो राक्षसानां रणाजिरे । एतेनैवोपमानेन नित्यं जिह्मा हि राक्षसाः ॥ ५४ ॥ एवमुक्त्वा ततो रामं सुपर्णः सुमहाबलः । परिष्वज्य सुहृत् स्निग्धमाप्रष्टुमुपचक्रमे ॥ ५५ ॥ सखे राघव धर्मज्ञ रिपूणामपि वत्सल । अभ्यनुज्ञातुमिच्छामि गमिष्यामि यथागतम् ॥ ५६ ॥ न च कौतूहलं कार्यं सखित्वं प्रति राघव । कृतकर्मा रणे वीरः सखित्वमनुवेत्स्यसि ॥ ५७ ॥ बालवृद्धावशेषां तु लङ्कां कृत्वा शरोर्मिभिः । रावणं च रिपुं हत्वा सीतां समुपलप्स्यसे ॥ ५८ ॥

न ज्ञात इति द्योत्यते ॥ ५६ ॥ "अहं सखा ते काकुत्स्थ" इत्यादिनोक्तं सखित्वं कथमिति रामाशयमाशङ्क्य रहस्यत्वादिदानीं तद्विषयप्रश्नो न कर्तव्यः, रावणवधानन्तरं स्वयमेव ज्ञास्यसीत्याह–न चेति । सखित्वं प्रति सखित्वप्रश्नं प्रतीत्यर्थः ॥ ५७ ॥ रामस्योत्साहवर्धनाय भाविनमर्थं

कद्रूपुत्राः ॥ ४९–५१ ॥ अप्रमादश्च कर्तव्यः तत्रतत्रानुगुणमत्यस्त्रप्रयोगेषु सावधानाभ्यां भवितव्यमित्यर्थः । एतेनैवोपमानेन दृष्टान्तेन राक्षसा जिह्मा इति ज्ञेया इत्यर्थः ॥ ५२–५६ ॥ 'अहं सखा ते काकुत्स्थ' इत्यादिनोक्तं सखित्वं कथमिति रामाभिप्रायमाशङ्क्य रहस्यत्वादिदानीं तद्विषयप्रश्नो न कर्तव्यः । रावणवधानन्तरं स्वयमेव ज्ञास्यसीत्याह–न चेति ॥ ५७–६१ ॥

For Private And Personal Use Only

कथयति—चालेत्यादिना । शरोर्मिभिः शरपरम्पराभिः ॥ ५८ ॥ शीघ्रविक्रमः शीघ्रगतिः । क्रियाभेदेन सुपर्णपदद्वयान्वयः ॥ ५९॥६० ॥ विरुजाविति । सिंहनादं नेदुः सिंहनादं चक्रुरित्यर्थः । दुधुवुः अकम्पयन् ॥ ६१ ॥ तत इति । यथापुरं यथापूर्वम् । ननु "पिशाचान् दानवान् यक्षान् पृथिव्यां चैव राक्षसान् । अङ्गुल्यग्रेण तान् हन्याम्" इत्युक्तनिरवधिकशक्तिसम्पन्नः सर्वज्ञो रामः कथमज्ञ इवाशक्त इवेन्द्रजिता हतो लोहिताक्तो भूमौ स्थित इवाभाव

इत्येवमुक्त्वा वचनं सुपर्णः शीघ्रविक्रमः । रामं च विरुजं कृत्वा मध्ये तेषां वनौकसाम् ॥५९॥ प्रदक्षिणं ततः कृत्वा परिष्वज्य च वीर्यवान् । जगामाकाशमाविश्य सुपर्णः पवनो यथा ॥६०॥ विरुजौ राघवौ दृष्ट्वा ततो वानरयूथपाः । सिंहनादांस्तदा नेदुर्लाङ्गूलान् दुधुवुस्तदा ॥ ६१ ॥ ततो भेरीः समाजघ्नुर्मृदङ्गांश्चाप्यनादयन् । दध्मुः शङ्खान् सम्प्रहृष्टाः क्ष्वेलन्त्यपि यथापुरम् ॥ ६२ ॥ आस्फोट्यास्फोट्य विक्रान्ता वानरा नगयोधिनः । द्रुमानुत्पाट्य विविधांस्तस्थुः शतसहस्रशः ॥ ६३ ॥ विसृजन्तो महानादांस्त्रासयन्तो निशाचरान् । लङ्काद्वाराण्युपाजग्मुर्योद्धुकामाः प्लवङ्गमाः ॥६४॥ ततस्तु भीमस्तुमुलो निनादो बभूव शाखामृगयूथपानाम् । क्षये निदाघस्य यथा घनानां नादः सुभीमो नदतां निशीथे ॥ ६५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे पञ्चाशः सर्गः ॥ ५० ॥

यत् ? उच्यते; लोके समाचारप्रवर्तनायैवं स्थितः । इन्द्रजित्पराजयेन ह्ययमर्थोऽवगम्यते—शुचीनां शुद्धभावानामृजूनां प्राणसन्देहदायिविपद्यपि न विनाशः । विपरीतानां पापिष्ठानां तु करतलगताऽपि कार्यसिद्धिर्विगलति । अतः शुचित्वार्जवादिगुणयुक्तैः पुम्भिर्भवितव्यमिति सतां धर्मनिश्चयप्रतिपत्तिर्जायते । ननु रावणवधार्थं देवतैरर्थितो हि विष्णू रामत्वेनावतीर्णः । सत्यम्, दुष्कृद्विनाशवद्धर्मसंस्थापनमपि ह्यवतारप्रयोजनम् । रावणवधमात्रस्य प्रयोजनत्वे ह्येतावान् प्रयासो व्यर्थः स्यात् । अत एवोक्तम्—" चातुर्वर्ण्यं च लोकेऽस्मिन् स्वे स्वे धर्मे नियोक्ष्यति " इति । नच धर्मोपदेशमात्रेण तत्सिद्धिः । तादृशोपदेशस्य श्रुतिस्मृतिभिरेव कृतत्वात् । स्वाचारमुखेन धर्मप्रवचनाय हि मानुषभावना च कृता । अतः स्वाचारमुखेन धर्मप्रवर्तनमित्यादि प्रबन्धादावेवोक्तम् ॥ ६२–६५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चाशः सर्गः ॥ ५० ॥

यथापुरं यथापूर्वम् ॥ ६२–६४ ॥ निशीथे अर्धरात्रे ॥६५॥ इति श्रीमहेश्वरतीर्थविर० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चाशः सर्गः ॥ ५० ॥

अथ धूम्राक्षनिर्गम एकपञ्चाशे–तेषामित्यादि । राक्षसैः सह शुश्रावेत्यन्वयः ॥ १ ॥ निर्घोषः ध्वनिः ॥ २ ॥ यथाऽसावित्यादिसार्धश्लोक एकान्वयः । यथा येन प्रकारेण । सुमहानादः समुत्थितः ततः एतेषां सुमहती प्रीतिः, अस्तीति शेषः ॥ ३ ॥ तथा हीत्यर्थम् । तथा प्रसिद्धप्रकारः ॥ ४ ॥ तौ त्विति ।

तेषां सुतुमुलं शब्दं वानराणां तरस्विनाम् । नदतां राक्षसैः सार्धं तदा शुश्राव रावणः ॥ १ ॥ स्निग्धगम्भीरनिर्घोषं श्रुत्वा स निनदं भृशम् । सचिवानां ततस्तेषां मध्ये वचनमब्रवीत् ॥२॥ यथाऽसौ सम्प्रहृष्टानां वानराणां समुत्थितः । बहूनां सुमहानादो मेघानामिव गर्जताम् । व्यक्तं सुमहती प्रीतिरेतेषां नात्र संशयः ॥ ३ ॥ तथा हि विपुलैर्नादैश्चुक्षुभे वरुणालयः ॥ ४ ॥ तौ तु बद्धौ शरैस्तीक्ष्णैर्भ्रातरौ रामलक्ष्मणौ । अयं च सुमहान्नादः शङ्कां जनयतीव मे ॥ ५ ॥ एतत्तु वचनं चोक्त्वा मन्त्रिणो राक्षसेश्वरः । उवाच नैर्ऋतांस्तत्र समीपपरिवर्तिनः ॥ ६ ॥ ज्ञायतां तूर्णमेतेषां सर्वेषां वनचारिणाम् । शोककाले समुत्पन्ने हर्षकारणमुत्थितम् ॥ ७ ॥ तथोक्तास्तेन सम्भ्रान्ताः प्राकारमधिरुह्य ते । ददृशुः पालितां सेनां सुग्रीवेण महात्मना ॥ ८ ॥ तौ च मुक्तौ सुघोरेण शरबन्धेन राघवौ । समुत्थितौ महावेगौ विषेदुः प्रेक्ष्य राक्षसाः ॥ ९ ॥ सन्त्रस्तहृदयाः सर्वे प्राकारादवरुह्य ते । विषण्णवदना घोरा राक्षसेन्द्रमुपस्थिताः ॥ १० ॥ तदप्रियं दीनमुखा रावणस्य निशाचराः । कृत्स्नं निवेदयामासुर्यथावद्वाक्यकोविदाः ॥ ११ ॥

तुशब्दश्चार्थः । तौ च बद्धौ नादश्च श्रूयते । स च प्रकृतविरुद्धो नादः । शङ्कां राजपुत्रयोः शरबन्धापगमशङ्काम् जनयतीव । इवशब्दः सम्भावनायाम् ॥ ५ ॥ ६ ॥ ज्ञायतामिति । उत्थितं हर्षकारणं ज्ञायतामित्यन्वयः ॥ ७–९ ॥ उपस्थिताः प्राप्ताः ॥ १० ॥ ११ ॥

तेषामिति । राक्षसैः विभीषणादिभिः ॥ १ ॥ स्निग्धगम्भीरनिर्घोषम् एतेन सीतापतिपतनकालिकदुःखशब्दो व्यावर्त्यते । निनदं निरस्तो नद्योऽर्णवो येन तम् । तदपेक्षया गम्भीरमिति यावत् ॥ २ ॥ यथा यतः कारणादित्यर्थः । संप्रहृष्टानां बहूनां वानराणां महान् असौ नादः समुत्थितः अतः कारणादेतेषां व्यक्तं सुमहती प्रीतिः, जानेति शेषः । नात्र संशयः ॥ ३ ॥ नादश्रवणमात्रेण कथं तेषां प्रीतिरनुमीयत इत्यत आह–तथा हीत्यादिसार्धश्लोकेन । यतः रामलक्ष्मणौ शरैर्बद्धौ

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यौ तौ, याविित्यर्थः । पाशानिति । पाशान् छित्त्वा स्थितौ गजाविव भासमानावित्यर्थः ॥ १२–१४ ॥ घोरैरित्यादि । दत्तवरैः वरदत्तैः । प्रमथ्य बलात्कृत्य। बद्धौ, अभूतामिति शेषः । संशयस्थं प्राणसंशयस्थम् । आदत्तम् आत्तम् ॥ १५–१८ ॥ बलेनेति । त्वं वधायाभिनिर्याहीत्यमङ्गलसूचकं

यौ ताविन्द्रजिता युद्धे भ्रातरौ रामलक्ष्मणौ । निबद्धौ शरबन्धेन निष्प्रकम्पभुजौ कृतौ ॥ १२ ॥ विमुक्तौ शरबन्धेन तौ दृश्येते रणाजिरे । पाशानिव गजौ छित्त्वा गजेन्द्रसमविक्रमौ ॥ १३ ॥ तच्छ्रुत्वा वचनं तेषां राक्षसेन्द्रो महाबलः । चिन्ताशोकसमाक्रान्तो विषण्णवदनोऽब्रवीत् ॥ १४ ॥ घोरैर्दत्तवरैर्बद्धौ शरैराशीविषोपमैः । अमोघैः सूर्यसङ्काशैः प्रमथ्येन्द्रजिता युधि ॥ १५ ॥ तदस्त्रबन्धमासाद्य यदि मुक्तौ रिपू मम । संशयस्थमिदं सर्वमनुपश्याम्यहं बलम् ॥ १६ ॥ निष्फलाः खलु संवृत्ताः शरा वासुकितेजसः । आदत्तं यैः सुसङ्ग्रामे रिपूणां मम जीवितम् ॥ १७ ॥ एवमुक्त्वा तु संक्रुद्धो निःश्वसन्नुरगो यथा । अब्रवीद्रक्षसां मध्ये धूम्राक्षं नाम राक्षसम् ॥ १८ ॥ बलेन महता युक्तो रक्षसां भीमविक्रम । त्वं वधायाभिनिर्याहि रामस्य सह वानरैः ॥ १९ ॥ एवमुक्तस्तु धूम्राक्षो राक्षसेन्द्रेण धीमता । कृत्वा प्रणामं संहृष्टो निर्जगाम नृपालयात् ॥ २० ॥ अभिनिष्क्रम्य तद्द्वारं बलाध्यक्षमुवाच ह । त्वरयस्व बलं तूर्णं किं चिरेण युयुत्सतः ॥ २१ ॥ धूम्राक्षवचनं श्रुत्वा बलाध्यक्षो बलानुगः । बलमुद्योजयामास रावणस्याज्ञया द्रुतम् ॥ २२ ॥

वचः ॥ १९ ॥ २० ॥ द्वारमभिनिष्क्रम्य द्वारान्निष्क्रम्य । युयुत्सतः, ममेति शेषः । किं चिरेण किं विलम्बेन ॥ २१ ॥ रावणस्याज्ञया रावणाज्ञाकृतं धूम्राक्षवचनं श्रुत्वेत्यर्थः ॥ २२ ॥

विपुलेर्नादैः वरुणालयश्च चुक्षुभे अतोऽयं नादः शङ्कां रामलक्ष्मणयोर्बन्धविमोचनशङ्काम् । जनयतीव जनयत्येवेत्यर्थः ॥ ४–१५ ॥ संशयस्थं प्राणसंशयस्थम् ॥ १६ ॥ यैः शरैर्मम रिपूणां जीवितमादत्तं ते निष्फलाः संवृत्ता इति सम्बन्धः ॥ १७ ॥ १८ ॥ बलेनेत्यस्य प्राकृतार्थः स्पष्टः । वस्तुतस्तु–बलेन युक्तस्सन् रक्षसां च तव चेत्यध्याहार्यम् । एकदैव रामस्य वानरैः रामसम्बन्धिवानरैरित्यर्थः । वधाय त्वमभिनिर्याहीति सम्बन्धः ॥ १९ ॥ २० ॥ अभिनिष्क्रम्य तद्द्वारं गृहद्वार ॥१५५॥

बद्धघण्टाः शूरत्वज्ञापनाय कटिबद्धघण्टा इत्यर्थः । ते पूर्वोक्तसेनास्थाः । विविधेति । आयुधानि शूलादिभिन्नानि । अस्यार्धस्य पूर्वेणान्वयः ॥२३॥ गदा प्रसिद्धा । पट्टिशः दण्डविशेषः। परिघः भिन्दिपालः । भल्लः अयोमयः शरः । प्रासैः परश्वधैः । दिग्भ्यो जलदा इवेत्यन्वयः ॥ २४ ॥ २५ ॥ अन्ये

ते बद्धघण्टा बलिनो घोररूपा निशाचराः । विगर्जमानाः संहृष्टा धूम्राक्षं पर्यवारयन् । विविधायुधहस्ताश्च शूल मुद्गरपाणयः ॥ २३ ॥ गदाभिः पट्टिशैर्दण्डैरायसैर्मुसलैर्भृशम् ॥ २४ ॥ परिघैर्भिन्दिपालैश्च भल्लैः प्रासैः परश्वधैः । निर्ययू राक्षसा दिग्भ्यो नर्दन्तो जलदा यथा ॥२५॥ रथैः कवचिनस्त्वन्ये ध्वजैश्च समलंकृतैः । सुवर्णजालविहितैः खरैश्च विविधाननैः ॥ २६ ॥ हयैः परमशीघ्रैश्च गजेन्द्रैश्च मदोत्कटैः । निर्ययू राक्षसव्याघ्रा व्याघ्रा इव दुरासदाः ॥२७॥ वृकसिंहमुखैर्युक्तं खरैः कनकभूषणैः । आरुरोह रथं दिव्यं धूम्राक्षः खरनिस्वनः ॥ २८ ॥ स निर्यातो महा वीर्यो धूम्राक्षो राक्षसैर्वृतः । प्रहसन् पश्चिमद्वारं हनूमान् यत्र यूथपः । रथप्रवरमास्थाय खरयुक्तं खरस्वनम् ॥२९॥ प्रयान्तं तु महाघोरं राक्षसं भीमविक्रमम् । अन्तरिक्षगता घोराः शकुनाः प्रत्यवारयन् ॥ ३० ॥ रथशीर्षे महान् भीमो गृध्रश्च निपपात ह । ध्वजाग्रे ग्रथिताश्चैव निपेतुः कुणपाशनाः ॥ ३१ ॥ रुधिरार्द्रो महान् श्वेतः कबन्धः पतितो भुवि । विस्वरं चोत्सृजन्नादं धूम्राक्षस्य समीपतः ॥ ३२ ॥ ववर्ष रुधिरं देवः सञ्चचाल च मेदिनी । प्रति लोमं ववौ वायुर्निर्घातसमनिस्वनः ॥ ३३ ॥ तिमिरौघावृतास्तत्र दिशश्च न चकाशिरे ॥ ३४ ॥ स तूत्पातांस्तदा दृष्ट्वा क्षसानां भयावहान् । प्रादुर्भूतान् सुघोरांश्च धूम्राक्षो व्यथितोऽभवत् ॥ ३५ ॥

कवचिनः । ध्वजैः विविधाननैः खरैश्च समलङ्कृतैः रथैर्निर्ययुः । अन्ये हयैः अन्ये गजैश्च निर्ययुरित्यन्वयः ॥२६–२९॥ शकुनाः निमित्तसूचकाः पक्षिणः ॥३०॥ कुणपाशनाः गृध्राः । ग्रथिताः मिलिताः॥३१॥ रुधिरेति । विस्वरमिति क्रियाविशेषणम्॥३२॥ देवः पर्जन्यः । प्रतिलोमं प्रतिकूलम् ॥३३–३५॥ मतिक्रम्येत्यर्थः । किं चिरेण किं विलम्बेन । गदाभिरित्याद्युपलक्षणे तृतीया ॥ २१–२९ ॥ प्रयान्तमिति । शकुनाः दुश्शकुनाः ॥ ३० ॥ ग्रथिताः मिलिताः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मुमुहुरित्यर्थम् । पुरस्सराः अग्रगाः ॥ ३६ ॥ अभिनिष्क्रम्य, पुरादिति शेषः । महौघकल्पां महानोघोऽस्मिन्निति महौघः सागरः तत्कल्पाम् । बहुवानरीम्, ङीबत्रार्षः । द्वितीयायां प्रातर्धूम्राक्षनिर्गमः ॥ ३७॥ इति श्रीगोविन्द० श्रीरामा० रत्नकिरी० युद्धकाण्डव्याख्याने एकपञ्चाशः सर्गः॥५१॥

मुमुहू राक्षसाः सर्वे धूम्राक्षस्य पुरस्सराः ॥ ३६ ॥ ततः सुभीमो बहुभिर्निशाचरैर्वृतोऽभिनिष्क्रम्य रणोत्सुको बली । ददर्श तां राघवबाहुपालितां महौघकल्पां बहुवानरीं चमूम् ॥ ३७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकपञ्चाशः सर्गः ॥ ५१ ॥

धूम्राक्षं प्रेक्ष्य निर्यान्तं राक्षसं भीमविक्रमम् । विनेदुर्वानराः सर्वे प्रहृष्टा युद्धकाङ्क्षिणः ॥ १ ॥ तेषां सुतुमुलं युद्धं सञ्जज्ञे हरिरक्षसाम् । अन्योन्यं पादपैर्घोरं निघ्नतां शूलमुद्गरैः ॥ २ ॥ घोरैश्च परिघैश्चित्रैस्त्रिशूलैश्चापि संहतैः । राक्षसैर्वानरा घोरैर्विनिकृत्ताः समन्ततः ॥ ३ ॥ वानरै राक्षसाश्चापि द्रुमैर्भूमौ समीकृताः । राक्षसाश्चापि संक्रुद्धा वानरान्निशितैः शरैः । विव्यधुर्घोरसङ्काशैः कङ्कपत्रैरजिह्मगैः ॥ ४ ॥ ते गदाभिश्च भीमाभिः पट्टिशैः कूटमुद्गरैः ॥ ५ ॥ विदार्यमाणा रक्षोभिर्वानरास्ते महाबलाः । अमर्षाज्जनितोद्धर्षाश्चक्रुः कर्माण्यभीतवत् ॥ ६ ॥ शरनिर्भिन्नगात्रास्ते शूलनिर्भिन्नदेहिनः । जगृहुस्ते द्रुमांस्तत्र शिलाश्च हरियूथपाः ॥ ७ ॥

अथ धूम्राक्षवधो द्विपञ्चाशे–धूम्राक्षमित्यादि ॥ १ ॥ २ ॥ संहतैः सङ्गतैः । राक्षसविशेषणमेतत् ॥ ३ ॥ वानरैरित्यादि । समीकृताः पातिताः । घोरसङ्काशैः घोरकालाग्न्यादितुल्यैः । अजिह्मगैः अवक्रगैः । कङ्कपत्रैः कङ्कपत्राण्येव पत्राणि येषां ते कङ्कपत्राः तैः ॥ ४ ॥ जनितोद्धर्षाः जनितोत्साहाः ॥ ५ ॥ ६ ॥ शूलनिर्भिन्नदेहिनः । कर्मधारयादिनिरार्षः ॥ ७ ॥

कुणपाशनाः गृध्राः । प्रतिलोमं प्रतिकूलम्॥३१–३६॥अभिनिष्क्रम्य, पुरादिति शेषः । महौघकल्पां महान् ओघो जलवेगो यस्मिन् सः महौघः सागरः तत्कल्पाम्॥३७॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकपञ्चाशः सर्गः ॥ ५१ ॥ ॥ १ ॥ २ ॥ संहतैरित्येतत् राक्षसविशेषणम् ॥ ३ ॥ समीकृताः पातिता इत्यर्थः ॥ ४ ॥ ५ ॥ जनितोद्धर्षाः जनितोत्साहाः ॥ ६ ॥ शूलनिर्भिन्नदेहिनः शूलनिर्भिन्नदेहाः । इत्रन्तत्वमार्षम् ॥ ७–९ ॥ ॥१५६॥

For Private And Personal Use Only

नामानि स्वनामानि ॥ ८-११ ॥ वनौकसां पर्वताग्रैः वानरप्रेरितपर्वताग्रैः । तैर्मथितैः गजेन्द्रैः । सारोहैः साधिष्ठातृभिः । वसुधातलं कीर्णमभूत् ॥ १२ ॥ १३ ॥ भीमविक्रान्तैः भीमविक्रमैः । वेगितैः सञ्जातवेगैः । वानरैः कर्तृभिः । करजैः नखैः करणैः । आक्रम्याक्रम्य मुखेषु विनिकर्तिताः

ते भीमवेगा हरयो नर्दमानास्ततस्ततः । ममन्थू राक्षसान् भीमान्नामानि च बभाषिरे ॥ ८ ॥ तद्बभूवाद्भुतं घोरं युद्धं वानररक्षसाम् । शिलाभिर्विविधाभिश्च बहुभिश्चैव पादपैः ॥ ९ ॥ राक्षसा मथिताः केचिद्वानरैर्जित काशिभिः । ववमू रुधिरं केचिन्मुखै रुधिरभोजनाः ॥ १० ॥ पार्श्वेषु दारिताः केचित् केचिद्राशीकृता द्रुमैः । शिलाभि श्चूर्णिताः केचित् केचिद्दन्तैर्विदारिताः ॥ ११ ॥ ध्वजैर्विमथितैर्भग्नैः खरैश्च विनिपातितैः । रथैर्विध्वंसितैश्चापि पतितै रजनीचरैः ॥ १२ ॥ गजेन्द्रैः पर्वताकारैः पर्वताग्रैर्वनौकसाम् । मथितैर्वाजिभिः कीर्णं सारोहैर्वसुधातलम् ॥ १३ ॥ वानरैर्भीमविक्रान्तैराप्लुत्याप्लुत्य वेगितैः । राक्षसाः करजैस्तीक्ष्णैर्मुखेषु विनिकर्तिताः ॥ १४ ॥ विवर्ण वदना भूयो विप्रकीर्णशिरोरुहाः । मूढाः शोणितगन्धेन निपेतुर्धरणीतले ॥ १५ ॥ अन्ये परमसंक्रुद्धा राक्षसा भीमनिस्वनाः । तलैरेवाभिधावन्ति वज्रस्पर्शसमैर्हरीन् ॥ १६ ॥ वानरैरापतन्तस्ते वेगिता वेगवत्तरैः । मुष्टिभिश्चरणै र्दन्तैः पादपैश्चावपोथिताः । वानरैर्हन्यमानास्ते राक्षसा विप्रदुद्रुवुः ॥ १७ ॥ सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षस र्षभः । क्रोधेन कदनं चक्रे वानराणां युयुत्सताम् ॥ १८ ॥

खण्डिताः । मूढाः मूर्च्छिताः ॥ १४ ॥ १५ ॥ अन्य इति । तलैरेवाभिधावन्ति, हस्ततलान्येवायुधस्थाने कृत्वा अभ्यधावन्नित्यर्थः ॥ १६ ॥ वानरै रिति । अवपोथिताः हिंसिताः । "पुथ हिंसायाम्" इति धातुः ॥ १७ ॥ सैन्यं त्विति । कदनं हिंसनम् ॥ १८ ॥

जितकाशिभिः जितभयैर्जितश्वासैर्वा ॥ १० ॥ द्रुमैः राशीकृताः द्रुममहारैर्हत्वा राशीकृता इत्यर्थः ॥ ११-१३ ॥ करजैः नखैः ॥१४॥ मूढाः मूर्च्छिताः ॥१५॥१६॥ अवपोथिताः हिंसिताः ॥ १७-१९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रासैरित्यादिचतुःश्लोकी । विह्वलन्तः विवशाः । गतासवः, अभवन्निति शेषः । आन्त्रैर्विनिःसृताः विनिःसृतान्त्रा इत्यर्थः ॥ १९-२३ ॥ धनुरिति । तन्त्री वीणा । आर्षो ह्रस्वः । तया मधुरं रम्यम् । हिक्का विरम्य विरम्य कण्ठात् पवनोद्गमः । मन्दस्तनितम् अशक्त्या मन्दभाषणं तदेव सङ्गीतं

प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः । मुद्गरैराहताः केचित् पतिता धरणीतले ॥ १९ ॥ परिघैर्मथिताः केचिद्भिन्दिपालैर्विदारिताः । पट्टिशैराहताः केचिद्विह्वलन्तो गतासवः ॥ २० ॥ केचिद्विनिहताः शूलै रुधिरार्द्रा वनौकसः । केचिद्विद्राविता नष्टाः सबलै राक्षसैर्युधि ॥ २१ ॥ विभिन्नहृदयाः केचिदेकपार्श्वेन दारिताः । विदारितास्त्रिशूलैश्च केचिदान्त्रैर्विनिःसृताः ॥ २२ ॥ तत्सुभीमं महायुद्धं हरिराक्षससङ्कुलम् । प्रबभौ शब्दबहुलं शिलापादपसङ्कुलम् ॥ २३ ॥ धनुर्ज्यातन्त्रिमधुरं हिक्कातालसमन्वितम् । मन्दस्तनितसङ्गीतं युद्धगान्धर्वमाबभौ ॥ २४ ॥ धूम्राक्षस्तु धनुष्पाणिर्वानरान् रणमूर्धनि । हसन् विद्रावयामास दिशस्तु शरवृष्टिभिः ॥ २५ ॥ धूम्राक्षेणार्दितं सैन्यं व्यथितं दृश्य मारुतिः । अभ्यवर्तत संक्रुद्धः प्रगृह्य विपुलां शिलाम् ॥ २६ ॥ क्रोधाद्द्विगुणताम्राक्षः पितृतुल्यपराक्रमः । शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥२७॥ आपतन्तीं शिलां दृष्ट्वा गदामुद्यम्य सम्भ्रमात् । रथादाप्लुत्य वेगेन वसुधायां व्यतिष्ठत ॥ २८ ॥

सम्यग्गानं यस्मिन् तत् तथोक्तम् । युद्धगान्धर्वं युद्धसङ्गीतम् । सङ्गीतं नृत्तगीतवाद्यम् ॥ २४ ॥ धूम्राक्ष इति । दिशः दिशः प्रति ॥ २५ ॥ धूम्राक्षेणेति । व्यथितं दुःखितम् । दृश्य दृष्ट्वा । मारुतिः हनुमान् ॥ २६ ॥ क्रोधादिति । पिता वायुः ॥ २७ ॥ २८ ॥

विह्वलन्तः विवशाः ॥ २० ॥ २१ ॥ आन्त्रैर्विनिस्सृताः विनिस्सृतान्त्रा इत्यर्थः ॥ २२ ॥ २३ ॥ युद्धगान्धर्वं युद्धसङ्गीतम् ॥ २४-२८ ॥ ॥१५७॥

स०-धनुर्ज्या धनुर्गुणः सैव तन्त्रिः तन्त्री वीणा । संज्ञात्वात् "ङ्यापोः संज्ञा-" इति ह्रस्वः । हिक्का हेषा तद्रूपतालयुक्तमिति नागोजिभट्टः । हिक्का ऊर्ध्ववातप्रवर्तितशब्दविशेषः । "सारिका हिक्का" इति अमरव्याख्यायां "हिक अव्यक्ते शब्दे" "गुरोश्च" इत्यकारप्रत्ययः । ऊर्ध्ववातप्रयुक्तशब्दविशेष इत्युक्तेः । मन्दस्तनितसंगीतं मन्दाः गजविशेषाः । तत्स्तनितरूपसंगीतम् "मन्दः खरगजजातिप्रभेदयोः" इति विश्वः ॥ २४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सेति । कूबरः युगन्धरः । " कूबरस्तु युगन्धरः " इत्यमरः ॥ २९-३२ ॥ अभिद्रवत् अभ्यद्रवत् । आगमशासनस्यानित्यत्वादडभावः ॥ ३३ ॥ बहुकण्टकां बहुकीलाम् ॥ ३४ ॥ ताडितः, आसीदिति शेषः ॥ ३५ ॥ ३६ ॥ विह्वलितानि विवशीकृतानि ॥ ३७ ॥३८॥ वहन्तीति वहाः क्षतजस्य

सा प्रमथ्य रथं तस्य निपपात शिला भुवि । सचक्रकूबरं साश्वं सध्वजं सशरासनम् ॥ २९ ॥ स भङ्क्त्वा तु रथं तस्य हनुमान् मारुतात्मजः । रक्षसां कदनं चक्रे सस्कन्धविटपैर्द्रुमैः ॥ ३० ॥ विभिन्नशिरसो भूत्वा राक्षसाः शोणितोक्षिताः । द्रुमैः प्रव्यथिताश्चान्ये निपेतुर्धरणीतले ॥ ३१॥ विद्राव्य राक्षसं सैन्यं हनुमान् मारुतात्मजः । गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३२ ॥ तमापतन्तं धूम्राक्षो गदामुद्यम्य वीर्यवान् । विनर्दमानः सहसा हनुमन्तमभिद्रवत् ॥ ३३ ॥ ततः क्रुद्धस्तु वेगेन गदां तां बहुकण्टकाम् । पातयामास धूम्राक्षो मस्तके तु हनूमतः ॥ ३४ ॥ ताडितः स तया तत्र गदया भीमरूपया ॥ ३५ ॥ स कपिर्मारुतबलस्तं प्रहारमचिन्तयन् । धूम्राक्षस्य शिरोमध्ये गिरिशृङ्गमपातयत् ॥ ३६ ॥ स विह्वलितसर्वाङ्गो गिरिशृङ्गेण ताडितः । पपात सहसा भूमौ विकीर्ण इव पर्वतः ॥ ३७ ॥ धूम्राक्षं निहतं दृष्ट्वा हतशेषा निशाचराः । त्रस्ताः प्रविविशुर्लङ्कां वध्यमानाः प्लवङ्गमैः ॥ ३८ ॥ स तु पवनसुतो निहत्य शत्रुं क्षतजवहाः सरितश्च सन्निकीर्य । रिपुवधजनितश्रमो महात्मा मुदमगमत् कपिभिश्च पूज्यमानः ॥ ३९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्विपञ्चाशः सर्गः ॥ ५२ ॥

वहाः क्षतजवहाः सन्निकीर्य उत्सार्येत्यर्थः । द्वितीयायां धूम्राक्षवधः ॥३९॥ इति श्रीगो० श्रीरामा० रत्न० युद्धकाण्डव्याख्याने द्विपञ्चाशः सर्गः ॥ ५२ ॥

सा शिला तस्य चक्रादिसहितं रथं प्रमथ्य भुवि निपपात । कूबरः युगन्धरः । अवप्लुतिकाले रथे त्यक्तशरासनसहितम् ॥ २९ ॥ रक्षसां कदनं चक्रे स्वसेनारक्षणार्थमिति भावः । स्कन्धः स्थूलशाखा । विटपः सूक्ष्मशाखा ॥ ३०-३२ ॥ तमिति । अभिद्रवत् अभ्यद्रवत ॥ ३३-३८ ॥ क्षतजस्य वहाः क्षतजवहाः । द्वितीयायां धूम्राक्षवधः । धूम्राक्षवधो भाद्रशुक्लद्वितीयायामित्याहुः ॥ ३९ ॥ इति श्रीमहे० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायां द्विपञ्चाशः सर्गः ॥ ५२ ॥

स०-रिपुवधजनितश्रमः वधश्च जनितश्रमश्च तौ, रिपूणां वधजनितश्रमौ येन स तथा । स्थितानां वधः । विद्रुतानां च श्रम इति विवेकः ॥ ३९ ॥

For Private And Personal Use Only

अथ वज्रदंष्ट्रयुद्धं द्विपञ्चाशे–धूम्राक्षमित्यादि । आविष्टः, अभूदिति शेषः ॥ १ ॥ २ ॥ गच्छ त्वं वीर निर्याहीति इतो गच्छ पुरान्निर्याहीत्यर्थः ॥ ३ ॥ तथेत्युक्त्वेति । बहुभिः, बलाध्यक्षैरिति शेषः ॥ ४ ॥ रथैरित्यस्य संयुक्त इत्यनेनान्वयः । समलंकृतः चन्दनकुसुमादिभिरलङ्कृतः । तनुत्राणि कवच

धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः । क्रोधेन महताऽऽविष्टो निश्वसन्नुरगो यथा ॥ १ ॥ दीर्घमुष्णं विनिश्वस्य क्रोधेन कलुषीकृतः । अब्रवीद्राक्षसं शूरं वज्रदंष्ट्रं महाबलम् ॥ २ ॥ गच्छ त्वं वीर निर्याहि राक्षसैः परिवारितः । जहि दाशरथिं रामं सुग्रीवं वानरैः सह ॥३॥ तथेत्युक्त्वा द्रुततरं मायावी राक्षसेश्वरः । निर्जगाम बलैः सार्धं बहुभिः परिवारितः ॥ ४ ॥ नागैरश्वैः खरैरुष्ट्रैः संयुक्तः सुसमाहितः । पताकाध्वजचित्रैश्च रथैश्च समलंकृतः ॥ ५ ॥ ततो विचित्रकेयूरमुकुटैश्च विभूषितः । तनुत्राणि च संरुह्य सधनुर्निर्ययौ द्रुतम् ॥६॥ पताकालंकृतं दीप्तं तप्तकाञ्चनभूषणम् । रथं प्रदक्षिणं कृत्वा समारोहच्चमूपतिः ॥ ७ ॥ यष्टिभिस्तोमरैश्चित्रैः शूलैश्च मुसलैरपि । भिन्दिपालैश्च पाशैश्च शक्तिभिः पट्टिशैरपि ॥ ८ ॥ खड्गैश्चक्रैर्गदाभिश्च निशितैश्च परश्वधैः । पदातयश्च निर्यान्ति विविधाः शस्त्रपाणयः । विचित्रवाससः सर्वे दीप्ता राक्षसपुङ्गवाः ॥ ९ ॥ गजा मदोत्कटाः शूराश्चलन्त इव पर्वताः । ते युद्धकुशलै रूढास्तोमराङ्कुशपाणिभिः ॥ १० ॥ अन्ये लक्षणसंयुक्ताः शूरा रूढा महाबलाः ॥ ११ ॥ तद्राक्षसबलं घोरं विप्रस्थितमशोभत । प्रावृट्काले यथा मेघा नर्दमानाः सविद्युतः ॥ १२ ॥

तलत्रकण्ठत्रशिरस्त्राणानि । संरुह्य संबध्य, धृत्वेत्यर्थः ॥ ५–७ ॥ यष्टिभिरित्यादिसार्धश्लोकद्वयम् ॥ ८॥ ९ ॥ गजा इति । अत्र निर्यान्तीत्यनुषज्यते । गजानेव विशिनष्टि–ते युद्धेत्यादिना । तोमराङ्कुशपाणिभिः यन्तृभिः । रूढाः आरूढा इत्यर्थः ॥ १० ॥ अन्ये लक्षणसंयुक्ता इति । अत्रापि गजाः ॥१५८॥

॥ १ ॥ २ ॥ गच्छ निर्याहि इत्याभ्यां सर्वथा गन्तव्यमिति बोध्यते ॥ ३ ॥ बहुभिः, बलाध्यक्षैरिति शेषः ॥ ४ ॥ ५ ॥ तनुत्राणि संवृत्य आमुच्य ॥ ६–९ ॥ गजा इत्यादिसार्धश्लोक एकं वाक्यम् । तोमराङ्कुशपाणिभिः रूढाः आरूढाः ये युद्धकुशलाः लक्षणसंयुक्ताः अन्ये ये गजाः ते गजाः, निर्यान्तीति शेषः ॥ १० ॥ ११ ॥ विप्रस्थितं विशेषेण कृतप्रस्थानम् । सविद्युतः नीलस्य रक्षोबलस्य स्वर्णभूषणबहुलत्वात्सविद्युन्मेघोपमेयत्वम् ॥ १२ ॥

निर्यान्तीत्यनुषङ्गः ॥ ११-१२ ॥ विघनात् घनशून्यात् ॥ १४ ॥ १५ ॥ औत्पातिकान् अशुभसूचकान् ॥ १६ ॥ पूरयन् अपूरयंश्चेत्यर्थः । केचित्तु

निस्सृता दक्षिणद्वारादङ्गदो यत्र यूथपः । तेषां निष्क्रममाणानामशुभं समजायत ॥ १३ ॥ आकाशाद्विघनात्तीव्रा उल्काश्चाभ्यपतंस्तदा । वमन्त्यः पावकज्वालाः शिवा घोरं ववाशिरे ॥ १४ ॥ व्याहरन्ति मृगा घोरा रक्षसां निधनं तदा । समापतन्तो योधास्तु प्रास्खलन् भयमोहिताः ॥ १५ ॥ एतानौत्पातिकान् दृष्ट्वा वज्रदंष्ट्रो महाबलः । धैर्य मालम्ब्य तेजस्वी निर्जगाम रणोत्सुकः ॥ १६ ॥ तांस्तु निष्क्रमतो दृष्ट्वा वानरा जितकाशिनः । प्रणेदुः सुमहानादान् पूरयंश्च दिशो दश ॥ १७ ॥ ततः प्रवृत्तं तुमुलं हरीणां राक्षसैः सह । घोराणां भीमरूपाणामन्योन्यवधकाङ्क्षिणाम् ॥ १८ ॥ निष्पतन्तो महोत्साहा भिन्नदेहशिरोधराः । रुधिरोक्षितसर्वाङ्गा न्यपतन् जगतीतले ॥१९॥ केचिदन्योन्यमासाद्य शूराः परिघपाणयः । चिक्षिपुर्विविधं शस्त्रं समरेष्वनिवर्तिनः ॥ २० ॥ द्रुमाणां च शिलानां च शस्त्राणां चापि निस्वनः । श्रूयते सुमहांस्तत्र घोरो हृदयभेदनः ॥२१॥ रथनेमिस्वनस्तत्र धनुषश्चापि निस्वनः । शङ्खभेरीमृदङ्गानां बभूव तुमुलः स्वनः ॥२२॥ केचिदस्त्राणि संसृज्य बाहुयुद्धमकुर्वत ॥ २३ ॥ तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि । जानुभिश्च हताः केचिद् भिन्नदेहाश्च राक्षसाः । शिलाभिश्चूर्णिताः केचिद्वानरैर्युद्धदुर्मदैः ॥ २४॥

पूरयन् पूरयन्त इत्यर्थः, वचनव्यत्यय आर्ष इत्याहुः ॥ १७ ॥ तत इति । तुमुलं रणसङ्कुलम् । " तुमुलं रणसङ्कुले " इत्यमरः ॥ १८-२२ ॥ केचिदिति । अस्त्राणि संसृज्य सर्वाण्यस्त्राणि प्रयुज्य । तदनन्तरमस्त्राभावात् बाहुयुद्धमकुर्वतेत्यर्थः ॥ २३-२५ ॥

निस्सृताः, राक्षसा इति शेषः ॥ १३ ॥ आकाशादिति । विघनात् निर्मेघात् ॥ १४ ॥ १५ ॥ औत्पातिकान् अशुभसूचकान् ॥ १६ ॥ जितकाशिनः जितेन जयेन काशन्ते प्रकाशन्ते इति तथा । नादयन् नादयन्तः । वचनव्यत्यय आर्षः ॥ १७ ॥ तुमुलं रणसङ्कुलम् । " तुमुलं रणसङ्कुले " इति विश्वः ॥ १८-२० ॥ हृदयभेदनः भयङ्कर इत्यर्थः ॥ २१ ॥ २२ ॥ अस्त्राणि संसृज्य सर्वाण्यप्यस्त्राणि प्रयुज्य तदनन्तरमस्त्राभावाद्बाहुयुद्धमकुर्वतेत्यर्थः ॥ २३-२५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलवन्त इति । अस्त्रविदुषः अस्त्रविद्वांसः । प्रथमार्थे द्वितीया ॥ २६ ॥ निघ्नत इत्यादिश्लोकद्वयमेकान्वयम् । संवर्तके प्रलयकाले । तान् राक्षसगणानित्यत्र निजघानेति विपरिणामः ॥ २७-३० ॥ हारेति । शारदीव यथा निशेत्यत्र इवशब्दयथाशब्दावेकार्थकौ, अपिचेतिवत् । इवशब्दः पादपूरण इत्येके ॥ ३१ ॥ ३२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिपञ्चाशः सर्गः ॥ ५३ ॥

वज्रदंष्ट्रो भृशं बाणै रणे वित्रासयन् हरीन् । चचार लोकसंहारे पाशहस्त इवान्तकः ॥ २५ ॥ बलवन्तोऽस्त्रविदुषो नानाप्रहरणा रणे । जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्च्छिताः ॥ २६ ॥ निघ्नतो राक्षसान् दृष्ट्वा सर्वान् वालिसुतो रणे । क्रोधेन द्विगुणाविष्टः संवर्तक इवानलः ॥ २७ ॥ तान् राक्षसगणान् सर्वान् वृक्षमुद्यम्य वीर्यवान् । अङ्गदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव । चकार कदनं घोरं शक्रतुल्यपराक्रमः ॥ २८ ॥ अङ्गदाभिहतास्तत्र राक्षसा भीमविक्रमाः । विभिन्नशिरसः पेतुर्विकृत्ता इव पादपाः ॥ २९ ॥ रथैरश्वैर्ध्वजैश्चित्रैः शरीरैर्हरिरक्षसाम् । रुधिरेण च सञ्छन्ना भूमिर्भयकरी तदा ॥ ३० ॥ हारकेयूरवस्त्रैश्च शस्त्रैश्च समलंकृता । भूमिर्भाति रणे तत्र शारदीव यथा निशा ॥ ३१ ॥ अङ्गदस्य च वेगेन तद्राक्षसबलं महत् । प्राकम्पत तदा तत्र पवनेनाम्बुदो यथा ॥ ३२ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रिपञ्चाशः सर्गः ॥ ५३ ॥

बलस्य च निघातेन अङ्गदस्य जयेन च । राक्षसः क्रोधमाविष्टो वज्रदंष्ट्रो महाबलः ॥ १ ॥

स विस्फार्य धनुर्घोरं शक्राशनिसमस्वनम् । वानराणामनीकानि प्राकिरच्छरवृष्टिभिः ॥ २ ॥

अथ वज्रदंष्ट्रवधश्चतुष्पञ्चाशे-बलस्य चेत्यादिश्लोकद्वयमेकान्वयम् ॥ १-२ ॥

अस्त्रविदुषः अस्त्रविद्वांसः ॥ २६ ॥ संवर्तके प्रलयकाले ॥ २७ ॥ तान् राक्षसगणान्, निजघानेति शेषः ॥ २८ ॥ २९ ॥ भयकरी भयङ्करी, अभूदिति शेषः । सुमभाव आर्षः ॥ ३०-३२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रिपञ्चाशः सर्गः ॥ ५३ ॥ (पवनेनाम्बुदो यथेत्युत्तरं सर्गच्छेदः क्वचित्, सोऽयुक्तः । वृत्तभेदप्रकरणभेदाद्यभावादिति कतकः ।) ॥ १-२ ॥

For Private And Personal Use Only

वानराणामिति निर्धारणे षष्ठी ॥ ४ ॥ तत्र कपिमुख्येष्वित्यन्वयः । आयोधने युद्धे ॥ ५ ॥ ६ ॥ तद्राक्षसगणानां चेति । ते च राक्षसगणाश्च तद्राक्षसगणाः तेषाम् । तच्छब्देन वानरा उच्यन्ते । युद्ध्यमानानां सुयुद्धं समवर्ततेत्यनेन उत्तरोत्तरयुद्धाधिक्यमुच्यते ॥ ७ ॥ पादैश्च बाहुभिरित्युपलक्षणे तृतीया ।

राक्षसाश्चापि मुख्यास्ते रथेषु समवस्थिताः । नानाप्रहरणाः शूराः प्रायुद्ध्यन्त तदा रणे ॥ ३ ॥ वानराणां तु शूरा ये सर्वे ते प्लवगर्षभाः । आयुद्ध्यन्त शिलाहस्ताः समवेताः समन्ततः ॥ ४ ॥ तत्रायुधसहस्राणि तस्मिन्नायोधने भृशम् । राक्षसाः कपिमुख्येषु पातयाञ्चक्रिरे तदा ॥ ५ ॥ वानराश्चापि रक्षस्सु गिरीन् वृक्षान् महाशिलाः । प्रवीराः पातयामासुर्मत्तवारणसन्निभाः ॥ ६ ॥ शूराणां युद्ध्यमानानां समरेष्वनिवर्तिनाम् । तद्राक्षसगणानां च सुयुद्धं समवर्तत ॥ ७ ॥ प्रभिन्नशिरसः केचिच्छिन्नैः पादैश्च बाहुभिः । शस्त्रैरर्पितदेहास्तु रुधिरेण समुक्षिताः ॥ ८ ॥ हरयो राक्षसाश्चैव शेरते गां समाश्रिताः । कङ्कगृध्रबलैराढ्या गोमायुगणसङ्कुलाः ॥ ९ ॥ कबन्धानि समुत्पेतु र्भीरूणां भीषणानि वै ॥ १० ॥ भुजपाणिशिरश्छिन्नाश्छिन्नकायाश्च भूतले । वानरा राक्षसाश्चापि निपेतुस्तत्र वै रणे ॥ ११ ॥ ततो वानरसैन्येन हन्यमानं निशाचरम् । प्राभज्यत बलं सर्वं वज्रदंष्ट्रस्य पश्यतः ॥ १२ ॥

अर्पितदेहाः आरोपितदेहाः । गां भूमिम् । कङ्कः अवटः स च श्येनविशेषः । गृध्रः दूरदर्शी । बलः श्येनविशेषः काकश्च, तैराढ्याः व्याप्ताः ॥ ८ ॥ ९ ॥ कबन्धानीत्यर्धम् ॥ १० ॥ पुनः केषांचित्पतनमाह—भुजेति । भुजपाणिशिरस्सु छिन्नाः । छिन्नकायाः छिन्नमध्यकायाः ॥ ११ ॥ तत इति । निशाचरं निशाचरसम्बन्धि । अण् वृद्ध्यभाव आर्षः । यद्वा निशायां चरतीति योगमात्रविवक्षा ॥ १२ ॥

वानराणामिति निर्धारणे षष्ठी ॥ ४ ॥ तत्र कपिमुख्येषु । तस्मिन्नायोधने युद्धे ॥ ५–७ ॥ तद्विति । पादैश्च बाहुभिरित्येतदुपलक्षणे तृतीया ॥ ८ ॥ हरय इति । बलः काकः श्येनविशेषो वा, कङ्कगृध्रबलैराढ्या व्याप्ता इत्यर्थः ॥ ९ ॥ १० ॥ निशाचरं वृद्ध्यभाव आर्षः । यद्वा निशि चरतीति निशाचरम् । प्राभज्यत

भयवित्रस्तान् भयहेतुभ्यो वित्रस्तान् ॥ १३ ॥ १४ ॥ विभेदेति । सप्ताष्टौ नव पञ्च चेति, एकैकप्रयोगेणेति शेषः ॥ १५–१७ ॥ रामानु०–तत इति । उदीक्षन्तम् उदीक्षमाणम् ॥ १७ ॥ वज्रदंष्ट्र इति । हरिमत्तगजौ सिंहमत्तगजौ ॥ १८–२३ ॥ सा वज्रदंष्ट्रधृता गदा आक्षिप्ता अपहृता ॥ २४ ॥

राक्षसान् भयवित्रस्तान् हन्यमानान् प्लवङ्गमैः । दृष्ट्वा स रोषताम्राक्षो वज्रदंष्ट्रः प्रतापवान् ॥ १३ ॥ प्रविवेश धनुष्पाणिस्त्रासयन् हरिवाहिनीम् । शरैर्विदारयामास कङ्कपत्रैरजिह्मगैः ॥ १४ ॥ बिभेद वानरांस्तत्र सप्ताष्टौ नव पञ्च च । विव्याध परमक्रुद्धो वज्रदंष्ट्रः प्रतापवान् ॥ १५ ॥ त्रस्ताः सर्वे हरिगणाः शरैः संकृत्तकन्धराः । अङ्गदं सम्प्रधावन्ति प्रजापतिमिव प्रजाः ॥ १६ ॥ ततो हरिगणान् भग्नान् दृष्ट्वा वालिसुतस्तदा । क्रोधेन वज्रदंष्ट्रं तमुदीक्षन्तमुदैक्षत ॥ १७ ॥ वज्रदंष्ट्रोऽङ्गदश्चोभौ सङ्गतौ हरिराक्षसौ । चेरतुः परमक्रुद्धौ हरिमत्तगजाविव ॥ १८ ॥ ततः शरसहस्रेण वालिपुत्रं महाबलः । जघान मर्मदेशेषु मातङ्गमिव तोमरैः ॥ १९ ॥ रुधिरोक्षितसर्वाङ्गो वालिसूनुर्महाबलः । चिक्षेप वज्रदंष्ट्राय वृक्षं भीमपराक्रमः ॥२०॥ दृष्ट्वाऽऽपतन्तं तं वृक्षमसम्भ्रान्तश्च राक्षसः । चिच्छेद बहुधा सोऽपि निकृत्तः पतितो भुवि ॥२१॥ तं दृष्ट्वा वज्रदंष्ट्रस्य विक्रमं प्लवगर्षभः । प्रगृह्य विपुलं शैलं चिक्षेप च ननाद च ॥ २२ ॥ समापतन्तं तं दृष्ट्वा रथादाप्लुत्य वीर्यवान् । गदापाणिरसम्भ्रान्तः पृथिव्यां समतिष्ठत ॥ २३ ॥ साऽङ्गदेन गदाऽऽक्षिप्ता गत्वा तु रणमूर्धनि ॥ २४ ॥ सचक्रकूबरं साश्वं प्रममाथ रथं तदा ॥ २५ ॥ ततोऽन्यं गिरिमाक्षिप्य विपुलं द्रुमभूषितम् । वज्रदंष्ट्रस्य शिरसि पातयामास सोऽङ्गदः ॥२६॥ अभवच्छोणितोद्गारी वज्रदंष्ट्रः स मूर्च्छितः । मुहूर्तमभवन्मूढो गदामालिङ्ग्य निःश्वसन् ॥ २७ ॥

सः अङ्गदक्षिप्तशैलः ॥ २५ ॥ २६ ॥ शोणितोद्गारी रक्तोद्गारी । गदाम् अन्याम् । पद्रा " जघान परमक्रुद्धो वक्षोदेशे निशाचरः " इत्यस्यानन्तरं ॥१६०॥
भग्नमभूत ॥ ११–१४ ॥ सप्ताष्ट नव पञ्च विभेद, एकैकेन शरेणेति शेषः ॥ १५ ॥ संप्रधावन्ति धावन्ति स्म ॥ १६ ॥ १७ ॥ हरिमत्तगजाविव हरिरिह शार्दूलः सिंहेन गजस्य युद्धासंभवात । (स्वप्नेऽपि सिंहदर्शनेन गजानां मरणमिति कतकः) ॥ १८–२० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

"साऽङ्गदेन गदाऽऽक्षिप्ता गत्वा तु रणमूर्धनि" इत्यर्धं योज्यम् ॥२७॥ अवर्तत अवर्त्तयत् ॥२८॥२९॥ ततः परमतेजस्वीत्यादि श्लोकद्वयमेकान्वयम् । वृक्षोत्पाटनार्षभचर्मखड्गग्रहणादिकमङ्गदस्योच्यमानमितरस्याप्युपलक्षणम् । विचित्रांश्चेरतुर्मार्गानिति वक्ष्यमाणयुद्धस्य उभयोरविशेषेण वर्णनात् ।

स लब्धसंज्ञो गदया वालिपुत्रमवस्थितम् । जघान परमक्रुद्धो वक्षोदेशे निशाचरः । गदां त्यक्त्वा ततस्तत्र मुष्टियुद्धमवर्तत ॥ २८ ॥ अन्योन्यं जघ्नतुस्तत्र तावुभौ हरिराक्षसौ । रुधिरोद्गारिणौ तौ तु प्रहारैर्जनितश्रमौ । बभूवतुः सुविक्रान्तावङ्गारकबुधाविव ॥ २९ ॥ ततः परमतेजस्वी अङ्गदः कपिकुञ्जरः । उत्पाट्य वृक्षं स्थितवान् बहुपुष्पफलान्वितम् ॥ ३० ॥ जग्राह चार्षभं चर्म खड्गं च विपुलं शुभम् । किङ्किणीजालसञ्छन्नं चर्मणा च परिष्कृतम् ॥ ३१ ॥ [वज्रदंष्ट्रोऽथ जग्राह सोऽङ्गदोऽप्यासिचर्मणी ।] विचित्रांश्चेरतुर्मार्गान् रुषितौ कपिराक्षसौ । जघ्नतुश्च तदाऽन्योन्यं निर्दयं जयकाङ्क्षिणौ ॥ ३२ ॥ व्रणैः सास्त्रैरशोभेतां पुष्पिताविव किंशुकौ । युद्ध्यमानौ परिश्रान्तौ जानुभ्यामवनीं गतौ ॥ ३३ ॥ निमेषान्तरमात्रेण अङ्गदः कपिकुञ्जरः । उदतिष्ठत दीप्ताक्षो दण्डाहत इवोरगः ॥ ३४ ॥ निर्मलेन सुधौतेन खड्गेनास्य महच्छिरः । जघान वज्रदंष्ट्रस्य वालिसूनुर्महाबलः ॥ ३५ ॥ रुधिरोक्षितगात्रस्य बभूव पतितं द्विधा । सरोषपरिवृत्ताक्षं शुभं खड्गहतं शिरः ॥ ३६ ॥

अङ्गदेन वृक्षे गृहीते राक्षसोऽपि वृक्षं जग्राह । अङ्गदेन खड्गादौ गृहीते राक्षसोऽपि खड्गादिकं जग्राहेति भावः । आर्षभं चर्म ऋषभचर्मपिनद्धं फलकम् । चर्मणा खड्गकोशेन ॥ ३० ॥ ३१ ॥ रामानु०—स जग्राहार्षभं चर्मेति पाठः । सः वज्रदंष्ट्रः ॥ ३१ ॥ विचित्रानिति । मार्गान् पूर्वोक्तमण्डलादिमार्गान् । निर्दयं जघ्नतुरित्यन्वयः ॥ ३२ ॥ व्रणैरिति । सास्त्रैः सरुधिरैः । " अस्रमश्रुणि शोणिते " इत्यमरः । अवनीं गतौ, अभूतामिति शेषः ॥ ३३ ॥ निमेषेति । निमेषान्तरमात्रेण निमेषावकाशमात्रेण ॥ ३४ ॥ निर्मलेनेति । सुधौतेन शाणोल्लिखितेन अत एव निर्मलेन । अस्य वज्रदंष्ट्रस्येत्यन्वयः । केचित्तु—स जग्राहार्षभं चर्म एतदङ्गदस्य कथनमितरस्याप्युपलक्षणम् । विचित्रांश्चेरतुर्मार्गानिति वक्ष्यमाणयुद्धे तूभयोरविशेषवर्णनात् ॥ ३१–३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स जग्राहार्षभं चर्मेति पठित्वा सः वज्रदंष्ट्रः खड्गं जग्राह अङ्गदो वृक्षं जग्राहेति व्याख्याय, खड्गेनास्य महच्छिर इत्यत्र वृक्षे प्रतिहतेऽङ्गदोऽपि चर्मासी जग्राहेति अनेनावगम्यत इत्यपि वर्णयन्ति ॥ ३५ ॥ ३६ ॥ रामानु०—खड्गेनास्य वज्रदंष्ट्रस्य शिरो जघानेत्यनेन वृक्षे प्रतिहतेऽङ्गदोऽपि चर्मासी जग्राहेत्यवगम्यते ॥ ३५ ॥

वज्रदंष्ट्रं हतं दृष्ट्वा राक्षसा भयमोहिताः । त्रस्ताः प्रत्यपतन् लङ्कां वध्यमानाः प्लवङ्गमैः । विषण्णवदना दीना ह्रिया किंचिदवाङ्मुखाः ॥ ३७ ॥ निहत्य तं वज्रधरप्रभावः स वालिसूनुः कपिसैन्यमध्ये । जगाम हर्षं महितो महाबलः सहस्रनेत्रस्त्रिदशैरिवावृतः ॥३८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे चतुष्पञ्चाशः सर्गः ॥ ५४ ॥ वज्रदंष्ट्रं हतं श्रुत्वा वालिपुत्रेण रावणः । बलाध्यक्षमुवाचेदं कृताञ्जलिमवस्थितम् ॥१॥ शीघ्रं निर्यान्तु दुर्धर्षा राक्षसा भीमविक्रमाः । अकम्पनं पुरस्कृत्य सर्वशस्त्रप्रकोविदम् ॥ २ ॥ एष शास्ता च गोप्ता च नेता च युधि संमतः । भूतिकामश्च मे नित्यं नित्यं च समरप्रियः ॥ ३ ॥ एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम् । वानरांश्चापरान् घोरान् हनिष्यति परन्तपः ॥ ४ ॥ परिगृह्य स तामाज्ञां रावणस्य महाबलः । बलं सन्त्वरयामास तदा लघुपराक्रमः ॥ ५ ॥ ततो नानाप्रहरणा भीमाक्षा भीमदर्शनाः । निष्पेतू रक्षसां मुख्या बलाध्यक्षप्रचोदिताः ॥ ६ ॥

विषण्णवदनाः शुष्कवदनाः । तृतीयायां वज्रदंष्ट्रवधः ॥ ३७ ॥ ३८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुष्पञ्चाशः सर्गः ॥ ५४ ॥ अथाकम्पनयुद्धं पञ्चपञ्चाशे—वज्रदंष्ट्रमित्यादि । बलाध्यक्षं प्रहस्तम् ॥ १ ॥ २ ॥ एष इति । शास्ता परसैन्यनिग्राहकः । गोप्ता स्वबलरक्षकः । नेता नायकः, सेनापतिरित्यर्थः । संमतः प्रसिद्धः ॥ ३ ॥ ४ ॥ परिगृह्येति । बलचोदनेन स्वचोदनमर्थसिद्धं मत्वेत्यर्थः ॥ ५ ॥ तत इति । निष्पेतुः पुरात् निर्ययुः ॥ ६ ॥

महितः पूजितः ॥ तृतीयायां वज्रदंष्ट्रवधः ॥३८॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुष्पञ्चाशः सर्गः ॥५४॥ वज्रदंष्ट्रमिति । बलाध्यक्षं प्रहस्तम् ॥ १--६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेघाभः मेघवत् स्थूलः । मेघस्वनमहास्वनः । " सतम्युपमानपूर्वपदस्य " इत्यादिना उत्तरपदलोपस्य वैकल्पिकत्वे प्रथमस्वनपदश्रवणम् ॥ ७ ॥ प्रसङ्गादाह—न हीति । हि यस्मात् महामृधे महायुद्धेऽपि कम्पयितुं न शक्यते अतो हेतोरकम्पनः अकम्पनशब्दवाच्यः । तेषां रक्षसाम् मध्ये

रथमास्थाय विपुलं तप्तकाञ्चनकुण्डलः । मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः । राक्षसैः संवृतो भीमैस्तदा निर्यात्यकम्पनः ॥ ७ ॥ न हि कम्पयितुं शक्यः सुरैरपि महामृधे । अकम्पनस्ततस्तेषामादित्य इव तेजसा ॥८॥ तस्य निर्धावमानस्य संरब्धस्य युयुत्सया । अकस्माद्दैन्यमागच्छद्धयानां रथवाहिनाम् ॥ ९ ॥ व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनन्दिनः । विवर्णो मुखवर्णश्च गद्गदश्चाभवत् स्वनः ॥ १० ॥ अभवत् सुदिने चापि दुर्दिनं रूक्ष मारुतम् । ऊचुः खगा मृगाः सर्वे वाचः क्रूरा भयावहाः ॥ ११ ॥ स सिंहोपचितस्कन्धः शार्दूलसमविक्रमः । तानुत्पातानचिन्त्यैव निर्जगाम रणाजिरम् ॥ १२ ॥ तदा निर्गच्छतस्तस्य रक्षसः सह राक्षसैः । बभूव सुमहान्नादः क्षोभयन्निव सागरम् ॥ १३ ॥ तेन शब्देन वित्रस्ता वानराणां महाचमूः । द्रुमशैलप्रहरणा योद्धुं समवतिष्ठत ॥ १४ ॥ तेषां युद्धं महारौद्रं सञ्जज्ञे हरिरक्षसाम् । रामरावणयोरर्थे समभित्यक्तजीविनाम् ॥ १५ ॥ सर्वे ह्यतिबलाः शूराः सर्वे पर्वतसन्निभाः । हरयो राक्षसाश्चैव परस्परजिघांसवः ॥ १६ ॥ तेषां विनर्दतां शब्दः संयुगेऽतितरस्विनाम् । शुश्रुवे सुमहान् क्रोधादन्योन्यमभिगर्जताम् ॥ १७ ॥

तेजसा आदित्य इव स्थित इत्यर्थः ॥ ८ ॥ ९ ॥ रामानु०—हयानां रथवाहिनामिति पाठः ॥ ९ ॥ व्यस्फुरादित्यादि । विवर्णः विपरीतवर्णः । दुर्दिनं मेघच्छन्नदिनम् । "मेघच्छन्नेऽह्नि दुर्दिनम्" इत्यमरः ॥१०॥११॥ सिंहोपचितस्कन्धः सिंहस्येवोन्नतस्कन्धवान् ॥१२–१४॥ तेषामिति । समभित्यक्तजीविनां तृणीकृतशरीराणामित्यर्थः ॥ १५ ॥ सर्वे इति । परस्परजिघांसवः, आसन्निति शेषः ॥ १६ ॥ तेषामिति । विनर्दतां सिंहनादं कुर्वताम् । अभिगर्जताम् रथमिति । परिमाणतो मेघतुल्यः । मेघवर्णः मेघवन्नीलवर्णः । मेघाभः मेघसमानदेहप्रमाणः । मेघस्य स्वन इव महान् स्वनो यस्य सः तथा । निर्याति याति स्म ॥ ७ ॥ ८ ॥ रथवहनकर्तॄणां हयानाम् अकस्मान्निर्हेतुकमेव दैन्यमागच्छत, मन इति शेषः ॥ ९ ॥ १० ॥ अभवदिति । सुदिने चापि मेघावरणायोग्यदिवसेऽपि दुर्दिनं मेघावरणमभवत् ॥११–१४॥ समभित्यक्तदेहिनाम् इति पाठः । समभित्यक्ता देहिनः आत्मानो यैस्ते तेषाम्, आत्मरक्षानिरपेक्षाणाम् इति यावत् ॥१५–१७॥

For Private And Personal Use Only

आभिमुख्येन गर्जनं कुर्वताम् ॥ १७ ॥ रजश्चेति । अरुणवर्णेन रक्तिम्ना आभातीत्यरुणवर्णाभम् ॥ १८॥ अन्योन्यमिति । कौशेयोद्धूतपाण्डुना, उद्धूत कौशेयपाण्डुना । आहिताग्न्यादित्वात् परनिपातः । रजसो रक्तत्वपाण्डुत्वे भूभेदादिति ज्ञेयम् । संवृतानि छन्नानि । भूतानि वस्तूनि न ददृशुः, वानराः

रजश्चारुणवर्णाभं सुभीममभवद्भृशम् । उद्धूतं हरिरक्षोभिः संरुरोध दिशो दश ॥ १८ ॥ अन्योन्यं रजसा तेन कौशेयोद्धूतपाण्डुना । संवृतानि च भूतानि ददृशुर्न रणाजिरे ॥ १९ ॥ न ध्वजा न पताका वा वर्म वा तुरगोऽपि वा । आयुधं स्यन्दनं वाऽपि ददृशे तेन रेणुना ॥ २० ॥ शब्दश्च सुमहांस्तेषां नर्दतामभिधावताम् । श्रूयते तुमुले युद्धे न रूपाणि चकाशिरे ॥ २१ ॥ हरीनेव सुसंक्रुद्धा हरयो जघ्नुराहवे । राक्षसाश्चापि रक्षांसि निजघ्नुस्तिमिरे तदा ॥२२॥ परांश्चैव विनिघ्नन्तः स्वांश्च वानरराक्षसाः। रुधिरार्द्रां तदा चक्रुर्महीं पङ्कानुलेपनाम् ॥२३॥ ततस्तु रुधिरौघेण सिक्तं व्यपगतं रजः । शरीरशवसङ्कीर्णा बभूव च वसुन्धरा ॥ २४ ॥ द्रुमशक्तिशिलाप्रासैर्गदापरिघतोमरैः । हरयो राक्षसाश्चैव जघ्नुरन्योन्यमोजसा ॥२५॥ बाहुभिः परिघाकारैर्युध्यन्तः पर्वतोपमाः । हरयो भीमकर्माणो राक्षसान् जघ्नुराहवे ॥ २६ ॥ राक्षसास्त्वपि संक्रुद्धाः प्रासतोमरपाणयः । कपीन्निजघ्निरे तत्र शस्त्रैः परमदारुणैः ॥ २७ ॥

राक्षसाश्चेति शेषः ॥ १९ ॥ उक्तं विवृणोति—न ध्वजा इति । वर्मादिष्वपि नञनुवर्तनीयः ॥ २० ॥ परस्परादर्शनादिजन्यं शब्दान्तरमाह—शब्दश्चेति । रूपाणि पदार्थान्तराणि ॥ २१ ॥ अदर्शनफलमाह—हरीनिति ॥ २२ ॥ परानिति । प्रथमं रक्तार्द्राम् अथ चरणक्षोदेन पङ्किलामित्यर्थः । पङ्कानुलेपनां पङ्कानुलिप्ताम् । कर्मणि ल्युट् ॥ २३ ॥ तत इति । शरीरशवसङ्कीर्णा शवभूतशरीरसङ्कीर्णा ॥ २४ ॥ द्रुमेति । द्रुमशैला वानरीयाः । शक्त्यादयो राक्षसीयाः ॥ २५ ॥ बाहुभिरिति । बाहुभिः परिघाकारैरित्यस्योत्तरार्धः—हरयो भीमकर्माणो राक्षसान् जघ्नुराहवे इति ॥ २६ ॥ राक्षसास्त्वपीति । ॥१६२॥

अरुणवर्णाभं धूम्रवर्णस्य वस्तुन आभा यस्मिन् तत् । अरुणशब्दो धूम्रपर्यायोऽपि ॥ १८ ॥ कौशेयोद्धूतपाण्डुना धौतकौशेयपाण्डुनेत्यर्थः । भूतानि कपिरक्षो लक्षणभाजिनः ॥ १९–२७ ॥

शस्त्रैः उत्कप्रासादिभिः ॥ २७ ॥ अकम्पन इति । संहर्षयति उत्साहयति ॥ २८ ॥ रामानु०–संहर्षयति समहर्षयत्, संभावयामासेत्यर्थः । तान् कपीन्निघ्नतः ॥ २८ ॥ अभिक्रम्य अभिमुखीभूय । आच्छिद्य अपहृत्य ॥ २९ ॥ एतस्मिन्निति । स्पष्टः ॥ ३० ॥ ते त्वित्यादिसार्धश्लोकः । लीलया अनायासेन ॥ ३१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

अकम्पनः सुसंक्रुद्धो राक्षसानां चमूपतिः । संहर्षयति तान् सर्वान् राक्षसान् भीमविक्रमान् ॥ २८ ॥ हरयस्त्वपि रक्षांसि महाद्रुममहाश्मभिः । विदारयन्त्यभिक्रम्य शस्त्राण्याच्छिद्य वीर्यतः ॥ २९ ॥ एतस्मिन्नन्तरे वीरा हरयः कुमुदो नलः । मैन्दश्च द्विविदः क्रुद्धाश्चक्रुर्वेगमनुत्तमम् ॥ ३० ॥ ते तु वृक्षैर्महावेगा राक्षसानां चमूमुखे । कदनं सुमहच्चक्रुर्लीलया हरियूथपाः । ममन्थू राक्षसान् सर्वे वानरा गणशो भृशम् ॥ ३१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चपञ्चाशः सर्गः ॥ ५५ ॥

तद्दृष्ट्वा सुमहत् कर्म कृतं वानरसत्तमैः । क्रोधमाहारयामास युधि तीव्रमकम्पनः ॥ १ ॥ क्रोधमूर्च्छितरूपस्तु धून्वन् परमकार्मुकम् । दृष्ट्वा तु कर्म शत्रूणां सारथिं वाक्यमब्रवीत् ॥ २ ॥ तत्रैव तावत्त्वरितं रथं प्रापय सारथे । यत्रैते बहवो घ्नन्ति सुबहून् राक्षसान् रणे ॥ ३ ॥ एतेऽत्र बलवन्तो हि भीमकायाश्च वानराः । द्रुमशैलप्रहरणास्तिष्ठन्ति प्रमुखे मम ॥ ४ ॥ एतान्निहन्तुमिच्छामि समरश्लाघिनो ह्यहम् । एतैः प्रमथितं सर्वं दृश्यते राक्षसं बलम् ॥ ५ ॥ ततः प्रजवनाश्वेन रथेन रथिनां वरः । हरीनभ्यहनत् क्रोधाच्छरजालैरकम्पनः ॥ ६ ॥ न स्थातुं वानराः शेकुः किं पुनर्योद्धुमाहवे । अकम्पनशरैर्भग्नाः सर्वं एव विदुद्रुवुः ॥ ७ ॥

अथाकम्पनवधः षट्पञ्चाशे–तद्दृष्ट्वेत्यादि ॥ १–३ ॥ एत इति । प्रमुखे अग्रे ॥ ४ ॥ ५ ॥ तत इति । प्रजवनाश्वेन वेगवदश्वेन ॥ ६ ॥ ७ ॥

अकम्पन इति । संहर्षयति संभावयामासेत्यर्थः ॥ २८ ॥ शस्त्राण्याच्छिद्य वानराः, परहस्तादिति शेषः ॥ २९–३१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चपञ्चाशः सर्गः ॥ ५५ ॥ (अत्र सर्गविच्छेदः प्रमादादिति कतकः ॥) ॥ १–१४ ॥

तानिति । उपतस्थे अकम्पनसमीपमाजगाम ॥८–११॥ अकम्पनवधार्थाय अकम्पनवधरूपप्रयोजनाय ॥१२॥१३॥ तस्य हनुमतः ॥१४॥ अप्रहरणम्

तान् मृत्युवशमापन्नानकम्पनवशं गतान् । समीक्ष्य हनुमान् ज्ञातीनुपतस्थे महाबलः ॥ ८ ॥ तं महाप्लवगं दृष्ट्वा सर्वे प्लवगयूथपाः । समेत्य समरे वीराः संहृष्टाः पर्यवारयन् ॥ ९ ॥ अवस्थितं हनूमन्तं ते दृष्ट्वा हरियूथपाः । बभूवुर्बलवन्तो हि बलवन्तं समाश्रिताः ॥ १० ॥ अकम्पनस्तु शैलाभं हनूमन्तमवस्थितम् । महेन्द्र इव धाराभिः शरैरभिववर्ष ह ॥११॥ अचिन्तयित्वा बाणौघान् शरीरे पतितान् शितान् । अकम्पनवधार्थाय मनो दध्रे महाबलः ॥ १२ ॥ स प्रसह्य महातेजा हनूमान् मारुतात्मजः । अभिदुद्राव तद्रक्षः कम्पयन्निव मेदिनीम् ॥ १३ ॥ तस्याभिनर्दमानस्य दीप्यमानस्य तेजसा । बभूव रूपं दुर्धर्षं दीप्तस्येव विभावसोः ॥ १४ ॥ आत्मानमप्रहरणं ज्ञात्वा क्रोधसमन्वितः । शैलमुत्पाटयामास वेगेन हरिपुङ्गवः ॥ १५ ॥ तं गृहीत्वा महाशैलं पाणिनैकेन मारुतिः । स विनद्य महानादं भ्रामयामास वीर्यवान् ॥ १६ ॥ ततस्तमभिदुद्राव राक्षसेन्द्रमकम्पनम् । पुरा हि नमुचिं सङ्ख्ये वज्रेणेव पुरन्दरः ॥ १७ ॥ अकम्पनस्तु तद्दृष्ट्वा गिरिशृङ्गं समुद्यतम् । दूरादेव महाबाणैरर्धचन्द्रैर्व्यदारयत् ॥१८॥ तत्पर्वताग्रमाकाशे रक्षोबाणविदारितम् । विशीर्णं पतितं दृष्ट्वा हनुमान् क्रोधमूर्च्छितः ॥१९॥ सोऽश्वकर्णं समासाद्य रोषदर्पान्वितो हरिः । तूर्णमुत्पाटयामास महागिरिमिवोच्छ्रितम् ॥ २० ॥ तं गृहीत्वा महास्कन्धं सोऽश्वकर्णं महाद्युतिः । प्रहस्य परया प्रीत्या भ्रामयामास संयुगे ॥ २१ ॥

अनायुधम् ॥ १५ ॥ महानादं विनद्य महानादं कृत्वेत्यर्थः ॥ १६ ॥ तत इति । तत्र सः शैलेनेत्यध्याहार्यम् । स हनुमान् अकम्पनं पुरन्दरो नमुचिं यथा तथा शैलेन वज्रेणेवाभिदुद्राव ॥ १७ ॥ १८ ॥ क्रोधमूर्च्छितः, अभूदिति शेषः ॥ १९–२१ ॥

आत्मानमिति । अप्रहरणम् अनायुधम् ॥ १५–१८ ॥ तत्पर्वताग्रमिति । क्रोध मूर्च्छितः, अभूदिति शेषः ॥ १९–२१ ॥

For Private And Personal Use Only

चरणैः चरणन्यासैः । दारयत् अदारयत् ॥ २२ ॥ पदातितया गच्छन्तीति पदातिगाः तान् ॥ २३–२६ ॥ प्ररूढः प्ररूढवृक्षः ॥२७–२९॥ वानरेन्द्रेण

प्रधावन्नूरुवेगेन प्रभञ्जंस्तरसा द्रुमान् । हनुमान् परमक्रुद्धश्चरणैर्दारयत् क्षितिम् ॥ २२ ॥ गजांश्च सगजारोहान् सरथान् रथिनस्तथा । जघान हनुमान् धीमान् राक्षसांश्च पदातिगान् ॥ २३ ॥ तमन्तकमिव क्रुद्धं समरे प्राण हारिणम् । हनुमन्तमभिप्रेक्ष्य राक्षसा विप्रदुद्रुवुः ॥२४॥ तमापतन्तं संक्रुद्धं राक्षसानां भयावहम् । ददर्शाकम्पनो वीरश्चुक्रोध च ननाद च ॥ २५ ॥ स चतुर्दशभिर्बाणैः शितैर्देहविदारणैः । निर्बिभेद हनूमन्तं महावीर्यमकम्पनः ॥ २६ ॥ स तदा प्रतिविद्धस्तु बह्वीभिः शरवृष्टिभिः । हनुमान् ददृशे वीरः प्ररूढ इव सानुमान् ॥ २७ ॥ विरराज महाकायो महावीर्यो महामनाः । पुष्पिताशोकसङ्काशो विधूम इव पावकः ॥ २८ ॥ ततोऽन्यं वृक्षमुत्पाट्य कृत्वा वेगमनुत्तमम् । शिरस्यभिजघानाशु राक्षसेन्द्रमकम्पनम् ॥२९॥ स वृक्षेण हतस्तेन सक्रोधेन महात्मना । राक्षसो वानरेन्द्रेण पपात च ममार च ॥ ३० ॥ तं दृष्ट्वा निहतं भूमौ राक्षसेन्द्रमकम्पनम् । व्यथिता राक्षसाः सर्वे क्षितिकम्प इव द्रुमाः ॥ ३१ ॥ त्यक्तप्रहरणाः सर्वे राक्षसास्ते पराजिताः । लङ्कामभिययुस्त्रस्ता वानरैस्तैरभिद्रुताः ॥ ३२ ॥ ते मुक्तकेशाः सम्भ्रान्ता भग्नमानाः पराजिताः । स्रवच्छ्रमजलैरङ्गैः श्वसन्तो विप्रदुद्रुवुः ॥३३॥ अन्योन्यं प्रममन्थुस्ते विविशुर्नगरं भयात् । पृष्ठतस्ते सुसंमूढाः प्रेक्षमाणा मुहुर्मुहुः ॥ ३४ ॥ तेषु लङ्कां प्रविष्टेषु राक्षसेषु महाबलाः । समेत्य हरयः सर्वे हनुमन्तमपूजयन् ॥ ३५ ॥

कर्त्रा । तेन वृक्षेण हत इत्यन्वयः ॥ ३० ॥ क्षितिकम्पे भूकम्पे ॥ ३१–३५ ॥

चरणैः चरणन्यासैः ॥ २२–२६ ॥ स इति । प्ररूढः प्ररूढवृक्षः ॥ २७–२९ ॥ स वृक्षेणेति । चतुष्पर्गामकम्पनवधः ॥ ३०–३५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सोऽपीति । प्रत्यभ्यपूजयत् भवत्साहाय्येनैव मया जितमित्येवमिति भावः ॥ ३६-३९ ॥ चतुर्थामकम्पनवधः ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्पञ्चाशः सर्गः ॥ ५६ ॥

सोऽपि प्रहृष्टस्तान् सर्वान् हरीन् प्रत्यभ्यपूजयत् । हनुमान् सत्त्वसम्पन्नो यथार्हमनुकूलतः ॥ ३६ ॥ विनेदुश्च यथाप्राणं हरयो जितकाशिनः । चकर्षुश्च पुनस्तत्र सप्राणानपि राक्षसान् ॥ ३७ ॥ स वीरशोभामभजन्महाकपिः समेत्य रक्षांसि निहत्य मारुतिः । महासुरं भीममभित्रनाशनं यथैव विष्णुर्बलिनं चमूमुखे ॥ ३८ ॥ अपूजयन् देवगणास्तदा कपिं स्वयं च रामोऽतिबलश्च लक्ष्मणः । तथैव सुग्रीवमुखाः प्लवङ्गमा विभीषणश्चैव महाबलस्तथा ॥ ३९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षट्पञ्चाशः सर्गः ॥ ५६ ॥

अकम्पनवधं श्रुत्वा क्रुद्धो वै राक्षसेश्वरः । किंचिद्दीनमुखश्चापि सचिवांस्तानुदैक्षत ॥ १ ॥ स तु ध्यात्वा मुहूर्तं तु मन्त्रिभिः संविचार्य च । ततस्तु रावणः पूर्वदिवसे राक्षसाधिपः । पुरीं परिययौ लङ्कां सर्वान् गुल्मानवेक्षितुम् ॥ २ ॥ तां राक्षसगणैर्गुप्तां गुल्मैर्बहुभिरावृताम् । ददर्श नगरीं लङ्कां पताकाध्वजमालिनीम् ॥ ३ ॥ रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः । उवाचामर्षतः काले प्रहस्तं युद्धकोविदम् ॥ ४ ॥ पुरस्योपनिविष्टस्य सहसा पीडितस्य वा । नान्यं युद्धात् प्रपश्यामि मोक्षं युद्धविशारद ॥ ५ ॥

अथ युद्धाय प्रहस्तनिर्याणं सप्तपञ्चाशे—अकम्पनवधमित्यादि ॥ १ ॥ स त्वित्यादिसार्धश्लोक एकान्वयः । ततः स रावणः पुरीं परिययौ । पूर्वदिवसे दिवसस्य पूर्वभागे, पूर्वाह्ण इत्यर्थः । गुल्मान् सेनाव्यूहान् ॥ २ ॥ ३ ॥ काले निदेशार्हसमये ॥ ४ ॥ उप समीपे निविष्टं परसेनानिवेशो यस्य

॥३६-३९॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षट्पञ्चाशः सर्गः ॥ ५६ ॥ १ ॥ पूर्वदिवसे पूर्वाह्णे ॥ २-४ ॥ उपनिविष्टस्य

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्य, उपरुद्धस्येत्यर्थः । अत एव वाशब्दश्चार्थे । पीडितस्य च मोक्षं मोक्षोपायम् ॥ ५ ॥ वहेयुरिति शकि लिङ् ॥ ६ ॥ स इति । शीघ्रमादाय । परिगृह्य स्वाधीनं कृत्वा । यत्र वनौकसो वर्तन्ते तत्र इतो निर्याहीत्यन्वयः ॥ ७ ॥ चपला धैर्यरहिता ॥ ८ ॥ ९ ॥ अवशः प्रभुत्वरहितः । "वश

अहं वा कुम्भकर्णो वा त्वं वा सेनापतिर्मम । इन्द्रजिद्वा निकुम्भो वा वहेयुर्भारमीदृशम् ॥ ६ ॥ स त्वं बलमतः शीघ्रमादाय परिगृह्य च । विजयायाभिनिर्याहि यत्र सर्वे वनौकसः ॥७॥ निर्याणादेव ते नूनं चपला हरिवाहिनी । नर्दतां राक्षसेन्द्राणां श्रुत्वा नादं द्रविष्यति ॥ ८ ॥ चपला ह्यविनीताश्च चलचित्ताश्च वानराः । न सहिष्यन्ति ते नादं सिंहनादमिव द्विपाः ॥ ९ ॥ विद्रुते च बले तस्मिन् रामः सौमित्रिणा सह । अवशस्ते निरालम्बः प्रहस्त वश मेष्यति ॥ १० ॥ आपत् संशयिता श्रेयो न तु निस्संशयीकृता । प्रतिलोमानुलोमं वा यद्वा नो मन्यसे हितम् ॥ ११ ॥ रावणेनैवमुक्तस्तु प्रहस्तो वाहिनीपतिः । राक्षसेन्द्रमुवाचेदमसुरेन्द्रमिवोशना ॥ १२ ॥

मिच्छाप्रभुत्वयोः" इति विश्वः । हे प्रहस्त । ते तव वशमेष्यतीत्यन्वयः ॥ १० ॥ ननु युद्धे सत्यात्महानेरपि सम्भवात्तदकरणमेव श्रेय इत्याशङ्क्य तथात्वे शत्रुकृताया हानेर्निश्चितत्वात् युद्धकरणे तस्याः सन्देहात् "यत्रायुद्धे ध्रुवो मृत्युर्युद्धे जीवितसंशयः । तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः॥" इत्युक्तरीत्या इदानीं युद्धमेव श्रेय इत्याह–आपदिति । संशयिता वितर्किता । आपत् मृतिः । श्रेयः युद्धे मृतिः श्रेयस्करीत्यर्थः । जयापजययो र्व्यवस्थितत्वेन पाक्षिकजयस्यापि सम्भवादिति भावः । पक्षान्तरं प्रतिक्षिपति–न त्विति । निस्संशयीकृता निश्चिता मृतिस्तु युद्धं विना शत्रुभिर्मरणं तु न श्रेयः एतन्मम मतम् । त्वन्मतं तु किमित्याह–प्रतिलोमेति । प्रतिलोमं मदुक्तप्रकारविपरीतप्रकारम् । अनुलोमं वा नोऽस्माकं यद्धितं मन्यसे,

उप समीपे निविष्टं परसेनानिवेशो यस्य तत्तथोक्तं तस्य, उपरुद्धस्येति यावत् । अत एव वाशब्दश्चार्थे । पीडितस्य च । मोक्षं मोक्षोपायम् ॥ ५–९ ॥ विद्रुत इति । अवशः वशः प्रभुत्वम् तद्रहितः । "वशमिच्छाप्रभुत्वयोः" इति विश्वः ॥१०॥ "अवशस्तु निरालम्बः प्रहस्त वशमेष्यति" इत्युक्त्यनन्तरं प्रत्युत्तराप्रदानेन युद्धानुत्सुक्तं मत्वा "यत्रायुद्धे ध्रुवो मृत्युर्युद्धे जीवितसंशयः । तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः ॥" इति नीतिशास्त्रमवलम्ब्याह–आपदिति । निस्संशयीकृता युद्धाकरणेऽपि निश्चिता आपत् येन श्रेयः श्रेयस्करी न भवति किन्तु निस्संशयीकृता आपद मृतिः श्रेयः श्रेयस्करी युद्धे असन्दिग्धा मृतिः

For Private And Personal Use Only

तद्वदेति शेषः। वेति पक्षान्तरे। अहं तदेव श्रेयो मन्ये त्वमन्यच्च यदि मन्यसे तद्वद। तदेवास्माकं हितमित्यर्थः ॥ ११॥ १२ ॥ मन्त्रसमये मया यथा निर्धारितं तत्तथा प्रवृत्तमित्याह–राजन्नित्यादिना। कुशलैर्मन्त्रिभिः विभीषणादिभिः सह नः अस्माभिः इदं वक्ष्यमाणं मन्त्रितपूर्वम्। तर्हि मन्त्रितत्वे तथा किमिति नानुष्ठितम्? तत्राह विवाद इति। परस्परं समवेक्ष्य बहुमतितया आलोच्य। नः अस्माकं विवादश्चापि वृत्तः। येन विभीषणो निरगच्छ

राजन् मन्त्रितपूर्वं नः कुशलैः सह मन्त्रिभिः। विवादश्चापि नो वृत्तः समवेक्ष्य परस्परम् ॥ १३ ॥ प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया। अप्रदाने पुनर्युद्धं दृष्टमेतत्तथैव नः ॥ १४ ॥ सोऽहं दानैश्च मानैश्च सततं पूजितस्त्वया। सान्त्वैश्च विविधैः काले किं न कुर्यां प्रियं तव ॥ १५ ॥ न हि मे जीवितं रक्ष्यं पुत्रदारधनानि वा। त्वं पश्य मां जुहूषन्तं त्वदर्थं जीवितं युधि ॥१६॥ एवमुक्त्वा तु भर्तारं रावणं वाहिनीपतिः। उवाचेदं बलाध्यक्षान् प्रहस्तः पुरतः स्थितान् ॥१७॥ समानयत मे शीघ्रं राक्षसानां महद्बलम् ॥ १८ ॥

दिति भावः ॥ १३ ॥ मन्त्रितमर्थमाह–प्रदानेन त्विति। सीतायाः प्रदानेन तु श्रेयः, अप्रदाने तु युद्धमिति च मम व्यवसितमित्यर्थः। सर्वमरणं युद्धशब्देनोपचर्यते। यथैव व्यवसितं तथैव नः अस्माभिः दृष्टं च॥ १४॥ एवं स्वमतमुक्त्वा सम्प्रति त्वन्मतानुसारेण युद्धमेव करिष्यामीत्याह–सोऽहमित्यादिना। दानैः भूषणादिप्रदानैः। मानैः त्वदधीनं जीवितमित्यादिप्रियभाषणैः। पूजितः उत्कर्षमापादितः। काले आपत्काले। किं न कुर्याम्, जीवितत्यागमपि कुर्यामित्यर्थः ॥ १५ ॥ उक्तमेव विशदयति–न हीति। जुहूषन्तं होतुमिच्छन्तम्। जुहोतेः सन् प्रत्ययः। अनेन जीवितस्य हविष्ट्वं युद्धस्याग्निरूपत्वं च गम्यते। तेन चात्महविःप्रदानस्य महाफलत्वं युद्धसङ्गतिमात्रेण स्वविनाशश्च द्योत्यते। गतानुगतिकास्तु जुहूषन्तं त्यक्तुमिच्छन्तमित्यर्थः, जुहोतेर्दानार्थत्वादित्याहुः ॥ १६–१८ ॥

श्रेयः, युद्धे सति जयपराजययोरव्यवस्थितत्वेन पाक्षिकजयसद्भावाद्युद्धमेव श्रेय इत्यर्थः। अत्र मदुक्तार्थविषये प्रतिलोमानुलोमं वा प्रतिलोमं वा अनुलोमं वा अनयोर्यद्धितं मन्यसे, तद्वदेति शेषः। यद्वा प्रतिलोमं प्रतिकूलमिति यन्मन्यसे। अनुलोममनुकूलमिति यन्मन्यसे अन्यद्वा एतद्व्यतिरिक्तम् यद्वेतरन्मन्यसे, तद्वदेति शेषः। प्रतिलोमेत्यविभक्तिको निर्देशः ॥ ११–१३ ॥ मन्त्रसमये यथा निर्धारितं तत्तथैव दृश्यत इत्याह–प्रदानेन त्विति ॥ १४ ॥ त्वन्मतानुसारेण युद्धमेव करिष्यामीत्याशयेनाह–सोऽहमिति ॥ १५ ॥ जुहूषन्तं त्यक्तुमिच्छन्तम् ॥ १६–२२ ॥ ॥१६६॥

मद्बाणेति। हतानां काननौकसां तृप्यन्त्वित्यन्वयः। "पूरणगुण–" इत्यादिना समासप्रतिषेधेन सुहितार्थयोगे ज्ञापिता षष्ठी ॥१९–२१॥ हुताशनमिति। हुताशनं तर्पयताम् अग्नौ बहुधा शान्तिहोमानाचरताम्। ब्राह्मणांश्च नमस्यतां गन्धपुष्पादिभिरर्चयतां सम्बन्धी आज्यगन्धप्रतिवहः ब्राह्मणार्चनकुसुमा

मद्बाणशतवेगेन हतानां च रणाजिरे। अद्य तृप्यन्तु मांसादाः पक्षिणः काननौकसाम् ॥१९॥ इत्युक्तास्ते प्रहस्तेन बलाध्यक्षाः कृतत्वराः। बलमुद्योजयामासुस्तस्मिन् राक्षसमन्दिरे ॥२०॥ सा बभूव मुहूर्तेन तिग्मनानाविधायुधैः। लङ्का राक्षसवीरैस्तैर्गजैरिव समाकुला ॥ २१ ॥ हुताशनं तर्पयतां ब्राह्मणांश्च नमस्यताम् । आज्यगन्धप्रतिवहः सुरभिर्मारुतो ववौ ॥ २२ ॥ स्रजश्च विविधाकारा जगृहुस्त्वभिमन्त्रिताः । सङ्ग्रामसज्जाः संहृष्टा धारयन् राक्षसास्तदा ॥ २३ ॥ सधनुष्काः कवचिनो वेगादाप्लुत्य राक्षसाः। रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन् ॥ २४ ॥ अथामन्त्र्य च राजानं भेरीमाहत्य भैरवाम् । आरुरोह रथं दिव्यं प्रहस्तः सज्जकल्पितम् ॥ २५ ॥ हयैर्महाजवैर्युक्तं सम्यक् सूतसुसंयतम् । महाजलदनिर्घोषं साक्षाच्चन्द्रार्कभास्वरम् ॥ २६ ॥ उरगध्वजदुर्द्धर्षं सुवरूथं स्वपस्करम्। सुवर्णजालसंयुक्तं प्रहसन्तमिव श्रिया ॥ २७ ॥

दिना सुरभिर्मारुतो ववौ ॥ २२ ॥ सङ्ग्रामसज्जाः सङ्ग्रामायोद्युक्ता राक्षसाः अभिमन्त्रिताः विजयमन्त्रेणाभिमन्त्रिताः स्रजः जगृहुः। धारयन् अधारयंश्च ॥ २३ ॥ रावणं प्रेक्ष्य स्वामितया प्रधानं रावणमभिवन्द्येत्यर्थः ॥ २४ ॥ अथेत्यादिश्लोकत्रयम् । सज्जकल्पितं सज्जमुद्युक्तम्, सर्वायुधादिसमवेतत्वेन कल्पितमित्यर्थः। सुसंयतं नियमितम्। साक्षाच्चन्द्रार्कभास्वरं चन्द्रार्कतुल्यं भास्वरं च। "साक्षात् प्रत्यक्षतुल्ययोः" इत्यमरः। आह्लादकत्वेन चन्द्रसाम्यम्। तेजसाऽर्कसाम्यम्। सुवरूथं शोभनरथगुप्तिकम्। "रथगुप्तिर्वरूथो ना" इत्यमरः। स्वपस्करं शोभनरथाङ्गम्। "अपस्करो रथाङ्गम्" इति

स्रजश्चेति। सङ्ग्रामसज्जाः सङ्ग्रामार्थं सन्नद्धा इत्यर्थः ॥ २३ ॥ २४ ॥ सज्जकल्पितं सन्नद्धत्वेन कल्पितम्, सर्वायुधादिसमेतं कल्पितमित्यर्थः ॥ २५ ॥ २६ ॥ सुवरूथं शोभनरथगुप्तिकम्। "रथगुप्तिर्वरूथो ना" इत्यमरः। स्वपस्करं शोभनरथाङ्गम्। "अपस्करो रथाङ्गं स्यात" इति निघण्टुः ॥ २७–३८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निपातनात् सुडागमः । जालं गवाक्षम् । प्रहसन्तमिव श्रिया स्वकान्त्या सर्वकान्तिमद्वस्तु परिहसन्तमिव स्थितम्॥२५-२७॥ ततस्तमिति । ततः आरोहणानन्तरम् ॥ २८ ॥ तत इत्यादिसार्धश्लोक एकान्वयः । पर्जन्यः मेघविशेषः ॥२९॥ पुरस्सराः अग्रगाः ॥३०॥३१॥ व्यूढेन सन्नद्धकङ्कटेन । "व्यूढः

ततस्तं रथमास्थाय रावणार्पितशासनः । लङ्काया निर्ययौ तूर्णं बलेन महता वृतः ॥ २८ ॥ ततो दुन्दुभिनिर्घोषः पर्जन्यनिनदोपमः । वादित्राणां च निनदः पूरयन्निव सागरम् । शुश्रुवे शङ्खशब्दश्च प्रयाते वाहिनीपतौ ॥ २९ ॥ निनदन्तः स्वरान् घोरान् राक्षसा जग्मुरग्रतः । भीमरूपा महाकायाः प्रहस्तस्य पुरस्सराः ॥ ३० ॥ नरान्तकः कुम्भहनुर्महानादः समुन्नतः । प्रहस्तसचिवा ह्येते निर्ययुः परिवार्य तम् ॥ ३१ ॥ व्यूढेनैव सुघोरेण पूर्वद्वारात् स निर्ययौ । गजयूथनिकाशेन बलेन महता वृतः॥३२॥ सागरप्रतिमौघेन वृतस्तेन बलेन सः । प्रहस्तो निर्ययौ तूर्णं कालान्तकयमोपमः ॥३३॥ तस्य निर्याणघोषेण राक्षसानां च नर्दताम् । लङ्कायां सर्वभूतानि विनेदुर्विकृतैः स्वरैः ॥ ३४ ॥ व्यभ्रमाकाशमाविश्य मांसशोणितभोजनाः । मण्डलान्यपसव्यानि खगाश्चक्रू रथं प्रति ॥३५॥ वमन्त्यः पावकज्वालाः शिवा घोरं ववाशिरे । अन्तरिक्षात् पपातोल्का वायुश्च परुषो ववौ ॥ ३६ ॥ अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे ॥ ३७ ॥ मेघाश्च खरनिर्घोषा रथस्योपरि रक्षसः । ववृषू रुधिरं चास्य सिषिचुश्च पुरस्सरान् ॥ ३८ ॥ केतुमूर्धनि गृध्रोऽस्य निलीनो दक्षिणामुखः । तुदन्नुभयतः पार्श्वं समग्रामहरत् प्रभाम् ॥ ३९ ॥

सन्नद्धकङ्कटः" इत्यमरशेषे ॥३२॥ कालान्तकयमोपमः काले प्रलयकाले अन्तको विनाशको यो यमस्तदुपमः ॥३३॥ तस्य प्रहस्तस्य निर्याणघोषेण निर्गमकालिकसिंहनादेन राक्षसानां निर्याणघोषेण च प्रयोजनेन सर्वभूतानि विकृतैः सर्वैरुपलक्षितानि सन्ति विनेदुरिति सम्बन्धः ॥ ३४ ॥ अपसव्यानि अप्रदक्षिणानि । व्यभ्रमित्यनेन मण्डलकरणस्याकालिकत्वमुक्तम् । साभ्रकाले हि पक्षिणो मण्डलान्याचरन्ति । यद्वाऽत्र खगाः गरुडाः । अपसव्यं प्रदक्षिणम् । "अपसव्यन्तु दक्षिणम्" इत्यमरः । गरुडानां ह्यप्रदक्षिणं शोभनम् ॥ ३५ ॥ वमन्त्य इत्यादि । ग्रहाः चन्द्रसूर्यादयः । तत्काले ग्रहयुद्धमासीदित्यर्थः ॥३६-३८॥ केत्विति । तुदन्नुभयतःपार्श्वम् उभौ पक्षौ मुखेन कण्डूयमानः । समग्रामहरत् प्रभाम्, प्रहस्तस्येति शेषः । ध्वजाग्रारूढगृध्रदर्शनेन प्रहस्त ॥१६६॥

केत्विति । तुदन् उभयतःपार्श्वम् उभावपि पार्श्वौ चञ्चुना व्यथयन् प्रभामहरत्, प्रहस्तस्येति शेषः ॥ ३९ ॥

मुखं विवर्णमासीदित्यर्थः ॥३९॥ सूतस्य सूतजातस्य । हयसादिनः हयप्रस्थापकस्य । प्रतोदः तोत्रम् । यद्वा सूतस्य सूतकुलोत्पन्नस्य, अभ्यस्तप्रतोद धारणस्यापीत्यर्थः । हयसादिनः अश्वगतिशिक्षकस्य ॥४०॥ वसुदुर्लभा अश्वसुदुर्लभा । भास्वरा वसुदुर्लभेति पाठः । निर्याणश्रीः निर्गमकालिकश्रीः ।

सारथेर्बहुशश्चास्य सङ्ग्राममवगाहतः । प्रतोदो न्यपतद्धस्तात् सूतस्य हयसादिनः ॥४०॥ निर्याणश्रीश्च याऽस्यासी द्भास्वरा वसुदुर्लभा । सा ननाश मुहूर्तेन समे च स्खलिता हयाः ॥ ४१ ॥ प्रहस्तं त्वभिनिर्यान्तं प्रख्यातबल पौरुषम् । युधि नानाप्रहरणा कपिसेनाऽभ्यवर्तत ॥ ४२ ॥ अथ घोषः सुतुमुलो हरीणां समजायत । वृक्षानारु जतां चैव गुर्वीरागृह्णतां शिलाः ॥ ४३ ॥ नदतां राक्षसानां च वानराणां च गर्जताम् । उभे प्रमुदिते सैन्ये रक्षो गणवनौकसाम् ॥ ४४ ॥ वेगितानां समर्थानामन्योन्यवधकांक्षिणाम् । परस्परं चाह्वयतां निनादः श्रूयते महान् ॥ ४५ ॥ ततः प्रहस्तः कपिराजवाहिनीमभिप्रतस्थे विजयाय दुर्मतिः । विवृद्धवेगां च विवेश तां चमूं यथा मुमूर्षुः शलभो विभावसुम् ॥ ४६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तपञ्चाशः सर्गः॥५७॥

निरुत्साहः प्रहस्तोऽभूदित्यर्थः । स्खलिताः चस्खलुः । कर्तरि क्तः ॥ ४१ ॥ नानाप्रहरणा शिलावृक्षादिनानाप्रहरणा ॥ ४२ ॥ अथेति । आरुजताम् उन्मूलयताम् । आगृह्णताम् आ समन्तात् गृह्णताम् ॥ ४३ ॥ नदतामिति त्रिपादश्लोकः । रक्षोगणवनौकसामित्युत्तरशेषः ॥ ४४ ॥ ४५ ॥ कपिराज वाहिनीमभिप्रतस्थे तां चमूं विवेश च ॥ ४६ ॥ इति श्रीगोविन्दराज० श्रीरामायण० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तपञ्चाशः सर्गः ॥५७॥

सारथेरिति । प्रतोदः तोत्रम् । सूतस्य सूतवंशोत्पन्नस्य । हयसादिनः अश्वगतिशिक्षाविचक्षणस्य ॥ ४०–४३ ॥ नदतामिति । रक्षोगणवनौकसामित्यस्य निनादः श्रूयते इत्युत्तरेण सम्बन्धः ॥ ४४–४६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तपञ्चाशः सर्गः ॥ ५७ ॥

स०–सूतस्य तद्वंश्यस्य । हयसादिनः हयानश्वान् सादयति गमयति यथेष्टमिति स तथा । तादृशस्यापि सारथेः हस्तात् प्रतोदः तोत्रम् । न्यपतत् पपात । थम् अन्नमस्यास्तीति मत्वर्थे इकारः । "अन्नं थम्" इति हि श्रुतिः । सारेण अरसहितेन चक्रेण थिः सारथिः तस्येति वा । हयैरेवानुबन्धनिमित्तैः आदिभिः राक्षसैः सहितः स तथा तस्य सूतस्य सारथेः । " आदिनो राक्षसाः प्रोक्ताः " इति भागवततात्पर्यात् । सूतः सुष्ठु ऊतः प्रतोदो यस्येति वा । सुदुर्लभा उत्तरत्रानेवमागमनात् ॥ ४० ॥ **विजयाय दुर्मतिः** अपशकुनैरिव गतमृतैः स्वीयैर्दृष्टैः श्रुतैरपि विजयभमोऽस्यास्तीति दुर्मतिरिति मन्तव्यम् ॥ ४६ ॥

For Private And Personal Use Only

अथ प्रहस्तवधोऽष्टपञ्चाशे–ततः प्रहस्तमित्यादि । सस्मितमिति । बलवच्छत्रुदर्शनहर्षेणेति भावः । तदेव व्यञ्जयति अरिन्दम इति ॥ १ ॥ क एष इति । ननु प्रहस्तः पूर्वद्वारान्निर्गतः, रामस्तु उत्तरद्वारि तिष्ठति स्म, कथमस्यानेकयोजनस्थसाक्षात्कारः ? उच्यते; आप्तवचनेन प्रत्यक्षतुल्येन महाकायः कश्चन गच्छतीति विदित्वा एष इत्याह । आचक्ष्व, तमिति शेषः॥२॥३॥ एष इत्यादिसार्धश्लोक एकान्वयः । तस्य रावणस्य असह्यतया नामा

ततः प्रहस्तं निर्यान्तं दृष्ट्वा भीमपराक्रमम् । उवाच सस्मितं रामो विभीषणमरिन्दमः ॥ १ ॥ क एष सुमहाकायो बलेन महता वृतः । [आगच्छति महावेगः किंरूपबलपौरुषः ।] आचक्ष्व मे महाबाहो वीर्यवन्तं निशाचरम् ॥ २ ॥ राघवस्य वचः श्रुत्वा प्रत्युवाच विभीषणः ॥ ३ ॥ एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः । लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृतः । वीर्यवानस्त्रविच्छूरः प्रख्यातश्च पराक्रमे ॥ ४ ॥ ततः प्रहस्तं निर्यान्तं भीमं भीमपराक्रमम् । गर्जन्तं सुमहाकाय राक्षसैरभिसंवृतम् ॥ ५ ॥ ददर्श महती सेना वानराणां बलीयसाम् । अतिसञ्जातरोषाणां प्रहस्तमभिगर्जताम् ॥ ६ ॥ खड्गशक्त्यृष्टिबाणाश्च शूलानि मुसलानि च । गदाश्च परिघाः प्रासा विविधाश्च परश्वधाः ॥ ७ ॥ धनूंषि च विचित्राणि राक्षसानां जयैषिणाम् । प्रगृहीतान्यशोभन्त वानरानभिधावताम् ॥ ८ ॥ जगृहुः पादपांश्चापि पुष्पितान् वानरर्षभाः । शिलाश्च विपुला दीर्घा योद्धुकामाः प्लवङ्गमाः ॥ ९ ॥

ग्रहणम् । संवृतशब्दोऽन्तर्भावितण्यर्थः । रावणेन लङ्कायां स्वबलस्य तृतीयभागेन संवारित इत्यर्थः । लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृत इति पाठः । रावणस्य सैन्येषु भागत्रयमस्याधीनमिति भावः । वीर्यवान् बलवान् । "वीर्यं बले प्रभावे च" इत्यमरः । शूरः रणेष्वपरावृत्तः । पराक्रमे परपरिभवने । अत्रेति करणं बोध्यम् ॥ ४ ॥ तत इत्यादिश्लोकद्वयम् । भीमं भयङ्करवेषम् ॥ ५ ॥ ६ ॥ खड्गेत्यादिश्लोकद्वयम् । राक्षसानामिति तृतीयार्थे षष्ठी । राक्षसैरित्यर्थः ॥७॥८॥ जगृहुरिति । वानरश्रेष्ठत्वेऽप्यवानरत्ववारणाय प्लवङ्गमा इत्युक्तम् । यद्वा प्लवङ्गमाः युद्धोत्साहेन प्लवगत्या गच्छन्तः। असंज्ञायां खशार्षः॥९–११॥ ॥१६७॥

॥ १–३ ॥ लङ्कायां राक्षसेन्द्रस्य त्रिभागबलसंवृतः लङ्कास्थराक्षसेन्द्रसंबन्धिबलतृतीयभागेन संवृत इत्यर्थः ॥ ४ ॥ ततः प्रहस्तमित्यादि श्लोकद्वयमेकं वाक्यम् । प्रहस्तमभिगर्जतां बलीयसां वानराणां महती सेना निर्यान्तं प्रहस्तं ददर्शेति सम्बन्धः ॥ ५ ॥ ६ ॥ खड्गशक्त्यृष्टीत्यादि श्लोकद्वयमेकं वाक्यम् । वानरानभि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शूलैरित्यादि । परमायुधैः चक्रैः । "चक्रं तु परमायुधम्" इति निघण्टुः ॥१२॥ शूलपातादिकार्यं दर्शयति—निरुच्छ्वासा इत्यादि । निरुच्छ्वासाः कृताः । इषुसन्धानसन्दिताः इषव एव सन्धानानि बन्धनरज्जवः तैः सन्दिताः संस्यूताः । स्फुरन्तः लुठन्तः । अवदारिताः भिन्नाः ॥ १३॥१४॥ वानरैरित्यादि ।

तेषामन्योन्यमासाद्य सङ्ग्रामः सुमहानभूत् । बहूनामश्मवृष्टिं च शरवृष्टिं च वर्षताम् ॥ १० ॥ बहवो राक्षसा युद्धे बहून् वानरयूथपान् । वानरा राक्षसांश्चापि निजघ्नुर्बहवो बहून् ॥ ११ ॥ शूलैः प्रमथिताः केचित् केचिच्च परमायुधैः । परिघैराहताः केचित् केचिच्छिन्नाः परश्वधैः ॥ १२ ॥ निरुच्छ्वासाः कृताः केचित् पतिता धरणीतले । विभिन्नहृदयाः केचिदिषुसन्धानसन्दिताः ॥१३॥ केचिद्द्विधा कृताः खड्गैः स्फुरन्तः पतिता भुवि । वानरा राक्षसैः शूलैः पार्श्वतश्चावदारिताः ॥ १४ ॥ वानरैश्चापि संक्रुद्धै राक्षसौघाः समन्ततः । पादपैर्गिरिशृङ्गैश्च सम्पिष्टा वसुधातले ॥१५॥ वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्च हता भृशम् । वेमुः शोणितमास्येभ्यो विशीर्णदशनेक्षणाः ॥१६॥ आर्तस्वनं च स्वनतां सिंहनादं च नर्दताम् । बभूव तुमुलः शब्दो हरीणां रक्षसां युधि ॥ १७ ॥ वानरा राक्षसाः क्रुद्धा वीरमार्गमनुव्रताः । विवृत्तनयनाः क्रूराश्चक्रुः कर्माण्यभीतवत् ॥ १८ ॥ नरान्तकः कुम्भहनुर्महानादः समुन्नतः । एते प्रहस्तसचिवाः सर्वे जघ्नुर्वनौकसः ॥ १९ ॥ तेषामापततां शीघ्रं निघ्नतां चापि वानरान् । द्विविदो गिरिशृङ्गेण जघानैकं नरान्तकम् ॥ २० ॥

सम्पिष्टाः चूर्णिताः । वेमुः वमनं चक्रुः ॥१५ ॥१६॥ स्वनतां नर्दतामित्यत्र कुर्वतामित्यर्थः । तुमुलः निबिडितः । रक्षसां वानराणां च ॥ १७ ॥ वानरा इति । वीरमार्गं युद्धकौशलम् । विवृत्तनयनाः भ्रान्तनेत्राः । कर्माणि युद्धकर्माणि । अभीतवत् भयरहितं यथा भवति तथा ॥१८॥१९॥ तेषामिति । इयं

धावतां जयैषिणां राक्षसानां खड्गादीनि अशोभन्तेति सम्बन्धः ॥७–११॥ शूलैरिति । परमायुधैः चक्रैः । "चक्रं तु परमायुधम्" इति निघण्टुः ॥१२॥ इषुसन्धानसन्दिताः इषव एव सन्धानानि बन्धनरज्जवस्तैः सन्दिताः संस्यूताः ॥ १३–१५ ॥ वज्रेति । वेमुः वमनं चक्रुः ॥ १६–१९ ॥ तेषामिति निर्धारणे षष्ठी ॥२०–२२॥

For Private And Personal Use Only

निर्धारणे षष्ठी । एकं मुख्यम् ॥२०॥ दुर्मुख इति । उत्थाय उद्धृत्य । समुन्नताख्यं राक्षसम् अपोथयत् अमारयत् । "पुथ हिंसायाम्" इति धातुः ॥२१॥ ॥२२॥ अथेति । तत्र प्रहस्तसचिवेषु । सन्त्याजयत् सन्तत्याज । स्वार्थिको णिच्प्रत्ययः ॥ २३ ॥ २४॥ आवर्ते संवर्ते । प्रलय इव स्थिते तस्मिन् युद्धे

दुर्मुखः पुनरुत्थाय कपिः स विपुलद्रुमम् । राक्षसं क्षिप्रहस्तस्तु समुन्नतमपोथयत् ॥ २१ ॥ जाम्बवांस्तु सुसंक्रुद्धः प्रगृह्य महतीं शिलाम् । पातयामास तेजस्वी महानादस्य वक्षसि ॥ २२ ॥ अथ कुम्भहनुस्तत्र तारेणासाद्य वीर्यवान् । वृक्षेणाभिहतो मूर्ध्नि प्राणान् सन्त्याजयद्रणे ॥ २३ ॥ अमृष्यमाणस्तत्कर्म प्रहस्तो रथमास्थितः । चकार कदनं घोरं धनुष्पाणिर्वनौकसाम् ॥ २४ ॥ आवर्त इव सञ्जज्ञे उभयोः सेनयोस्तदा । क्षुभितस्याप्रमेयस्य सागरस्येव निस्वनः ॥ २५ ॥ महता हि शरौघेण प्रहस्तो युद्धकोविदः । अर्दयामास संक्रुद्धो वानरान् परमाहवे ॥ २६ ॥ वानराणां शरीरैश्च राक्षसानां च मेदिनी । बभूव निचिता घोरा पतितैरिव पर्वतैः ॥ २७ ॥ सा मही रुधिरौघेण प्रच्छन्ना सम्प्रकाशते । सञ्छन्ना माधवे मासि पलाशैरिव पुष्पितैः ॥ २८ ॥ हतवीरौघवप्रां तु भग्नायुधमहाद्रुमाम् । शोणितौघमहातोयां यमसागरगामिनीम् ॥ २९ ॥ यकृत्प्लीहमहापङ्कां विनिकीर्णान्त्रशैवलाम् । भिन्नकायशिरोमीनामङ्गावयवशाद्वलाम् ॥ ३० ॥

क्षुभितस्य सागरस्य निस्वन इव सेनाया निस्वनः संजज्ञे ॥ २५ ॥ तेषु प्रहस्तप्रकर्षं प्रतिपादयितुं पुनराह—महतेत्यादि ॥२६॥ निचिता व्याप्ता ॥२७॥ ॥२८ ॥ अपरिच्छिन्नवानरवधो वृत्त इति द्योतयितुं युद्धभूमिं नदीत्वेन वर्णयति—हतेत्यादिना । उभयसेनाग्र्ययोर्हतवीराणामोघः समूह एव वप्रं तटं यस्यास्ताम् । भग्नायुधान्येव महाद्रुमाः भग्नाः तीरमहाद्रुमा यस्यास्ताम् । शोणितौघा एव महातोयानि कलुषजलानि यस्यास्ताम् । यमसागरगामिनी युद्धभूमौ यमो जीवग्रहणाय सन्निधत्त इति प्रसिद्धिः । तद्रूपसागरगामिनीम् ॥ २९ ॥ यकृत्प्लीहशब्दौ हृदयस्य दक्षिणवामभागस्थमांसविशेषपरौ । अन्त्राणां ॥१६८॥

कुम्भहनुः तारेणासाद्य तस्य तारस्य वृक्षेण स्वप्राणान् सन्त्याजयदिति सम्बन्धः ॥ २३ ॥ २४ ॥ आवर्त इति । उभयोस्सेनयोरितस्ततो भ्रमणेन आवर्त इव सञ्जज्ञे निस्वनश्च क्षुभितस्य सागरस्य निस्वन इव संजज्ञ इत्यर्थः ॥ २५–२८ ॥ तामेव युद्धभूमिं सावयवरूपकेण वर्णयति—हतवीरौघेत्यादिना । हतवीरौघवप्रां

शैवलत्वनिरूपणं स्तम्बमयत्वात् । भिन्नकायशिरसोर्मीनत्वनिरूपणं स्फुरितवत्त्वात् । अङ्गावयवाः करचरणाद्यङ्गानामवयवाः अङ्गुल्य इत्यर्थः । त एव शाद्वलानि शाद्वलभूजन्यतृणानि यस्यास्ताम् ॥ ३० ॥ कङ्कः धवलवर्णः श्येनः । सारसो हंसविशेषः । मेदः रुधिरमण्डलम् । आर्तानां स्तनितः शब्द इति यावत् । तदेव निम्नोन्नतपतनजनितस्वनो यस्यास्ताम् । यद्यपि रुधिरप्रवाहस्यापि स्वत एव घोषोऽस्ति तथापि रूपकत्वायैवमुक्तम् । कापुरुषाः

गृध्रहंसगणाकीर्णां कङ्कसारससेविताम् । मेदःफेनसमाकीर्णामार्तस्तनितनिस्वनाम् । तां कापुरुषदुस्तारां युद्धभूमिमयीं नदीम् ॥ ३१ ॥ नदीमिव घनापाये हंससारससेविताम् । राक्षसाः कपिमुख्याश्च तेरुस्तां दुस्तरां नदीम् ॥ ३२ ॥ यथा पद्मरजोध्वस्तां नलिनीं गजयूथपाः ॥ ३३ ॥ ततः सृजन्तं बाणौघान् प्रहस्तं स्यन्दने स्थितम् । ददर्श तरसा नीलो विनिघ्नन्तं प्लवङ्गमान् ॥ ३४ ॥ उद्धूत इव वायुः खे महदभ्रबलं बलात् । समीक्ष्याभिद्रुतं युद्धे प्रहस्तो वाहिनीपतिः । रथेनादित्यवर्णेन नीलमेवाभिदुद्रुवे ॥ ३५ ॥ स धनुर्धन्विनां श्रेष्ठो विकृष्य परमाहवे । नीलाय व्यसृजद्बाणान् प्रहस्तो वाहिनीपतिः ॥ ३६ ॥

भीरवः तैः दुस्ताराम् । वृद्धिरार्षी । युद्धभूमिमयीमिति स्वार्थे मयट् । व्यस्तरूपकम् । प्रावर्तयन्नित्यध्याहार्यम् । यद्वा तेरुरिति वक्ष्यमाणमत्राप्यनुषज्यते । अत्र सावयवरूपकालङ्कारः ॥ ३१ ॥ उपमानमुखेनापि तत्तरणं दर्शयति—नदीमिति । घनापाये वर्षान्ते । तां पूर्वत्र रूपकेण दर्शिताम् । केचित्तु अत्रोत्तरश्लोकस्थनदीपदवैयर्थ्यभयेन युद्धभूमिमयीं नदीं प्रवर्तयित्वेत्यध्याहरन्ति ॥ ३२ ॥ उक्तानां रक्षोवानराणामुपमामाह—यथेति । पद्मरजोभिः ध्वस्तां वर्णान्तरं प्राप्तां नलिनीं सरसीं यथा गजयूथपास्तरन्ति । तीर्त्वा रक्ततनवो भवन्तीति यावत् । तथा अरुणशरीरा उत्तेरुरित्यर्थः ॥ ३३ ॥ तत इति । स्यन्दने रथे स्थितम् । बाणौघान् सृजन्तं मुञ्चन्तम् । तरसा वेगेन । प्लवङ्गमान् विनिघ्नन्तं प्रहस्तं ददर्श ॥ ३४ ॥ उद्धूत इत्यादिसार्धश्लोक

हतवीरसमूहतटाम् । यकृत्प्लीहमहापङ्कां यकृत्प्लीहशब्दाभ्यां हृदयदक्षिणवामभागस्थमांसविशेषावुच्येते ॥ २९ ॥ ३० ॥ तामिति । राक्षसाः कपिमुख्याश्च कापुरुषदुस्तारां कापुरुषाः भीरवः तैः दुस्ताराम् । वृद्धिरार्षः । युद्धभूमिमयीं युद्धभूमिप्रचुराम् । तां नदीं तादृशीं नदीम्, प्रवर्तयित्वेति शेषः ॥ ३१ ॥ घनापाये हंससारससेवितां नदीमेतामुक्तविशेषणविशिष्टां नदीं तेरुरिति योजना ॥ ३२–३४ ॥ उद्धूत इत्यादि सार्धश्लोकमेकं वाक्यम् । उद्धूतो वायुः खे महत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेकं वाक्यम् । खे स्वदेशभूते । उद्धूतः उल्बणः वायुः अभ्रबलम् अभ्रजालमिव । युद्धे बलादभिद्रुतम् आभिमुख्येनायान्तं नीलं समीक्ष्य रथेन नीलमेवाभिदुद्रुवे इति योजना ॥ ३५ ॥ ३६ ॥ त इति । रुषिताः पन्नगा इव स्थिताः समाहिताः ऋजवः नीलं विनिर्भिद्य महीं जग्मुः विविशुरित्यर्थः ॥ ३७ ॥

ते प्राप्य विशिखा नीलं विनिर्भिद्य समाहिताः । महीं जग्मुर्महावेगा रुषिता इव पन्नगाः ॥ ३७ ॥ नीलः शरैरभिहतो निशितैर्ज्वलनोपमैः । स तं परमदुर्धर्षमापतन्तं महाकपिः ॥ ३८ ॥ प्रहस्तं ताडयामास वृक्षमुत्पाट्य वीर्यवान् ॥ ३९ ॥ स तेनाभिहतः क्रुद्धो नदन् राक्षसपुङ्गवः । ववर्ष शरवर्षाणि प्लवङ्गानां चमूपतौ ॥ ४० ॥ तस्य बाणगणान् घोरान् राक्षसस्य महाबलः । अपारयन् वारयितुं प्रत्यगृह्णान्निमीलितः ॥ ४१ ॥ यथैव गोवृषो वर्षं शारदं शीघ्रमागतम् । एवमेव प्रहस्तस्य शरवर्षं दुरासदम् । निमीलिताक्षः सहसा नीलः सेहे सुदारुणम् ॥ ४२ ॥ रोषितः शरवर्षेण सालेन महता महान् । प्रजघान हयान्नीलः प्रहस्तस्य मनोजवान् ॥ ४३ ॥ ततः स चापमुद्गृह्य प्रहस्तस्य महाबलः । बभञ्ज तरसा नीलो ननाद च पुनः पुनः ॥४४॥ विधनुस्तु कृतस्तेन प्रहस्तो वाहिनीपतिः । प्रगृह्य मुसलं घोरं स्यन्दनादवपुप्लुवे ॥४५॥ तावुभौ वाहिनीमुख्यौ जातवैरौ तरस्विनौ । स्थितौ क्षतजदिग्धाङ्गौ प्रभिन्नाविव कुञ्जरौ ॥ ४६ ॥ उल्लिखन्तौ सुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरम् । सिंहशार्दूलसदृशौ सिंहशार्दूलचेष्टितौ ॥ ४७ ॥ विक्रान्तविजयौ वीरौ समरेष्वनिवर्तिनौ । काङ्क्षमाणौ यशः प्राप्तुं वृत्रवासवयोः समौ ॥ ४८ ॥

नील इत्यादिसार्धश्लोकः ॥३८–४० ॥ तस्येति । अपारयन् अशक्नुवन् ॥ ४१ ॥ यथैवेत्यादिसार्धश्लोकः । यथैवेत्यत्र एवकारोऽत्यन्तायोगव्यवच्छेदार्थकः । शारदमित्यनेन शरपातस्य क्षयित्वं व्यनक्ति ॥ ४२–४५ ॥ तावुभावित्यादिश्लोकत्रयमेकं वाक्यम् । प्रभिन्नौ मत्तौ । सिंहशार्दूलसदृशाविति बले साम्यम् । विक्रान्तविजयौ सर्वत्र प्राप्तविजयौ । काङ्क्षमाणौ, अभूतामिति शेषः ॥ ४६–४८ ॥ ॥१६९॥

अभ्रबलमिव युद्धे बलादभिद्रुतम् आभिमुख्येनायान्तं नीलं समीक्ष्य नीलमेवाभिदुद्रुव इति सम्बन्धः ॥ ३५–४० ॥ तस्येति । अपारयन् अशक्नुवन् ॥४१–४८॥

For Private And Personal Use Only

आजघानेति । परमायत्तः परमोद्युक्तः ॥ ४९ ॥ ५० ॥ तमिति । अचिन्त्य अचिन्तयित्वा ॥ ५१-५५ ॥ प्रभिन्नशिरसः प्रभिन्नाच्छिरसः । शरीरादपीति समुच्चयः । प्रस्रवणं निर्झरः ॥ ५६ ॥ ५७ ॥ विकीर्णं भग्नम् ॥ ५८ ॥ हत इत्यादिसार्द्धश्लोकः । ध्यानमूकत्वं ध्यानेन वाग्व्यापारशून्यत्वम् ।

आजघान तदा नीलं ललाटे मुसलेन सः । प्रहस्तः परमायत्तस्तस्य सुस्राव शोणितम् ॥ ४९ ॥ ततः शोणितदिग्धाङ्गः प्रगृह्य सुमहातरुम् । प्रहस्तस्योरसि क्रुद्धो विससर्ज महाकपिः ॥ ५० ॥ तमचिन्त्य प्रहारं स प्रगृह्य मुसलं महत् । अभिदुद्राव बलिनं बलान्नीलं प्लवङ्गमम् ॥ ५१ ॥ तमुग्रवेगं संरब्धमापतन्तं महाकपिः । ततः सम्प्रेक्ष्य जग्राह महावेगो महाशिलाम् ॥ ५२ ॥ तस्य युद्धाभिकामस्य मृधे मुसलयोधिनः । प्रहस्तस्य शिलां नीलो मूर्ध्नि तूर्णमपातयत् ॥ ५३ ॥ सा तेन कपिमुख्येन विमुक्ता महती शिला । बिभेद बहुधा घोरा प्रहस्तस्य शिरस्तदा ॥ ५४ ॥ स गतासुर्गतश्रीको गतसत्त्वो गतेन्द्रियः । पपात सहसा भूमौ छिन्नमूल इव द्रुमः ॥ ५५ ॥ प्रभिन्नशिरसस्तस्य बहु सुस्राव शोणितम् । शरीरादपि सुस्राव गिरेः प्रस्रवणं यथा ॥ ५६ ॥ हते प्रहस्ते नीलेन तदकम्प्यं महद्बलम् । रक्षसामप्रहृष्टानां लङ्कामभिजगाम ह ॥ ५७ ॥ न शेकुः समरे स्थातुं निहते वाहिनीपतौ । सेतुबन्धं समासाद्य विकीर्णं सलिलं यथा ॥५८॥ हते तस्मिंश्चमूमुख्ये राक्षसास्ते निरुद्यमाः । रक्षःपतिगृहं गत्वा ध्यानमूकत्वमास्थिताः । प्राप्ताः शोकार्णवं तीव्रं निस्संज्ञा इव तेऽभवन् ॥ ५९ ॥ ततस्तु नीलो विजयी महाबलः प्रशस्यमानः स्वकृतेन कर्मणा । समेत्य रामेण सलक्ष्मणेन च प्रहृष्टरूपस्तु बभूव यूथपः ॥ ६० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टपञ्चाशः सर्गः ॥ ५८ ॥

तीव्रं घोरम् । शोकार्णवं प्राप्ताः, शोकार्णवे मग्ना इत्यर्थः ॥ ५९ ॥ स्वकृतेन कर्मणा रिपुवधेन प्रहृष्टरूपः अतिशयेन प्रहृष्टः । प्रशंसायां रूपप् ।

आजघानेति । परमायत्तः परमोद्युक्तः ॥ ४९-५५ ॥ विभिन्नशिरस इति । विभिन्नाच्छिरस इत्यर्थः ॥ ५६ ॥ ५७ ॥ विकीर्णं भग्नम् । पञ्चम्यां प्रहस्तवधः ॥५८॥५९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पञ्चम्यां प्रहस्तवधः ॥ ६० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टपञ्चाशः सर्गः ॥ ५८ ॥ अथ रावणमुकुटभङ्ग एकोनषष्टितमे–तस्मिन् हत इत्यादि ॥ १ ॥ गत्वेति । पावकसूनुशस्तं पावकसूनुना नीलेन शस्तं हतम् । तच्चापीत्यनेन रावणेन स्वप्नेऽपि न तच्चिन्तितमिति सूच्यते। यद्वा 'शत्रोरुपचये स्वस्यापचये समाश्रयः कार्यः' इति नीतिः, तथापि रावणः कालचोदिततया समाश्रयणं

तस्मिन् हते राक्षससैन्यपाले प्लवङ्गमानामृषभेण युद्धे । भीमायुधं सागरतुल्यवेगं विदुद्रुवे राक्षसराजसैन्यम् ॥ १ ॥ गत्वाऽथ रक्षोधिपतेः शशंसुः सेनापतिं पावकसूनुशस्तम् । तच्चापि तेषां वचनं निशम्य रक्षोधिपः क्रोधवशं जगाम ॥ २ ॥ सङ्ख्ये प्रहस्तं निहतं निशम्य शोकार्दितः क्रोधपरीतचेताः । उवाच तान्नैर्ऋतयोधमुख्यानिन्द्रो यथा चामरयोधमुख्यान् ॥ ३ ॥ नावज्ञा रिपवे कार्या यैरिन्द्रबलसूदनः । सूदितः सैन्यपालो मे सानुयात्रः सकुञ्जरः ॥ ४ ॥ सोऽहं रिपुविनाशाय विजयायाविचारयन् । स्वयमेव गमिष्यामि रणशीर्षं तदद्भुतम् ॥ ५ ॥ अद्य तद्वानरानीकं रामं च सहलक्ष्मणम् । निर्दहिष्यामि बाणौघैर्वनं दीप्तैरिवाग्निभिः॥६॥[अद्य सन्तर्पयिष्यामि पृथिवीं कपिशोणितैः । रामं च लक्ष्मणं चैव प्रेषयिष्ये यमक्षयम् ॥]

विहाय अस्थाने क्रोधवशं गत इत्यपिशब्देन सूच्यते ॥२ ॥ ३॥ नावज्ञेति । रिपवे रामाय । नावज्ञा कार्या उपेक्षा न कर्तव्या । "क्रियाग्रहणं कर्तव्यम्" इति चतुर्थी । यैश्च वानरैर्हेतुभिः मम सैन्यपालः प्रहस्तः सानुयात्रः सानुचरः सकुञ्जरश्च सूदितः, तेभ्योऽपि नावज्ञा कार्येत्यर्थः । केचित्तु रिपवे रिपुभ्यः, अवज्ञा एते कपयः किं करिष्यन्तीत्येवंरूपा न कार्या। कुत इत्यत्राह यैरित्यादीत्याहुः ॥४॥ अद्भुतं दुर्बलैः प्रबलविनाशनादाश्चर्यम् ॥५॥६॥

॥६०॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टपञ्चाशः सर्गः ॥५८॥१॥ गत्वेति । पावकसूनुशस्तं नीलेन हतम् ॥२॥३॥ रिपवे रिपुभ्यः अवज्ञा एते कपयः किं करिष्यन्तीत्येवंरूपा न कार्या । कुतः ? यैः वानरैः इन्द्रबलसूदनो मे सैन्यपालः सूदितः तैर्वानरैर्हेतुभिः अवज्ञा न कार्येति योजना ॥ ४ ॥ अविचारयन् रिपुबलं तृणीकुर्वन् । रणशीर्षं रणमूर्धानम्, युद्धभूमिमित्यर्थः ॥ ५ ॥ अद्येत्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु–सहलक्ष्मणं रामं,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स एवमिति । तुरङ्गोत्तमराजैः तुरङ्गश्रेष्ठतमैः युक्तम् । प्रकाशमानम् अलङ्कारैर्भासमानम् । वपुषा ज्वलन्तं स्वरूपत एव प्रकाशमानम् ॥ ७ ॥ स शङ्खेति । आस्फोटितक्ष्वेलितसिंहनादैः आस्फोटितं भुजास्फालनम् । क्ष्वेलितशब्दः शब्दमात्रपरः । आस्फोटितजनितशब्दैः सिंहनादैश्चेत्यर्थः । पुण्यैः चारुभिः ॥८॥ स इति । काठिन्यसिद्धये शैलौपम्यम् । सङ्कोचविकासार्हत्वसिद्धयै मेघौपम्यम् । रूपं शरीरम् । रुद्रस्यासुरेश्वरत्वं तामसप्रकृतित्वात् । तदुक्तं

स एवमुक्त्वा ज्वलनप्रकाशं रथं तुरङ्गोत्तमराजयुक्तम् । प्रकाशमानं वपुषा ज्वलन्तं समारुरोहामरराजशत्रुः ॥ ७ ॥
स शङ्खभेरीपणवप्रणादैरास्फोटितक्ष्वेलितसिंहनादैः । पुण्यैः स्तवैश्चाप्यभिपूज्यमानस्तदा ययौ राक्षसराजमुख्यः
॥ ८ ॥ स शैलजीमूतनिकाशरूपैर्मांसादनैः पावकदीप्तनेत्रैः । बभौ वृतो राक्षसराजमुख्यो भूतैर्वृतो रुद्र इवासुरेशः
॥ ९ ॥ ततो नगर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् । महार्णवाभ्रस्तनितं ददर्श समुद्यतं पादपशैल
हस्तम् ॥ १० ॥ तद्राक्षसानीकमतिप्रचण्डमालोक्य रामो भुजगेन्द्रबाहुः । विभीषणं शस्त्रभृतां वरिष्ठमुवाच सेनानु
गतः पृथुश्रीः ॥ ११ ॥ नानापताकाध्वजशस्त्रजुष्टं प्रासासिशूलायुधशस्त्रजुष्टम् । सैन्यं गजेन्द्रोपमनागजुष्टं
कस्येदमक्षोभ्यमभीरुजुष्टम् ॥ १२ ॥

मैत्रायणीयानामुपनिषदि–"यो ह वा अस्य तामसोंऽशः सोऽसौ रुद्रः" इति ॥९॥ महार्णवाभ्रस्तनितं महार्णवाभ्रयोरिव स्तनितं घोषो यस्येति तथा ॥१०॥ अतिप्रचण्डम् अत्यन्तकोपनम् । भुजगेन्द्रबाहुः युद्धोत्सुक्येन प्रवर्धमानबाहुरित्यर्थः । पृथुश्रीः युद्धहर्षेण सञ्जातलक्ष्मीकः । सेनानुगतः स्वामिसंरक्षणाय सर्वतः समवेतसेनापरिवृतः । शस्त्रभृतां वरिष्ठं वीरभटतारतम्यज्ञमिति भावः ॥ ११॥ नानेति । पताकाध्वजयोर्मात्रया भेदः । प्रथमं शस्त्रशब्द उपात्तः प्रासादि भिन्नपरः । आयुधं धनुः, इन्द्रायुधमित्यादौ तथा प्रयोगात् । प्रासासिशूलायुधरूपैः शस्त्रैर्जुष्टमित्यर्थः । वज्रजुष्टमिति पाठान्तरम् ॥ १२ ॥ रामानु०–नाना

विनेति शेषः । बाणौघैः वानरानीकं निर्दहिष्यामीति सम्बन्धः ॥ ६ ॥ तुरङ्गोत्तमराजयुक्तं तुरङ्गोत्तमराजाः श्रेष्ठतमतुरङ्गाः तैर्युक्तम् अतः प्रकाशमानं वपुषा च ज्वलन्तम्, तुरङ्गोत्तमभासा स्वभासा च प्रकाशमानमित्यर्थः ॥७॥ आस्फोटितक्ष्वेलितसिंहनादैः आस्फोटितैः भुजास्फालनैः क्ष्वेलितसिंहनादैः मृगेन्द्रध्वनिसदृशैः क्ष्वेलितैः । उपमितसमासोऽयम् । सहार्थे तृतीया ॥ ८–१० ॥ सेनया अनुगतः सेनानुगतः ॥ ११ ॥ प्रासासिशूलायुधशस्त्रजुष्टम् आयुधानि धनूंषि प्रासासिशूला

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पताकाध्वजशब्दजुष्टमिति पाठः । शस्त्रशब्देन पठितव्यतिरिक्तान्यायुधान्युच्यन्ते ॥ १२ ॥ शक्रसमानवीर्य इत्यनेन वक्ष्यमाणं न भीतिमूलमिति द्योत्यते । बलप्रवेकं बलप्रवरम् । "प्रवेकानुत्तमोत्तमाः" इत्यमरः । महात्मनां महाधैर्याणाम् ॥१३॥ योऽसाविति । महात्मा महाकायः । नवोदितार्कोपमं ताम्रवक्त्रं यस्य स तथा । बालसूर्यमुखरागतुल्योऽस्य मुखराग इत्यर्थः । योऽसौ गजस्कन्धगतो दृश्यते स गजस्कन्धगतः स्वशरीरभारान्नागशिरः कम्पयन्नुपैति, एनमकम्पनं रावण

ततस्तु रामस्य निशम्य वाक्यं विभीषणः शक्रसमानवीर्यः । शशंस रामस्य बलप्रवेकं महात्मनां राक्षसपुङ्गवानाम् ॥ १३ ॥ योऽसौ गजस्कन्धगतो महात्मा नवोदितार्कोपमताम्रवक्त्रः । प्रकम्पयन्नागशिरोऽभ्युपैति ह्यकम्पनं त्वेनमवेहि राजन् ॥ १४ ॥ योऽसौ रथस्थो मृगराजकेतुर्धून्वन् धनुः शक्रधनुःप्रकाशम् । करीव भात्युग्रविवृत्तदंष्ट्रः स इन्द्रजिन्नाम वरप्रधानः ॥ १५ ॥ यश्चैष विन्ध्यास्तमहेन्द्रकल्पो धन्वी रथस्थोऽतिरथोऽतिवीरः । विस्फारयंश्चापमतुल्यमानं नाम्नाऽतिकायोऽतिविवृद्धकायः ॥ १६ ॥ योऽसौ नवार्कोदितताम्रचक्षुरारुह्य घण्टानिनदप्रणादम् । गजं खरं गर्जति वै महात्मा महोदरो नाम स एष वीरः ॥ १७ ॥

पुत्रमवेहि ॥ १४ ॥ मृगराजकेतुः सिंहध्वजः । धनुः धून्वन्नित्यनेन भुजबलाधिक्यमुच्यते । करीवेत्यनेन कायबलम् । करितुल्यत्वे हेतुरुग्रविवृत्तदंष्ट्र इति । वरप्रधानः ब्रह्मदत्तान्तर्धानवरप्रधानः । अनेन वरबलमुक्तम् ॥ १५ ॥ यश्चेति । विन्ध्यादित्रयोपम्येन उन्नतत्वपरतेजोभिभावकत्वानिश्चलत्वान्युच्यन्ते । अतिरथः सहस्राश्वयुक्तत्वेनातिशयितरथः । अतिवीरः मायाबलाभावेऽपीन्द्रजितोऽप्यतिशयितवीर्यः । अतुल्यमानम् अतिशयितपरिमाणं चापम् । विस्फारयन् आकर्षन्नित्यर्थः । अत्रासावित्यध्याहार्यम् ॥ १६ ॥ योऽसौ नवेति । नवार्कोदितताम्रचक्षुः नवोदितार्कताम्रचक्षुः । घण्टानिनदप्रणादं घण्टानिनदेन प्रकृष्टो नादः स्वनो यस्य तम् । खरमिति क्रियाविशेषणम् ॥ १७ ॥ रामानु०-योऽसाविति । योऽसौ नवार्कोपमताम्रचक्षुरिति पाठः । घण्टानिनदप्रणादं घण्टा

युधान्येव शस्त्राणि तैर्जुष्टम् । महेन्द्रोपमनागजुष्टमिति पाठे-महेन्द्रपर्वतसदृशगजयुक्तम् । अभीरुभिः रक्षोभिः ॥ १२ ॥ बलप्रवेकं बलश्रेष्ठम् ॥ १३ ॥ प्रकम्पयन्नागशिरः स्वशरीरभारादात्मारूढगजशिरः प्रकम्पयन्नित्यर्थः । अकम्पनम्-अयमकम्पनः पूर्वहतादन्य इति बोध्यम् ॥ १४ ॥ वरप्रधानः वरो ब्रह्मदत्तः प्रधानं यस्य स तथोक्तः ॥१५॥ अतुल्यमानम् असदृशपरिमाणम् ॥१६॥ घण्टानिनदप्रणादं घण्टानिनदेन प्रभूतनादम् । गजमारुह्य खरं यथा तथा गर्जतीति सम्बन्धः॥१७॥

For Private And Personal Use Only

निनदेन प्रभूतो नादो यस्य तम् ॥ १७ ॥ योऽसौ हयमिति । काञ्चनचित्रभाण्डं काञ्चनमयनानाविधाश्वाभरणम् । "स्याद्भाण्डमश्वाभरणे" इत्यमरः । अत एव सन्ध्याभ्रगिरिप्रकाशं सन्ध्याभ्रयुक्तगिरिप्रकाशं हयमारुह्य । मरीचिनद्धं किरणैर्बद्धं प्रासमुद्यम्य गर्जतीति पूर्वश्लोकादनुषज्यते । एष पिशाचः पिशाच नामकः ॥१८॥ यश्चेति । किङ्करो वज्रवेगो यस्य तत् किङ्करवज्रवेगम्, वज्रवेगादप्यधिकवेगमित्यर्थः । वृषेन्द्रं वृषभेन्द्रम् । योऽसौ प्रसिद्धोऽसावित्यर्थः।

योऽसौ हयं काञ्चनचित्रभाण्डमारुह्य सन्ध्याभ्रगिरिप्रकाशम् । प्रासं समुद्यम्य मरीचिनद्धं पिशाच एषोऽशनितुल्य वेगः ॥ १८ ॥ यश्चैष शूलं निशितं प्रगृह्य विद्युत्प्रभं किङ्करवज्रवेगम् । वृषेन्द्रमास्थाय गिरिप्रकाशमायाति योऽसौ त्रिशिरा यशस्वी ॥ १९ ॥ असौ च जीमूतनिकाशरूपः कुम्भः पृथुव्यूढसुजातवक्षाः । समाहितः पन्नग राजकेतुर्विस्फारयन् भाति धनुर्विधून्वन् ॥ २० ॥ यश्चैष जाम्बूनदवज्रजुष्टं दीप्तं सधूमं परिघं प्रगृह्य । आयाति रक्षोबलकेतुभूतस्त्वसौ निकुम्भोऽद्भुतघोरकर्मा ॥ २१ ॥ यश्चैष चापासिशरौघजुष्टं पताकिनं पावकदीप्तरूपम् । रथं समास्थाय विभात्युदग्रो नरान्तकोऽसौ नगशृङ्गयोधी ॥ २२ ॥

आयाति सोऽसौ त्रिशिरा इत्यपि पठन्ति ॥ १९ ॥ रामानु०—आयाति सोऽसौ त्रिशिरा यशस्वीति पाठः ॥ १९ ॥ असाविति । पृथुव्यूढसुजातवक्षाः पृथु पीनं व्यूढं विशालं सुजातं सुन्दरं च वक्षो यस्य स तथोक्तः समाहितः सन्नद्धः । धनुर्विस्फारयन् ज्यामवलम्ब्य कर्षन् । पुनर्लीलया विधून्वन् असौ कुम्भो भाति । अत्र यच्छब्दाप्रयोगः सन्निहितत्वादिति भाव्यम् ॥ २० ॥ जाम्बूनदवज्राभ्यामन्योन्यमिलिताभ्यां जुष्टम् अत एव दीप्तं ज्वाला युक्तम् । सधूमं सधूममिव स्थितम् । अभेदनिर्देशः सर्वथा सादृश्यप्रतिपत्तये । रक्षोबलकेतुभूतः रक्षोबलप्रधानभूत इत्यर्थः ॥ २१ ॥ उदग्रः उन्नतः । नगशृङ्गैः साधनैः युद्ध्यत इति नगशृङ्गयोधी । प्रतियोद्धृभावात् भुजकण्डूनिवृत्त्यर्थं नगैः सह युध्यत इति वाऽर्थः ॥ २२ ॥

काञ्चनचित्रभाण्डं काञ्चनरूपाणि चित्रभाण्डानि अश्वाभरणानि यस्य तम् । "स्याद्भाण्डमश्वाभरणे" इत्यमरः । सन्ध्याभ्रगिरिप्रकाशं सन्ध्याभ्रयुक्तगिरिप्रकाशं प्रासमुद्यम्य, आयातीति शेषः ॥१८॥ किङ्करवज्रवेगं किङ्करवद्यथोक्तकारि वज्रम् तत्समानवेगम् । त्रिशिराः अत्रापि कश्चित्त्रिशिराः ॥ १९ ॥ कुम्भः तन्नामा ॥ २० ॥ सधूमं नीलमणिकान्त्या सधूममिव स्थितम् ॥ २१ ॥ नगैश्च शृङ्गैश्च युध्यत इति नगशृङ्गयोधी ॥ २२ ॥ २३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ त्रिभी रावणं दर्शयति—यश्चेति । विवृत्तनेत्रैः घूर्णितनेत्रैः ॥ २३ ॥ २४ ॥ नगेन्द्रः हिमवान् ॥ २५ ॥ दीप्तः कान्तिमान् । महातेजाः महाप्रतापः ॥ २६ ॥ आदित्य इव रश्मिभिः दुष्प्रेक्षः प्रेक्षितुमशक्यः । अनयोरर्थयोर्भिन्नवाक्यत्वान्न पुनरुक्तिशङ्का ॥ २७ ॥ देवेत्यर्धद्वयमेकं वाक्यम् ॥२८॥२९॥

यश्चैष नानाविधघोररूपैर्व्याघ्रोष्ट्रनागेन्द्रमृगाश्ववक्त्रैः । भूतैर्वृतो भाति विवृत्तनेत्रैः सोऽसौ सुराणामपि दर्पहन्ता ॥ २३ ॥ यत्रैतदिन्दुप्रतिमं विभाति च्छत्रं सितं सूक्ष्मशलाकमग्र्यम् । अत्रैष रक्षोधिपतिर्महात्मा भूतैर्वृतो रुद्र इवावभाति ॥ २४ ॥ असौ किरीटी चलकुण्डलास्यो नगेन्द्रविन्ध्योपमभीमकायः । महेन्द्रवैवस्वतदर्पहन्ता रक्षोधिपः सूर्य इवावभाति ॥२५॥ प्रत्युवाच ततो रामो विभीषणमरिन्दमम् । अहो दीप्तो महातेजा रावणो राक्षसेश्वरः ॥२६॥ आदित्य इव दुष्प्रेक्षो रश्मिभिर्भाति रावणः। सुव्यक्तं लक्षये ह्यस्य रूपं तेजस्समावृतम् ॥२७॥ देवदानववीराणां वपुर्नैवंविधं भवेत् । यादृशं राक्षसेन्द्रस्य वपुरेतत् प्रकाशते ॥२८॥ सर्वे पर्वतसङ्काशाः सर्वे पर्वतयोधिनः । सर्वे दीप्तायुधधरा योधाश्चास्य महौजसः ॥ २९ ॥ भाति राक्षसराजोऽसौ प्रदीप्तैर्भीमविक्रमैः । भूतैः परिवृतस्तीक्ष्णैर्देहवद्भिरिवान्तकः ॥ ३० ॥ दिष्ट्याऽयमद्य पापात्मा मम दृष्टिपथं गतः। अद्य क्रोधं विमोक्ष्यामि सीताहरणसम्भवम् ॥ ३१ ॥ एवमुक्त्वा ततो रामो धनुरादाय वीर्यवान्। लक्ष्मणानुचरस्तस्थौ समुद्धृत्य शरोत्तमम् ॥ ३२ ॥ ततः स रक्षोधिपतिर्महात्मा रक्षांसि तान्याह महाबलानि । द्वारेषु चर्यागृहगोपुरेषु सुनिर्वृतास्तिष्ठत निर्विशङ्काः ॥३३॥

देहवद्भिः प्रशस्तदेहैः ॥ ३० ॥ क्रोधं विमोक्ष्यामि क्रोधं कार्यकरं करिष्यामीत्यर्थः । मम दृष्टिपथं गत इति पाठः ॥ ३१ ॥ ३२ ॥ द्वारेषु अन्तर्द्वारेषु ।

कासौ ? तत्राह—यत्रेति । यत्र देशे इन्दुप्रतिमत्वादिगुणकं छत्रं भाति तत्रैव रक्षोधिपतिः । भूतैः भूतगणैः ॥ २४ ॥ नगेन्द्रो यो विन्ध्यः तद्वद्भीमः कायो यस्य सः ॥ २५ ॥ २६ ॥ सुव्यक्तं लक्षये इत्यत्र हेतुः तेजस्समावृतमिति । रूपं सूक्ष्मावयवसंस्थानम् ॥ २७ ॥ २८ ॥ पर्वतयोधिनः पर्वतैः सह योद्धुं शीलमेषामस्तीति पर्वतयोधिनः । प्रतियोद्धृभावात् भुजकण्डूतिनिवृत्त्यर्थं पर्वतैस्सह युध्यन्तीत्यर्थः ॥ २९ ॥ देहवद्भिः प्रशस्तदेहैः ॥ ३०–३२ ॥ द्वारेषु आन्तरप्राकारद्वारेषु । ॥१७२॥

चर्यायुक्ताः पुरद्वारेषु गोपुरपार्श्वयोः भटनिवासार्थं निर्मिता विशङ्कटा गृहाः चर्यागृहाः । सुनिर्वृताः अतिसुखिताः ॥ ३३ ॥ इहागतं मां विदित्वा इदं छिद्रं विदित्वेत्यन्वयः । प्रमथ्य ध्वंसित्वा । प्रधर्षयेयुः अभिभवेयुः ॥ ३४ ॥ सहितान् संमिलितान् । महाझषः महामत्स्यः ॥ ३५ ॥ दीप्ते इषु चापे यस्य स तथोक्तः । युधि संयुगनिमित्तं सहसा आपतन्तं राक्षसेन्द्रं समीक्ष्य महीधराग्रं पर्वतशृङ्गं समुत्पाट्य हरीशः सुग्रीवः रक्षोधिपतिं दुद्राव ॥ ३६ ॥

इहागतं मां सहितं भवद्भिर्वनौकसश्छिद्रमिदं विदित्वा । शून्यां पुरीं दुष्प्रसहां प्रमथ्य प्रधर्षयेयुः सहसा समेताः ॥ ३४ ॥ विसर्जयित्वा सहितांस्ततस्तान् गतेषु रक्षस्सु यथानियोगम् । व्यदारयद्वानरसागरौघं महाझषः पूर्ण मिवार्णवौघम् ॥ ३५ ॥ तमापतन्तं सहसा समीक्ष्य दीप्तेषुचापं युधि राक्षसेन्द्रम् । महत् समुत्पाट्य महीधराग्रं दुद्राव रक्षोधिपतिं हरीशः ॥ ३६ ॥ तच्छैलशृङ्गं बहुवृक्षसानुं प्रगृह्य चिक्षेप निशाचराय । तमापतन्तं सहसा समीक्ष्य बिभेद बाणैस्तपनीयपुङ्खैः ॥ ३७ ॥ तस्मिन् प्रवृद्धोत्तमसानुवृक्षे शृङ्गे विकीर्णे पतिते पृथिव्याम् । महाहिकल्पं शर मन्तकाभं समाददे राक्षसलोकनाथः ॥ ३८ ॥ स तं गृहीत्वाऽनिलतुल्यवेगं सविस्फुलिङ्गज्वलनप्रकाशम् । बाणं महे न्द्राशनितुल्यवेगं चिक्षेप सुग्रीववधाय रुष्टः ॥ ३९ ॥

बहुवृक्षसानुं बहुतरुयुततटम् । तपनीयं स्वर्णम् ॥ ३७ ॥ ३८ ॥ महेन्द्राशनिः वज्रम् । औत्पातिकाशनिव्यावृत्तये महेन्द्रपदम् । यद्वा महेन्द्रसम्बन्धोक्तिः

चर्यागृहगोपुरेषु चर्यागृहेषु गोपुरेषु च । चर्यागृहाः चतुष्पथनिर्मितगृहाः । गोपुराणि पुरद्वाराणि ॥ ३३ ॥ इदं छिद्रं रणभूमौ सपरिवारस्य गमनरूपम् ॥ ३४ ॥ अर्णवौघं समुद्रजलसमूहम् ॥ ३५ ॥ दीप्तेषुचापं दीप्ता इषवश्चापाश्च यस्य तम् ॥ ३६–४० ॥

स०–तच्छैलशृङ्गं स चासौ शैलश्च तस्य शृङ्गं यस्मिन् स तथा । बहुवृक्षैरुपेतश्चासौ सानुः स्नुः । " स्नुः प्रस्थः सानुरस्त्रियाम् " इत्यमरः । " शृङ्गार्धनिदाघोपमशल्यदढाः " इति पुंनपुंसकाधिकारलिङ्गानु शासनाच प्रवृद्धोत्तमसानुवृक्षे शृङ्गे इति द्वितीयव्याख्याने सुलभम् । प्रथमव्याख्याने सम्बन्धस्य द्विनिष्ठत्वात्सानोः शृङ्गसाहित्यवच्छृङ्गस्य तत्साहित्यमपि सम्भवतीति पदं लभ्यम् । " शृङ्गशब्दोऽर्धर्चादिरिति पुंल्लिङ्गत्वोपपत्तिः " इति नागोजिभट्टोक्तिस्तु एतदनिभालनमूलेति प्रपञ्चार्थतैतस्येति वा ज्ञेयम् ॥ ३७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अभ्यासवता मुक्तत्वेनातिवेगद्योतनाय ॥ ३९ ॥ शक्राशनिप्रख्यं शक्राशनितुल्यं वपुः यस्य । गुहः स्कन्दः ॥ ४० ॥ स सायकेति । विपरीतचेताः भ्रान्तचित्तः ॥ ४१ ॥ तत इति । ज्योतिमुखः ज्योतिर्मुखः ॥ ४२–४४ ॥ ते वध्यमाना इति । ते प्रसिद्धाः वानरेन्द्राः न तु क्षुद्राः । वध्यमानाः प्रथमं हिंस्यमानाः । ततः पतिताः रावणवेगेन भूमौ पतिताः । तदानीं रक्षकान्तरादर्शनान्नानद्यमानाः अतिशयेन नदन्तः । नदतेर्यङि "सन्यङोः" इत्यभ्यास

स सायको रावणबाहुमुक्तः शक्राशनिप्रख्यवपुः शिताग्रः । सुग्रीवमासाद्य बिभेद वेगाद् गुहेरिता क्रौञ्चमिवोग्रशक्तिः ॥ ४० ॥ स सायकार्तो विपरीतचेताः कूजन् पृथिव्यां निपपात वीरः । तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥४१॥ ततो गवाक्षो गवयः सुदंष्ट्रस्तथर्षभो ज्योतिमुखो नभश्च । शैलान् समुद्यम्य विवृद्धकायाः प्रदुद्रुवुस्तं प्रति राक्षसेन्द्रम् ॥ ४२ ॥ तेषां प्रहारान् स चकार मोघान् रक्षोधिपो बाणगणैः शिताग्रैः । तान् वानरेन्द्रानपि बाणजालैर्बिभेद जाम्बूनदचित्रपुङ्खैः ॥ ४३ ॥ ते वानरेन्द्रास्त्रिदशारिबाणैर्भिन्ना निपेतुर्भुवि भीमकायाः । ततस्तु तद्वानरसैन्यमुग्रं प्रच्छादयामास स बाणजालैः ॥ ४४ ॥ ते वध्यमानाः पतिताः प्रवीरा नानद्यमाना भयशल्यविद्धाः । शाखामृगा रावणसायकार्ता जग्मुः शरण्यं शरणं स्म रामम् ॥ ४५ ॥ ततो महात्मा स धनुर्धनुष्मानादाय रामः सहसा जगाम । तं लक्ष्मणः प्राञ्जलिरभ्युपेत्य उवाच वाक्यं परमार्थयुक्तम् ॥ ४६ ॥

दीर्घादिः । भयशल्यविद्धाः तादृशहेतुना भयरूपशल्येन विद्धाः । शाखामृगाः वनचारित्वेनैतादृशभयानभिज्ञाः । उक्तप्रकारेण सायकार्ताः सन्तः शरण्यं सर्वलोकशरणार्हं रामं शरणं जग्मुः । एतेनार्तिरेव शरणागतिप्रयोजिका, नतु देशकालाधिकारिफलनियमा इत्युक्तम् ॥ ४५ ॥ शरणागतकृत्यमुक्त्वा शरण्यकृत्यमाह–तत इति । अत्र प्रपत्तेरार्तप्रपत्तिरूपतया तस्याः सद्यः फलद्योतनाय तत इत्युक्तम् । प्रपत्त्युत्तरक्षण इत्यर्थः । महात्मा शरणागतिता तम्यज्ञः । धनुष्मान् प्रशस्तधनुष्कः, धनुर्युद्धसमर्थ इत्यर्थः । सहसेत्यनेन लक्ष्मणः स्वयं गमिष्यामीति, तत्पूर्वमेवाश्रितत्राणत्वरया सधनुः सन् जगा ॥१७३॥

विपरीतचेताः अचेता इति यावत् ॥ ४१–४४ ॥ ते वध्यमाना इति । भयशल्यविद्धाः भयमेव शल्यं तेन विद्धाः ॥ ४५ ॥ धनुष्मान् प्रशस्तधनुः । सधनु

मेत्युक्तम् । तथैव पट्टकुट्यां प्रभातमित्याह तमिति । तम् आर्तत्राणत्वरया व्रजन्तम् । लक्ष्मणः रामकैङ्कर्यलक्ष्मीसम्पन्नः । अनतिक्रमणाय नाथं निगलयति प्राञ्जलिरिति । अभ्युपेत्य अभितः उपेत्य । अनेन लक्ष्मणागमनमजानन्निव नानापार्श्वेषु रामोऽनेकधा जगामेत्यवगम्यते । परमार्थयुक्तं न तूपचारयुक्तम् । यद्वा परमार्थयुक्तं परमप्रयोजनयुक्तम् । शेषिविषये कैङ्कर्यस्य शेषभूतं प्रति परमप्रयोजनत्वात् ॥ ४६ ॥ काममिति । हे आर्य !

काममार्यः सुपर्याप्तो वधायास्य दुरात्मनः । विधमिष्याम्यहं नीचमनुजानीहि मां प्रभो ॥४७॥ तमब्रवीन्महातेजा रामः सत्यपराक्रमः ॥ ४८ ॥ गच्छ यत्नपरश्चापि भव लक्ष्मण संयुगे । रावणो हि महावीर्यो रणेऽद्भुतपराक्रमः । त्रैलोक्येनापि संक्रुद्धो दुष्प्रसह्यो न संशयः ॥ ४९ ॥ तस्य च्छिद्राणि मार्गस्व स्वच्छिद्राणि च लक्षय । चक्षुषा धनुषा यत्नाद्रक्षात्मानं समाहितः ॥ ५० ॥

अस्य दुरात्मनः परदारापहरणविषयदुर्बुद्धेः कामं प्रकामं वधाय सुपर्याप्तः सुशक्तोऽसि । तथापि नीचं भवता योद्धुमनर्हम् । अहं वधिष्यामि । महाबलेन भवता नीचोऽयं न योद्धुमर्ह इति भावः । यद्वा अस्य वधायाहं पर्याप्तोऽस्मीत्यर्थः । तर्हि स्वयमेव गम्यतामित्यत्राह अनुजानीहीति । प्रभो शेषिन् ! त्वं मां शेषभूतमनुजानीहि । भवदनुज्ञामन्तरेण मे कार्यकरणं स्वरूपहानिकरमिति भावः ॥ ४७ ॥ तं विनयेनोक्तवन्तम् महातेजाः तादात्विकहर्षप्रकर्षावेदकसुषमाविशेषशाली । सति कस्मिंश्चिद्विधेये सति । अपराक्रमः निवृत्तपराक्रमः, अब्रवीत् ॥ ४८ ॥ नीचपदसूचितमनादरं वारयति-यत्नपर इति । युद्धे यत्नपरश्चापि भव, यथा युद्धपरोऽसि एवं यत्नपरो भव । यत्नस्यावश्यकर्तव्यत्वे हेतुमाह रावण इति । अद्भुतपराक्रमः एकमस्त्रमाददान इवापरं सन्धत्ते, तत्सन्दधान इवापरं मोक्षयतीत्यर्थः । त्रिलोक्येव त्रैलोक्यं तेन, युगपद्युद्धप्रवृत्तेनेत्यर्थः ॥ ४९ ॥ यत्नपरत्वं दर्शयति–तस्येति । चक्षुषा तस्य रावणस्य । छिद्राणि अनवधानादीनि । यत्नान्मार्गस्व अन्वेषयस्व । स्वच्छिद्राणि लक्षय काकान् पश्येतिवत् स्वस्य

रित्यत्र त इति छेदः ॥ ४६-४८ ॥ त्रैलोक्येनापि तद्वर्तिदेवादिसमूहैरित्यर्थः ॥ ४९ ॥ छिद्राणि महारावसरान् । स्वच्छिद्राणि चेत्यस्य गोपयेति शेषः । ततो

स० -छिद्राणि मर्माणि मार्गस्व परीक्षस्व । स्वच्छिद्राणि गोपय रक्ष । चक्षुषा तं लक्षय । स्वसमाहितः स्वेनैव समाहितः । समसमरे वक्ता नान्योऽस्तीति भावः । एतावद्युक्तिः कुत इत्यतो वाऽह–स्वसमाहितः सु अत्यन्तम् असमो विषमः अहितो वैरी यस्य स तथा त्वमित्यर्थः ॥ ५० ॥

छिद्राणि यथा न भवन्ति तथा पश्येत्यर्थः। यद्वा लक्ष्य लक्षित्वा प्रच्छादयेत्यर्थः। एवं समाहितः सावधानः सन् धनुषा आत्मानं रक्ष॥५०॥ अभिपूज्य प्रदक्षिणीकृत्येत्यर्थः ॥५१॥५२॥ तमालोक्येति। भृत्ये मयि विद्यमाने कथमसौ समासीदतीति जगामेत्यर्थः ॥५३॥५४॥ भयं, प्राप्तमिति शेषः॥५५॥

राघवस्य वचः श्रुत्वा परिष्वज्याभिपूज्य च। अभिवाद्य ततो रामं ययौ सौमित्रिराहवम् ॥५१॥ स रावणं वारणहस्तबाहुर्ददर्श दीप्तोद्यतभीमचापम्। प्रच्छादयन्तं शरवृष्टिजालैस्तान् वानरान् भिन्नविकीर्णदेहान् ॥ ५२ ॥ तमालोक्य महातेजा हनुमान् मारुतात्मजः। निवार्य शरजालानि प्रदुद्राव स रावणम् ॥५३॥ रथं तस्य समासाद्य भुजमुद्यम्य दक्षिणम्। त्रासयन् रावणं धीमान् हनुमान् वाक्यमब्रवीत् ॥ ५४ ॥ देवदानवगन्धर्वैर्यक्षैश्च सह राक्षसैः। अवध्यत्वं त्वया प्राप्तं वानरेभ्यस्तु ते भयम् ॥ ५५ ॥ एष मे दक्षिणो बाहुः पञ्चशाखः समुद्यतः। विधमिष्यति ते देहाद्भूतात्मानं चिरोषितम् ॥ ५६ ॥ श्रुत्वा हनुमतो वाक्यं रावणो भीमविक्रमः। संरक्तनयनः क्रोधादिदं वचनमब्रवीत् ॥५७॥ क्षिप्रं प्रहर निश्शङ्कं स्थिरां कीर्तिमवाप्नुहि। ततस्त्वां ज्ञातविक्रान्तं नाशयिष्यामि वानर ॥५८॥

एष इति। पञ्चशाखः पञ्चाङ्गुलिकः भूतात्मानं विधमिष्यति निष्क्रामयिष्यति। धातूनामनेकार्थत्वात् ॥ ५६ ॥ ५७ ॥ क्षिप्रमिति। स्थिरां कीर्तिमवाप्नुहीति सोपालम्भोक्तिः। हनुमान् रावणमुपसृत्य प्रहृतवानित्येतादृशीं कीर्तिमवाप्स्यसीत्यर्थः। ज्ञातविक्रान्तं ज्ञातविक्रमम्। भावे क्तः ॥ ५८ ॥

धनुषा धनुर्व्यापारेणात्मानं रक्ष ॥ ५०–५५ ॥ एष म इति। पञ्चशाखः पञ्च शाखाः अङ्गुलयो यस्मिन सः। भूतात्मानं जीवात्मानम्। विधमिष्यति निष्कासयिष्यति ॥ ५६ ॥ ५७ ॥ स्थिरां कीर्तिमवाप्नुहीति। इयमुपालम्भोक्तिः। हनुमान्रावणमुपसृत्य प्रहृतवानित्येतादृशीं कीर्तिमाप्नुहीत्यर्थः। ज्ञातविक्रान्तं विज्ञातपराक्रमम् ॥ ५८ ॥

स०—वानरेभ्यः कपिभ्यः। तेभ्योऽमृतत्वाद्भयस्येति भावः। नरेभ्य इत्यपि कपिसाम्याद्वक्तव्यम्। तथापि स्वस्यैव पुरःस्थितेः 'स्वजातेर्ग्रहणमित्यवगन्तव्यम्। वानरेभ्य इत्यत्रावृत्त्या तत्रापि पदच्छेदेन वानरेभ्यो वा तेभ्य इव नरेभ्योपि भयमित्यन्वयकरणेन तदुक्तिर्ज्ञेयेति अस्मत्तः कपिभ्य इत्यनुक्त्वा उक्त्वा च वानरेभ्य इति कविर्ध्वनयामास ॥ ५५ ॥ यस्तो येन। मुत् सन्तोषः। स ते बाहुः अदक्षिणः ताडनाकुशलः। असमर्थ इति यावत्। एष मे पञ्चशाखो हस्तः ते देहे चिरोषितं भूतात्मानं प्राणं विधमिष्यति बहिर्निस्सारयति। अभूतात्मानं मुख्यप्राणमिति वा। विधमिष्यति ते देहे भूतात्मानमिति पाठः ॥ ५६ ॥

For Private And Personal Use Only

रावणस्येति । रावणवचनं ज्ञात्वा तदुचितमुत्तरमाह प्रहतं हीति ॥ ५९ ॥ रामानु०—ज्ञातविक्रान्तमिति वचनं सोल्लुण्ठनं ज्ञात्वा तदुचितमुत्तरमाह—प्रहतमिति ॥ ५९ ॥
एवमुक्त इति । मर्मोद्घाटनेन सञ्जातरोष इत्यर्थः ॥ ६० ॥ स इत्यादि । तलेनेति । रावणेन तलेन प्रहरणात् स्वयमपि तलेनैव प्राहरदिति भावः ॥ ६१ ॥

रावणस्य वचः श्रुत्वा वायुसूनुर्वचोऽब्रवीत् । प्रहतं हि मया पूर्वमक्षं स्मर सुतं तव ॥ ५९ ॥ एवमुक्तो महातेजा रावणो राक्षसेश्वरः । आजघानानिलसुतं तलेनोरसि वीर्यवान् ॥ ६० ॥ स तलाभिहतस्तेन चचाल च मुहुर्मुहुः । स्थित्वा मुहूर्तं तेजस्वी स्थैर्यं कृत्वा महामतिः । आजघानाभिसंक्रुद्धस्तलेनैवामरद्विषम् ॥ ६१ ॥ ततस्तलेनाभिहतो वानरेण महात्मना । दशग्रीवः समाधूतो यथा भूमिचलेऽचलः ॥ ६२ ॥ सङ्ग्रामे तं तथा दृष्ट्वा रावणं तलताडितम् । ऋषयो वानराः सिद्धा नेदुर्देवाः सहासुरैः ॥ ६३ ॥ अथाश्वास्य महातेजा रावणो वाक्यमब्रवीत् ॥ ६४ ॥ साधु वानर वीर्येण श्लाघनीयोऽसि मे रिपुः । रावणेनैवमुक्तस्तु मारुतिर्वाक्यमब्रवीत् ॥ ६५ ॥ धिगस्तु मम वीर्येण यस्त्वं जीवसि रावण । सकृत्तु प्रहरेदानीं दुर्बुद्धे किं विकत्थसे । ततस्त्वां मामिका मुष्टिर्नयिष्यति यमक्षयम् ॥ ६६ ॥ ततो मारुतिवाक्येन क्रोधस्तस्य तदाऽज्वलत् ॥ ६७ ॥ संरक्तनयनो यत्नान्मुष्टिमुद्यम्य दक्षिणम् । पातयामास वेगेन वानरोरसि वीर्यवान् ॥ ६८ ॥

तत इति । समाधूतः कम्पितः अभूत् । भूमिचले भूकम्पे सति अचलः गिरिर्यथा ॥ ६२–६५ ॥ धिगस्त्विति । वीर्येणेति द्वितीयाभाव आर्षः । यस्त्वं जीवसि, मया प्रहृतोऽपीति शेषः । सकृत्तु प्रहर । शत्रुणा प्रहृते पुनरात्मनः प्रहारो विक्रमपरिपाटीमाटीकत इति हनुमतो हृदयम् । इदानीमिति, पूर्वं मदनवधानाज्जीवसीति भावः । दुर्बुद्धे प्रहारतारतम्यानभिज्ञ ! किं किमर्थं विकत्थसे श्लाघसे ? "कत्थ श्लाघायाम्" इति धातुः । यमक्षयं यमनिलयम् । "निलयापचयौ क्षयौ" इत्यमरः ॥ ६६ ॥ तत इति । ततः तेनेत्यर्थः । अन्यथा तदाशब्दोऽतिरिच्येत । अज्वलत् ववृध इत्यर्थः ॥ ६७ ॥ संरक्तेति । वीर्यवान्

अक्षं तन्नामानं सुतं स्मर, मत्पराक्रमज्ञानायेति शेषः ॥ ५९–६५ ॥ धिगिति । धिक् वीर्येण, वीर्यमित्यर्थः । यस्त्वं जीवसि, मया हतोऽपीत्यर्थः ॥ ६६–७१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलवान् । "वीर्यं बले च" इत्यमरः ॥ ६८ ॥ हनुमानित्यर्धम् । व्यूढे विशाले ॥६९॥ विह्वलमिति । विह्वलं मूर्च्छितम् । महाबलं तदानीमपि परैरनभिभवनीयम् ॥ ७० ॥ राक्षसानामिति । आदीपयामास आ समन्ताज्ज्वालयामास ॥ ७१ ॥ समायस्तः आयासवान् । एकेनेत्यनेन इतरेण शरवारणं गम्यते

हनुमान् वक्षसि व्यूढे सञ्चचाल हतः पुनः ॥ ६९ ॥ विह्वलं तु तदा दृष्ट्वा हनुमन्तं महाबलम् । रथेनातिरथः शीघ्रं नीलं प्रति समभ्यगात् ॥ ७० ॥ राक्षसानामधिपतिर्दशग्रीवः प्रतापवान् । पन्नगप्रतिमैर्भीमैः परमर्मातिभेदिभिः । शरैरादीपयामास नीलं हरिचमूपतिम् ॥ ७१ ॥ स शरौघसमायस्तो नीलः कपिचमूपतिः । करेणैकेन शैलाग्रं रक्षोधिपतयेऽसृजत् ॥७२॥ हनुमानपि तेजस्वी समाश्वस्तो महामनाः । विप्रेक्षमाणो युद्धेप्सुः सरोषमिदमब्रवीत् ॥ ७३ ॥ नीलेन सह संयुक्तं रावणं राक्षसेश्वरम् । अन्येन युद्ध्यमानस्य न युक्तमभिधावनम् ॥ ७४॥ रावणोऽपि महातेजास्तच्छृङ्गं सप्तभिः शरैः । आजघान सुतीक्ष्णाग्रैस्तद्विकीर्णं पपात ह ॥ ७५ ॥ तद्विकीर्णं गिरेः शृङ्गं दृष्ट्वा हरिचमूपतिः । कालाग्निरिव जज्वाल क्रोधेन परवीरहा ॥७६॥ सोऽश्वकर्णान् धवान् सालांश्चूतांश्चापि सुपुष्पितान् । अन्यांश्च विविधान् वृक्षान्नीलश्चिक्षेप संयुगे ॥७७॥ स तान् वृक्षान् समासाद्य प्रतिचिच्छेद रावणः । अभ्यवर्षत् सुघोरेण शरवर्षेण पावकिम् ॥७८॥ अभिवृष्टः शरौघेण मेघेनेव महाचलः । ह्रस्वं कृत्वा तदा रूपं ध्वजाग्रे निपपात ह ॥ ७९ ॥ पावकात्मजमालोक्य ध्वजाग्रे समुपस्थितम् । जज्वाल रावणः क्रोधात्ततो नीलो ननाद च ॥ ८० ॥ ध्वजाग्रे धनुषश्चाग्रे किरीटाग्रे च तं हरिम् । लक्ष्मणोऽथ हनूमांश्च दृष्ट्वा रामश्च विस्मिताः ॥ ८१ ॥

॥ ७२ ॥ हनुमानपीत्यादि । रावणम् अब्रवीदिति सम्बन्धः । अभिधावनम् अन्येन युद्ध्यमानं प्रत्यभिधावनमित्यर्थः । अन्नेतिकरणं द्रष्टव्यम् ॥ ७३--७७ ॥ स तानिति । समासाद्य समीपं प्राप्य । पावकिं पावकपुत्रम् ॥ ७८ ॥ ७९ ॥ जज्वाल चुक्रोधेत्यर्थः ॥ ८० ॥ ८१ ॥ रामानु०-ध्वजाग्र इति । शरौघसमायस्तः शरौघपीडितः ॥ ७२ ॥ हनुमानपीत्यादि श्लोकद्वयमेकं वाक्यम् । युद्धेप्सुः हनुमान् नीलेन संयुक्तं रावणं विप्रेक्षमाणः अन्येन युध्यमानस्य युध्यमाने सति अभिधावनं न युक्तमित्यब्रवीदिति योजना ॥ ७३-८० ॥ ध्वजाग्र इति । रावणकिरीटे स्थितेः केनापि दुष्करत्वाल्लक्ष्मणादयस्त्रयोऽपि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति । हनुमांश्च विस्मितः ।" न मारुतेरस्ति गतिप्रमाणम् " इति प्रसिद्धगतिलाघवो हनुमानपि संजातविस्मयोऽभूदित्यर्थः ॥ ८१ ॥ रावणोऽपीति । आहारयामास आददे ॥ ८२ ॥ लब्धलक्षाः लब्धहर्षविषयाः । नीलमेव पश्यन्त इति वाऽर्थः ॥ ८३ ॥ वानराणां चेति । चशब्देन नीललाघवं समुच्चीयते । सम्भ्रमः व्यग्रता । प्रत्यपद्यत अजानात् । आग्नेयेन आग्नेयमन्त्रेण । संयुक्तम् अभिमन्त्रितम् ॥ ८४ ॥ ८५ ॥ कप इत्यादि । कपे चञ्चलप्रकृते इत्यर्थः । अतो न वानर

रावणोऽपि महातेजाः कपिलाघवविस्मितः । अस्त्रमाहारयामास दीप्तमाग्नेयमद्भुतम् ॥ ८२ ॥ ततस्ते चुक्रुशुर्हृष्टा लब्धलक्षाः प्लवङ्गमाः । नीललाघवसम्भ्रान्तं दृष्ट्वा रावणमाहवे ॥८३॥ वानराणां च नादेन संरब्धो रावणस्तदा । सम्भ्रमाविष्टहृदयो न किञ्चित् प्रत्यपद्यत ॥ ८४ ॥ आग्नेयेनाथ संयुक्तं गृहीत्वा रावणः शरम् । ध्वजशीर्षस्थितं नीलमुदैक्षत निशाचरः । ततोऽब्रवीन्महातेजा रावणो राक्षसेश्वरः ॥८५॥ कपे लाघवयुक्तोऽसि मायया परयाऽनया । जीवितं खलु रक्षस्व यदि शक्तोऽसि वानर ॥ ८६॥ तानि तान्यात्मरूपाणि सृजसि त्वमनेकशः ॥ ८७ ॥ तथापि त्वां मया युक्तः सायकोऽस्त्रप्रयोजितः । जीवितं परिरक्षन्तं जीविताद् भ्रंशयिष्यति ॥८८॥ एवमुक्त्वा महाबाहू रावणो राक्षसेश्वरः । सन्धाय बाणमस्त्रेण चमूपतिमताडयत् ॥ ८९ ॥ सोऽस्त्रयुक्तेन बाणेन नीलो वक्षसि ताडितः । निर्दह्यमानः सहसा निपपात महीतले ॥ ९० ॥

पदेन पौनरुक्त्यम् । तानि तान्यात्मरूपाणि सृजसि त्वमनेकश इति । लाघवातिशयेन सृजसीव दृश्यस इत्यर्थः । ननु तानि तानीत्यनेन रावणो नीलं नानातनुपरिग्रहयुक्तं मन्यत इत्यवगम्यत इति चेन्न; कपे लाघवयुक्तोऽसीति पूर्वोक्तिविरोधात् । युक्तः प्रयुक्तः । अस्त्रप्रयोजितः अस्त्रमन्त्रेणाभिमन्त्रितः । जीवितं परिरक्षन्तं त्वां जीवितात् भ्रंशयिष्यतीत्यन्वयः ॥ ८६–९० ॥ रामानु०–तानि तान्यात्मरूपाणि सृजसि त्वमनेकश इत्यभिधानात् ध्वजाकिरीटादिषु विस्मितः ॥ ८१ ॥ न केवलं स्वपक्षा एव, अपितु शत्रू रावणोऽपि विस्मित इत्याह–रावणोऽपीति ॥ ८२ ॥ लब्धलक्षाः लब्धहर्षविषयाः । नीलमेव पश्यन्त इति वाऽर्थः ॥ ८३ ॥ संरब्धः क्रुद्धः ॥ ८४ ॥ ८५ ॥ मायया चञ्चलतया ॥ ८६ ॥ आत्मरूपाणि आत्मयोग्यानि स्वपराक्रमोचितानि कर्माणि यद्यपि सृजसि तथापि मया युक्तोऽस्त्रप्रयोजितोऽयं सायकः त्वां जीवितात् भ्रंशयिष्यति ॥ ८७–९२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नीलस्य वेगातिशयकृतमवस्थानं युगपदनेकशरीरपरिग्रहकृतमिति रावणो भ्रान्तवानित्यवगम्यते ॥ ८७ ॥ पितृमाहात्म्यम् अग्नेः पुत्रतया दयालुत्ववैभवम् ॥ ९१ ॥ ९२ ॥ सौमित्रिमासाद्य । वारयित्वा सुग्रीवादीन् वारयित्वा । रणमध्ये ज्वलन् स्थितः धनुर्विस्फारयामासेत्यन्वयः ॥ ९३ ॥ ९४ ॥ रक्षः रक्षोरूपः राजेत्य

पितृमाहात्म्यसंयोगादात्मनश्चापि तेजसा । जानुभ्यामपतद्भूमौ न च प्राणैर्व्ययुज्यत ॥९१॥ विसंज्ञं वानरं दृष्ट्वा दशग्रीवो रणोत्सुकः । रथेनाम्बुदनादेन सौमित्रिमभिदुद्रुवे ॥९२॥ आसाद्य रणमध्ये तु वारयित्वा स्थितो ज्वलन् । धनुर्विस्फारयामास कम्पयन्निव मेदिनीम् ॥९३॥ तमाह सौमित्रिरदीनसत्त्वो विस्फारयन्तं धनुरप्रमेयम् । अभ्येहि मामेव निशाचरेन्द्र न वानरांस्त्वं प्रतियोद्धुमर्हः ॥ ९४ ॥ स तस्य वाक्यं प्रतिपूर्णघोषं ज्याशब्दमुग्रं च निशम्य राजा । आसाद्य सौमित्रिमवस्थितं तं कोपान्वितो वाक्यमुवाच रक्षः ॥ ९५ ॥ दिष्ट्याऽसि मे राघव दृष्टिमार्गं प्राप्तोऽन्तगामी विपरीतबुद्धिः । अस्मिन् क्षणे यास्यसि मृत्युदेशं संसाद्यमानो मम बाणजालैः ॥ ९६ ॥ तमाह सौमित्रिरविस्मयानो गर्जन्तमुद्वृत्तसिताग्रदंष्ट्रम् । राजन्न गर्जन्ति महाप्रभावा विकत्थसे पापकृतां वरिष्ठ ॥९७॥

त्यन्वयः ॥ ९५ ॥ दिष्ट्येति । अन्तगामी विनाशेच्छुः अत एव विपरीतबुद्धिः त्वं दिष्ट्या यदृच्छया दृष्टिमार्गं प्राप्तोऽसि । संसाद्यमानः पीड्यमानः ॥ ९६ ॥ तमिति । अविस्मयानः तूष्णींकुर्वन्नित्यर्थः । उद्वृत्तसिताग्रदंष्ट्रम् उन्नतधवलाग्रदंष्ट्रम् । न गर्जन्ति नात्मश्लाघां कुर्वन्तीत्यर्थः । पापकृतां

आसाद्य, सौमित्रिमिति शेषः । सुग्रीवादीन् वारयित्वा रणमध्ये ज्वलन् स्थित इत्यर्थः ॥९३॥९४॥ स तस्य वाक्यमित्यारभ्य किं मोघविकत्थनेनेत्येतदन्तस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु-लक्ष्मणस्य रावणेन किमुक्तं दत्तमत आह स तस्येत्यादिश्लोकद्वयेन । रक्षः राजा स तु लक्ष्मणस्य वाक्यम् उग्रं ज्याशब्दं च निशम्य कोपान्वितोऽपि विपरीतबुद्धिरपि अन्तगाम्यपि अवस्थितं तं सौमित्रिमासाद्य हे राघव! मे पापिष्ठस्यापि मम दिष्ट्या भाग्यवशेन दृष्टिमार्गं प्राप्तोऽसीति वाक्यमुवाचेति सम्बन्धः । स लक्ष्मणः किमुवाचेत्यत आह-अस्मिन् क्षण इत्यादिसार्धश्लोकेन । हे राजन् रावण ! महाप्रभावाः न गर्जन्ति । हे पापकृतां वरिष्ठ ! त्वं विकत्थसे, अत एव मम बाणजालैः सम्पात्यमानस्सन् अस्मिन् क्षणे मृत्युदेशं यास्यसि । अविस्मयानः सौमित्रिः उद्वृत्तसिताग्रदंष्ट्रं गर्जन्तं तमाहेति सम्बन्धः ॥९५-९७॥ ॥१७६॥

For Private And Personal Use Only

वरिष्ठेति हेतुगर्भितविशेषणम् । पापकृद्वरिष्ठत्वाद्विकत्थस इत्यर्थः ॥ ९७ ॥ जानामीति सोपहासोक्तिः । तव विजने यतिवेषेण सीतामपहृतवतः । प्रतापं शत्रुभीषणत्वम् पराक्रमं शौर्यम् । " शौर्योद्योगौ पराक्रमौ " इत्यमरः । मोघविकत्थनेन निष्फलश्लाघनेन ॥ ९८ ॥ स इति । निशिते अग्रधारे अग्रपार्श्वे येषां तैः ॥ ९९ ॥ तानिति । पृषत्कान् बाणान् ॥ १०० ॥ कार्मुकसंप्रयुक्तं चापसंहितम् । क्षुरेति । क्षुरैः नापितशस्त्राकारैः । अर्धचन्द्रैः अर्धचन्द्रा

जानामि वीर्यं तव राक्षसेन्द्र बलं प्रतापं च पराक्रमं च । अवस्थितोऽहं शरचापपाणिरागच्छ किं मोघविकत्थनेन ॥ ९८ ॥ स एवमुक्तः कुपितः ससर्ज रक्षोधिपः सप्त शरान् सुपुङ्खान् । तान् लक्ष्मणः काञ्चनचित्रपुङ्खैश्चिच्छेद बाणैर्निशिताग्रधारैः ॥ ९९ ॥ तान् प्रेक्षमाणः सहसा निकृत्तान्निकृत्तभोगानिव पन्नगेन्द्रान् । लङ्केश्वरः क्रोधवशं जगाम ससर्ज चान्यान्निशितान् पृषत्कान् ॥ १०० ॥ स बाणवर्षं तु ववर्ष तीव्रं रामानुजः कार्मुकसम्प्रयुक्तम् । क्षुरार्धचन्द्रोत्तमकर्णिभल्लैः शरांश्च चिच्छेद न चुक्षुभे च ॥ १०१ ॥ स बाणजालान्यथ तानि तानि मोघानि पश्यं स्त्रिदशारिराजः । विसिष्मिये लक्ष्मणलाघवेन पुनश्च बाणान्निशितान् मुमोच ॥ १०२ ॥ स लक्ष्मणश्चाशु शरान् शिताग्रान् महेन्द्रवज्राशनितुल्यवेगान् । सन्धाय चापे ज्वलनप्रकाशान् ससर्ज रक्षोधिपतेर्वधाय ॥ १०३ ॥ स तान् प्रचिच्छेद हि राक्षसेन्द्रश्छित्त्वा च ताँल्लक्ष्मणमाजघान । शरेण कालाग्निसमप्रभेण स्वयम्भुदत्तेन ललाट देशे ॥ १०४ ॥ स लक्ष्मणो रावणसायकार्तश्चचाल चापं शिथिलं प्रगृह्य । पुनश्च संज्ञां प्रतिलभ्य कृच्छ्राच्चिच्छेद चापं त्रिदशेन्द्रशत्रोः ॥ १०५ ॥

कारमुखैः । उत्तमैः कर्णिभिः कर्णिशरैः । भल्लैः उभयपार्श्वधारैः । शरान् रावणशरान् चिच्छेद । तथापि न चुक्षुभे न कलुषितहृदयोऽभूत् ॥ १०१ ॥ स इति । त्रिदशारिराजः राक्षसराजः ॥ १०२ ॥ स लक्ष्मण इति । महेन्द्रवज्राशनितुल्यवेगान् महेन्द्रवज्रस्याशनेश्च तुल्यवेगान् ॥ १०३ ॥ १०४ ॥ स लक्ष्मण इति ।

तर्हि रणगम्भीरोऽहं त्वां क्षत्रधर्मेणाराधयिष्यामीत्यत आह-जानामीत्यादिना ॥ ९८ ॥ स इति । कुपितः वस्तुतस्तु कुपित इव ॥ ९९ ॥ तानिति । क्रोधवशं

For Private And Personal Use Only

शिथिलं यथा भवति तथा प्रगृह्य ॥ १०५ ॥ १०६ ॥ मेदेत्यकारान्तत्वमार्षम् । समुदग्रशक्तिः समाधिकसामर्थ्यः ॥ १०७ ॥ राक्षसराष्ट्रनाथः राक्षससमूहनाथः ॥ १०८ ॥ बाह्वन्तरं वक्षः ॥ १०९ ॥ विह्वलन्तं मुह्यन्तम् ॥ ११० ॥ लक्ष्मणं भुजाभ्यामुद्धर्तुमुद्युक्तं रावणमृषिः परिहसति–हिमवानिति । शक्यमित्यव्ययम् । हिमवान् "धैर्येण हिमवानिव" इति समस्तधीरोपमानभूतो हिमवानपि रावणस्य भुजाभ्यामुद्धर्तुं शक्यम् । तदेक

निकृत्तचापं त्रिभिराजघान बाणैस्तदा दाशरथिः शिताग्रैः । स सायकार्तो विचचाल राजा कृच्छ्राच्च संज्ञां पुनराससाद ॥ १०६ ॥ स कृत्तचापः शरताडितश्च मेदार्द्रगात्रो रुधिरावसिक्तः । जग्राह शक्तिं समुदग्रशक्तिः स्वयम्भुदत्तां युधि देवशत्रुः ॥ १०७ ॥ स तां विधूमानलसन्निकाशां वित्रासिनीं वानरवाहिनीनाम् । चिक्षेप शक्तिं तरसा ज्वलन्तीं सौमित्रये राक्षसराष्ट्रनाथः ॥ १०८ ॥ तामापतन्तीं भरतानुजोऽस्त्रैर्जघान बाणैश्च हुताग्निकल्पैः । तथापि सा तस्य विवेश शक्तिर्बाह्वन्तरं दाशरथेर्विशालम् ॥ १०९ ॥ स शक्तिमान् शक्तिसमाहतः सन् मुहुः प्रजज्वाल रघुप्रवीरः । तं विह्वलन्तं सहसाऽभ्युपेत्य जग्राह राजा तरसा भुजाभ्याम् ॥ ११० ॥ हिमवान् मन्दरो मेरुस्त्रैलोक्यं वा सहामरैः । शक्यं भुजाभ्यामुद्धर्तुं न सङ्ख्ये भरतानुजः ॥ १११ ॥

देशस्य कैलासस्य पुरा चालितत्वात् । मन्दरः सकलसागरप्रधानगभीरतरक्षीरोदक्षोभणक्षमोऽपि मन्दरो वा भुजाभ्यामुद्धर्तुं शक्यम् । स्वनिर्जितैरेव निर्जरैरमृतमथने जर्झरितत्वात् । मेरुः सकलकुलाचलवलयललामभूतोऽपि मेरुस्तथा कर्तुं शक्यम् । वायुनैव तच्छिखरस्य लङ्कायां अकूपारकुक्षौ निक्षिप्तत्वात् । त्रैलोक्यं पञ्चाशत्कोटिविस्तीर्णमुत्तीर्णपरिमाणान्तरं त्रैलोक्यमपि तथा कर्तुं शक्यम् । तदेकदेशधरण्या हिरण्याक्षेण कक्षीकृतत्वात् । सहामरैः त्रैलोक्यनिर्वाहकगीर्वाणैः सहितमपि तथा कर्तुं शक्यम् । तदधिपतेर्निजतनुजेनैव निगृहीतत्वात् । भरतानुजः रामानुजानुजः रामचतुर्थभाग

जगामेम : रावणविषये एतादृशस्थलेषु सर्वत्रैवमेव इवशब्दादिर्योजनीयः ॥ १००–१०६ ॥ स कृत्तचाप इति । मेदार्द्रगात्र इत्यत्र सन्धिरार्षः ॥ १०७–१०९ ॥ शक्तिमान् बलवानपि शक्तिसमाहतस्सन् । अज्वाल पपातेति पाठान्तरम् । विह्वलन्तं विकलं भवन्तम् । राजा रावणः तरसा बलेन लक्ष्मणं जग्राह इन्द्रजिद्वधयोरपि पुनरुत्थानदर्शनादिदानीमपि पुनरुज्जीवनभयेन गृहीत्वा समुद्रे प्रक्षेपणीयस्ततो रामोऽसहायो नङ्क्ष्यतीत्येवाशयेनायमारम्भः ॥ ११० ॥ हिमवानिति । हिमव

For Private And Personal Use Only

इत्यर्थः। रामचतुर्थभागोद्धरणेऽप्यशक्तः कथं रामेण योद्धुं शक्नोतीति भावः। अयोध्याकाण्डे पञ्चपञ्चाशे–"सीतामादाय गच्छ त्वमग्रतो भरताग्रज" इति वचनं बहुव्रीह्योक्तम्। भुजाभ्यामित्यनेन हिमवदादयो द्वाभ्यामेवोद्धर्तुं शक्यम्। अयं तु विंशतिभुजैरपि न शक्यत इति सूच्यते। रिपुणामप्र कम्प्योऽपीत्यनुवादात् सपरिकरेणापि रावणेन न शक्यमित्यपि सिद्धम्। कथं तर्हि हनुमतोद्धृत इत्यत्राह–सङ्ख्ये इति। दुर्हृदयैर्नोद्धर्तुं शक्य इत्यर्थः। अत एव वक्ष्यति वायुसूनोः सुहृत्त्वेनेति। अनेन हिमवदादिभ्योऽपि सङ्ख्ये पतितस्य लक्ष्मणशरीरस्य गरीयस्त्वोक्ता ॥ १११॥ कुतोऽस्यैतादृशी गरी यस्तेत्यत्राह–शक्त्येति। ब्राह्मया ब्रह्मसम्बन्धिन्या शक्त्या। स्तनान्तरे वक्षसि सौमित्रिस्ताडितः सन् विष्णोर्भागम् अंशभूतम् अचिन्त्यम् ईदृक्तया

शक्त्या ब्राह्मयाऽपि सौमित्रिस्ताडितस्तु स्तनान्तरे। विष्णोरचिन्त्यं स्वं भागमात्मानं प्रत्यनुस्मरत् ॥ ११२॥

इयत्तया च चिन्तयितुमशक्यम्। स्वमात्मानं स्वस्वरूपम्, "स्वात्माप्येनं विगर्हते" इति तथा प्रयोगात्! स्वात्मांश इति गुरुव्यवहाराच्च। प्रत्यनुस्मरत् स्मृतवान्। स्वस्वरूपस्मरणातिरिक्तव्यापाराकरणोक्त्या स्वाभाविकमेवास्येदं गुरुत्वमित्युक्तम्। यत्तु-स्वकीयांशस्मरणेन हेतुना लक्ष्मणेन स्वशरी रस्य गरीयस्त्वं सम्पादितमित्यनेनोक्तमिति तन्न, अपदार्थत्वादवाक्यार्थत्वाच्च। स्वरूपस्मरणस्य गरीयस्त्वं प्रति कारणताग्राहकप्रमाणाभावाच्च। यदपि-विपत्परिहारार्थं भगवन्तं स्वमूलकारणं विष्णुमस्मरदित्यर्थः इति। तदपि न; स्वस्यैव विष्णुरूपत्वेन विपत्परिहारान्तराभावात्। ननु मनुष्यभावना क्रियमाणा विरुध्येत, यदि स्वतो गौरवं भजेत। अतो विष्णुस्मरणमिति चेन्न! मानसभावनाया अपि लौकिकैरज्ञातत्वेन एवमपि मनुष्यभावनाया अन(नु)पायात्। अतः अपर्यनुयोज्यवस्तुस्वभावेनैव भक्ताभक्तेषु गरीयस्तागरीयस्ते। अत एवाचिन्त्यमित्युक्तम् ॥ ११२॥

दादिकं भुजाभ्यामुद्धर्तुं शक्यम्, रावणस्येति शेषः। सङ्ख्ये भरतानुजः उद्धर्तुमशक्य इत्यर्थः ॥ १११ ॥ इतरशरीरसाधारणस्य लक्ष्मणशरीरस्योद्धरणा शक्तित्वे हेतुमाह–शक्त्येति। ब्राह्मया ब्रह्मदत्तया। ताडनानन्तरं स्वमात्मानं विष्णोस्सर्वव्यापकस्याचिन्त्यम् इयत्तया चिन्तितुमशक्यम्। भागमंशं प्रत्यनुस्मरत् तद्विपत्परिहारार्थं भगवन्तं स्वमूलकारणं विष्णुमस्मरदित्यर्थः। अन्यथा सर्वथैतादृशस्मरणे विद्यमाने सति सर्वथाऽनुवर्तमाना मनुष्यबुद्धिर्बाध्येत। तस्यां च बाधितायां तया साध्यं रावणसंहारादिरूपं कार्यं न शक्येतेत्यभिप्रायः। एतेन स्वकीयांशस्मरणेन हेतुना लक्ष्मणेन स्वशरीरस्य गरीयस्त्वमुपात्तमित्युक्तं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वस्तुस्वरूपस्यैवंविधत्वात्तोलयितुमशक्तोऽभवदित्युपसंहरति–तत इत्यादिसार्धश्लोक एकान्वयः । यतः स्वाभाविकमेव गरीयस्त्वं ततो हेतोः लङ्घने उद्धरणे अप्रभुः असमर्थः । अथ रणे पतनानन्तरं देवकण्टकः रावणः मानुषं देहमास्थितं दानवदर्पघ्नं वैष्णवं भागं सौमित्रिं भुजाभ्यां पीडयित्वा ततः वैष्णवभागरूपत्वाद्धेतोः लङ्घने अप्रभुरभवदित्यन्वयः । अत्रापि विशेषणसामर्थ्याद्वस्तुस्वरूपकृतमेवाकम्प्यत्वमित्युक्तम् । ननु च कथमंशसम्भवः?

ततो दानवदर्पघ्नं सौमित्रिं देवकण्टकः । तं पीडयित्वा बाहुभ्यामप्रभुर्लङ्घनेऽभवत् । अथैवं वैष्णवं भागं मानुष देहमास्थितम् ॥ ११३ ॥ अथ वायुसुतः क्रुद्धो रावणं समभिद्रवत् । आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना ॥ ११४ ॥ तेन मुष्टिप्रहारेण रावणो राक्षसेश्वरः । जानुभ्यामपतद्भूमौ चचाल च पपात च ॥११५॥ आस्यैः सनेत्रश्रवणैर्ववाम रुधिरं बहु ॥ ११६ ॥ विघूर्णमानो निश्चेष्टो रथोपस्थ उपाविशत् । विसंज्ञो मूर्च्छितश्चासीन्न च स्थानं समालभत् ॥११७॥ विसंज्ञं रावणं दृष्ट्वा समरे भीमविक्रमम् । ऋषयो वानराः सर्वे नेदुर्देवाः सवासवाः ॥ ११८॥

विष्णुस्वरूपस्य निरवयवत्वात् । सत्यम्, स्वरूपेण नांशत्वमुच्यते, किन्तु गुणाविर्भावतारतम्यात् । " गुणैः षड्भिस्त्वेतैः प्रथमतरमूर्तिस्तव बभौ ततस्तिस्रस्तेषां त्रियुगयुगलैर्हि त्रिभिरभूत् । व्यवस्थायां चैषां ननु वरद साविष्कृतिवशात् भवान् सर्वत्रैव त्वगणितमहामङ्गलगुणः ॥ " इत्यभियुक्तैरुक्तत्वात् । मानुषरूपत्वं चास्य मानुषसमानाकृतिकत्वम् ॥ ११३ ॥ ११४ ॥ तेनेत्यादि । जानुभ्यां रथभूमावपतत् । अथ चचाल । ततः पपात अशयिष्ट । दशभिरास्यैः रुधिरं ववाम । सनेत्रश्रवणैरित्यनेन नेत्रेभ्यः श्रवणेभ्यश्च रुधिरं ववामेत्युच्यते ॥ ११५ ॥ ११६ ॥ विघूर्णमान इति । किञ्चित्कालं विघूर्णमानः भ्रमन् । पुनर्निश्चेष्टः सन् रथोपस्थे रथमध्ये । उपाविशत् स्थितः । ततो मूर्च्छितः अत एव विसंज्ञः संज्ञाशून्यश्चासीत् । पुनः संज्ञां लब्ध्वाऽपि स्थानं स्थितिम् । नालभत् नालभत,चचालेत्यर्थः॥११७॥ रामानु०–रथोपस्थ उपाविशदिति । रथोपर्यवस्थानाभिधानात्पुना रथारोहणमवगम्यते ॥११७॥ नेदुः

अभवति ॥ ११२ ॥ ततो दानवेत्यादि सार्धश्लोकमेकं वाक्यम् । मानुषं देहमास्थितं वैष्णवं भागं तं सौमित्रिम् । अथ वैष्णवभागस्मरणानन्तरम् । बाहुभ्यां पीडयित्वा ततः विष्ण्वंशस्मरणहेतुनैव लङ्घने उद्धरणे तोलने वा अप्रभुः असमर्थोऽभवदित्यर्थः ॥ ११३–११५ ॥ आस्यैरिति बहुत्वं दशाननत्वात् । अस्येति शेषः ॥ ११६ ॥ रथोपस्थे रथोपरिभागे ॥ ११७ ॥ नेदुः, सन्तोषादिति भावः । सहासुराः इति पाठः । रावणस्य देववदसुरेष्वपि क्लेशकरत्वेन तेषामपि वैरित्वात ॥११८॥११९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

हर्षेणेति शेषः ॥ ११८ ॥ अभ्याशं समीपम् ॥ ११९ ॥ ननु पूर्वं हिमवानित्यादिना लक्ष्मणस्याकम्प्यत्वमुक्तम्, तादृशस्य कपिना रामसमीप प्रापणं कथमित्याशङ्क्य विरोधं परिहरति–वायुसूनोरिति । सुहृत्त्वेन शोभनहृदयत्वेन, अनुकूलहृदयत्वेनेत्यर्थः । हृदयानुकूल्यमेवालम्, भक्तिस्त्व धिकेत्याह भक्त्या परमया चेति । चशब्दोऽन्वाचये । सः लक्ष्मणः । शत्रूणां रावणस्य तत्परिकराणां चेत्यर्थः । अप्रकम्प्योऽपि कम्पितुमशक्योऽपि ।

हनुमानपि तेजस्वी लक्ष्मणं रावणार्दितम् । अनयद्राघवाभ्याशं बाहुभ्यां परिगृह्य तम् ॥ ११९ ॥
वायुसूनोः सुहृत्त्वेन भक्त्या परमया च सः । शत्रूणामप्रकम्प्योऽपि लघुत्वमगमत् कपेः ॥ १२० ॥
तं समुत्सृज्य सा शक्तिः सौमित्रिं युधि दुर्जयम् । रावणस्य रथे तस्मिन् स्थानं पुनरुपागता ॥ १२१ ॥
आश्वस्तश्च विशल्यश्च लक्ष्मणः शत्रुसूदनः । विष्णोर्भागममीमांस्यमात्मानं प्रत्यनुस्मरन् ॥ १२२ ॥

कपेः कपेरपि । हनुमत एकस्य लघुत्वमगमत् लघुत्वमकरोत् । अनेन लघुत्वस्य बुद्धिपूर्वकत्वमुक्तम् । शत्रुमित्रयोर्दुष्प्रापत्वसुप्रापत्वे स्वरूपप्रयुक्ते अस्येति भावः । मूर्च्छितस्यापि लक्ष्मणस्य ज्ञानशक्तिप्रतिपादनेन तत्र तत्र राघवयोरज्ञानाशक्तिप्रत्यायकानि वचनानि मानुषवेषनिर्वहणपराणीति मन्तव्यानि ॥ १२० ॥ तमिति । दुर्जयमिति हेतुगर्भम् । तस्य दुर्जयस्वरूपत्वाच्छक्तिस्तं त्यक्त्वा गतेति भावः । एतच्छ्लोकानन्तरमाश्वस्त इति श्लोकः । ततो रावणोऽपीति श्लोकः पठनीयः ॥ १२१ ॥ आश्वस्त इति । आश्वस्तः लब्धसंज्ञः । विशल्यः प्ररूढव्रणमुखः, अभवदिति शेषः । अकाण्डे शक्ति निर्गमाश्वासनविशल्यत्वेषु को हेतुरत आह-विष्णोरिति । विरोधिप्रत्यनीकस्वभावत्वादिति भावः । अमीमांस्यम् अचिन्त्यम् । अनुस्मरन्नित्यनेन

पूर्वं हिमवानित्यादिना लक्ष्मणस्याप्रकम्प्यत्वमुक्तम्, तादृशस्य कपिना तोलनं राघवसमीपप्रापणं च कथमित्याशङ्क्य विरोधं परिहरति–वायुसुनोरिति । शत्रूणा मिति बहुवचनेन लक्ष्मणोद्धरणसमये रावणस्यानुचरैस्साहाय्यं कृतमिति गम्यते । मूर्च्छितस्यापि सौमित्रेर्ज्ञानशक्तिप्रतिपादनेन तत्र तत्र रामलक्ष्मणयोरज्ञाना शक्तिप्रत्यायकानि वचनानि मानुषवेषनिर्वहणपराणीति मन्तव्यानि । तत्र श्रीशुकः–"मर्त्यावतारस्त्विह मर्त्यशिक्षणं रक्षोवधायैव न केवलं विभोः । कुतोऽन्यथा स्यू रमतः स्व आत्मन सीताकृतानि व्यसनानीश्वरस्य ॥" इत्यनेनाप्रकम्प्यस्यापि हनुमद्भक्तिसौहार्दाभ्यां तं प्रति लघुत्वमाविर्न विरुद्ध्यत इत्युक्तं भवति लघुत्व मिति ॥ १२० ॥ तं समुत्सृज्य ब्रह्मत्वेन ध्यानात्तत्समुत्सर्गः । स्थानं स्थितिम् ॥ १२१ ॥ यत्नं विनैव लक्ष्मणमपहाय कथं शक्तिर्गतवतीत्याशङ्क्य तत्रापि स्वांश

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साधनानुष्ठानं किमपि न कृतवानित्युक्तम् ॥ १२२ ॥ १२३ ॥ निपातितेति । द्रवन्तीमिति रावणस्य बाणसन्धानदर्शनादिति भावः ॥ १२४ ॥ अथेति । अर्हसीत्यनन्तरमितिकरणं द्रष्टव्यम् ॥ १२५ ॥ विष्णुर्यथेति सार्धश्लोक एकान्वयः । वायुपुत्रेण भाषितं तद्वाक्यं श्रुत्वा समाहितः सन् विष्णु गरुत्मन्तं यथा तथा महाकपिं हनुमन्तमारुरोहेति योजना ॥ १२६ ॥ रथस्थमित्यर्धमेकं वाक्यम् ॥ १२७ ॥ तमालोक्येत्यनुवादः अव्यवहितपूर्व

रावणोऽपि महातेजाः प्राप्य संज्ञां महाहवे । आददे निशितान् बाणान् जग्राह च महद्धनुः ॥ १२३ ॥ निपातित महावीरां द्रवन्तीं वानरीं चमूम् । राघवस्तु रणे दृष्ट्वा रावणं समभिद्रवत् ॥ १२४ ॥ अथैनमुपसङ्गम्य हनुमान् वाक्यमब्रवीत् । मम पृष्ठं समारुह्य राक्षसं शास्तुमर्हसि ॥ १२५ ॥ विष्णुर्यथा गरुत्मन्तं बलवन्तं समाहितः । तच्छ्रुत्वा राघवो वाक्यं वायुपुत्रेण भाषितम् । आरुरोह महाशूरो बलवन्तं महाकपिम् ॥ १२६ ॥ रथस्थं रावणं सङ्ख्ये ददर्श मनुजाधिपः ॥१२७॥ तमालोक्य महातेजाः प्रदुद्राव स राघवः । वैरोचनमिव क्रुद्धो विष्णुरभ्युद्यतायुधः ॥ १२८ ॥ ज्याशब्दमकरोत्तीव्रं वज्रनिष्पेषनिस्वनम् ॥ १२९ ॥ गिरा गम्भीरया रामो राक्षसेन्द्रमुवाच ह ॥ १३० ॥ तिष्ठ तिष्ठ मम त्वं हि कृत्वा विप्रियमीदृशम् । क्व नु राक्षसशार्दूल गतो मोक्षमवाप्स्यसि ॥ १३१ ॥ यदीन्द्रवैवस्वतभास्करान् वा स्वयम्भुवैश्वानरशङ्करान् वा । गमिष्यसि त्वं दश वा दिशोऽथवा तथापि मे नाद्य गतो विमोक्ष्यसे ॥ १३२ ॥

कालद्योतनार्थः । अभ्युद्यतायुधः क्रुद्धो राघवः विष्णुर्वैरोचनं बलिमिव प्रदुद्राव । साग्रहगमनमात्रे दृष्टान्तः ॥ १२८ ॥ ज्याशब्दमित्यर्धम् । वज्र निष्पेषः स्फूर्जथुः । "स्फूर्जथुर्वज्रनिष्पेषः" इत्यमरः ॥ १२९ ॥ गिरेत्यर्धम् ॥१३०॥ तिष्ठ तिष्ठेति । ईदृशं लक्ष्मणप्रहाररूपं सीताहरणरूपं वा । मोक्षं, मत्त इति शेषः ॥१३१॥ यदीति । इन्द्रादीन् वा स्वयम्भ्वादीन् वा यदि गमिष्यसि यद्यपि गमिष्यसि तथापि अद्य मत्समीपं गतस्त्वं मे मत्तः न विमोक्ष्यसे । ॥१७९॥

स्मरणमेव कारणमित्याह–आश्वस्त इति । यतो लक्ष्मणोऽप्यमीमांस्यं मीमांसाया अविषयं विष्णोर्भागमात्मानं प्रत्यक्स्मरत तत आश्वस्तो विशल्यश्चेत्यर्थः ॥१२२–१३२॥

For Private And Personal Use Only

दक्ष वा दिशो वेत्यत्र एको वाकारश्चार्थः ॥ १३२ ॥ यश्चैवेति । अद्य य एष त्वया शक्त्याऽभिहतः स एषः तत्र विषादमिच्छन् सन् सपुत्रदारस्य तव मृत्युः सन् सहसा अभ्युपेतः अभ्युपागतप्रायः, अचिरादागमिष्यतीत्यर्थः । यद्वा अभेदेनोच्यते । यः शक्त्याऽभिहतः स एवाहमागतवानस्मि । लक्ष्मणं प्राहरमिति मागा गर्वमिति भावः ॥ १३३ ॥ लक्ष्मणेनाप्रहृतः कथं त्वया प्रहृतः स्यामित्याशङ्क्य स्वपराक्रमविशेषं दर्शयति–एतेनेति ।

यश्चैव शक्त्याऽभिहतस्त्वयाऽद्य इच्छन् विषादं सहसाऽभ्युपेतः । स एव रक्षोगणराज मृत्युः सपुत्रदारस्य तवाद्य युद्धे ॥ १३३ ॥ एतेन चात्यद्भुतदर्शनानि शरैर्जनस्थानकृतालयानि । चतुर्दशान्यात्तवरायुधानि रक्षस्सहस्राणि निषूदितानि ॥ १३४ ॥ राघवस्य वचः श्रुत्वा राक्षसेन्द्रो महाकपिम् । वायुपुत्रं महावीर्यं वहन्तं राघवं रणे । [रोषेण महताऽऽविष्टः पूर्ववैरमनुस्मरन् ।] आजघान शरैस्तीक्ष्णैः कालानलशिखोपमैः ॥ १३५ ॥ राक्षसेनाहवे तस्य ताडितस्यापि सायकैः । स्वभावतेजोयुक्तस्य भूयस्तेजोऽभ्यवर्धत ॥ १३६ ॥ ततो रामो महातेजा रावणेन कृतव्रणम् । दृष्ट्वा प्लवगशार्दूलं कोपस्य वशमेयिवान् ॥ १३७ ॥ तस्याभिचङ्क्रम्य रथं सचक्रं साश्वध्वजच्छत्र महापताकम् । ससारथिं साशनिशूलखड्गं रामः प्रचिच्छेद शरैः सुपुङ्खैः ॥ १३८ ॥ अथेन्द्रशत्रुं तरसा जघान बाणेन वज्राशनिसन्निभेन । भुजान्तरे व्यूढसुजातरूपे वज्रेण मेरुं भगवानिवेन्द्रः ॥ १३९ ॥

एतच्छब्दः सन्निहितपरः । एषोऽस्मीत्यादिप्रयोगात् अयं जन इति प्रयोगाच्च । मयेत्यर्थः । मृत्युशब्दापेक्षया वा एतेनेत्युक्तिः । चतुर्दशानि चतुर्दश शब्दादर्शआद्यचि टिलोपे कृते जसि रूपम् । यद्वा एतेनेति स्वाभेदेन लक्ष्मणो निर्दिश्यते ॥ १३४ ॥ राघवस्येत्याद्यर्धत्रयमेकं वाक्यम् । वहन्तमिति । आत्मानं प्रहृत्य पुनरपि रामं वहतीति क्रोधादिति भावः ॥ १३५ ॥ राक्षसेनेति । स्वभावतेजः स्वाभाविकतेजः ॥ १३६ ॥ तत इति । एयिवान् प्राप्तः ॥ १३७ ॥ अभिचङ्क्रम्य पौनःपुन्येन समीपं गत्वा ॥ १३८ ॥ वज्राशनिसन्निभेनेति बाणस्य वज्रसाम्यमुच्यते । वज्रेण मेरुं भगवानिवेन्द्र इति

इच्छन् धोढुमिच्छन् ॥ १३३ ॥ एतेन लक्ष्मणेन शरैः चतुर्दशानि चतुर्दशसङ्ख्यायन्ति रक्षसां सहस्राणि निषूदितानीति सम्बन्धः । उभयोरैक्यविवक्षया लक्ष्मणेन निषूदितानीत्युक्तम् ॥ १३४–१३७ ॥ अभिसंक्रम्य संयुक्तो भूत्वा ॥ १३८ ॥ व्यूढं विशालम् सुजातरूपं राजाहेमहाभरणचन्दनादिभिः प्रशस्त

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महत्त्वं रामस्येन्द्रसाम्यमित्यपुनरुक्तिः । भगवान् वीर्यवान् । "भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरः ॥१३९॥ य इति । यः पुरा । वज्रपातयुक्ताशनिसन्निपातादिति मध्यमपदलोपिसमासः । वज्रम् इन्द्रायुधम् । अशनिः औत्पातिकः । न चुक्षुभे नार्तिं प्राप्तः । नापि चचाल नार्तिनिमित्तं चलनं प्राप्तः । राजा अन्यूनराजभावश्च स्थितः । सः रामबाणाभिहतः । भृशार्तः भृशमार्तः क्षुब्धः चचाल । वीरोऽपि चापं मुमोच । स्वस्य स्वरक्ष्य

यो वज्रपाताशनिसन्निपातान्न चुक्षुभे नापि चचाल राजा । स रामबाणाभिहतो भृशार्तश्चचाल चापं च मुमोच वीरः ॥ १४० ॥ तं विह्वलन्तं प्रसमीक्ष्य रामः समाददे दीप्तमथार्धचन्द्रम् । तेनार्कवर्णं सहसा किरीटं चिच्छेद रक्षोधिपतेर्महात्मा ॥ १४१ ॥ त निर्विषाशीविषसन्निकाशं शान्तार्चिषं सूर्यमिवाप्रकाशम् । गतश्रियं कृत्तकिरीटकूटमुवाच रामो युधि राक्षसेन्द्रम् ॥ १४२ ॥ कृतं त्वया कर्म महत् सुभीमं हतप्रवीरश्च कृतस्त्वयाऽहम् । तस्मात् परिश्रान्त इव व्यवस्य न त्वां शरैर्मृत्युवशं नयामि ॥ १४३ ॥

त्वात्स्वयं त्यक्तवान् रामैकरक्ष्यत्वद्योतनाय ॥ १४० ॥ तमिति । विह्वलन्तं मूर्च्छितम् । प्रसमीक्ष्य तस्यानन्यशरणत्वमवलोक्य । अर्धचन्द्रम् अर्धचन्द्राकाराग्रं बाणम् आददे । तेन मुकुटं चिच्छेद मानभङ्गमकरोदित्यर्थः । महात्मा महामनाः, दयालुरित्यर्थः । आभ्यां श्लोकाभ्यां भगवद्रक्षणे निमित्तं स्वयत्ननिवृत्तिरेवेत्युक्तम् ॥ १४१ ॥ तमिति । तं त्यक्तचापम् अत एव निर्विषाशीविषसन्निकाशं निर्विषसर्पतुल्यम् । अप्रकाशं निस्तेजस्कम् अत एव शान्तार्चिषं शान्तकिरणं सूर्यमिव स्थितम् । कृत्तकिरीटकूटं छिन्नकिरीटसमूहम् । "मायानिश्चलयन्त्रेषु कैतवानृतराशिषु । अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्" इत्यमरः । अत एव गतश्रियं निष्प्रभम् उवाच ॥१४२॥ कृतमिति । महत् अनितरदुष्करम् । सुभीमं कर्म युद्धं कृतम् ।

रूपं तस्मिन् ॥ १३९ ॥ वज्रपातश्चाशनिसन्निपातश्चेति समाहारैकवत् ॥ १४०-१४२ ॥ हताः प्रवीरा यस्य तथा । तस्मात् युद्धधर्मज्ञत्वात् । व्यवस्य ज्ञात्वा ॥१४३॥ ॥१८०॥

स०–सुभीमं कर्म समरे त्वया कृतम् । अहं हतप्रवीरः हताः हतप्रायाः प्रवीराः नीलाद्या यस्य स तथा कृतः । यद्वा त्वया निमित्तभूतेन अहं हताः प्रवीरास्तावका येन स तथा कृत इति वा । एतेनैकलापराधेन बहूनां घातो जात इति सूच्यते । सुभीमकर्मकर्तृत्वात्प्रहस्तादीनां सहायभूतानामभावाच्च परिश्रान्त इति व्यवस्य निश्चित्य त्वां न मृत्युवशं नयामि । किरीटच्छेदनेन त्वयाऽपि शिरःकर्तनसामर्थ्यं ममास्तीति ज्ञातमेवेति भावः ॥ १४३ ॥

For Private And Personal Use Only

किञ्च अहं हतलक्ष्मणादिप्रवीरश्च कृतोऽस्मि । तस्मात् अनेकवीरपतनावधिकरणकरणात् । त्वं परिश्रान्तः आयुधधारणेऽपि श्रान्त इति व्यवस्य निश्चित्य त्वां मृत्युवशं मृत्योरधीनतां न नयामि, चिररणपरिश्रान्तकृन्तनकृतापवादापनोदाय सम्प्रति भवतः प्राणापहरणकर्मणो विरमामीत्यर्थः ॥ १४३ ॥ गच्छेति । रिपौ पुरो विलसति कथं गच्छेयमित्यत्राह अनुजानामीति । रणार्दितः युद्धे श्रान्तः । रात्रिंचरराज कूटयोधिन् ! इति सापहा

गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिंचरराज लङ्काम्। आश्वास्य निर्याहि रथी च धन्वी तदा बलं द्रक्ष्यसि मे रथस्थः ॥ १४४ ॥ स एवमुक्तो हतदर्पहर्षो निकृत्तचापः स हताश्वसूतः । शरार्दितः कृत्तमहाकिरीटो विवेश लङ्कां सहसा स राजा ॥१४५॥ तस्मिन् प्रविष्टे रजनीचरेन्द्रे महाबले दानवदेवशत्रौ । हरीन् विशल्यान् सह लक्ष्मणेन चकार रामः परमाहवाग्रे ॥ १४६ ॥ तस्मिन् प्रभिन्ने त्रिदशेन्द्रशत्रौ सुरासुरा भूतगणा दिशश्च । ससागराः सर्षिमहोरगाश्च तथैव भूम्यम्बुचराश्च हृष्टाः ॥ १४७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनषष्टितमः सर्गः ॥ ५९ ॥

सोक्तिः । आश्वास्य विश्रम्य । रथी धन्वी च सन्निर्याहि । स त्वं तदा तादृशे मे बलं रथस्थ इत्युपलक्षणम् धानुष्कश्च सन् द्रक्ष्यसीत्यन्वयः ॥१४४॥ स इति । अत्र क्रियाभेदात्तच्छब्दत्रयमिति न तद्वैयर्थ्यम् । सहसा मुकुटभङ्गकृतलज्जयेति भावः ॥ १४५ ॥ तस्मिन्निति । प्रविष्टे, लङ्कामिति शेषः । दानवदेवशत्रावित्यनेन रावणनिर्गमो देवदानवहर्षहेतुरिति सूच्यते । सह लक्ष्मणेनेति । लक्ष्मणस्य पूर्वमेव विशल्यत्वेऽप्यादरात् पुनः करणम् । परमाहवाग्र इत्यनेन विशल्यकरणं विना सुग्रीवादीनां हरीणामन्यत्रानयनासंभवः सूच्यते ॥ १४६ ॥ पूर्वसूचितं देवादिहर्षं प्रपञ्चयति–तस्मिन्निति । प्रभिन्ने पराजिते । दिशः दिक्पालाः । सागराः सागरवासिनः । अम्बुचराः सागरभिन्नाम्बुचराः । हृष्टाः, बभूवुरिति शेषः । पद्यचां रावणमुकुटभङ्गः ॥ १४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनषष्टितमः सर्गः ॥ ५९ ॥

गच्छानुजानामीत्याश्वास्य विश्रम्य ॥ पद्यचां रावणस्य प्रथमपराजयः ॥१४४–१४७॥ इति श्रीमहे० श्रीरामायण० युद्धकाण्डव्याख्यायाम् एकोनषष्टितमः सर्गः ॥५९॥

स०–इतो रणात् रणमण्डलात् प्रयाहि । जानामि अनुजानामि । प्रयाहि जानामि इति पाठः । उपसर्गोऽत्र धातुलीनार्थद्योतकः इत्युच्यते अनुजानामीति । रथी सहायातानेकरथवान् । सधन्वीत्यप्येव मेव स त्वं धन्वीति वा । प्रेक्ष्यसि प्रेक्षिष्यसि ॥ १४४ ॥ भूम्यम्बुचराः भूमिचराः अम्बुचराः मनुष्यादयो यादांसि च । प्रहृष्टाः सर्वोपद्रवकर्तृरावणस्य सर्वापेक्षितत्वादिति भावः ॥ १४७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ कुम्भकर्णप्रबोधनं षष्टौ–स प्रविश्येत्यादि । रामबाणभयार्दितः किमिदानीमपि रामबाणाः पतेयुरिति भयपीडितः । व्यथितेन्द्रियः दुःखित मनस्कः ॥ १ ॥ मनोव्यथामुपपादयितुं तद्धेतुं सदृष्टान्तमनुवदति–मातङ्ग इवेति । महात्मना महास्वभावेन, बलवतेत्यर्थः ॥ २ ॥ ब्रह्मदण्डेति । ब्रह्मदण्डः ब्रह्मशापः, सर्वास्त्रनिगरणक्षमो वसिष्ठदण्डो वा ब्रह्मास्त्रं वा । युगान्तकालसमुत्थितोऽग्निवर्णो धूमकेतुरित्येके । तत्प्रकाशानां बाणानामिति

स प्रविश्य पुरीं लङ्कां रामबाणभयार्दितः । भग्नदर्पस्तदा राजा बभूव व्यथितेन्द्रियः ॥ १ ॥ मातङ्ग इव सिंहेन गरुडेनेव पन्नगः । अभिभूतोऽभवद्राजा राघवेण महात्मना ॥ २ ॥ ब्रह्मदण्डप्रकाशानां विद्युत्सदृशवर्चसाम् । स्मरन् राघवबाणानां विव्यथे राक्षसेश्वरः ॥ ३ ॥ स काञ्चनमयं दिव्यमाश्रित्य परमासनम् । विप्रेक्षमाणो रक्षांसि रावणो वाक्यमब्रवीत् ॥४॥ सर्वं तत् खलु मे मोघं यत्तप्तं परमं तपः । यत् समानो महेन्द्रेण मानुषेणास्मि निर्जितः ॥ ५ ॥ इदं तद्ब्रह्मणो घोरं वाक्यं मामभ्युपस्थितम् । मानुषेभ्यो विजानीहि भयं त्वमिति तत्तथा ॥ ६ ॥ देव दानवगन्धर्वैर्यक्षराक्षसपन्नगैः । अवध्यत्वं मया प्राप्तं मानुषेभ्यो न याचितम् ॥ ७ ॥ विदितं मानुषं मन्ये रामं दशरथात्मजम् । इक्ष्वाकुकुलनाथेन अनरण्येन यत्पुरा ॥ ८ ॥ उत्पत्स्यते हि मद्वंशे पुरुषो राक्षसाधम । यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिम् । निहनिष्यति सङ्ग्रामे त्वां कुलाधम दुर्मते ॥ ९ ॥

" अधीगर्थदयेशां कर्मणि " इति षष्ठी ॥ ३ ॥ ४ ॥ सर्वमिति । मे मया यत्तपस्तप्तं तत् सर्वं मोघम्, जातमिति शेषः ॥ ५ ॥ ब्रह्मवाक्यं तु फलित मित्याह–इदमिति । त्वं मानुषेभ्यो भयं विजानीहीति यत् ब्रह्मणो घोरं वाक्यं तदिदं मामभि मां प्रति उपस्थितं मयि फलितमित्यर्थः । यतस्तत् ब्रह्म वाक्यं तथा । न तु मोघं भविष्यतीत्यर्थः ॥ ६ ॥ देवेति । प्राप्तं याचित्वा प्राप्तम्, मानुषेभ्योऽवध्यत्वं नैव याचितमित्यर्थः ॥ ७ ॥ विदितमित्यादि सार्धं श्लोकद्वयमेकान्वयम् । यस्त्वामित्यत्र तु आमिति छेदः । आमित्यङ्गीकारे । यस्तु पुरुषस्त्वां सङ्ग्रामे निहनिष्यति सः मद्वंशे उत्पत्स्यते। आं निश्चितम् ।

॥ १ ॥ २ ॥ ब्रह्मेति । ब्रह्मदण्डप्रकाशानां ब्रह्मदण्डो नाम युगान्तकालसमुत्थितोऽग्निवर्णो धूमकेतुः । यद्वा ब्रह्मदण्डो ब्रह्मास्त्रम् । राघवबाणानामिति कर्मणि षष्ठी ॥ ३–५ ॥ इदमिति । त्वं मानुषेभ्यो भयं विजानीहीति ब्रह्मणो घोरं यद्वाक्यं तदिदं मामभ्युपस्थितम्, तद्वाक्यं तथा अमोघमित्यर्थः ॥ ६ ॥ ७ ॥ विदितमित्यादि सार्धश्लोकद्वयमेकम् । शप्तोऽहमित्येतदुपरितनं काकाक्षिन्यायेनात्रापि सम्बध्यते । हे राक्षसाधम ! यः सपुत्रं सामात्यं त्वां सङ्ग्रामे निहनिष्यति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति एवंप्रकारेण इक्ष्वाकुकुलनाथेन अनरण्येन यत् यस्मात् पुरा विदितं प्रतिज्ञातम्। "विदितौ ज्ञातविश्रुतौ" इति नानार्थरत्नमाला। तस्मात् मानुषं रामं दशरथात्मजं दशरथपुत्रत्वेन जातं मन्ये। राक्षसाधम कुलाधमेति जातितः कुलतश्च नीचत्वमुच्यते। दुःखातिरेकादनरण्योक्तपरुषानुवादः। अन्ये तु त्वामिति द्विरुक्तिरनुस्मरणार्थेत्याहुः। अपरे त्वाग्रहातिशयेन द्विरुक्तिरिति। त्वां प्रत्युत्पत्स्यत इति द्वितीयत्वांशब्दान्वय इत्येके ॥८॥९॥

शप्तोऽहं वेदवत्या च यदा सा धर्षिता पुरा। सेयं सीता महाभागा जाता जनकनन्दिनी ॥ १० ॥
उमा नन्दीश्वरश्चापि रम्भा वरुणकन्यका। यथोक्तास्तपसा प्राप्तं न मिथ्या ऋषिभाषितम् ॥ ११ ॥
एतदेवाभ्युपागम्य यत्नं कर्तुमिहार्हथ। राक्षसाश्चापि तिष्ठन्तु चर्यागोपुरमूर्द्धसु ॥ १२ ॥

किंचाहं पुरा वेदवत्या शप्तोऽस्मि। यत्कृते तव विनाशो भविष्यतीति। कदेत्यत्राह यदेति। सा वेदवती यदा धर्षिता बलात्कृता तदा। अद्य तया किं क्रियते? सीता ह्येतदुपद्रवमूलमित्यत्राह सेयमिति। सा वेदवती स्वशापनिर्वाहार्थं सीता जाता ॥ १० ॥ उमादयश्चत्वारः तपसा तपःप्रभावेन यथोक्ताः यथोक्तवन्तः तथा प्राप्तं सिद्धम्। ऋषिभाषितं न मिथ्या भवति हि। नन्दीश्वररम्भाशापावुत्तररामायणे प्रोक्तौ। उमावरुणकन्यकाशापौ चानेनैव सिद्धौ ॥ ११ ॥ एतत् शापस्वरूपम्। अभ्युपागम्य ज्ञात्वा। इह प्रकृते शत्रुविजये कार्ये। यत्नम् अवधानं कर्तुमर्हथ। चर्याः गोपुरपार्श्वस्थभटसञ्चार

स पुरुषो मद्वंशे त्वां प्रत्युत्पत्स्यते हि इति। यद्यस्मात्कारणादिक्ष्वाकुकुलजातेन अनरण्येन पुरा शप्तोऽहं तस्मान्मया पूर्वमेव विदितं दशरथात्मजं रामं मानुषं मन्य इति सम्बन्धः। त्वामिति द्विरुक्तिराग्रहातिशयेन ॥ ८ ॥ ९ ॥ शप्तोऽहमिति। वेदवत्या चाहं शप्तः। कुतः? पुरा यदा यस्मात्कारणात् सा वेदवती धर्षिता। अस्तु, प्रकृते किमायातमत आह सेयमिति। महाभागा सैव वेदवत्येव जनकनन्दिनी सीता जातेत्यर्थः ॥ १० ॥ उमेति। तपसा तपोबलेन यथोक्तं तत्तथैव मया प्राप्तम् अतस्तदृषिभाषितं न मिथ्येति सम्बन्धः। यथोक्तं तन्मया प्राप्तमिति वा पाठः। एतैर्यथा उक्तं तन्मया प्राप्तमित्यर्थः। उमाशापस्तु कैलासगिरिचालनवेलायां रावण! ते स्त्रीनिमित्तं वध इत्येवंरूप इति ज्ञेयम्। नन्दीश्वरशापस्तु उत्तररामायणे 'यस्माद्वानरमूर्तिं मां दृष्ट्वा राक्षस दुर्मते! मौर्ख्यान्मामवजानीषे परिहासं च मुञ्चसि। तस्मान्मद्रूपसंयुक्ता मद्वीर्यसमतेजसः। उत्पत्स्यन्ते वधार्थं हि कुलस्य तव वानराः ॥" इति। रम्भाशब्देन रम्भानिर्बन्धकृतनलकूबरशाप उच्यते। तदुक्तमुत्तरकाण्डे—"यदा त्वकामां कामार्तो धर्षयिष्यति योषितम्। मूर्द्धा तु शतधा तस्य शकलीभविता तदा ॥" इति। वरुणकन्यका पुञ्जिकस्थला। तेन च तन्निबन्धनब्रह्मशापो विवक्षितः। सोऽपि स्त्रीधर्षणनिमित्तवधरूपः ॥ ११ ॥ एतदेव एतच्छापनिमित्तमेव अभ्युपगम्य

प्रदेशाः ॥ १२ ॥ ब्रह्मशापाभिभूतः ब्रह्मशापकृतनिद्रापरवश इत्यर्थः ॥ १३ ॥ किमर्थं कुम्भकर्णो विबोध्यत इत्याशङ्क्य कविराह–स पराजितमिति । आदिदेश, कुम्भकर्णविबोधनार्थमिति शेषः ॥ १४ ॥ द्वारेषु अवान्तरद्वारेषु । यत्नः क्रियताम्, प्राकारश्चाधिरुह्यताम्, वानरानारोहार्थमिति भावः । निद्रावशसमाविष्टः निद्रावशेन शयानः । सद्यः कर्तव्यत्वाय पुनरुक्तिः ॥१५॥ सुखमिति। दुःखिते चिन्ताकुले अनवाप्तकामे मयि जाग्रति सतीति शेषः ।

स चाप्रतिमगम्भीरो देवदानवदर्पहा । ब्रह्मशापाभिभूतस्तु कुम्भकर्णो विबोध्यताम् ॥ १३ ॥

स पराजितमात्मानं प्रहस्तं च निषूदितम् । ज्ञात्वा रक्षोबलं भीममादिदेश महाबलः ॥ १४ ॥

द्वारेषु यत्नः क्रियतां प्राकारश्चाधिरुह्यताम् । निद्रावशसमाविष्टः कुम्भकर्णो विबोध्यताम् ॥ १५ ॥

सुखं स्वपिति निश्चिन्तः कालोपहतचेतनः । नव षट् सप्त चाष्टौ च मासान् स्वपिति राक्षसः ॥ १६ ॥

न केवलमिदानीमेव, सर्वदाप्येवमेवेत्याह नवेति । कदाचिन्नवमासान् कदाचित् षण्मासान् कदाचित्सप्तमासान् कदाचिदष्टमासांश्चानियमेन स्वपितीत्यर्थः । अत एवोत्तरकाण्डे अविशेषेण वरप्रार्थना कुम्भकर्णेन क्रियते–"स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम्" इति । उत्तरत्र रामं प्रति विभीषणवचने–"शयिता ह्येष षण्मासानेकाहं जागरिष्यति" इति वचनं तु पक्षान्तराणामप्युपलक्षकम्, अन्यूनाभिप्रायं वा । सप्तमासादिस्वापसंभवेपि षण्मासस्वापः संभवत्येव । यद्वा नवसप्तदशाष्टौ च मासान् स्वपिति राक्षस इति पाठः । दशाष्टौ दशमासहानौ सत्यां नवसप्तमासान् षण्मासानित्यर्थः । अष्टिरशनम्, नाश इति यावत् । नवसप्तमासाः षोडशमासाः तेषु दशमासलोपे हि षण्मासा एवावशिष्यन्ते । अथवा " षडहैर्मासान्त्संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्त्संपश्यन्त्यर्धमासैर्मासान्त्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान्त्संपश्यन्त्यमावास्यया मासान् संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्

ज्ञात्वा । यत्नं कर्तुमर्हथ, लङ्कारक्षण इति शेषः । तत्प्रकारमेवाह राक्षसाश्चेति ॥ १२ ॥ १३ ॥ अकाले रावणः किमिति कुम्भकर्णं बोधितवानित्यपेक्षायां कविराह–स पराजितमिति । सः महाबलो रावणः प्रहस्तं निषूदितम् आत्मानं च पराजितम्, विचार्येति शेषः । रक्षः कुम्भकर्णं भीमबलं ज्ञात्वा आदिदेश, ॥१८२॥

स०–ब्रह्मशापाभिभूतः ब्रह्मणा इन्द्रवाक्यश्रवणानन्तरं कुम्भकर्णाय शापो दत्त इति तेनाभिभूतः । "तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे ।" इत्यत्रैवाग्रे व्यक्तम् । न च तस्य वरादेव स्वापसिद्धेः शापो व्यर्थ इति वाच्यम्; सरस्वत्या स्वानुकूलं वाचयित्वा ब्रह्मणि गते सति देवैरहं वञ्चित इति ज्ञात्वा स्वच्छन्दत्वात्स्वापस्य नाहं तथा करोमीति निश्चित्य पुनश्च कुम्भकर्णेन प्रजाबाधे सति कथितशापसार्थक्यसम्भवात् । अभिभूतः तिरस्कृतः । यथोक्तमुत्तरकाण्डे " वरव्याजेन मोहोऽस्मै दीयताममितप्रभ " इति ॥ १३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

संपश्यन्ति पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्त्संपश्यन्ति " इत्युक्तमासविकल्पेषु षडहानामपि मासत्वश्रवणात्तत्प्रकारेण नवषडित्युक्तत्रिंशन्मासा अपि अशीत्युत्तरशतदिनतया अमावास्यया पौर्णमास्या वा परिगणनेन षण्मासा एव संपद्यन्त इति न कश्चिद्विरोधः। तथा हि–अस्ति किंचित् उत्सर्गिणामयनं नाम सत्रं गवामयनस्य विकृतिः। तत्र प्रकृतौ द्वादशमासेष्वनुष्ठेयानां सोमयागविशेषाणां त्रिंशतोऽनुष्ठेयत्वान्न किंचिदहरुत्स्रष्टुं शक्यते। तद्विकृतावत्र प्रतिमासमेकस्मिन्नहनि सोमयागपरित्यागो विधीयते। तत्र कतममहरुत्स्रज्यतामित्यपेक्षायामुच्यते–' अमावास्यया मासान्त्संपाद्याहरुत्सृजन्त्यमावास्यया हि मासान्त्संपश्यन्ति पौर्णमास्या मासान्त्संपाद्याहरुत्सृजन्ति पौर्णमास्या हि मासान्त्संपश्यन्ति ' इति।

मन्त्रयित्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि। तं तु बोधयत क्षिप्रं कुम्भकर्णं महाबलम् ॥ १७ ॥

अस्यार्थः–अमावास्यायामनुष्ठेयेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति। पौर्णमास्यामनुष्ठेयेन यागेन पूर्वमासं परिसमाप्य उत्तरस्यादिभूतमहस्त्यज्यतामिति च। अस्मिन् विधाने अर्थवादे प्रसिद्धिवाचिना हिशब्देन अमावास्याया मासान्तत्वम्। उत्तरवाक्ये पौर्णमास्या मासान्तत्वं च श्रुतम्। एवम् 'अर्धमासैर्मासान्त्संपाद्याहरुत्सृजन्त्यर्धमासैर्हि मासान् संपश्यन्ति षडहैर्मासान् संपाद्याहरुत्सृजन्ति षडहैर्हि मासान्त्संपश्यन्ति ' इत्यत्रापि पक्षात्मकः षडहात्मकोऽपि मासोऽस्तीति हिशब्देन दर्शितम्। ननु च षडहैरिति बहुवचननिर्देशात् पञ्चभिः षडहैरिति व्याख्यानेन त्रिंशद्दिनात्मको मास एवात्र कथ्यत इति चेन्न; अर्धमासैरित्यत्रापि तथात्वापत्तेः। तदानीं बह्वर्धमासानां मासत्वस्वीकारे पक्षत्रयस्यापि मासत्वप्रसङ्गः। तत्र " पक्षा वै मासाः " इत्युक्तरीत्या एकैकस्य पक्षस्य मासत्वस्वीकारे अत्राप्येकैकस्यैव षडहस्य मासत्वस्वीकारो युक्तः। पूर्वकल्पेष्विव अत्रापि प्रसिद्धिवाचकहिशब्दप्रयोगात्। अन्यथा उत्तरानुवाके "षडहैर्मासान्त्संपाद्य यत्सप्तममहस्तस्मिन्नुत्सृजेयुः" इति वाक्यविरोधः स्यात्। सप्तमत्वं ह्यत्र विशिष्यते। षडहैर्मासानित्यत्र मासशब्दस्य मासैकदेशलक्षणाङ्गीकारे स एव दोषः। तस्मात् षडहात्मकोऽपि मासोऽस्तीति सिद्धम्। तमिमं श्रौतं षडहमासत्वपक्षमनुस्मरन्तः षण्मासानेव वदन्ति–नव षट् सप्त चाष्टौ च मासान् स्वपिति राक्षसः इति ॥ १६ ॥ ननु सुप्तः कथं बोधयितुं शक्य इत्याशङ्क्य इदानीमेव स्वापारम्भात् सुप्रबोधोऽयमित्याशयेनाह–मन्त्रयित्वेति। अत्र केचित्–' एकाहं जागरिष्यति ' इति कुम्भबोधनं प्रतीति शेषः ॥ १४-१६ ॥ मन्त्रं कृत्वा प्रसुप्तोऽयमितस्तु नवमेऽहनीत्यनेनायमर्थो दर्शितः–इतः लङ्कावरोधदिवसात् नवमेऽहनि प्रसुप्त इत्यर्थः। तथाहि–

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्णस्य स्वापोत्सर्जनानन्तरमेकस्मिन् दिन एव प्रबोधनियमस्योक्तत्वान्मन्त्रकरणदिनसमनन्तरदिन एव कुम्भकर्णस्य स्वापारम्भः। 'आजगाम मुहूर्तेन' इत्यनेन विभीषणागमनमपि मन्त्रदिन एव। " विभीषणेनाशु जगाम सङ्गमम् " इत्यनेन तदागमनानन्तरमेव तस्य स्वीकारः । तद्दिवसप्रभृति दिवसत्रये समुद्रप्रार्थनार्थं रामस्य दर्भशयनम् । तदनन्तरं पञ्चदिनेषु सेतुबन्धः । सेतुबन्धपूर्तिदिवसे एव सायंकाले सुवेलारोहणम् । तस्यामेव रात्रौ सुग्रीवरावणयो द्वन्द्वयुद्धम् । समनन्तरदिने तुमुलयुद्धम् । तत्रैव रात्रौ नागपाशबन्धमोक्षौ । धूम्राक्षवज्रदंष्ट्राकम्पनवधश्च । अनन्तरदिने प्रहस्तवधः रावणमुकुटभङ्गश्च । एवं दिवसगणनोपपत्तिरिति वदन्ति । तच्चिन्त्यम् ।सुवेलारोहणरात्रौ पूर्णचन्द्रोदयवर्णनेन सुवेलारोहणदिनं पौर्णमासीति सिद्धम् । रावणमरणदिनं चामा वास्येति स्फुटम्।एवं च त्वदुक्तरीत्या द्वितीयायामेव मुकुटभङ्गे रावणस्य दर्शपर्यन्तं विलम्ब्य युद्धकरणं चिन्त्यम् । वस्तुतस्तु इतः प्रसक्ताद्युद्धारम्भ दिनादित्यर्थः । तद्दिनमपहाय तत्पूर्वदिनापेक्षया नवमेऽहनि तत्पूर्वदिनकृतमन्त्रः प्रसुप्तः । तथा च पौर्णमास्यां सुवेलारोहणं प्रथमायां युद्धारम्भः ।तत्पूर्वं नवमदिनं सप्तमी । तस्यां कुम्भकर्णः सुप्तः, रामस्य दर्भशयनारम्भश्च । षष्ठ्यां कुम्भकर्णादिभिर्मन्त्रविचारः । तस्यामेव विभीषणनिर्गम इति । इत्थं चाहुः—सीताहरणात् पूर्वं त्रयोदशसंवत्सरा गताः। चतुर्दशवर्षारम्भे सीता हृता, पम्पातीरे वसन्तवर्णनात्। आषाढे वालिवधः। तदनन्तरं वर्षर्तुवर्णनात्। आश्वयुजे सीतान्वेषणसमुत्साहनमिति स्फुटम्। स्वयंप्रभाबिले बहुकालो गतः । फाल्गुनशुद्धत्रयोदश्यां हनुमतो लङ्काप्रवेशः । "पुष्पिताग्रान् वसन्तादौ ददर्श विविधान् द्रुमान्" इति वसन्तादिभूतफाल्गुनमाससतासूचकवृक्षाग्रपुष्पितत्वोक्त्या तथा प्रतीतेः। "स्थितः ककुद्मानिव तीक्ष्णशृङ्गः" इति श्लोके प्रतिपूर्णशृङ्ग इति पदेन प्रतिपूर्णशृङ्गवच्चन्द्रवर्णनस्य तस्यामेव संभवात्। यस्मिन्दिने रात्रौ लङ्कायां सीतान्वेषणं तदनन्तरदिन एव प्रातर्लङ्कादाहः । "अवश्यमेव द्रष्टव्या मया लङ्का निशाक्षये" इत्युक्तत्वात् ।अनन्तरं तस्मिन्नेव दिने अविलम्बेन प्रत्यागमनम् । "यदि वा मन्यसे वीर वसैकाहमरिन्दम" इति सीतया पृष्टे "एवमाश्वास्य वैदेहीं हनुमान्मारुतात्मजः । गमनाय मतिं चक्रे" इत्युक्तेः । उषसि लङ्कादाहानन्तरं तस्मिन्नेव दिने मध्याह्नात् पूर्वमेवाङ्गदा दिभिर्मधुवनविधमनपूर्वकं रामप्राप्तिः, अरिष्टपर्वतारोहणे तद्वर्णनव्याजेन "बोध्यमानमिव प्रीत्या दिवाकरकरैः सुखैः" इति सूर्योदयसमयमुक्त्वा अनन्तर मस्तमयानुक्तेः। तस्मिन्नेव दिवसे चतुर्दशीशेषयुक्तपौर्णमासीयुते मध्याह्ने युद्धयात्रा। "अस्मिन्मुहूर्ते सुग्रीव प्रयाणमभिरोचये। युक्तो मुहूर्तो विजयः प्राप्तो

"एकाहं जागरिष्यति " इति ब्रह्मवाक्येन एकस्मिन्नेव दिवसे प्रबोधनियमस्योक्तत्वात् " नव षट् सप्त चाष्टौ च मासान् स्वपिति राक्षसः " इत्यनेन निद्रा नियमस्यानुक्तत्वात् मन्त्रकरणदिनसमनन्तरदिन एव कुम्भकर्णस्य स्वापारम्भः । 'जगाम स मुहूर्तेन यत्र रामः सलक्ष्मणः ' इत्यनेन विभीषणानुगमनमपि मन्त्र

For Private And Personal Use Only

मध्यं दिवाकरः" इत्युक्तेः। यस्मिन्दिनेऽभिजिति प्रस्थानं तत्परेद्युरेव समुद्रतीरे सेनानिवेशः। "सा स्म याति दिवारात्रं महती हरिवाहिनी" इत्यारभ्य "मुहूर्तं क्वापि नासत" इत्युक्तेः। यत्र दिने लङ्कादाहस्तत्रैव दिवसे सभार्यां मन्त्रिभिः सह किंचिद्विचारमुक्त्वा "विसर्जयित्वा तान् सर्वान् प्रविवेश स्वकं गृहम्" इत्यन्तेन लङ्कादाहदिनवृत्तान्तं परिसमाप्य 'ततः प्रत्युषसि प्राप्ते' इत्यादिना अनन्तरदिने उषःकाले विभीषणोपदेशं द्वितीयमुक्त्वा ततो मन्त्र विचाराय रावणे कुम्भकर्णविभीषणादिभिः सभां प्रविष्टे विभीषणस्य तृतीयमुपदेशमुक्त्वा "इत्युक्त्वा परुषं वाक्यं रावणं रावणानुजः। आजगाम मुहूर्तेन यत्र रामः सलक्ष्मणः॥" इत्यविच्छेदेन लङ्कादाहदिनानन्तरदिन एव समुद्रतीरे रामसकाशागमवर्णनेन च द्वितीयदिने रामेण समुद्रतीरं प्राप्तमित्यव गम्यते। समुद्रतीरप्राप्तिदिनं च शिष्टफाल्गुनपौर्णमासी। अत एव 'उत्तराफल्गुनी ह्यद्य' इति चतुर्थसर्गश्लोके प्रस्थानदिनस्य पौर्णमासीयुक्तत्ववचनमप्य विरुद्धम्। समुद्रतीरप्राप्तिदिनस्य पौर्णमासीयुक्तत्वं च "चण्डनक्रग्रहं घोरं क्षपादौ दिवसक्षये। चन्द्रोदयसमुद्धूतं प्रतिचन्द्रसमाकुलम्" इति सन्ध्यासमय एव चन्द्रोदयप्रतिपादनात् सिद्धम्। सेनानिवेशवृत्तान्तो विभीषणागमनवृत्तान्तश्च एकदिनभाव्यपि वाचः क्रमवर्तित्वात् क्रमेणोक्तः। प्रथमायां रामस्य दर्भशयनारम्भः कुम्भकर्णस्वापारम्भश्च। चतुर्थीपञ्चमीषष्ठीसप्तम्यष्टमीषु सेतुबन्धः। अष्टम्यां रात्रौ सुवेलारोहणम्। यत्तु सुवेले "पूर्णचन्द्रप्रदीपा च निशा समभिवर्तत" इति वचनम्, तत्पूर्णचन्द्र इव प्रदीपा यस्यां निशायामित्येवमर्थकं व्याख्येयम्। सुग्रीवसेनायां भेर्यादीनामिव प्रदीपादीनामपि संभवात्। सुवेलारोहणानन्तरदिने दिवा लङ्कानिरोधः। "तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः। लङ्कायां ददृशुर्वीरा वनान्युपवनानि च" इत्युप क्रम्य युद्धवर्णनात्। तत्रैव प्रथमदिनयुद्धे रात्रौ नागास्त्रबन्धतद्विमोक्षादि। "युद्ध्यतामेव तेषां तु तथा वानररक्षसाम्। रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी" इत्यारभ्य "सा बभूव निशा घोरा हरिराक्षसहारिणी। ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे। राममेवाभ्यवर्तन्त—" "तं भीम वेगा हरयो नाराचैः क्षतविग्रहाः। अन्धकारे न ददृशुः" इत्यादिभिस्तामेव रात्रिं प्रत्यभिज्ञाप्य "निरन्तरशरीरौ तौ भ्रातरौ रामलक्ष्मणौ। क्रुद्धेनेन्द्र जिता वीरौ पन्नगैः शरतां गतैः" इत्यादिप्रतिपादनात्। तत्रैव निशीथे वानरहर्षनादकुपितेन रावणेन प्रेषितयोर्धूम्राक्षवज्रदंष्ट्रयोर्युद्धं तद्वधश्च। तयो र्युद्धे दिवा ज्ञापकाभावात् वानरहर्षानन्तर्यश्रवणाच्च। रात्रिशेषेण तयोर्वधानन्तरं द्वितीयदिने अकम्पनयुद्धम्। तन्निर्गमनवेलायाम्—"अभवत् सुदिने चापि दुर्दिनं रूक्षमारुतम्" इति दिवा ज्ञापकसत्त्वात्। अकम्पनवधानन्तरमेव रावणस्य पूर्वाह्ण एव पुरीपर्यटनम्। अकम्पनवधा

दिन एव। 'विभीषणेनाशु जगाम सङ्गमम्' इति तदागमनानन्तरमेव विभीषणस्य स्वीकारः, तद्दिनमारभ्य दिनत्रयं समुद्रप्रार्थनार्थं राघवस्य दर्भशयनम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नन्तरं प्रहस्तयुद्धमविलम्बेन तस्मिन्नेव दिने मध्याह्ने । ननु, 'अन्योन्यमभिसंरब्धा ग्रहाश्च न चकाशिरे ' इति ग्रहाणां प्रकाशप्रतिषेधेन प्रहस्तयुद्धं रात्राविति चेन्न; उत्तरत्र दिवायुद्धेषु दिवादर्शनायोग्यानामप्यर्थानां प्रतिपादनात् । यथा रावणयुद्धे–" प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् । समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः " इत्यादि । न च ' सर्वरात्रमवर्तत ' इति पाठानुरोधाद्रात्रावेव तत्प्रतिपादनमिति वक्तुं शक्यम्; तदप पाठत्वस्यान्ते वक्ष्यमाणत्वात् । तस्मिन्नेव द्वितीयदिने रावणपराजयकुम्भकर्णप्रबोधनकुम्भकर्णयुद्धानि । कालविशेषमसङ्कीर्त्यानन्तरमविच्छेदेन तदुक्ति पूर्वकमग्रिमकृत्ये ब्रह्मास्त्रबन्धनतद्विमोक्षरूपे कालविशेषकीर्तनात् । दृश्यते हि–" सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् । अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः " इति । अत्र अह्नः पञ्चमशेषो नाम सायंकाल एव । " प्रातःसङ्गवमध्याह्नापराह्णाः सायमित्यमी । एकस्याह्नः पञ्च भागा विहिताः कालचिन्तकैः ॥ " इति वचनात् । तस्यामेव द्वितीयायां रात्रौ ब्रह्मास्त्रविमोक्षानन्तरं पुनर्लङ्कानिरोधतद्दाहकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजङ्घाकम्पन मकराक्षवधाः । "ततोऽस्तङ्गत आदित्ये रात्रौ तस्मिन्निशामुखे । लङ्कामभिमुखास्सोल्का जग्मुस्ते प्लवगर्षभाः॥" इत्युक्तेः । एवं परिपूर्णदिनद्वयेन मूल बलेन्द्रजिद्रावणव्यतिरिक्तेषु व्यपदिष्टराक्षसेषु हतेषु तृतीयदिनमारभ्य दिनत्रयेणेन्द्रजिद्युद्धम्, " अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः " इत्युक्त त्वात् । अथ षष्ठदिने मूलबलवधः । तस्मिन् दिने सायंकालमारभ्य दिवारात्रं रावणयुद्धम् । सप्तमदिने रावणवधः । अथवा सप्तमदिने रावणयुद्धम् । अष्टमादिने प्रातःकाले रावणवधः । " अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् । कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः॥" इत्यादिसन्दर्भस्योभय थापि योजयितुं शक्यत्वात् । पुच्छामावास्यायां रावणवध इति कृत्वा अमावास्यायां रावणवध इति प्रवादः । एवं सति "रामरावणयोर्युद्धं सप्तरात्रमवर्तत" इत्यादिपाठोऽपि सेनासहितरावणयुद्धापेक्षया सङ्गच्छते । " मन्त्रयित्वा प्रसुप्तोऽयमितस्तु नवमेऽहनि " इति सकलकोशस्थितवचनं च सङ्गच्छते । इतः अस्माद्दिनात् मम मुकुटभङ्गदिनादित्यर्थः । नवमेऽहनि एतद्दिनमपहाय एतत्पूर्वदिनापेक्षया नवमेऽहनि । मन्त्रयित्वा प्रसुप्तः तत्पूर्वदिने मन्त्रं कृत्वा तस्मिन् दिने प्रसुप्त इत्यर्थः । ननु हनुमतो लङ्काप्रवेशकालो दशममास इत्यवगम्यते । तथाहि सीतां प्रति रावणवचनम्–" द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः" इति । हनुमन्तं प्रति सीतावचनं च–"द्वौ मासौ तेन मे कालो जीवितानुग्रहः कृतः । वर्तते दशमो मासो द्वौ तु शेषौ प्लवङ्गम" इत्यादि । अतः ॥१८४॥

निशाहितश्चोऽतिचक्षुः ' इत्युक्तत्वात् । तदनन्तरं पञ्चसु दिनेषु सेतुबन्धः । सेतुबन्धपरिपूर्तिदिवस एव सायंकाले समुद्रतरणम् ' गरुडव्यूहमास्थाय । तीरे निविविशे राजा ' इत्याद्युक्तत्वात् । तदनन्तरदिने सुवेलारोहणम्, रात्रौ तत्रावस्थानं च " तां रात्रिमुषितास्तत्र सुवेले हरिपुङ्गवाः " इत्युक्तत्वात् । तदनन्तर

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कथमुक्तप्रक्रियासङ्गतिरिति चेत्, मैवम्; "ऊर्ध्वं मासान्न जीवेयम्' 'मासादूर्ध्वं न जीविष्ये त्वया हीना नृपात्मज" इत्यादिवचनविरोधेन तादृशवचनस्य रावणाभिप्रायविषयत्वात्। रावणो हि सीतासान्त्वनाय तथोक्तवान्। सीता तु वर्तमानमासमात्रेण चतुर्दशवर्षपूर्तिं जानन्ती " मासादूर्ध्वं न जीविष्ये " इति सन्दिदेशेति सर्वं सुस्थम् ॥१७॥ स तु अहमिव न शापग्रस्त इत्यर्थः। ककुदः प्रधानम्। "प्राधान्ये राजलिङ्गे च वृषाङ्गे ककुदोऽस्त्रियाम्" इत्यमरः ॥ १८-२० ॥ अकाले तत्प्रबोधनमनुचितमित्यत्राह-किं करिष्यामीति। साह्याय साहाय्याय ॥२१॥ ते त्विति। परमसम्भ्रान्ताः कथमेनमकाले प्रबोध

स तु सङ्ख्ये महाबाहुः ककुदः सर्वरक्षसाम्। वानरान् राजपुत्रौ च क्षिप्रमेव वधिष्यति ॥ १८ ॥ एष केतुः परः सङ्ख्ये मुख्यो वै सर्वरक्षसाम्। कुम्भकर्णः सदा शेते मूढो ग्राम्यसुखे रतः ॥ १९ ॥ रामेण हि निरस्तस्य सङ्ग्रामेऽस्मिन् सुदारुणे। भविष्यति न मे शोकः कुम्भकर्णे विबोधिते ॥ २०॥ किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि। ईदृशे व्यसने प्राप्ते यो न साह्याय कल्पते ॥ २१ ॥ ते तु तद्वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः। जग्मुः परमसम्भ्रान्ताः कुम्भकर्णनिवेशनम् ॥ २२ ॥ ते रावणसमादिष्टा मांसशोणितभोजनाः। गन्धमाल्यांस्तथा भक्ष्यानादाय सहसा ययुः ॥ २३ ॥ तां प्रविश्य महाद्वारां सर्वतो योजनायताम्। कुम्भकर्णगुहां रम्यां सर्वगन्धप्रवाहिनीम् ॥ २४ ॥ कुम्भकर्णस्य निश्वासादवधूता महाबलाः। प्रतिष्ठमानाः कृच्छ्रेण यत्नात् प्रविविशुर्गुहाम् ॥ २५ ॥

यिष्याम इति व्याकुलाः ॥ २२ ॥ त इति। प्रबोधशक्तिविवृद्ध्यर्थं मांसादिकं भुक्त्वा कुम्भकर्णस्य प्रबोधकालिकक्षुत्तापादिशान्तये गन्धमाल्यादिकं गृहीत्वा ययुरित्यर्थः ॥२३॥ तामित्यादिश्लोकद्वयमेकान्वयम्। सर्वतः चतसृषु दिक्षु। सर्वगन्धप्रवाहिनीं कुम्भकर्णानुलिप्तचन्दनादिगन्धप्रवाहवतीम्।

दिने सुग्रीवेण रावणमुकुटभङ्गः सुवेलादवरुह्य लङ्कारोधोऽङ्गदप्रेषणं च। तदनेन प्रकारेण दिवसगणनोपपत्तिरिति ॥ १७ ॥ स त्विति। ककुदः प्रधानम्। वानरान् राजपुत्रौ वधिष्यति। वस्तुतस्तु राजपुत्रौ, विनेति शेषः। वानरान् वधिष्यतीत्यर्थः ॥१८-२० ॥ एवमुक्ते सत्यपि तूष्णीं तिष्ठतो राक्षसान् प्रति विभ्य(द्रा)न्नाह-किं करिष्यामीति। शक्रतुल्यबलेन तेन रामेण व्यसने प्राप्ते यः क इत्यर्थः। कोऽपि न साह्याय कल्पते अतः किं करिष्यामीति सम्बन्धः। यद्वा नायं प्रबोधस्य समय इत्याशङ्क्य इदानीमीदृशसमये नोपकरिष्यति चेत्तेन किं प्रयोजनमित्याह-किमिति। ईदृशे व्यसने प्राप्ते सति यः कुम्भकर्णः न साह्याय कल्पते तेन किं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुम्भकर्णगुहां प्रविश्य निश्वासादवधूताः सन्तः कृच्छ्रेण प्रतिष्ठमानाः अभिमुखं गच्छन्तः यत्नात्तां गुहां विविशुरिति योजना ॥ २४ ॥ २५ ॥ काञ्चनकुट्टिमां स्वर्णमयनिबद्धभूमिम् ॥ २६ ॥ विकृतं निद्राकालिकविकारयुक्तम् । विकीर्णं शिथिलम् ॥ २७ ॥ ऊर्ध्वेत्यादिश्लोकत्रयमेकान्वयम् । ऊर्ध्व

तां प्रविश्य गुहां रम्यां शुभां काञ्चनकुट्टिमाम् । ददृशुर्नैर्ऋतव्याघ्रं शयानं भीमदर्शनम् ॥ २६ ॥ ते तु तं विकृतं सुप्तं विकीर्णमिव पर्वतम् । कुम्भकर्णं महानिद्रं सहिताः प्रत्यबोधयन् ॥ २७ ॥ ऊर्ध्वरोमाञ्चिततनुं श्वसन्तमिव पन्नगम् । त्रासयन्तं महाश्वासैः शयानं भीमदर्शनम् ॥२८॥ भीमनासापुटं तं तु पातालविपुलाननम् । शय्यायां न्यस्तसर्वाङ्गं मेदोरुधिरगन्धिनम् ॥२९॥ काञ्चनाङ्गदनद्धाङ्गं किरीटिनमरिन्दमम् । ददृशुर्नैर्ऋतव्याघ्रं कुम्भकर्णं महाबलम् ॥ ३० ॥ ततश्चक्रुर्महात्मानः कुम्भकर्णाग्रतस्तदा । मांसानां मेरुसङ्काशं राशिं परमतर्पणम् ॥ ३१ ॥ मृगाणां महिषाणां च वराहाणां च सञ्चयान् । चक्रुर्नैर्ऋतशार्दूला राशिमन्नस्य चाद्भुतम् ॥ ३२ ॥ ततः शोणितकुम्भांश्च मद्यानि विविधानि च ॥३३॥ पुरस्तात् कुम्भकर्णस्य चक्रुस्त्रिदशशत्रवः । लिलिपुश्च परार्ध्येन चन्दनेन परन्तपम् ॥३४॥ दिव्यैराच्छादयामासुर्माल्यैर्गन्धैः सुगन्धिभिः । धूपं सुगन्धं ससृजुस्तुष्टुवुश्च परन्तपम् ॥३५॥ जलदा इव चोन्नेदुर्यातुधानास्ततस्ततः । शङ्खानापूरयामासुः शशाङ्कसदृशप्रभान् । तुमुलं युगपच्चापि विनेदुश्चाप्यमर्षिताः ॥ ३६ ॥ नेदुरास्फोटयामासुश्चिक्षिपुस्ते निशाचराः । कुम्भकर्णविबोधार्थं चक्रुस्ते विपुलं स्वनम् ॥ ३७ ॥

रोमाञ्चिततनुम् ऊर्ध्वभूतरोमव्याप्ततनुम् । भीमनासापुटं भयङ्करनासारन्ध्रम् । मेदोरुधिरेति, पीतावशिष्टेति शेषः ॥ २८–३० ॥ अग्रतश्चक्रुः पुरतश्चिक्षिपुरित्यर्थः । परमतर्पणम् अत्यन्ततृप्तिकरम् ॥३१॥ राशिं चक्रुः अग्रतो राशिं चक्रुरित्यर्थः ॥ ३२ ॥ मद्यानि मद्यकुम्भानीत्यर्थः ॥३३॥ लिलिपुः लेपनं चक्रुः । परार्ध्येन श्लाघ्यगन्धेन ॥ ३४ ॥ माल्यगन्धैः माल्यचन्दनैः ॥ ३५ ॥ ततस्ततः पुनः पुनरित्यर्थः । तुमुलं निरन्तरं यथा तथा । युगपद्विनेदुः अमर्षिताः महता प्रयत्नेनाप्यनुत्थानाज्जातक्रोधाः सन्तः नेदुः ॥ ३६ ॥ आस्फोटयामासुः ताडयामासुः । चिक्षिपुः शरीरं कम्पयामासुः । कुम्भेति । करिष्यामीति सम्बन्धः ॥ २१–२५ ॥ काञ्चनकुट्टिमां काञ्चननिबद्धभुवम् ॥ २६–३३ ॥ लिलिपुः लेपनं चक्रुः, कुम्भकर्णशरीरं लेपयामासुरित्यर्थः ॥ ३४–३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्थं कुम्भकर्णविबोधार्थं विपुलं स्वनं चक्रुरिति सङ्ग्रहः ॥३७॥ आस्फोटितं बाहुताडनजन्यशब्दः । क्ष्वेलितशब्देन गर्जितमात्रमुच्यते । सिंहनादमित्येक वद्भावः । तत् विहङ्गाः श्रुत्वा भयेन सर्वा दिशो द्रवन्तः गच्छन्तः । तत्रापि भयनिवृत्त्यदर्शनात् त्रिदिवम् आकाशम् किरन्तः विशन्तः । तत्रापि भय शान्तिमलभमानाः सहसा निपेतुः भूमौ निपतन्ति स्म ॥ ३८ ॥ यदेति । भृशार्तैः अत्यन्तार्तिपूर्वकैः, उच्चावचैरित्यर्थः । भृशं तैरिति पाठान्तरम् ।

सशङ्खभेरीपणवप्रणादमास्फोटितक्ष्वेलितसिंहनादम् । दिशो द्रवन्तस्त्रिदिवं किरन्तः श्रुत्वा विहङ्गाः सहसा निपेतुः ॥ ३८ ॥ यदा भृशार्तैर्निनदैर्महात्मा न कुम्भकर्णो बुबुधे प्रसुप्तः । ततो मुसुण्ठीर्मुसलानि सर्वे रक्षोगणास्ते जगृहु र्गदाश्च ॥ ३९ ॥ तं शैलशृङ्गैर्मुसलैर्गदाभिर्वृक्षैस्तलैर्मुद्गरमुष्टिभिश्च । सुखप्रसुप्तं भुवि कुम्भकर्णं रक्षांस्युदग्राणि तदा निजघ्नुः ॥ ४० ॥ तस्य निःश्वासवातेन कुम्भकर्णस्य रक्षसः । राक्षसा बलवन्तोऽपि स्थातुं नाशक्नुवन् पुरः ॥४१॥ ततः परिहिता गाढं राक्षसा भीमविक्रमाः ॥ ४२ ॥ मृदङ्गपणवान् भेरीः शङ्खकुम्भगणांस्तदा । दशराक्षस साहस्रा युगपत् पर्यवादयन् ॥४३॥ नीलाञ्जनचयाकारास्ते तु तं प्रत्यबोधयन् । अभिघ्नन्तो नदन्तश्च नैव संवि विदे तु सः ॥ ४४ ॥ यदा चैनं न शेकुस्ते प्रतिबोधयितुं तदा । ततो गुरुतरं यत्नं दारुणं समुपाक्रमन् ॥ ४५ ॥

महात्मा महाशरीरः । ततः तदा । मुसुण्ठी मुद्गरविशेषः ॥ ३९ ॥ गृहीत्वा प्रजघ्नुश्चेत्याह—तमिति ॥ ४० ॥ रक्षस इति विशेषणं निश्वासातिशयद्योत नाय ॥ ४१ ॥ तत इत्यर्धमेकं वाक्यम् । परिहिताः दृढीकृतपरिधानाः आसन्, वक्ष्यमाणकार्ये सावधाना आसन्नित्यर्थः ॥ ४२ ॥ शङ्खकुम्भगणान् शङ्खकुम्भवाद्यगणान् । दशराक्षससाहस्राः दश राक्षससहस्राणि परिवारभूता येषां ते तथोक्ताः ॥ ४३ ॥ ते राक्षसाः अभिघ्नन्तो नदन्तश्च सन्तः तं प्रत्य बोधयन्नित्यनुवादः । प्रतिबोधनेऽपि स न संविविदे न बुबुधे । नीलाञ्जनचयाकारा इति परितः सञ्चारित्वद्योतनायोक्तम् ॥ ४४ ॥ गुरुतरं यत्नमुपाक्रमन्

सशङ्खेति । त्रिदिवमाकाशम् । किरन्तः व्याप्नुवन्तः ॥ ३८ ॥ मुसुण्ठीः मुद्गरविशेषान् ॥ ३९–४१ ॥ ततः परिहिताः गाढं, बभूवुरिति शेषः । अन्यथा राक्षस शब्दोऽतिरिच्येत ॥ ४२ ॥ दशराक्षससाहस्राः दशराक्षससहस्राणि ॥ ४३–४५ ॥

For Private And Personal Use Only

प्रबलं बोधनोपायमारेभिर इत्यर्थः ॥ ४५ ॥ तमेव यत्नं दर्शयति–अश्वानिति । तस्योपरि धावनायेति भावः । सर्वप्राणैः सर्वबलैः ॥ ४६ ॥ महाकाष्ठकटङ्करैः महाकाष्ठाग्रस्तम्भैः, काष्ठाग्रस्यकशाभिरित्यर्थः । कटङ्करः स्तम्भभेद इति केचित् । सर्वप्राणसमुद्यतैः सर्वबलेन समुद्यतैः ॥ ४७ ॥

अश्वानुष्ट्रान् खरान्नागान् जघ्नुर्दण्डकशाङ्कुशैः । भेरीशङ्खमृदङ्गांश्च सर्वप्राणैरवादयन् ॥ ४६ ॥ निजघ्नुश्चास्य गात्राणि महाकाष्ठकटङ्करैः । मुद्गरैर्मुसलैश्चैव सर्वप्राणसमुद्यतैः ॥ ४७ ॥ तेन शब्देन महता लङ्का समभिपूरिता । सपर्वतवना सर्वा सोऽपि नैव प्रबुध्यते ॥ ४८ ॥ ततः सहस्रं भेरीणां युगपत् समहन्यत । मृष्टकाञ्चनकोणाना मासक्तानां समन्ततः ॥ ४९ ॥ एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यते । शापस्य वशमापन्नस्ततः क्रुद्धा निशाचराः । महाक्रोधसमाविष्टाः सर्वे भीमपराक्रमाः ॥ ५० ॥ तद्रक्षो बोधयिष्यन्तश्चक्रुरन्ये पराक्रमम् ॥ ५१ ॥ अन्ये भेरीः समाजघ्नुरन्ये चक्रुर्महास्वनम् । केशानन्ये प्रलुलुपुः कर्णावन्ये दशन्ति च ॥५२॥ उदकुम्भशतान्यन्ये समसिञ्चन्त कर्णयोः । न कुम्भकर्णः पस्पन्दे महानिद्रावशं गतः ॥ ५३ ॥ अन्ये च बलिनस्तस्य कूटमुद्गरपाणयः । मूर्ध्नि वक्षसि गात्रेषु पातयन् कूटमुद्गरान् ॥ ५४ ॥ रज्जुबन्धनबद्धाभिः शतघ्नीभिश्च सर्वतः । वध्यमानो महाकायो न प्राबुध्यत राक्षसः ॥ ५५ ॥

प्रबुद्धयते प्राबुध्यत ॥ ४८ ॥ मृष्टकाञ्चनकोणानां मृष्टकाञ्चनं शोधितकाञ्चनं तन्निर्मिताः कोणाः वादनदण्डाः यासां ताः तथोक्ताः । आसक्तानां संहतानाम् ॥ ४९ ॥ एवमपीत्यादि । शापस्य ब्रह्मशापस्य । क्रुद्धाः पूर्वमेव कुपिताः ! पुनरपि महाक्रोधसमाविष्टाः अभवन् ॥ ५० ॥ तद्रक्ष इत्यादि । पराक्रमं मुष्टिप्रहारादिकम् । महास्वनं महागर्जितम् । प्रलुलुपुः लुलवन्तः । दशन्ति अदशन् । उदकुम्भशतानि, आदायेति शेषः ॥ ५१–५२ ॥ अन्य इति । कूटमुद्गरपाणय इत्यनेन तत्प्रहारपरिचयो लक्ष्यते । पातयन् अपातयन् ॥ ५४ ॥ बध्यन्ते एभिरिति बन्धनानि चर्मादीनि रज्जवश्च ॥१८९॥

सर्वप्राणैः सर्वबलैः ॥ ४६ ॥ महाकाष्ठकटङ्करैश्च । कटङ्करः स्तम्भभेदः ॥ ४७ ॥ ४८ ॥ मृष्टकाञ्चनकोणानां मृष्टकाञ्चननिर्मिताः कोणाः वादनदण्डाः यासां ताः ।

For Private And Personal Use Only

बन्धनानि च तैर्बद्धाभिः, रज्जुबन्धनादिना दृढीकृताभिरित्यर्थः । शतघ्नीभिः गदाविशेषैः । वध्यमानः पीड्यमानः ॥५५॥ वारणानामिति । स्पर्शं परमबुध्यत वारणप्रधावनं केवलस्पर्शमबुध्यत, कीटादिस्पर्शोऽयमिति मन्यते स्म । बुद्धः विरतनिद्रः ॥ ५६ ॥ स पात्यमानैरिति । पात्यमानैः प्रबोधेप्युत्थानाय पुनः क्षिप्यमाणैः । क्षुद्भयपीडितः क्षुद्भयाभ्यां पीडितः । भयमत्राकालबोधनकृतम् । क्षुद्रूपभयपीडित इति वा । विजृम्भमाणः गात्रभङ्गं

वारणानां सहस्रं तु शरीरेऽस्य प्रधावितम् । कुम्भकर्णस्ततो बुद्धः स्पर्शं परमबुध्यत ॥ ५६ ॥ स पात्यमानैर्गिरिशृङ्गवृक्षैरचिन्तयंस्तान् विपुलान् प्रहारान् । निद्राक्षयात् क्षुद्भयपीडितश्च विजृम्भमाणः सहसोत्पपात ॥ ५७ ॥ स नागभोगाचलशृङ्गकल्पौ विक्षिप्य बाहू गिरिशृङ्गसारौ । विवृत्य वक्त्रं वडवामुखाभं निशाचरोऽसौ विकृतं जजृम्भे ॥ ५८ ॥ तस्य जाजृम्भमाणस्य वक्त्रं पातालसन्निभम् । ददृशे मेरुशृङ्गाग्रे दिवाकर इवोदितः ॥ ५९ ॥ स जृम्भमाणोऽतिबलः प्रतिबुद्धो निशाचरः । निःश्वासश्चास्य सञ्जज्ञे पर्वतादिव मारुतः ॥ ६० ॥ रूपमुत्तिष्ठतस्तस्य कुम्भकर्णस्य तद्बभौ । तपान्ते सबलाकस्य मेघस्येव विवर्षतः ॥ ६१ ॥ तस्य दीप्ताग्निसदृशे विद्युत्सदृशवर्चसी । ददृशाते महानेत्रे दीप्ताविव महाग्रहौ ॥ ६२ ॥

कुर्वाणः । उत्पपात उदतिष्ठत् ॥ ५७ ॥ विजृम्भमाण इत्युक्तं विवृणोति—स इति । दैर्घ्ये नागभोगदृष्टान्तः, काठिन्ये अचलशृङ्गदृष्टान्तः । यद्वा पीनत्वे दृष्टान्तः । गिरिशृङ्गसारौ गिरिशृङ्गबलौ । "सारो बले स्थिरांशे च" इत्यमरः । विवृत्य व्यादाय । वडवा समुद्रमध्यवर्तिन्यश्वस्त्री । विकृतं भयङ्करं यथा भवति तथा ॥ ५८ ॥ जाजृम्भमाणस्य । यङ्लुक्त्वात्मनेपदरुगागमाभावावार्षौ । मेरुशृङ्गाग्रे । मेरुरत्र सावर्णिमेरुः तदग्रस्यैव सूर्यसम्बन्धसम्भवात् । अत्र दिवाकरस्योदितत्वं महामेरोरुत्तरभागस्थपुर्यपेक्षया । यद्वा उदितः दृष्ट इत्यर्थः । गत्यर्थानां बुद्ध्यर्थत्वात् ॥ ५९ ॥ प्रतिबुद्धः, अभूदिति शेषः । सम्यक् प्रबोधोऽत्र विवक्षितः ॥ ६० ॥ तस्य साभरणस्येत्यर्थः । अतः सबलाकस्येति नाधिकोपमा । विवर्षत इति नीलरूपातिशयोक्तिः ॥ ६१ ॥ विद्युत्सदृशवर्चसी इति निद्राविरामकालिकचाञ्चल्योक्तिः । महाग्रहौ शन्यङ्गारकाविति परपीडकत्वोक्तिः । दीप्ताग्निसदृशे इति क्रौर्यातिशयोक्तिः ॥ ६२ ॥

आसक्तानां राक्षसगृहीतानाम् ॥ ४३–५८ ॥ ददृशेति । जाजृम्भमाणस्य पुनः पुनर्जृम्भमाणस्य ॥ ५९–६५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततस्त्वित्यादि । अदर्शयन्, राक्षसा इति शेषः । सर्वान् सर्वविधान् । तदवान्तरभेदतो विविधान् बहून् विपुलान् । वराहान् वराहविकारान् । बभक्ष भक्षयामास । बुभुक्षितो मांसमदन् बुभुक्षाशान्त्यर्थं मांसमदन्नित्यर्थः । तृषितः शोणितं पिबन् तृष्णाशान्त्यर्थं शोणितं पिबन्नित्यर्थः । पुनराप्याय नार्थं मेदःकुम्भान् मद्यं च पपौ । कुम्भपरिमितमेदांसीत्यर्थः ॥ ६३ ॥ ६४ ॥ समुत्पेतुरिति । पूर्वं कुम्भकर्णभयादन्तर्धाय स्थिताः, इदानीं तृप्तत्वेन

ततस्त्वदर्शयन् सर्वान् भक्ष्यांश्च विविधान् बहून् । वराहान् महिषांश्चैव स बभक्ष महाबलः ॥ ६३ ॥ अदन् बुभुक्षितो मांसं शोणितं तृषितः पिबन् । मेदःकुम्भांश्च मद्यं च पपौ शक्ररिपुस्तदा ॥ ६४ ॥ ततस्तृप्त इति ज्ञात्वा समुत्पेतुर्निशाचराः । शिरोभिश्च प्रणम्यैनं सर्वतः पर्यवारयन् ॥ ६५ ॥ निद्राविशदनेत्रस्तु कलुषीकृतलोचनः । चारयन् सर्वतो दृष्टिं तान् ददर्श निशाचरान् ॥ ६६ ॥ स सर्वान् सान्त्वयामास नैर्ऋतान्नैर्ऋतर्षभः । बोधनाद विस्मितश्चापि राक्षसानिदमब्रवीत् ॥ ६७ ॥ किमर्थमहमादृत्य भवद्भिः प्रतिबोधितः । कच्चित् सुकुशलं राज्ञो भयवानेष वा न किम् ॥ ६८ ॥ अथवा ध्रुवमन्येभ्यो भयं परमुपस्थितम् । यदर्थमेवं त्वरितैर्भवद्भिः प्रतिबोधितः ॥ ६९ ॥ अद्य राक्षसराजस्य भयमुत्पाटयाम्यहम् । पातयिष्ये महेन्द्रं वा शातयिष्ये तथाऽनलम् ॥ ७० ॥ न ह्यल्पकारणे सुप्तं बोधयिष्यति मां गुरुः । तदाख्यातार्थतत्त्वेन मत्प्रबोधनकारणम् ॥ ७१ ॥

शान्तक्रोधत्वात् प्रकाशमाजग्मुरित्यर्थः ॥ ६५ ॥ निद्रया अविशदे अप्रसन्ने ईषदुन्मीलिते नेत्रे यस्य स तथोक्तः ॥ ६६ ॥ स इति । बोधनात् अप्रबोध्य बोधनात् ॥६७॥ राज्ञः रावणस्य सुकुशलं कच्चित्, एष राजा च भयवान्न किम् भययुक्तो न भवति हि ? ॥६८॥ एवं संशय्य पुनर्निश्चिनोति–अथवेति । तत्र हेतुमाह यदर्थमिति । यदर्थं यद्भयनिवृत्त्यर्थम् ॥६९॥ शातयिष्ये शातयिष्यामि, छेत्स्यामीत्यर्थः । "शद्लृ शातने" इति धातोर्णिचि "शदेरगतौ तः" इति तादेशः ॥७०॥ अल्पकारणे अल्पकार्यनिमित्तम् । गुरुः अग्रजः । आख्यात कथयत । अर्थतत्त्वेन तत्त्वार्थेन, याथार्थ्येनेति यावत् ॥ ७१ ॥ ७२ ॥

निद्रेति । निद्राविशदनेत्रः निद्रया अविशदे ईषदुन्मीलिते नेत्रे यस्य सः ॥ ६६–६८ ॥ अन्येभ्यः शत्रुभ्यः । यदर्थं यद्व्यसननिवृत्तये ॥ ६९ ॥ ७० ॥ अर्थतत्त्वेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवकृतम् इन्द्रादिकृतम् । मानुषादिति । नः अस्मान् मानुषाज्जातं तुमुलं भयं संप्रबाधत इत्यन्वयः ॥ ७३ ॥ न दैत्येति । वाशब्दार्थोऽनुक्त समुच्चयार्थः । देवेभ्यश्चेत्यर्थः । मानुषं मनुष्यादागतम् ॥ ७४ ॥ ७५ ॥ इन्द्रादिभिरपि दुष्पीडमिदं नगरं कथं वानरैः पीड्यत इत्यत्राह—एकेनेत्यादि । सानुयात्रः सानुगः । एकेनैव महती पीडा कृता किं पुनरनेकैरिहागतैरिति भावः ॥ ७६ ॥ मृतेति । हे मृतेत्युक्त्वा । वस्तुतस्तु मृतेत्यविभक्तिक

एवं ब्रुवाणं संरब्धं कुम्भकर्णं महाबलम् । यूपाक्षः सचिवो राज्ञः कृताञ्जलिरुवाच ह ॥ ७२ ॥ न नो दैवकृतं किंचिद्भयमस्ति कदाचन । मानुषान्नो भयं राजंस्तुमुलं सम्प्रबाधते ॥ ७३ ॥ न दैत्यदानवेभ्यो वा भयमस्ति हि तादृशम् । यादृशं मानुषं राजन् भयमस्मानुपस्थितम् ॥ ७४ ॥ वानरैः पर्वताकारैर्लङ्केयं परिवारिता । सीता हरणसन्तप्ताद्रामान्नस्तुमुलं भयम् ॥ ७५ ॥ एकेन वानरेणेयं पूर्वं दग्धा महापुरी । कुमारो निहतश्चाक्षः सानुयात्रः सकुञ्जरः ॥ ७६ ॥ स्वयं रक्षोधिपश्चापि पौलस्त्यो देवकण्टकः । मृतेति संयुगे मुक्तो रामेणादित्यतेजसा ॥ ७७ ॥ यन्न देवैः कृतो राजा नापि दैत्यैर्न दानवैः । कृतः स इह रामेण विमुक्तः प्राणसंशयात् ॥ ७८ ॥ स यूपाक्षवचः श्रुत्वा भ्रातुर्युधि पराजयम् । कुम्भकर्णो विवृत्ताक्षो यूपाक्षमिदमब्रवीत् ॥ ७९ ॥ सर्वमद्यैव यूपाक्ष हरिसैन्यं सलक्ष्मणम् । राघवं च रणे हत्वा पश्चाद्द्रक्ष्यामि रावणम् ॥ ८० ॥

निर्देशः, मृत इति कृत्वेत्यर्थः । मृतप्राय इति मत्वेत्यर्थं इत्यप्याहुः ॥ ७७ ॥ यत् य इत्यर्थः । प्राणसंशयादिति ल्यब्लोपे पञ्चमी । यो राजा देवादिभिरपि प्राणसंशयं नीत्वा मुक्तो न कृतः स रावणो रामेण प्राणसंशयं नीत्वा अद्य विमुक्तः कृत इत्यर्थः । यद्वा राजा देवादिभिरपि यत् न कृतः न प्रापितः तत् रामेण कृतः प्राणसंशयाद्विमुक्तश्चेत्यर्थः ॥ ७८ ॥ पराजयं पराजयबोधकम् ॥ ७९–८१ ॥

याथार्थ्येनेत्यर्थः ॥ ७१–७५ ॥ इन्द्रादिभिरपि दुष्करपीडनमेतन्नगरं वानरैः कथं वा पीडितमित्यत्राह—एकेनेत्यादि ॥ ७६ ॥ मृतेति मृतप्राय इति मत्वेत्यर्थः ॥ ७७ ॥ यत् य इत्यर्थः । प्राणसंशयादिति ल्यब्लोपे पञ्चमी । यो राजा देवादिभिरपि प्राणसंशयं प्राप्य विमुक्तो न कृतः स रावणो रामेण प्राणसंशयं नीत्वा विमुक्तः कृत इत्यर्थः ॥ ७८ ॥ पराजयं पराजयप्रतिपादकं वचः ॥ ७९ ॥ सलक्ष्मणं राघवं हरिसैन्यं च हत्वा । वस्तुतस्तु—सलक्ष्मणं राघवम्, विनेति

For Private And Personal Use Only

सगर्वितं सगर्वम् । रोषविवृद्धदोषं क्रोधविवृद्धदुर्नयम्, कुम्भकर्णमिति शेषः ॥८२॥८३॥ महोदरेति । सम्प्रतस्थे प्रस्थातुमुपचक्रमे । शयनादुत्पपातह इत्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८४ ॥ ८५ ॥ गत्वा रावणनिवेशनं गत्वा । तत ऊचुरित्यन्वयः ॥ ८६ ॥ तत्रैव निर्यातु वा इहागतमेनं द्रक्ष्यसि वा ? कथं

राक्षसांस्तर्पयिष्यामि हरीणां मांसशोणितैः । रामलक्ष्मणयोश्चापि स्वयं पास्यामि शोणितम् ॥ ८१ ॥ ततस्य वाक्यं ब्रुवतो निशम्य सगर्वितं रोषविवृद्धदोषम् । महोदरो नैर्ऋतयोधमुख्यः कृताञ्जलिर्वाक्यमिदं बभाषे ॥ ८२ ॥ रावणस्य वचः श्रुत्वा गुणदोषौ विमृश्य च । पश्चादपि महाबाहो शत्रून् युधि विजेष्यसि ॥ ८३ ॥ महोदरवचः श्रुत्वा राक्षसैः परिवारितः । कुम्भकर्णो महातेजाः सम्प्रतस्थे महाबलः ॥ ८४ ॥ तं समुत्थाप्य भीमाक्षं भीमरूपपराक्रमम् । राक्षसास्त्वरिता जग्मुर्दशग्रीवनिवेशनम् ॥ ८५ ॥ ततो गत्वा दशग्रीवमासीनं परमासने । ऊचुर्बद्धाञ्जलिपुटाः सर्व एव निशाचराः ॥ ८६ ॥ प्रबुद्धः कुम्भकर्णोऽयं भ्राता ते राक्षसर्षभ । कथं तत्रैव निर्यातु द्रक्ष्यस्येनमिहागतम् ॥८७॥ रावणस्त्वब्रवीद्धृष्टो राक्षसांस्तानुपस्थितान् । द्रष्टुमेनमिहेच्छामि यथान्यायं च पूज्यताम् ॥८८॥ तथेत्युक्त्वा तु ते सर्वे पुनरागम्य राक्षसाः । कुम्भकर्णमिदं वाक्यमूचू रावणचोदिताः ॥८९॥ द्रष्टुं त्वां काङ्क्षते राजा सर्वराक्षसपुङ्गवः । गमने क्रियतां बुद्धिर्भ्रातरं सम्प्रहर्षय ॥ ९० ॥ कुम्भकर्णस्तु दुर्धर्षो भ्रातुराज्ञाय शासनम् । तथेत्युक्त्वा महाबाहुः शयनादुत्पपात ह ॥ ९१ ॥

कथं करोत्विति सम्बन्धः ॥ ८७ ॥ पूज्यताम्, एष इति शेषः ॥ ८८–९१ ॥

शेषः । हरिसैन्यं हत्वा रावणं द्रक्ष्यामीति सम्बन्धः ॥ ८० ॥ राक्षसानित्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु–रामलक्ष्मणयोरिति सम्बन्धार्थे षष्ठी । रामलक्ष्मणसम्बन्धिहरीणां मांसशोणितैः राक्षसान् तर्पयिष्यामि, स्वयमपि हरीणां शोणितं पास्यामीति सम्बन्धः ॥ ८१ ॥ सगर्वितं सगर्वम् । रोषविवृद्धदोषं रोषेण विवृद्धो दोषः अनयः दुर्नयरूपो यस्य तम्, कुम्भकर्णमिति शेषः ॥ ८२ ॥ ८३ ॥ संप्रतस्थे प्रस्थातुमुपक्रान्तः ॥ ८४–८६ ॥ तत्रैव निर्यातु वा इहागतं द्रक्ष्यसि वा ? कथं कथं करोत्वित्यर्थः ॥ ८७ ॥ पूज्यताम्, एष इति शेषः ॥ ८८–९१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बलसमीरणं बलवर्धनम् ॥ ९२ ॥ रावणाज्ञया त्वरितास्ते क्षिप्रम् उपहारयन् उपाहारयन्निति संबन्धः ॥ ९३ ॥ ईषत्समुत्कटः पानेन ईषन्मदोत्कटः । मत्तः स्वभावेनोन्मत्तश्चेत्यर्थः । कालान्तकयमोपमः काले प्रलयकाले योऽन्तकः संहारको यमस्तत्सदृश इत्यर्थः ॥ ९४ ॥ रक्षोबलं राक्षससेना ॥ ९५ ॥

प्रक्षाल्य वदनं हृष्टः स्नातः परमभूषितः । पिपासुस्त्वरयामास पानं बलसमीरणम् ॥ ९२ ॥ ततस्ते त्वरितास्तस्य राक्षसा रावणाज्ञया । मद्यकुम्भांश्च विविधान् क्षिप्रमेवोपहारयन् ॥ ९३ ॥ पीत्वा घटसहस्रे द्वे गमनायोपचक्रमे । ईषत्समुत्कटो मत्तस्तेजोबलसमन्वितः । कुम्भकर्णो बभौ हृष्टः कालान्तकयमोपमः ॥ ९४ ॥ भ्रातुः स भवनं गच्छन् रक्षोगणसमन्वितः । कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ९५ ॥ स राजमार्गं वपुषा प्रकाशयन् सहस्ररश्मिर्धरणीमिवांशुभिः । जगाम तत्राञ्जलिमालया वृतः शतक्रतुर्गेहमिव स्वयम्भुवः ॥९६॥ तं राजमार्गस्थममित्रघातिनं वनौकसस्ते सहसा बहिः स्थिताः । दृष्ट्वाऽप्रमेयं गिरिशृङ्गकल्पं वितत्रसुस्ते हरियूथपालाः ॥ ९७ ॥ केचिच्छरण्यं शरणं स्म रामं व्रजन्ति केचिद्व्यथिताः पतन्ति । केचिद्दिशः स्म व्यथिताः प्रयान्ति केचिद्भयार्ता भुवि शेरते स्म ॥९८॥ तमद्रिशृङ्गप्रतिमं किरीटिनं स्पृशन्तमादित्यमिवात्मतेजसा । वनौकसः प्रेक्ष्य विवृद्धमद्भुतं भयार्दिता दुद्रुविरे ततस्ततः ॥ ९९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये॰ श्रीमद्युद्धकाण्डे षष्टितमः सर्गः ॥६०॥

तत्र राजमार्गे । अञ्जलिमालया, पौरजनकृतयेति शेषः ॥ ९६ ॥ यूथपाला इत्यत्र चकारो द्रष्टव्यः । अन्यथा तच्छब्दोऽतिरिच्येत ॥ ९७ ॥ ९८ ॥ आत्मतेजसा शरीरकान्त्या ॥ ९९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षष्टितमः सर्गः ॥ ६० ॥

प्रक्षाल्येति । बलसमीरणं बलप्रवृद्धिकरम् ॥ ९२ ॥ ९३ ॥ ईषत्समुत्कटो मत्तः मधुपानेन ईषदेव समुत्कटो मत्तश्चेत्यर्थः ॥ ९४–९६ ॥ तं राजमार्गस्थमिति । अत्र चशब्दोऽध्याहर्तव्यः, अन्यथा तच्छब्दोऽतिरिच्येत । ते वनौकसः ते हरियूथपाश्च तं दृष्ट्वा वितत्रसुरिति सम्बन्धः ॥ ९७–९९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षष्टितमः सर्गः ॥ ६० ॥

For Private And Personal Use Only

अथ रामेण कुम्भकर्णस्वरूपप्रश्नः विभीषणेन तदुत्तरं च क्रियत एकषष्टितमे–तत इत्यादिसार्धश्लोकद्वयमेकान्वयम् । तं दृष्ट्वा धनुरादाय पुनर्विशेषेण ददर्शेति योजना । महाकायम् उन्नतकायम् । पर्वताकारदर्शनम् दृश्यत इति दर्शनं शरीरम्, पर्वतवत् स्थूलशरीरमित्यर्थः । काञ्चनाङ्गदभूषणं काञ्चनमयाङ्गदभूषणम् । अत एव सतोयाम्बुदः वर्षुकमेघः तत्सदृशम् ॥ १ ॥ २ ॥ दृष्ट्वेत्यर्धम् । कुम्भकर्णमिति शेषः ॥ ३ ॥ सविस्मयमिति क्रिया

ततो रामो महातेजा धनुरादाय वीर्यवान् । किरीटिनं महाकायं कुम्भकर्णं ददर्श ह ॥ १ ॥ तं दृष्ट्वा राक्षसश्रेष्ठं पर्वताकारदर्शनम् । क्रममाणमिवाकाशं पुरा नारायणं प्रभुम् । सतोयाम्बुदसङ्काशं काञ्चनाङ्गदभूषणम् ॥ २ ॥ दृष्ट्वा पुनः प्रदुद्राव वानराणां महाचमूः ॥ ३ ॥ विद्रुतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसम् । सविस्मयमिदं रामो विभीषणमुवाच ह ॥ ४ ॥ कोऽसौ पर्वतसङ्काशः किरीटी हरिलोचनः । लङ्कायां दृश्यते वीर सविद्युदिव तोयदः ॥ ५ ॥ पृथिव्याः केतुभूतोऽसौ महानेकोऽत्र दृश्यते । यं दृष्ट्वा वानराः सर्वे विद्रवन्ति ततस्ततः ॥ ६ ॥ आचक्ष्व मे महान् कोऽसौ रक्षो वा यदि वाऽसुरः । न मयैवंविधं भूतं दृष्टपूर्वं कदाचन ॥ ७ ॥ स पृष्टो राजपुत्रेण रामेणाक्लिष्टकर्मणा । विभीषणो महाप्राज्ञः काकुत्स्थमिदमब्रवीत् ॥ ८ ॥ येन वैवस्वतो युद्धे वासवश्च पराजितः । सैष विश्रवसः पुत्रः कुम्भकर्णः प्रतापवान् । अस्य प्रमाणात् सदृशो राक्षसोऽन्यो न विद्यते ॥ ९ ॥ एतेन देवा युधि दानवाश्च यक्षा भुजङ्गाः पिशिताशनाश्च । गन्धर्वविद्याधरकिन्नराश्च सहस्रशो राघव सम्प्रभग्नाः ॥ १० ॥

विशेषणम् । वर्धमानमिति । कामरूपत्वादिति भावः ॥ ४ ॥ हरिलोचनः कपिलेक्षणः । " हरिर्ना कपिले त्रिषु " इत्यमरः ॥ ५–८ ॥ येनेत्यादि । सैष इत्यत्र " सोऽचि लोपे चेत् पादपूरणम् " इति सुलोपः । प्रमाणं स्थौल्यौन्नत्ये ॥ ९ ॥ सम्प्रभग्नाः अभज्यन्त ॥ १० ॥

ततो राम इत्यादि श्लोकद्वयमेकं वाक्यम् । रामः पुरा आकाशं क्रममाणं नारायणमिव पर्वताकारदर्शनं तं राक्षसश्रेष्ठं दृष्ट्वा धनुरादाय किरीटिनं महाकायं कुम्भकर्णं ददर्शेति योजना । यद्वा तं दृष्ट्वेति श्लोको भिन्नं वाक्यम् । आकाशं क्रममाणं प्रभुं नारायणमिव पर्वताकारदर्शनं तं राक्षसश्रेष्ठं दृष्ट्वा रामः, यत्तो बभूवेति शेषः ॥ १–४ ॥ कोऽसाविति । हरिलोचनः कपिलेक्षणः ॥ ५–११ ॥

For Private And Personal Use Only

विरूपाक्षं विकटाक्षम् । मोहिताः भ्रान्ताः ॥ ११ ॥ प्रकृत्या तेजस्वी स्वप्रभावेन बलवान्, न तु वरप्रदानेनेत्यर्थः । अन्येषां रावणादीनाम्, भवतीति शेषः ॥ १२ ॥ प्रकृत्या तेजस्वित्वमुपपादयति—एतेनेत्यादिना ॥ १३–१५ ॥ तस्येति । नानद्यमानस्य अतिशयेन नदतः । वित्रस्ता भूमिः भूयो

शूलपाणिं विरूपाक्षं कुम्भकर्णं महाबलम् । हन्तुं न शेकुस्त्रिदशाः कालोऽयमिति मोहिताः ॥ ११ ॥ प्रकृत्या ह्येष तेजस्वी कुम्भकर्णो महाबलः । अन्येषां राक्षसेन्द्राणां वरदानकृतं बलम् ॥ १२ ॥ एतेन जातमात्रेण क्षुधार्तेन महात्मना । भक्षितानि सहस्राणि सत्त्वानां सुबहून्यपि ॥ १३ ॥ तेषु सम्भक्ष्यमाणेषु प्रजा भयनिपीडिताः । यान्ति स्म शरणं शक्रं तमप्यर्थं न्यवेदयन् ॥ १४ ॥ स कुम्भकर्णं कुपितो महेन्द्रो जघान वज्रेण शितेन वज्री । स शक्रवज्राभिहतो महात्मा चचाल कोपाच्च भृशं ननाद ॥ १५ ॥ तस्य नानद्यमानस्य कुम्भकर्णस्य धीमतः । श्रुत्वाऽतिनादं वित्रस्ता भूयो भूमिर्वितत्रसे ॥१६॥ तत्र कोपान्महेन्द्रस्य कुम्भकर्णो महाबलः । विकृष्यैरावताद्दन्तं जघानोरसि वासवम् ॥ १७ ॥ कुम्भकर्णप्रहारार्तो विजज्वाल स वासवः । ततो विषेदुः सहसा देवब्रह्मर्षिदानवाः ॥१८॥ प्रजाभिः सह शक्रश्च ययौ स्थानं स्वयम्भुवः । कुम्भकर्णस्य दौरात्म्यं शशंसुस्ते प्रजापतेः ॥१९॥ प्रजानां भक्षणं चापि देवानां चापि धर्षणम् । आश्रमध्वंसनं चापि परस्त्रीहरणं भृशम् ॥ २० ॥ एवं प्रजा यदि त्वेष भक्षयिष्यति नित्यशः । अचिरेणैव कालेन शून्यो लोको भविष्यति ॥ २१ ॥

वितत्रसे उत्तरोत्तरं भीताऽभूत् ॥ १६ ॥ तत्र तदानीम् । विकृष्य उत्पाटय ॥ १७ ॥ विजज्वाल, चुकोपेति यावत् ॥ १८ ॥ ते शक्रादयः । प्रजापतेः प्रजापतये ॥ १९ ॥ दौरात्म्यं प्रपञ्चयति—प्रजानामित्यादि ॥ २० ॥ एवम् इदानीं क्रियमाणप्रकारेण यदि भक्षयिष्यतीत्यन्वयः ॥ २१ ॥

प्रकृत्या ह्येष तेजस्वी स्वभावतः पराभिभवनसामर्थ्यवान ॥ १२--२१ ॥

स०—शूलपाणिं विरूपाक्षं विरूपे विकृते अक्षिणी यस्य स तथा तम् । विरूपाक्षं शूलपाणिं रुद्रमिवेति वा ॥ ११ ॥

वासवस्येति । प्राधान्याद्वासवग्रहणम् । कुम्भकर्णम्, तेष्विति शेषः ॥ २२ ॥ इदं रक्षः इदं वक्ष्यमाणमिति इदंशब्दद्वयनिर्वाहः । विश्वास्य प्रलोभ्य, सान्त्वपूर्वकं समीपमानीयेत्यर्थः ॥ २३ ॥ पौलस्त्येन विश्रवसा । तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे इत्ययं शापः "स्वप्तुं वर्षाण्यनेकानि

वासवस्य वचः श्रुत्वा सर्वलोकपितामहः । रक्षांस्यावाहयामास कुम्भकर्णं ददर्श ह ॥ २२ ॥ कुम्भकर्णं समीक्ष्यैव वितत्रास प्रजापतिः । दृष्ट्वा विश्वास्य चैवेदं स्वयम्भूरिदमब्रवीत् ॥ २३ ॥ ध्रुवं लोकविनाशाय पौलस्त्येनासि निर्मितः । तस्मात्त्वमद्यप्रभृति मृतकल्पः शयिष्यसे ॥ २४ ॥ ब्रह्मशापाभिभूतोऽथ निपपाताग्रतः प्रभोः । ततः परमसम्भ्रान्तो रावणो वाक्यमब्रवीत् ॥२५॥ विवृद्धः काञ्चनो वृक्षः फलकाले निकृत्यते । न नप्तारं स्वकं न्याय्यं शप्तुमेवं प्रजापते ॥ २६ ॥ न मिथ्यावचनश्च त्वं स्वप्स्यत्येष न संशयः । कालस्तु क्रियतामस्य शयने जागरे तथा ॥ २७ ॥ रावणस्य वचः श्रुत्वा स्वयम्भूरिदमब्रवीत् ॥ २८ ॥

देवदेव ममेप्सितम् । एवमस्त्विति तच्चोक्त्वा प्रहृष्टास्ते दिवौकसः ॥" इति तपश्चर्यानन्तरप्रार्थनालब्धबहुवार्षिकनिद्रासमनन्तरकालभावीत्यव गन्तव्यम् । अन्यथा मृतकल्पः शयिष्यस इति शप्तस्य तपश्चर्याद्यसम्भवात् ॥ २४ ॥ प्रभोः रावणस्य ॥ २५ ॥ काञ्चनः काञ्चनवत् स्पृहणीयः । चम्पकवृक्षो वा । विवृद्धः वर्धितः । फलकाले पुष्पकाले । निकृत्यते छिद्यते । नप्तारं पौत्रम् ॥ २६ ॥ कालः कालनियमः ॥ २७ ॥ २८ ॥

सुप्तमिति । पौलस्त्येन विश्रवसा त्वमद्यप्रभृति मृतकल्पः शयिष्यस इत्युक्तोऽयं शापः "स्वप्तुं वर्षाण्यनेकानि देवदेव ममेप्सितम् । एवमस्त्विति तच्चोक्त्वा प्रहृष्टास्ते दिवौकसः" इति तपश्चर्यानन्तरप्रार्थनालब्धबहुवार्षिकनिद्रासमनन्तरकालभावीत्यवगन्तव्यम् । अन्यथा मृतकल्पः शयिष्यसे इति शप्तस्य तपश्चर्याद्यसम्भवात् ॥ २४ ॥ २५ ॥ विवृद्ध इति । काञ्चनः काञ्चनवत्स्पृहणीयः ॥ २६-२८ ॥

स०—काञ्चनो वृक्षः उदुम्बरादिः फलकाले यद्यपि नीरसं जन्त्वादिदूषितं च फलम् । तथापि वृक्षः वर्धितः न निकृत्यते यथा तन्निकर्तनमन्याय्यं तथा स्वकं नप्तारं पौत्रम् एवं शप्तुमन्याय्यं न्यायादनपेतम् । "काञ्चनः काञ्चनारे स्याच्चम्पके नागकेसरे । उदुम्बरे च पुन्नागे" इति विश्वः । "विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसाम्प्रतम्" इत्यादेस्तादृशोऽपि न छेद्यः । अयं तु काञ्चनमयो वृक्षः फलकाले फलद्वारा काञ्चनदानकाल इति वा ॥ २६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

षण्मासानित्येतदर्वाङ्निषेधपरम् । अन्यथा 'नव षट् सप्त चाष्टौ च मासान्' इति पूर्वोक्तविरोधात् ॥ २९ ॥ सोऽसौ रावणः ॥ ३० ॥ शिविरात् स्वनिलयात् । भक्षयन् परिधावति भक्षणहेतोः परिधाविष्यति । "लक्षणहेत्वोः क्रियायाः" इति शतृप्रत्ययः । वर्तमानसामीप्यादिना भविष्यदर्थे

शयिता ह्येष षण्मासानेकाहं जागरिष्यति । एकेनाह्ना त्वसौ वीरश्चरन् भूमिं बुभुक्षितः । व्यात्तास्यो भक्षयेल्लोकान् सङ्क्रुद्ध इव पावकः ॥ २९ ॥ सोऽसौ व्यसनमापन्नः कुम्भकर्णमबोधयत् । त्वत्पराक्रमभीतश्च राजा सम्प्रति रावणः ॥ ३० ॥ स एष निर्गतो वीरः शिबिराद्भीमविक्रमः । वानरान् भृशसंक्रुद्धो भक्षयन् परिधावति ॥ ३१ ॥ कुम्भकर्णं समीक्ष्यैव हरयोऽद्य प्रविद्रुताः । कथमेनं रणे क्रुद्धं वारयिष्यन्ति वानराः ॥ ३२ ॥ उच्यन्तां वानराः सर्वे यन्त्रमेतत् समुच्छ्रितम् । इति विज्ञाय हरयो भविष्यन्तीह निर्भयाः ॥ ३३ ॥ विभीषणवचः श्रुत्वा हनुमत् सुमुखेरितम् । उवाच राघवो वाक्यं नीलं सेनापतिं तदा ॥ ३४ ॥ गच्छ सैन्यानि सर्वाणि व्यूह्य तिष्ठस्व पावके । द्वाराण्यादाय लङ्कायाश्चर्याश्चाप्यथ सङ्क्रमान् ॥३५॥ शैलशृङ्गाणि वृक्षांश्च शिलाश्चाप्युपसंहर । तिष्ठन्तु वानराः सर्वे सायुधाः शैलपाणयः ॥ ३६ ॥ राघवेण समादिष्टो नीलो हरिचमूपतिः । शशास वानरानीकं यथावत् कपिकुञ्जरः ॥ ३७॥ ततो गवाक्षः शरभो हनुमानङ्गदस्तथा । शैलशृङ्गाणि शैलाभा गृहीत्वा द्वारमभ्ययुः ॥ ३८ ॥

लट् ॥ ३१ ॥ ३२ ॥ उच्यन्तामिति । यन्त्रं बिभीषिका । समुच्छ्रितमुन्नतम् ॥ ३३ ॥ सुमुखेरितं सुमुखं यथा भवति तथा ईरितम् उक्तम् ॥ ३४ ॥ गच्छेत्यादिश्लोकद्वयम् । आदाय स्वीकृत्य, आवृत्येति यावत् ॥३५॥ उपसंहर राशीकुरु । युद्धसाधनशिलादिकमिदानीमेव सम्पादयेत्यर्थः । तिष्ठन्तु वानराः

शयितेति । षण्मासान् शयिता, एकाहं जागरिष्यति इत्यनेन 'नव षट् सप्त चाष्टौ च मासान् स्वपिति राक्षसः' इत्युक्तप्रकारेण निद्रायाः कालनियमस्यानुक्तत्वात् निद्रायाः मासषट्कन्यूनता नास्तीत्युक्तम् । 'एकाहं जागरिष्यति' "एकेनाह्ना त्वसौ वीरश्चरन् भूमिं बुभुक्षितः । व्यात्तास्यो भक्षयेल्लोकान्" इत्यनेन जागरणकालनियमस्योक्तत्वादेकाहजागरणमित्युक्तं भवति ॥ २९ ॥ ३० ॥ स एष इति । भक्षयन् "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः । शिबिरात् स्वगृहात् परिधावति परिधाविष्यति । "वर्तमानसामीप्ये वर्तमानवद्वा" इति भविष्यदर्थे लट् ॥ ३१ ॥ ३२ ॥ यन्त्रं बिभीषिका ॥ ३३–३५ ॥ उपसंहर सञ्चिनु ॥ ३६–३८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वे सायुधाः शैलपाणयः इति पाठः । सायुधाः खड्गाद्यायुधवन्तः ॥ ३६–३८ ॥ रामेति । परवाहिनीं नगररक्षार्थं बहिश्चरन्तीम् । यद्वा कुम्भकर्णं दृष्ट्वा पलायमानान् वानरान् प्रत्यनुद्रुतां परवाहिनीमित्यर्थः ॥ ३९ ॥ शैलोद्यतदीप्तहस्तं शैलोद्यताः उद्यतशैलाः । महन्महाम्भोधरजालम्, महत् गुरु महाम्भोधरजालं मेघजालमित्यर्थः ॥४०॥ इति श्रीगोविन्दराज० श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकषष्टितमः सर्गः ॥६१॥

रामवाक्यमुपश्रुत्य हरयो जितकाशिनः । पादपैरर्दयन् वीरा वानराः परवाहिनीम् ॥ ३९ ॥ ततो हरीणां तदनीकमुग्रं रराज शैलोद्यतदीप्तहस्तम् । गिरेः समीपानुगतं यथैव महन्महाम्भोधरजालमुग्रम् ॥ ४० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकषष्टितमः सर्गः ॥ ६१ ॥

स तु राक्षसशार्दूलो निद्रामदसमाकुलः । राजमार्गं श्रिया जुष्टं ययौ विपुलविक्रमः ॥ १ ॥ राक्षसानां सहस्रैश्च वृतः परमदुर्जयः । गृहेभ्यः पुष्पवर्षेण कीर्यमाणस्तदा ययौ ॥ २ ॥ स हेमजालविततं भानुभास्वरदर्शनम् । ददर्श विपुलं रम्यं राक्षसेन्द्रनिवेशनम् ॥ ३ ॥ स तत्तदा सूर्य इवाभ्रजालं प्रविश्य रक्षोधिपतेर्निवेशम् । ददर्श दूरेऽग्रजमासनस्थं स्वयम्भुवं शक्र इवासनस्थम् ॥ ४ ॥

अथ कुम्भकर्णं प्रति रावणस्य सान्त्ववचनं द्विषष्टितमे–स त्वित्यादि । निद्रामदसमाकुलः निद्रया अकालोत्थितत्वेनानुवर्तमानया, मदेन मद्यपानकृतेन च समाकुलः । गृहेभ्यः, निर्गतेनेति शेषः ॥१॥२॥ हेमजालविततं स्वर्णमयगवाक्षविततम् । भानुभास्वरदर्शनम्, दृश्यत इति दर्शनं रूपम् । भानुवत् प्रकाशमानमित्यर्थः ॥ ३ ॥ स इति । दूरे कक्ष्यान्तरप्रदेशे ददर्श । उन्नतपुष्पकवत्त्वादिति भावः ॥ ४–६ ॥

परवाहिनीं पुराद्बहिर्निर्गत्य पुरीपरिसररक्षिणीं राक्षससेनामित्यर्थः ॥ ३९ ॥ शैलोद्यतदीप्तहस्तम् उद्यतशैलदीप्तहस्तम् ॥ ४० ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकषष्टितमः सर्गः ॥ ६१ ॥ १ ॥ राक्षसानामिति । गृहेभ्यः, निर्गतेनेति शेषः ॥ २–६ ॥ ॥१९१॥

स०–गृहेभ्यः तत्स्थितस्त्रीकरेभ्यः । यद्वा गृहेभ्यः परमार्येभ्यः "गृहिणी गृहमुच्यते" इति वचनात् । राक्षसानां गृहेभ्यः इत्यप्यन्वयो वा ॥ २ ॥ अभ्रजालं जलमत्वाद्दशायामिन्द्रनीलवचनात् तदभावदशायां वज्रैश्च तन्निदर्शनतोचितेति न भानुभास्वरेति विरोधः । अथवा अग्रजं रावणम् अभ्रजालमिव ददर्शेत्यन्वयः ॥ ७ ॥

अथेति । सन्निकर्ष समीपम् ॥ ७ ॥ कृत्यं मया कर्तव्यम् ॥ ८–१० ॥ किमर्थमिति । आहृत्य, स्थितेनेति शेषः । शंसेति । तामिति शेषः । प्रेतो भविष्यति मृतो भविष्यति ॥ ११ ॥ भ्रातरमिति । ईषत् परिवृत्ताभ्यामित्यनेन ईषत् कोपो लक्ष्यते ॥ १२ ॥ ईषत्त्वमेव विवृणोति–अद्येत्यादिना ।

भ्रातुः स भवनं गच्छन् रक्षोगणसमन्वितम् । कुम्भकर्णः पदन्यासैरकम्पयत मेदिनीम् ॥ ५ ॥ सोऽभिगम्य गृहं भ्रातुः कक्ष्यामभिविगाह्य च । ददर्शोद्विग्नमासीनं विमाने पुष्पके गुरुम् ॥ ६ ॥ अथ दृष्ट्वा दशग्रीवः कुम्भकर्ण मुपस्थितम् । तूर्णमुत्थाय संहृष्टः सन्निकर्षमुपानयत् ॥ ७ ॥ अथासीनस्य पर्यङ्के कुम्भकर्णो महाबलः । भ्रातु र्ववन्दे चरणौ किं कृत्यमिति चाब्रवीत् ॥ ८ ॥ उत्पत्य चैनं मुदितो रावणः परिषस्वजे । स भ्रात्रा सम्परिष्वक्तो यथावच्चाभिनन्दितः ॥९॥ कुम्भकर्णः शुभं दिव्यं प्रतिपेदे वरासनम् । स तदासनमाश्रित्य कुम्भकर्णो महाबलः । संरक्तनयनः कोपाद्रावणं वाक्यमब्रवीत् ॥ १० ॥ किमर्थमहमादृत्य त्वया राजन् विबोधितः । शंस कस्माद्भयं तेऽस्ति कोऽद्य प्रेतो भविष्यति ॥ ११ ॥ भ्रातरं रावणः क्रुद्धं कुम्भकर्णमवस्थितम् । ईषत्तु परिवृत्ताभ्यां नेत्राभ्यां वाक्यमब्रवीत् ॥ १२ ॥ अद्य ते सुमहान् कालः शयानस्य महाबल । सुखितस्त्वं न जानीषे मम रामकृतं भयम् ॥ १३ ॥ एष दाशरथी रामः सुग्रीवसहितो बली । समुद्रं सबलस्तीर्त्वा मूलं नः परिकृन्तति ॥ १४ ॥

सुमहान् कालः नवदिनपरिमितः, गतः इति शेषः ॥ १३ ॥ मूलं मूलबलम् । परिकृन्तति बाधत इत्यर्थः ॥ १४ ॥

कक्ष्यामभिविगाह्य द्वारं तीर्त्वा ॥ ६ ॥ उपास्थितम् अवस्थितम्, प्राप्तमिति यावत् ॥ ७–१२ ॥ सुमहान् कालः, अतीत इति शेषः ॥ १३ ॥ १४ ॥

स०–पुनस्समुदितोऽस्य रावणः इति पाठः । समुदितो रावणः । उत्पत्य आसनादुत्थायेत्यर्थः । सन्धिरार्ष इति नागोजिभट्टः । समुदितं यथा भवति तथा उत्पत्य “ सुप् सुपा ” इति समासे ऐकपद्यं ज्ञेयम् । मुदितः अत् पत्येति छेदः । अत् आश्चर्यं यथा भवति तथा पतित्वाऽऽत्पत्य । व्याख्यातं चाद्भुतपदव्याख्यानावसरे अदित्याश्चर्यार्थकमव्ययमिति वा ॥ ९ ॥ रोषेण परिवृत्ताभ्यां नेत्राभ्यामुपलक्षितं क्रुद्धं भ्रातरं कुम्भकर्णं रावणोऽब्रवीदिति नागोजिभट्टः । रोषेण परिवृत्ताभ्यां नेत्राभ्यां पार्श्वद्वयवर्तिनेत्रत्वेन द्विवचनं पूर्वं भुजाभ्यामितिवत् । तदुपलक्षितो रावणो वाक्यमुवाचेत्यन्वयो वा । अस्मिन् पक्षे क्रुद्धपदं नाधिकम् ॥ १२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मूलकृन्तनमुपपादयति–हन्तेति। लङ्कायां वनान्युपवनानि च सर्वम्। सेतुना सुखमागम्य स्वनिर्मितसेतुमात्रेण सुखमागम्य। रामेण वानरैकार्णवीकृतं वानररूपैकार्णवीकृतम्। पश्यस्व। आत्मनेपदमार्षम्। यद्वा स्वलङ्कायामिति छेदः। आत्मीयलङ्काद्वीप इत्यर्थः ॥ १५–१७ ॥ तदेतत् एतादृशम्।

हन्त पश्यस्व लङ्कायां वनान्युपवनानि च। सेतुना सुखमागम्य वानरैकार्णवीकृतम् ॥ १५ ॥ ये रक्षसां मुख्यतमा हतास्ते वानरैर्युधि। वानराणां क्षयं युद्धे न पश्यामि कदाचन ॥ १६ ॥ न चापि वानरा युद्धे जितपूर्वाः कदाचन ॥ १७ ॥ तदेतद्भयमुत्पन्नं त्रायस्वेमां महाबल। नाशय त्वमिमानद्य तदर्थं बोधितो भवान् ॥ १८ ॥ सर्वक्षपितकोशं च स त्वमभ्यवपद्य माम्। त्रायस्वेमां पुरीं लङ्कां बालवृद्धावशेषिताम् ॥१९॥ भ्रातुरर्थे महाबाहो कुरु कर्म सुदुष्करम्। मयैवं नोक्तपूर्वो हि कश्चिद्भ्रातः परन्तप ॥ २० ॥ त्वय्यस्ति तु मम स्नेहः परा सम्भावना च मे। देवासुरेषु युद्धेषु बहुशो राक्षसर्षभ। त्वया देवाः प्रतिव्यूह्य निर्जिताश्चासुरा युधि ॥ २१ ॥ तदेतत् सर्वमातिष्ठ वीर्यं भीमपराक्रम। न हि ते सर्वभूतेषु दृश्यते सदृशो बली ॥ २२ ॥ कुरुष्व मे प्रियहितमेतदुत्तमं यथाप्रियं प्रियरण बान्धवप्रिय। स्वतेजसा विधम सपत्नवाहिनीं शरद्घनं पवन इवोद्यतो महान् ॥ २३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्विषष्टितमः सर्गः ॥ ६२ ॥

भयमुत्पन्नम्। अस्माद्भयादिमां पुरीं त्रायस्व। इमान् वानरान् नाशय। तदर्थं नाशनार्थम् ॥ १८ ॥ सर्वक्षपितेति। सर्वक्षपितकोशं क्षपितसर्वैश्वर्यम्। "कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः" इत्यमरः। अभ्यवपद्य जानीहीत्यर्थः। बालवृद्धावशेषितामित्यतिशयोक्तिः। मूलबलाद्युत्सादनस्य वक्ष्यमाणत्वात् ॥ १९ ॥ कच्चिदिति प्रश्ने। कदाचिदपि नोक्तपूर्वोऽसीत्यर्थः। कश्चिदिति पाठे त्वदन्यः कश्चिदपि नैवमुक्तपूर्व इत्यर्थः ॥ २० ॥ सम्भावना आदरः। देवासुरेषु देवासुरसम्बन्धिषु। प्रतिव्यूह्य विभज्य। असुराः असुरा अपीत्यर्थः ॥ २१ ॥ आतिष्ठ अवलम्बस्व ॥ २२ ॥ यथाप्रियं

स्वलङ्कायाम् आत्मीयलङ्काद्वीपे। वानरैकार्णवीकृतम्, एतत्सर्वमिति शेषः ॥ १५–१८ ॥ सर्वक्षपितकोशं क्षपितसर्वैश्वर्यम् ॥ १९ ॥ २० ॥ परा सम्भावना अत्यादरः ॥ २१ ॥ वीर्यमातिष्ठ वीर्यमवलम्बस्व ॥ २२ ॥ कुरुष्वेति। हे प्रियरण! एतदुत्तमं हितं यथाप्रियं यथास्नेहम्, आवयोः स्नेहानुरूपमिति यावत्।

For Private And Personal Use Only

यथास्नेहम् । आवयोः प्रीत्यनुरूपमित्यर्थः॥२३॥ इति श्रीगोविन्दराजविरचिते श्रीरामा०रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विषष्टितमः सर्गः॥६२॥
अथ कुम्भकर्णबुद्धिस्त्रिषष्टितमे—तस्येत्यादि । परिदेवितं पूर्वोक्तवचनानां परिदेवनतुल्यत्वात् परिदेवितत्वम् । कुम्भकर्णो वचनं बभाषे जहास चेत्यत्र व्यत्ययः कार्यः । उक्त्वा जहासेति वाऽर्थः ॥ १ ॥ पुरा मन्त्रनिर्णये क्रियमाणे । अस्माभिः यो दोषो दृष्टः शत्रुभिस्तवापत् भविष्यतीति निश्चितः । हितेषु हितपरेषु । अनभिरक्तेन असक्तेन, हितपरवचनमशृण्वतेत्यर्थः । त्वया सोऽयं दोष आसादितः, पूर्वमेव चिन्तिता विपत् प्राप्तेत्यर्थः ॥ २ ॥

तस्य राक्षसराजस्य निशम्य परिदेवितम् । कुम्भकर्णो बभाषेदं वचनं प्रजहास च ॥१॥ दृष्टो दोषो हि योऽस्माभिः पुरा मन्त्रविनिर्णये । हितेष्वनभिरक्तेन सोऽयमासादितस्त्वया ॥२॥ शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः । निरयेष्वेव पतनं यथा दुष्कृतकर्मणः ॥ ३ ॥ प्रथमं वै महाराज कृत्यमेतदचिन्तितम् । केवलं वीर्यदर्पेण नानुबन्धो विचारितः ॥ ४ ॥ यः पश्चात् पूर्वकार्याणि कुर्यादैश्वर्यमास्थितः । पूर्वं चापरकार्याणि न स वेद नयानयौ ॥ ५ ॥

पापस्य सीताहरणरूपस्य कर्मणः फलं त्वां शीघ्रम् अभ्युपेतं प्राप्तम् । "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते" इति न्यायात् । अत्रोदाहरणमाह निरयेष्विति । दुष्कृतकर्मणः महापातकिनः पुरुषान् । निरयेष्वेव पतनं यथा प्राप्नोति तद्वत् । एवकारेणापरिहार्यत्वमुच्यते ॥ ३ ॥ प्रथममिति । हे महाराज ! केवलं वीर्यदर्पेण एतत्कृत्यं सीताहरणरूपं कार्यं वै । प्रथमं सीताहरणात् पूर्वम् । न चिन्तितम् साध्वसाधु वेति त्वया न विचारितम् । अनुबध्नातीत्यनुबन्धः दोषोत्पादः । "दोषोत्पादेऽनुबन्धः स्यात्" इत्यमरः ॥ ४ ॥ प्रथमं विचार्य पश्चात् कर्म कर्तव्यमिति प्रेक्षावतां कृत्यम्, त्वया तु तद्विपरीतं कृतमित्याह—य इति । ऐश्वर्यम् आस्थितः प्राप्तः यः पुमान् पूर्वकार्याणि कार्यारम्भात् पूर्वं कर्तव्यानि मन्त्रणादीनि कुर्यात् ।

कुरुष्वेति योजना ॥ २३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्विषष्टितमः सर्गः ॥ ६२ ॥
॥ १ ॥ २ ॥ शीघ्रमिति । दुष्कृतकर्मणः पुरुषस्य निरयेष्वेव पतनं यथा तथा पापस्य कर्मणः सीताहरणरूपस्य फलं शीघ्रं त्वामभ्युपेतं प्राप्तम् ॥ ३ ॥ प्रथमं पापस्य कर्मणो विधानात्प्रागेवैतत्कृत्यफलभूतमेतद्रामागमनलङ्कादाहादिकं न चिन्तितम्, फलत्वेन न विचारितमित्यर्थः । अनुबन्धोऽपि न विचारितः, अनुबध्नातीत्यनुबन्धो दोषोत्पादः । "दोषोत्पादेऽनुबन्धः स्यात्" इत्यमरः । तत्कृतदोषो न विचारित इत्यर्थः ॥४॥ प्रेक्षावता पुरुषेण प्रथमं विचार्य पश्चात्कर्तव्यम्,

स०—दं दातारं रावणं प्रति बभाषे जहास च । विभीषणमाल्यवदाद्युक्तं न श्रुतमत इयं दशेति दशाननं निरीक्ष्य हास इति भावः । "दं दाने छेदे च दातारि" इति विश्वः । बभाषेऽयेत्यपि क्वचित्पाठः ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपरकार्याणि उत्तरकाले विचार्याणि च पूर्वं कुर्यात् । सः नयानयौ नात्यनीतौ न वेद ॥ ५ ॥ एवं देशकालानुरोधेन कर्म कर्तव्यमित्युक्तम् । तदननुरोधे दोषमाह–देशेति । देशकालविहीनानि क्रियमाणानि । अदेशे अकाले च कृतानि कर्माणि । विपरीतवत् देशकालवैकल्याद्विपरीतकर्माणीव । अप्रयतेषु मन्त्रानध्ययनादिना अपूतेषु अपात्रेषु हवींषीव दुष्यन्ति विफलानि भवन्तीत्यर्थः ॥ ६ ॥ देशकालानुरोधस्य फलमाह–त्रयाणामिति । सचिवैः मन्त्रिभिः सह । समयं निश्चयरूपं सिद्धान्तं कृत्वा । "समयाः शपथाचारकालसिद्धान्तसंविदः" इत्यमरः । त्रयाणाम् उत्तममध्यमाधम

देशकालविहीनानि कर्माणि विपरीतवत् । क्रियमाणानि दुष्यन्ति हवींष्यप्रयतेष्विव ॥ ६ ॥
त्रयाणां पञ्चधा योगं कर्मणां यः प्रपश्यति । सचिवैः समयं कृत्वा स सभ्ये वर्तते पथि ॥ ७ ॥

कर्मणाम् । तत्र आत्मोदयपरज्यानिसम्भवसमये क्रियमाणं दण्डोपयोगि यानमुत्तमं कर्म । आत्मपरयोः बलसाम्ये क्रियमाणं सन्धानं मध्यमं कर्म । परोदयात्मज्यानिसमये क्रियमाणं दानपूर्वसमाश्रयणमधमं कर्म । तेषां पञ्चधा योगम्–कर्मणामारम्भोपायः, पुरुषद्रव्यसंपत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेत्युक्तैः पञ्चभिर्योगम् । यद्वा त्रयाणाम् उत्तममध्यमाधमभावेन त्रिविधानां कर्मणाम् । पञ्चधा योगं देशकालात्मद्रव्यप्रयोजनसम्बन्धवशात् पञ्चविधं संबन्धम् । यः पश्यति सः सभ्ये साधौ । "सभ्यः सामाजिके साधौ" इति रत्नमाला । पथि नीतिमार्गे वर्तते सम्यङ्नीति

त्वया तु तद्विपरीतमेव कृतमित्यभिमेत्याह–यः पश्चादिति । पूर्वकार्याणि पूर्वस्मिन् काले कर्तव्यानि पश्चात्कुर्यात् । उत्तरकार्याणि उत्तरस्मिन् काले कर्तव्यानि पूर्वं कुर्यादिति सम्बन्धः ॥ ५ ॥ देशकालवैपरीत्येन कृतस्य कर्मणो दोषं प्रदर्शयति–देशकालेति । अनुकूलान्यपि कर्माणि स्वोचितदेशकालवियुक्तानि क्रियमाणानि चेत् विपरीतवद्दुष्यन्ति प्रतिकूलकर्मभिस्तुल्यं विरुद्धफलानि भवन्तीत्यर्थः । हवींषि च पुरोडाशादीनि । अप्रयतेष्विव असावधानजनेष्विव, अरुचिजनेष्विति यावत् ॥ ६ ॥ देशकालविरोधे फलवैपरीत्यमुक्त्वा इदानीं तदविरोधे फलमाह–त्रयाणामिति । सचिवैः समयं निश्चयम् । त्रयाणाम् उत्तममध्यमाधमभावेन त्रिविधानां कर्मणाम् । एषूत्तमं कर्म नीतिशास्त्रोक्तम् आत्मोपचयपरज्यानिसम्भवसमये क्रियमाणं दण्डोपयोगि यानमुत्तमं कर्म । आत्मपरयोः बलसाम्ये क्रियमाणं सामसाध्यं सन्धानं मध्यमं कर्म । परोपचयात्मग्लानिसमये क्रियमाणं दानपूर्वकसमाश्रयणमधमं कर्म । एतादृशत्रिविधकर्मणां पञ्चधा योगं देशकालात्मद्रव्यप्रयोजनसम्बन्धवशात् पञ्चविधं सम्बन्धम् यः पश्यति स सभ्ये पथि वर्तते, साधीयान् भवतीत्यर्थः । यद्वा एवं पञ्चधा योगः–कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

फलं प्राप्नोतीत्यर्थः ॥ ७ ॥ यथागमं नीतिशास्त्रमनतिक्रम्य । यो राजा समयं कार्यनिर्णयं चिकीर्षति सचिवांश्च बुध्यते सचिवैः सहालोचयतीति यावत् । सुहृदश्चानुपश्यति सुहृद्भिः सह विचारयतीति यावत् । स सभ्ये पथि वर्तत इति पूर्वेणान्वयः ॥ ८ ॥ धर्ममर्थं कामं च प्रत्येकं वा । त्रीणि द्वन्द्वानि वा धर्मार्थौ अर्थधर्मौ कामार्थौ वा, सर्वान् वा । कालेषु विहितेषु प्रातर्मध्याह्नसायाह्नेषु भजेत अकाले न सेवेतेति भावः । एतदुक्तं भवति ।

यथागमं च यो राजा समयं विचिकीर्षति । बुध्यते सचिवान् बुद्ध्या सुहृदश्चानुपश्यति ॥ ८ ॥
धर्ममर्थं च कामं च सर्वान् वा रक्षसां पते । भजेत पुरुषः काले त्रीणि द्वन्द्वानि वा पुनः ॥ ९ ॥
त्रिषु चैतेषु यच्छ्रेष्ठं श्रुत्वा तन्नावबुध्यते । राजा वा राजमात्रो वा व्यर्थं तस्य बहुश्रुतम् ॥ १० ॥

प्रातःकाले धर्मो विहितः, तं तदा सेवेत । मध्याह्ने अर्थो विहितः, तं तदा सेवेत । सायंकाले कामो विहितः, तं तदा सेवेतेति । यद्वा प्रातःकाले स्वकालविहितं धर्मं मध्याह्ने विहितमर्थं च सेवेत । मध्याह्ने स्वकालविहितमर्थं प्रातर्विहितं धर्मं च सेवेत । सायंकाले स्वकालविहितं कामं मध्याह्नविहितमर्थं च सेवेत । अथवा सायंकाले स्वविहितं कामं प्रातर्मध्याह्नयोर्विहितौ धर्मार्थौ च सेवेतेति । केवलकामं सर्वकालेष्वपि सेवमानः पुरुषाधम एवेत्यभिसन्धिः ॥ ९ ॥ एवं कर्तव्यमुक्त्वा तदकर्तारं निन्दति–त्रिष्विति । एतेषु पूर्वोक्तेषु त्रिषु भजनेषु धर्मार्थकामेषु वा । यच्छ्रेष्ठं प्रत्येकभजनम्, धर्मो वा । तच्छ्रुत्वा यो राजा वा राजमात्रो वा राजसदृशो वा न बुध्यते आचरितुं न जानाति । तस्य बहुश्रुतं शास्त्रश्रवणं व्यर्थम्, अनुष्ठानपर्यवसानाभावादिति भावः । एवं सामान्यरूपया अप्रस्तुतप्रशंसया त्रिवर्गेषु श्रेष्ठं धर्मं परित्यज्य जघन्यं काममेवाश्रितस्य ते शास्त्रश्रवणं समुद्रघोषमात्रमासीदिति प्रस्तुतोऽर्थोऽव

देशकालविभागः, विपत्तेश्च प्रतीकारः, कार्यसिद्धिश्चेति ॥ ७ ॥ यो राजा यथागमं यथानीतिशास्त्रम् । समयं कार्यनिर्णयं विचिकीर्षति सचिवांश्च बुध्यते, सचिवैस्सहालोचयतीत्यर्थः । सुहृदश्चानुपश्यति सुहृदश्चावेक्षते । यद्वा सुहृद्भिः सह विचारयति स सभ्ये पथि वर्तत इति पूर्वेण सम्बन्धः ॥ ८ ॥ धर्ममिति । काले विहितपूर्वाह्णमध्याह्नसायाह्नकाले धर्मम् अर्थं च कामं च प्रत्येकं पुरुषो भजेत । त्रीणि द्वन्द्वानि वा प्रातःकालविहितं धर्मं मध्याह्नविहितमर्थं च प्रातःकाले भजेत, मध्याह्नविहितमर्थं प्रातःकालविहितं धर्मं च मध्याह्ने भजेत, सायंकालविहितं कामं मध्याह्नविहितमर्थं च सायङ्काले भजेत, सर्वान्वा सायङ्कालविहितं कामं प्रातर्मध्याह्नविहितौ धर्मार्थौ च सायङ्काले अवैषम्येण भजेत, कालव्यत्ययेन भजेतेत्यर्थः ॥ ९ ॥ त्रिषु चैतेषु धर्मार्थकामेषु यच्छ्रेष्ठं धर्मरूपं वस्तु । यद्वा त्रिषु त्रिविधेष्वेतेषु पूर्वोक्तपक्षेषु यच्छ्रेष्ठं प्रशस्ततरं तच्छ्रुत्वा राजा वा राजमात्रो वा राजसदृशो वा नावबुध्यते आचरितुं न जानाति तस्य बहुश्रुतं व्यर्थमित्यर्थः ॥ १० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गम्यते ॥ १० ॥ अकाले काम इवाकाले विक्रमोऽपि त्याज्य इत्याह—उपप्रदानमित्यादिश्लोकद्वयेन । काले तत्तदुचितकाले । उपप्रदानं प्रतिपक्षिणः समीपं गत्वा द्रविणादिप्रदानम् । सान्त्वं समीचीनभाषणम् । भेदं मित्रादिवर्गस्य द्वैधीकरणम् । विक्रमं दण्डं च । प्रत्येकं तेषां योगं समवायं च । तौ पूर्वोक्तौ नयानयौ । तेषां निर्वाहप्रकारान् धर्मार्थकामांश्च सचिवैः संमन्त्र्य । काले पूर्वोक्तकाले । आत्मवान् वशीकृतमनस्कः । यो निषेवेत स लोके व्यसनं नाप्नु

उपप्रदानं सान्त्वं वा भेदं काले च विक्रमम् । योगं च रक्षसां श्रेष्ठ तावुभौ च नयानयौ ॥ ११ ॥ काले धर्मार्थकामान् यः संमन्त्र्य सचिवैः सह । निषेवेतात्मवान् लोके न स व्यसनमाप्नुयात् ॥ १२ ॥ हितानुबन्धमालोच्य कार्याकार्यमिहात्मनः । राजा सहार्थतत्त्वज्ञैः सचिवैः स हि जीवति ॥ १३ ॥ अनभिज्ञाय शास्त्रार्थान् पुरुषाः पशुबुद्धयः । प्रागल्भ्याद्वक्तुमिच्छन्ति मन्त्रेष्वभ्यन्तरीकृताः ॥ १४ ॥

यात् ॥ ११ ॥ १२ ॥ हितेति । अत्र कार्यमित्यध्याहारः । निषेवेतेत्यनुषङ्गः । यो राजा अर्थतत्त्वज्ञैः सचिवैः सह । हितानुबन्धं हितोदर्कम् । आत्मनः कार्याकार्यं कर्तव्याकर्तव्यम् । आलोच्य निश्चित्य । कार्यमेव निषेवेत सः इह लोके जीवतीत्यर्थः । हीत्यनेनायमर्थो लोकप्रसिद्ध इत्यवगम्यते । हितानुबन्धकार्याकार्यानालोचनात्तवेदं व्यसनमापन्नमिति भावः ॥ १३ ॥ एवं सामान्येन राजानमधिक्षिप्य मन्त्रिणोऽप्यधिक्षिपति—अनभिज्ञायेति । शास्त्रार्थान् नीतिशास्त्रार्थान् । अनभिज्ञाय गुरुमुखादश्रुत्वा । वेषेण पुरुषाः पशुबुद्धयः आहारनिद्रादिमात्राभिज्ञाः । भ्रान्तेन राज्ञा । मन्त्रेषु राजकार्यविचारेषु । अभ्यन्तरीकृता मन्त्रयितृत्वेन वृताः सन्तः । प्रागल्भ्यात् ऊहापोहौ विना केवलधार्ष्ट्यात् वक्तुमिच्छन्ति, न तु सम्यक् सङ्गतं निश्चित्य वदन्तीत्यर्थः ॥ १४ ॥

उपप्रदानमित्यादि श्लोकद्वयमेकं वाक्यम् । उपप्रदानं सान्त्वं भेदं च काले तदुचितकाले विक्रमं दण्डं च सामादीनुपायानेकैकं योगं तेषां समुदायं च नयानयौ तेषां निर्वाह्यनिर्वाहप्रकारौ । धर्मार्थकामांश्च-धर्मः तपश्चर्यादिः, अर्थः लब्धव्यं धनम्, कामः माल्यवस्त्रादि एतान् सचिवैः सह सम्मन्त्र्य काले तत्तदुचितकाले आत्मवान् वशीकृतमनस्कः यो निषेवेत सः लोके व्यसनं नाप्नुयादिति योजना ॥ ११ ॥ १२ ॥ हितानुबन्धमिति । अत्र निषेवेतेत्यनुषङ्गः । यो राजा सचिवैस्सह कार्याकार्यमालोच्य कर्तव्याकर्तव्यं विचार्य हितानुबन्धं शुभोदर्कफलं निषेवेत स जीवतीति सम्बन्धः । हितानुबन्धमालोक्य कुर्यात्कार्यमिहात्मनः इति वा पाठः ॥ १३ ॥ व्युत्क्रमो न कर्तव्य इत्यभिधाय नीतिवाह्यं मन्त्रिवाक्यमपि न परिग्राह्यमित्याह—अनभिज्ञायेत्यादिना ॥ १४ ॥ १५ ॥ ॥१९४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशास्त्रेति । शास्त्रानभिज्ञानां तेषां मन्त्रिणाम् । अहितं वचः अर्थशास्त्रानभिज्ञानाम् अथापि विपुलां श्रियमिच्छतां राज्ञां न कार्यम्, राजभिस्तदुक्त प्रकारो नानुष्ठेय इत्यर्थः ॥ १५ ॥ न केवलं तद्वचनाश्रवणम्, मन्त्रेषु बहिष्कार्याश्च त इत्याह–अहितमिति । वस्तुतः अहितं हिताकारं हितमिवापाततः प्रतीयमानमर्थम् । धार्ष्ट्यात् शास्त्रज्ञानं विना केवलप्रागल्भ्यात् । ये जल्पन्ति अक्रमेण वदन्ति। कृत्यदूषणाः कार्यदूषकास्ते । अवेक्ष्य पूर्वमेव परीक्ष्य ।

अशास्त्रविदुषां तेषां न कार्यमहितं वचः । अर्थशास्त्रानभिज्ञानां विपुलां श्रियमिच्छताम् ॥ १५ ॥ अहितं च हिताकारं धार्ष्ट्याज्जल्पन्ति ये नराः । अवेक्ष्य मन्त्रबाह्यास्ते कर्तव्याः कृत्यदूषणाः ॥ १६ ॥ विनाशयन्तो भर्तारं सहिताः शत्रुभिर्बुधैः । विपरीतानि कृत्यानि कारयन्तीह मन्त्रिणः ॥ १७ ॥ तान् भर्ता मित्रसङ्काशानमित्रान् मन्त्रनिर्णये । व्यवहारेण जानीयात् सचिवानुपसंहितान् ॥ १८ ॥ चपलस्येह कृत्यानि सहसानुप्रधावतः । छिद्रमन्ये प्रपद्यन्ते क्रौञ्चस्य खमिव द्विजाः ॥ १९ ॥

मन्त्रबाह्याः मन्त्रबहिर्भूताः कर्तव्याः ॥ १६ ॥ न केवलमहितवचनम्, विपरीतं च कुर्वन्तीत्याह–विनाशयन्त इत्यादि । मन्त्रिणः दुर्मन्त्रिणः । बुधैः उपायज्ञैः । शत्रुभिः सहिताः प्रेरिताः । विनाशयन्तः विनाशार्थम् । इह प्रयोजनविषये । विपरीतानि विपरीतफलकानि कृत्यानि । भर्तारं कारयन्ति ॥ १७ ॥ दुर्मन्त्रित्वनिर्णयोपायमाह–तानिति । उपसंहितानुपजापितान् उत्कोचप्रदानादिना शत्रुभिर्भेदं प्रापितान् । मित्रसङ्काशान् मित्रवद्भावयतः कार्यतोऽमित्रान् सचिवान् । व्यवहारेण व्यामिश्रभाषणेन जानीयात् ॥१८॥ स्वयमसमर्था विपरीतबुद्धयो मन्त्रिणः किं करिष्यन्तीत्यत्राह–चपलस्येति ।

अहितमिति । कृत्यदूषणाः सिद्धार्थदूषकाः ॥ १६ ॥ विनाशयन्त इत्यादि श्लोकद्वयमेकं वाक्यम् । बुधैः उपायज्ञैः । उपसंहितान् उत्कोचादिना शत्रुभिर्वशीकृतान् ॥ १७ ॥ १८ ॥ चपलस्येति । इह प्रस्तुतकार्यविषये कृत्यानि उपसंहितमन्त्रिप्रेरितानि कार्याणि सहसा अनुधावतः कुर्वतः । चपलस्य राज्ञः छिद्रं रन्ध्रम् ।

स०–अधुनापि वर्जनीयानेवाह–**विनाशयन्त** इति । शाता हेतौ । भर्तारं स्वस्वामिनम् । बुधैः अविज्ञमन्त्रिकत्वज्ञानैः शत्रुभिः स्वराजविद्वेषिभिः । विपरीतानि राजमरणराज्यहरणादिकारणानि कृत्यानि कारयन्ति । ते मन्त्रिणो निन्दितमन्त्रिणः, मन्त्रबाह्याः कर्तव्या इत्यर्थः । " भूमनिन्दाप्रशंसासु " इत्युक्तेर्निन्दायामयमिनिः । " केचित्तुमन्त्रिणः " इत्यादि नागोजिभट्ट्याद्यानं बुधमन्त्रिमुखशब्दयोजनाज्ञान दारिद्र्येणेति ज्ञेयम् । तथा स्वरक्षणं कुर्वन्तीति शेष इति विशेषोऽपि तन्मूलक एव । प्रकरणाननुकूलता च बालानामपि भासत इत्यनादरणीयं तदिति दिक् ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इह प्रस्तुते कार्ये विषये । कृत्यानि उपसंहितमन्त्रिप्रेरितानि कार्याणि । सहसा अचिरेण । अनुप्रधावतः दुर्मन्त्रिषु मन्त्रित्वमनु सरतः । चपलस्य झटिति कार्यं प्रवर्तमानस्य राज्ञः । छिद्रं रन्ध्रम् । अन्ये शत्रवः । क्षिप्रं प्रपद्यन्ते स्वीकुर्वन्ति । कथमिव ? द्विजाः पक्षिणः । “ दन्तविप्राण्डजा द्विजाः ” इत्यमरः । क्रौञ्चस्य स्कन्दशक्तिविदारितस्य क्रौञ्चाख्यपर्वतस्य । खमिव रन्ध्रमिव । पण्डिताः शत्रवः उत्कोचप्रदानादिना वशीकृतैर्मन्त्रिभिः कुत्रचिच्चापलकार्ये राजानं

यो हि शत्रुमविज्ञाय नात्मानमभिरक्षति । अवाप्नोति हि सोऽनर्थान् स्थानाच्च व्यवरोप्यते ॥ २० ॥
यदुक्तमिह ते पूर्वं क्रियतामनुजेन च । तदेव नो हितं कार्यं यदिच्छसि च तत् कुरु ॥ २१ ॥
तत्तु श्रुत्वा दशग्रीवः कुम्भकर्णस्य भाषितम् । भ्रुकुटिं चैव संचक्रे क्रुद्धश्चैनमभाषत ॥ २२ ॥
मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससि । किमेवं वाक्छ्रमं कृत्वा काले युक्तं विधीयताम् ॥ २३ ॥
विभ्रमाच्चित्तमोहाद्वा बलवीर्याश्रयेण वा । नाभिपन्नमिदानीं यद्व्यर्थास्तस्य पुनः कथाः ॥ २४ ॥

प्रापय्य तदेव रन्ध्रमासाद्य अन्तः प्रविशन्तीति भावः ॥ १९ ॥ एवं कपटवृत्तेः शत्रोः स्वरूपापरिज्ञाने राजा विपद्यत इत्याह–यो हीति । यो हि राजा । शत्रुं वञ्चनपरम् । अविज्ञाय मन्त्रव्यवहारादिना अविज्ञाय । आत्मानं च नाभिरक्षति दुर्मन्त्रिनिरासादिना नात्मानं प्रकृतौ स्थापयति । सोऽनर्थानवाप्नोति । स्थानात् राजासनात् । व्यवरोप्यते प्रच्याव्यते । इयता ग्रन्थेन तव कामव्यसनात् कुमन्त्रिवचनाच्चेयमापदिति दर्शितम् ॥ २० ॥ २१ ॥ क्रुद्धः सन् भ्रुकुटिम् ऊर्ध्वीकृतभ्रुवं चक्रे । एनमभाषत चेत्यन्वयः ॥ २२ ॥ मान्य इति । हे कुम्भकर्ण ! त्वं मान्यः बहुमानार्हः । आचार्यः आचारप्रवर्तकः गुरुरिव मां मान्यमाचार्यं गुरुम् । अनुशाससि शिक्षसे । आर्षः शप् । वैपरीत्यमेवाचरसीत्यर्थः । एवं वचनं तवायुक्तमिति भावः । अफलं चेदं वचनमित्याह किमेवमिति । एवम् उक्तप्रकारेण । वाक्छ्रमं कृत्वा, प्रयासैकफलां वाचमुक्त्वेत्यर्थः । किं फलम् ? किमपि प्रयोजनं नास्तीत्यर्थः । नीतिकालस्यातीतत्वादिति भावः । काले नयमार्गातीतकाले । यद्युक्तं पराक्रमरूपम्, तत् विधीयतां क्रियताम् ॥ २३ ॥ पूर्वमनालोच्य कृतस्य निमित्तमाह–विभ्रमादिति । विभ्रमात् अनीतौ नीतिबुद्ध्या । चित्तमोहात् ज्ञानानुदयात् । बलवीर्याश्रयेण बलवीर्ययोराश्रयणेन, गर्वेणेति यावत् । यत्कार्यं नाभिपन्नं ॥१९९॥

अन्ये शत्रवः प्रपद्यन्ते । कथमिव ? द्विजाः क्रौञ्चस्य स्कन्दशक्तिविदारितक्रौञ्चाख्यस्य पर्वतस्य । खमिव रन्ध्रमिव ॥ १९–२१ ॥ कुम्भकर्णोक्तं दोषमङ्गीकृत्योत्तर

For Private And Personal Use Only

न कृतम् । तस्य पुनः कथाः पुनः पुनः कथनानि । इदानीमतीतकाले व्यर्थाः ॥ २४ ॥ इदानीं सद्यः । गतं तु गतमेव, न तत्पुनरायास्यतीति भावः ॥ २५ ॥ ममेत्यादिसार्धश्लोक एकान्वयः । दोषं वैषम्यम्, शत्रुभिराक्रमणमिति यावत् । समीकुरु समतया कुरु । वैषम्यसमता नाम वैषम्यनाश एव । खलु

अस्मिन् काले तु यद्युक्तं तदिदानीं विधीयताम् । गतं तु नानुशोचन्ति गतं तु गतमेव हि ॥ २५ ॥ ममापनयजं दोषं विक्रमेण समीकुरु । यदि खल्वस्ति मे स्नेहो विक्रमं वाऽवगच्छसि । यदि वा कार्यमेतत्ते हृदि कार्यतमं मतम् ॥ २६ ॥ स सुहृद् यो विपन्नार्थं दीनमभ्यवपद्यते । स बन्धुर्योऽपनीतेषु साहाय्यायोपकल्पते ॥२७॥ तमथैवं ब्रुवाणं तु वचनं धीरदारुणम् । रुष्टोऽयमिति विज्ञाय शनैः श्लक्ष्णमुवाच ह ॥ २८ ॥ अतीव हि समालक्ष्य भ्रातरं क्षुभितेन्द्रियम् । कुम्भकर्णः शनैर्वाक्यं बभाषे परिसान्त्वयन् ॥ २९ ॥

वाक्यालङ्कारे । मे मयि यदि स्नेहोऽस्ति स्वकीयं विक्रमं यदि वा अवगच्छसि । स्वपराक्रममज्ञात्वैव नीत्युपन्यासस्त्वया कृत इति भावः । एतत् युद्धरूपं कार्यं ते हृदि कार्यतमम् अवश्यकर्तव्यम् । मतम् इष्टम्, अवश्यकर्तव्यत्वेन मन्यसे चेदित्यर्थः । तदा समीकुर्वित्यन्वयः ॥ २६ ॥ इदानीं साहाय्याकरणे तव बन्धुत्वमेव भज्येतेति सदृष्टान्तमाह–स इति । विपन्नार्थं विपन्नः शङ्कितापायः अर्थः प्रयोजनं यस्य तम् । दीनं मलिनमनस्कं पुरुषम् । यः सुहृत् अभ्यवपद्यते अभितः प्राप्नोति, सदा सन्निधत्त इत्यर्थः । स एव सुहृत् । यो बन्धुः अपनीतेषु विषमितनीतिषु पुरुषेषु साहाय्यायोपकल्पते साहाय्याय प्रभवति स एव बन्धुः । सर्वं वाक्यं सावधारणमिति न्यायात् ॥ २७ ॥ तमिति । धीरदारुणम् । यदि वा कार्यमित्युक्त्या धीरम्, सुहृदित्याद्युक्त्या दारुणं निष्ठुरम् । रुष्टोऽयमिति विज्ञाय, भ्रुकुटिबन्धनेनानुमायेत्यर्थः ॥ २८ ॥ उक्तमेवार्थं प्रपञ्चयन्नाह–अतीवेति । अतीव

माह–विभ्रमादिति । विभ्रमात् विपरीतज्ञानात् । चित्तमोहादज्ञानात् । नाभिपन्नं न कृतम् ॥ २४ ॥ २५ ॥ ममापनयजं दोषमित्यादि सार्धश्लोक एकं वाक्यम् । मे मयि । विक्रमं पराक्रमम् । कार्यतमम् अवश्यकर्तव्यं यदि तर्हि मम दोषं विक्रमेण समीकुर्वित्यर्थः ॥ २६ ॥ स सुहृदिति । विपन्नार्थं नष्टसर्वप्रयोजनं दीनम्, सखायमिति शेषः । यः अभ्यवपद्यते स सुहृत् । अपनीतेषु अपनीतिमत्सु ॥२७॥ धीरदारुणं, यदि ते कर्तव्यं तर्हि कुर्वित्युक्तेः धैर्ययुक्तत्वम्, स सुहृत् यो विपन्नार्थं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

क्षुभितेन्द्रियमित्यनेन रुष्टपदं व्याख्यातम् । परिसान्त्वयन्नित्यनेन श्लक्ष्णपदम् ॥ २९ ॥ अलमिति । ते त्वया सन्तापम् उपपद्य प्राप्य अलम्, सन्तापो न कर्तव्य इत्यर्थः । "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा" इति क्त्वाप्रत्ययः । स्वस्थो भव, स्वर्गस्थो भवेत्यर्थान्तरम् ॥ ३० ॥ नैतदिति । नैतन्मनसि कर्तव्यम्, विभ्रमाच्चित्तमोहाद्देत्युक्तं मनसि न कर्तव्यमित्यर्थः । यत्कृते यस्य रामस्य कृते । अर्थान्तरं तु मयि जीवति सति

अलं राक्षसराजेन्द्र सन्तापमुपपद्य ते । रोषं च सम्परित्यज्य स्वस्थो भवितुमर्हसि ॥ ३० ॥ नैतन्मनसि कर्तव्यं मयि जीवति पार्थिव । तमहं नाशयिष्यामि यत्कृते परितप्यसे ॥ ३१ ॥ अवश्यं तु हितं वाच्यं सर्वावस्थं मया तव । बन्धुभावादभिहितं भ्रातृस्नेहाच्च पार्थिव ॥ ३२ ॥ सदृशं यत्तु कालेऽस्मिन् कर्तुं स्निग्धेन बन्धुना । शत्रूणां कदनं पश्य क्रियमाणं मया रणे ॥ ३३ ॥ अद्य पश्य महाबाहो मया समरमूर्धनि । हते रामे सह भ्रात्रा द्रवन्तीं परवाहिनीम् ॥ ३४ ॥ अद्य रामस्य तद् दृष्ट्वा मयाऽऽनीतं रणाच्छिरः । सुखी भव महाबाहो सीता भवतु दुःखिता ॥ ३५ ॥ अद्य रामस्य पश्यन्तु निधनं सुमहत् प्रियम् । लङ्कायां राक्षसाः सर्वे ये ते निहतबान्धवाः ॥ ३६ ॥

एतन्मनसि न कर्तव्यम् । यद्यहं जीविष्यामि तदा एवं न कर्तव्यम् । अहमेव न जीविष्यामीत्यर्थः । यत्कृते यस्य मम कृते । परितप्यसे अयं सुखेन जीवन् मत्कार्यं न करोतीति परितप्तोऽसि । तं मां रामेण नाशयिष्यामीति ॥ ३१ ॥ तर्हि किमर्थमेवमुक्तमित्यत्राह–अवश्यमित्यादि । बन्धुभावात् सामान्यस्नेहात् विशेषतो भ्रातृस्नेहाच्च । सर्वावस्थं रोषहर्षादिसर्वावस्थावस्थितमित्यर्थः । अवश्यं वाच्यं ते हितं मयाऽभिहितम् ॥ ३२ ॥ अस्मिन् काले आपत्काले । स्निग्धेन बन्धुना यत्कर्तुं सदृशं युक्तम् तादृशं कदनं मया क्रियमाणं पश्य । अत्र शत्रुकर्तृकं कदनमित्यर्थान्तरम् ॥ ३३ ॥ अद्येति । अर्थान्तरम्–हे पर ज्येष्ठ ! मया सह समरमूर्धनि हते भग्ने सति रामे रामनिमित्तम्, द्रवन्तीम् आगच्छन्तीम् वाहिनीं पश्येति ॥ ३४ ॥ अद्य रामस्येति । अर्थान्तरम्–मया सह रामस्य रणाद्धेतोः आनीतं दूरे क्षिप्तम् । शिरः मच्छिरः । दृष्ट्वा सुखी भव, तदानीं मयि रोषत्यागादिति भावः । सीता दुःखिता भवतु, सर्वलोकमातृत्वादिति भावः ॥ ३५ ॥ अद्य रामस्य पश्यन्त्विति । अर्थान्तरम्–रामस्येति कर्तरि षष्ठी । रामकर्तृकं मन्निधनं

मित्युक्तेर्दारुणत्वम् ॥ २८ ॥ २९ ॥ अलमिति । ते त्वया सन्तापमुपपद्य प्राप्य अलम्, सन्तापो न कर्तव्य इत्यर्थः ॥ ३० ॥ ३१ ॥ तर्हि किमेवमुक्तमित्यत्राह–

For Private And Personal Use Only

ये निहतबान्धवाः ते राक्षसाः पश्यन्तु । " न दुःखं पञ्चभिः सह " इति न्यायादिति भावः । उत्तरश्लोकेऽप्येवमेव योजना ॥ ३६ ॥ ३७ ॥ अद्येति । ससूर्यमिव तोयदमिति । रुधिराक्ततया ससूर्यप्रकाशं मेघमिव स्थितमित्यर्थः ॥ ३८ ॥ कथमिति । ससैन्यं दाशरथिं जिघांसुभिः एभिः राक्षसैः मया च परिरक्षितस्त्वं कथं वध्यस इति योजना । अर्थान्तरम्-जिघांसुभिः हननेच्छामात्रवद्भिः, पराक्रमासमर्थैरित्यर्थः । कथं परिरक्षितः ? प्रत्युत

अद्य शोकपरीतानां स्वबन्धुवधकारणात् । शत्रोर्युधि विनाशेन करोम्यास्रप्रमार्जनम् ॥ ३७ ॥ अद्य पर्वतसङ्काशं ससूर्यमिव तोयदम् । विकीर्णं पश्य समरे सुग्रीवं प्लवगोत्तमम् ॥ ३८ ॥ कथं त्वं राक्षसैरेभिर्मया च परिरक्षितः । जिघांसुभिर्दाशरथिं वध्यसे त्वमिहानघ ॥ ३९ ॥ अथ पूर्वं हते तेन मयि त्वां हन्ति राघवः । नाहमात्मनि सन्तापं गच्छेयं राक्षसाधिप ॥ ४० ॥ कामं त्विदानीमपि मां व्यादिश त्वं परन्तप । न परः प्रेषणीयस्ते युद्धायातुलविक्रम ॥ ४१ ॥ अहमुत्सादयिष्यामि शत्रूंस्तव महाबल ॥ ४२ ॥ यदि शक्रो यदि यमो यदि पावकमारुतौ । तानहं योधयिष्यामि कुबेरवरुणावपि ॥ ४३ ॥

वध्यस इति । अत्र विभीषणः क्व गत इति कुम्भकर्णस्य प्रश्नः, मया धिक्कृतो गत इति रावणस्योत्तरं च क्वचित् कोशे दृश्यते तत्पूर्वापरविरुद्धम् ॥ ३९ ॥ अथेति । अत्र अथशब्दः प्रक्रमान्तरे । मयि हते सति हि पश्चात्त्वां रामो हन्ति हनिष्यति । अहं च आत्मनि स्वस्मिन् सन्तापं शत्रुपरिभवजं न कदाचिदपि गच्छेयम्, न केनचिद्धन्तुं शक्य इत्यर्थः । अतः कुतस्ते भयमिति भावः । अर्थान्तरम्-अहमात्मनि विषये सन्तापं न गच्छेयं न गच्छामि । " व्यत्ययो बहुलम् " इति लकारव्यत्ययः । मन्निधनं नानुशोचामीत्यर्थः । किन्तु मयि हते सति । अथ राघवस्त्वां हन्ति हनिष्यतीति सन्तापं गच्छामीति ॥ ४० ॥ काममिति । इदानीमपि इदानीमेव युद्धाय व्यादिश । ते त्वया परः अन्यः न प्रेषणीयः ॥ ४१ ॥ अहमित्यर्धमेकं वाक्यम् ॥ ४२ ॥ उक्तं विवृणोति-यदीति ॥ ४३ ॥ ४४ ॥

अवश्यमिति । सर्वावस्थं रोषहर्षादिसर्वावस्थास्वित्यर्थः ॥ ३२-३८ ॥ दाशरथिं जिघांसुभिः राक्षसैः परिरक्षितः कथं वध्यस इति सम्बन्धः ॥ ३९ ॥ अथ पूर्वमिति । अहमात्मनि विषये सन्तापं न गच्छामि किन्तु तेन मयि पूर्वं हते सति अथैव राघवस्त्वां हन्ति हनिष्यतीति सन्तापं गच्छामीत्यर्थः ॥ ४०-४६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथवेति । मृद्नतः प्रहरतः । प्रतिमुखे अग्रे ॥ ४५ ॥ ४६ ॥ यदीति । रामः प्रथमं मे मुष्टिप्रहारमेव न सहिष्यते, कुत ... । भावः ॥ ४७ ॥ रामानु०–यदीति । राघवो मुष्टिवेगं यदि सहिष्यति ततः राघवस्य बाणौघाः मे रुधिरं पास्यन्ति । राघवो मुष्टिवेगं न सहिष्यत इति भावः ॥ ४७ ॥ चिन्तयाते । उद्यतः,

गिरिमात्रशरीरस्य शितशूलधरस्य मे । नर्दतस्तीक्ष्णदंष्ट्रस्य बिभीयाच्च पुरन्दरः ॥ ४४ ॥ अथवा त्यक्तशस्त्रस्य मृद्नतस्तरसा रिपून् । न मे प्रतिमुखे स्थातुं कश्चिच्छक्तो जिजीविषुः ॥ ४५ ॥ नैव शक्त्या न गदया नासिना निशितैः शरैः । हस्ताभ्यामेव संरब्धो हनिष्याम्यपि वज्रिणम् ॥ ४६ ॥ यदि मे मुष्टिवेगं स राघवोऽद्य सहिष्यते । ततः पास्यन्ति बाणौघा रुधिरं राघवस्य तु ॥ ४७ ॥ चिन्तया बाध्यसे राजन् किमर्थं मयि तिष्ठति । सोऽहं शत्रुविनाशाय तव निर्यातुमुद्यतः ॥ ४८ ॥ मुञ्च रामाद्भयं राजन् हनिष्यामीह संयुगे । राघवं लक्ष्मणं चैव सुग्रीवं च महाबलम् । हनुमन्तं च रक्षोघ्नं लङ्का येन प्रदीपिता ॥ ४९ ॥ हरींश्चापि हनिष्यामि संयुगे समवस्थितान् । असाधारणमिच्छामि तव दातुं महद्यशः ॥ ५० ॥ यदि चेन्द्राद्भयं राजन् यदि वापि स्वयम्भुवः ॥ ५१ ॥ अपि देवाः शयिष्यन्ते क्रुद्धे मयि महीतले । यमं च शमयिष्यामि भक्षयिष्यामि पावकम् । आदित्यं पातयिष्यामि सनक्षत्रं महीतले ॥ ५२ ॥ शतक्रतुं वधिष्यामि पास्यामि वरुणालयम् । पर्वतांश्चूर्णयिष्यामि दारयिष्यामि मेदिनीम् ॥ ५३ ॥ दीर्घकालं प्रसुप्तस्य कुम्भकर्णस्य विक्रमम् । अद्य पश्यन्तु भूतानि भक्ष्यमाणानि सर्वशः ॥५४॥

अस्मीति शेषः ॥ ४८ ॥ मुञ्चेत्यादिसार्धश्लोकद्वयमेकान्वयम् । अर्थान्तरम्–रामात् भयम्, अस्तीति शेषः । हनिष्यामीत्येतन्मुञ्चेति । दातुं खण्डितु-मित्यर्थान्तरम् ॥ ४९ ॥ ५० ॥ यदि चेत्यर्धम् । इन्द्रात् स्वयम्भुवश्च भयं यद्यस्ति तदपि मोचयिष्यामीत्युपस्कार्यम् ॥ ५१–५४ ॥

यदीति । स राघवो यदि मे मुष्टिवेगं सहिष्यति ततः राघवस्य बाणौघाः मे रुधिरं पास्यन्तीति । राघवो मे मुष्टिवेगं न सहिष्यत इति भावः ॥ ४७–५० ॥ यदि चेन्द्रादिति । इन्द्रात्स्वयम्भुवश्च भयं यद्यस्ति, तदपि मोचयिष्यामीति शेषः ॥ ५१–५५ ॥

For Private And Personal Use Only

नन्विति । त्रिदिवं त्रिलोकी । आहारस्य न पूर्यते आहाराय न पूर्यते, न पर्याप्तमित्यर्थः ॥ ५५ ॥ वधेनेति । सुखार्हम् उत्तरोत्तरसुखावहम् । ते वधेन

नन्विदं त्रिदिवं सर्वमाहारस्य न पूर्यते ॥ ५५ ॥ वधेन ते दाशरथेः सुखार्हं सुखं समाहर्तुमहं व्रजामि । निहत्य रामं सह लक्ष्मणेन खादामि सर्वान् हरियूथमुख्यान् ॥ ५६ ॥ रमस्व कामं पिब चाग्र्यवारुणीं कुरुष्व कृत्यानि विनीयतां ज्वरः । मयाऽद्य रामे गमिते यमक्षयं चिराय सीता वशगा भविष्यति ॥ ५७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रिषष्टितमः सर्गः ॥ ६३ ॥

दाशरथेः सुखावहमित्यर्थान्तरम् ॥ ५६ ॥ रमस्वेति । मया निमित्तेन रमस्वेत्यादौ काकुः । इयम् अक्षयमिति च्छेदः । रामे विषये गमिता इयं सीता

अद्य पश्य महाबाहो मया समरमूर्द्धनि-इत्यारभ्य श्रीराममुद्दिश्य कुम्भकर्णोक्तपरुषवाक्यानां मातीतिकार्थः स्पष्टः । वस्तुतस्तु-यद्यपि कुम्भकर्णो रावणप्रीतयेऽपिवा श्रीरामनिष्ठुरभाषणे प्रीतयेऽपिवा प्रवृत्तः, तथापि कुम्भकर्णवाणी प्रकारान्तरेण निस्सरति-अद्य पश्य महाबाहो मया इत्यादिना । 'शत्रूणां कदनं पश्य क्रियमाणं मया' इत्युक्तं त्वया। तदयुक्तं किन्तु सीतादुःखसंपादकरामहननेनास्मदादीन् विशोकान् कुर्विति रावणशङ्कायां तन्न शक्यमिति व्यङ्ग्योक्त्या परिहरति-अद्य पश्येति सार्ध श्लोकचतुष्टयेन । व्यङ्ग्योक्त्यर्थमेषु श्लोकेषु विद्यमानक्रियापदानां वीप्साऽनुसन्धेया। तदित्थं योजना-रामे हते सति द्रवन्तीं हरिवाहिनीम् अद्य पश्य पश्य। रणादानीतं रामस्य शिरो दृष्ट्वा त्वं सुखी भव सुखी भव । सीता दुःखिता भवतु भवतु । शत्रुपक्षे हते सति ते शोको न भविष्यति न भविष्यति। लङ्कायां ये हतबान्धवा राक्षसाः ते रामनिधनं पश्यन्तु पश्यन्तु । शोकपरीतानाम् आस्रप्रमार्जनं करोमि करोमि । अतः हे भ्रातः रावण! एतत्सर्वं न सङ्गतमिति भावः । किञ्चायं दुष्टराक्षससमागमः त्वद्वधाय भविष्यतीत्याशयेनाह-कथमिति । कथं कथञ्चिदित्यर्थः । मया रक्षितोऽपि त्वं दाशरथिं जिघांसुभिः राक्षसैः वध्यस एवेति सम्बन्धः ॥ मम रामेण सह योद्धुं सामर्थ्यं नास्तीत्याशयेनाह-यदि मे मुष्टिवेगमिति। यदिशब्दो नूनमित्यर्थे । राघवो मे मुष्टिवेगं नूनं सहिष्यति ततो राघवस्य बाणौघाः मम रुधिरं पास्यन्तीत्यन्वयः । चिन्तयेति । उपरितनश्लोकस्था मुञ्चेति क्रिया आकृष्यात्र श्लोके योजनीया । हे राजन्! किमर्थं चिन्तया बाध्यसे ? तव शत्रुविनाशायाहमुद्यतोऽतो मुञ्च, चिन्तामिति शेषः ॥ तर्हि रामं संहरेत्याशङ्क्य तदशक्यमिति परिहरति-मुञ्च रामादिति । रामाद्भयम्, अस्तीति शेषः । अतो रामं लक्ष्मणं च, विनेति शेषः । सुग्रीवं हनुमन्तं हनिष्यामीति सम्बन्धः ॥ पूर्वोक्तमेतत्सर्वं करिष्यामि किन्तु तव तत्त्वं वदामीत्याह-वधेनेति । अत्र वधे इति सप्तमी। दाशरथेः रामस्य वधे सति तव सुखं न, किन्तु अहं सुखार्हं समाहर्तुं व्रजामि । तत्किमत आह-निहत्येति । लक्ष्मणेन सह वर्तमानं रामं, विनेति शेषः । हरियूथमुख्यान्निहत्य सर्वान् खादामीति सम्बन्धः । रामहननस्याशक्यत्वात् हरियूथमुख्यसंहारजनितसुखं तव सम्पादयिष्यामीति भावः ॥ ५६ ॥ ततः किमत आह-रमस्वेति । रामे गमितेयमक्षय

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिराय वशगा भविष्यतीत्यर्थान्तरम्॥५७॥ इति श्रीगोविन्दराज० श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिषष्टितमः सर्गः ॥६३॥
अथ मन्त्रिकृतानयमसहमानो महोदरः कुम्भकर्णं निर्भर्त्सयति–तदुक्तमित्यादिना। उक्तं सूचनं विना कण्ठरवेण दर्शितम्। अतिकायस्य महाशरीरस्य। प्रतिवचनानर्हत्वद्योतनाय विशेषणानि ॥ १ ॥ मन्त्रिभिः सहाविचार्यैव रावणेनाकार्यं कृतमिति, अहमसहाय एव रामादिभिर्योत्स्यामीति च यदुक्तं

तदुक्तमतिकायस्य बलिनो बाहुशालिनः । कुम्भकर्णस्य वचनं श्रुत्वोवाच महोदरः ॥ १ ॥
कुम्भकर्ण कुले जातो धृष्टः प्राकृतदर्शनः । अवलिप्तो न शक्नोषि कृत्यं सर्वत्र वेदितुम् ॥ २ ॥
न हि राजा न जानीते कुम्भकर्ण नयानयौ । त्वं तु कैशोरकाद्धृष्टः केवलं वक्तुमिच्छसि ॥ ३ ॥
स्थानं वृद्धिं च हानिं च देशकालविभागवित् । आत्मनश्च परेषां च बुध्यते राक्षसर्षभः ॥ ४ ॥

कुम्भकर्णेन तदुभयं दूषयितुमाह–कुम्भकर्णेत्यादिना। कुले जातोऽपि प्राकृतदर्शनः क्षुद्रबुद्धिः। केवलं धृष्टः, न तु शास्त्रज्ञ इत्यर्थः। अवलिप्तः गर्वितः। त्वं सर्वत्र कार्ये। कृत्यं मन्त्ररूपम्। तद्वेदितुं न शक्नोषि ॥ २ ॥ 'केवलं वीर्यदर्पेण नानुबन्धो विचारितः' 'न स वेद नयानयौ' इत्यादिना रावणोद्देशेन कुम्भकर्णोक्तं दूषयति–न हीत्यादिना। राजा नयानयौ न जानीत इति न, जानीत एवेत्यर्थः। किशोरः बालः तस्य भावः कैशोरकं तस्मात् बाल्यात्। केवलं धृष्टः, न तु शास्त्रज्ञानेनेति भावः ॥ ३ ॥ स्थानमिति। देशकालविभागवित् विविक्तादिमन्त्रोचिततद्भिन्नयोः देशयोः तथा मन्त्रोचितानुचितयोश्च कालयोर्विभागं वेत्तीति तथोक्तः। राक्षसर्षभः रावणः। आत्मनः शत्रूणां च वृद्धिं हानिं स्थानं समतां च बुध्यते। रावणो देशकाल

मित्यत्र गमिते अयम् अक्षयम् इति छेदः। मया रामे अक्षयं यथा तथा चिराय सीतावशं गमिते सति अयं रामः अद्य आगमिष्यति, बन्धुभूतस्सन् अस्मद्गृहं प्रतीति शेषः। अतः ज्वरो विनीयताम्। त्वं कामं रमस्व। वारुणीं पिबेति सम्बन्धः ॥ ५७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रिषष्टितमः सर्गः ॥ ६३ ॥ तदिति। अतिकायस्येति कुम्भकर्णविशेषणम् ॥ १ ॥ मन्त्रिभिस्सहाविचार्यैव रावणेनाकार्यं कृतमिति, असहाय एव रामादिभिर्योत्स्यामीति च कुम्भकर्णेन यदुक्तं तदुभयं दूषयितुमाह–कुम्भकर्णेति। हे कुम्भकर्ण! कुले जातः राजकुले जातोऽपि प्राकृतदर्शनो धृष्टः। कुतः? सर्वत्र सर्वदा अवलिप्तः सन् कृत्यं कर्तव्यं वेदितुं न शक्नोषीति सम्बन्धः ॥ २ ॥ 'न स वेद नयानयौ' इत्यादिना रावणोद्देशेन कुम्भकर्णोक्तं दूषयति–नहीत्यादिश्लोकद्वयेन। हिशब्दः काक्वर्थः। राजा नयानयौ न जानीते हि न विजानीते किम्? विजानीत एवेत्यर्थः। कैशोरकात् बालभावात् ॥ ३॥४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विभागाद्यनभिज्ञ इति त्वयोक्तं न युक्तमिति भावः ॥ ४ ॥ लोके कापुरुषेणापि यत् कर्तुमनर्हं तादृशं कर्म विवेकी रावणः कथं कुर्यादित्यभिप्रेत्याह—यत्त्विति । बलवता केवलशौर्यावलम्बिना प्राकृतबुद्धिना यत् कर्तुं शक्यं तादृशं कर्म बुधः कः कुर्यात् ? न कोऽपि कुर्यात्, किमुत रावण इति भावः ॥ ५ ॥ धर्माधर्मयोर्हिताहितसाधनत्वं निश्चित्य "शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः" इत्यादिना सीताहरणरूपात् पापात्तवायमनर्थः

यत्तु शक्यं बलवता कर्तुं प्राकृतबुद्धिना । अनुपासितवृद्धेन कः कुर्यात्तादृशं बुधः ॥ ५ ॥
यांस्तु धर्मार्थकामांस्त्वं ब्रवीषि पृथगाश्रयान् । अनुबोद्धुं स्वभावे तान्नहि लक्षणमस्ति ते ॥ ६ ॥

प्राप्त इति यदुक्तं कुम्भकर्णेन तदपि धर्माधर्मयोर्हिताहितफलनियमाभावान्न सङ्गच्छत इति प्रतिपादयितुमाह—यांस्त्वित्यादिना । पृथगाश्रयान् पृथक्कारणान् भिन्नफलान् । धर्मार्थकामान् ब्रवीषि । तान् स्वभावे अनुबोद्धुं स्वरूपतो ज्ञातुम् । लक्षणं लक्ष्यतेऽनेनेति लक्षणं प्रमाणम् । तव नास्तीत्यर्थः । सुखफलदयागादिधर्मानुष्ठानदशायां तात्कालिकशरीरायासजनितदुःखदर्शनात् दुःखजनकपरद्रव्यापहरणाद्यधर्माचरणसमये तात्कालिकसुखदर्शनाच्च अर्थकामयोरप्येवं दर्शनाच्च कर्मणामनियतफलकत्वान्नियतफलकत्वे न किंचित् प्रमाणमुपलभ्यत इत्यर्थः ॥ ६ ॥

लोके कापुरुषेणापि यत्कर्तुमनर्हं तादृशं कर्म विवेकी रावणः कथं कुर्यादित्यभिप्रेत्याह—यत्त्वशक्यमिति । बलवता केवलशौर्यावलम्बिना अनुपासितवृद्धेन प्राकृतबुद्धिनाऽपि यत्कर्तुमशक्यम्, अनर्हमित्यर्थः । तादृशं कर्म को वा बुधः बुद्धिमान् कुर्यात्, न कोऽपीत्यर्थः । किमुत रावण इति भावः । यत्तु शक्यमिति पाठे—बलवता बलमात्रमवलम्ब्य स्थितेन पुरुषेण यत्कर्तुं शक्यं योग्यं तादृशं को वा बुधः कुर्यात् ॥ ५ ॥ धर्माधर्मयोर्हिताहितसाधनत्वं निश्चित्य "शीघ्रं खल्वभ्युपेतं त्वां फलं पापस्य कर्मणः" इत्यादिना सीताहरणरूपात्पापात्तवायमनर्थः प्राप्त इति यदुक्तं कुम्भकर्णेन तद्धर्माधर्मयोर्हिताहितरूपफलनियमाभावान्न सङ्गच्छत इति प्रतिपादयितुमाह—यांस्त्वित्यादिना । यान् धर्मार्थकामान् । पृथगाश्रयान् पृथग्भूतफलाश्रयान्, व्यवस्थितफलानिति यावत् । ब्रवीषि तान् स्वभावेन अनुबोद्धुं स्वरूपतो ज्ञातुम् । लक्षणं लक्ष्यतेऽनेनेति लक्षणं कारणं प्रमाणं वा नास्तीति योजना । स्वभावेन नहि लक्षणमिति पाठः ॥ ६ ॥

स०—बलवता बलवानहमित्यभिमानवता । प्राकृतबुद्धिनाऽपि यत्कर्तुमशक्यम् अयोग्यम् । हे अनुपासितवृद्ध कुम्भकर्ण ! इनकः इन एवेनकः अस्मत्स्वामी । बुधः ज्ञानी तादृशं प्राकृतबुद्धिभिरनुष्ठीयमानं स्वयोग्यं कुर्यात् । शक्यमिति पाठे—तादृशेनापि कर्तुं शक्यं बुधः कस्तादृशं कुर्यादित्यर्थः । अनुपासितवृद्धश्चासावविनश्च तत्सम्बुद्धिः । स्वाम्यनुजत्वाभावे कोपेन स्वध्वंससाध्यतया तमभिमुखीकर्तुमेवमुक्तिः । अनुपासितवृद्धेन अत एव प्राकृतबुद्धिनेति तीर्थो नागोजिभट्टश्च ॥ ५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेव प्रदर्शयति–कर्म चेत्यादिना । सर्वेषां कारणानां स्वर्गनरकरूपाणां फलानां कर्मैव प्रयोजकं साधकम् । जात्येकवचनम् । किन्तु अत्र कर्मजाते पापीयसानपि कर्मणां श्रेयः फलं भवति ॥ ७ ॥ उक्तमेवार्थं विशदयति–निश्श्रेयसेति । धर्मार्थौ धर्मार्थसाधनभूते कर्मणी । इतरौ अधर्मानर्थसाधन भूते कर्मणी च । निश्श्रेयसफलौ एतानि चतुर्विधानि निश्श्रेयसकराण्येव । किन्तु कदाचिदधर्मानर्थयोः प्रत्यवायिकम्, अश्रेय इति यावत् । प्रत्यवायो ऽस्मिन् कारणतयाऽस्तीति प्रत्यवायिकम् । "अत इनिठनौ" इति ठन् । प्राप्यत इति प्राप्तिः फलम् । कर्मणि क्तिन् प्रत्ययः । एतेनाधर्मानर्थयोः

कर्म चैव हि सर्वेषां कारणानां प्रयोजकम् । श्रेयः पापीयसां चात्र फलं भवति कर्मणाम् ॥ ७ ॥
निश्श्रेयसफलावेव धर्मार्थावितरावपि । अधर्मानर्थयोः प्राप्तिः फलं च प्रत्यवायिकम् ॥ ८ ॥
ऐहलौकिकपारत्रं कर्म पुम्भिर्निषेव्यते । कर्माण्यपि तु कल्याणि लभते काममास्थितः ॥ ९ ॥

श्रेयस्तदितरञ्चोभयं फलं भवतीत्युक्तम् ॥ ८ ॥ एवं धर्माधर्मयोरव्यवस्थितफलत्वमुक्त्वा कामस्यापि तदाह–ऐहलौकिकेति । ऐहलौकिकम् इहलोको पयोगि । पारत्रं परलोकोपयोगि च कर्म पुम्भिर्निषेव्यते । तत्फलं चानुभूयते । तथैव काममास्थितः यथेच्छाचारोऽपि कल्याणि कर्माणि कल्याणानि

सुखफलकथागानुष्ठानादिधर्मानुष्ठानदशायां तात्कालिकशरीरायासदर्शनात् दुःखजनकपरद्रव्यापहरणाद्यधर्माचरणसमये तात्कालिकसुखदर्शनाच्च अर्थकामयो रप्येवं दर्शनाच्च कर्मणामनियतफलत्वं मन्वानस्तदेव प्रदर्शयति–कर्म चैव हीति । सर्वेषां कारणानामुद्देश्यत्वेन कारणानां सुखानामित्यर्थः । कर्म पुण्यकर्म, प्रयोजकम् साधकमिति यावत् । कर्मेति जातावेकवचनम् । अत्रास्मिन् पुण्यकर्मणि फलं भवति, अश्रेयोऽपीति शेषः । पापीयसां कर्मणां श्रेयश्च सुखं फलं भवतीति योजना ॥ ७ ॥ असुमेवार्थं विशदयति–निश्श्रेयसफलाविति । धर्मार्थौ धर्मार्थसाधनभूते कर्मणी इतरावपि अधर्मानर्थभूते ते कर्मणी च निश्श्रेयस फलावेव एतानि चतुर्विधान्यपि कर्माणि निश्श्रेयसकराण्येवेत्यर्थः । किन्तु कदाचिदधर्मानर्थयोः प्रत्यवायिकं प्रत्यवायोऽस्य कारणतया विद्यत इति प्रत्यवायिकं दुःखफलं च सुखं च प्राप्तिः प्राप्यत इति प्राप्तिः । कर्मणि क्तिन् । प्राप्यं भवतीत्यर्थः । एतेनाधर्मानर्थयोः श्रेयः तदितरच्च उभयमपि फलं भवतीत्युक्तं भवति ॥ ८ ॥ धर्मार्थयोरव्यवस्थितफलत्वमुक्त्वा कामस्याप्याह–ऐहलौकिकेति । ऐहलौकिकपारत्रं कर्म ऐहलौकिकम् इहलोकोपयोगि कर्म, पारत्रं परलोकोपयोगि कर्म । धर्मार्थकामरूपं पुम्भिर्निषेव्यते तत्फलं चानुभूयते, किन्तु तथैव काममास्थितोऽपि यथेच्छाचारोऽपि कल्याणि कल्याणानि कर्माणि कर्मफलानि लभते अतो विहितमेव शुभप्रदम्, निषिद्धं तु न भवतीति नियमो नास्तीत्यर्थः ॥ ९ ॥

For Private And Personal Use Only

कर्मफलानि लभते । अतो विहितमेव शुभप्रदम्, निषिद्धं तु तथा न भवतीति नियमो नास्तीत्यर्थः ॥ ९ ॥ धर्मादीनां फलनियमो नास्ति, सर्वं सर्वस्य फलमित्यस्मिन् पक्षे स्थित्वा रावणेन सीताहरणं कृतमस्माभिश्चानुमतमित्याह–तत्र क्लृप्तमिति । तत्र राज्ञा कामसेव्यापि सुखानि लभत इति मते स्थितेन राज्ञा । इदं कार्यं सीताहरणरूपं कार्यम् । हृदि क्लृप्तं हृदि चिन्तितम् । नः अस्माकमपि । मतं संमतम् । शत्रौ शत्रुविषये यत् साहसं स्यात् । अत्र अस्मिन् साहसकर्मणि किमिवापनीयते, न किञ्चित् क्रियते इत्यर्थः ॥ १० ॥ एवं रावणस्याविमृश्यकारित्वपक्षं प्रतिक्षिप्य कुम्भकर्णस्यैकस्यैव

तत्र क्लृप्तमिदं राज्ञा हृदि कार्यं मतं च नः । शत्रौ हि साहसं यत् स्यात् किमिवात्रापनीयताम् ॥ १० ॥
एकस्यैवाभियाने तु हेतुर्यः प्रकृतस्त्वया । तत्राप्यनुपपन्नं ते वक्ष्यामि यदसाधु च ॥ ११ ॥
येन पूर्वं जनस्थाने बहवोऽतिबला हताः । राक्षसा राघवं तं त्वं कथमेको जयिष्यसि ॥ १२ ॥
ये पुरा निर्जितास्तेन जनस्थाने महौजसः । राक्षसांस्तान् पुरे सर्वान् भीतानद्यापि पश्यसि ॥ १३ ॥
तं सिंहमिव संक्रुद्धं रामं दशरथात्मजम् । सर्पं सुप्तमिवाबुध्य प्रबोधयितुमिच्छसि ॥ १४ ॥

अभियानपक्षं निरस्यति–एकस्येत्यादिना । एकस्यासहायस्य । अभियाने युद्धाय निर्गमे । यो हेतुः बलपराक्रमरूपः । त्वया प्रकृतः प्रस्तावितः । तत्रापीत्यपिशब्देन पूर्वं निराकृतः पक्षः समुच्चीयते । यदनुपपन्नम् अयुक्तम् । असाधु अहितं च । तद्वक्ष्यामि ॥ ११ ॥ अनुपपत्तिमुपपादयति–येनेति । ॥ १२ ॥ असाधुत्वं दर्शयति–ये पुरेति । तान् तज्जातीयानित्यर्थः ॥ १३ ॥ तमिति । संक्रुद्धं सिंहमिव संक्रुद्धसिंहसदृशम् । तमबुध्य अबुद्ध्वा । सुप्तं

धर्मादीनां फलनियमो नास्तीति सर्वं सर्वस्य फलमित्यस्मिन् पक्षे स्थित्वा रावणेन कृतं सीतापहरणं राज्ञा हृदि क्लृप्तं कर्तव्यतया निश्चितम् । नः अस्माकमपि मतम् अनुमतम् । शत्रौ शत्रुविषये यत्साहसं कृतं स्यात् तत् किमिव किमिति । अत्र साहसे । अपनीयतां पृथक्कृत्य प्रदर्श्यताम् । अस्मिन् पक्षे रावणेन अविचार्यकृतं किमपि दर्शयितुं न शक्यत इत्यर्थः ॥ १० ॥ एवं रावणस्याविमृश्यकारितापक्षं प्रतिक्षिप्य कुम्भकर्णस्यैकस्याभियानपक्षं निरस्यति–एकस्येति । एकस्यैवाभियाने यो हेतुः पराक्रमरूपः कथितः उक्तः तत्र यदनुपपन्नम् अयुक्तं यच्चासाधु अहितं तदुभयमपि ते वक्ष्यामीत्यर्थः ॥ ११–१३ ॥ तमिति । तं रामं सिंहमिव सिंहसदृशम् । अबुध्य अबुद्ध्वा । सुप्तं सर्पमिव प्रबोधयितुमिच्छसीत्यन्वयः ॥ १४ ॥ १५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्पमिव प्रबोधयितुमिच्छसीत्यन्वयः ॥ १४ ॥ ज्वलन्तमिति । असह्यं सोढुमशक्यम् । अपरिहार्यपराक्रममित्यर्थः । आसादयितुमासादितुम् ॥ १५ ॥ संशयस्थमिति । यत्र शत्रोः प्रतिसमासने प्रतिमुखस्थितौ इदं सर्वं बलं संशयस्थं भवति । तत्र एकस्य तव गमनं न रोचते ॥ १६ ॥ हीनार्थ इति । हीनार्थः हीयमानबलः । कः पुमान् जीवितत्यागे विषये । निश्चित्य निश्चयं कृत्वा । सुसमृद्धार्थं वर्धमानबलं रिपुम्, प्राकृतं यथा क्षुद्रपुरुषमिव । वश

ज्वलन्तं तेजसा नित्यं क्रोधेन च दुरासदम् । कस्तं मृत्युमिवासह्यमासादयितुमर्हति ॥ १५ ॥ संशयस्थमिदं सर्वं शत्रोः प्रतिसमासने । एकस्य गमनं तत्र नहि मे रोचते भृशम् ॥ १६ ॥ हीनार्थः सुसमृद्धार्थं को रिपुं प्राकृतं यथा । निश्चित्य जीवितत्यागे वशमानेतुमिच्छति ॥ १७॥ यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम । कथमाशंससे योद्धुं तुल्येनेन्द्रविवस्वतोः ॥ १८ ॥ एवमुक्त्वा तु संरब्धः कुम्भकर्णं महोदरः । उवाच रक्षसां मध्ये रावणं लोकरावणम् ॥ १९ ॥ लब्ध्वा पुनस्त्वं वैदेहीं किमर्थं सम्प्रजल्पसि । यदीच्छसि तदा सीता वशगा ते भविष्यति ॥ २० ॥ दृष्टः कश्चिदुपायो मे सीतोपस्थानकारकः । रुचिरश्चेत् स्वया बुद्ध्या राक्षसेश्वर तं शृणु ॥ २१ ॥ अहं द्विजिह्वः संह्लादी कुम्भकर्णो वितर्दनः । पञ्च रामवधायैते निर्यान्तीत्यवघोषय ॥ २२ ॥ ततो गत्वा वयं युद्धं दास्यामस्तस्य यत्नतः । जेष्यामो यदि ते शत्रून्नोपायैः कृत्यमस्ति नः ॥ २३ ॥

मानेतुमिच्छतीत्यन्वयः । जीवितत्यागे निश्चयोऽस्ति चेत्तं प्रति युद्धाय याहीत्यर्थः ॥ १७ ॥ यस्येति । यस्य मनुष्येषु सदृशो नास्ति । किन्तु देवयोः इन्द्रविवस्वतोः इन्द्रसूर्ययोस्तुल्येन, तेन रामेणेति शेषः । योद्धुं कथमाशंससे ? वक्तुमेव न शक्यम्, किमुत कर्तुमिति शेषः ॥ १८ ॥ १९ ॥ लब्ध्वे त्यादिश्लोकद्वयमेकान्वयम् । सम्प्रजल्पसि बहुविधं भाषसे, अद्येति शेषः । यदीच्छसि, वक्ष्यमाणोपायमिति शेषः । तदा तदैव । मे मया । उपस्थानं स्वयमेव समीपागमनम् । रुचिरः प्रियः । स्वया बुद्ध्या शृणु, न तु परबुद्धिमनुसरेत्यर्थः ॥ २०–२२ ॥ तत इति । उपायैः सीताहरणोपायैः । ॥२००॥

संशयस्थमिति । शत्रोः प्रतिसमासने शत्रोः प्रतिमुखस्थितौ सत्याम् इदं सर्वं संशयस्थम् अतः तत्र शत्रुसमीपे एकस्य गमनं मे न रोचत इति सम्बन्धः ॥ १६–२२ ॥ तत इति । उपायैः सीतावशीकरणोपायैः । कृत्यं साध्यं नास्ति ॥ २३ ॥

For Private And Personal Use Only

कृत्यं साध्यं नास्ति, सिद्धे साधनायोगादिति भावः ॥ २३ ॥ अथेति । अथ जीवति यदि जीवतीत्यर्थः । ततः तदा समीक्षितमालोचितं यत् तत् अभिपत्स्यामः, करिष्याम इति यावत् ॥ २४ ॥ तत् किमित्यत्राह–वयमित्यादि । वयं बाणैः स्वतनुं विदार्य रामेण विदारितां कारयित्वा । रुधिरेण समुक्षिताः रामनामाङ्कितैः शरैः सह युद्धादिहैष्याम इति योजना । इदं च रामयुद्धं कृतमिति सीतासमाश्वासाय ॥ २५ ॥ भक्षित इति ।

अथ जीवति नः शत्रुर्वयं च कृतसंयुगाः । ततस्तदभिपत्स्यामो मनसा यत् समीक्षितम् ॥ २४ ॥ वयं युद्धादिहैष्यामो रुधिरेण समुक्षिताः । विदार्य स्वतनुं बाणै रामनामाङ्कितैः शितैः ॥ २५ ॥ भक्षितो राघवोऽस्माभिर्लक्ष्मणश्चेति वादिनः । तव पादौ ग्रहीष्यामस्त्वं नः कामं प्रपूरय ॥ २६ ॥ ततोऽवघोषय पुरे गजस्कन्धेन पार्थिव । हतो रामः सह भ्रात्रा ससैन्य इति सर्वतः ॥ २७॥ प्रीतो नाम ततो भूत्वा भृत्यानां त्वमरिन्दम । भोगांश्च परिवारांश्च कामांश्च वसु दापय ॥२८॥ ततो माल्यानि वासांसि वीराणामनुलेपनम् । पेयं च बहु योधेभ्यः स्वयं च मुदितः पिब ॥ २९ ॥ ततोऽस्मिन् बहुलीभूते कौलीने सर्वतो गते । भक्षितः ससुहृद्रामो राक्षसैरिति विश्रुते ॥ ३० ॥ प्रविश्याश्वास्य चापि त्वं सीतां रहसि सान्त्वय । धनधान्यैश्च कामैश्च रत्नैश्चैनां प्रलोभय ॥ ३१ ॥

ततः आगमनानन्तरम् । रामो लक्ष्मणश्च रिपुः निश्शेषं भक्षित इति तव पादौ ग्रहीष्यामः । त्वं सन्तोषातिशयव्यञ्जनार्थं नः कामं प्रपूरय अभीष्टं पारितोषिकं देहीत्यर्थः ॥ २६ ॥ तत इति । गजस्कन्धेन गजस्कन्धगतपुरुषेण ॥ २७ ॥ प्रीत इति । नामेत्यलीके । परिवारान् दासदासीः गजाश्वादीन् परिच्छदान् वा । "स्याज्जङ्गमे परीवारः" इत्यमरः । कामान् काम्यमानानभीष्टान् । वसु सुवर्णम् ॥ २८ ॥ २९ ॥ तत इत्यादिश्लोकद्वयम् । कौलीने लोकवादे । "स्यात्कौलीनं लोकवादे" इत्यमरः । कौलीनमेव विशदयति–भक्षित इति । प्रविश्य समीपं गत्वेत्यर्थः । आश्वास्य रामात्ययजं

मनसा समीक्षितम्, उपायजातमिति शेषः । अभिपत्स्यामः प्राप्स्याम इति सम्बन्धः ॥ २४ ॥ तत्किमित्यपेक्षायामाह–वयमिति । वयं बाणैः स्वतनुं विदार्य रामेण विदारितां कारयित्वा रुधिरेण समुक्षिताः रामनामाङ्कितैः शरैस्सह युद्धादिहैष्याम इति योजना ॥ २५ ॥ २६ ॥ गजस्कन्धेन गजस्कन्धस्थितेन पुरुषेणे त्यर्थः ॥ २७ ॥ प्रीतो नाम नामेत्यपरमार्थे । परिवारान् दासदासीः गजाश्वादीन् परिच्छदान् वा ॥ २८ ॥ २९ ॥ कौलीने लोकवादे । "स्यात्कौलीनं लोकवादे"

शोकं निवार्य । सान्त्वय मयि प्रीतिं कुर्वित्येवं सान्त्ववादं कथयेत्यर्थः । धनैः सुवर्णैः ॥२०॥२१॥ अनयेति । उपधया कपटोपायेन । भयशोकानुबन्धया सम्पादितसीताभयशोकेनेत्यर्थः । अकामा पूर्वं त्वदनभिलाषिणी ॥ ३२ ॥ रञ्जनीयमिति । स्त्रीलघुत्वात् स्त्रीचापलात् ॥ ३३ ॥ सेति । त्वय्यधीनं त्वयि विषये अधीनं परतन्त्रम् । उपगमिष्यति, त्वामिति शेषः ॥३४॥ उक्तमर्थं निगमयति-एतदिति । एतत् मम दर्शनेन बुद्ध्या । सुनीतं निर्णीतम् ।

अनयोपधया राजन् भयशोकानुबन्धया । अकामा त्वद्वशं सीता नष्टनाथा गमिष्यति ॥ ३२ ॥ रञ्जनीयं हि भर्तारं विनष्टमवगम्य सा । नैराश्यात् स्त्रीलघुत्वाच्च त्वद्वशं प्रतिपत्स्यते ॥३३॥ सा पुरा सुखसंवृद्धा सुखार्हा दुःख कर्शिता । त्वय्यधीनं सुखं ज्ञात्वा सर्वथोपगमिष्यति ॥ ३४ ॥ एतत् सुनीतं मम दर्शनेन रामं हि दृष्ट्वैव भवेदनर्थः । इहैव ते सेत्स्यति मोत्सुको भूर्महानयुद्धेन सुखस्य लाभः ॥ ३५॥ अदृष्टसैन्यो ह्यनवाप्तसंशयो रिपूनयुद्धेन जयन् नराधिपः । यशश्च पुण्यं च महन्महीपते श्रियं च कीर्तिं च चिरं समश्नुते ॥३६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुष्षष्टितमः सर्गः ॥ ६४ ॥

रामं दृष्ट्वा स्थितस्य तव अनर्थो भवेत् । मोत्सुको भूः मा रणोत्सुको भूः । अयुद्धेन युद्धव्यतिरिक्तासनबलेन । प्रसज्य प्रतिषेधेऽपि समासस्येष्टत्वात् साधुः ॥ ३५ ॥ तदेवायुद्धं स्तौति-अदृष्टेति । अदृष्टसैन्यः अदृष्टशत्रुसैन्यः । अत एवानवाप्तसंशयः अप्राप्तप्राणसन्देहः । अयुद्धेन जयन् युद्धव्यति

इत्यमरः । सर्वतोगते सर्वव्याप्ते ॥२०॥२१॥ अनयोपधया अनेन कपटोपायेन । भयशोकानुबन्धया सम्पादितभयशोकयेत्यर्थः । अनयोपधयेत्यादिश्लोकत्रयस्य वास्तवार्थे महोदरवाणी प्रकारान्तरेण निस्सरति-अनयेति । नष्टनाथागमिष्यतीत्यत्र नष्ट न अथ आगमिष्यति इति छेदः । अथेत्यप्यर्थे । हे नष्ट रावण ! अकामा विष्णुकामा सीता । अनयोपधयाऽपि त्वद्वशं नागमिष्यतीत्यर्थः ॥३२॥ रञ्जनीयमिति । हीति किमित्यर्थे । काक्वर्थे । सा प्रसिद्धा परमपतिव्रता सीता भर्तारं विनष्टमव गम्यापि नैराश्यादपि स्त्रीलघुत्वात् स्त्रीचापल्यादपि त्वद्वशं प्रतिपत्स्यते हि ? न प्रतिपत्स्यत एवेति योजना ॥ ३३ ॥ सेति । पुरा सुखसंवृद्धाऽपि इदानीं दुःख कर्शिताऽपि सा परमपतिव्रता सीता त्वदधीनं सुखं ज्ञात्वा, दुरितावहमिति शेषः । सर्वथोपगमिष्यति, राममेवेति शेषः ॥ ३४ ॥ उक्तमर्थं निगमयति-एत दिति । मम दर्शनेन मम बुद्ध्या सुनीतं सुनिर्णीतम् । मोत्सुकः रणार्थमुत्सुको मा भूत्, भवानिति शेषः ॥ ३५ ॥ तदेवायुद्धं स्तौति-अदृष्टसैन्य इति । अन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रिक्तोपायेन जयन्नित्यर्थः । महत् पुण्यं पुण्यफलं सुखम् । श्रियं श्रीमत्प्रियालाभेन जनितां सम्पदम् । कीर्तिं प्रसादम् विस्तारं वा । " कीर्तिः प्रसादे यशसि कर्दमे विस्तृतावपि " इति रत्नमाला । महीपते इति संबोधनम् । सीतानुरागाभावेन नैराश्याद्रामः स्वयं विनश्यतीति महोदरहृदयम् ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुष्षष्टितमः सर्गः ॥ ६४ ॥

स तथोक्तस्तु निर्भर्त्स्य कुम्भकर्णो महोदरम् । अब्रवीद्राक्षसश्रेष्ठं भ्रातरं रावणं ततः ॥ १ ॥
सोऽहं तव भयं घोरं वधात्तस्य दुरात्मनः । रामस्याद्य प्रमार्जामि निर्वैरो हि सुखी भव ॥ २ ॥
गर्जन्ति न वृथा शूरा निर्जला इव तोयदाः । पश्य सम्पाद्यमानं तु गर्जितं युधि कर्मणा ॥ ३ ॥
न मर्षयति चात्मानं सम्भावयति नात्मना । अदर्शयित्वा शूरास्तु कर्म कुर्वन्ति दुष्करम् ॥ ४ ॥

अथ युद्धाय कुम्भकर्णनिर्याणं पञ्चषष्टितमे—स तथोक्तस्त्वित्यादि । निर्भर्त्स्य, गर्जन्तीत्यादिवक्ष्यमाणप्रकारेणेति शेषः ॥ १ ॥ सोऽहमिति । प्रमार्जामि निवर्तयिष्यामीत्यर्थः । वर्तमानसामीप्ये वर्तमानवत् प्रयोगः ॥ २ ॥ गर्जन्तीति । वृथा कर्मणा विना । मया तु कर्मणा सम्पाद्यमानं गर्जितं पश्य, गर्जितानुसारेण कर्म करोमीत्यर्थः ॥ ३ ॥ न मर्षयतीति । शूराः परकृतामवमानोक्तिं न मर्षयति न मर्षयन्ति, न सहन्ते । आत्मना स्वयम् आत्मानं न सम्भावयति न सम्भावयन्ति, न बहुमन्यन्ते । उभयत्रापि व्यत्ययेनैकवचनम् । किंतु अदर्शयित्वा अप्रकाश्य, आत्मपौरुषमनुक्त्वेत्यर्थः । दुष्करमपि

प्राप्तसंशयः अप्राप्तप्राणसन्देहः । अयुद्धेन रिपून् जयन् युद्धव्यतिरिक्तोपायेन रिपून् जयन्नित्यर्थः ॥ २६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुष्षष्टितमः सर्गः ॥ ६४ ॥ १ ॥ सोऽहमिति । प्रमार्जामि प्रमार्जयामि । सोऽहमित्यस्य वास्तवार्थस्तु—दुरात्मनः दुःखेष्वप्यात्मा बुद्धिरनुग्रहरूपा यस्य रामस्य अहं रामदासोऽहं यद्यपि तथापि तस्य प्रसिद्धस्य, महस्तनुखराक्षससमूहस्येत्यर्थः । वधात्तव घोरं भयम, उपस्थितमिति शेषः । तत प्रमार्जामि अपनयामि स त्वं निर्वैरस्सन् सुखी भवेति सम्बन्धः ॥ न मर्षयतीति । शूरा आत्मानं न मर्षयति, कुद्धमात्मानं पौरुषमकृत्वा न शमयन्तीत्यर्थः । आत्मना आत्मानं न सम्भावयति न श्लाघन्ते । उभयत्रैकवचनमार्षम् । किन्तु अदर्शयित्वा अप्रकाश्य प्रथममात्मपौरुषमनुक्त्वेत्यर्थः । कर्म कुर्वन्तीति सम्बन्धः ॥ २-४ ॥

For Private And Personal Use Only

कर्म कुर्वन्ति ॥४॥ विक्लवानामिति । अत्र पञ्चम्यर्थे षष्ठी । सादितमिति भावे निष्ठा । विक्लवेभ्यः कातरेभ्यः । अबुद्धिभ्यः पण्डितमानिभ्यः त्वद्विधेभ्यः शृण्वता राज्ञा । इदमीदृशम् । सादितं प्राप्तं भवति ॥ ५ ॥ इदंशब्दनिर्दिष्टं दर्शयति–युद्ध इति । युद्धे कापुरुषैः युद्धभीरुभिरित्यर्थः । राजानमनुगच्छद्भिः राजेच्छानुसारिभिरित्यर्थः । एतत् प्रकृतयुद्धपर्यवसायि सीताहरणकृत्यं सादितं संपादितम् ॥ ६ ॥ राजशेषेति । अत्राप्यनुगच्छद्भिः भवद्भिरित्यनु

विक्लवानामबुद्धीनां राज्ञा पण्डितमानिनाम् । शृण्वता सादितमिदं त्वद्विधानां महोदर ॥ ५ ॥ युद्धे कापुरुषैर्नित्यं भवद्भिः प्रियवादिभिः । राजानमनुगच्छद्भिः कृत्यमेतद्धि सादितम् ॥६॥ राजशेषा कृता लङ्का क्षीणः कोशो बलं हतम् । राजानमिममासाद्य सुहृच्चिह्नममित्रकम् ॥ ७ ॥ एष निर्याम्यहं युद्धमुद्यतः शत्रुनिर्जये । दुर्नयं भवतामद्य समीकर्तुमिहाहवे ॥ ८ ॥ एवमुक्तवतो वाक्यं कुम्भकर्णस्य धीमतः । प्रत्युवाच ततो वाक्यं प्रहसन् राक्षसाधिपः ॥९॥ महोदरोऽयं रामात्तु परित्रस्तो न संशयः । न हि रोचयते तात युद्धं युद्धविशारद ॥१०॥ कश्चिन्मे त्वत्समो नास्ति सौहृदेन बलेन च । गच्छ शत्रुवधाय त्वं कुम्भकर्ण जयाय च ॥ ११ ॥ तस्मात्तु भयनाशार्थं भवान् संबोधितो मया । अयं हि कालः सुहृदां राक्षसानामरिन्दम ॥ १२ ॥

षञ्जनीयम् । सुहृच्चिह्नं सुहृद्व्यपदेश्यम् । अमित्रकं भवतामामित्रभूतम् । इमं राजानमासाद्य अनुगच्छद्भिः भवद्भिः लङ्का राजशेषा कृता । अकार्यप्रवृत्तो राजा यैर्न निवार्यते स तेषाममित्र इत्यभिप्रायेण अमित्रकमित्युक्तम् ॥७॥ एष इति । दुर्नयं समीकर्तुम् । शत्रुनिर्जये, तद्विनाश इत्यर्थः । उद्यतः उद्युक्तः सन् । युद्धं युद्धभूमिं प्रति । एष निर्यामि अद्यैव निर्यास्यामीत्यर्थः ॥ ८–११ ॥ तस्मात् भवतो निस्समत्वात् । सम्बोधितः प्रबोधितः । अयं हि

विक्लवानामिति । अत्र वचः इत्यध्याहर्तव्यम् । विक्लवानामबुद्धीनां पण्डितमानिनां च त्वद्विधानां वचः शृण्वता राज्ञा यत्सादितमवसादनमस्ति तदिद मिति योजना ॥ ५ ॥ इदंशब्दनिर्दिष्टं किमित्याकाङ्क्षायामाह–युद्धे कापुरुषैरित्यादि श्लोकद्वयेन । कापुरुषैः युद्धभीरुभिरित्यर्थः । राजानमनुगच्छद्भिः राजे च्छानुसारिभिः । एतत्कृत्यं राजकार्यम् । सादितं विनाशितम् ॥ ६ ॥ सुहृच्चिह्नं सुहृद्व्यपदेशम् अमित्रकं भवतामामित्रभूतम् । इमं राजानमासाद्यानुगच्छद्भि र्भवद्भिः लङ्का राजशेषा कृता, कोशश्च क्षीणः, बलं च हतमिति सम्बन्धः ॥ ७–११ ॥ अयं हीति । सुहृदां राक्षसानाम् । अयं हि कालः, युद्धगमनायेति ॥२०२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कालः, युद्धायेति शेषः ॥ १२–१४ ॥ एवमिति । पुनर्जातमिव मेने । जेष्यत्ययमिति विश्वासादिति भावः ॥ १५ ॥ १६ ॥ इत्येवमित्यर्धम् । निर्जगाम निर्गन्तुमुद्युक्तः ॥ १७ ॥ राज्ञस्त्वित्यादि । सर्वकालायसम् बहुकार्ष्णायसमयमित्यर्थः । महाधाम महातेजः । स्वतश्चोद्गतपावकं क्रौर्यात् स्वत

तद्गच्छ शूलमादाय पाशहस्त इवान्तकः । वानरान् राजपुत्रौ च भक्षयादित्यतेजसौ ॥ १३ ॥ समालोक्य तु ते रूपं विद्रविष्यन्ति वानराः । रामलक्ष्मणयोश्चापि हृदये प्रस्फुटिष्यतः ॥ १४ ॥ एवमुक्त्वा महाराजः कुम्भकर्णं महाबलम् । पुनर्जातमिवात्मानं मेने राक्षसपुङ्गवः ॥ १५ ॥ कुम्भकर्णबलाभिज्ञो जानंस्तस्य पराक्रमम् । बभूव मुदितो राजा शशाङ्क इव निर्मलः ॥ १६ ॥ इत्येवमुक्तः संहृष्टो निर्जगाम महाबलः ॥ १७ ॥ राज्ञस्तु वचनं श्रुत्वा कुम्भकर्णः समुद्यतः । आददे निशितं शूलं वेगाच्छत्रुनिबर्हणम् ॥ १८ ॥ सर्वकालायसं दीप्तं तप्तकाञ्चनभूषणम् । इन्द्राशनिसमं भीमं वज्रप्रतिमगौरवम् ॥ १९ ॥ देवदानवगन्धर्वयक्षकिन्नरसूदनम् । रक्तमाल्यं महाधाम स्वतश्चोद्गतपावकम् ॥ २० ॥ आदाय निशितं शूलं शत्रुशोणितरञ्जितम् । कुम्भकर्णो महातेजा रावणं वाक्यमब्रवीत् ॥ २१ ॥ गमिष्याम्यहमेकाकी तिष्ठत्विह बलं मम । अद्य तान् क्षुभितान् क्रुद्धो भक्षयिष्यामि वानरान् । कुम्भकर्णवचः श्रुत्वा रावणो वाक्यमब्रवीत् ॥ २२ ॥ सैन्यैः परिवृतो गच्छ शूलमुद्गरपाणिभिः । वानरा हि महात्मानः शीघ्राः सुव्यवसायिनः ॥ २३ ॥ एकाकिनं प्रमत्तं वा नयेयुर्दशनैः क्षयम् । तस्मात् परमदुर्धर्षैः सैन्यैः परिवृतो व्रज । रक्षसामहितं सर्वं शत्रुपक्षं निषूदय ॥ २४ ॥

एवोत्पन्नाग्निकणम् ॥ १८–२२ ॥ सैन्यैरित्यादि । महात्मानः महाबुद्धयः । शीघ्राः वेगवन्तः । सुव्यवसायिनः दृढनिश्चयाः ॥ २३ ॥ २४ ॥

शेषः ॥ १२ ॥ वानरान् राजपुत्रौ च भक्षय । वस्तुतस्तु राजपुत्रौ, विनेति शेषः ॥ १३ ॥ समालोक्येत्यस्य वास्तवार्थस्तु–ते रूपं समालोक्य रामलक्ष्मणयोस्सम्बन्धिनो वानरा विद्रविष्यन्ति । प्रस्फुटिष्यतः, द्यावापृथिवी इति शेषः । अतो हृदये युद्धगमनाय मतिं कुर्वित्यर्थः ॥ १४ ॥ पुनर्जातमिव मेने, जेष्यत्ययमिति विश्वासादिति भावः ॥ १५–१८ ॥ सर्वेति । सर्वकालायसं सर्वकालायसनिर्मितस्वरूपम् ॥ १९ ॥ रक्तमाल्यमहाधाम रक्तमाल्यं च तत् महा

स्रजं काञ्चनमालाम् । कुम्भकर्णस्य आबबन्ध कुम्भकर्णे आबबन्धेत्यर्थः ॥२५॥ अङ्गुलीवेष्टान् अङ्गुलीयकानि ॥२६॥ आसञ्जयामास बबन्धेत्यर्थः । अत्र केयूरादीनामप्युपलक्षणम् । काञ्चनाङ्गदकेयूरेत्यनुवादात् ॥२७॥२८॥ श्रोणीसूत्रेणेति । अमृतोत्पादने नद्ध इति निमित्तसप्तमी । भुजङ्गेन वासु

अथासनात् समुत्पत्य स्रजं मणिकृतान्तराम् । आबबन्ध महातेजाः कुम्भकर्णस्य रावणः ॥२५॥ अङ्गदान्यङ्गुलीवेष्टान् वराण्याभरणानि च । हारं च शशिसङ्काशमाबबन्ध महात्मनः ॥ २६ ॥ दिव्यानि च सुगन्धीनि माल्यदामानि रावणः । श्रोत्रे चासञ्जयामास श्रीमती चास्य कुण्डले ॥ २७ ॥ काञ्चनाङ्गदकेयूरनिष्काभरणभूषितः । कुम्भकर्णो बृहत्कर्णः सुहुतोऽग्निरिवाबभौ ॥ २८ ॥ श्रोणीसूत्रेण महता मेचकेन व्यराजत । अमृतोत्पादने नद्धो भुजङ्गेनेव मन्दरः ॥ २९ ॥ स काञ्चनं भारसहं निवातं विद्युत्प्रभं दीप्तमिवात्मभासा । आबध्यमानः कवचं रराज सन्ध्याभ्रसंवीत इवाद्रिराजः ॥ ३० ॥ सर्वाभरणसर्वाङ्गः शूलपाणिः स राक्षसः । त्रिविक्रमकृतोत्साहो नारायण इवाबभौ ॥३१॥ भ्रातरं सम्परिष्वज्य कृत्वा चाभिप्रदक्षिणम् । प्रणम्य शिरसा तस्मै सम्प्रतस्थे महाबलः ॥३२॥ निष्पतन्तं महाकायं महानादं महाबलम् । तमाशीर्भिः प्रशस्ताभिः प्रेषयामास रावणः ॥३३॥ शङ्खदुन्दुभिनिर्घोषैः सैन्यैश्चापि वरायुधैः । तं गजैश्च तुरङ्गैश्च स्यन्दनैश्चाम्बुदस्वनैः ॥३४॥ अनुजग्मुर्महात्मानं रथिनो रथिनां वरम् ॥३५॥

किना ॥ २९ ॥ भारसहम् आयुधादिभिः प्रहारेप्यशिथिलमित्यर्थः । दृढमिति वाऽर्थः । यद्वा उपनीतायां तुलायां स्थाप्यमानान् बहून् भारान् सहत इति भारसहः, अनेकभारपरिमाण इत्यर्थः । निवातं वातप्रवेशनिवारकम्, निरन्तरमिति यावत् । आत्मभासा कवचकान्त्या । यद्वा निवातं शस्त्राभेद्यम् । "निवातावाश्रयावातौ शस्त्राभेद्यं च वर्म यत्" इत्यमरः । आबध्यमानः आबध्नन् । आर्षविकरणव्यत्ययेन श्यन्प्रत्ययः ॥ ३० ॥ सर्वाभरण

धामेति विग्रहः ॥२०–२५॥ स्रजं काञ्चनस्रजम् । मणिकृतान्तरां मणिखचितमध्यप्रदेशाम् ॥२६॥ माल्यदामानि माल्यरूपाणि दामानि । श्रोत्रे श्रोत्रयोः ॥ २७–२९ ॥ भारसहं पर्वतायुधादिप्रहारभारक्षमम् । यद्वा तुलायां स्थाप्यमानान् बहून् भारान् सहत इति तथा । अनेकपलभारनिर्मितमित्यर्थः । निवातम् अच्छिद्रम् । आबध्यमानः आबध्नन् । आर्षो विकरणव्यत्ययः ॥३०॥ सर्वाभरणसर्वाङ्गः सर्वाभरणयुक्तसर्वाङ्गः । त्रिविक्रमकृतोत्साहः त्रिषु विक्रमेषु पादन्यासेषु कृतोत्साहः ॥३१–३९॥

सर्वाङ्गः सर्वाभरणयुक्तसर्वाङ्गः। त्रिविक्रमकृतोत्साहः त्रिषु विक्रमेषु पदन्यासेषु कृतोत्साहः ॥ २१–२५ ॥ सर्पैरिति। सर्पादीनां महाशरीराणां वाहनत्वं सम्भवतीति बोध्यम्। द्विपाः गजाः। द्विजाः हंसादयः ॥२६॥ मदोत्कटः स्वाभाविकमदेन मत्तः। "मत्ते शौण्डोत्कटक्षीबाः" इत्यमरः ॥२७॥ पदातय

सर्पैरुष्ट्रैः खरैरश्वैः सिंहद्विपमृगद्विजैः। अनुजग्मुश्च तं घोरं कुम्भकर्णं महाबलम् ॥३६॥ स पुष्पवर्षैरवकीर्यमाणो धृतातपत्रः शितशूलपाणिः। मदोत्कटः शोणितगन्धमत्तो विनिर्ययौ दानवदेवशत्रुः ॥ ३७ ॥ पदातयश्च बहवो महानादा महाबलाः। अन्वयू राक्षसा भीमा भीमाक्षाः शस्त्रपाणयः ॥ ३८ ॥ रक्ताक्षाः सुमहाकाया नीलाञ्जनचयोपमाः। शूलानुद्यम्य खड्गांश्च निशितांश्च परश्वधान् ॥ ३९ ॥ बहुव्यामांश्च परिघान् गदाश्च मुसलानि च। तालस्कन्धांश्च विपुलान् क्षेपणीयान् दुरासदान् ॥ ४० ॥ अथान्यद्वपुरादाय दारुणं रोमहर्षणम्। निष्पपात महातेजाः कुम्भकर्णो महाबलः ॥ ४१ ॥ धनुश्शतपरीणाहः स षट्छतसमुच्छ्रितः। रौद्रः शकटचक्राक्षो महापर्वतसन्निभः ॥ ४२ ॥ सन्निपत्य च रक्षांसि दग्धशैलोपमो महान्। कुम्भकर्णो महावक्त्रः प्रहसन्निदमब्रवीत् ॥ ४३ ॥ अद्य वानरमुख्यानां तानि यूथानि भागशः। निर्दहिष्यामि संक्रुद्धः शलभानिव पावकः ॥ ४४ ॥ नापराध्यन्ति मे कामं वानरा वनचारिणः। जातिरस्मद्विधानां सा पुरोद्यानविभूषणम् ॥ ४५ ॥

श्चेत्यादि। बहुव्यामान् अनेकव्यामप्रमाणान्। "व्यामो बाह्वोः सकरयोस्ततयोस्तिर्यगन्तरम्" इत्यमरः। तालस्कन्धान् तालकाण्डान् ॥ ३८–४१ ॥ धनुःशतेत्यादि। धनुःशतपरीणाहः धनुःशतविशालः। षट्छतसमुच्छ्रितः षट्छतधनुरुच्छ्रायः। सन्निपत्य स्वानुगमनायोद्युक्तानां राक्षसानां समीपं गत्वेत्यर्थः ॥ ४२ ॥ ४३ ॥ अद्येत्यादि। सा जातिः वानरजातिः। अस्मद्विधानां क्रीडापराणाम् ॥ ४४–४७ ॥

बहुव्यामान् बहुव्यामप्रमाणान् " व्यामो बाह्वोस्सकरयोस्ततयोस्तिर्यगन्तरम् " इत्यमरः ॥ ४० ॥ ४१ ॥ धनुश्शतपरीणाहः धनुश्शतविशालवान् षट्छतसमुच्छ्रितः षट्छतधनुरुन्नतः ॥ ४२–४५ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घोररूपाणि अत्यन्तघोराणि ॥ ४८ ॥ गर्दभारुणाः गर्दभवदव्यक्तरागाः । "अव्यक्तरागस्त्वरुणः" इत्यमरः । निष्पपातेति । गच्छतोऽस्य उपरिप्रदेशे गृध्रो मालेव निष्पपातेत्यन्वयः । गृध्र इति जात्येकवचनम् । सव्यशब्दो लिङ्गव्यत्ययेन नयनशब्देनापि संबध्यते । कम्पते अकम्पत । उल्का मेघ

पुररोधस्य मूलं तु राघवः सहलक्ष्मणः । हते तस्मिन् हतं सर्वं तं वधिष्यामि संयुगे ॥ ४६ ॥ एवं तस्य ब्रुवाणस्य कुम्भकर्णस्य राक्षसाः । नादं चक्रुर्महाघोरं कम्पयन्त इवार्णवम् ॥ ४७ ॥ तस्य निष्पततस्तूर्णं कुम्भकर्णस्य धीमतः । बभूवुर्घोररूपाणि निमित्तानि समन्ततः ॥ ४८ ॥ उल्काशनियुता मेघा बभूवुर्गर्दभारुणाः । ससागरवना चैव वसुधा समकम्पत ॥ ४९ ॥ घोररूपाः शिवा नेदुः सज्वालकवलैर्मुखैः । मण्डलान्यपसव्यानि बबन्धुश्च विहङ्गमाः ॥ ५० ॥ निष्पपात च मालेव गृध्रोऽस्य पथि गच्छतः । प्रास्फुरन्नयनं चास्य सव्यो बाहुश्च कम्पते ॥ ५१ ॥ निपपात तदा चोल्का ज्वलन्ती भीमनिस्वना । आदित्यो निष्प्रभश्चासीन्न प्रवाति सुखोऽनिलः ॥ ५२ ॥ अचिन्तयन् महोत्पातानुत्थितान् रोमहर्षणान् । निर्ययौ कुम्भकर्णस्तु कृतान्तबलचोदितः ॥ ५३ ॥ स लङ्घयित्वा प्राकारं पद्भ्यां पर्वतसन्निभः । ददर्शाभ्रघनप्रख्यं वानरानीकमद्भुतम् ॥ ५४ ॥ ते दृष्ट्वा राक्षसश्रेष्ठं वानराः पर्वतोपमम् । वायुनुन्ना इव घना ययुः सर्वा दिशस्तदा ॥ ५५ ॥ तद्वानरानीकमतिप्रचण्डं दिशो द्रवद्भिन्नमिवाभ्रजालम् । स कुम्भकर्णः समवेक्ष्य हर्षान्ननाद भूयो घनवद् घनाभः ॥५६॥ ते तस्य घोरं निनदं निशम्य यथा निनादं दिवि वारिदस्य । पेतुर्धरण्यां बहवः प्लवङ्गा निकृत्तमूला इव सालवृक्षाः ॥ ५७ ॥

निर्गतज्वालाविशेषः ॥ ४९–५२ ॥ स इति । अभ्रघनः अभ्रसङ्घातः ॥ ५४–५७ ॥

पुररोधस्येत्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु–पुररोधस्य मूलं सलक्ष्मणो राघवः सङ्घ स तु तिष्ठतु । येन सर्वम्, अस्मदीयमिति शेषः । हतं संयुगे वधिष्यामि । कुतः ? तस्मिन् हते तदीयं सर्वं हतं स्यादित्याकूत्या पुनर्योजनीयम् ॥ ४६–५० ॥ प्रास्फुरत् नयनं सव्यम् ॥ ५१–५२ ॥ अभ्रघनप्रख्यम् अभ्र

For Private And Personal Use Only

विपुलेति । प्रभुः अन्तकः । किंकरदण्डवान् किं करोमीत्यवस्थायी सचेतनो दण्डः तद्वान् ॥ ५८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चषष्टितमः सर्गः ॥६५॥ अथ कुम्भकर्णयुद्धप्रवृत्तिः–स इत्यादि ॥ १ ॥ स विधमन् दहन् ॥२–४॥

विपुलपरिघवान् स कुम्भकर्णो रिपुनिधनाय विनिस्सृतो महात्मा । कपिगणभयमाददत् सुभीमं प्रभुरिव किङ्करदण्डवान् युगान्ते ॥५८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चषष्टितमः सर्गः ॥ ६५ ॥ स लङ्घयित्वा प्राकारं गिरिकूटोपमो महान् । निर्ययौ नगरात्तूर्णं कुम्भकर्णो महाबलः ॥ १ ॥ स ननाद महानादं समुद्रमभिनादयन् । जनयन्निव निर्घातान् विधमन्निव पर्वतान् ॥ २ ॥ तमवध्यं मघवता यमेन वरुणेन वा । प्रेक्ष्य भीमाक्षमायान्तं वानरा विप्रदुद्रुवुः ॥ ३ ॥ तांस्तु विप्रद्रुतान् दृष्ट्वा वालिपुत्रोऽङ्गदोऽब्रवीत् । नलं नीलं गवाक्षं च कुमुदं च महाबलम् ॥ ४ ॥ आत्मानमत्र विस्मृत्य वीर्याण्यभिजनानि च । क्व गच्छत भयत्रस्ताः प्राकृता हरयो यथा ॥ ५ ॥ साधु सौम्या निवर्तध्वं किं प्राणान् परिरक्षथ । नालं युद्धाय वै रक्षो महतीयं बिभीषिका ॥ ६ ॥

अभिजनानि प्रशस्तकुलानि ॥ ५ ॥ बिभीषिका भयजनकः कृत्रिमपुरुषवेषः ॥ ६–८ ॥

सङ्घाततुल्यम् ॥ ५४–५७ ॥ प्रभुः अन्तकः किङ्करदण्डवान् किं करोमीत्यवस्थितो दण्डोऽस्यास्तीति तथोक्तः ॥ ५८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चषष्टितमः सर्गः ॥ ६५ ॥ १–१९ ॥

स०–विपुलपरिघवान् विपुलं परिघादपीति विपुलपरिघं शूलम्, तद्वान् । परिघो रोषः । "रोषे च परिघो मतः" इति विश्वः । तद्वानिति वा । इदमप्यस्यायुधमिति नागोजिभट्टव्याकरणं तथा प्रभुविशेषणमिति तीर्थव्याख्यानं चानुक्तानुवादत्वेन दण्डस्य नियतायुधस्य पृथग्ग्रहणावैयर्थ्यवचनात्क्वाप्यनुपेक्ष्ये । दण्डोऽस्यास्तीति दण्डवान् । करे दण्डवान् यस्येति बहुव्रीहिः । प्रभुः संहारसमर्थो यमः । किम् ? इति कपिगणभयम् आददद् इव सुभीमं प्रभूणामपि यथा भवति तथा निस्सृत इति सम्बन्धः । "किङ्कराः संहारपरिकराः कलदण्डा अस्य सन्तीति किङ्करदण्डवान्" । "किङ्करोमीत्युपस्थितदण्डोऽस्यास्तीति" इति कतकनागोजिमहतीर्थो बिन्दुसन्देहविचार्यव्याख्यावक्तारावित्यलम् ॥ ५८ ॥ विजयन्निवेति पाठः । विजयमानः । जयतीति जयन् । विशिष्टश्चासौ जयंश्चेति स तथेति वा ॥ २ ॥ हे सौम्याः ! कौर्यप्रदर्शनकालेपि तदप्रकाशका इतीर्ष्यया सम्बोधनम् । प्राणान् किं परिरक्षथ स्वामिकामितकरणेन जीवनं स्थिरमिति भावः । इदं रक्षः । अस्माभिस्सह युद्धं कर्तुं नालं न समर्थम् । महती बिभीषिका महद्भिभीषणम् । भावे ण्वुल् ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त इति । परमक्रुद्धा इति कुञ्जरविशेषणम् ॥ ९ ॥ प्रांशुभिः उन्नतैः । महाबलः कुम्भकर्णः ॥ १० ॥ ११ ॥ ममन्थ ददाहेत्यर्थः ॥ १२ ॥ निरस्ताः उत्क्षिप्ताः ॥ १३ ॥ लङ्घयन्त इत्यर्थम् । नावलोकयन् नावालोकयन् । पृष्ठदेशमित्यर्थः ॥ १४ ॥ केचित्ते वानरा इति योजना ॥ १५ ॥

महतीमुत्थितामेनां राक्षसानां बिभीषिकाम् । विक्रमाद्विधमिष्यामो निवर्तध्वं प्लवङ्गमाः ॥ ७ ॥ कृच्छ्रेण तु समाश्वस्य सङ्गम्य च ततस्ततः । वृक्षाद्रिहस्ता हरयः सम्प्रतस्थू रणाजिरम् ॥ ८ ॥ ते निवृत्य तु संक्रुद्धाः कुम्भकर्णं वनौकसः । निजघ्नुः परमक्रुद्धाः समदा इव कुञ्जराः ॥ ९ ॥ प्रांशुभिर्गिरिशृङ्गैश्च शिलाभिश्च महाबलः । पादपैः पुष्पिताग्रैश्च हन्यमानो न कम्पते ॥ १० ॥ तस्य गात्रेषु पतिता भिद्यन्ते शतशः शिलाः । पादपाः पुष्पिताग्राश्च भग्नाः पेतुर्महीतले ॥ ११ ॥ सोऽपि सैन्यानि संक्रुद्धो वानराणां महौजसाम् । ममन्थ परमायत्तो वनान्यग्निरिवोत्थितः ॥ १२ ॥ लोहितार्द्रास्तु बहवः शेरते वानरर्षभाः । निरस्ताः पतिता भूमौ ताम्रपुष्पा इव द्रुमाः ॥ १३ ॥ लङ्घयन्तः प्रधावन्तो वानरा नावलोकयन् ॥ १४ ॥ केचित्समुद्रे पतिताः केचिद्गगनमाश्रिताः । वध्यमानास्तु ते वीरा राक्षसेन बलीयसा ॥ १५ ॥ सागरं येन ते तीर्णाः पथा तेन प्रदुद्रुवुः ॥ १६ ॥ ते स्थलानि तथा निम्नं विषण्णवदना भयात् । ऋक्षा वृक्षान् समारूढाः केचित् पर्वतमाश्रिताः ॥ १७ ॥ ममज्जुरर्णवे केचिद् गुहाः केचित् समाश्रिताः । निषेदुः प्लवगाः केचित् केचिन्नैवावतस्थिरे । [केचिद्भूमौ निपतिताः केचित् सुप्ता मृता इव ।] तान् समीक्ष्याङ्गदो भग्नान् वानरानिदमब्रवीत् ॥ १८ ॥

सागरमित्यर्थम् । ते वानराः ॥ १६ ॥ स्थलानि अतिधावनयोग्यान् देशान् उन्नतप्रदेशान् वा आश्रिता इत्यन्वयः ॥ १७ ॥ ममज्जुरित्यादि । निषेदुः

सागरमिति । स्थलानीत्यत्रापि प्रदुद्रुवुरिति सम्बध्यते ॥ १६ ॥ १७ ॥ ममज्जुः निषेदुः ॥ १८ ॥ १९ ॥

स०–भिद्यन्ते बहवः शिलाः इति पाठः । "वोतो गुणवचनात्" इत्युकारान्तत्वाभावात्ङीबभावो बहुशब्दः ॥ ११ ॥

For Private And Personal Use Only

भूमौ पतिता इव तस्थुः ॥ १८ ॥ अवतिष्ठतेत्यादि । परिगम्य प्रदक्षिणीकृत्येत्यर्थः । स्थानं न पश्यामीत्यन्वयः ॥ १९ ॥ असङ्गगतिपौरुषाः अप्रतिबद्धपराक्रमा इति वानरसंबोधनम् । निरायुधानां द्रवतां निरायुधेषु द्रवत्सु । यद्वा निरायुधानां द्रवतां दारास्तान् अपहसिष्यन्तीति । सः

अवतिष्ठत युध्यामो निवर्तध्वं प्लवङ्गमाः । भग्नानां वो न पश्यामि परिगम्य महीमिमाम् । स्थानं सर्वे निवर्तध्वं किं प्राणान् परिरक्षथ ॥१९॥ निरायुधानां द्रवतामसङ्गगतिपौरुषाः । दारा ह्यपहसिष्यन्ति स वै घातस्तु जीविनाम् ॥ २० ॥ कुलेषु जाताः सर्वे स्म विस्तीर्णेषु महत्सु च । क्व गच्छथ भयत्रस्ता हरयः प्राकृता यथा ॥२१॥ अनार्याः खलु यद्भीतास्त्यक्त्वा वीर्यं प्रधावत ॥ २२ ॥ विकत्थनानि वो यानि तदा वै जनसंसदि । तानि वः क्व नु यातानि सोदग्राणि महान्ति च ॥२३॥ भीरुप्रवादाः श्रूयन्ते यस्तु जीवति धिक्कृतः । मार्गः सत्पुरुषैर्जुष्टः सेव्यतां त्यज्यतां भयम् ॥ २४ ॥ शयामहेऽथ निहताः पृथिव्यामल्पजीविताः । दुष्प्रापं ब्रह्मलोकं वा प्राप्नुमो युधि सूदिताः ॥२५॥

अपहासः । घातः मृतिः ॥ २० ॥ सर्वे, वयमिति शेषः । विस्तीर्णेषु ज्ञातिपरम्परया विततेषु । महत्सु प्रशस्तेषु ॥ २१ ॥ अनार्या इत्यर्थम् । यद्यस्मात् भीताः प्रधावत पलायथ । तस्मादनार्याः खलु ॥ २२ ॥ सोदग्राणि उदग्रतायुक्तानि । महान्ति भूयांसीत्यर्थः ॥ २३ ॥ भीरुप्रवादा इति । यस्तु धिक्कृतो जीवति तद्विषये भीरुप्रवादाः भीरुत्वापवादाः श्रूयन्ते । सत्पुरुषैः शूरैः । जुष्टः सेवितः ॥२४॥ सत्पुरुषजुष्टो मार्गः कः ? निरायुधानामिति । स वै घातस्तु जीविनां सः दारकृतापहासः घातः मरणम् । जीविनां जीवताम् ॥ २० ॥ २१ ॥ यद्यस्माद्भीताः पलायत तस्मादनार्याः खलु ॥ २२ ॥ सोदग्राणि औद्धत्यप्रयुक्तानि । महान्ति भूयांसि ॥ २३ ॥ यस्तु धिक्कृतो जीवति तद्विषयभीरुप्रवादाः श्रूयन्ते, तं सर्वे भीरुरिति वदन्तीत्यर्थः । सत्पुरुषैः शूरैः ॥२४॥ कस्तर्हि सत्पुरुषजुष्टो मार्ग इत्यपेक्षायामाह–शयामह इति । युद्धमरणं सत्पुरुषजुष्टो मार्गः, मरणस्यावश्यम्भावित्वप्रदर्शनार्थमल्पजीविताः

स०—इमां महीं परिक्रम्यापि स्थितानां स्थानं निर्भयस्थलं न पश्यामि । राज्ञ आज्ञा तादृशीत्यग्रावस्थाने कुम्भकर्णतो मरणम् । गतवतां सुग्रीवस्य इति नानिवर्तने निर्वृतिर्भवतामिति भावः ॥ १९ ॥ निरायुधानां रिपुमुक्तायुधानङ्कितानाम् । द्रवतां गृहं प्रति द्रवताम् । सुजीविनां सजीवनवताम् ॥ २० ॥ ब्रह्मलोकं वीरस्वर्गसंज्ञम् । एतेन "हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम्" इति गीता एतदुक्तमेवार्थं वदतीति सूचितम् । शत्रुमिति जातावेकवचनम् । मुख्यदशमुखविवक्षयैकवचनं वा । आहव इत्युभयत्रान्वयि । तैर्निहताः वीरलोकस्य वीरप्राप्यस्वर्गस्य । वसु तत्र भोग्यं धनादि तेनाविवक्षितत्वं भोक्ष्यामः । पूर्वमव्यवहितकपिवरान् प्रति वचनम् । इदं तदपेक्षया दूरवर्तिन उपागतान् प्रति वचनमित्यधिकारिभेदान्न पुनरुक्तदोषः । यत्परिहारार्थं दारुपर्वसित्युक्तिरप्यपेक्षिता स्यादिति मन्तव्यम् ॥ २१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यपेक्षायामाह–शयामह इत्यादि । युद्धमरणं हि सत्पुरुषजुष्टो मार्ग इत्यर्थः । समरान्निवृत्य पलायितानामपि मरणस्यावश्यंभावित्वप्रदर्शनार्थमल्प जीविता इत्युक्तम् । समरानिवर्तिनां वीराणां तु मरणजीवनयोरुभयोरपि श्रेयस्करत्वं प्रतिपादयति दुष्प्रापमिति । निहत्वा निहत्य । जीवितमिति । वीरलोकस्य वीराणां लोको ब्रह्मलोकः तस्य वसु मूल्यभूतं जीवितं मोक्ष्यामः ॥ २५ ॥ २६ ॥ दीप्यमानं ज्वलनमिव राममासाद्य कुम्भकर्णः पतङ्गो

सम्प्राप्नुयामः कीर्तिं वा निहत्वा शत्रुमाहवे । जीवितं वीरलोकस्य मोक्ष्यामो वसु वानराः ॥ २६ ॥ न कुम्भकर्णः काकुत्स्थं दृष्ट्वा जीवन् गमिष्यति । दीप्यमानमिवासाद्य पतङ्गो ज्वलनं यथा ॥ २७ ॥ पलायनेन चोद्दिष्टाः प्राणान् रक्षामहे वयम् । एकेन बहवो भग्ना यशो नाशं गमिष्यति ॥२८॥ एवं ब्रुवाणं तं शूरमङ्गदं कनकाङ्गदम् । द्रवमाणा स्ततो वाक्यमूचुः शूरविगर्हितम् ॥ २९॥ कृतं नः कदनं घोरं कुम्भकर्णेन रक्षसा । न स्थानकालो गच्छामो दयितं जीवितं हि नः ॥ ३० ॥ एतावदुक्त्वा वचनं सर्वे ते भेजिरे दिशः । भीमं भीमाक्षमायान्तं दृष्ट्वा वानरयूथपाः ॥ ३१ ॥ द्रवमाणास्तु ते वीरा अङ्गदेन वलीमुखाः । सान्त्वैश्चैवानुमानैश्च ततः सर्वे निवर्तिताः ॥ ३२ ॥ प्रहर्ष मुपनीताश्च वालिपुत्रेण धीमता । आज्ञाप्रतीक्षास्तस्थुश्च सर्वे वानरयूथपाः ॥ ३३ ॥

यथेति यथेवशब्दयोर्निर्वाहः ॥ २७ ॥ उद्दिष्टाः व्यपदिष्टाः । बहवो वयमनेन कुम्भकर्णेन भग्नाः पलायनेन प्राणान् रक्षामहे यदि ततो यशो नाशं गमिष्यतीति योजना ॥ २८ ॥ शूरं पराक्रमवन्तम् । कनकाङ्गदम् उत्साहातिशयेन प्रकाशितस्वर्णाङ्गदम् ॥२९॥ कदनं मर्दनम् । दयितम् इष्टम् ॥३०॥ ॥ ३१ ॥ अनुमानैः सालगिरिभेदनादिदृष्टान्तपुरस्कृतैर्युक्तिविशेषैः ॥ ३२ ॥ प्रहर्षमिति । आज्ञाप्रतीक्षाः सुग्रीवाद्याज्ञाप्रतीक्षाः ॥ ३३ ॥

इत्युक्तम् । समरानिवर्तिनां वीराणां मरणजीवितयोरुभयोरपि श्रेयस्करत्वं प्रतिपादयति दुष्प्रापमिति ॥ २५ ॥ जीवितमिति । वीरलोकस्य वीराणां लोको ॥२०६॥ ब्रह्मलोकः तस्य वसु मूल्यभूतं जीवितं मोक्ष्यामः ॥ २६ ॥ नेति । पतङ्ग इव कुम्भकर्णः दीप्यमानं पावकमिव काकुत्स्थं दृष्ट्वा जीवन् न गमिष्यतीति सम्बन्धः ॥ २७ ॥ बहवो वयमेकेन कुम्भकर्णेन भग्नाः, पलायनेन अनेन भङ्गेनोद्दिष्टाः एते पलायिता इति जनैर्निर्दिष्टाः पलायिताश्च प्राणान् रक्ष्यामहे यदि तदा अस्माकं यशः नाशं गमिष्यतीति सम्बन्धः ॥ २८–३१ ॥ द्रवमाणा इति । अनुमानैः सालगिरिभेदनादिदृष्टान्तैः ॥ ३२ ॥ ३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋषभशरभेति । त्वरिततराभिमुखं त्वरिततरम् अभिमुखं चेति क्रियाविशेषणम् । अत्र वायुपुत्रस्तु न पलाय्य निवृत्तः । किंतु ऋषभादिभिर्मिलित्वा कुम्भकर्णेन सह युद्धार्थं निवृत्त इति ज्ञेयम्॥३४॥ इति श्रीगोविन्द० श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्षष्टितमः सर्गः ॥ ६६ ॥

ऋषभशरभमैन्दधूम्रनीलाः कुमुदसुषेणगवाक्षरम्भताराः । द्विविदपनसवायुपुत्रमुख्यास्त्वरिततराभिमुखं रणं प्रयाताः ॥ ३४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥

ते निवृत्ता महाकायाः श्रुत्वाऽङ्गदवचस्तदा । नैष्ठिकीं बुद्धिमासाद्य सर्वे सङ्ग्रामकाङ्क्षिणः ॥ १ ॥ समुदीरितवीर्यास्ते समारोपितविक्रमाः । पर्यवस्थापिता वाक्यैरङ्गदेन वलीमुखाः ॥ २ ॥ प्रयाताश्च गता हर्षं मरणे कृतनिश्चयाः । चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः ॥ ३ ॥ अथ वृक्षान् महाकायाः सानूनि सुमहान्ति च । वानरास्तूर्णमुद्यम्य कुम्भकर्णमभिद्रुताः ॥ ४ ॥ स कुम्भकर्णः संक्रुद्धो गदामुद्यम्य वीर्यवान् । अर्दयन् सुमहाकायः समन्ताद्व्याक्षिपद्रिपून् ॥५॥ शतानि सप्त चाष्टौ च सहस्राणि च वानराः । प्रकीर्णाः शेरते भूमौ कुम्भकर्णेन पोथिताः ॥ ६ ॥ षोडशाष्टौ च दश च विंशत्त्रिंशत्तथैव च । परिक्षिप्य च बाहुभ्यां खादन् विपरिधावति । भक्षयन् भृशसंक्रुद्धो गरुडः पन्नगानिव ॥७॥ कृच्छ्रेण च समाश्वस्ताः सङ्गम्य च ततस्ततः । वृक्षाद्रिहस्ता हरयस्तस्थुः सङ्ग्राममूर्धनि॥८॥

ते निवृत्ता इत्यादि चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविता इत्यन्तमेकं वाक्यम् । नैष्ठिकीं निष्ठा नाशः तत्संबन्धिनीम्, मरणव्यवसायिनीमित्यर्थः । समुदीरितवीर्याः कथितात्मपराक्रमाः । समारोपितविक्रमाः समवलम्बितपराक्रमाः । मरणनिश्चयहेतुमाह–त्यक्तजीविता इति । जीवनाशारहिता इत्यर्थः ॥ १–४ ॥ व्याक्षिपत् अपातयत् ॥ ५ ॥ प्रकीर्णाः शिथिलावयवाः । पोथिताः हिंसिताः । कुम्भकर्णस्यैकेन व्यापारेण शतादिसङ्घरूपेण पतिता इत्यर्थः ॥६॥ परिक्षिप्य परिगृह्य । खादन् भक्षयन् । पन्नगान् भक्षयन्निवेति गरुडविशेषणम् ॥ ७ ॥ हरयः, बलवन्तः इति शेषः । सङ्गम्य सम्भूय ॥ ८ ॥

ऋषभशरभेति । वायुपुत्रस्तु न पलाय्य निवृत्तः, किन्तु ऋषभशरभादिभिर्मिलित्वा कुम्भकर्णेन सह युद्धार्थं निवृत्त इति ज्ञेयम् ॥ ३४ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिका० युद्धकाण्डव्याख्यायां षट्षष्टितमः सर्गः ॥६६॥ (अत्र सर्गविच्छेदोऽसाम्प्रदायिकः । एकप्रकरणत्वाद् वृत्तभेदाभावाच्च इति कतकः ॥)

न इति श्लोकत्रयम् । नैष्ठिकीं निष्ठा नाशः तत्सम्बन्धिनीम्, मरणपर्यवसायिनीमिति यावत् ॥ १ ॥ समुदीरितवीर्याः कथितात्मीयमाकपराक्रमा इत्यर्थः ॥ २–८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशेषेण लम्बत इति विलम्बः । पचाद्यच् । गिरिशृङ्गाभं गिरिशृङ्गवदुन्नतम् ॥९॥ तं कुम्भकर्णं समुत्पत्य समीपमागत्य । कुम्भकर्णस्य कुम्भकर्णाय ॥१०॥ ममर्देत्यादि त्रिपादश्लोकः। तानि प्रसिद्धानि। रक्षांसि ममर्देति पूर्वेणान्वयः। पुनश्चेति पादश्लोकः। अन्यत् गिरेः शृङ्गं चिक्षेपेति योज्यम् ॥११॥

ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः । दुद्राव गिरिशृङ्गाभं विलम्ब इव तोयदः ॥ ९ ॥ तं समुत्पत्य चिक्षेप कुम्भकर्णस्य वानरः । तमप्राप्तो महाकायं तस्य सैन्येऽपतत्तदा ॥ १० ॥ ममर्दाश्वान् गजांश्चापि रथांश्चैव नगोत्तमः । तानि चान्यानि रक्षांसि पुनश्चान्यद्गिरेः शिरः ॥ ११ ॥ तच्छैलशृङ्गाभिहतं हताश्वं हतसारथि । रक्षसां रुधिरक्लिन्नं बभूवायोधनं महत् ॥ १२ ॥ रथिनो वानरेन्द्राणां शरैः कालान्तकोपमैः । शिरांसि नदतां जह्रुः सहसा भीमनिस्वनाः ॥ १३ ॥ वानराश्च महात्मानः समुत्पाट्य महाद्रुमान् । रथानश्वान् गजानुष्ट्रान् राक्षसानभ्यसूदयन् ॥ १४ ॥ हनुमान् शैलशृङ्गाणि वृक्षांश्च विविधान् बहून् । ववर्ष कुम्भकर्णस्य शिरस्यम्बरमास्थितः ॥१५॥ तानि पर्वतशृङ्गाणि शूलेन स बिभेद ह । बभञ्ज वृक्षवर्षं च कुम्भकर्णो महाबलः ॥ १६ ॥ ततो हरीणां तदनीकमुग्रं दुद्राव शूलं निशितं प्रगृह्य । तस्थौ ततोऽस्यापततः पुरस्तान्महीधराग्रं हनुमान् प्रगृह्य ॥ १७ ॥ स कुम्भकर्णं कुपितो जघान वेगेन शैलोत्तमभीमकायम् । स चुक्षुभे तेन तदाऽभिभूतो मेदार्द्रगात्रो रुधिरावसिक्तः ॥ १८ ॥ स शूलमाविध्य तडित्प्रकाशं गिरिं यथा प्रज्वलिताग्रशृङ्गम् । बाह्वन्तरे मारुतिमाजघान गुहोऽचलं क्रौञ्चमिवोग्रशक्त्या ॥ १९ ॥ स शूलनिर्भिन्नमहाभुजान्तरः प्रविह्वलः शोणितमुद्वमन् मुखात् । ननाद भीमं हनुमान् महाहवे युगान्तमेघस्तनितस्वनोपमम् ॥ २० ॥

तच्छैलशृङ्गाभिहतम् अनन्तरप्रयुक्तशैलशृङ्गाभिहतसैन्यम् । आयोधनं युद्धम् ॥ १२ ॥ कालान्तकः प्रलयकालरुद्रः ॥ १३ ॥ अभ्यसूदयन् अघ्नन् ॥ १४–१६ ॥ दुद्राव द्रावयामास ॥ १७ ॥ मेदार्द्रेत्यत्र सन्धिरार्षः ॥१८॥ आविध्य भ्रामयित्वा । गुहः स्कन्दः ॥ १९ ॥ प्रविह्वलः प्रमुह्यन् ।

विलम्बः विशेषेण लम्बत इति विलम्बः । पचाद्यच् ॥ ९ ॥ १० ॥ तानि प्रसिद्धानि । अन्यद्गिरेः शिरः । अत्रापि चिक्षेपेति योजनीयम् ॥ ११–१३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युगान्तेति । युगान्तमेघस्य स्तनितरूपो यः स्वनः तत्तुल्यमिति क्रियाविशेषणम् ॥ २० ॥ कुम्भकर्णात् भयार्ता इत्यन्वयः । संयति युद्धे ॥ २१ ॥ पर्यवस्थापयन् बलमिति पलायमानान् सन्निवर्तयन्नित्यर्थः ॥ २२ ॥ व्यशीर्यत शीर्णमभूत् ॥ २३–२५ ॥ पादैः प्रहारोद्यतैः । सर्वत्रोपलक्षणे तृतीया

ततो विनेदुः सहसा प्रहृष्टा रक्षोगणास्तं व्यथितं समीक्ष्य । प्लवङ्गमास्तु व्यथिता भयार्ताः प्रदुद्रुवुः संयति कुम्भकर्णात् ॥२१॥ ततस्तु नीलो बलवान् पर्यवस्थापयन् बलम् । प्रविचिक्षेप शैलाग्रं कुम्भकर्णाय धीमते॥२२॥ तमापतन्तं सम्प्रेक्ष्य मुष्टिनाऽभिजघान ह । मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत ॥ २३ ॥ सविस्फुलिङ्गं सज्वालं निपपात महीतले । ऋषभः शरभो नीलो गवाक्षो गन्धमादनः ॥ २४ ॥ पञ्च वानरशार्दूलाः कुम्भकर्ण मुपाद्रवन् ॥ २५ ॥ शैलैर्वृक्षैस्तलैः पादैर्मुष्टिभिश्च महाबलाः । कुम्भकर्णं महाकायं सर्वतोऽभिप्रदुद्रुवुः ॥ २६ ॥ स्पर्शानिव प्रहारांस्तान् वेदयानो न विव्यथे । ऋषभं तु महावेगं बाहुभ्यां परिषस्वजे ॥ २७ ॥ कुम्भकर्णभुजाभ्यां तु पीडितो वानरर्षभः । निपपातर्षभो भीमः प्र मुखाद्वान्तशोणितः ॥ २८ ॥ मुष्टिना शरभं हत्वा जानुना नील माहवे । आजघान गवाक्षं तु तलेनेन्द्ररिपुस्तदा ॥ २९ ॥ पादेनाभ्यहनत् क्रुद्धस्तरसा गन्धमादनम् । दत्तप्रहार व्यथिता मुमुहुः शोणितोक्षिताः ॥३०॥ निपेतुस्ते तु मेदिन्यां निकृत्ता इव किंशुकाः । तेषु वानरमुख्येषु पतितेषु महा त्मसु । वानराणां सहस्राणि कुम्भकर्णं प्रदुद्रुवुः ॥३१॥ तं शैलमिव शैलाभाः सर्वे ते प्लवगर्षभाः । समारुह्य समुत्पत्य ददंशुश्च महाबलाः ॥३२॥ तं नखैर्दशनैश्चापि मुष्टिभिर्जानुभिस्तथा । कुम्भकर्णं महाकायं ते जघ्नुः प्लवगर्षभाः॥३३॥

॥ २६ ॥ स्पर्शानिव सुखस्पर्शानिव, सुखमर्दनमिव जानन्नित्यर्थः ॥ २७ ॥ प्र इति छेदः । मुखात् वान्तशोणितः प्रणिपपातेत्यन्वयः । "व्यवहिताश्च" इत्युपसर्गस्य व्यवहितप्रयोगः । वान्तशोणितः उद्गीर्णरक्तः ॥ २८–३१ ॥ समारुह्य समुत्पत्य, समुत्पत्य समारुह्येति क्रमः ॥ ३२ ॥ ३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आचितः व्याप्तः । आत्मरुहैः वृक्षैः ॥ २४–२६ ॥ भक्षयन् बभञ्ज, भक्षणार्थं बभञ्जेत्यर्थः ॥ ३७ ॥ मांसशोणितसंक्लेदां मांसशोणितसंसिक्तामित्यर्थः

स वानरसहस्रैस्तैराचितः पर्वतोपमः । रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव ॥ ३४ ॥ बाहुभ्यां वानरान् सर्वान् प्रगृह्य सुमहाबलः । भक्षयामास संक्रुद्धो गरुडः पन्नगानिव ॥ ३५ ॥ प्रक्षिप्ताः कुम्भकर्णेन वक्त्रे पातालसन्निभे । नासापुटाभ्यां निर्जग्मुः कर्णाभ्यां चैव वानराः ॥ ३६ ॥ भक्षयन् भृशसंक्रुद्धो हरीन् पर्वतसन्निभः । बभञ्ज वानरान् सर्वान् संक्रुद्धो राक्षसोत्तमः ॥ ३७ ॥ मांसशोणितसंक्लेदां भूमिं कुर्वन् स राक्षसः । चचार हरिसैन्येषु कालाग्निरिव मूर्च्छितः ॥३८॥ वज्रहस्तो यथा शक्रः पाशहस्त इवान्तकः । शूलहस्तो बभौ सङ्ख्ये कुम्भकर्णो महाबलः ॥३९॥ यथा शुष्काण्यरण्यानि ग्रीष्मे दहति पावकः । तथा वानरसैन्यानि कुम्भकर्णो विनिर्दहत् ॥ ४० ॥ ततस्ते वध्यमानास्तु हतयूथा विनायकाः । वानरा भयसंविग्ना विनेदुर्विस्वरं भृशम् ॥ ४१ ॥ अनेकशो वध्यमानाः कुम्भकर्णेन वानराः । राघवं शरणं जग्मुर्व्यथिताः खिन्नचेतसः ॥४२॥ प्रभग्नान् वानरान् दृष्ट्वा वज्रहस्तसुतात्मजः । अभ्यधावत वेगेन कुम्भकर्णं महाहवे ॥ ४३ ॥ शैलशृङ्गं महद्गृह्य विनदंश्च मुहुर्मुहुः । त्रासयन् राक्षसान् सर्वान् कुम्भकर्णपदानुगान् ॥४४॥ चिक्षेप शैलशिखरं कुम्भकर्णस्य मूर्धनि । स तेनाभिहतोऽत्यर्थं गिरिशृङ्गेण मूर्धनि ॥ ४५ ॥ कुम्भकर्णः प्रजज्वाल कोपेन महता तदा । सोऽभ्यधावत वेगेन वालिपुत्रममर्षणः ॥ ४६ ॥ कुम्भकर्णो महानादं त्रासयन् सर्ववानरान् । शूलं ससर्ज वै रोषादङ्गदे स महाबलः ॥ ४७ ॥

॥ ३८ ॥ ३९ ॥ विनिर्दहत् विनिरदहत् ॥ ४० ॥ विनायकाः विगतनायकाः ॥ ४१–५२ ॥

स इति । आचितः व्याप्तः । आत्मरुहैः वृक्षैः ॥ ३४–४२ ॥ वज्रहस्तसुतात्मजः अङ्गद इत्यर्थः ॥ ४३–५८ ॥

For Private And Personal Use Only

तमिति। समुन्मुखः अभिमुखः ॥ ५४-५८ ॥ प्रजापतेरिति । इदमत्रैतिह्यमनुसन्धेयम्-पुरा किल ब्रह्मणो जृम्भमाणस्य वदनादृक्षरजा नाम वानरो जातः । स कदाचित् पर्यटन् ब्रह्मलोकेऽप्सरोरूपकारिणि कस्मिंश्चित् सरसि निमज्ज्याप्सरोरूपमभजत् । तां दृष्ट्वा काममोहिताविन्द्रादित्यौ हस्तेन

तमापतन्तं बुद्ध्वा तु युद्धमार्गविशारदः । लाघवान्मोचयामास बलवान् वानरर्षभः ॥ ४८ ॥ उत्पत्य चैनं सहसा तलेनोरस्यताडयत् । स तेनाभिहतः कोपात् प्रमुमोहाचलोपमः ॥४९॥ स लब्धसंज्ञो बलवान् मुष्टिमावर्त्य राक्षसः । अपहासेन चिक्षेप विसंज्ञः स पपात ह ॥ ५०॥ तस्मिन् प्लवगशार्दूले विसंज्ञे पतिते भुवि । तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे ॥ ५१ ॥ तमापतन्तं सम्प्रेक्ष्य कुम्भकर्णं महाबलम् । उत्पपात तदा वीरः सुग्रीवो वानराधिपः ॥५२॥ पर्वताग्रं समुत्क्षिप्य समाविध्य महाकपिः । अभिदुद्राव वेगेन कुम्भकर्णं महाबलम् ॥ ५३ ॥ तमापतन्तं सम्प्रेक्ष्य कुम्भकर्णः प्लवङ्गमम् । तस्थौ विवृतसर्वाङ्गो वानरेन्द्रसमुन्मुखः ॥ ५४ ॥ कपिशोणितदिग्धाङ्गं भक्षयन्तं प्लवङ्गमान् । कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत् ॥ ५५ ॥ पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम् । भक्षितानि च सैन्यानि प्राप्तं ते परमं यशः ॥ ५६ ॥ त्यज तद्वानरानीकं प्राकृतैः किं करिष्यसि । सहस्वैकनिपातं मे पर्वतस्यास्य राक्षस ॥ ५७ ॥ तद्वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितम् । श्रुत्वा राक्षसशार्दूलः कुम्भकर्णोऽब्रवीद्वचः ॥५८॥ प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजस्सुतः। श्रुतपौरुषसम्पन्नः कस्माद्गर्जसि वानर॥५९॥

युगपद्गृहीताम्। तत्रान्तरे तयोः क्षुभितं रेतोऽपतत्। तत्र द्वौ कुमारावभवताम्। वाले पतनाद्वाली। ग्रीवायां पतनात् सुग्रीवः । तं दृष्ट्वा प्रहस्य ब्रह्मा अप्सरोरूपधारिणम् ऋक्षरजसं यथापूर्वरूपप्राप्तये कुमारौ गृहीत्वा अन्यस्मिन् वानररूपकारिणि सरसि निमज्जेत्यभ्यधात् । सोऽपि तथा कृत्वा कुमाराभ्यां सह वानररूपमभजदृक्षरजाः । तत्पुत्रौ वालिसुग्रीवाविति । तदनेन प्रकारेण सुग्रीवः प्रजापतेः पौत्रः ऋक्षरजसः पुत्रश्च । काश्यपात् प्रजापतेस्तु पौत्र इति । चतुर्मुखब्रह्मजृम्भणजनितऋक्षरजःपुत्रत्वात्सुग्रीवस्य ब्रह्मपौत्रत्वम् ॥ ५९-६१ ॥

प्रजापतेर्विवस्वान् विवस्वतः सुग्रीव इत्यन्ये ॥ ५९ ॥ स इति । व्याविध्य तोलयित्वा ॥ ६०–६३ ॥ भारसहस्रस्य भारसहस्रेण कृतं जान्वारोप्य बभञ्जेत्यन्वयः ॥ ६४ ॥ सर्वतः सर्वस्मात् प्रदेशात् दुद्रुवे आजगाम ॥ ६५ ॥ ६६ ॥ सुग्रीवमुपेत्य तेन शृङ्गेण जघान । त्रिकूटशिखरस्थलङ्काद्वारे

स कुम्भकर्णस्य वचो निशम्य व्याविध्य शैलं सहसा मुमोच। तेनाजघानोरसि कुम्भकर्णं शैलेन वज्राशनिसन्निभेन ॥६०॥ तच्छैलशृङ्गं सहसा विशीर्णं भुजान्तरे तस्य तदा विशाले। ततो विषेदुः सहसा प्लवङ्गा रक्षोगणाश्चापि मुदा विनेदुः ॥६१॥ स शैलशृङ्गाभिहतश्चुकोप ननाद कोपाच्च विवृत्य वक्त्रम्। व्याविध्य शूलं च तडित्प्रकाशं चिक्षेप हर्यृक्षपतेर्वधाय ॥६२॥ तत् कुम्भकर्णस्य भुजप्रविद्धं शूलं शितं काञ्चनधामजुष्टम्। क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां बभञ्ज वेगेन सुतोऽनिलस्य ॥६३॥ कृतं भारसहस्रस्य शूलं कालायसं महत्। बभञ्ज जान्वारोप्य प्रहृष्टः प्लवगर्षभः ॥ ६४ ॥ शूलं भग्नं हनुमता दृष्ट्वा वानरवाहिनी। हृष्टा ननाद बहुशः सर्वतश्चापि दुद्रुवे ॥ ६५ ॥ सिंहनादं च ते चक्रुः प्रहृष्टा वनगोचराः। मारुतिं पूजयाञ्चक्रुर्दृष्ट्वा शूलं तथागतम् ॥ ६६ ॥ स तत्तदा भग्नमवेक्ष्य शूलं चुकोप रक्षोधिपतिर्महात्मा। उत्पाट्य लङ्कामलयात् स शृङ्गं जघान सुग्रीवमुपेत्य तेन ॥ ६७ ॥ स शैलशृङ्गाभिहतो विसंज्ञः पपात भूमौ युधि वानरेन्द्रः। तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टास्त्वथ यातुधानाः ॥ ६८ ॥

स्थित्वा युध्यतः कुम्भकर्णस्य प्रदेशान्तरस्थलङ्कामलयशृङ्गोत्पाटनं कथमुपपद्यते ? इति चेत्; तदनुगुणप्रमाणशरीरत्वान्न दोषः। लङ्कामलयशब्देन त्रिकूटं

स इति । व्याविध्य तोलयित्वा ॥ ६२–६९ ॥

स०–जानु मा आरोप्य तत् आहृष्टः इति छेदः । तत् शूलं जानु आरोप्य जानुनि निधाय । तत् सुग्रीवोपरिपतनं मा इति बभञ्ज । प्लवगर्षभो हनुमान् आहृष्टः अतिहृष्टः ॥ बहुपुराणादिष्वियं कथा सुग्रीवतो ग्रहणानन्तरं कक्ष्यानिक्षिप्तकपिपतिर्यदा लङ्कानिलयात्स्त्रीपुंसजनैस्तुहिनसलिलमाल्यैः सेवितः तस्मान्मोचितः सुग्रीवः करोत्कृत्तगृहीतघोणाकर्ण उत्पपात तदा मक्षिकोपमः पाक्षिकनीति लौकिकीमनुसृत्यानुसृत्य च तं गतो हनुमांस्तदा तन्मुक्तं सुग्रीवाशक्यपरिहारं शूलं बभञ्जेति श्रूयते । अत्र व्यत्यस्य कथनं लेखकप्रमादतः । श्लोकाश्चैतेऽनन्तरं पठनीया इति वा "कुर्युः क्वचिच्च व्यत्यासम्" इति कविकृत एवायं हनुमत्पराक्रमक्रमवर्णनपरायत्तचित्ततया व्यत्यास इति वा ज्ञेयम् । ननु भारते वनपर्वणि "हृत्वा कर्णौष्ठनासिकम्" इत्युक्तेरत्र कर्णनासिकोक्तिः कथमिति चेन्; नासिकोत्कर्तनकाल एवौष्ठद्वयस्य तया सहागमनं ज्ञातुं सुशकमित्यत्रानुक्तिः, स्पष्टंप्रतिपत्त्यर्थं तत्रोक्तिरिति सम्भवात् ॥ ६४ ॥ ॥२०९॥

वोपचर्यते ॥ ६७–६९ ॥ अभ्युच्छ्रितम् उन्नतम् । स्वाकारसादृश्याय प्रथमं मेरूपादानम् । द्वितीयं तु सुग्रीवधारणकालिकसादृश्याय ॥७०॥ उत्पाट्य उद्धृत्य । त्रिदशालयानां स्वर्गिणाम् ॥ ७१ ॥ बलवान् कुम्भकर्णो युद्धे पतितं सुग्रीवं किमर्थं हृतवानित्यत्राह--ततस्तमादायेति ॥ ७२–७६ ॥

तमभ्युपेत्याद्भुतघोरवीर्यं स कुम्भकर्णो युधि वानरेन्द्रम् । जहार सुग्रीवमभिप्रगृह्य यथाऽनिलो मेघमतिप्रचण्डः॥६९॥ स तं महामेघनिकाशरूपमुत्पाट्य गच्छन् युधि कुम्भकर्णः । रराज मेरुप्रतिमानरूपो मेरुर्यथाऽभ्युच्छ्रितघोरशृङ्गः ॥७०॥ ततस्तमुत्पाट्य जगाम वीरः संस्तूयमानो युधि राक्षसेन्द्रैः । शृण्वन्निनादं त्रिदशालयानां प्लवङ्गराजग्रहविस्मितानाम् ॥ ७१ ॥ ततस्तमादाय तदा स मेने हरीन्द्रमिन्द्रोपममिन्द्रवीर्यः । अस्मिन् हृते सर्वमिदं हृतं स्यात् सराघवं सैन्यमितीन्द्रशत्रुः ॥ ७२ ॥ विद्रुतां वाहिनीं दृष्ट्वा वानराणां ततस्ततः । कुम्भकर्णेन सुग्रीवं गृहीतं चापि वानरम् ॥ ७३ ॥ हनुमांश्चिन्तयामास मतिमान् मारुतात्मजः । एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत् ॥७४॥ यद्वै न्याय्यं मया कर्तुं तत् करिष्यामि सर्वथा । भूत्वा पर्वतसङ्काशो नाशयिष्यामि राक्षसम् ॥ ७५ ॥ मया हते संयति कुम्भकर्णे महाबले मुष्टिविकीर्णदेहे । विमोचिते वानरपार्थिवे च भवन्तु हृष्टाः प्लवगाः समस्ताः ॥ ७६ ॥ अथवा स्वयमप्येष मोक्षं प्राप्स्यति पार्थिवः । गृहीतोऽयं यदि भवेत्रिदशैः सासुरोरगैः ॥ ७७ ॥ मन्ये न तावदात्मानं बुद्ध्यते वानराधिपः । शैलप्रहाराभिहतः कुम्भकर्णेन संयुगे ॥ ७८ ॥ अयं मुहूर्तात् सुग्रीवो लब्धसंज्ञो महाहवे । आत्मनो वानराणां च यत् पथ्यं तत् करिष्यति ॥ ७९ ॥

अथवेति । सासुरोरगैः सुरैः गृहीतोऽप्ययं मोक्षं प्राप्तुं शक्नोति । किं पुनरनेन राक्षसापसदेनेति भावः ॥ ७७ ॥ तर्हि मोचयित्वाऽऽत्मानं किमिति न

उच्छ्रितघोरशृङ्गः उच्छ्रितानि उन्नतानि घोराणि शृङ्गाणि यस्य सः ॥ ७० ॥ त्रिदशालयानां त्रिदशालयस्थानाम् ॥ ७१–७६ ॥ अथवेति । सासुरोरगैः त्रिदशैर्गृहीतोऽपि अयं मोक्षं प्राप्तुं शक्नोति किं पुनरनेन राक्षसापसदेनेति भावः ॥ ७७ ॥ तर्ह्यात्मानं मोचयित्वा किमिति न निवर्तते ? इत्यत्राह–मन्य इति ॥७८॥ ७९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निवर्तत इत्यत्राह–मन्य इत्यादिना । तावदित्यवधारणे । आत्मानमेव न बुध्यत इत्यर्थः ! पथ्यं हितम् ॥ ७८ ॥ ७९ ॥ कृच्छ्रगतः स्वामी भृत्येनावश्यं मोचनीय एवेत्याशङ्क्याह–मया त्विति ॥ ८० ॥ तावत् सुग्रीवागमनपर्यन्तम् ॥ ८१ ॥ संस्तम्भयामास गमनान्निवर्तयामास ॥ ८२ ॥ पुष्पार्घ्यवर्षैः

मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः। अप्रीतिश्च भवेत् कष्टा कीर्तिनाशश्च शाश्वतः ॥ ८० ॥ तस्मान्मुहूर्तं कांक्षिष्ये विक्रमं पार्थिवस्य तु । भिन्नं च वानरानीकं तावदाश्वासयाम्यहम् ॥८१॥ इत्येवं चिन्तयित्वा तु हनुमान् मारुतात्मजः । भूयः संस्तम्भयामास वानराणां महाचमूम् ॥८२॥ स कुम्भकर्णोऽथ विवेश लङ्कां स्फुरन्तमादाय महाकपिं तम्। विमानचर्यागृहगोपुरस्थैः पुष्पाग्र्यवर्षैरवकीर्यमाणः ॥ ८३ ॥ लाजगन्धोदवर्षैस्तु सिच्यमानः शनैः शनैः। राजमार्गस्य शीतत्वात् संज्ञामाप महाबलः ॥८४॥ ततः स संज्ञामुपलभ्य कृच्छ्राद्बलीयसस्तस्य भुजान्तरस्थः । अवेक्षमाणः पुरराजमार्गं विचिन्तयामास मुहुर्महात्मा ॥ ८५ ॥ एवं गृहीतेन कथं नु नाम शक्यं मया सम्प्रतिकर्तुमद्य । तथा करिष्यामि यथा हरीणां भविष्यतीष्टं च हितं च कार्यम् ॥ ८६ ॥ ततः कराग्रैः सहसा समेत्य राजा हरीणाममरेन्द्रशत्रुम् । खरैश्च कर्णौ दशनैश्च नासां ददंश पार्श्वेषु च कुम्भकर्णम् ॥८७॥ स कुम्भकर्णो हृतकर्णनासो विदारितस्तेन विमर्दितश्च । रोषाभिभूतः क्षतजार्द्रगात्रः सुग्रीवमाक्षिप्य पिपेष भूमौ ॥ ८८ ॥ स भूतले भीमबलाभिपिष्टः सुरारिभिस्तैरभिहन्यमानः । जगाम खं वेगवदभ्युपेत्य पुनश्च रामेण समाजगाम ॥८९॥

श्लाघ्यपुष्पवृष्टिभिः ॥ ८३–८५ ॥ एवमिति । सम्प्रतिकर्तुं सम्यक् प्रतिकर्तुम्, अन्यथा अद्येति पुनरुक्तिः स्यात् ॥ ८६ ॥ तत इति । खरैः तीक्ष्णैः कराग्रैः कर्णौ समेत्य संहृत्य । दशनैः नासां च ददंश । पार्श्वेषु कपोलयोरंसयोरुदरान्तरयोश्च, पादाभ्यां विददारेति शेषः ॥ ८७ ॥ स इति । ॥२१०॥

तथापि कृच्छ्रगतः स्वामी भृत्येनावश्यं मोचयितव्य इत्याशङ्क्याह–मया त्विति ॥ ८०–८२ ॥ पुष्पाग्र्यवर्षैः उत्तमकुसुमवृष्टिभिः ॥ ८३–८५ ॥ सम्प्रतिकर्तुं सम्यक् प्रतिकर्तुम् ॥ ८६ ॥ खरैः तीक्ष्णैः। कराग्रैः करनखैः कर्णौ समेत्य संहृत्येत्यर्थः । पादैः पादनखैः । ददंश पार्श्वेषु च कुम्भकर्णमिति पाठे–पार्श्वेषु कपोलयोरंसयो

For Private And Personal Use Only

विमर्दितः सम्पीडितः ॥ ८८ ॥ ८९ ॥ प्रस्रवणैः निर्दरैः ॥ ९० ॥ अभिमुखः सन् युद्धाय मनश्चक्र इति सम्बन्धः ॥ ९१–९४ ॥ बुभुक्षित इति । शोणितमांसगृध्नुः शोणितमांसलोलुपः ॥ ९५–९७ ॥ सम्प्रस्रवन्निति । सम्प्रस्रवन् तालुभ्यामुद्वमन् । शोणितं मेदश्च भक्षितवानरसंबन्धि ॥ ९८ ॥

कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः । रराज शोणितैः सिक्तो गिरिः प्रस्रवणैरिव ॥ ९० ॥ शोणितार्द्रो महाकायो राक्षसो भीमविक्रमः । युद्धायाभिमुखो भूयो मनश्चक्रे महाबलः ॥९१॥ अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः । नीलाञ्जनचयप्रख्यः ससन्ध्य इव तोयदः ॥ ९२ ॥ गते तु तस्मिन् सुरराजशत्रुः क्रोधात् प्रदुद्राव रणाय भूयः । अनायुधोऽस्मीति विचिन्त्य रौद्रो घोरं तदा मुद्गरमाससाद ॥ ९३ ॥ ततः स पुर्याः सहसा महौजा निष्क्रम्य तद्वानरसैन्यमुग्रम् । बभक्ष रक्षो युधि कुम्भकर्णः प्रजा युगान्ताग्निरिव प्रदीप्तः ॥ ९४ ॥ बुभुक्षितः शोणितमांसगृध्नुः प्रविश्य तद्वानरसैन्यमुग्रम् । चखाद रक्षांसि हरीन् पिशाचानृक्षांश्च मोहाद्युधि कुम्भकर्णः ॥ ९५ ॥ यथैव मृत्युर्हरते युगान्ते स भक्षयामास हरींश्च मुख्यान् ॥ ९६ ॥ एकं द्वे त्रीन् बहून् क्रुद्धो वानरान् सह राक्षसैः । समादायैकहस्तेन प्रचिक्षेप त्वरन् मुखे ॥ ९७ ॥ सम्प्रस्रवंस्तदा मेदः शोणितं च महाबलः । वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान् ॥ ९८ ॥ ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा गतिम् ॥ ९९ ॥ कुम्भकर्णो भृशं क्रुद्धः कपीन् खादन् प्रधावति ॥१००॥ शतानि सप्त चाष्टौ च विंशत्त्रिंशत्तथैव च । सम्परिष्वज्य बाहुभ्यां खादन् विपरिधावति ॥ १०१ ॥ तस्मिन् काले सुमित्रायाः पुत्रः परबलार्दनः । चकार लक्ष्मणः क्रुद्धो युद्धं परपुरञ्जयः ॥ १०२ ॥ स कुम्भकर्णस्य शरान् शरीरे सप्त वीर्यवान् । निचखानाददे बाणान् विससर्ज च लक्ष्मणः ॥ १०३ ॥

त इत्यर्धम् । गतिं शरणम् ॥ ९९ ॥ कुम्भकर्ण इत्यर्धम् । प्रधावति प्राधावत् । उत्तरश्लोकेऽप्येवमेव ॥ १०० ॥ १०१ ॥ तस्मिन् काल इत्यादि । रुदरपार्श्वयोश्च, पादाभ्यां विददारेति शेषः ॥८७–९७॥ शोणितं भक्षितानां वानरादीनां सम्बन्धि । संप्रस्रवन् ओष्ठाभ्यामुद्वमन् ॥९८॥ गतिं शरणम् ॥९९–११७॥

स्पष्टम् ॥ १०२–१०५ ॥ आर्चिषः ज्वालाः ॥ १०६ ॥ १०७ ॥ तस्येति सार्धः । बर्हिणवाससः बर्हिणं बर्हिपत्रं वासो वासःस्थानं येषां ते तथोक्ताः ।

अतिक्रम्य च सौमित्रिं कुम्भकर्णो महाबलः । राममेवाभिदुद्राव दारयन्निव मेदिनीम् ॥ १०४ ॥ अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन् । कुम्भकर्णस्य हृदये ससर्ज निशितान् शरान् ॥ १०५ ॥ तस्य रामेण विद्धस्य सहसाऽभिप्रधावतः । अङ्गारमिश्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः ॥ १०६ ॥ रामास्त्रविद्धो घोरं वै नदन् राक्षसपुङ्गवः । अभ्यधावत संक्रुद्धो हरीन् विद्रावयन् रणे ॥ १०७ ॥ तस्योरसि निमग्नाश्च शरा बर्हिणवाससः । हस्ताच्चापि परिभ्रष्टा पपातोर्व्यां महागदा । आयुधानि च सर्वाणि विप्राकीर्यन्त भूतले ॥ १०८ ॥ स निरायुधमात्मानं यदा मेने महाबलः । मुष्टिभ्यां चरणाभ्यां च चकार कदनं महत् ॥१०९॥ स बाणैरतिविद्धाङ्गः क्षतजेन समुक्षितः । रुधिरं प्रतिसुस्राव गिरिः प्रस्रवणं यथा ॥११०॥ स तीव्रेण च कोपेन रुधिरेण च मूर्च्छितः । वानरान् राक्षसानृक्षान् खादन् विपरिधावति ॥१११॥ अथ शृङ्गं समाविध्य भीमं भीमपराक्रमः । चिक्षेप राममुद्दिश्य बलवानन्तकोपमः॥११२॥ अप्राप्तमन्तरा रामः सप्तभिस्तैरजिह्मगैः । शरैः काञ्चनचित्राङ्गैश्चिच्छेद पुरुषर्षभः ॥ ११३ ॥ तन्मेरुशिखराकारं द्योतमानमिव श्रिया । द्वे शते वानरेन्द्राणां पतमानमपातयत् ॥ ११४ ॥ तस्मिन् काले स धर्मात्मा लक्ष्मणो वाक्यमब्रवीत् । कुम्भकर्णवधे युक्तो योगान् परिमृशन् बहून् ॥ ११५ ॥ नैवायं वानरान् राजन्नापि जानाति राक्षसान् । मत्तः शोणितगन्धेन स्वान् परांश्चैव खादति ॥ ११६ ॥ साध्वेनमधिरोहन्तु सर्वे ते वानरर्षभाः । यूथपाश्च यथा मुख्यास्तिष्ठन्त्वस्य समन्ततः ॥ ११७ ॥

आयुधानि खड्गादीनि ॥१०८॥ कदनम्, वानराणामिति शेषः ॥ १०९ ॥ ११० ॥ स तीव्रेणेति । मूर्च्छितः व्याप्तः ॥ १११–११२ ॥ द्वे शते उद्दिश्य पतमानं गच्छन्तम् अपातयत्, शरैरिति शेषः॥११४॥ योगान् परिमृशन् उपायान् विचारयन् ॥११५॥११६॥ साध्विति । यथा यथायोग्यम् ॥११७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अप्ययमिति । भारः वानरारोहणरूपः ॥ ११८ ॥ ११९ ॥ कुम्भकर्णस्त्विति । स्पष्टः ॥ १२० ॥ तानिति । निर्धुतानिति ह्रस्व आर्षः ॥ १२१ ॥ क्रोधताम्रेत्यादिसार्धश्लोकमेकं वाक्यम् ॥१२२॥ स चापमिति । निबद्धोत्तमतूणबाणः निबद्धोत्तमबाणतूण इत्यर्थः ॥ १२३ ॥ १२४ ॥ स ददर्शेत्यादि

अप्ययं दुर्मतिः काले गुरुभारप्रपीडितः । प्रपतन् राक्षसो भूमौ नान्यान् हन्यात् प्लवङ्गमान् ॥ ११८ ॥ तस्य तद्व चनं श्रुत्वा राजपुत्रस्य धीमतः । ते समारुरुहुर्हृष्टाः कुम्भकर्णं प्लवङ्गमाः ॥ ११९ ॥ कुम्भकर्णस्तु संक्रुद्धः समा रूढः प्लवङ्गमैः । व्यधूनयत्तान् वेगेन दुष्टहस्तीव हस्तिपान् ॥ १२० ॥ तान् दृष्ट्वा निर्धुतान् रामो दुष्टोऽयमिति राक्षसः । समुत्पपात वेगेन धनुरुत्तममाददे ॥ १२१ ॥ क्रोधताम्रेक्षणो वीरो निर्दहन्निव चक्षुषा । राघवो राक्षसं रोषादभिदुद्राव वेगितः । यूथपान् हर्षयन् सर्वान् कुम्भकर्णभयार्दितान् ॥ १२२ ॥ स चापमादाय भुजङ्गकल्पं दृढज्यमुग्रं तपनीयचित्रम् । हरीन् समाश्वास्य समुत्पपात रामो निबद्धोत्तमतूणबाणः ॥ १२३ ॥ स वानर गणैस्तैस्तु वृतः परमदुर्जयः । लक्ष्मणानुचरो रामः सम्प्रतस्थे महाबलः ॥ १२४ ॥ स ददर्श महात्मानं किरीटिनमरिन्दमम् । शोणिताप्लुतसर्वाङ्गं कुम्भकर्णं महाबलम् ॥ १२५ ॥ सर्वान् समभिधावन्तं यथा रुष्टं दिशा गजम् । मार्गमाणं हरीन् क्रुद्धं राक्षसैः परिवारितम् ॥ १२६ ॥ विन्ध्यमन्दरसङ्काशं काञ्चनाङ्गदभूषणम् । स्रवन्तं रुधिरं वक्त्राद्वर्षमेघमिवोत्थितम् ॥ १२७ ॥ जिह्वया परिलिह्यन्तं शोणितं शोणितेक्षणम् । मृद्नन्तं वानरानीकं कालान्तकयमोपमम् ॥ १२८ ॥ तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसम् । विस्फारयामास तदा कार्मुकं पुरुषर्षभः ॥ १२९ ॥ स तस्य चापनिर्घोषात् कुपितो राक्षसर्षभः । अमृष्यमाणस्तं घोषमभिदुद्राव राघवम् ॥१३०॥

चतुःश्लोक्येकान्वया । कालान्तकयमोपमम्, रुद्रस्त्रिनेत्रस्त्रिपुरान्तको वेतिवत् एकस्यैवावस्थाभेदात् कालादिनामभेदः । यद्वा काले युगान्तकाले अन्तको नाशको यमः उपमा यस्य स तथोक्तः ॥ १२५--१३१ ॥

भारप्रपीडितः भारः वानरारोहणभारः ॥ ११८–१२७ ॥ कालान्तकयमोपमं 'रुद्रस्त्रिनेत्रस्त्रिपुरान्तकः' इतिवदेकस्यैवावस्थाभेदात्कालादिनामभेदः ॥१२८–१३१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आगच्छेति । मा माम् अविषादम् आगच्छेत्यन्वयः । यद्वा विषादं मा गच्छ । मरणेन शरीरभरणक्लेशं त्यजेत्यर्थः । आङ् उपसर्गमात्रम्॥१३२--१३४॥ प्रहस्येति । विकृतमित्यादिविशेषणत्रयं क्रियाविशेषणम् ॥ १३५ ॥ १३६ ॥ पश्य मे मुद्गरमिति । यद्यपि निरायुधत्वं पूर्वमुक्तं तथाप्यद्य मुद्गरं गृहीत

ततस्तु वातोद्धतमेघकल्पं भुजङ्गराजोत्तमभोगबाहुम् । तमापतन्तं धरणीधराभमुवाच रामो युधि कुम्भकर्णम् ॥ १३१ ॥ आगच्छ रक्षोधिप मा विषादमवस्थितोऽहं प्रगृहीतचापः । अवेहि मां शक्रसपत्न रामं मया मुहूर्ताद्भविता विचेताः ॥ १३२ ॥ रामोऽयमिति विज्ञाय जहास विकृतस्वनम् । अभ्यधावत संक्रुद्धो हरीन् विद्रावयन् रणे ॥ १३३ ॥ पातयन्निव सर्वेषां हृदयानि वनौकसाम् ॥ १३४ ॥ प्रहस्य विकृतं भीमं स मेघस्तनितोपमम् । कुम्भकर्णो महातेजा राघवं वाक्यमब्रवीत् ॥ १३५ ॥ नाहं विराधो विज्ञेयो न कबन्धः खरो न च । न वाली न च मारीचः कुम्भकर्णोऽहमागतः ॥ १३६ ॥ पश्य मे मुद्गरं घोरं सर्वकालायसं महत् । अनेन निर्जिता देवा दानवाश्च पुरा मया ॥ १३७ ॥ विकर्णनास इति मां नावज्ञातुं त्वमर्हसि । स्वल्पाऽपि हि न मे पीडा कर्णनासाविनाशनात् ॥ १३८ ॥ दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मे लघु । ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमम् ॥ १३९ ॥ स कुम्भकर्णस्य वचो निशम्य रामः सुपुङ्खान् विससर्ज बाणान् । तैराहतो वज्रसमप्रवेगैर्न चुक्षुभे न व्यथते सुरारिः ॥ १४० ॥ यैः सायकैः सालवरा निकृत्ता वाली हतो वानरपुङ्गवश्च । ते कुम्भकर्णस्य तदा शरीरे वज्रोपमा न व्यथयांप्रचक्रुः ॥ १४१ ॥

वानिति ज्ञेयम् । सर्वकालायसं बहुलायसमयमित्यर्थः ॥ १३७ ॥ विकर्णनास इति ॥ १३८ ॥ दर्शयेति । लघु क्षिप्रम् । दृष्टपौरुषविक्रमं दृष्टबलपराक्रमम् ॥ १३९ ॥ चुक्षुभ इति । क्षोभोऽत्र मानसः ॥ १४० ॥ यैः सायकैरिति । सालभेदकस्य वालिविनाशकस्य च बाणस्यैकत्वेऽपि बहुवचनं तद्वर्गाणा ॥२१२॥

आगच्छेति । मा माम् । अविषादं विषादरहितम् ॥ १३२–१३८ ॥ दर्शयेक्ष्वाकुशार्दूलेत्यस्य मानीतिकार्थः स्पष्टः । वस्तुतस्तु-हे इक्ष्वाकुशार्दूल ! मे गात्रेषु वीर्यं

For Private And Personal Use Only

मनेकत्वादुपपद्यते ॥ १४१ ॥ स इति । शरीरेण पिबन्, शरीरानिमग्नबाण इत्यर्थः । जघान मोघीचकार ॥ १४२ ॥ ततस्त्विति । विव्याध अचालयत् ॥ १४३–१४५ ॥ सन्निपातं द्वन्द्वयुद्धम् ॥ १४६ ॥ १४७ ॥ ऐन्द्रास्त्रयुक्तेन ऐन्द्रास्त्रमन्त्राभिमन्त्रितेन ॥ १४८ ॥ विवेष्टमानः विवर्तमानः ॥ १४९ ॥

स वारिधारा इव सायकांस्तान् पिबन् शरीरेण महेन्द्रशत्रुः । जघान रामस्य शरप्रवेगं व्याविध्य तं मुद्गरमुग्रवेगम् ॥ १४२ ॥ ततस्तु रक्षः क्षतजानुलिप्तं वित्रासनं देवमहाचमूनाम् । विव्याध तं मुद्गरमुग्रवेगं विद्रावयामास चमूं हरीणाम् ॥ १४३ ॥ वायव्यमादाय ततो वरास्त्रं रामः प्रचिक्षेप निशाचराय । समुद्गरं तेन जघान बाहुं स कृत्तबाहुस्तुमुलं ननाद ॥ १४४ ॥ स तस्य बाहुर्गिरिशृङ्गकल्पः समुद्गरो राघवबाणकृत्तः । पपात तस्मिन् हरिराजसैन्ये जघान तां वानरवाहिनीं च ॥ १४५ ॥ ते वानरा भग्नहतावशेषाः पर्यन्तमाश्रित्य तदा विषण्णाः । प्रवेपिताङ्गं ददृशुः सुघोरं नरेन्द्ररक्षोधिपसान्निपातम् ॥ १४६ ॥ स कुम्भकर्णोऽस्त्रनिकृत्तबाहुर्महान्निकृत्ताग्र इवाचलेन्द्रः । उत्पाटयामास करेण वृक्षं ततोऽभिदुद्राव रणे नरेन्द्रम् ॥ १४७॥ स तस्य बाहुं सहसालवृक्षं समुद्यतं पन्नगभोगकल्पम् । ऐन्द्रास्त्रयुक्तेन जघान रामो बाणेन जाम्बूनदचित्रितेन ॥ १४८ ॥ स कुम्भकर्णस्य भुजो निकृत्तः पपात भूमौ गिरिसन्निकाशः । विवेष्टमानोऽभिजघान वृक्षान् शैलान् शिला वानरराक्षसांश्च ॥ १४९ ॥ तं छिन्नबाहुं समवेक्ष्य रामः समापतन्तं सहसा नदन्तम् । द्वावर्धचन्द्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य ॥ १५० ॥ तौ तस्य पादौ प्रदिशो दिशश्च गिरीन् गुहाश्चैव महार्णवं च । लङ्कां च सेनां कपिराक्षसानां विनादयन्तौ विनिपेततुश्च ॥ १५१ ॥ निकृत्तबाहुर्विनिकृत्तपादो विदार्य वक्त्रं वडवामुखाभम् । दुद्राव रामं सहसाऽभिगर्जन् राहुर्यथा चन्द्रमिवान्तरिक्षे ॥ १५२ ॥

प्रगृह्य युगपत् सन्धाय ॥१५०॥ विनाशयन्तौ दिगादीन् प्रतिध्वनयन्तौ ॥ १५१ ॥ दुद्राव राममिति । ऊरुशेषाभ्यामिदम् । अन्यथेदं गमनं वक्ष्यमाणं दर्शय । ततः दृष्टपौरुषविक्रमं त्वाम्, असाध्यं मन्वान इति शेषः । भक्षयिष्यामि' यथापूर्वं वानरानिति शेषः ॥ १३९–१५० ॥ ताविति । विनादयन्तौ दिगादीन्

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पतनं च न सम्भवतः। राहुर्यथेति । चन्द्रमिव स्थितं रामं राहुर्यथा तथा कुम्भकर्ण इत्यर्थः ॥ १५२ ॥ १५३ ॥ आरिष्टं रिपूणामशुभप्रदम् ।

अपूरयत्तस्य मुखं शिताग्रै रामः शरैर्हेमपिनद्धपुङ्खैः । स पूर्णवक्त्रो न शशाक वक्तुं चुकूज कृच्छ्रेण मुमोह चापि ॥ १५३ ॥ अथाददे सूर्यमरीचिकल्पं स ब्रह्मदण्डान्तककालकल्पम् । अरिष्टमैन्द्रं निशितं सुपुङ्खं रामः शरं मारुततुल्यवेगम् ॥ १५४ ॥ तं वज्रजाम्बूनदचारुपुङ्खं प्रदीप्तसूर्यज्वलनप्रकाशम् । महेन्द्रवज्राशनितुल्यवेगं रामः प्रचिक्षेप निशाचराय ॥ १५५ ॥ स सायको राघवबाहुचोदितो दिशः स्वभासा दश सम्प्रकाशयन् । सधूमवैश्वानरदीप्तदर्शनो जगाम शक्राशनिवीर्यविक्रमः ॥ १५६ ॥ स तन्महापर्वतकूटसन्निभं विवृत्तदंष्ट्रं चलचारुकुण्डलम् । चकर्त रक्षोधिपतेः शिरस्तथा यथैव वृत्रस्य पुरा पुरन्दरः ॥ १५७ ॥ कुम्भकर्णशिरो भाति कुण्डलालङ्कृतं महत् । आदित्येऽभ्युदिते रात्रौ मध्यस्थ इव चन्द्रमाः ॥ १५८ ॥

"अरिष्टे तु शुभाशुभे" इत्यमरः ॥ १५४ ॥ १५५ ॥ वैश्वानरः अग्निः ॥ १५६ ॥ १५७ ॥ कुम्भकर्णेति । कर्तनवेगादुद्गतं गगने स्थितम् । रात्रौ

प्रतिध्वनयन्तावित्यर्थः ॥ १५१–१५३ ॥ आरिष्टं रिपूणामशुभप्रदम् । " अरिष्टे तु शुभाशुभे " इत्यमरः ॥ १५४–१५७ ॥ कुम्भकर्णशिर इति । कर्तनवेगाद्गगने स्थितं सत् कुम्भकर्णशिरः आदित्ये अदितिदेवताके पुनर्वसुनक्षत्रे रात्रावभ्युदिते तन्मध्यगश्चन्द्रमा इवाभातीत्यर्थः । कुण्डलस्थानव्यतिरिक्तकर्णप्रदेशयोः सुग्रीवेण गृहीतत्वात्कुम्भकर्णशिरः कुण्डलालंकृतं भातीति भावः । यद्वा महत्कुम्भकर्णशिरः कुण्डलालंकृतं कुण्डलाभ्याम् अलं निवारणं कृतम् कुण्डलरहितं सत् भाति । अत्र दृष्टान्तः-आदित्य इति । आदित्ये सूर्ये अभ्युदिते सति । अभ्युदितेरात्रावित्यत्र अरात्राविति छेदः । अरात्रावहनि मध्यस्थः गगनमध्यस्थः चन्द्रमा इवेत्यर्थः । अस्मिन् पक्षे पूर्वश्लोके चलचारुकुण्डलमित्यस्य चले चलिते गते चारुकुण्डले यस्य तदित्यर्थः ॥ १५८ ॥ १५९ ॥

स०–भातिकुण्डलालङ्कृतं मया कान्त्या कुण्डलालङ्कृतं यदन्यच्छिरः तदतिक्रम्य वर्तते तत्तथा । सद्यः पातात्कान्तिर्न गतेति भावः । " अति लङ्घनेऽपि च " इति विश्वः । यद्वा कुण्डलालं कुण्ड इति कुण्डे आस्यपिठरे लाला यस्य तत् । पाताळसंनिभमिति पूर्वमुक्तेः । " कुण्डं पिठरे " इति विश्वः । कृतं कालविशेषेण, अत एवाप्रकाशो युज्यते । कुण्डलाभ्यां विना कृतमिति द्वावपि । यत् रात्रौ मध्यस्थः योग्यतया गगनमध्यस्थः चन्द्रमा इवाभात् । तदिदानीम् आदित्ये सूर्येऽभ्युदिते मध्यस्थोऽवमः कान्त्या चन्द्रमा इव भाति । मध्यस्थे न्यायमार्गस्थे । आदित्य इवादित्ये रामरूपे वा । तदंशसम्भूतत्वात्तस्मिन् रामेऽभ्युदिते सति चन्द्रमा इव, भातीति शेषः । कुण्डलवत् सर्पवदलङ्कृतं भाति । यथाऽहिः कुण्डली कुण्डलं चेति वचनात् कर्णशून्यत्वेनोचितं तदौपम्यम् । आदित्ये अदितिदेवताके पुनर्वसुनक्षत्रे रात्रावभ्युदिते सति तन्मध्यस्थ चन्द्रमा इव भातीति, तथा अरात्रौ दिवेति तीर्थनागोजिभ्याख्याने प्रक्रमानानुगुण्यात्, एवं द्वितीयमपि आदित्योदयानन्तरम् अरात्रावहनीत्यवक्तव्यत्वादुपेक्षणीये ॥ १५८ ॥ ॥२११॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आदित्ये अदितिदेवताके पुनर्वसुनक्षत्रे तारकाद्वयात्मके अभ्युदिते तन्मध्यगतश्चन्द्रमा इव बभावित्यर्थः ॥ १५८ ॥ चर्याः प्राकारोपान्तक्लृप्तभट

तद्रामबाणाभिहतं पपात रक्षश्शिरःपर्वतसन्निकाशम् । बभञ्ज चर्यागृहगोपुराणि प्राकारमुच्चं तमपातयच्च ॥ १५९॥ न्यपतत् कुम्भकर्णोऽथ स्वकायेन निपातयन् । प्लवङ्गमानां कोट्यश्च परितः सम्प्रधावताम् ॥ १६० ॥ तच्चाति कायं हिमवत्प्रकाशं रक्षस्ततस्तोयनिधौ पपात । ग्राहान् वरान् मीनवरान् भुजङ्गान् ममर्द भूमिं च तदा विवेश ॥ १६१ ॥ तस्मिन् हते ब्राह्मणदेवशत्रौ महाबले संयति कुम्भकर्णे । चचाल भूर्भूमिधराश्च सर्वे हर्षाच्च देवास्तुमुलं प्रणेदुः ॥ १६२ ॥ ततस्तु देवर्षिमहर्षिपन्नगाः सुराश्च भूतानि सुपर्णगुह्यकाः । सयक्षगन्धर्वगणा नभोगताः प्रहर्षिता रामपराक्रमेण ॥ १६३ ॥ ततस्तु ते तस्य वधेन भूरिणा मनस्विनो नैर्ऋतराजबान्धवाः । विनेदुरुच्चै र्व्यथिता रघूत्तमं हरिं समीक्ष्यैव यथा सुरार्दिताः ॥ १६४ ॥ स देवलोकस्य तमो निहत्य सूर्यो यथा राहुमुखा द्विमुक्तः । तथा व्यभासीद्भुवि वानरौघे निहत्य रामो युधि कुम्भकर्णम् ॥ १६५ ॥

सञ्चारार्हप्रदेशाः ॥ १५९ ॥ कोट्यः कोटीः ॥ १६० ॥ रक्षः कबन्धरूपं भूमिं तदा विवेश भूमिमस्पृशदित्यर्थः ॥ १६१–१६४ ॥ स इति । वानरौघे

प्लवङ्गमानां कोट्यः कोटीः कायेन निपातयन् कुम्भकर्णो न्यपतदिति सम्बन्धः ॥ १६०–१६३ ॥ सुरार्दिताः राक्षसाः हरिं समीक्ष्यैव नैर्ऋतबान्धवाः रघूत्तमं समीक्ष्य व्यथिता विनेदुरिति सम्बन्धः ॥ १६४ ॥ १६५ ॥

स०—" माहेन्द्रास्त्रेण सौमित्रिर्ददाराद्विरोपमम् " इति भारते वनपर्वणि मार्कण्डेयोपाख्याने लक्ष्मणात्कुम्भकर्णवध उक्तोऽत्र तु रामादतो विरोध इति चेत् सत्यम्; सुमित्राया अपत्यं हि सौमित्रिः । तस्याश्च लक्ष्मणादपि प्रेमपदं राम इति तदपत्यत्वेनोक्तो व्यासेन दाशरथिरिति वा मायाश्रयेणोक्तेर्भारते इवान्यत्राभावाद्बुधप्रायत्वात् रामबाणोधपदिति वा पुंल्यायासोपि " शतं दुर्योधनादींस्ते धनञ्जयशरैर्हतान् । दर्शयि ष्यामि " इति कृष्णेन कृष्णां प्रत्युदीरिते वचसि भीमसेनशरैर्हतानिति वक्तव्ये धनञ्जयेत्युक्तिवद्बोध्यः । " मयैव वध्यौ भवतं त्रिजन्मसु " इति भगवतोक्तत्वात् हिरण्याक्षहिरण्यकशिप्वोः शिशुपालदन्तवक्रयोश्च नृसिंहपदुर्लिङ्गाभ्यां हतत्वदर्शनाच्च " रामलक्ष्मणाभ्यां मिलित्वा तद्वधकरणात् " इत्यादिनागोजिभट्टविरोधसमाधिकथनं कथमिति चिन्त्यम् ॥ १६९ ॥

For Private And Personal Use Only

वानरौघमध्ये ॥ १६५ ॥ प्रबुद्धपद्मप्रतिमैरिति । प्रतिमाशब्दोऽत्र रूपवचनः, नतु सदृशवचनः इवशब्दप्रयोगात् । इष्टभागिनं जयरूपेष्टभाजम् ॥ १६६ ॥ पराजितश्रमं त्यक्तश्रमम् । अत्र सर्गे अधिकाः केचन श्लोकाः क्वापि क्वापि दृश्यन्ते ते न व्याख्याताः । अस्मिन्सर्गे सार्धषट्षष्ट्युत्तरशतश्लोकाः ॥ १६७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तषष्टितमः सर्गः ॥ ६७ ॥

प्रहर्षमीयुर्बहवस्तु वानराः प्रबुद्धपद्मप्रतिमैरिवाननैः । अपूजयन् राघवमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ १६६ ॥ स कुम्भकर्णं सुरसङ्घमर्दनं महत्सु युद्धेषु पराजितश्रमम् । ननन्द हत्वा भरताग्रजो रणे महासुरं वृत्रमिवामराधिपः ॥ १६७ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तषष्टितमः सर्गः ॥ ६७ ॥

कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना । राक्षसा राक्षसेन्द्राय रावणाय न्यवेदयन् ॥ १ ॥ राजन् स कालसङ्काशः संयुक्तः कालकर्मणा । विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान् ॥ २ ॥ प्रतपित्वा मुहूर्तं च प्रशान्तो रामतेजसा । कायेनार्धप्रविष्टेन समुद्रं भीमदर्शनम् ॥ ३ ॥ निकृत्तकण्ठोरुभुजो विक्षरन् रुधिरं बहु । रुद्ध्वा द्वारं शरीरेण लङ्कायाः पर्वतोपमः ॥ ४ ॥ कुम्भकर्णस्तव भ्राता काकुत्स्थशरपीडितः । लगण्डभूतो विकृतो दावदग्ध इव द्रुमः ॥ ५ ॥ तं श्रुत्वा निहतं सङ्ख्ये कुम्भकर्णं महाबलम् । रावणः शोकसन्तप्तो मुमोह च पपात च ॥ ६ ॥

कुम्भकर्णवधश्रवणेन रावणस्य प्रलापः—कुम्भकर्णमित्यादि । अत्र रावणायेत्यत्र यकारो गायत्र्या अष्टादशाक्षरम् । सप्तदशसहस्रश्लोका गताः ॥ १ ॥ कालकर्मणा कालस्य मृत्योः कर्मणा, मरणरूपक्रिययेति यावत् । यद्वा काले कर्मणा कालकर्मणा, परिपक्वकर्मणेत्यर्थः ॥ २ ॥ प्रतपित्वा पराक्रम्य, एतदारभ्य श्लोकत्रयमेकान्वयम् । अर्धप्रविष्टेन अर्धेन कबन्धमात्रेण प्रविष्टेन कायेन समुद्रं रुद्ध्वा । शरीरेण उत्तमाङ्गेन द्वारं रुद्ध्वा । लगण्ड

प्रबुद्धपद्मप्रतिमैरित्यत्र प्रतिमाशब्दो रूपवाचकः, अन्यथा इवशब्दोऽतिरिच्येत ॥ सप्तम्यां कुम्भकर्णवधः ॥ १६६ ॥ १६७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तषष्टितमः सर्गः ॥ ६७ ॥

कुम्भकर्णमिति । य इति गायत्र्या अष्टादशाक्षरं कुम्भकर्णं हतमिति श्लोकस्थास्य चतुर्विंशतितमाक्षरेण य इत्यनेन संगृह्णाति ॥ १ ॥ २ ॥ प्रतपित्वेत्यादि श्लोकत्रयमेकं वाक्यम् । पर्वतोपमः कुम्भकर्णः मुहूर्तं प्रतपित्वा विक्रम्य निकृत्तकण्ठोरुभुजः विक्षरद्रुधिरं यथा भवति तथा काकुत्स्थशरपीडितः दावदग्धो वृक्ष

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूतः पिण्डीभूतः। लगण्डोऽजगर इत्येके। विकृतः विकृतशरीरः। रामतेजसा प्रशान्त इत्यन्वयः ॥ ३–१० ॥ मम बान्धवानां च शल्यं शोकमित्यर्थः

पितृव्यं निहतं दृष्ट्वा देवान्तकनरान्तकौ। त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः ॥ ७ ॥ भ्रातरं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा। महोदरमहापार्श्वौ शोकाक्रान्तौ बभूवतुः ॥ ८ ॥ ततः कृच्छ्रात् समासाद्य संज्ञां राक्षसपुङ्गवः। कुम्भकर्णवधाद्दीनो विललाप स रावणः ॥ ९ ॥ हा वीर रिपुदर्पघ्न कुम्भकर्ण महाबल। त्वं मां विहाय वै दैवा द्यातोऽसि यमसादनम् ॥ १० ॥ मम शल्यमनुद्धृत्य बान्धवानां महाबल। शत्रुसैन्यं प्रताप्यैकस्त्वं मां सन्त्यज्य गच्छसि ॥ ११ ॥ इदानीं खल्वहं नास्मि यस्य मे दक्षिणो भुजः। पतितो यं समाश्रित्य न बिभेमि सुरासुरात् ॥ १२ ॥ कथमेवंविधो वीरो देवदानवदर्पहा। कालाग्निरुद्रप्रतिमो रणे रामेण वै हतः ॥ १३ ॥ यस्य ते वज्र निष्पेषो न कुर्याद्व्यसनं सदा। स कथं रामबाणार्तः प्रसुप्तोऽसि महीतले ॥ १४ ॥ एते देवगणाः सार्धमृषिभिर्गगने स्थिताः। निहतं त्वां रणे दृष्ट्वा निनदन्ति प्रहर्षिताः ॥ १५ ॥

॥ ११ ॥ इदानीमिति। सुरासुरात् सुरासुरेभ्यः ॥ १२–१५ ॥

इव लगण्डभूतः पिण्डीभूतः अजगरसदृशो वा। "लगण्डोऽजगरो ज्ञेयः" इति जयदेवः। विकृतः विकृतशरीरः। अर्धप्रविष्टेन कायेन समुद्रं रुद्ध्वा शरीरेण शरीरोपरिभागेन लङ्कायाः द्वारं रुद्ध्वा रामतेजसा प्रशान्त इत्यन्वयः ॥ ३–११ ॥ सुरासुरात् सुरासुरेभ्यः ॥ १२–१५ ॥

स०–मम शल्यं रामरूपम्। बान्धवानां मध्ये महाबल! 'बान्धवानां च शल्यमनुद्धृत्येत्यन्वयः' इति नागोजिभट्टव्याख्यानमश्रुतचशब्दाध्याहार इव मम शल्यमित्यनेन मुख्यरावणशल्येन सशल्याना मनुष्याणां पृथग्ग्रहणायोगश्चेति दोषौ प्रादुःष्यातामिति ज्ञेयम ॥११॥ अहं ना पुमान् नास्मि, नपुंसकप्राय इत्यर्थः। सुरासुरात् सुराश्चासुराश्च सुरासुरम् तस्मात्। "येषां च विरोधः शाश्वतिकः" इत्येकवद्भावः। समाहारो वा। नेत्यावर्तते न बिभेमि। नास्मि मृतप्राय इति वा ॥ १२ ॥ दर्पहा दर्पं हन्ति हनिष्यति वा दर्पहा। "नियमे भूत इत्यश्रवणाद्वर्तमाने भविष्यति वा काले चोपपदान्तरेऽपि भवत्येव पुरुषं हन्ति हनिष्यति वा" इति तत्त्वबोधिन्युक्तेः। प्रकृतिनियमपक्षे अदेवदानवदर्प! न विद्यते देवदानवानां दर्पो येन तत्सम्बुद्धिः अदेवदानवदर्प! हा शोकप्रकाशकः शब्दः ॥ १३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लब्धलक्षाः लब्धावसराः ॥ १६ ॥ १७ ॥ भ्रातृहन्तारं न हन्मि यदि तदा इदं व्यर्थजीवितं श्रेयः न च, नैवेत्यर्थः । किन्तु मरणमेव श्रेयो नान्विति

ध्रुवमद्यैव संहृष्टा लब्धलक्षाः प्लवङ्गमाः । आरोक्ष्यन्ति हि दुर्गाणि लङ्काद्वाराणि सर्वशः ॥ १६ ॥ राज्येन नास्ति मे कार्यं किं करिष्यामि सीतया । कुम्भकर्णविहीनस्य जीविते नास्ति मे रतिः ॥ १७ ॥ यद्यहं भ्रातृहन्तारं न हन्मि युधि राघवम् । ननु मे मरणं श्रेयो न चेदं व्यर्थजीवितम् ॥ १८ ॥ अद्यैव तं गमिष्यामि देशं यत्रानुजो मम । नहि भ्रातॄन् समुत्सृज्य क्षणं जीवितुमुत्सहे ॥ १९ ॥ देवा हि मां हसिष्यन्ति दृष्ट्वा पूर्वापकारिणम् । कथमिन्द्रं जयिष्यामि कुम्भकर्ण हते त्वयि ॥२०॥ तदिदं मामनुप्राप्तं विभीषणवचः शुभम् । यदज्ञानान्मया तस्य न गृहीतं महात्मनः ॥ २१ ॥ विभीषणवचो यावत् कुम्भकर्णप्रहस्तयोः । विनाशोऽयं समुत्पन्नो मां व्रीडयति दारुणः ॥२२॥ तस्यायं कर्मणः प्राप्तो विपाको मम शोकदः । यन्मया धार्मिकः श्रीमान् स निरस्तो विभीषणः॥२३॥

सम्बन्धः ॥ १८ ॥ भ्रातॄनिति बहुवचनं पूजार्थम् ॥ १९–२१ ॥ विभीषणेति । कुम्भकर्णप्रहस्तयोरयं दारुणो विनाशः यावत् यदा समुत्पन्नः तत

ध्रुवमिति । लब्धलक्षाः लब्धावसरा इत्यर्थः ॥ १६ ॥१७॥ यद्यहमिति । भ्रातृहन्तारं न हन्मि यदि तदा इदं व्यर्थजीवितं श्रेयो न च, नैवेत्यर्थः । किन्तु मरणमेव श्रेयो नन्विति सम्बन्धः । यद्यहमित्यस्य वास्तवार्थस्तु–भ्रातृहन्तारं हत्वा सुखेन जीवेयमित्यत आह–यद्यहमिति । भ्रातृहन्तारं राघवं हन्मि यदि तदा मे मम मरणं नास्ति, अत एव श्रेयः मरणानन्तरभाविभगवत्पार्षदताप्राप्तिरूपश्रेयश्च नास्ति, अत एवेदं जीवितं व्यर्थमिति सम्बन्धः॥१८॥ अद्यैवेति । भ्रातॄनिति बहुवचनं पूजार्थम् ॥१९–२१॥ विभीषणवच इति । प्रहस्तकुम्भकर्णयोर्दारुणोऽयं विनाशो यावत् यदा समुत्पन्नस्तत आरभ्य विभीषणवचो व्रीडयतीति सम्बन्धः ॥ २२ ॥२३॥

स०–भ्रातॄन् इति । एकस्य मुख्यस्य भ्रातुर्गमनेनानेकप्रकारेण स्वदौर्बल्यमायातमिति द्योतयति बहुवचनेन । खरादीन् मृतान् स्मृत्वा वा विभीषणकुबेराभ्यां बहिष्कृताभ्यां सह मृतमेकं संस्मृत्य वा बहुवचनम् । उत्सृज्यपदस्वारस्यादिवोत्तरत्र ' स निरस्तो विभीषणः ' इति तदनुतापस्वारस्याच्च ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आरभ्य विभीषणवचो मां व्रीडयति पीडयतीत्यर्थः ॥ २२-२४ ॥ इति श्रीगोविन्द॰श्रीरामा॰रत्न॰युद्धकाण्डव्याख्याने अष्टषष्टितमः सर्गः ॥ ६८॥
अथातिकायनिर्गमः-एवमित्यादि ॥ १ ॥ एवमिति । तातमध्यमः तातेषु मध्यमः, मध्यमपितेत्यर्थः । एवमेव महावीर्यः त्वदुक्तप्रकारेणैव महावीर्यः

इति बहुविधमाकुलान्तरात्मा कृपणमतीव विलप्य कुम्भकर्णम् । न्यपतदथ दशाननो भृशार्तस्तमनुजमिन्द्ररिपुं हतं विदित्वा ॥ २४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टषष्टितमः सर्गः ॥ ६८ ॥

एवं विलपमानस्य रावणस्य दुरात्मनः । श्रुत्वा शोकाभितप्तस्य त्रिशिरा वाक्यमब्रवीत् ॥ १ ॥ एवमेव महावीर्यो हतो नस्तातमध्यमः । न तु सत्पुरुषा राजन् विलपन्ति यथा भवान् ॥ २ ॥ नूनं त्रिभुवनस्यापि पर्याप्तस्त्वमसि प्रभो । स कस्मात् प्राकृत इव शोचस्यात्मानमीदृशम् ॥ ३ ॥ ब्रह्मदत्ताऽस्ति ते शक्तिः कवचः सायको धनुः । सहस्रखरसंयुक्तो रथो मेघस्वनो महान् ॥ ४ ॥ त्वयाऽसकृद्विशस्त्रेण विशस्ता देवदानवाः । स सर्वायुधसम्पन्नो राघवं शास्तुमर्हसि ॥ ५ ॥ कामं तिष्ठ महाराज निर्गमिष्याम्यहं रणम् । उद्धरिष्यामि ते शत्रून् गरुडः पन्नगानिव ॥ ६ ॥ शम्बरो देवराजेन नरको विष्णुना यथा । तथाऽद्य शयिता रामो मया युधि निपातितः ॥ ७ ॥ श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः । पुनर्जातमिवात्मानं मन्यते कालचोदितः ॥ ८ ॥

हतः, देवादिति शेषः ॥ २ ॥ ईदृशमिति शोकक्रियाविशेषणम् । आत्मानम्, उद्दिश्येति शेषः ॥ ३ ॥ ब्रह्मदत्तेत्यादिश्लोकद्वयमेकान्वयम् । विशस्त्रेण निरायुधेन ॥ ४-६ ॥ शम्बर इति । नरकोऽत्र सिंहिकायां विप्रचित्तेर्जातेषु वातापिप्रमुखेष्वन्यतमः । "वातापिर्नमुचिश्चैव इल्वलः सृमरस्तथा । अन्धको नरकश्चैव कालनाभस्तथैव च ॥ " इत्युक्तेः । न तु कृष्णहतो भूसुतो नरकासुरः । तस्य वाल्मीकिप्रबन्धनिर्माणकाले असञ्जातत्वात् ॥ ७ ॥ ८ ॥
हतेति । कुम्भकर्णं हतं ' निकृत्तकण्ठोरुभुजः ' इत्याद्युक्तप्रकारेण विचित्रवधं प्राप्तं विदित्वा बहु विलप्य न्यपतदिति सम्बन्धः ॥ २४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टषष्टितमः सर्गः ॥ ६८ ॥ १ ॥ एवमेव महावीर्यः ' देवदानवदर्पहा । कालाग्निरुद्रप्रतिमः ' इत्याद्युक्तप्रकारेण महावीर्यः हतः, देवादिति शेषः । सत्पुरुषाः शूराः ॥ १-६ ॥ शम्बर इति । नरको विष्णुना यथा, अयं नरकः सिंहिकायां विप्रचित्तेर्जातेषु पुत्रेष्वन्यतमः । तदुक्तं विष्णुपुराणे-" वातापिर्नमुचिश्चैव इल्वलः सृमरस्तथा । अन्धको नरकश्चैव कालनाभस्तथैव च ॥ " इति स उच्यते । ननु यदुनायकेन

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वेति । त्रिशिरसो वचनं स्वेषामपि तुल्यत्वाद्देवान्तकादयोऽपि युद्धोद्युक्ता बभूवुरित्यर्थः॥९॥१०॥ अन्तरिक्षे गतं गमनं येषां तेऽन्तरिक्षगताः॥११॥ देवादिभिः सह समरमासाद्य पराजिता न श्रूयन्त इत्यन्वयः ॥१२॥ विदुषः विद्यावन्तः । प्रवरविज्ञानाः उत्कृष्टशास्त्रज्ञानाः ॥१३ ॥ तुल्यवर्चसैरित्यत्र

श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ । अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः ॥ ९ ॥ ततोऽहमहमित्येव गर्जन्तो नैर्ऋतर्षभाः । रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः ॥१०॥ अन्तरिक्षगताः सर्वे सर्वे मायाविशारदाः । सर्वे त्रिदशदर्पघ्नाः सर्वे च रणदुर्जयाः ॥ ११ ॥ सर्वे सुबलसम्पन्नाः सर्वे [illegible]र्णकीर्तयः । सर्वे समरमासाद्य न श्रूयन्ते पराजिताः । देवैरपि सगन्धर्वैः सकिन्नरमहोरगैः ॥ १२ ॥ सर्वे च वि[illegible] वीराः सर्वे युद्धविशारदाः । सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा ॥ १३ ॥ स तैस्तदा भास्करतुल्यवर्चसैः सुतैर्वृतः शत्रुबलप्रमर्दनैः । रराज राजा मघवान् यथाऽमरैर्वृतो महादानवदर्पनाशनैः ॥ १४ ॥ स [illegible] सम्परिष्वज्य भूषयित्वा च भूषणैः । आशीर्भिश्च प्रशस्ताभिः प्रेषयामास संयुगे ॥ १५ ॥ युद्धोन्मत्तं च म[illegible] च भ्रातरौ चापि रावणः । रक्षणार्थं कुमाराणां प्रेषयामास संयुगे ॥ १६ ॥ तेऽभिवाद्य महात्मानं रावणं रिपुरावणम् । कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे ॥१७॥ सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः । निर्जग्मुर्नैर्ऋतश्रेष्ठाः षडेते युद्धकांक्षिणः ॥ १८ ॥

समासान्त आर्षः ॥ १४ ॥ स इति । आशीर्भिः, सहेति शेषः ॥ १५ ॥ युद्धोन्मत्तमिति । अत्र युद्धोन्मत्तमत्तौ महोदरमहापार्श्वपर्यायनामानौ रावणभ्रातरौ । एतौ परत्र प्रकाशयिष्येते ॥ १६ ॥ रिपून् रावयतीति रिपुरावणः ॥ १७ ॥ सर्वौष[illegible]भिः "कोष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने । ॥२१६॥

इतो भौमः । शम्बर इत्यस्य वास्तवार्थस्तु–अराम इति छेदः । अरामो रामव्यतिरिक्तः कश्चनाद्य मया युद्धे निपातितः शयिता । रामस्यासाध्यत्वादिति भावः ॥ ७–१० ॥ अन्तरिक्षगताः अन्तरिक्षे गतं गमनं येषां ते ॥ ११–१५ ॥ युद्धोन्मत्तमत्तशब्दौ महोदरमहापार्श्वयोः पर्यायनामनी ॥ १६–१७ ॥ सर्वौषधीभिरिति ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वचाचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः ॥ " इत्युक्ताभिः आयुधप्रहारनिवर्तिकाभिः ओषधीभिरित्याहुः । समालभ्य समालिप्य ॥ १८–२० ॥ अस्तमूर्धनीत्येतदुत्तरक्षणे विनाशसूचनाय॥२१–२३॥ त्रिभिः काञ्चनपर्वतैः शिखरभूतैर्हिमवानिवेत्यर्थः॥२४॥ अतिकाय इत्यादिश्लोकद्वयमेकान्वयम् ।

त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ । महोदरमहापार्श्वौ निर्जग्मुः कालचोदिताः ॥ १९ ॥ ततः सुदर्शनं नाम नीलजीमूतसन्निभम् । ऐरावतकुले जातमारुरोह महोदरः ॥ २० ॥ सर्वायुधसमायुक्तं तूणीभिश्च स्वलंकृतम् । रराज गजमास्थाय सवितेवास्तमूर्धनि ॥ २१ ॥ हयोत्तमसमायुक्तं सर्वायुधसमाकुलम् । आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः ॥ २२ ॥ त्रिशिरा रथमास्थाय विरराज धनुर्धरः । सविद्युदुल्कः शैलाग्रे सेन्द्रचाप इवाम्बुदः ॥ २३ ॥ त्रिभिः किरीटैः शुशुभे त्रिशिराः स रथोत्तमे । हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः ॥ २४ ॥ अतिकायोऽपि तेजस्वी राक्षसेन्द्रसुतस्तदा । आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम् ॥ २५ ॥ सुचक्राक्षं सुसंयुक्तं स्वनुकर्षं सुकूबरम् । तूणीबाणासनैर्दीप्तं प्रासासिपरिघाकुलम् ॥२६॥ स काञ्चनविचित्रेण मुकुटेन विराजता । भूषणैश्च बभौ मेरुः किरणैरिव भासयन् ॥ २७ ॥ स रराज रथे तस्मिन् राजसूनुर्महाबलः । वृतो नैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः ॥ २८ ॥ हयमुच्चैःश्रवःप्रख्यं श्वेतं कनकभूषणम् । मनोजवं महाकायमारुरोह नरान्तकः ॥ २९ ॥ गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः । शक्तिमादाय तेजस्वी गुहः शिखिगतो यथा ॥ ३० ॥

सुसंयुक्तं सुदृढम् । स्वनुकर्षम् । "अनुकर्षो दार्वधःस्थम्" इत्यमरः । सुकूबरं शोभनयुगंधरम् । "कूबरस्तु युगन्धरः" इत्यमरः ॥२५॥२६ ॥ किरणैः

ओषधीभिः आयुधप्रहारनिवारकौषधविशेषैः । ओषधयस्तु–" कोष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने । त्वचाचम्पकमुस्ताश्च सर्वौषध्यो दश स्मृताः ॥" इति ॥ १८–२३ ॥ त्रिभिरिति । त्रिभिः काञ्चनपर्वतैः शिखरभूतैः हिमवानिवेत्यर्थः ॥ २४ ॥ २५ ॥ सुचक्राक्षमिति । स्वनुकर्षम् "अनुकर्षो दार्वधःस्थम्" इत्यमरः । सुकूबरं शोभनयुगन्धरम् ॥ २६–३० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भासयन् भासमानः मेरुरिव बभावित्यन्वयः ॥ २७–३० ॥ दवान्तक इति । अत्रापि विरराजेति संबध्यते । देवान्तकः परिघमादाय समुद्रमथने गिरिं मन्दरगिरिम् परिगृह्य तिष्ठतो विष्णोर्वपुर्विडम्बयन् विरराज ॥ ३१–३६ ॥ मरणं वेत्यर्धे निर्जग्मुरित्युपस्कार्यम् ॥ ३७ ॥ इति कृत्वेत्यर्धम् । इत्थं

देवान्तकः समादाय परिघं वज्रभूषणम् । परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन् ॥ ३१ ॥ महापार्श्वो महाकायो गदामादाय वीर्यवान् । विरराज गदापाणिः कुबेर इव संयुगे ॥ ३२ ॥ प्रतस्थिरे महात्मानो बलैरप्रतिमैर्वृताः । सुरा इवामरावत्या बलैरप्रतिमैर्वृताः ॥ ३३ ॥ तान् गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिस्वनैः । अनुजग्मुर्महात्मानो राक्षसाः प्रवरायुधाः ॥ ३४ ॥ ते विरेजुर्महात्मानः कुमाराः सूर्यवर्चसः । किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे ॥ ३५ ॥ प्रगृहीता बभौ तेषां शस्त्राणामावलिः सिता । शारदाभ्रप्रतीकाशा हंसावलिरिवाम्बरे ॥ ३६ ॥ मरणं वापि निश्चित्य शत्रूणां वा पराजयम् ॥ ३७ ॥ इति कृत्वा मतिं वीरा निर्जग्मुः संयुगार्थिनः ॥ ३८ ॥ जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान् । जगृहुश्चापि ते वीरा निर्यान्तो युद्धदुर्मदाः ॥३९॥ क्ष्वेलितास्फोटनिनदैश्चचाल च वसुन्धरा । रक्षसां सिंहनादैश्च पुस्फोटेव तदाऽम्बरम् ॥४०॥ तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः । ददृशुर्वानरानीकं समुद्यतशिलानगम् ॥४१॥ हरयोऽपि महात्मानो ददृशुर्नैर्ऋतं बलम् । हस्त्यश्वरथसम्बाधं किङ्किणीशतनादितम् ॥ ४२ ॥ नीलजीमूतसङ्काशं समुद्यतमहायुधम् । दीप्तानलरविप्रख्यैः सर्वतो नैर्ऋतैर्वृतम् ॥ ४३ ॥

कर्तव्यमित्येवंरूपां मतिं कृत्वेत्यर्थः ॥ ३८ ॥ जगर्जुः मेघध्वनिं चक्रुः । प्रणेदुः सिंहनादं चक्रुः । चिक्षिपुः क्षेपवचनान्यूचुः । सायकान् जगृहु ॥२१७॥

देवान्तक इत्यत्रापि विरराजेति सम्बध्यते । परिघं परिगृह्य समुद्रमथने मन्दरगिरिं परिगृह्य स्थितस्य विष्णोर्वपुर्विडम्बयन् रराजेत्यर्थः ॥ ३१–३६ ॥ मरणं स्वमरणं वा शत्रूणां पराजयं वा भवत्विति मतिं कृत्वा तां निश्चित्य निर्जग्मुरिति सम्बन्धः ॥ ३७ ॥ ३८ ॥ चिक्षिपुः शत्रुविषये आक्षेपवचनान्यूचुः ॥ ३९–४३ ॥

For Private And Personal Use Only

रित्यन्वयः ॥३९–४३ ॥ लब्धलक्षाः लब्धपराक्रमविषयाः ॥४४–४६॥ सञ्चारप्रकारमेवाह–केचिदित्यादिसार्धश्लोक एकान्वयः । द्रुमशिलायुधाः इति

तद् दृष्ट्वा बलमायान्तं लब्धलक्षाः प्लवङ्गमाः । समुद्यतमहाशैलाः सम्प्रणेदुर्महाबलाः । अमृष्यमाणा रक्षांसि प्रतिनर्दन्ति वानराः ॥ ४४ ॥ ततः समुद्घुष्टरवं निशम्य रक्षोगणा वानरयूथपानाम् । अमृष्यमाणाः परहर्षमुग्रं महाबला भीमतरं विनेदुः ॥ ४५ ॥ ते राक्षसबलं घोरं प्रविश्य हरियूथपाः । विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥ ४६ ॥ केचिदाकाशमाविश्य केचिदुर्व्यां प्लवङ्गमाः । रक्षस्सैन्येषु संक्रुद्धाश्चेरुर्द्रुमशिलायुधाः ॥ ४७ ॥ द्रुमांश्च विपुलस्कन्धान् गृह्य वानरपुङ्गवाः । तद्युद्धमभवद् घोरं रक्षोवानरसङ्कुलम् ॥ ४८ ॥ ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमाम् । बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ॥४९॥ सिंहनादान् विनेदुश्च रणे वानरराक्षसाः । शिलाभिश्चूर्णयामासुर्यातुधानान् प्लवङ्गमाः ॥ ५० ॥ निजघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान् । केचिद्रथगतान् वीरान् गजवाजिगतानपि ॥५१॥ निजघ्नुः सहसाऽऽप्लुत्य यातुधानान् प्लवङ्गमाः । शैलशृङ्गाचिताङ्गाश्च मुष्टिभिर्वान्तलोचनाः ॥ ५२ ॥ चेरुः पेतुश्च नेदुश्च तत्र राक्षसपुङ्गवाः । राक्षसाश्च शरैस्तीक्ष्णैर्बिभिदुः कपिकुञ्जरान् ॥५३॥ शूलमुद्गरखड्गैश्च जघ्नुः प्रासैश्च शक्तिभिः । अन्योन्यं पातयामासुः परस्परजयैषिणः ॥५४॥ रिपुशोणितदिग्धाङ्गास्तत्र वानरराक्षसाः । ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः ॥ ५५ ॥ मुहूर्तेनावृता भूमिरभवच्छोणिताप्लुता । विकीर्णपर्वताकारै रक्षोभिररिमर्दनैः । आसीद्वसुमती पूर्णा तदा युद्धमदान्वितैः ॥ ५६ ॥

स्वभावोक्तिः ॥ ४७ ॥ ४८ ॥ अनूपमाम् अनुपमाम् ॥ ४९–५६ ॥

केचिदित्यादि सार्धश्लोकमेकं वाक्यम् । द्रुमशिलायुधा इति स्वभावोक्तिः । रक्षस्सैन्येषु विषये । संक्रुद्धाः केचित्प्लवङ्गमाः द्रुमशिलायुधास्सन्तः आकाशमाविश्य चेरुः केचिद्वानरपुङ्गवाः विपुलस्कन्धान् द्रुमान् गृह्य गृहीत्वा उर्व्यां चेरुरिति योजना ॥ ४७–५१ ॥ शैलशृङ्गाचिताङ्गाः गिरिशिखरैर्व्याप्तदेहाः । मुष्टिभिः मुष्टिप्रहारैः वान्तलोचनाः बहिर्निर्गतलोचनाः ॥ ५२–५६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आक्षिप्ताः क्षिप्यमाणाश्चेति नियुद्धप्रकारकथनम् । अङ्गैः हस्तपादादिभिः ॥ ५७-६० ॥ छिन्नेति । छिन्नवर्मतनुत्राणाः छिन्नवर्मरूपतनुत्राणाः । रुधिरं प्रस्रुताः स्रुतवन्तः । मुमुचुरिति यावत् । रससारं निर्यासम् ॥ ६१-६४ ॥ क्षुरप्रैरिति । शिलाः शिलाश्चेत्यर्थः ॥ ६५ ॥ ६६ ॥ गर्वितं हृष्टं च

आक्षिप्ताः क्षिप्यमाणाश्च भग्नशूलाश्च वानरैः । पुनरङ्गैस्तथा चक्रुरासन्ना युद्धमद्भुतम् ॥ ५७ ॥ वानरान् वानरैरेव जघ्नुस्ते रजनीचराः । राक्षसान् राक्षसैरेव जघ्नुस्ते वानरा अपि ॥ ५८ ॥ आक्षिप्य च शिलास्तेषां निजघ्नू राक्षसा हरीन् । तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः ॥५९॥ निजघ्नुः शैलशूलास्त्रैर्बिभिदुश्च परस्परम् । सिंहनादान् विनेदुश्च रणे वानरराक्षसाः ॥ ६० ॥ छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः । रुधिरं प्रस्रुतास्तत्र रससारमिव द्रुमाः ॥ ६१ ॥ रथेन च रथं चापि वारणेनैव वारणम् ॥ ६२ ॥ हयेन च हयं केचिन्निजघ्नुर्वानरा रणे । प्रहृष्टमनसः सर्वे प्रगृहीतमनःशिलाः ॥६३॥ हरयो राक्षसान् जघ्नुर्द्रुमैश्च बहुशाखिभिः । तद्युद्धमभवद् घोरं रक्षोवानरसङ्कुलम् ॥ ६४ ॥ क्षुरप्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः । राक्षसा वानरेन्द्राणां चिच्छिदुः पादपान् शिलाः ॥ ६५ ॥ विकीर्णैः पर्वताग्रैश्च द्रुमैश्छिन्नैश्च संयुगे । हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाऽभवत् ॥ ६६ ॥ ते वानरा गर्वितहृष्टचेष्टाः सङ्ग्राममासाद्य भयं विमुच्य । युद्धं तु सर्वे सह राक्षसैस्तैर्नानायुधाश्चक्रुरदीनसत्त्वाः ॥६७॥ तस्मिन् प्रवृत्ते तुमुले विमर्दे प्रहृष्यमाणेषु वलीमुखेषु । निपात्यमानेषु च राक्षसेषु महर्षयो देवगणाश्च नेदुः ॥ ६८॥ ततो हयं मारुततुल्यवेगमारुह्य शक्तिं निशितां प्रगृह्य । नरान्तको वानरराजसैन्यं महार्णवं मीन इवाविवेश॥६९॥

यथा भवति तथा चेष्टन्त इति गर्वितहृष्टचेष्टाः । नानायुधाः गृहीतराक्षसायुधा इत्यर्थः ॥ ६७ ॥ विमर्दे युद्धे ॥ ६८ ॥ ६९ ॥

आक्षिप्ताः क्षिप्यमाणा इति नियुद्धप्रकारकथनम् । अङ्गैः हस्तपादादिभिः ॥ ५७-६० ॥ रससारं निर्यासम् ॥ ६१-७१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जघानेति । इत्थमिति शेषः ॥ ७०-७३ ॥ ज्वलन्तं ज्वलन्तमिव स्थितम् । विभावसुः वह्निः ॥ ७४ ॥ ७५ ॥ प्रमृद्नन् मर्दयन् ॥ ७६ ॥ न शेकुरिति ।

स वानरान् सप्त शतानि वीरः प्रासेन दीप्तेन विनिर्बिभेद । एकक्षणेनेन्द्ररिपुर्महात्मा जघान सैन्यं हरिपुङ्गवानाम् ॥ ७० ॥ ददृशुश्च महात्मानं हयपृष्ठे प्रतिष्ठितम् । चरन्तं हरिसैन्येषु विद्याधरमहर्षयः ॥ ७१ ॥ स तस्य ददृशे मार्गो मांसशोणितकर्दमः । पतितैः पर्वताकारैर्वानरैरभिसंवृतः ॥७२॥ यावद्विक्रमितुं बुद्धिं चक्रुः प्लवगपुङ्गवाः । तावदेतानतिक्रम्य निर्बिभेद नरान्तकः ॥ ७३ ॥ ज्वलन्तं प्रासमुद्यम्य सङ्ग्रामाग्रे नरान्तकः । ददाह हरिसैन्यानि वनानीव विभावसुः ॥ ७४ ॥ यावदुत्पाटयामासुर्वृक्षान् शैलान् वनौकसः । तावत् प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः ॥ ७५ ॥ दिक्षु सर्वासु बलवान् विचचार नरान्तकः । प्रमृद्नन् सर्वतो युद्धे प्रावृट्काले यथाऽनिलः ॥ ७६ ॥ न शेकुर्धावितुं वीरा न स्थातुं स्पन्दितुं भयात् । उत्पतन्तं स्थितं यान्तं सर्वान् विव्याध वीर्यवान् ॥७७॥ एकेनान्तककल्पेन प्रासेनादित्यतेजसा । भिन्नानि हरिसैन्यानि निपेतुर्धरणीतले ॥ ७८ ॥ वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम् । न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम् ॥ ७९ ॥ पततां हरिवीराणां रूपाणि प्रचकाशिरे । वज्रभिन्नाग्रकूटानां शैलानां पततामिव ॥८०॥ ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः । ते स्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे ॥ ८१ ॥ विप्रेक्षमाणः सुग्रीवो ददर्श हरिवाहिनीम् । नरान्तकभयत्रस्तां विद्रवन्तीमितस्ततः ॥ ८२ ॥ विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम् । गृहीतप्रासमायान्तं हयपृष्ठे प्रतिष्ठितम् ॥ ८३ ॥ अथोवाच महातेजाः सुग्रीवो वानराधिपः । कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम् ॥ ८४ ॥

यतो हेतोरुत्पतन्तं स्थितं यान्तं च विव्याध अतः स्पन्दनादौ न शेकुरित्यर्थः ॥ ७७-८० ॥ कुम्भकर्णेन पातितानां नीलादीनामुत्तरत्र पौरुष स इति । तस्य मार्गः तेन युद्धार्थं गतो मार्ग इत्यर्थः । पतितैर्वानरैरभिसंवृतस्सन् मांसशोणितकर्दमस्सन् ददृशे इति सम्बन्धः ॥ ७२-८१॥

For Private And Personal Use Only

कथनसाङ्गत्यायैषां लब्धसंज्ञत्वमाह—ये त्विति ॥ ८१–८५ ॥ स इति । मेघसङ्काशादिति निबिडत्वलक्षणसमानधर्मप्रयुक्तेयमुपमा । मेघानीकादित्यत्र

गच्छ त्वं राक्षसं वीरो योऽसौ तुरगमास्थितः । क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय ॥ ८५ ॥ स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्ततः । अनीकान्मेघसङ्काशान्मेघानीकादिवांशुमान् ॥ ८६ ॥ शैलसङ्घातसङ्काशो हरीणामुत्तमोऽङ्गदः । रराजाङ्गदसन्नद्धः सधातुरिव पर्वतः ॥ ८७ ॥ निरायुधो महातेजाः केवलं नखदंष्ट्रवान् । नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद्वचः ॥ ८८ ॥ तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि । अस्मिन् वज्रसमस्पर्शं प्रासं क्षिप ममोरसि ॥ ८९ ॥ अङ्गदस्य वचः श्रुत्वा प्रचुक्रोध नरान्तकः । सन्दश्य दशनैरोष्ठं विनिश्वस्य भुजङ्गवत् ॥ ९० ॥ अभिगम्याङ्गदं क्रुद्धो वालिपुत्रं नरान्तकः ॥ ९१ ॥ प्रासं समाविध्य तदाऽङ्गदाय समुज्ज्वलन्तं सहसोत्ससर्ज । स वालिपुत्रोरसि वज्रकल्पे बभूव भग्नो न्यपतच्च भूमौ ॥ ९२ ॥ तं प्रासमालोक्य तदा विभग्नं सुपर्णकृत्तोरगभोगकल्पम् । तलं समुद्यम्य स वालिपुत्रस्तुरङ्गमं तस्य जघान मूर्ध्नि ॥ ९३ ॥ निमग्नतालुः स्फुटिताक्षितारो निष्क्रान्तजिह्वोऽचलसन्निकाशः । स तस्य वाजी निपपात भूमौ तलप्रहारेण विशीर्णमूर्धा ॥ ९४ ॥ नरान्तकः क्रोधवशं जगाम हतं तुरङ्गं पतितं निरीक्ष्य । स मुष्टिमुद्यम्य महाप्रभावो जघान शीर्षे युधि वालिपुत्रम् ॥ ९५ ॥ अथाङ्गदो मुष्टिविभिन्नमूर्धा सुस्राव तीव्रं रुधिरं भृशोष्णम् । मुहुर्विजज्वाल मुमोह चापि संज्ञां समासाद्य विसिष्मिये च ॥ ९६ ॥ अथाङ्गदो वज्रसमानवेगं संवर्त्य मुष्टिं गिरिशृङ्गकल्पम् । निपातयामास तदा महात्मा नरान्तकस्योरसि वालिपुत्रः ॥ ९७ ॥

तु निष्क्रमणापादानत्वधर्मप्रयुक्तेत्युपमाद्वयस्य निर्वाहः ॥ ८६ ॥ शैलेति । सङ्घातः निबिडसंवेशः । अङ्गदसन्नद्धः सन्नद्धाङ्गदः ॥ ८७–९० ॥ अभिगम्येति । अयमुत्तरशेषः ॥ ९१–९७ ॥

अङ्गदसन्नद्धः सन्नद्धाङ्गदः ॥८७–९०॥ अभिगम्याङ्गदमित्यादिसार्धश्लोकमेकं वाक्यम् । वालिपुत्रमभिगम्य प्रासमुत्ससर्ज, स भूमौ न्यपतदिति सम्बन्धः ॥९१–९७॥ ॥२२९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स मुष्टीति । ज्वालारूपेण वमता उद्गच्छता शोणितेन दिग्धगात्रः ॥ ९८ ॥ ९९ ॥ अथेति । तत् कृतवानित्यत्र तदित्यव्ययं पदम् । तस्मादित्यर्थः । अङ्गदः हि यस्मात् सुदुष्करम् अत एव राममनःप्रहर्षणं विक्रमं कृतवान् । तस्मादित्यर्थः । विसिष्मिये सोऽपीत्यत्र तच्छन्देन राममनःप्रहर्षण

स मुष्टिनिष्पिष्टविभिन्नवक्षा ज्वालावमच्छोणितदिग्धगात्रः । नरान्तको भूमितले पपात यथाऽचलो वज्रनिपातभग्नः ॥ ९८ ॥ अथान्तरिक्षे त्रिदशोत्तमानां वनौकसां चैव महाप्रणादः । बभूव तस्मिन्निहतेऽग्र्यवीरे नरान्तके वालिसुतेन सङ्ख्ये ॥ ९९ ॥ अथाङ्गदो राममनःप्रहर्षणं सुदुष्करं तत् कृतवान् हि विक्रमम् । विसिष्मिये सोऽप्यतिवीर्यविक्रमः पुनश्च युद्धे स बभूव हर्षितः ॥ १०० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनसप्ततितमः सर्गः ॥ ६९ ॥

नरान्तकं हतं दृष्ट्वा चुक्रुशुर्नैर्ऋतर्षभाः । देवान्तकस्त्रिमूर्धा च पौलस्त्यश्च महोदरः ॥ १ ॥
आरूढो मेघसङ्काशं वारणेन्द्रं महोदरः । वालिपुत्रं महावीर्यमभिदुद्राव वीर्यवान् ॥ २ ॥
भ्रातृव्यसनसन्तप्तस्तथा देवान्तको बली । आदाय परिघं दीप्तमङ्गदं समभिद्रवत् ॥ ३ ॥
रथमादित्यसङ्काशं युक्तं परमवाजिभिः । आस्थाय त्रिशिरा वीरो वालिपुत्रमथाभ्ययात् ॥ ४ ॥

मित्यत्र गुणीभूतो रामशब्दः परामृश्यते । हर्षितः विस्मितेन रामेण श्लाघया तोषितः । स च अङ्गदश्च पुनः युद्धे बभूव, युद्धविषये सन्नद्धो बभूवेत्यर्थः ॥ १०० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनसप्ततितमः सर्गः ॥ ६९ ॥

नरान्तकमित्यादि । पौलस्त्य इति त्रिमूर्धविशेषणम्, न तु महोदरस्य । देवान्तकादयस्त्रयश्चुक्रुशुरिति संबन्धः ॥ १ ॥ २ ॥ भ्रातृव्यसनेति । समाभि

॥ ९८-१०० ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोनसप्ततितमः सर्गः ॥६९ ॥ (अत्र सर्गविच्छेदो बहुषु पुस्तकेषु न दृश्यते इत्यस्माभिरपि न कृतः । पूर्वोत्तरवाक्ययोरेककर्तृकयुद्धवर्णनात् । इति कतकः) ॥ १-१८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

द्रवत् समभ्यद्रवत् ॥ ३-१० ॥ देवान्तकश्चेति । व्यपचक्राम पश्चादाजगाम ॥ ११ ॥ १२ ॥ अस्य महोदरस्य ॥ १३ ॥ तस्य अङ्गदस्य । तस्य

स त्रिभिर्देवदर्पघ्नैर्नैर्ऋतेन्द्रैरभिद्रुतः । वृक्षमुत्पाटयामास महाविटपमङ्गदः ॥ ५ ॥ देवान्तकाय तं वीरश्चिक्षेप सहसाऽङ्गदः । महावृक्षं महाशाखं शक्रो दीप्तमिवाशनिम् ॥ ६ ॥ त्रिशिरास्तं प्रचिच्छेद शरैराशीविषोपमैः । स वृक्षं कृत्तमालोक्य उत्पपात तदाऽङ्गदः ॥ ७ ॥ स ववर्ष ततो वृक्षान् शैलांश्च कपिकुञ्जरः । तान् प्रचिच्छेद संक्रुद्धस्त्रिशिरा निशितैः शरैः ॥८॥ परिघाग्रेण तान् वृक्षान् बभञ्ज च सुरान्तकः । त्रिशिराश्चाङ्गदं वीरमभिदुद्राव सायकैः ॥ ९ ॥ गजेन समभिद्रुत्य वालिपुत्रं महोदरः । जघानोरसि संक्रुद्धस्तोमरैर्वज्रसन्निभैः ॥ १० ॥ देवान्तकश्च संक्रुद्धः परिघेण तदाऽङ्गदम् । उपगम्याभिहत्याशु व्यपचक्राम वेगवान् ॥ ११ ॥ स त्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत् समभिद्रुतः । न विव्यथे महातेजा वालिपुत्रः प्रतापवान् ॥ १२ ॥ स वेगवान् महावेगं कृत्वा परमदुर्जयः । तलेन भृशमुत्पत्य जघानास्य महागजम् ॥ १३ ॥ तस्य तेन प्रहारेण नागराजस्य संयुगे । पेततुर्लोचने तस्य विननाद स वारणः ॥ १४ ॥ विषाणं चास्य निष्कृष्य वालिपुत्रो महाबलः । देवान्तकमभिप्लुत्य ताडयामास संयुगे ॥ १५ ॥ स विह्वलितसर्वाङ्गो वातोद्धूत इव द्रुमः । लाक्षारससवर्णं च सुस्राव रुधिरं मुखात् ॥ १६ ॥ अथाश्वास्य महातेजाः कृच्छ्राद्देवान्तको बली । आविध्य परिघं घोरमाजघान तदाऽङ्गदम् ॥ १७ ॥ परिघाभिहतश्चापि वानरेन्द्रात्मजस्तदा । जानुभ्यां पतितो भूमौ पुनरेवोत्पपात ह ॥ १८ ॥ तमुत्पतन्तं त्रिशिरास्त्रिभिर्बाणैरजिह्मगैः । घोरैर्हरिपतेः पुत्रं ललाटेऽभिजघान ह ॥ १९ ॥

नागराजस्येति द्वितीयतच्छब्दान्वयः ॥ १४ ॥ विषाणमिति । महाबलः वालिपुत्रः अस्य महोदरवाहनस्य गजस्य विषाणं निष्कृष्य अभिप्लुत्य वेगेन तमुत्पतन्तमिति । अजिह्मगैः ऋजुगामिभिः ॥ १९-२२ ॥

For Private And Personal Use Only

सन्निपत्य देवान्तकं ताडयामासेति संबन्धः ॥ १९–२२ ॥ जृम्भितं भग्नमिति यावत्, जृम्भितं तद्धनुर्दृढेत्यादिवत् ॥ २३–२९ ॥ तत इति । निसृष्ट

ततोऽङ्गदं परिक्षितं त्रिभिर्नैर्ऋतपुङ्गवैः । हनुमानपि विज्ञाय नीलश्चापि प्रतस्थतुः ॥ २० ॥ ततस्त्रिक्षेप शैलाग्रं नीलस्त्रिशिरसे तदा । तद्रावणसुतो धीमान् बिभेद निशितैः शरैः ॥ २१ ॥ तद्बाणशतनिर्भिन्नं विदारितशिलातलम् । सविस्फुलिङ्गं सज्वालं निपपात गिरेः शिरः ॥ २२ ॥ ततो जृम्भितमालोक्य हर्षाद्देवान्तकस्तदा । परिघेणाभिदुद्राव मारुतात्मजमाहवे ॥ २३ ॥ तमापतन्तमुत्प्लुत्य हनुमान् मारुतात्मजः । आजघान तदा मूर्ध्नि वज्रकल्पेन मुष्टिना ॥ २४ ॥ शिरसि प्रहरन् वीरस्तदा वायुसुतो बली । नादेनाकम्पयच्चैव राक्षसान् स महाकपिः ॥ २५ ॥ स मुष्टिनिष्पिष्टविकीर्णमूर्धा निर्वान्तदन्ताक्षिविलम्बिजिह्वः । देवान्तको राक्षसराजसूनुर्गतासुरुर्व्यां सहसा पपात ॥ २६ ॥ तस्मिन् हते राक्षसयोधमुख्ये महाबले संयति देवशत्रौ । क्रुद्धस्त्रिमूर्धा निशिताग्रमुग्रं ववर्ष नीलोरसि बाणवर्षम् ॥ २७ ॥ महोदरस्तु संक्रुद्धः कुञ्जरं पर्वतोपमम् । भूयः समधिरुह्याशु मन्दरं रश्मिमानिव ॥ २८ ॥ ततो बाणमयं वर्षं नीलस्योरस्यपातयत् । गिरौ वर्षं तडिच्चक्रचापवानिव तोयदः ॥ २९ ॥ ततः शरौघैरभिवर्ष्यमाणो विभिन्नगात्रः कपिसैन्यपालः । नीलो बभूवाथ निसृष्टगात्रो विष्टम्भितस्तेन महाबलेन ॥ ३० ॥ ततस्तु नीलः प्रतिलभ्य संज्ञां शैलं समुत्पाट्य सवृक्षषण्डम् । ततः समुत्पत्य भृशोग्रवेगो महोदरं तेन जघान मूर्ध्नि ॥ ३१ ॥ ततः स शैलेन्द्रनिपातभग्नो महोदरस्तेन महाद्विपेन । विपोथितो भूमितले गतासुः पपात वज्राभिहतो यथाऽद्रिः ॥ ३२ ॥

गात्रः शिथिलगात्रः । विष्टम्भितः स्तब्धीकृतः, एतन्निसृष्टत्वे हेतुः ॥ ३० ॥ ३१ ॥ विपोथितः हिंसितः ॥ ३२–३९ ॥

तत इति । जृम्भितं भग्नम् ॥ २३–२५ ॥ निर्वान्तदन्ताक्षिविलम्बिजिह्वः दन्ताश्च अक्षिणी च विलम्बिजिह्वा च तथा निर्वान्ताः बहिर्निर्गता दन्तादयो यस्येति तथा ॥ २६–२९ ॥ विभिन्नगात्रः श्लथावयवः परवशगात्रो वा । विष्टम्भितः स्तम्भीकृतः ॥ ३०–३८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तामिति । घोरसङ्काशां भयङ्करप्रकाशाम् ॥ ४० ॥ व्यूढे विशाले ॥ ४१ ॥ ४२ ॥ स इति । त्यक्तचेतनः मूर्च्छित इत्यर्थः ॥ ४३–४६ ॥

पितृव्यं निहतं दृष्ट्वा त्रिशिराश्चापमाददे । हनुमन्तं च संक्रुद्धो विव्याध निशितैः शरैः ॥ ३३ ॥ स वायुसूनुः कुपितश्चिक्षेप शिखरं गिरेः । त्रिशिरास्तच्छरैस्तीक्ष्णैर्बिभेद बहुधा बली ॥ ३४ ॥ तद्व्यर्थं शिखरं दृष्ट्वा द्रुमवर्षं महाकपिः । विससर्ज रणे तस्मिन् रावणस्य सुतं प्रति ॥ ३५ ॥ तमापतन्तमाकाशे द्रुमवर्षं प्रतापवान् । त्रिशिरा निशितैर्बाणैश्चिच्छेद च ननाद च ॥ ३६ ॥ ततो हनूमानुत्प्लुत्य हयांस्त्रिशिरसस्तदा । विददार नखैः क्रुद्धो गजेन्द्रं मृगराडिव ॥ ३७ ॥ अथ शक्तिं समादाय कालरात्रिमिवान्तकः । चिक्षेपानिलपुत्राय त्रिशिरा रावणात्मजः ॥ ३८ ॥ दिवः क्षिप्तामिवोल्कां तां शक्तिं क्षिप्तामसङ्गताम् । गृहीत्वा हरिशार्दूलो बभञ्ज च ननाद च ॥ ३९ ॥ तां दृष्ट्वा घोरसङ्काशां शक्तिं भग्नां हनूमता । प्रहृष्टा वानरगणा विनेदुर्जलदा इव ॥ ४० ॥ ततः खड्गं समुद्यम्य त्रिशिरा राक्षसोत्तमः । निजघान तदा व्यूढे वायुपुत्रस्य वक्षसि ॥४१॥ खड्गप्रहाराभिहतो हनूमान् मारुतात्मजः । आजघान त्रिशिरसं तलेनोरसि वीर्यवान् ॥४२॥ स तलाभिहतस्तेन स्रस्तहस्तायुधो भुवि । निपपात महातेजास्त्रिशिरास्त्यक्तचेतनः ॥ ४३ ॥ स तस्य पततः खड्गं समाच्छिद्य महाकपिः । ननाद गिरिसङ्काशस्त्रासयन् सर्व नैर्ऋतान् ॥ ४४ ॥ अमृष्यमाणस्तं घोषमुत्पपात निशाचरः । उत्पत्य च हनूमन्तं ताडयामास मुष्टिना ॥ ४५ ॥ तेन मुष्टिप्रहारेण संचुकोप महाकपिः । कुपितश्च निजग्राह किरीटे राक्षसर्षभम् ॥ ४६ ॥ स तस्य शीर्षाण्यसिना शितेन किरीटजुष्टानि सकुण्डलानि । क्रुद्धः प्रचिच्छेद सुतोऽनिलस्य त्वष्टुः सुतस्येव शिरांसि शक्रः ॥ ४७ ॥

स तस्येति । त्वष्टुः सुतः विश्वरूपः । "विश्वरूपो वै त्वाष्ट्रः पुरोहितः" इत्यादिश्रुतिप्रसिद्धः ॥ ४७ ॥

दिव इति । असङ्गताम् अनिवारिताम् ॥ ३९ ॥ घोरसङ्काशां भयङ्करप्रकाशाम् ॥ ४०–४२ ॥ त्यक्तचेतनः विसंज्ञः, मूर्च्छित इत्यर्थः ॥ ४३–४६ ॥ त्वष्टुः सुतस्य

For Private And Personal Use Only

तानीति । मुक्तानि अनुभूतपुण्यफलानि । अर्कमार्गात् आकाशात् ॥ ४८ ॥ ४९ ॥ हतं त्रिशिरसमित्यादिचतुःश्लोक्येकान्वया । मत्तः महापार्श्वः । मत्त इति महापार्श्वस्य नामान्तरम् । मांसशोणितफेनिलामिति युद्धकालिकरूपम् । शत्रुशोणितराञ्जितामिति पूर्वकालिकरूपम् । महापद्मः पुण्डरीका

तान्यायताक्षाण्यगसन्निभानि प्रदीप्तवैश्वानरलोचनानि । पेतुः शिरांसीन्द्ररिपोर्धरण्यां ज्योतींषि मुक्तानि यथाऽर्कमार्गात् ॥ ४८ ॥ तस्मिन् हते देवरिपौ त्रिशीर्षे हनूमता शक्रपराक्रमेण । नेदुः प्लवङ्गाः प्रचचाल भूमी रक्षांस्यथो दुद्रुविरे समन्तात् ॥ ४९ ॥ हतं त्रिशिरसं दृष्ट्वा तथैव च महोदरम् । हतौ प्रेक्ष्य दुराधर्षौ देवान्तकनरान्तकौ ॥ ५० ॥ चुकोप परमामर्षी मत्तो राक्षसपुङ्गवः । जग्राहार्चिष्मतीं घोरां गदां सर्वायसीं शुभाम् ॥ ५१ ॥ हेमपट्टपरिक्षिप्तां मांसशोणितफेनिलाम् । विराजमानां वपुषा शत्रुशोणितरञ्जिताम् ॥ ५२ ॥ तेजसा सम्प्रदीप्ताग्रां रक्तमाल्यविभूषिताम् । ऐरावतमहापद्मसार्वभौमभयावहाम् ॥ ५३ ॥ गदामादाय संक्रुद्धो मत्तो राक्षसपुङ्गवः । हरीन् समभिदुद्राव युगान्ताग्निरिव ज्वलन् ॥५४ ॥ अथर्षभः समुत्पत्य वानरो रावणानुजम् । मत्तानीकमुपागम्य तस्थौ तस्याग्रतो बली ॥ ५५ ॥ तं पुरस्तात् स्थितं दृष्ट्वा वानरं पर्वतोपमम् । आजघानोरसि क्रुद्धो गदया वज्रकल्पया ॥ ५६ ॥ स तयाऽभिहतस्तेन गदया वानरर्षभः । भिन्नवक्षाः समाधूतः सुस्राव रुधिरं बहु ॥ ५७ ॥ स सम्प्राप्य चिरात् संज्ञामृषभो वानरर्षभः । अभिदुद्राव वेगेन गदां तस्य महात्मनः ॥ ५८ ॥ गृहीत्वा तां गदां भीमामाविध्य च पुनः पुनः । मत्तानीकं महात्मानं जघान रणमूर्धनि ॥ ५९ ॥ स स्वया गदया भग्नो विशीर्णदशनेक्षणः । निपपात ततो मत्तो वज्राहत इवाचलः ॥ ६० ॥

ह्वयदिग्गजः ॥५०–५४॥ अथेति । मत्तानीकम्, मत्तानीक इति च महापार्श्वस्य नामान्तरम् ॥५५॥५६॥ स तयेति । समाधूतः कम्पितः ॥५७॥ स इति ।
विश्वरूपस्य ॥ ४७–५२ ॥ महापद्मः पुण्डरीकाख्यो दिग्गजः ॥ ५३--६१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गदामभिदुद्राव गदां ग्रहीतुं दुद्रावेत्यर्थः ॥ ५८–६१ ॥ तस्मिन्निति । केवलजीवितार्थं यशोरहितजीवनार्थम् । भिन्नार्णवसन्निकाशमिति क्रियाविशेषणम् ॥ ६२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्ततितमः सर्गः ॥ ७० ॥

विशीर्णनयने भूमौ गतसत्त्वे गतायुषि । पतिते राक्षसे तस्मिन् विद्रुतं राक्षसं बलम् ॥६१ ॥* तस्मिन् हते भ्रातरि रावणस्य तन्नैर्ऋतानां बलमर्णवाभम् । त्यक्तायुधं केवलजीवितार्थं दुद्राव भिन्नार्णवसन्निकाशम् ॥ ६२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्ततितमः सर्गः ॥ ७० ॥

स्वबलं व्यथितं दृष्ट्वा तुमुलं रोमहर्षणम् । भ्रातॄंश्च निहतान् दृष्ट्वा शक्रतुल्यपराक्रमान् ॥ १ ॥ पितृव्यौ चापि सन्दृश्य समरे सन्निषूदितौ । युद्धोन्मत्तं च मत्तं च भ्रातरौ राक्षसर्षभौ ॥ २ ॥ चुकोप च महातेजा ब्रह्मदत्तवरो युधि । अतिकायोऽद्रिसङ्काशो देवदानवदर्पहा ॥ ३ ॥ स भास्करसहस्रस्य सङ्घातमिव भास्वरम् । रथमास्थाय शक्रारिरभिदुद्राव वानरान् ॥ ४ ॥ स विस्फार्य महच्चापं किरीटी मृष्टकुण्डलः । नाम विश्रावयामास ननाद च महास्वनम् ॥ ५ ॥ तेन सिंहप्रणादेन नामविश्रावणेन च । ज्याशब्देन च भीमेन त्रासयामास वानरान् ॥ ६ ॥

स्वबलमित्यादि । भ्रातरौ अन्योन्यं भ्रातरौ ॥ १–४ ॥ स इति । मृष्टकुण्डलः शुद्धकुण्डलः ॥ ५ ॥ ६ ॥

भिन्नार्णवसन्निकाशम् इत्येतत् क्रियाविशेषणम् ॥६२॥ इति श्रीमहेश्वरतीर्थविर० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्ततितमः सर्गः ॥७०॥१–७ ॥

---

* उन्मत्तस्तु तथा दृष्ट्वा गवाक्षं भ्रातरं रणे । चुकोप परमक्रुद्धः पर्वताग्निसमद्युतिः ॥ ततः समादाय गदां स वीरो विद्रावयन् वानरसैन्यमुग्रम् । दुद्राव वेगेन तु सैन्यमध्ये दहन् यथा वह्निरतिप्रचण्डः ॥ आपतन्तं तदा दृष्ट्वा राक्षसं भीमविक्रमम् । शैलमादाय दुद्राव गवाक्षः पर्वतोपमः ॥ जिघांसू राक्षसं भीमं तं शैलेन महाबलः । आपतन्तं तदा दृष्ट्वा उन्मत्तोऽपि महागिरिम् ॥ चिच्छेद गदया वीरः शतधा तत्र संयुगे । चूर्णीकृतं गिरिं दृष्ट्वा रक्षसा कपिकुञ्जरः ॥ विस्मितोऽभून्महाबाहुर्जगर्ज च मुहुर्मुहुः । उन्मत्तस्तु सुसंक्रुद्धो ज्वलन्निव राक्षसोत्तमः ॥ गदामादाय वेगेन कपेर्वक्षस्यताडयत् । स तया गदया वीरस्ताडितः कपिकुञ्जरः ॥ पपात भूमौ निःसंज्ञः सुस्राव रुधिरं बहु । पुनः संज्ञामथास्थाय वानरः स समुत्थितः ॥ तलेन ताडयामास ततस्तस्य शिरः कपिः । तेन प्रताडितो वीरो राक्षसः पर्वतोपमः ॥ विस्रस्तदन्तनयनो निपपात महीतले । सुस्राव रुधिरं सोष्णं गतासुश्च ततोऽभवत् ॥ एते श्लोकाः कौसराहपाठ एवोपलभ्यन्ते ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त इति । माहात्म्यं महत्त्वम् । उत्थित इत्यनन्तरमितिकरणं द्रष्टव्यम् ॥७–११॥ कोऽसावित्यादि । हरिलोचनः सिंहदृष्टिः॥१२॥१३॥रथशक्तीभिः रथ

ते दृष्ट्वा देहमाहात्म्यं कुम्भकर्णोऽयमुत्थितः । भयार्ता वानराः सर्वे संश्रयन्ते परस्परम् ॥ ७ ॥ ते तस्य रूपमालोक्य यथा विष्णोस्त्रिविक्रमे । भयाद्वानरयूथास्ते विद्रवन्ति ततस्ततः ॥ ८ ॥ तेऽतिकायं समासाद्य वानरा मूढचेतसः । शरण्यं शरणं जग्मुर्लक्ष्मणाग्रजमाहवे ॥९॥ ततोऽतिकायं काकुत्स्थो रथस्थं पर्वतोपमम् । ददर्श धन्विनं दूराद्गर्जन्तं कालमेघवत् ॥ १० ॥ स तं दृष्ट्वा महात्मानं राघवस्तु विसिष्मिये । वानरान् सान्त्वयित्वाऽथ विभीषणमुवाच ह ॥११॥ कोऽसौ पर्वतसङ्काशो धनुष्मान् हरिलोचनः । युक्ते हयसहस्रेण विशाले स्यन्दने स्थितः ॥१२॥ य एष निशितैः शूलैः सुतीक्ष्णैः प्रासतोमरैः । अर्चिष्मद्भिर्वृतो भाति भूतैरिव महेश्वरः ॥१३॥ कालजिह्वाप्रकाशाभिर्य एषोऽतिविराजते । आवृतो रथशक्तीभिर्विद्युद्भिरिव तोयदः ॥१४॥ धनूंषि चास्य सज्यानि हेमपृष्ठानि सर्वशः । शोभयन्ति रथश्रेष्ठं शक्रचाप इवाम्बरम् ॥१५॥ क एष रक्षश्शार्दूलो रणभूमिं विराजयन् । अभ्येति रथिनां श्रेष्ठो रथेनादित्यतेजसा ॥ १६ ॥ ध्वजशृङ्गप्रतिष्ठेन राहुणाऽभिविराजते । सूर्यरश्मिनिभैर्बाणैर्दिशो दश विराजयन् ॥ १७ ॥

स्थिताभिः शक्तिभिः ॥ १४–१६ ॥ ध्वजशृङ्गप्रतिष्ठेनेति । अनेन राहुध्वजोऽयमित्युक्तम् ॥ १७ ॥

ते तस्य रूपमिति । ते तस्य रूपमालोक्य ते विद्रवन्तीति तच्छब्दद्वयस्य निर्वाहः ॥ ८–११ ॥ कोऽसाविति । हरिलोचनः सिंहदृष्टिः ॥ १२ ॥ १३ ॥ रथशक्तीभिः रथस्थिताभिः ॥ १४–१६ ॥ ध्वजशृङ्गप्रतिष्ठेनेत्यनेन राहुध्वज इत्युक्तं भवति ॥ १७ ॥

स०–ते वानराः विद्रवन्ति व्यद्रवन् । वानरयोधास्ते वानरयोधा अरता यस्मिंस्तस्मिन्रणमण्डले । भस्तं भावे क्तः । वानरयोधानामसने सति त्रायकाभावात्ततस्ततो व्यद्रवन्निति भावः । ये ये तस्य रूपमालोक्य स्थितास्ते ते सर्वे ततस्ततो विद्रवन्तीत्यन्वयेन तेद्वयं सार्थकमिति वा । न च भिन्नार्थगतयोस्तेशब्दयोः कथमैकरथ्यसम्पादनेन वीप्सात्वमिति वाच्यम्, "ये यत्रा य ईड्याः" इत्यादिवदन्वयमुखेनैकरथ्योपपत्तेः । 'ते रूपमालोक्य त इव वानरा इव विद्रवन्तीति तच्छब्दद्वयनिर्वाहः । इवेति शेषः ।' इति नागोजिभट्टः । 'ते तस्य रूपमालोक्य ते विद्रवन्तीति तच्छब्दद्वयनिर्वाहः' इति तीर्थश्च । द्वयोर्भावो बिन्दुविभावनीयः ॥ ८ ॥ हरिलोचनः सिंहदृष्टिः मर्कटदृष्टिर्वा । हरिष्विव लोचनं यस्येति वा ॥ १२ ॥ यः क इत्यर्थः । "यतश्चोदेति सूर्यः" इत्यादिवद्यच्छब्दः किमर्थे ॥ १३ ॥

४५७

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्रिणतमिति । त्रिणतं त्रिषु आद्यन्तयोर्मध्ये च नतम् । मेघनिर्ह्रादं मेघतुल्यज्यास्वनम् । हेमपृष्ठं हेमलिप्तपार्श्वमित्यर्थः । धनुः रथस्थेभ्यः अन्यत् करधृतमिदम् ॥ १८ ॥ सध्वज इति । ध्वजः असाधारणकेतनम् । पताका साधारणी । अनुकर्षः रथाधःस्थदारु । चतुस्सादिसमायुक्तः चतुस्साराथि

त्रिणतं मेघनिर्ह्रादं हेमपृष्ठमलङ्कृतम् । शतक्रतुधनुःप्रख्यं धनुश्चास्य विराजते ॥ १८ ॥ सध्वजः सपताकश्च सानुकर्षो महारथः । चतुस्सादिसमायुक्तो मेघस्तनितनिस्वनः ॥ १९ ॥ विंशतिर्दश चाष्टौ च तूण्योऽस्य रथमास्थिताः । कार्मुकानि च भीमानि ज्याश्च काञ्चनपिङ्गलाः ॥२०॥ द्वौ च खड्गौ रथगतौ पार्श्वस्थौ पार्श्वशोभितौ । चतुर्हस्तत्सरुयुतौ व्यक्तहस्तदशायतौ ॥ २१ ॥ रक्तकण्ठगुणो धीरो महापर्वतसन्निभः । कालः कालमहावक्त्रो मेघस्थ इव भास्करः ॥ २२ ॥ काञ्चनाङ्गदनद्धाभ्यां भुजाभ्यामेष शोभते । शृङ्गाभ्यामिव तुङ्गाभ्यां हिमवान् पर्वतोत्तमः ॥ २३ ॥ कुण्डलाभ्यां तु यस्यैतद्भाति वक्त्रं शुभेक्षणम् । पुनर्वस्वन्तरगतं पूर्णं बिम्बमिवैन्दवम् ॥ २४ ॥ आचक्ष्व मे महाबाहो त्वमेनं राक्षसोत्तमम् । यं दृष्ट्वा वानराः सर्वे भयार्ता विद्रुता दिशः ॥ २५ ॥ स पृष्टो राजपुत्रेण रामेणामिततेजसा । आचचक्षे महातेजा राघवाय विभीषणः ॥ २६ ॥ दशग्रीवो महातेजा राजा वैश्रवणानुजः । भीमकर्मा महोत्साहो रावणो राक्षसाधिपः ॥ २७ ॥

युक्तः ॥ १९ ॥ विंशतिरिति । कार्मुकाणि धनुर्भेदा इति न पौनरुक्त्यम् ॥ २० ॥ द्वौ चेति । पार्श्वशोभितौ पार्श्वाभ्यां शोभितौ । चतुर्हस्तत्सरुयुतौ चतुर्हस्तप्रमाणत्सरुयुक्तौ । "त्सरुः खड्गादिमुष्टौ स्यात्" इत्यमरः । व्यक्तहस्तदशायतौ व्यक्तौ च तौ हस्तदशायतौ चेति तथा ॥ २१ ॥ रक्तेति । रक्तकण्ठगुणः रक्तकण्ठमाल्यः । कालमहावक्त्रः कालस्येव महावक्त्रं यस्य स तथोक्तः । काल इव महावक्त्र इति वा ॥ २२-२७ ॥

हेमपृष्ठं हेमसदृशपृष्ठभागम् ॥ १८ ॥ चतुस्सादिसमायुक्तः चतुर्भिः सादिभिः सह युक्तः ॥ १९-२० ॥ द्वाविति । पार्श्वशोभितौ पार्श्वाभ्यां शोभितौ । चतुर्हस्तत्सरुयुतौ चतुर्हस्तप्रमाणाभ्यां त्सरुभ्यां खड्गमुष्टिभ्यां चितौ । व्यक्तहस्तदशायतौ व्यक्तौ च तौ हस्तदशायतौ चेति तथा ॥२१॥ रक्तकण्ठगुणः रक्तकण्ठमाल्यः । कालमहावक्त्रः कालस्येव महावक्त्रं यस्य स तथोक्तः ॥ २२--२८ ॥ ॥२२३॥

स०—उभाभ्यां कुण्डलाभ्याम् एकैकस्मिन् कर्णे उभाभ्याम् । अतो नोभाभ्यामधिकम् । कुण्डलाभ्यामुभाभ्यां च भातिवक्त्रं सुभीषणम् । इति पाठः ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्येत्यादि श्लोकद्वयम् । नये युक्तौ । मन्त्रे विचारे ॥ २८–३३ ॥ वज्रमित्यादि श्लोकद्वयम् । विष्टम्भितं निश्चलीकृतम् । राक्षसानामथर्षभः

तस्यासीद्वीर्यवान् पुत्रो रावणप्रतिमो रणे । वृद्धसेवी श्रुतिधरः सर्वास्त्रविदुषां वरः ॥ २८ ॥ अश्वपृष्ठे रथे नागे खड्गे धनुषि कर्षणे । भेदे सान्त्वे च दाने च नये मन्त्रे च सम्मतः ॥ २९ ॥ यस्य बाहू समाश्रित्य लङ्का वसति निर्भया । तनयं धान्यमालिन्या अतिकायमिमं विदुः ॥ ३० ॥ एतेनाराधितो ब्रह्मा तपसा भावितात्मना । अस्त्राणि चाप्यवाप्तानि रिपवश्च पराजिताः ॥ ३१ ॥ सुरासुरैरवध्यत्वं दत्तमस्मै स्वयम्भुवा । एतच्च कवचं दिव्यं रथश्चैषोऽर्कभास्वरः ॥ ३२ ॥ एतेन शतशो देवा दानवाश्च पराजिताः । रक्षितानि च रक्षांसि यक्षाश्चापि निषूदिताः ॥ ३३ ॥ वज्रं विष्टम्भितं येन बाणैरिन्द्रस्य धीमतः । पाशः सलिलराजस्य रणे प्रतिहतस्तथा ॥ ३४ ॥ एषोऽतिकायो बलवान् राक्षसानामथर्षभः । रावणस्य सुतो धीमान् देवदानवदर्पहा ॥ ३५ ॥ तदस्मिन् क्रियतां यत्नः क्षिप्रं पुरुषपुङ्गव । पुरा वानरसैन्यानि क्षयं नयति सायकैः ॥ ३६ ॥ ततोऽतिकायो बलवान् प्रविश्य हरिवाहिनीम् । विस्फारयामास धनुर्ननाद च पुनः पुनः ॥ ३७ ॥ तं भीमवपुषं दृष्ट्वा रथस्थं रथिनां वरम् । अभिपेतुर्महात्मानो ये प्रधाना वनौकसः ॥ ३८ ॥ कुमुदो द्विविदो मैन्दो नीलः शरभ एव च । पादपैर्गिरिशृङ्गैश्च युगपत् समभिद्रवन् ॥ ३९ ॥ तेषां वृक्षांश्च शैलांश्च शरैः काञ्चनभूषणैः । अतिकायो महातेजाश्चिच्छेदास्त्रविदां वरः ॥ ४० ॥ तांश्चैव सर्वान् स हरीन् शरैः सर्वायसैर्बली । विव्याधाभिमुखः सङ्ख्ये भीमकायो निशाचरः ॥ ४१ ॥

इत्यत्राथशब्दः कार्त्स्न्यें ॥३४॥३५॥ तदस्मिन्निति । पुरा नयति, नेष्यन्तीत्यर्थः ॥३६–३८॥ कुमुद इति । समभिद्रवन् आगमशासनस्यानित्यत्वादड भावः ॥ ३९ ॥ ४० ॥ तांश्चेति । अभिमुखः, स्थित इति शेषः ॥ ४१ ॥ ४२ ॥

अश्वेति । अश्वरथगजस्थानानां क्रमेण प्रतिनियतायुधान्याह खड्गे धनुषि कर्षण इति । कृष्यतेऽनेनेति कर्षणः पाशादिः, तोमरभेदो वा ॥ २९–३८ ॥ कुमुद इति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदिति । हरिः सिंहः ॥ ४३ ॥ स इति । कलापी तूणीरवान् । "कलापो भूषणे बर्हे तूणीरे संहतावपि" इत्यमरः । सगर्वितं सगर्वम् ॥ ४४ ॥ रथ इति ।

तेऽर्दिता बाणवर्षेण भग्नगात्राः प्लवङ्गमाः । न शेकुरतिकायस्य प्रतिकर्तुं महारणे ॥ ४२ ॥ तत्सैन्यं हरिवीराणां त्रासयामास राक्षसः । मृगयूथमिव क्रुद्धो हरिर्यौवनदर्पितः ॥ ४३ ॥ स राक्षसेन्द्रो हरिसैन्यमध्ये नायुध्यमानं निजघान कञ्चित् । उपेत्य रामं सधनुः कलापी सगर्वितं वाक्यमिदं बभाषे ॥४४॥ रथे स्थितोऽहं शरचापपाणिर्न प्राकृतं कञ्चन योधयामि । यश्चास्ति कश्चिद्व्यवसाययुक्तो ददातु मे क्षिप्रमिहाद्य युद्धम् ॥ ४५ ॥ तत्तस्य वाक्यं ब्रुवतो निशम्य चुकोप सौमित्रिरमित्रहन्ता । अमृष्यमाणश्च समुत्पपात जग्राह चापं च ततः स्मयित्वा ॥ ४६ ॥ क्रुद्धः सौमित्रिरुत्पत्य तूणादाक्षिप्य सायकम् । पुरस्तादतिकायस्य विचकर्ष महद्धनुः ॥ ४७ ॥ पूरयन् स महीं शैलानाकाशं सागरं दिशः । ज्याशब्दो लक्ष्मणस्योग्रस्त्रासयन् रजनीचरान् ॥ ४८ ॥ सौमित्रेश्चापनिर्घोषं श्रुत्वा प्रतिभयं तदा । विसिस्मिये महातेजा राक्षसेन्द्रात्मजो बली ॥ ४९ ॥ अथातिकायः कुपितो दृष्ट्वा लक्ष्मणमुत्थितम् । आदाय निशितं बाणमिदं वचनमब्रवीत् ॥ ५० ॥ बालस्त्वमसि सौमित्रे विक्रमेष्वविचक्षणः । गच्छ किं कालसदृशं मां योधयितुमिच्छसि ॥ ५१ ॥ नहि मद्बाहुसृष्टानामस्त्राणां हिमवानपि । सोढुमुत्सहते वेगमन्तरिक्षमथो मही ॥ ५२ ॥

व्यवसायः उत्साहः ॥ ४५ ॥ तत्तस्येति । स्मयित्वा अनादृत्य । " ष्मिङ् अनादरे " इति धातुः ॥ ४६ ॥ ४७ ॥ पूरयन्निति । त्रासयन्, अभूदिति शेषः ॥ ४८ ॥ सौमित्रेरिति । प्रतिभयम् । "भयङ्करं प्रतिभयम्" इत्यमरः ॥ ४९–५२ ॥

अभिद्रवन् अहमाव आर्यः ॥ ३९--४३ ॥ स इति । कलापी तूणीरवान् । " कलापो भूषणे बर्हे तूणीरे संहतावपि " इत्यमरः । सगर्वितं सगर्वम् ॥ ४४ ॥ व्यवसायः उत्साहः ॥ ४५ ॥ स्मयित्वा अनादृत्य स्मितं कृत्वा " ष्मिङ् अनादरे " इति धातुः ॥ ४६ ॥ ४७ ॥ त्रासयन्, अभूदिति शेषः ॥ ४८ ॥ प्रतिभयं

For Private And Personal Use Only

सुखप्रसुप्तमिति । निबोधयितुं ज्वलयितुम् । मा जहि मा हिंसीः । "हन्तेर्जः" इति जादेशः । मद्गतः मां प्राप्तः ॥ ५३ ॥ अथवेति । प्रतिष्टब्धः प्रतिमुखं

सुखप्रसुप्तं कालाग्निं निबोधयितुमिच्छसि । न्यस्य चापं निवर्तस्व मा प्राणान् जहि मद्गतः ॥ ५३ ॥ अथवा त्वं प्रतिष्टब्धो न निवर्तितुमिच्छसि । तिष्ठ प्राणान् परित्यज्य गमिष्यसि यमक्षयम् ॥ ५४ ॥ पश्य मे निशितान् बाणानरिदर्पनिषूदनान् । ईश्वरायुधसङ्काशांस्तप्तकाञ्चनभूषणान् ॥ ५५ ॥ एष ते सर्पसङ्काशो बाणः पास्यति शोणितम् । मृगराज इव क्रुद्धो नागराजस्य शोणितम् । इत्येवमुक्त्वा संक्रुद्धः शरं धनुषि सन्दधे ॥ ५६ ॥ श्रुत्वाऽतिकायस्य वचः सरोषं सगर्वितं संयति राजपुत्रः । स सञ्चुकोपातिबलो बृहच्छ्रीरुवाच वाक्यं च ततो महार्थम् ॥ ५६ ॥ न वाक्यमात्रेण भवान् प्रधानो न कत्थनात् सत्पुरुषा भवन्ति । मयि स्थिते धन्विनि बाणपाणौ निदर्शय स्वात्मबलं दुरात्मन् ॥ ५८ ॥ कर्मणा सूचयात्मानं न विकत्थितुमर्हसि । पौरुषेण तु यो युक्तः स तु शूर इति स्मृतः ॥ ५९ ॥ सर्वायुधसमायुक्तो धन्वी त्वं रथमास्थितः । शरैर्वा यदि वाप्यस्त्रैर्दर्शयस्व पराक्रमम् ॥ ६० ॥ ततः शिरस्ते निशितैः पातयिष्याम्यहं शरैः । मारुतः कालसम्पक्वं वृन्तात्तालफलं यथा ॥ ६१ ॥ अद्य ते मामका बाणास्तप्तकाञ्चनभूषणाः । पास्यन्ति रुधिरं गात्राद्बाणशल्यान्तरोत्थितम् ॥ ६२ ॥

स्थितः ॥ ५४ ॥ पश्येति । ईश्वरायुधं त्रिशूलम् ॥ ५५-५७ ॥ न वाक्यमात्रेणेति । कत्थनात् आत्मश्लाघनात् । सत्पुरुषाः शूरपुरुषाः ॥ ५८-६० ॥ तत इति । वृन्तात् प्रसवबन्धनात् । "वृन्तं प्रसवबन्धनम्" इत्यमरः ॥ ६१ ॥ अद्य त इति । बाणशल्यान्तरोत्थितमिति । बाणशल्यान्तराणि

भयङ्करम् ॥ ४९-५२ ॥ प्रतिष्टब्धः अभिमुखं स्थितः यमक्षयं गमिष्यसि । वस्तुतस्तु--निवर्तितुं नेच्छसि यदि त्वं तिष्ठ । गमिष्यासि, जयं प्राप्स्येति शेषः । प्राणान् परित्यज्याहं गमिष्यामीति क्रियाविपरिणामः ॥ ५४ ॥ ईश्वरायुधं त्रिशूलम् ॥ ५५ ॥ एष इति । ते तव शोणितं पास्यति । वस्तुतस्तु--ते तव बाणः शोणितं पास्यति, ममेति शेषः ॥ ५६-६१ ॥ अद्य त इति । बाणशल्यान्तरोत्थितं बाणशल्यकृतप्रदेशादुत्थितम् ॥ ६२-६६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बाणशल्यकृतान्यन्तराणि ॥ ६२ ॥ बाल इति । मृत्युं जानीहि, मामिति शेषः ॥६३–६६॥ तत इति । सायकं चापमारोप्य बाणं धनुषि संधायेत्यर्थः ।

बालोऽयमिति विज्ञाय न माऽवज्ञातुमर्हसि ॥६३॥ बालो वा यदि वा वृद्धो मृत्युं जानीहि संयुगे । बालेन विष्णुना लोकास्त्रयः क्रान्तास्त्रिभिः क्रमैः ॥ ६४ ॥ लक्ष्मणस्य वचः श्रुत्वा हेतुमत् परमार्थवत् । अतिकायः प्रचुक्रोध बाणं चोत्तममाददे ॥६५॥ ततो विद्याधरा भूता देवा दैत्या महर्षयः । गुह्यकाश्च महात्मानस्तद्युद्धं द्रष्टुमागमन् ॥६६॥ ततोऽतिकायः कुपितश्चापमारोप्य सायकम् । लक्ष्मणाय प्रचिक्षेप संक्षिपन्निव चाम्बरम् ॥६७॥ तमापतन्तं निशितं शरमाशीविषोपमम् । अर्धचन्द्रेण चिच्छेद लक्ष्मणः परवीरहा ॥ ६८ ॥ तं निकृत्तं शरं दृष्ट्वा कृत्तभोगमिवोरगम् । अतिकायो भृशं क्रुद्धः पञ्च बाणान् समाददे ॥६९॥ तान् शरान् सम्प्रचिक्षेप लक्ष्मणाय निशाचरः । तानप्राप्तान् शरैस्तीक्ष्णैश्चिच्छेद भरतानुजः ॥[पञ्चभिः पञ्च चिच्छेद पावकार्कसमप्रभैः॥] ॥७०॥ स तान्छित्त्वा शरैस्तीक्ष्णै र्लक्ष्मणः परवीरहा । आददे निशितं बाणं ज्वलन्तमिव तेजसा ॥७१ ॥ तमादाय धनुश्श्रेष्ठे योजयामास लक्ष्मणः । विचकर्ष च वेगेन विससर्ज च वीर्यवान् ॥ ७२ ॥ पूर्णायतविसृष्टेन शरेण नतपर्वणा । ललाटे राक्षसश्रेष्ठमाजघान स वीर्यवान् ॥ ७३ ॥ स ललाटे शरो मग्नस्तस्य भीमस्य रक्षसः । ददृशे शोणितेनाक्तः पन्नगेन्द्र इवाचले ॥ ७४ ॥ राक्षसः प्रचकम्पे च लक्ष्मणेषुप्रपीडितः । रुद्रबाणहतं घोरं यथा त्रिपुरगोपुरम् ॥ ७५ ॥

संक्षिपन्निव बाणवेगेनान्तरावस्थितमाकाशं ग्रसन्निवेत्यर्थः ॥ ६७–७२ ॥ पूर्णायतेति । पूर्णायतेन पूर्णाकृष्टेन । विसृष्टेन क्षिप्तेन । नतपर्वणा निलीनपर्वणा, ऋजुनेति यावत् ॥ ७३ ॥ अक्तः लिप्तः ॥ ७४ ॥ राक्षस इति । त्रिपुरगोपुरं त्रिपुरद्वारम् ॥ ७५ ॥

तत इति । सायकं चापमरोप्य बाणं धनुषि सन्धाय संक्षिपन्निव चाम्बरं बाणवेगेन अन्तरालस्थितमाकाशं ग्रसन्निवेत्यर्थः ॥ ६७–७२ ॥ पूर्णायतेति । पूर्णायतेन पूर्णाकृष्टेन नतपर्वणा, विलीनपर्वणा ऋजुनेति यावत् ॥ ७३–७५ ॥

For Private And Personal Use Only

चिन्तयामासेत्यादिश्लोकद्वयमेकान्वयम् । विमृश्य करणीयं निर्धार्थ । बाणनिपातेन मे साधु श्लाघनीयो रिपुरसीति । एवं लक्ष्मणं विधाय अभिधाय । आस्यं विनम्य भुजौ नियम्य वशे स्थापयित्वा । रथोपस्थमास्थाय रथेन प्रचचार हेति संबन्धः ॥ ७६ ॥ ७७ ॥ एकमिति । इति उक्तप्रकारेण

चिन्तयामास चाश्वास्य विमृश्य च महाबलः । साधु बाणनिपातेन श्लाघनीयोऽसि मे रिपुः ॥ ७६ ॥ विधायैवं विनम्यास्यं नियम्य च भुजावुभौ । स रथोपस्थमास्थाय रथे च प्रचचार ह ॥७७॥ एकं त्रीन् पञ्च सप्तेति सायकान् राक्षसर्षभः । आददे सन्दधे चापि विचकर्षोत्ससर्ज च ॥ ७८ ॥ ते बाणाः कालसङ्काशा राक्षसेन्द्रधनुश्च्युताः । हेमपुङ्खा रविप्रख्याश्चक्रुर्दीप्तमिवाम्बरम् ॥ ७९ ॥ ततस्तान् राक्षसोत्सृष्टान् शरौघान् राघवानुजः । असम्भ्रान्तः प्रचिच्छेद निशितैर्बहुभिः शरैः ॥८०॥ तान् शरान् युधि सम्प्रेक्ष्य निकृत्तान् रावणात्मजः । चुकोप त्रिदशेन्द्रारिर्जग्राह निशितं शरम् ॥ ८१ ॥ स सन्धाय महातेजास्तं बाणं सहसोत्सृजत् । ततः सौमित्रिमायान्तमाजघान स्तनान्तरे ॥ ८२ ॥ अतिकायेन सौमित्रिस्ताडितो युधि वक्षसि । सुस्राव रुधिरं तीव्रं मदं मत्त इव द्विपः ॥ ८३ ॥ स चकार तदाऽऽत्मानं विशल्यं सहसा विभुः । जग्राह च शरं तीक्ष्णमस्त्रेणापि च सन्दधे ॥ ८४ ॥ आग्नेयेन तदाऽस्त्रेण योजयामास सायकम् । स जज्वाल तदा बाणो धनुष्यस्य महात्मनः ॥ ८५ ॥ अतिकायोऽपि तेजस्वी सौरमस्त्रं समादधे । तेन बाणं भुजङ्गाभं हेमपुङ्खमयोजयत् ॥ ८६ ॥

॥ ७८–८३ ॥ स चकारेति । अस्त्रेण अस्त्रमन्त्रेण । सन्दधे योजयामास ॥८४॥ आग्नेयेनेत्यादि । पूर्वोक्तस्यैव विवरणम् ॥८५॥ अतिकायोऽपीति ।

चिन्तयामास चिन्तित्वा आश्वास्य विमृश्य करणीयं कार्यं निर्द्धार्य बाणनिपातेन मे साधु श्लाघनीयो रिपुरसीत्येवं विधाय अभिधाय आस्यं विनम्य भुजौ नियम्य वशे स्थापयित्वा रथोपस्थमास्थाय रथेन प्रचचार हेत्यन्वयः ॥७६–८३॥ स इति । अस्त्रेण अस्त्रमन्त्रेण ॥८४॥ आग्नेयेनेत्यादि पूर्वोक्तस्यैव विवरणम् ॥ ८५–११० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 समादधे अनुसन्दधे ॥ ८६ ॥ तदस्त्रमिति । आहितं संहितम् ॥ ८७–८९ ॥ तावन्योन्यमिति । भस्मकृतौ भस्मतया कृतौ ॥ ९०–९२ ॥

तदस्त्रं ज्वलितं घोरं लक्ष्मणः शरमाहितम् । अतिकायाय चिक्षेप कालदण्डमिवान्तकः ॥ ८७ ॥ आग्नेयेनाभिसंयुक्तं दृष्ट्वा बाणं निशाचरः । उत्ससर्ज तदा बाणं दीप्तं सूर्यास्त्रयोजितम् ॥ ८८ ॥ तावुभावम्बरे बाणावन्योन्यमभिजघ्नतुः । तेजसा सम्प्रदीप्ताग्रौ क्रुद्धाविव भुजङ्गमौ ॥८९॥ तावन्योन्यं विनिर्दह्य पेततुः पृथिवीतले । निरार्चिषौ भस्मकृतौ न भ्राजेते शरोत्तमौ ॥९०॥ ततोऽतिकायः संक्रुद्धस्त्वस्त्रमैषीकमुत्सृजत् । तत् प्रचिच्छेद सौमित्रिरस्त्रेणैन्द्रेण वीर्यवान् ॥ ९१ ॥ ऐषीकं निहतं दृष्ट्वा रुषितो रावणात्मजः । याम्येनास्त्रेण संक्रुद्धो योजयामास सायकम् ॥ ९२ ॥ ततस्तदस्त्रं चिक्षेप लक्ष्मणाय निशाचरः । वायव्येन तदस्त्रेण निजघान स लक्ष्मणः ॥ ९३ ॥ अथैनं शरधाराभिर्धाराभिरिव तोयदः । अभ्यवर्षत् सुसंक्रुद्धो लक्ष्मणो रावणात्मजम् ॥ ९४ ॥ तेऽतिकायं समासाद्य कवचे वज्रभूषिते । भग्नाग्रशल्याः सहसा पेतुर्बाणा महीतले ॥९५॥ तान् मोघानभिसम्प्रेक्ष्य लक्ष्मणः परवीरहा । अभ्यवर्षन्महेषूणां सहस्रेण महायशाः ॥ ९६ ॥ स वृष्यमाणो बाणौघैरतिकायो महाबलः । अवध्यकवचः सङ्ख्ये राक्षसो नैव विव्यथे । * न शशाक रुजं कर्तुं युधि तस्य शरोत्तमः ॥ ९७ ॥ अथैनमभ्युपागम्य वायुर्वाक्यमुवाच ह । ब्रह्मदत्तवरो ह्येष अवध्यकवचावृतः ॥ ९८ ॥

स०–निरर्चिषौ निष्प्रभौ । **भस्मकृतौ** भस्म कुर्वाते इति तथा । पृथिवीतले पतितौ न भ्राजेते । महीतले विद्यमानौ तौ मोक्तारौ लक्ष्मणातिकायावपि दीप्यमानौ प्राक् हतोऽयमिति परस्परं जयप्रकाशौ न भ्राजेतेस्म मोघीभूतबाणावित्यभ्राजनं युक्तमिति भावः । अतो न पुनरुक्तिः । महाहवे इत्यपि क्वचित्पाठः ॥ ९० ॥

* शरं चाशीविषाकारं लक्ष्मणाय व्यपासृजत् । स तेन विद्धः सौमित्रिर्मर्मदेशे शरेण ह । मुहूर्तमात्रं निःसंज्ञो ह्यभवच्छत्रुतापनः । ततः संज्ञामुपालभ्य चतुर्भिः सायकोत्तमैः । निजघान हयान् संख्ये सारथिं च महाबलः । ध्वजस्योन्मथनं कृत्वा शरवर्षैररिन्दमः । असंभ्रान्तः स सौमित्रिस्तान् शरानभिलक्षितान् । मुमोच लक्ष्मणो बाणान् वधार्थं तस्य रक्षसः ॥ इत्यधिकः पाठः ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततस्त्विति । ब्राह्ममस्त्रं ब्रह्मास्त्रमन्त्रम् । नियोज्य जपित्वेति यावत् ॥ १०० ॥ तस्मिन्निति । दिशश्चेत्यादौ तत्रसुरिति विपरिणम्यानुषज्यते ॥ १०१ ॥

ब्राह्मेणास्त्रेण भिन्द्धयेनमेष वध्यो हि नान्यथा । अवध्य एष ह्यन्येषामस्त्राणां कवची बली ॥९९॥ ततस्तु वायोर्वचनं निशम्य सौमित्रिरिन्द्रप्रतिमानवीर्यः । समाददे बाणममोघवेग तद्र ब्राह्ममस्त्रं सहसा नियोज्य ॥ १०० ॥ तस्मिन् महास्त्र तु नियुज्यमाने सौमित्रिणा बाणवरे शिलाग्रे । दिशश्च चन्द्रार्कमहाग्रहाश्च नभश्च तत्रास चचाल चोर्वी ॥ १०१ ॥ तं ब्रह्मणोऽस्त्रेण नियोज्य चापे शरं सुपुङ्खं यमदूतकल्पम् । सौमित्रिरिन्द्रारिसुतस्य तस्य ससर्ज बाण युधि वज्रकल्पम् ॥ १०२ ॥ तं लक्ष्मणोत्सृष्टममोघवेगं समापतन्तं ज्वलनप्रकाशम् । सुवर्णवज्रोत्तमचित्रपुङ्खं तदाऽतिकायः समरे ददर्श ॥ १०३ ॥ तं प्रेक्षमाणः सहसाऽतिकायो जघान बाणैर्निशितैरनेकैः । स सायकस्तस्य सुपर्णवेगस्तदाऽतिकायस्य जगाम पार्श्वम् ॥१०४॥ तमागतं प्रेक्ष्य तदाऽतिकायो बाणं प्रदीप्तान्तककालकल्पम् । जघान शक्त्यृष्टिगदाकुठारैः शूलैर्हुलैश्चात्यविपन्नचेताः ॥ १०५ ॥ तान्यायुधान्यद्भुतविग्रहाणि मोघानि कृत्वा स शरोऽग्निदीप्तः । प्रगृह्य तस्यैव किरीटजुष्टं ततोऽतिकायस्य शिरो जहार ॥१०६॥ तच्छिरः सशिरस्त्राणं लक्ष्मणेषु प्रपीडितम् । पपात सहसा भूमौ शृङ्गं हिमवतो यथा ॥ १०७ ॥

तमिति । नियोज्य जपित्वा । तस्य यमदूतकल्पमित्यन्वयः ॥१०२–१०४॥ तमागतमिति । हुलैः द्विफलपत्राग्रायुधविशेषैः । "हुलं द्विफलपत्राग्रम्"

स०–सशिरस्त्राणं समुकुटम् । अयमेव भारतोक्तकुम्भकर्णाभिधो लक्ष्मणहतः । " बृहत्तनुः कुम्भवदेव कर्णावस्येत्यतो नाम च कुम्भकर्णः " इत्यारभ्य–" तेनातिकायः प्रवरोऽस्त्रवित्सु " इत्यन्तेन तात्पर्यमाचार्यवर्याः प्रत्यपीपदन्निति तथैव भारतार्थोऽनुसन्धेयः । प्रपञ्चितश्चायमर्थोऽस्माभिः प्रक्रमतोऽनुसन्धेयः ॥ १०७ ॥ { त्रिशिरोऽतिकायदेवान्तकनरान्तकमहोदरमहापार्श्वानां षड्भिर्दिनैर्माद्राश्विनकृष्णषष्ठ्यन्तेन वध इति अमे स्पष्टम ॥ }

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति वैजयन्ती ॥ १०५–१०८ ॥ त इति । विस्वरैः विस्वररूपैः ॥१०९॥ तत इति । निरपेक्षाः युद्धानपेक्षाः ॥ ११० ॥ प्रहर्षेति । प्रबुद्धेत्यत्र प्रसन्नत्वे

तं तु भूमौ निपतितं दृष्ट्वा विक्षिप्तभूषणम् । बभूवुर्व्यथिताः सर्वे हतशेषा निशाचराः ॥ १०८ ॥ ते विषण्णमुखा दीनाः प्रहारजनितश्रमाः । विनेदुरुच्चैर्बहवः सहसा विस्वरैः स्वरैः ॥ १०९ ॥ ततस्ते त्वरितं याता निरपेक्षा निशाचराः । पुरीमभिमुखा भीता द्रवन्तो नायके हते ॥ ११० ॥ प्रहर्षयुक्ता बहवस्तु वानराः प्रबुद्धपद्मप्रतिमानना स्तदा । अपूजयन् लक्ष्मणमिष्टभागिनं हते रिपौ भीमबले दुरासदे ॥ [अतिबलमतिकायमभ्रकल्पं युधि विनिपात्य स लक्ष्मणः प्रहृष्टः । त्वरितमथ तदा स रामपार्श्वं कपिनिवहैश्च सुपूजितो जगाम] ॥१११॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकसप्ततितमः सर्गः ॥ ७१ ॥

अतिकायं हतं श्रुत्वा लक्ष्मणेन महौजसा । उद्वेगमगमद्राजा वचनं चेदमब्रवीत् ॥ १ ॥ धूम्राक्षः परमामर्षी धन्वी शस्त्रभृतां वरः । अकम्पनः प्रहस्तश्च कुम्भकर्णस्तथैव च ॥ २ ॥ एते महाबला वीरा राक्षसा युद्धकाङ्क्षिणः । जेतारः परसैन्यानां परैर्नित्यापराजिताः ॥ ३ ॥ निहतास्ते महावीर्या रामेणाक्लिष्टकर्मणा । राक्षसाः सुमहाकाया नानाशस्त्रविशारदाः । अन्ये च बहवः शूरा महात्मानो निपातिताः ॥४॥ प्रख्यातबलवीर्येण पुत्रेणेन्द्रजिता मम । यौ हि तौ भ्रातरौ वीरौ बद्धौ दत्तवरैः शरैः ॥ ५ ॥

तात्पर्यम् । इष्टस्य जयस्य भागः प्राप्तिः सोऽस्यास्तीतीष्टभागी तम् ॥ १११ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकसप्ततितमः सर्गः ॥ ७१ ॥ अथ रावणचिन्ता–अतिकायमित्यादि ॥ १–४ ॥ प्रख्यातेत्यादिश्लोकत्रयमेकं वाक्यम् । वीरौ

प्रहर्षयुक्ता इति । इष्टभागिनम् इष्टस्य भागः प्राप्तिः तद्वन्तम् । इष्टमतिकायवधं प्राप्तवन्तमित्यर्थः ॥ १११ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकसप्ततितमः सर्गः ॥ ७१ ॥ १–४ ॥ प्रख्यातबलवीर्येणेत्यादि श्लोकत्रयमेकं वाक्यम् । यौ खरदूषणादिनिरासकौ वीरौ तौ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यौ भ्रातरौ खरदूषणादिवधेन प्रसिद्धौ तावपि बद्धौ। तदेव बन्धनं वर्णयति यदिति। यद्बन्धनं सुरादिभिः मोक्तुं मोचयितुम् अशक्यं तद्बन्धनं घोरम्। भ्रातरौ तौ शरबन्धाद्विमुक्ताविति यत् तत् प्रभावादिषु केन वा जातं न जान इत्यन्वयः। प्रभावः सामर्थ्यम्। माया व्यामोहकारिणी विद्या। मोहनम्

यन्न शक्यं सुरैः सर्वैरसुरैर्वा महाबलैः। मोक्तुं तद्बन्धनं घोरं यक्षगन्धर्वकिन्नरैः ॥६॥ तन्न जाने प्रभावैर्वा मायया मोहनेन वा। शरबन्धाद्विमुक्तौ तौ भ्रातरौ रामलक्ष्मणौ ॥ ७ ॥ ये योधा निर्गताः शूरा राक्षसा मम शासनात्। ते सर्वे निहता युद्धे वानरैः सुमहाबलैः ॥८॥ तं न पश्याम्यहं युद्धे योऽद्य रामं सलक्ष्मणम्। शासयेत् सबलं वीरं ससुग्रीवविभीषणम् ॥९॥ अहो नु बलवान् रामो महदस्त्रबलं च वै। यस्य विक्रममासाद्य राक्षसा निधनं गताः ॥ १० ॥ तं मन्ये राघवं वीरं नारायणमनामयम्। तद्भयाद्धि पुरी लङ्का पिहितद्वारतोरणा ॥ ११ ॥ अप्रमत्तैश्च सर्वत्र गुप्तै रक्ष्या पुरी त्वियम् ॥१२॥ अशोकवनिकायां च यत्र सीताऽभिरक्ष्यते। निष्क्रामो वा प्रवेशो वा ज्ञातव्यः सर्वथैव नः ॥ १३ ॥ यत्र यत्र भवेद् गुल्मस्तत्र तत्र पुनः पुनः। सर्वतश्चापि तिष्ठध्वं स्वैः स्वैः परिवृता बलैः ॥१४॥

औषधादिकम् ॥ ५–९ ॥ अहो न्वित्यादिश्लोकद्वयमेकान्वयम्। पिहितद्वारतोरणा द्वारम् अन्तर्द्वारम्, तोरणं बहिर्द्वारम् ॥१०॥११॥ एवं रामप्रभावं सप्रपञ्चमुक्त्वा सैन्यं प्रति पुरीरक्षणं नियमयति–अप्रमत्तैरित्यादिना। गुप्तैः स्वयं कृतरक्षणैः। गुल्मैरिति वा पाठः ॥ १२ ॥ अशोकेति। यत्र सीता अभिरक्ष्यते तत्र अशोकवनिकायाम्। निष्क्रामः निर्गमः प्रवेशो वा। नः अस्माभिः ज्ञातव्यः। मदनुज्ञां विना न कोऽपि जनो निर्गमयितव्यो नापि प्रवेष्टव्य इत्यर्थः ॥ १३ ॥ यत्र यत्रेति। गुल्मः सेनासन्निवेशः ॥ १४ ॥

भ्रातरौ इन्द्रजिता दत्तवरैः शरैर्बद्धौ, यद्बन्धनं सुरासुरादिभिः प्रत्येकं मोक्तुं मोचयितुं न शक्यं तद्बन्धनं घोरं प्रचण्डं सर्वैस्समेतैरपि मोक्तुं न शक्यं तौ रामलक्ष्मणौ प्रभावैः सहजमाहात्म्यैः। मायया विचित्रशक्त्या। मोहनेन वा बन्धकनागपाशमोहनेन वा। शरबन्धाद्विमुक्तौ तन्न जान इति योजना ॥ ५–१२ ॥ अशोकवनिकायां यत्र प्रदेशे सीताऽभिरक्ष्यते तत्र निष्क्रामः प्रवेशो वा नः अस्माभिर्ज्ञातव्य इत्यर्थः ॥ १३ ॥ १४ ॥

स०–अनामयं कार्यवाचकपदेन कारणं दोषो गृह्यते। निर्दोषं नारायणम् ॥ ११ ॥

For Private And Personal Use Only

द्रष्टव्यमित्यादिश्लोकद्वयमेकान्वयम् । पदं व्यवसितम् । दर्शनप्रकारमाह-द्विषतामिति । द्विषतां बलं स्थितं किम् ? उद्युक्तम् उद्यतं किम् ? आपतन्तम् । लिङ्गादिव्यत्यय आर्षः । आपतत् किमिति सदा द्रष्टव्यमित्यर्थः । आपतत् किमिति पा॰ सुशोभनः १५-१९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विसप्ततितमः सर्गः ॥ ७२ ॥

द्रष्टव्यं च पदं तेषां वानराणां निशाचराः । प्रदोषे वाऽर्धरात्रे वा प्रत्यूषे वापि सर्वतः ॥ १५॥ नावज्ञा ... कर्तव्या वानरेषु कदाचन । द्विषतां बलमुद्युक्तमापतत् किं स्थितं सदा ॥ १६ ॥ ततस्ते राक्षसाः सर्वे श्रुत्वा लङ्काधिपस्य तत् । वचनं सर्वमातिष्ठन् यथावत्तु महाबलाः ॥ १७॥ स तान् सर्वान् समादिश्य रावणो राक्षसाधिपः । मन्युशल्यं वहन् दीनः प्रविवेश स्वमालयम् ॥ १८॥ ततः स सन्दीपितकोपवह्निर्निशाचराणामधिपो महाबलः । तदेव पुत्रव्यसनं विचिन्तयन् मुहुर्मुहुश्चैव तदा व्यनिश्वसत् ॥ १९॥ इत्यार्षे श्रीरामा॰ श्रीमद्युद्धकाण्डे द्विसप्ततितमः सर्गः ॥७२॥

ततो हतान् राक्षसपुङ्गवांस्तान् देवान्तकादित्रिशिरोतिकायान् । रक्षोगणास्तत्र हतावशिष्टास्ते रावणाय त्वरितं शशंसुः ॥ १ ॥ ततो हतांस्तान् सहसा निशम्य राजा मुमोहाश्रुपरिप्लुताक्षः । पुत्रक्षयं भ्रातृवधं च घोरं विचिन्त्य राजा विपुलं प्रदध्यौ ॥ २ ॥ ततस्तु राजानमुदीक्ष्य दीनं शोकार्णवे सम्परिपुप्लुवानम् । रथर्षभो राक्षसराजसूनुस्तमिन्द्रजिद्वाक्यमिदं बभाषे ॥ ३ ॥

अथ ब्रह्मास्त्रबन्धस्त्रिसप्ततितमे-ततो हतानित्यादि ॥ १ ॥ पूर्वं कुम्भकर्णादिवधः सामान्येन श्रुतः सम्प्रत्यार्तिः सविशेषं श्रुत इत्याह तत इति । पूर्वोक्तसर्वानुवादो वा ॥ २ ॥ रामानु॰-अत्र देवान्तकादित्रिशिरोतिकायान् हतान् त्वरितं शशंसुः, घोरं पुत्रक्षयं भ्रातृवधं च विचिन्त्य विपुलं प्रदध्याविति चाभिधानात् पूर्वं रावणेन अतिकायवध एव श्रुत इत्यवगम्यते यद्वा पूर्वोक्तानुवादः ॥ १ ॥ तत इति । संपरिपुप्लुवानम् । लटः शानजादेशः ॥ ३ ॥

द्रष्टव्यमिति । दर्शनप्रकारमेवाह द्विषतामिति । द्विषतां बलं किमुद्युक्तं किमापतत् । किं स्थितं किं तिष्ठतीति सदा द्रष्टव्यमित्यर्थः ॥ १५-१९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्विसप्ततितमः सर्गः ॥७२॥१॥ उक्तमेवार्थमनुवदति । ततो हतानिति ॥२॥ संपरिपुप्लुवानं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यत्र यदा । इन्द्रारिः इन्द्रजित् ॥ ४ ॥ ५ ॥ पौरुषदैवयुक्तां पुरुषबलदैवबलयुक्ताम् । सन्तर्पयिष्यामि पूरयिष्यामि ॥ ६ ॥ ७ ॥ स इति । खरश्रेष्ठसमाधियुक्तं खरश्रेष्ठसम्बन्धयुक्तम् । खरश्रेष्ठैः समाधिना समाधानेन च युक्तमिति वा ॥ ८ ॥ तमिति । हरिरथः सूर्यरथः । "यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशु

न तात मोहं प्रतिगन्तुमर्हसि यत्रेन्द्राजिज्जीवति राक्षसेन्द्र । नेन्द्रारिबाणाभिहतो हि कश्चित् प्राणान् समर्थः समरेऽभिपातुम् ॥ ४ ॥ पश्याद्य रामं सह लक्ष्मणेन मद्बाणनिर्भिन्नविकीर्णदेहम् । गतायुषं भूमितले शयानं शितैः शरैराचितसर्वगात्रम् ॥ ५ ॥ इमां प्रतिज्ञां शृणु शक्रशत्रोः सुनिश्चितां पौरुषदैवयुक्ताम् । अद्यैव रामं सह लक्ष्मणेन सन्तर्पयिष्यामि शरैरमोघैः ॥ ६ ॥ अद्येन्द्रवैवस्वतविष्णुमित्रसाध्याश्विवैश्वानरचन्द्रसूर्याः । द्रक्ष्यन्तु मे विक्रममप्रमेयं विष्णोरिवोग्रं बलियज्ञवाटे ॥ ७ ॥ स एवमुक्त्वा त्रिदशेन्द्रशत्रुरापृच्छ्य राजानमदीनसत्त्वः । समारुरोहानिलतुल्यवेगं रथं खरश्रेष्ठसमाधियुक्तम् ॥ ८ ॥ तमास्थाय महातेजा रथं हरिरथोपमम् । जगाम सहसा तत्र यत्र युद्धमरिन्दमः ॥९॥ तं प्रस्थितं महात्मानमनुजग्मुर्महाबलाः । संहर्षमाणा बहवो धनुःप्रवरपाणयः ॥ १० ॥ गजस्कन्धगताः केचित् केचित् प्रवरवाजिभिः । * प्रासमुद्गरनिस्त्रिंशपरश्वधगदाधराः ॥ ११ ॥ स शङ्खनिनदैः पूर्णैर्भेरीणां चापि निस्वनैः । जगाम त्रिदशेन्द्रारिः स्तूयमानो निशाचरैः ॥ १२ ॥

वाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु॥" इत्यमरः । युद्धमिति, कर्तव्यमिति शेषः॥९॥ तं प्रस्थितमित्यादिश्लोकद्वयमेकान्वयम् ॥१०-१२॥

शोकार्णवमग्रमित्यर्थः । रथर्षभः रथस्थानां श्रेष्ठः, महारथ इत्यर्थः । तं रावणम् ॥ ३ ॥ यत्र यतः । इन्द्रारिः इन्द्रजित् ॥ ४ ॥ पश्याद्य राममित्यादिश्लोकद्वयस्य वास्तवार्थस्तु-अतिबलपराक्रमशालिनो रामस्य हनने तु नाहं समर्थः । अथाप्येतावत् करिष्यामि पश्येत्याह-पश्येति । मद्बाणविकीर्णदेहमपि गतायुषं भ्रान्तायुषं शरैराचितसर्वगात्रं रामं पश्येति सम्बन्धः । उक्तमेव प्रतिज्ञापूर्वकमाह-इमामिति । पौरुषदैवयुक्तां पुरुषदैवबलोपेताम् । सन्तर्पयिष्यामि पूरयिष्यामि ॥ ५-७ ॥ स एवमिति । खरश्रेष्ठसमाधियुक्तं समाधिः सम्बन्धः, खरश्रेष्ठसम्बन्धवन्तम् ॥ ८-१२ ॥

* व्याघ्रवृश्चिकमार्जारैः खरोष्ट्रैश्च भुजङ्गमैः । वराहश्वापदैः सिंहैर्जम्बुकैः पर्वतोपमैः । शशहंसमयूरैश्च राक्षसा भीमविक्रमाः ॥ इत्यधिकः पाठः केषुचित्पुस्तकेषु दृश्यते ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवीज्यतेति । हैमैः हेमदण्डैः । हेमविभूषितैः हेमशलाकायुक्तैः ॥ १४ ॥ १५ ॥ रथं प्रति रथसिद्धिमुद्दिश्य ॥१६॥ विधिवत् क्रमवत् ॥१७॥ हविर्लाज संस्कारैः संस्कृतहविर्लाजैः ॥ १८ ॥ शस्त्राणि आयुधानि । शरपत्राणि काशपत्रस्थानीयानि । तानि परिस्तरणान्यासन्नित्यर्थः । " शरमयं बर्हिः

स शङ्खशशिवर्णेन छत्रेण रिपुसूदनः। रराज प्रतिपूर्णेन नभश्चन्द्रमसा यथा ॥ १३ ॥ अवीज्यत ततो वीरो हैमैर्हेम विभूषितैः । चारुचामरमुख्यैश्च मुख्यः सर्वधनुष्मताम्* ॥ १४॥ ततस्त्विन्द्रजिता लङ्का सूर्यप्रतिमतेजसा । रराजा प्रतिवीरेण द्यौरिवार्केण भास्वता ॥ १५ ॥ स सम्प्राप्य महातेजा युद्धभूमिमरिन्दमः । स्थापयामास रक्षांसि रथं प्रति समन्ततः ॥ १६ ॥ ततस्तु हुतभोक्तारं हुतभुक्सदृशप्रभः । जुहाव राक्षसश्रेष्ठो मन्त्रवद्विधिवत्तदा ॥ १७॥ स हविर्लाजसंस्कारैर्माल्यगन्धपुरस्कृतैः । जुहुवे पावकं तत्र राक्षसेन्द्रः प्रतापवान् ॥ १८ ॥ शस्त्राणि शरपत्राणि समिधोऽथ विभीतकाः । लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ॥ १९ ॥ स तत्राग्निं समास्तीर्य शरपत्रैः सतोमरैः । छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः ॥ २० ॥ सकृदेव समिद्धस्य विधूमस्य महार्चिषः । बभूवुस्तानि लिङ्गानि विजयं यान्यदर्शयन् ॥ २१ ॥

स्तृणाति" इत्यभिचारे काशश्चोदितः । अत्र त्वभिचारविशेषे तत्स्थाने शस्त्राणि कृतानीति बोध्यम् । विभीतकाः कलिद्रुमविकाराः।"वैभीतक इध्मः" इति श्रुतेः । वासांसि स्वधार्याणि । यद्वा शस्त्राणि तोमरादीनि शरपत्राणि च, बर्हींष्यासन्निति शेषः । शरपत्रैः सतोमरैरित्यनुवादात् । कार्ष्णायसं स्रुवम् । कृतमिति शेषः ॥ १९ ॥ तत्र युद्धभूमौ । आस्तीर्य परिस्तीर्य ॥ २० ॥ सकृत् समिद्धस्य एकदा समिद्भिर्ज्वलितस्य । लिङ्गानि उक्तसकृत्समिद्धत्वविधूमत्वमहार्चिष्ट्वानि । विजयं यान्यदर्शयन्, पूर्वमिति शेषः ॥ २१ ॥

अवीज्यतेति । हैमैः हिरण्मयदण्डैः ॥ १४–१७ ॥ लाजसंस्कारैः संस्कृतहविर्लाजैरित्यर्थः ॥ १८ ॥ शस्त्राण्येव शरपत्राणि समास्तरणानि । शराः काशविशेषाः, ॥२२९॥

* स तु दृष्ट्वा विनिर्यान्तं बलेन महता वृतम् । राक्षसाधिपतिः श्रीमान् रावणः पुत्रमब्रवीत् ॥ त्वमप्रतिरथः पुत्र त्वया वै वासवो जितः । किं पुनर्मानुषं धृष्यं निहनिष्यसि राघवम् । तथोक्तो राक्षसेन्द्रेण प्रत्यगृह्णान्महाशिषः ॥ इदं श्लोकद्वयम् औत्तराहपाठ एव दृश्यते, ननु दाक्षिणात्यप्राचीनकोशेषु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रदक्षिणेति। प्रदक्षिण आवर्तो भ्रमिर्यासां ताः शिखा यस्येति विग्रहः। स्वयमास्थितः स्वयमास्थावान्। स्वयमुत्थित इति पाठे पुरुषरूपेणोत्थितः इत्यर्थः ॥ २२ ॥ आहारयामास आजुहाव। अभ्यमन्त्रयत् अभिमन्त्रितवान् ॥ २३ ॥ वितत्रास चचाल ॥ २४ ॥ आत्मानम् अन्तर्दधे अन्तर्धापयामास।

प्रदक्षिणावर्तशिखस्तप्तकाञ्चनभूषणः। हविस्तत् प्रतिजग्राह पावकः स्वयमास्थितः ॥२२॥ सोऽस्त्रमाहारयामास ब्राह्ममिन्द्ररिपुस्तदा। धनुश्चात्मरथं चैव सर्वं तत्राभ्यमन्त्रयत् ॥ २३ ॥ तस्मिन्नाहूयमानेऽस्त्रे हूयमाने च पावके। सार्धं ग्रहेन्दुनक्षत्रैर्वितत्रास नभःस्थलम् ॥ २४ ॥ स पावकं पावकदीप्ततेजा हुत्वा महेन्द्रप्रतिमप्रभावः। सचापबाणासिरथाश्वसूतः खेऽन्तर्दधेत्मानमचिन्त्यरूपः ॥ २५ ॥ ततो हयरथाकीर्णं पताकाध्वजशोभितम्। निर्ययौ राक्षसबलं नर्दमानं युयुत्सया ॥ २६ ॥ ते शरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः। तोमरैरङ्कुशैश्चापि वानरान् जघ्नु राहवे ॥ २७ ॥ रावणिस्तु ततः क्रुद्धस्तान्निरीक्ष्य निशाचरान्। हृष्टा भवन्तो युद्ध्यन्तु वानराणां जिघांसया ॥ २८ ॥ ततस्ते राक्षसाः सर्वे नर्दन्तो जयकाङ्क्षिणः। अभ्यवर्षंस्ततो घोरान् वानरान् शरवृष्टिभिः ॥ २९ ॥ स तु नालीकनाराचैर्गदाभिर्मुसलैरपि। रक्षोभिः संवृतः सङ्ख्ये वानरान् विचकर्त ह ॥ ३० ॥

अन्तर्भावितण्यर्थोऽयम्। खेऽन्तर्दधेत्मानमित्यत्र आर्षं पूर्वरूपत्वम्। अचिन्त्यरूपः अचिन्त्यमन्त्रशक्तिः ॥२५–२७॥ रावणिस्त्विति। उवाचेति शेषः ॥ २८ ॥ ततः तस्मात् रावणिवचनात्। द्वितीयस्ततःशब्दः पश्चाच्छब्दार्थः ॥ २९ ॥ नालीकः विशालाग्रशरः। रक्षोभिः संवृतः रक्षोगणमध्यत उपरिस्थित इत्यर्थः। अन्यथा खेऽन्तर्दध इति पूर्वोक्तं विरुध्येत। विचकर्त हिंसितवान् ॥ ३० ॥ रामानु०—रक्षोभिः सहितः। इति वा पाठः ॥ ३० ॥

रौद्रकर्मणि तेषां विनियुक्तत्वात ॥ १९–२२ ॥ सोऽस्त्रमिति। आहारयामास आजुहाव ॥ २३ ॥ २४ ॥ खेऽन्तर्दधेत्मानामित्यत्राकारलोपश्छान्दसः आत्मानमन्तर्दधे, अन्तर्धापयामासेत्यर्थः ॥ २५–२७ ॥ युद्ध्यन्तु, इत्यादिदेशेति शेषः ॥ २८ ॥ २९ ॥ रक्षोभिः संवृतः राक्षससैन्योपरि प्रत्यासन्नाकाशप्रदेशे स्थित इत्यर्थः। अन्यथा खेऽन्तर्दध इत्येतद्विरुध्येत। रक्षोभिस्सहित इति वा पाठः ॥ ३०–३४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त इति । रावणिं रावणिमुक्तायुधागमनप्रदेशम् ॥ २१-२४ ॥ रामानु०-रावणिं रावणिमुक्तायुधागमनप्रदेशम् । खेऽन्तर्देध इत्यभिधानात् ॥ ३१ ॥ मथितसङ्कल्पाः

ते वध्यमानाः समरे वानराः पादपायुधाः। अभ्यद्रवन्त सहिता रावणिं रणकर्कशम् ॥ ३१ ॥ इन्द्रजित्तु ततः क्रुद्धो महातेजा महाबलः । वानराणां शरीराणि व्यधमद्रावणात्मजः ॥ ३२ ॥ शरेणैकेन च हरीन् नव पञ्च च सप्त च । चिच्छेद समरे क्रुद्धो राक्षसान् सम्प्रहर्षयन् ॥ ३३ ॥ स शरैः सूर्यसङ्काशैः शातकुम्भविभूषितैः । वानरान् समरे वीरः प्रममाथ सुदुर्जयः ॥ ३४ ॥ ते भिन्नगात्राः समरे वानराः शरपीडिताः । पेतुर्मथितसङ्कल्पाः सुरैरिव महासुराः ॥ ३५ ॥ तं तपन्तमिवादित्यं घोरैर्बाणगभस्तिभिः । अभ्यधावन्त संक्रुद्धाः संयुगे वानरर्षभाः ॥ ३६ ॥ ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः । व्यथिता विद्रवन्ति स्म रुधिरेण समुक्षिताः ॥ ३७ ॥ रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः। नर्दन्तस्तेऽभिवृत्तास्तु समरे सशिलायुधाः ॥३८॥ ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवङ्गमाः । अभ्यवर्षन्त समरे रावणिं पर्यवस्थिताः ॥ ३९ ॥ तद्द्रुमाणां शिलानां च वर्षं प्राणहरं महत् । व्यपोहत महातेजा रावणिः समितिञ्जयः ॥ ४० ॥ ततः पावकसङ्काशैः शरैराशीविषोपमैः । वानराणामनीकानि बिभेद समरे प्रभुः ॥ ४१ ॥

नाशितमनोरथाः ॥ ३५-३७ ॥ रामस्येति । त्यक्तजीविताः त्यक्तजीवितेच्छाः । अभिवृत्ताः अभिमुखं प्रवृत्ताः । तुरवधारणे ॥ ३८ ॥ ३९ ॥ व्यपोहत वारयामास ॥ ४० ॥ ४१ ॥

मथितसङ्कल्पाः नाशितमनोरथाः ॥ ३५-३७ ॥ त्यक्तजीविताः त्यक्तजीवितेच्छाः । अभिवृत्ताः अभिमुखं प्रवृत्ताः ॥ ३८ ॥ रावणिं तत्सञ्चारप्रदेशमित्यर्थः । तस्यादर्शनात् ॥ ३९ ॥ व्यपोहत अपासारयत ॥ ४०-४२ ॥

For Private And Personal Use Only

अष्टादशेत्यादिसार्धश्लोकत्रयमेकान्वयम् । दत्तवरैः वरदत्तैः ॥ ४२-४४ ॥ मूर्च्छितः प्रवृद्धः ॥ ४५ ॥ ४६ ॥ परया प्रीत्या हृष्टः उद्धतः ॥ ४७ ॥
पुनरेवेत्यादिसार्धश्लोकमेकं वाक्यम् । खड्गादीनि शस्त्राणि । अत्र द्वितीयबलिशब्दो वरदानबलवत्तावाचकः । प्रथमो वीर्यवत्तावाचकः ॥ ४८ ॥

अष्टादशशरैस्तीक्ष्णैः स विद्ध्वा गन्धमादनम् । विव्याध नवभिश्चैव नलं दूरादवस्थितम् ॥ ४२ ॥ सप्तभिस्तु महावीर्यो मैन्दं मर्मविदारणैः । पञ्चभिर्विशिखैश्चैव गजं विव्याध संयुगे ॥ ४३ ॥ जाम्बवन्तं तु दशभिर्नीलं त्रिंशद्भिरेव च । सुग्रीवमृषभं चैव सोऽङ्गदं द्विविदं तथा । घोरैर्दत्तवरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा ॥ ४४ ॥ अन्यानपि तदा मुख्यान् वानरान् बहुभिः शरैः । अर्दयामास संक्रुद्धः कालाग्निरिव मूर्च्छितः॥४५॥ स शरैः सूर्यसङ्काशैः सुमुक्तैः शीघ्रगामिभिः । वानराणामनीकानि निर्ममन्थ महारणे ॥ ४६॥ आकुलां वानरीं सेनां शरजालेन मोहिताम् । हृष्टः स परया प्रीत्या ददर्श क्षतजोक्षिताम् ॥ ४७ ॥ पुनरेव महातेजा राक्षसेन्द्रात्मजो बली । संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणम् । ममर्द वानरानीकमिन्द्रजित्त्वरितो बली ॥ ४८ ॥ स्वसैन्यमुत्सृज्य समेत्य तूर्णं महारणे वानरवाहिनीषु । अदृश्यमानः शरजालमुग्रं ववर्ष नीलाम्बुधरो यथाऽम्बु ॥४९॥ ते शक्रजिद्बाणविशीर्णदेहा मायाहता विस्वरमुन्नदन्तः । रणे निपेतुर्हरयोऽद्रिकल्पा यथेन्द्रवज्राभिहता नगेन्द्राः ॥५०॥ ते केवलं सन्ददृशुः शिताग्रान् बाणान् रणे वानरवाहिनीषु । मायानिगूढं तु सुरेन्द्रशत्रुं न चावृतं राक्षसमभ्यपश्यन् ॥ ५१ ॥ ततः स रक्षोधिपतिर्महात्मा सर्वा दिशो बाणगणैः शिताग्रैः । प्रच्छादयामास रविप्रकाशैर्विषादयामास च वानरेन्द्रान् ॥ ५२ ॥

स्वसैन्यं स्वसैन्योपरिभागम् ॥ ४९ ॥ ५० ॥ मायानिगूढम् अत एव आवृतम् अप्रकाशम् ॥ ५१-५२ ॥

दत्तवरैः वरलब्धैरित्यर्थः ॥ ४४-४८ ॥ स्वसैन्यमुत्सृज्य स्वसैन्यस्योपरिभागमुत्सृज्य ॥ ४९ ॥ ५० ॥ ते केवलमिति । मायानिगूढम् अत एव आवृतम् अप्रकाशम् ॥ ५१-५६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततो ज्वलनेत्यादिश्लोकद्वयमेकान्वयम् । शरैः तीक्ष्णैरित्यर्थः ॥ ५४ ॥ ५५ ॥ विविशुरन्योन्यम् अन्योन्योपर्यालम्बनार्थं पेतुरित्यर्थः ॥ ५६ ॥ हनुमन्त मित्यादिचतुःश्लोक्येकान्वया । केसरिमित्यार्षम् ॥ ५७–६०॥ स वा इति । गदाभिरित्येतत् पूर्वोक्तप्रासादीनामुपलक्षणम् ॥६१॥ बाणवर्षैः बाणनिरन्तर पातैः । अभिवर्ष्यमाणः अभितः पात्यमानः स रामः । तान् बाणवर्षान् । धारानिपातानिव लघूनचिन्त्य, बाणवर्षं तृणीकृत्येत्यर्थः । अत्र हेतुमाह

स शूलनिस्त्रिंशपरश्वधानि व्याविध्य दीप्तानलसन्निभानि । सविस्फुलिङ्गोज्ज्वलपावकानि ववर्ष तीव्रं प्लवगेन्द्र सैन्ये ॥ ५३ ॥ ततो ज्वलनसङ्काशैः शरैर्वानरयूथपाः । ताडिताः शक्रजिद्बाणैः प्रफुल्ला इव किंशुकाः ॥ ५४ ॥ तेऽन्योन्यमभिसर्पन्तो निनदन्तश्च विस्वरम् । राक्षसेन्द्रास्त्रनिर्भिन्ना निपेतुर्वानरर्षभाः ॥ ५५ ॥ उदीक्षमाणा गगनं केचिन्नेत्रेषु ताडिताः । शरैर्विविशुरन्योन्यं पेतुश्च जगतीतले ॥ ५६ ॥ हनुमन्तं च सुग्रीवमङ्गदं गन्धमादनम् । जाम्बवन्तं सुषेणं च वेगदर्शिनमेव च ॥ ५७ ॥ मैन्दं च द्विविदं नीलं गवाक्षं गजगोमुखौ । केसरिं हरिलोमानं विद्युद्दंष्ट्रं च वानरम् ॥ ५८ ॥ सूर्याननं ज्योतिमुखं तथा दधिमुखं हरिम् । पावकाक्षं नलं चैव कुमुदं चैव वानरम् ॥ ५९ ॥ प्रासैः शूलैः शितैर्बाणैरिन्द्रजिन्मन्त्रसंहितैः । विव्याध हरिशार्दूलान् सर्वांस्तान् राक्षसोत्तमः ॥६०॥ स वै गदाभिर्हरियूथमुख्यान् निर्भिद्य बाणैस्तपनीयपुङ्खैः । ववर्ष रामं शरवृष्टिजालैः सलक्ष्मणं भास्कररश्मिकल्पैः ॥ ६१ ॥ स बाणवर्षैरभिवर्ष्यमाणो धारानिपातानिव तानचिन्त्य । समीक्षमाणः परमाद्भुतश्री रामस्तदा लक्ष्मणमित्युवाच ॥ ६२ ॥ असौ पुनर्लक्ष्मण राक्षसेन्द्रो ब्रह्मास्त्रमाश्रित्य सुरेन्द्रशत्रुः । निपातयित्वा हरिसैन्यमुग्रमस्मान् शरैरर्दयति प्रसक्तः ॥६३॥ स्वयम्भुवा दत्तवरो महात्मा खमास्थितोऽन्तर्हितभीमकायः । कथं नु शक्यो युधि नष्टदेहो निहन्तुमद्येन्द्रजिदुद्यतास्त्रः ॥ ६४ ॥

परमेति । अत्यन्ताश्चर्यकरधैर्यसमृद्धिः सन् लक्ष्मणं समीक्षमाणः स्वस्वभावावलम्बनेन ब्रह्मास्त्रप्रतिक्रियां कर्तुमुद्युक्तभिङ्गितैरभिवीक्षमाणः सन्नित्युवाच ॥ ६२ ॥ असाविति । असौ ब्रह्मास्त्रं ब्रह्मास्त्रमन्त्रम् आश्रित्य, प्रहरन्निति शेषः ॥ ६३ ॥ स्वयम्भुवेति । नष्टदेहः अदृष्टदेहः । तत्र हेतुः अन्तर्हित

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भीमकाय इति ॥ ६४ ॥ तर्हि तत्र प्रतिक्रिया कर्तव्येत्यत्राह–मन्य इति । स्वयम्भूः आचिन्त्यः अचिन्त्यप्रभाव इति मन्ये । तत्र हेतुमाह यस्येति । एतदस्त्रं यस्य यद्देवताकं यः अस्यास्त्रस्य प्रभवः उत्पत्तिकारणम्, सोऽचिन्त्यः । तर्ह्यावाभ्यां किं कर्तव्यमित्यत्राह बाणेति । धीमन् आपत्सु न चलितव्यमिति ज्ञानिन् ! ॥ ६५ ॥ ६६ ॥ आवामिति । गतरोषहर्षौ मूर्च्छिताविति यावत् । अमरारिवासं लङ्काम् । रणाग्रलक्ष्मीं

मन्ये स्वयम्भूर्भगवानचिन्त्यो यस्यैतदस्त्रं प्रभवश्च योऽस्य । बाणावपातांस्त्वमिहाद्य धीमन् मया सहाव्यग्रमनाः सहस्व ॥ ६५ ॥ प्रच्छादयत्येष हि राक्षसेन्द्रः सर्वा दिशः सायकवृष्टिजालैः । एतच्च सर्वं पतिताग्र्यशूरं न भ्राजते वानरराजसैन्यम् ॥ ६६ ॥ आवां तु दृष्ट्वा पतितौ विसंज्ञौ निवृत्तयुद्धौ गतरोषहर्षौ । ध्रुवं प्रवेक्ष्यत्यमरारिवासमसौ समादाय रणाग्रलक्ष्मीम् ॥ ६७ ॥ ततस्तु ताविन्द्रजिदस्त्रजालैर्बभूवतुस्तत्र तथा विशस्तौ । स चापि तौ तत्र विदर्शयित्वा ननाद हर्षाद्युधि राक्षसेन्द्रः ॥ ६८ ॥ स तत्तदा वानरसैन्यमेवं रामं च सङ्ख्ये सह लक्ष्मणेन । विषादयित्वा सहसा विवेश पुरीं दशग्रीवभुजाभिगुप्ताम् ॥ [संस्तूयमानः स तु यातुधानैः पित्रे च सर्वं हृषितोऽभ्युवाच ॥] ॥ ६९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रिसप्ततितमः सर्गः ॥ ७३ ॥

तयोस्तदा सादितयो रणाग्रे मुमोह सैन्यं हरिपुङ्गवानाम् ।
सुग्रीवनीलाङ्गदजाम्बवन्तो न चापि किञ्चित् प्रतिपेदिरे ते ॥ १ ॥

विजयलक्ष्मीम् । अग्रपदेन रणमूललक्ष्मीर्न ग्रहीतुं शक्येत्युच्यते । एतेन मूलघातः कर्तुं न शक्यत इत्युच्यते ॥ ६७ ॥ ततस्त्विति । विशस्तौ पीडितौ तौ पतितौ विदर्शयित्वा दृष्ट्वा ननाद ॥६८॥६९॥ इति श्रीगोविन्दराजवि० श्रीरामा० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिसप्ततितमः सर्गः ॥७३॥
अथ ब्रह्मास्त्रबन्धविमुक्तिश्चतुस्सप्ततौ–तयोरित्यादि । सादितयोः अवसादितयोः । किंचिन्न प्रतिपेदिरे, मूढा बभूवुरित्यर्थः ॥ १ ॥ २ ॥

आवामिति । अमरारिवासं लङ्काम् । रणाग्रलक्ष्मीम्, न तु समूलाम् । एतेन समूलं हन्तुं न शक्यत इति सूचितम् ॥ ६७–६९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रिसप्ततितमः सर्गः ॥ ७३ ॥ तयोरिति । सादितयोः महतयोः ॥ १ ॥

For Private And Personal Use Only

मा भैष्टेति । आर्यपुत्रौ अवशौ विषण्णाविति यत् अत्र विषादकालो नास्ति विषादहेतुकालो नास्ति । कुतः ? स्वयम्भुवो वाक्यम् उद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैः सादितौ सादिताविव वर्तमानाविति यत् । तत् ततः मा भैष्टेत्यर्थः ॥ ३ ॥ उक्तमेवार्थं विशदयति—तस्मा इति ॥ ४ ॥ मानयित्वा

ततो विषण्णं समवेक्ष्य सैन्यं विभीषणो बुद्धिमतां वरिष्ठः । उवाच शाखामृगराजवीरानाश्वासयन्नप्रतिमैर्वचोभिः ॥ २ ॥ मा भैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ विषण्णौ । स्वयम्भुवो वाक्यमथोद्वहन्तौ यत् सादिताविन्द्रजिदस्त्रजालैः ॥३॥ तस्मै तु दत्तं परमास्त्रमेतत् स्वयम्भुवा ब्राह्मममोघवेगम् । तन्मानयन्तौ युधि राजपुत्रौ निपातितौ कोऽत्र विषादकालः ॥४॥ ब्राह्ममस्त्रं ततो धीमान् मानयित्वा तु मारुतिः । विभीषणवचः श्रुत्वा हनुमांस्तमथाब्रवीत् ॥५॥ एतस्मिन्निहते सैन्ये वानराणां तरस्विनाम् । यो यो धारयते प्राणांस्तं तमाश्वासयावहे ॥ ६ ॥ तावुभौ युगपद्वीरौ हनुमद्राक्षसोत्तमौ । उल्काहस्तौ तदा रात्रौ रणशीर्षे विचेरतुः ॥ ७ ॥ भिन्नलाङ्गूलहस्तोरुपादाङ्गुलिशिरोधरैः । स्रवद्भिः क्षतजं गात्रैः प्रस्रवद्भिस्ततस्ततः ॥ ८ ॥ पतितैः पर्वताकारैर्वानरैरभिसङ्कुलाम् । शस्त्रैश्च पतितैर्दीप्तैर्ददृशाते वसुन्धराम् ॥ ९ ॥ सुग्रीवमङ्गदं नीलं शरभं गन्धमादनम् । गवाक्षं च सुषेणं च वेगदर्शिनमाहुकम् ॥ १० ॥ मैन्दं नलं ज्योतिमुखं द्विविदं पनसं तथा । एतांश्चान्यांस्ततो वीरौ ददृशाते हतान् रणे ॥ ११ ॥

मुहूर्तमात्रं ब्रह्मास्त्रपरवशः स्थित्वा ॥ ५–७ ॥ भिन्नलाङ्गूलेत्यादिश्लोकद्वयमेकान्वयम् । स्रवद्भिः मूत्रयद्भिः ॥ ८ ॥ ९ ॥ सुग्रीवमित्यादिश्लोकद्वय

बुद्धिमतां ज्ञानवताम् ॥ २ ॥ मा भैष्टेत्यादि श्लोकद्वयमेकं वाक्यम् । आर्यपुत्रौ विवशौ, विषण्णाविति यत् । अत्र विषये मा भैष्ट, एतयोर्विषण्णयोरस्मान् को वा रक्षिष्यतीति शत्रुभ्यो भयं मा भूदित्यर्थः । नास्त्यत्र विषादकालः विषादजनककालो नास्ति, एतयोर्विषादेन भवतां विषादो माऽस्त्वित्यर्थः । कुत इत्यत्राह स्वयम्भुव इति । वाक्यं मन्त्ररूपवाक्यमुद्वहन्तौ मानयन्तौ इन्द्रजिदस्त्रजालैः सादितौ सादिताविव वर्तमानावित्यर्थः । यत् यस्मात् ब्रह्मसम्माननार्थं स्वयमेव पतितौ, तस्मात् मा भैष्टेत्यर्थः ॥ ३–७ ॥ भिन्नेति । स्रवद्भिः मूत्रयद्भिः । ददृशाते, तावित्यध्याहार्यः ॥ ८–१० ॥ हतान् हतप्रायान् ॥११॥ स०–शाखामृगराजाश्च

ते वीराश्च तान् । शाखामृगराजेषु वीराश्चेति वा " सप्तमी शौण्डैः " इति योगविभागात्समासः । तेन न " पूर्वापर–" इति वीरशब्दस्य पूर्वनिपातः । आद्यपक्षे तु एकवीर इतिवद्वाहुलकात्परनिपातः ॥ २ ॥

मेकान्वयम् । आहुक इति कश्चिद्यूथपः । गवाक्षं च सुषेणं च वेगदर्शिनमाहुकमिति पाठः । हतान् हतप्रायान् । प्रहृतानिति वा ॥ १० ॥ ११ ॥ सप्तषष्टि रिति । वानराणां यूथपवानराणामित्यर्थः । सुग्रीवाङ्गदादिभिः सह पाठात् । अह्नः पञ्चमशेषेण पञ्चमभागेन, प्रातःसङ्गवमध्याह्नापराह्णसायाह्नसंज्ञाः

सप्तषष्टिर्हताः कोट्यो वानराणां तरस्विनाम् । अह्नः पञ्चमशेषेण वल्लभेन स्वयम्भुवः ॥ १२ ॥ सागरौघनिभं भीमं दृष्ट्वा बाणार्दितं बलम् । मार्गते जाम्बवन्तं स हनुमान् सविभीषणः ॥ १३ ॥ स्वभावजरया युक्तं वृद्धं शरशतैश्चितम् । प्रजापतिसुतं वीरं शाम्यन्तमिव पावकम् ॥ १४ ॥ दृष्ट्वा तमुपसङ्क्रम्य पौलस्त्यो वाक्यमब्रवीत् । कच्चिदार्य शरैस्तीक्ष्णैः प्राणा न ध्वंसितास्तव ॥ १५ ॥ विभीषणवचः श्रुत्वा जाम्बवानृक्षपुङ्गवः । कृच्छ्रादभ्युद्गिरन् वाक्यमिदं वचनमब्रवीत् ॥ १६ ॥ नैर्ऋतेन्द्र महावीर्य स्वरेण त्वाऽभिलक्षये । पीड्यमानः शितैर्बाणैर्न त्वां पश्यामि चक्षुषा ॥ १७ ॥ अञ्जना सुप्रजा येन मातरिश्वा च नैर्ऋत । हनुमान् वानरश्रेष्ठः प्राणान् धारयते क्वचित् ॥ १८ ॥ श्रुत्वा जाम्बवतो वाक्यमुवाचेदं विभीषणः । आर्यपुत्रावतिक्रम्य कस्मात् पृच्छसि मारुतिम् ॥ १९ ॥ नैव राजनि सुग्रीवे नाङ्गदे नापि राघवे । आर्य सन्दर्शितः स्नेहो यथा वायुसुते परः ॥ २० ॥ विभीषणवचः श्रुत्वा जाम्बवान् वाक्यमब्रवीत् । शृणु नैर्ऋतशार्दूल यस्मात् पृच्छामि मारुतिम् ॥ २१ ॥ तस्मिन् जीवति वीरे तु हतमप्यहतं बलम् । हनुमत्युज्झितप्राणे जीवन्तोऽपि वयं हताः ॥ २२ ॥ धरते मारुतिस्तात मारुतप्रतिमो यदि । वैश्वानरसमो वीर्ये जीविताशा ततो भवेत् ॥ २३ ॥

षण्नाडिकात्मकाः अह्नः पञ्च भागाः सन्ति । तेषु पञ्चमेन सायाह्नसंज्ञेन नाडीषट्केनेत्यर्थः । स्वयम्भुवो वल्लभेन इन्द्रजिता, ब्रह्मास्त्रेण वा ॥ १२–१५ ॥ विभीषणेति । वाक्यं वाक्योपयोगि स्वरम् ॥ १६ ॥ १७ ॥ अञ्जनेति । धारयत इत्यत्र काकुः, किं धारयत इत्यर्थः ॥ १८ ॥ श्रुत्वेत्यादिश्लोकद्वयमेकं

वानराणां यूथपवानराणामित्यर्थः । अह्नः पञ्चमशेषेण पञ्चमभागेन प्रातस्सङ्गवमध्याह्नापराह्णसायाह्नसंज्ञितेषु षण्नाडिकात्मसु पञ्चभागेषु सायाह्नसंज्ञितेन

वाक्यम् ॥१९–२३॥ तत इति । मारुतात्मजः हनुमान् । वृद्धं जाम्बवन्तम् उपागम्य । नियमेन श्रोत्रहस्तसंस्पर्शव्यत्यस्तहस्तत्वादिरूपेण सह । जाम्बवतः पादौ गृह्य गृहीत्वा अभ्यवादयत्, स्वनामोच्चारणपूर्वकं युगपत् पादावगृह्णादित्यर्थः॥२४॥ वाक्यं हनुमानहमस्मीत्यभिवादनवाक्यम् । तथा व्यथितेन्द्रियोऽपि हनुमतो वाक्यं श्रुत्वा ऋक्षपुङ्गवः जाम्बवान् आत्मानं पुनर्जातं मन्यते स्मेति संबन्धः ॥ २५ ॥ २६ ॥ आगच्छेति । विक्रमपर्याप्तः

ततो वृद्धमुपागम्य नियमेनाभ्यवादयत् । गृह्य जाम्बवतः पादौ हनुमान् मारुतात्मजः ॥ २४ ॥ श्रुत्वा हनुमतो वाक्यं तथापि व्यथितेन्द्रियः । पुनर्जातमिवात्मानं मन्यते स्मर्क्षपुङ्गवः ॥ २५ ॥ ततोऽब्रवीन्महातेजा हनुमन्तं स जाम्बवान् ॥२६॥ आगच्छ हरिशार्दूल वानरांस्त्रातुमर्हसि । नान्यो विक्रमपर्याप्तस्त्वमेषां परमः सखा ॥ २७ ॥ त्वत्पराक्रमकालोऽयं नान्यं पश्यामि कञ्चन । ऋक्षवानरवीराणामनीकानि प्रहर्षय । विशल्यौ कुरु चाप्येतौ सादितौ रामलक्ष्मण ॥ २८ ॥ गत्वा परममध्वानमुपर्युपरि सागरम् । हिमवन्तं नगश्रेष्ठं हनुमन् गन्तुमर्हसि ॥ २९ ॥ ततः काञ्चनमत्युच्चमृषभं पर्वतोत्तमम् । कैलासशिखरं चापि द्रक्ष्यस्यरिनिषूदन ॥३०॥ तयोः शिखरयोर्मध्ये प्रदीप्तमतुलप्रभम् । सर्वौषधियुतं वीर द्रक्ष्यस्योषधिपर्वतम् ॥ ३१ ॥ तस्य वानरशार्दूल चतस्रो मूर्ध्नि सम्भवाः । द्रक्ष्यस्योषधयो दीप्ता दीपयन्त्यो दिशो दश ॥ ३२ ॥ मृतसञ्जीवनीं चैव विशल्यकरणीमपि । सावर्ण्यकरणीं चैव सन्धानकरणीं तथा ॥ ३३ ॥

पर्याप्तविक्रमः । विक्रमपूर्ण इति यावत् ॥२७॥ अन्यं पराक्रमितारम्॥२८॥ परमं दीर्घम् । उपर्युपरि सागरं सागरस्य समीपोपरि प्रदेशे । "उपर्यध्यधसः सामीप्ये" इति सामीप्ये द्विर्वचनम् । "धिगुपर्यादिषु त्रिषु द्वितीया" इति द्वितीया॥ २९ ॥ ऋषभम् ऋषभाख्यम् । पर्वतोत्तमं शिखरमित्यर्थः ॥२३३॥ ॥ ३० ॥ ३१ ॥ तस्येत्यादिश्लोकत्रयमेकान्वयम् । ओषधयः ओषधीः । दीपयन्त्यः दीपयन्तीः । व्यत्ययेन द्वितीयार्थे प्रथमा । मृतं सञ्जीवयतीति भागेनेत्यर्थः । स्वयम्भुवः वल्लभेन ब्रह्मास्त्रेणेत्यर्थः ॥ १२--२६ ॥ आगच्छेति । विक्रमपर्याप्तः पर्याप्तविक्रमः ॥२७-३१॥ तस्येति । ओषधयः ओषधीः । दीपयन्त्यः

मृतसञ्जीवनी। जीवनानन्तरं सञ्चारक्षमतायै विशल्यं करोतीति विशल्यकरणी। विशल्ये कृते त्वचः सन्धानं करोतीति सन्धानकरणी। ततो व्रण कृतवैवर्ण्यं विहाय प्रदेशान्तरसावर्ण्यं करोतीति सावर्ण्यकरणी ॥ ३२-३४ ॥ बलोद्धर्षैः बलोत्कर्षैः। आपूर्यत पूर्णोऽभूत् ॥ ३५ ॥ पर्वततटाग्रस्थः त्रिकूटशिखरस्थः। पर्वतोत्तमं त्रिकूटम् ॥ ३६ ॥ हरीति। हरिः हनुमान् ॥ ३७ ॥ तस्य त्रिकूटस्य। नगाः वृक्षाः। हरिवेगात् हनुमतो हिमवदुत्तरप्रदेश

ताः सर्वा हनुमन् गृह्य क्षिप्रमागन्तुमर्हसि। आश्वासय हरीन् प्राणैर्योज्य गन्धवहात्मज ॥ ३४ ॥ श्रुत्वा जाम्बवतो वाक्यं हनुमान् हरिपुङ्गवः। आपूर्यत बलोद्धर्षैस्तोयवेगैरिवार्णवः ॥ ३५ ॥ स पर्वततटाग्रस्थः पीडयन् पर्वतोत्तमम्। हनुमान् दृश्यते वीरो द्वितीय इव पर्वतः ॥ ३६ ॥ हरिपादविनिर्भग्नो निषसाद स पर्वतः। न शशाक तदाऽऽत्मानं सोढुं भृशनिपीडितः ॥ ३७ ॥ तस्य पेतुर्नगा भूमौ हरिवेगाच्च जज्वलुः। शृङ्गाणि च व्यशीर्यन्त पीडितस्य हनूमता ॥ ३८ ॥ तस्मिन् सम्पीड्यमाने तु भग्नद्रुमशिलातले। न शेकुर्वानराः स्थातुं घूर्णमाने नगोत्तम ॥ ३९ ॥ सा घूर्णितमहाद्वारा प्रभग्नगृहगोपुरा। लङ्का त्रासाकुला रात्रौ प्रनृत्तेवाभवत्तदा ॥ ४० ॥ पृथिवीधरसङ्काशो निपीड्य धरणीधरम्। पृथिवीं क्षोभयामास सार्णवां मारुतात्मजः ॥ ४१ ॥ आरुरोह तदा तस्माद्धारिं मलयपर्वतम्। मेरुमन्दरसङ्काशं नानाप्रस्रवणाकुलम् ॥ ४२ ॥ नानाद्रुमलताकीर्णं विकासिकमलोत्पलम्। सेवितं देवगन्धर्वैः षष्टियोजनमुच्छ्रितम् ॥ ४३ ॥ विद्याधरैर्मुनिगणैरप्सरोभिर्निषेवितम्। नानामृगगणाकीर्णं बहुकन्दरशोभितम् ॥ ४४ ॥ सर्वानाकुलयंस्तत्र यक्षगन्धर्वकिन्नरान्। हनुमान् मेघसङ्काशो ववृधे मारुतात्मजः ॥ ४५ ॥

स्थौषधिपर्वतपर्यन्तगमनोचितशक्त्यास्थानवेगात्। जज्वलुश्च, वेगोद्धर्षजनाग्निनेत्यर्थः। पीडितस्य, पर्वतस्येति शेषः ॥ ३८ ॥ तस्मिन्निति। न शेकुरिति। त्रिकूटतटस्य युद्धरङ्गत्वात्। घूर्णमाने कम्पमाने ॥ ३९ ॥ प्रनृत्तेवाभवत् त्रिकूटाग्रनिर्मितत्वात्तस्याः ॥ ४० ॥ ४१ ॥ आरुरोहेत्यादि

दीपयन्तीः ॥ ३२-३४ ॥ श्रुत्वेति बलोद्धर्षैः बलोत्कर्षैः। आपूर्यत पूर्णोऽभूत ॥ ३५ ॥ पर्वततटाग्रस्थः त्रिकूटशिखरस्थः ॥ ३६ ॥ ३७ ॥ तस्य त्रिकूटपर्वतस्य।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्लोकत्रयमेकान्वयम् । मलयपर्वतमित्यत्र लङ्कामलय उच्यते ॥ ४२-४५ ॥ त्रासयन् त्रासनार्थं ननाद । "लक्षणहेत्वोः" इति शतृप्रत्ययः । स्वागमनपर्यन्तं राक्षसानिर्गमनं मा भूदिति तेषां त्रासनार्थं ननादेति भावः । इवशब्दो वाक्यालङ्कारे ॥ ४६ ॥ ४७ ॥ नमस्कृत्वाऽथ रामायेति । अयं प्रारिप्सितकर्मसमाप्तये सम्यगिष्टदेवतानमस्कारः ॥ ४८ ॥ स पुच्छमिति । पुच्छोद्यमनेनोत्साहातिरेक उक्तः । पृष्ठविनमनेनाकाशगमनानुकूलप्राण

पद्भ्यां तु शैलमापीड्य वडवामुखवन्मुखम् । विवृत्योग्रं ननादोच्चैस्त्रासयन्निव राक्षसान् ॥४६॥ तस्य नानद्यमानस्य श्रुत्वा निनदमद्भुतम् । लङ्कास्था राक्षसाः सर्वे न शेकुः स्पन्दितुं भयात् ॥ ४७ ॥ नमस्कृत्वाऽथ रामाय मारुतिर्भीमविक्रमः । राघवार्थे परं कर्म समीहत परन्तपः ॥ ४८ ॥ स पुच्छमुद्यम्य भुजङ्गकल्पं विनम्य पृष्ठं श्रवणे निकुञ्च्य । विवृत्य वक्त्रं वडवामुखाभमापुप्लुवे व्योमनि चण्डवेगः ॥ ४९ ॥ स वृक्षषण्डांस्तरसा जहार शैलान् शिलाः प्राकृतवानरांश्च । बाहूरुवेगोद्धतसम्प्रणुन्नास्ते क्षीणवेगाः सलिले निपेतुः ॥ ५० ॥ स तौ प्रसार्योरगभोगकल्पौ भुजौ भुजङ्गारिनिकाशवीर्यः । जगाम मेरुं नगराजमग्र्यं दिशः प्रकर्षन्निव वायुसूनुः ॥ ५१ ॥ स सागरं घूर्णितवीचिमालं तदा भृशं भ्रामितसर्वसत्त्वम् । समीक्षमाणः सहसा जगाम चक्रं यथा विष्णुकराग्रमुक्तम् ॥ ५२ ॥

वायुनिरोध उक्तः । श्रवणनिकुञ्चनेन बलोद्दीपनम् । मुखव्यादानेनाभिनिवेशः ॥ ४९ ॥ स इति । प्राकृतवानरान् त्रिकूटवनानित्यवासिनः । आजहार उज्जहार । अस्यैवानुवादो बाह्विति । बाहूरुवेगोद्धतसंप्रणुन्नाः बाहूर्वोर्वेगेन उद्धताः उन्मूलिताः सम्प्रणुन्नाः दूरं प्रेरिताः । क्षीणवेगाः क्रमेण क्षीणवेगाः सन्तः ॥ ५० ॥ मेरुं कैलासपार्श्ववर्तिनम् । अस्ति ह्यन्यो हिमवदन्तर्वर्ती मेरुः । यद्वा मेरुं मेरूपलक्षितदिशि स्थितं नगराजं हिमवन्तम् । यद्वा मेरु ॥२३४॥

नगाः वृक्षाः । जज्वलुः परस्परसङ्घर्षादिति भावः ॥ ३८-४५ ॥ पद्भ्यामिति । त्रासयन् ननाद "लक्षणहेत्वोः क्रियायाः" इति हेतौ शतृप्रत्ययः । यावदौषधानयनं तावद्राक्षसनिर्गमनं मा भूदिति तेषां त्रासनार्थं ननादेति भावः । इवशब्दो वाक्यालङ्कारे ॥ ४६-४९ ॥ प्राकृतवानरान् त्रिकूटशिखरवने नित्यवास्तव्यप्राकृतवानरानित्यर्थः ॥ ५० ॥ जगाम मेरुं कैलासपार्श्ववर्तिनम् । अस्ति ह्यन्यो हिमवदनन्तरपर्वतो मेरुः । यद्वा मेरूपलक्षितदिशि स्थितं नगराजं हिमवन्तम् । यद्वा

For Private And Personal Use Only

मुद्दिश्य जगाम, उत्तरां दिशमुद्दिश्य जगामेत्यर्थः । यद्वा मेरुं मेरुसदृशम् । प्रकर्षन् कम्पयन् ॥ ५१ ॥ ५२ ॥ जनान्तान् जनपदान् ॥ ५३ ॥ पूर्व सुपर्युपरि सागरमित्युक्त्या आदित्यपथमाकाशम् ॥ ५४ ॥ ५५ ॥ स्मरन् जाम्बवत इति । जाम्बवद्वाक्यस्मरणम् औषधिपर्वतमतीत्य वेगातिशयेना न्यत्र गमननिवृत्त्यर्थम् । वातरंहसा, उपलक्षित इति शेषः ॥ ५६–५८ ॥ दृष्टानामाश्रमाणां नामान्यनुक्रामति–स ब्रह्मकोशमित्यादिना । ब्रह्मणश्चतु

स पर्वतान् वृक्षगणान् सरांसि नदीस्तटाकानि पुरोत्तमानि । स्फीतान् जनान्तानपि सम्प्रवीक्ष्य जगाम वेगात् पितृतुल्यवेगः ॥ ५३ ॥ आदित्यपथमाश्रित्य जगाम स गतक्लमः । हनुमांस्त्वरितो वीरः पितृतुल्यपराक्रमः ॥ ५४ ॥ जवेन महता युक्तो मारुतिर्मारुतो यथा । जगाम हरिशार्दूलो दिशः शब्देन पूरयन् ॥ ५५ ॥ स्मरन् जाम्बवतो वाक्यं मारुतिर्वातरंहसा । ददर्श सहसा चापि हिमवन्तं महाकपिः ॥ ५६ ॥ नानाप्रस्रवणोपेतं बहुकन्दरनिर्झरम् । श्वेताभ्रचयसङ्काशैः शिखरैश्चारुदर्शनैः । शोभितं विविधैर्वृक्षैरगमत् पर्वतोत्तमम् ॥ ५७ ॥ स तं समासाद्य महानगेन्द्रमतिप्रवृद्धोत्तमघोरशृङ्गम् । ददर्श पुण्यानि महाश्रमाणि सुरर्षिसङ्घोत्तमसेवितानि ॥ ५८ ॥ स ब्रह्मकोशं रजतालयं च शक्रालयं रुद्रशरप्रमोक्षम् । हयाननं ब्रह्मशिरश्च दीप्तं ददर्श वैवस्वतकिङ्करांश्च ॥ ५९ ॥ वज्रालयं वैश्रवणालयं च सूर्यप्रभं सूर्यनिबन्धनं च । ब्रह्मासनं शङ्करकार्मुकं च ददर्श नाभिं च वसुन्धरायाः ॥ ६० ॥

र्मुखस्य कोशो गृहम् । “ कोशोऽस्त्री कुड्मलेऽर्थौघे गुह्यदेशेऽण्डशीर्षयोः । गृहे देहे पुस्तकौघे पेत्वामसिपिधानके ॥” इति रत्नमाला । रजतालयं कैलासम् । शक्रस्य इन्द्रस्य । स्थानम् आश्रमस्थानम् । रुद्रशराः प्रमोक्ष्यन्ते लीलार्थं यस्मिन् तद्रुद्रशरप्रमोक्षं स्थानम् । हयाननं हयग्रीवाराधनस्थानम् । ब्रह्मशिरः रुद्रनिकृत्तब्रह्मशिरःप्रक्षेपस्थानम् । वैवस्वतकिङ्करान् विवस्वत्सम्बन्धिकिङ्करान्, ग्रामण्यादीन् मासान्तपरिचारकान् विश्रमार्थमत्र स्थितान् ॥ ५९ ॥ वज्रालयमिति । इन्द्राय ब्रह्मणा वज्रप्रदानस्थानम् । सूर्यप्रभमिति वैश्रवणालयविशेषणम् । सूर्यनिबन्धनं छायादेवीप्रीतये विश्व

मेरुतुल्यं हिमवन्तम् । सिंहो माणवक इतिवद्गौणप्रयोगः ॥ ५१ ॥ ५२ ॥ जनान्तान् जनपदान् ॥ ५३–५५ ॥ स्मरन् जाम्बवतो वाक्यं जाम्बवद्वाक्यस्मरण मोषधिपर्वतमतीत्य वेगातिशयेनान्यत्र गमननिवृत्त्यर्थम् ॥ ५६–५८ ॥ दृष्टानामाश्रमाणां नामान्यनुक्रामति–स ब्रह्मकोशमित्यादिना । ब्रह्मकोशादीन्या

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कर्मणा शाणारोपणाय सूर्यनिबन्धनस्थानम् । ब्रह्मासनं देवगणसन्दर्शनाय कृतं ब्रह्मणः सिंहासनम् । ब्रह्मणामृषीणामासनं स्थानं वा । शङ्करकार्मुकं तत्स्थानमित्यर्थः । नाभिं पातालप्रवेशरन्ध्रम् ॥ ६० ॥ ब्रह्मादिस्थानेषु रजतालयमिति परिगणितमपि जाम्बवदुपादिष्टप्रकारेण दर्शनाय पुनराह– कैलासमिति । हिमवच्छिला नाम कैलासपार्श्वे काश्चिच्छिलाविशेषः । ऋषभम् ऋषभाख्यमौषधिपर्वतम् । काञ्चनशैलं पूर्वं मेरुमित्युक्तम् । सन्दीप्तसर्वौ

कैलासमग्र्यं हिमवच्छिलां च तथर्षभं काञ्चनशैलमग्र्यम् । सन्दीप्तसर्वौषधिसम्प्रदीप्तं ददर्श सर्वौषधिपर्वतेन्द्रम् ॥ ६१ ॥ स तं समीक्ष्यानलरश्मिदीप्तं विसिष्मिये वासवदूतसूनुः । आवृत्य तं चौषधिपर्वतेन्द्रं तत्रौषधीनां विचयं चकार ॥ ६२ ॥ स योजनसहस्राणि समतीत्य महाकपिः । दिव्यौषधिधरं शैलं व्यचरन्मारुतात्मजः ॥६३॥ महौषध्यस्ततः सर्वास्तस्मिन् पर्वतसत्तमे । विज्ञायार्थिनमायान्तं ततो जग्मुरदर्शनम् ॥ ६४ ॥ स ता महात्मा हनुमानपश्यन् चुकोप कोपाच्च भृशं ननाद । अमृष्यमाणोऽग्निनिकाशचक्षुर्महीधरेन्द्रं तमुवाच वाक्यम् ॥ ६५ ॥ किमेतदेवं सुविनिश्चितं ते यद्राघवे नासि कृतानुकम्पः । पश्याद्य मद्बाहुबलाभिभूतो विकीर्णमात्मानमथो नगेन्द्र ॥६६॥

षधिसम्प्रदीप्तम् सन्दीप्ताभिः रात्रौ ज्वलन्तीभिः सर्वाभिः ओषधीभिः तृणज्योतिर्भिः सम्प्रदीप्तं सम्यक्प्रकाशमानम् । सर्वौषधिपर्वतेन्द्रं मृतसञ्जीवन्यादिसर्वौषधियुक्तपर्वतेन्द्रं ददर्श ॥ ६१ ॥ वासवदूतः वायुः वासवादेशेन मेघप्रेरकत्वात् । अत एवाभिषेकसमये इन्द्रेण प्रेरितो हारं रामायोपाहरत् । विचयम् अन्वेषणम् ॥ ६२ ॥ अतीत्य अतीत्यापीत्यर्थः । अनेन श्रमरहितत्वमुक्तम् ॥ ६३ ॥ महौषध्य इति । ततः तस्य हनुमतः अदर्शनम् ॥ ६४ ॥ ताः ओषधीः ॥ ६५ ॥ राघवे कृतानुकम्पो नासीति यत् एतत् एवं सुविनिश्चितं यदि तर्हि आत्मानमथो विकीर्णं पश्येति सम्बन्धः ॥ ६६ ॥ ॥२३५॥

श्रमाणि ॥ ५९ ॥ ६० ॥ हिमवच्छिलां, कैलासपार्श्वे काश्चिच्छिलाविशेषः । यस्याश्चित्रशिलेति इतिहासप्रसिद्धिः ॥ ६१ ॥ वासवदूतसूनुः वायुसुतः । वायोर्वासवदूतत्वं वासवादेशेन मेघादिप्रेरकत्वात् ॥ ६२–६५ ॥ किमिति । यद्यस्मात् राघवे कृतानुकम्पो नासि तस्मादेतदोषध्यदर्शनम्, ते त्वया सुनिश्चितं किम् ?

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतच्छ्लोकानन्तरमित्युक्त्वेत्यध्याहार्यम् । स इति । सनागं सगजम् । उन्ममाथ उत्पाटयामास ॥ ६७॥६८॥ भास्कराध्वानम् अन्तरिक्षम्, भास्कराभ शिखरग्रहणात् स्वयं भास्करसन्निकाशत्वाच्च । सूर्यसमीपस्थः प्रतिसूर्य इव बभावित्यर्थः॥६९॥ सहस्रधारेण अर्पितेन हस्तेऽर्पितेन । सपावकेन अग्निज्वालावता । चक्रेण विष्णुरिव रराज ॥७०॥ तं वानरा इत्यनेन दूरादेव गन्धाघ्राणेन सर्वे जीविता इति गम्यते ॥७१॥ शैलोत्तमे त्रिकूटशिखरे ॥७२॥७३॥

स तस्य शृङ्गं सनगं सनागं सकाञ्चनं धातुसहस्रजुष्टम् । विकीर्णकूटज्वलिताग्रसानुं प्रगृह्य वेगात् सहसोन्ममाथ ॥ ६७ ॥ स तं समुत्पाट्य खमुत्पपात वित्रास्य लोकान् ससुरासुरेन्द्रान् । संस्तूयमानः खचरैरनेकैर्जगाम वेगाद् गरुडोग्रवेगः ॥ ६८ ॥ स भास्कराध्वानमनुप्रपन्नस्तं भास्कराभं शिखरं प्रगृह्य । बभौ तदा भास्करसन्निकाशो रवेः समीपे प्रतिभास्कराभः ॥ ६९ ॥ स तेन शैलेन भृशं रराज शैलोपमो गन्धवहात्मजस्तु । सहस्रधारेण सपावकेन चक्रेण खे विष्णुरिवार्पितेन ॥ ७० ॥ तं वानराः प्रेक्ष्य विनेदुरुच्चैः स तानपि प्रेक्ष्य मुदा ननाद । तेषां समुद्घुष्टरवं निशम्य लङ्कालया भीमतरं विनेदुः ॥ ७१ ॥ ततो महात्मा निपपात तस्मिन् शैलोत्तमे वानरसैन्यमध्ये । हर्युत्तमेभ्यः शिरसाऽभिवाद्य विभीषणं तत्र स सस्वजे च ॥ ७२ ॥ तावप्युभौ मानुषराजपुत्रौ तं गन्धमाघ्राय महौषधीनाम् । बभूवतुस्तत्र तदा विशल्यावुत्तस्थुरन्ये च हरिप्रवीराः ॥ ७३ ॥ सर्वे विशल्या विरुजः क्षणेन हरिप्रवीरा निहताश्च ये स्युः । गन्धेन तासां प्रवरौषधीनां सुप्ता निशान्तेष्विव सम्प्रबुद्धाः ॥ ७४ ॥ यदाप्रभृति लङ्कायां युद्ध्यन्ते कपिराक्षसाः । तदाप्रभृति मानार्थमाज्ञया रावणस्य च ॥ ७५ ॥

विशल्यकरण्या विशल्याः, सन्धानकरण्या विरुजः, ये पूर्वं निहतास्तेऽपि सुप्ता निशान्तेष्विव सम्प्रबुद्धाः । अनेन सावर्ण्यसिद्धिरप्युक्ता ॥ ७४ ॥ तर्हि निहता राक्षसाः किं न प्रबुद्धाः ? इत्यत्राह–यदाप्रभृतीति । मानार्थं हतानां राक्षसानाम् इयत्तया अपरिज्ञानार्थम्, मृतशरीरसङ्ख्याप्रतिपत्त्यर्थं वा ।

तर्हि विकीर्णमात्मानं पश्येति सम्बन्धः ॥ ६६ ॥ सनागं सगजम् । उन्ममाथ उत्पाटयामास ॥ ६७–६९ ॥ सहस्रधारेण सहस्रारेण अर्पितेन ॥७०–७४॥ यथा हताः

स०–विनेदुः अनेन आतमात्रस्पर्शेन गात्रस्मृतिरोगता च कपीनां जाते इति गम्यते । तेषां स च ते च ते । तेषां हनुमद्वानराणाम् ॥ ७१ ॥

For Private And Personal Use Only

पूर्वयोजनायामर्थशब्दो निवृत्तिपरः। "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः । परैः परिच्छिद्य ज्ञानं मा भूदित्येवमर्थमिति भावः । हताहताः मुमूर्षावस्थाः । किं पुनर्मृता इति भावः । "क्तेन नञ्विशिष्टेनानञ्" इति कर्मधारयः । यद्वा यदा यदा ये ये हताः तदा तदा ते ते क्षिप्ता इत्यर्थः ॥ ७५–७७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

ये हन्यन्ते रणे तत्र राक्षसाः कपिकुञ्जरैः । हताहतास्तु क्षिप्यन्ते सर्वे एव तु सागरे ॥ ७६ ॥ ततो हरिर्गन्धवहात्मजस्तु तमोषधीशैलमुदग्रवीर्यः । निनाय वेगाद्धिमवन्तमेव पुनश्च रामेण समाजगाम ॥ ७७ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुस्सप्ततितमः सर्गः ॥ ७४ ॥

ततोऽब्रवीन्महातेजाः सुग्रीवो वानराधिपः । अर्थ्यं विज्ञापयंश्चापि हनुमन्तमिदं वचः ॥ १ ॥

एवं हनुमदानीतौषधिपर्वतगन्धमात्रेण समागतप्राणेषु सर्वेषु विशल्येषु समुत्थितेषु सुग्रीवः स्वातिसन्धानजनितकोपातिरेकेण सद्यो निश्शेषं लङ्कानिर्दहनं हनुमते नियमयति–तत इत्यादि । अर्थ्यम् अर्थादनपेतम्। प्रयोजनानियतं वाक्यं विज्ञापयन्, रामायेति शेषः। ततो हनुमन्तमब्रवीदिति योजना। वानराः प्रतिबुद्धाः, एवं राक्षसाः किमिति न प्रतिबुद्धास्तत्राह–यदाप्रभृतीत्यादिश्लोकद्वयेन । मानार्थं मानं हतानां राक्षसानामियत्ता तदर्थं तत्परिज्ञानार्थम् । यद्वा मानः अभिमानः तदर्थं राक्षसा बहवो हता इति सर्वे ज्ञास्यन्ति तदभिमानादप्रकटनायेत्यर्थः । हताहतास्तु मुमूर्षावस्थापन्ना अपीत्यर्थः ॥ ७५–७७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुस्सप्ततितमः सर्गः ॥ ७४ ॥ तत इति । अर्थ्यम् अर्थादनपेतम्, कर्तव्य

स०–सागरोपरि गिरिशिखरं परिगृह्योत्प्लवने तदन्तःस्थानां रक्षसामनुज्जीवनं च न गन्धस्यान्तःप्रवेशासामर्थ्यात् । किं नाम यादोभी रक्षसां भक्षितत्वात् । निलयनमात्रेण हनुमत्कृतसर्वसोत्पादनतः एतदनिष्टकार्यसाधनेऽयमुत्तरत्र किं कुर्यादिति भीतेर्वा । "भीषास्माद्वातः पवते" इत्यादेः रामविरुद्धकार्यकरणभीतेरिवात्मजप्रीतेर्वा वायुर्न निनाय नीरनाथपदार्थमध्ये गन्धमिति वेति ज्ञेयम् । ओषधीनामर्थिनं ज्ञात्वाऽदर्शनं गता इत्यनेन ज्ञानित्वोक्तेरनुसन्धानादिकं सम्भवतीति सुघटोऽयमर्थः ॥ ७६ ॥ ओषधीशैलः तद्रूपपर्वतः, तम् । तत्रत्य एव वेगात् हिमवन्तं स्वस्थानं तम् उत्कृत्तशैलभागं निनाय प्रापयामास । 'संस्थित एव तत्र' इत्यन्यत्रोक्तेः । पुनः प्रक्षेपानन्तरं रामेण समाजगाम सङ्गतोऽभूत् । प्रथमेन्द्रजिद्युद्ध एवादृष्टतद्दृष्ट्यै 'इदमम्भो गृहीत्वा तु' इत्यारभ्य 'चकार नेत्रयोः शौचम्' इति गर्भीकृत्य 'क्षणेनातीन्द्रियाण्येषां चक्षूंषि' इत्यनेन वनपर्वोक्ता 'अनेन दृष्टोऽहमिति स्म दुष्टः' इत्यन्यत्र रीत्यन्तरेणोक्ता च कथानुक्तिर्न दोषायेति नीतेरविरुद्धेति च संग्राह्येति ज्ञेयम् । ओषधीति दीर्घघटितालेखनं निर्बीजम् । अत्रैव बहुस्थलेषु ओषध्य इति पूर्वमुक्तेः । लेखनं यदि कर्तव्यं तर्हि तत्रैव कर्तव्यम् । ईकारान्तत्वेन समाधानं तत्रेवात्रापि समिति न स्वरसम् ॥ ७७ ॥

॥२३६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्वा अर्थ्यं विज्ञापयन् विशेषेण ज्ञापयन् ॥ १ ॥ इदानीं लङ्कादाहोपदेशे निमित्तमाह—यत इति । उपनिर्हारम् उपनिष्क्रमणम् । युद्धाय निर्गमनमिति यावत् । हतपुत्रादित्वेनानुत्साहाद्रावणो न निर्गमिष्यतीति भावः । अत्र आग्रहेण प्रेतनिर्यापनरूढनिर्हारपदप्रयोगः । दातुं कर्तुमिति यावत् । धातूनामनेकार्थत्वात् । उपनिर्हारशब्दः उपनिष्क्रम्य युद्धपरो वा ॥ २ ॥ लघवः वेगवन्तः । उत्पतन्तु प्राकारमुत्प्लुत्य गच्छन्तु ॥ ३ ॥ तत इति । ननु

यतो हतः कुम्भकर्णः कुमाराश्च निषूदिताः । नेदानीमुपनिर्हारं रावणो दातुमर्हति ॥ २ ॥ ये ये महाबलाः सन्ति लघवश्च प्लवङ्गमाः । लङ्कामभ्युत्पतन्त्वाशु गृह्योल्काः प्लवगर्षभाः ॥ [हरयो हरिसङ्काशाः प्रदग्धुं रावणालयम् ।] ॥ ३ ॥ ततोऽस्तं गत आदित्ये रौद्रे तस्मिन्निशामुखे । लङ्कामभिमुखाः सोल्का जग्मुस्ते प्लवगर्षभाः ॥ ४ ॥ उल्काहस्तैर्हरिगणैः सर्वतः समभिद्रुताः । आरक्षस्था विरूपाक्षाः सहसा विप्रदुद्रुवुः ॥ ५ ॥ गोपुराट्टप्रतोलीषु चर्यासु त्रिविधासु च । प्रासादेषु च संहृष्टाः ससृजुस्ते हुताशनम् । तेषां गृहसहस्राणि ददाह हुतभुक् तदा ॥ ६ ॥

पूर्वम् 'उल्काहस्तौ तदा रात्रौ' इत्युक्तम्, अत्र आदित्यास्तमयसमय इति गम्यते, अतो विरुद्धमिति चेन्न विरोधः । आदित्येऽस्तं गत इति प्रकाशाभावोक्तिः । निशामुख इति रात्रेः प्रथमयाम उच्यते । रौद्र इति विशेषणात् यामान्तत्वेन गाढान्धकारत्वमुच्यते । हनुमांश्च महाद्भुतवेगशालितया मुहूर्तमात्रेण मस्थायौषधिपर्वतमानीय तं पुनस्तत्र निक्षिप्यागतवानिति तस्य वेगातिशयश्च प्रतिपादितो भवति ॥ ४ ॥ आरक्षस्थाः गुल्मस्थाः नगररक्षिणो वा । आरक्षो दुर्गरक्षिणां स्थानम्, तत्रस्था वा । "त्रिष्वारक्षस्तु रक्षणे" इति रत्नमाला । विरूपाक्षाः राक्षसाः ॥५॥ गोपुरं पुरद्वारम् । अट्टन्तिमित्यर्थः । विज्ञापयन् कर्तव्यं बोधयन्नित्यर्थः ॥ १ ॥ उपनिर्हारम् उपनिष्क्रम्य युद्धमदानम् ॥ २ ॥ ३ ॥ निशामुखे निशायाः पूर्वयामे । "उल्काहस्तौ तदा तौ तु रणशीर्षे विचेरतुः" इति पूर्वसर्गोक्तेः सन्ध्याकालानन्तरं मस्थायौषधिपर्वतमानीय पुनस्तत्र निक्षिप्य आगतं हनुमन्तमुद्दिश्य "ये ये महाबलास्सन्ति लघवश्च प्लवङ्गमाः । लङ्कामभ्युत्पतन्तु" इति सुग्रीवादेशानन्तरं प्लवगर्षभाः निशायां लङ्कां जग्मुरित्यभिधानात् हनुमतः अचिन्त्यवेगातिशयस्सूच्यते । ततोऽस्तङ्गत आदित्य इति पूर्वसिद्धस्यैव अस्तमयस्यानुवादः, न त्विदानीमस्तमयः । यद्वा 'ततोऽस्तं गत आदित्ये रौद्रे तस्मिन्निशामुखे' इति परदिनवृत्तान्तः ॥ ४ ॥ आरक्षस्थाः गुल्मस्थाः । विरूपाक्षा राक्षसाः ॥ ५ ॥ तेषां वानराणां सम्बन्धी हुतभुक् ॥ ६ ॥

कतक०—तस्मादिदानीम् उपनिर्हारं पुररक्षाम् । दातुं सम्पादयितुम् नार्हति ॥ २ ॥ स०—आरक्षं रक्षणीयं द्वारादि । तत्र तिष्ठन्तीत्यारक्षस्थाः । "आरक्षं रक्षणीये स्यात्" इति विश्वः ॥ ५ ॥

For Private And Personal Use Only

हिंसन्ति योधा एषु स्थित्वेत्यट्टाः प्राकाराग्रस्थितगृहाणि । " स्यादट्टः क्षौममस्त्रियाम् " इत्यमरः । प्रतोल्यः वीथ्यः । चर्या अवान्तरवीथ्यः । ते वानराः । ससृजुः क्षिप्तवन्तः । तेषां वानराणां सम्बन्धी हुतभुगित्यन्वयः ॥ ६ ॥ दहनकार्यं प्रपञ्चयति–प्रासादा इत्यादि । तत्र प्रासादेषु । दह्यते अदह्यत । व्यत्ययेन भूतार्थे लट् । वरं सुगन्धम् ॥ ७ ॥ मौक्तिका इत्यादिचतुःश्लोक्येकान्वया । सर्वत्र अदह्यतेत्यस्य यथायथं विपरिणामेनान्वयः । मणयः

प्रासादाः पर्वताकाराः पतन्ति धरणीतले । अगरुर्दह्यते तत्र वरं च हरिचन्दनम् ॥ ७ ॥ मौक्तिका मणयः स्निग्धा वज्रं चापि प्रवालकम् । क्षौमं च दह्यते तत्र कौशेयं चापि शोभनम् ॥ ८ ॥ आविकं विविधं चौर्णं काञ्चनं भाण्डमायुधम् । नानाविकृतसंस्थानं वाजिभाण्डपरिच्छदौ ॥ ९ ॥ गजग्रैवेयकक्ष्याश्च रथभाण्डाश्च संस्कृताः । तनुत्राणि च योधानां हस्त्यश्वानां च वर्म च ॥ १० ॥

उपात्तमौक्तिकादिव्यतिरिक्ताः । क्षौमकौशेययोरुपादानभेदात् भेदः । " वाल्कं क्षौमादि " " कौशेयं कृमिकोशोत्थम् " इत्युभयत्राप्यमरः । शोभनं शोभमानम् । आविकम् अविरोमनिर्मितं कम्बलम् । और्णं मेषादिरोमनिर्मितं कम्बलम् । "ऊर्णा मेषादिलोम्नि स्यात्" इत्यमरः । भाण्डम् उपकरणम् । आभरणादि वा । " भाण्डं तु भूषायां नादे पात्राश्वभूषयोः । मार्जने कलशादौ च वणिङ्मूलधनेऽपि च ॥ " इति रत्नमाला । नानाविकृतसंस्थानं नानाविधविकारवद्विचित्रसन्निवेशमिति भूषणादिसर्वविशेषणम् । वाजिभाण्डपरिच्छदौ अश्वालङ्कारपल्ययनादिपरिबर्हौ । भाण्डशब्देनैवाश्वाभरणसिद्धावपि कर्णावतंसादिवत् साहित्यबोधनार्थं वाजिपदम् । गजानां ग्रैवेयकानि कण्ठभूषणानि । कक्ष्याः इभबन्धिन्यः । " ग्रैवेयकं कण्ठभूषा " " कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने । " इत्युभयत्राप्यमरः । संस्कृताः उत्तेजिताः । योधानां तनुत्राणि वर्माणि । हस्त्यश्वानां वर्म अयः

पतन्ति अपतन् । दह्यते अदह्यत । भूतार्थे लट् ॥ ७ ॥ ८ ॥ आविकम् अविरोमनिर्मितम् । और्णम् ऊर्णा मेषादिलोम, तज्जन्यकम्बलादि । काञ्चनं भाण्डं सौवर्णमुपकरणम् । नानाविकृतसंस्थानं नाना अनेकं विकृतसंस्थानं विचित्रविन्यासम् । वाजिभाण्डपरिच्छदौ वाजिभाण्डमश्वालङ्कारः, परिच्छदः पल्ययनादिपरिकरः । भाण्डशब्देनैव

स०–"भाण्डशब्दोऽलङ्कारमात्रवाची रथभाण्डेत्युक्तेः । अत एव वाजिभाण्डेत्यत्र वाजिग्रहणं चरितार्थम् । अश्वालङ्कारवाचित्वे तु तद्वैयर्थ्यं स्पष्टमेव । तत्त्वेऽपि कर्णावतंसादिवत्साहित्यबोधनार्थं तत्र सः । रथभाण्डेत्यत्र तु लाक्षणिक इत्यन्ये " इति नागोजिभट्टव्याख्याया भिन्नानुपूर्वीमत्या अपि वस्तुतोऽर्थैकतावत्यास्तीर्थव्याख्याया अपि "भाण्डं भूषणमात्रेऽपि–नादे पात्रे तुरङ्गाणां भूषणे " इति विश्वः स्वानवलोकननिमित्ता शाष्टमापन्न इति न न आयासोऽपेक्षितः ॥ १० ॥

कांस्यादिनिर्मितम् । रोमजम् अविमेषादिरोमभिन्नरोमनिर्मितं कम्बलादि । वालजं चामरादि । चर्म संस्तरणं खेटकं वा । व्याघ्रजं वैयाघ्रं नखवालादि । अण्डजं कस्तूरिकादि द्रव्यम् ॥ ८–११ ॥ मुक्तेति । प्रासादाः पर्वताकारा इत्यत्र केवलप्रासादाः, अत्र मुक्तादिखचिताः । अस्त्रसंयोगान् संयुज्यन्त इति संयोगाः सङ्घाताः तान् । तत्र लङ्कायाम् ॥ १२ ॥ गृहच्छन्दान् स्वस्तिकादिगृहविन्यासान् । गृहगर्धिनां गृहस्थानाम् ॥ १३ ॥ हठोपनतत्वेन

खड्गा धनूंषि ज्या बाणास्तोमराङ्कुशशक्तयः । रोमजं वालजं चर्म व्याघ्रजं चाण्डजं बहु ॥ ११॥ मुक्तामणिविचित्रांश्च प्रासादांश्च समन्ततः । विविधानस्त्रसंयोगानग्निर्दहति तत्र वै ॥ १२ ॥ नानाविधान् गृहच्छन्दान् ददाह हुतभुक् तदा । आवासान् राक्षसानां च सर्वेषां गृहगर्धिनाम् ॥ १३ ॥ हेमचित्रतनुत्राणां स्रग्दामाम्बरधारिणाम् । शीधुपानचलाक्षाणां मदविह्वलगामिनाम् ॥ १४॥ कान्तालम्बितवस्त्राणां शत्रुसञ्जातमन्युनाम् । गदाशूलासिहस्तानां खादतां पिबतामपि ॥ १५ ॥ शयनेषु महार्हेषु प्रसुप्तानां प्रियैः सह । त्रस्तानां गच्छतां तूर्णं पुत्रानादाय सर्वतः ॥ १६ ॥

खेदातिशयं व्यञ्जयितुं तेषां व्यासङ्गं दर्शयति–हेमेत्यादिना । हेमचित्रतनुत्राणां हेममयाद्भुतवर्मणाम् । “ आलेख्याश्चर्ययोश्चित्रम् ” इत्यमरः । वर्म ग्रहणव्यासक्तानामित्यर्थः । स्रग्दामानि पुष्पमालाः । दामशब्दो हारपरः । स्रग्दामशब्देनानेकसरनिर्मितपुष्पमालोच्यत इत्याचार्याः । अत्र सर्वत्रापि व्यासङ्ग एव तात्पर्यम् । शीधुपानचलाक्षाणां मद्यपानलोलदृष्टीनाम् । अत एव मदविह्वलगामिनां मदेन मन्दगामिनाम् ॥ १४ ॥ कान्तालम्बितवस्त्राणाम् आलम्बितवस्त्रकान्तानाम्, रतिपराणामिति यावत् । शत्रुषु सञ्जातमन्युनां सञ्जातक्रोधानाम् । दीर्घाभाव आर्षः । खादतां मांसादिकं भक्षयताम् । पिबतां मद्यपानं कुर्वताम् । शीधुपानेत्यत्र मद्यपानकार्यमुक्तम् । क्षीरादिकं पिबतामिति वा ॥ १५ ॥ महार्हेष्विति विशेषणेन सुप्त्यतिशयहेतु

अश्वाभरणप्रतीतेः पुनर्वाजिग्रहणं कर्णावतंसवत्साहित्यावबोधनार्थम् । रथभाण्डाः रथोपकरणानि । संस्कृताः सम्यग्ग्रथिताः । रोमजं कम्बलादि । वालजं चामरादि । व्याघ्रजं व्याघ्रचर्म । अण्डजं कस्तूरिकादि ॥ ९–११ ॥ अस्त्रसंयोगान् अस्त्रसङ्घातान् ॥ १२ ॥ गृहच्छन्दान् स्वस्तिकादिगृहसन्निवेशविशेषान् । गृहगर्धिनां गृहस्थानाम् ॥ १३ ॥ दामानि हाराः ॥ १४ ॥ शत्रुसञ्जातमन्युनामित्यत्र दीर्घाभाव आर्षः ॥ १५ ॥ प्रियैः प्रियाभिस्सहेत्यर्थः ॥ १६ ॥ १७ ॥

स०–प्रियैः प्रियाश्च प्रियाणि च प्रियाणि कान्तापत्यानि तैः । “नपुंसकमनपुंसकेन” इत्येकशेषः । पुत्रानादाय गच्छतां निरग्निकस्थलं प्रति ॥१६॥

रक्तः । प्रियैः दारैरिति विशेष्यम् ॥ १६ ॥ तेषाम् एवं व्यासक्तानां शतसहस्राणीति सङ्ख्यासङ्ख्येययोरभेदेन निर्देशः, अनेकशतसहस्रराक्षसानित्यर्थः । पुनः पुनरित्यनेन तद्धाधिरवसास्रेहेनाधिकज्वालोच्यते ॥ १७ ॥ रावणस्य पुनर्धननाशं व्यञ्जयितुमुत्तमगृहदहनं दर्शयति–सारवन्तीत्यादिना । सारवन्ति श्रेष्ठधनवन्ति । "सारो बले स्थिरांशेऽर्थे पुमान् न्याये वरे त्रिषु" इति रत्नमाला । गम्भीराणि महातलपवन्ति । गुणवन्ति सौन्दर्यवन्ति । हेमचन्द्रार्ध

तेषां शतसहस्राणि तदा लङ्कानिवासिनाम् । अदहत् पावकस्तत्र जज्वाल च पुनः पुनः ॥१७॥ सारवन्ति महार्हाणि गम्भीरगुणवन्ति च । हेमचन्द्रार्धचन्द्राणि चन्द्रशालोन्नतानि च ॥१८॥ रत्नचित्रगवाक्षाणि साधिष्ठानानि सर्वशः । मणिविद्रुमचित्राणि स्पृशन्तीव दिवाकरम् ॥ १९ ॥ क्रौञ्चबर्हिणवीणानां भूषणानां च निस्वनैः । नादितान्यचलाभानि वेश्मान्यग्निर्ददाह सः ॥ २० ॥ ज्वलनेन परीतानि तोरणानि चकाशिरे । विद्युद्भिरिव नद्धानि मेघजालानि घर्मगे ॥ २१ ॥ ज्वलनेन परीतानि निपेतुर्भवनान्यथ । वज्रिवज्रहतानीव शिखराणि महागिरेः ॥ २२ ॥ विमानेषु प्रसुप्ताश्च दह्यमाना वराङ्गनाः । त्यक्ताभरणसर्वाङ्गा हा हेत्युच्चैर्विचुक्रुशुः ॥ २३ ॥ तानि निर्दह्यमानानि दूरतः प्रचकाशिरे । हिमवच्छिखराणीव दीप्तौषधिवनानि च ॥ २४ ॥

चन्द्राणि हेमकृतानि चन्द्राकाराण्यर्धचन्द्राकाराणि चेत्यर्थः । चन्द्रशालाभिः शिरोगृहैः उन्नतानि । " चन्द्रशाला शिरोगृहम् " इत्यमरः ॥ १८ ॥ साधिष्ठानानि शय्यासनादिसहितानि । स्पृशन्तीव दिवाकरम् सूर्यपथपर्यन्तोन्नतानीत्यर्थः ॥ १९ ॥ क्रौञ्चादयो लीलार्थं गृहेषु संवर्धिताः ॥ २० ॥ ज्वलनेनेति । घर्मोऽस्माद्गच्छतीति घर्मगः वर्षाकाल इत्यर्थः । घर्मगे निदाघे गच्छतीति शेष इत्यप्याहुः । घर्मशब्देन घर्मान्तो लक्ष्यते । तं गच्छति प्राप्नोतीति घर्मगः वर्षादिरित्यपरे । वस्तुतो घर्मगे ग्रीष्म इत्येवार्थः । लङ्कायां दह्यमानायां सन्तापे च समन्ततः प्रसरति दह्यमानतोरणादीनि निदाघप्ररूढसविद्युन्मेघतुल्यानीत्यर्थः ॥ २१ ॥ ज्वलनेन परीतानि निपेतुरित्यस्य वज्रिवज्रहतानीवेत्युत्तरार्धम् ॥ २२ ॥ विमानेष्विति । त्यक्ताभरणसर्वाङ्गाः सर्वाङ्गाभरणान्यपि त्यक्त्वेत्यर्थः ॥ २३ ॥ तानि पूर्वश्लोके प्रस्वापाधिकरणतयोपात्तानि विमानानि । दीप्तौषधिवनानि प्रकाशिततृणज्योति ॥२३८॥

हेमचन्द्रार्धचन्द्राणि हेमनिर्मितानि चन्द्राकाराणि अर्धचन्द्राकाराणि च । चन्द्रशालोन्नतानि शिरोगृहैः उन्नतानि वेश्मान्यग्निर्ददाहेति सम्बन्धः ॥ १८–२० ॥ घर्मगे घर्मोऽस्माद्गच्छतीति घर्मगः वर्षाकालः ॥ २१ ॥ २२ ॥ विमानेषु सप्तभूममासादेषु ॥ २३–२५ ॥ स०- लङ्कानिवासिनां शतसहस्राणि गृहाण्यदहत् ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वनानि ॥ २४ ॥ हर्म्याग्रैरिति । ज्वालाप्रज्वलितैः ज्वालाविशिष्टैरित्यर्थः ॥ २५ ॥ हस्त्यध्यक्षैः हस्तिपकैः । मुक्तैः निगलान्मोचितैः । मुक्तैश्च तुरगैरपीत्यत्राप्यश्वाध्यक्षैरित्यध्याहार्यम् । लोकान्ते प्रलये ॥ २६ ॥ २७ ॥ छायासंसक्तसलिलः प्रतिबिम्बसंक्रान्तजलः । लोहितोदः लोहितोदकः ।

हर्म्याग्रैर्दह्यमानैश्च ज्वालाप्रज्वलितैरपि । रात्रौ सा दृश्यते लङ्का पुष्पितैरिव किंशुकैः ॥२५॥ हस्त्यध्यक्षैर्गजैर्मुक्तै मुक्तैश्च तुरगैरपि । बभूव लङ्का लोकान्ते भ्रान्तग्राह इवार्णवः ॥ २६ ॥ अश्वं मुक्तं गजो दृष्ट्वा क्वचिद्भीतोऽप सर्पति । भीतो भीतं गजं दृष्ट्वा क्वचिदश्वो निवर्तते ॥२७॥ लङ्कायां दह्यमानायां शुशुभे स महार्णवः । छायासंसक्त लिलो लोहितोद इवार्णवः ॥ २८ ॥ सा बभूव मुहूर्तेन हरिभिर्दीपिता पुरी । लोकस्यास्य क्षये घोरे प्रदीप्तेव वसुन्धरा ॥ २९ ॥ नारीजनस्य धूमेन व्याप्तस्योच्चैर्विनेदुषः । स्वनो ज्वलनतप्तस्य शुश्रुवे दशयोजनम् ॥३०॥ प्रदग्ध कायानपरान् राक्षसान्निर्गतान् बहिः । सहसाऽभ्युत्पतन्ति स्म हरयोऽथ युयुत्सवः ॥ ३१ ॥ उदघुष्टं ानराणां च राक्षसानां च निस्वनः । दिशो दश समुद्रं च पृथिवीं चान्वनादयत् ॥३२॥ विशल्यौ तु महात्मानौ तावुभौ राम लक्ष्मणौ । असम्भ्रान्तौ जगृहतुस्तदोभे धनुषी वरे ॥ ३३ ॥ ततो विष्फारयानस्य रामस्य धनुरुत्तमम् । बभूव तुमुलः शब्दो राक्षसानां भयावहः ॥ ३४ ॥

उदादेश आर्षः ॥ २८ ॥ २९ ॥ नारीति । नारीजनस्यातिसाहसिकत्वाद्दशयोजनस्वनश्रवणम् ॥ ३० ॥ ३१ ॥ उद्घुष्टम् उद्घोषः । भावे क्तः ॥ ३२ ॥ विशल्यौ निर्गलितशरीरनिमग्नशरफलकौ । तदोभे धनुषी वरे इति पाठः ॥ ३३ ॥ तत इति । विष्फारयानस्य ध्वनयतः । " विस्फारो धनुषः स्वानः " इत्यमरः । " स्फुरतिस्फुलत्योर्निर्निविभ्यः " इति षत्वम् । मुगभाव अ

लोकान्ते प्रलये । भ्रान्ता घूर्णमानाः ग्राहा यस्य सः ॥ २६ ॥ २७ ॥ छाया वह्निज्वालाप्रतिबिम्बम् ॥ २८–३४ ॥

स०–लोहितोदः लोहितं रक्तवर्णम् उदं यस्य सः । उदकशब्दपर्यायोऽयमुदशब्दः । तेनासंज्ञात्वात्कथमुदादेश इति शङ्कानवकाशः ॥ २८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अशोभतेति । वेदमयं धनुः वेदोक्तलक्षणं धनुः । "कृत्तिवासाः पिनाकी" इति श्रुत्या प्रतिपादितमाहिमेति वाऽर्थः ॥ ३५ ॥ उद्घुष्टमिति । रामस्य ज्याशब्दः वानराणामुद्घुष्टं राक्षसानां निस्वनं च तावुभावतीत्य शुश्रुवे ॥ ३६ ॥ वानरेति । वानरोद्घुष्टघोषः वानरोत्पादितघोषः

अशोभत तदा रामो धनुर्विष्फारयन् महत् । भगवानिव संक्रुद्धो भवो वेदमयं धनुः ॥ ३५ ॥ उद्घुष्टं वानराणां च राक्षसानां च निस्वनम् । ज्याशब्दस्तावुभौ शब्दावति रामस्य शुश्रुवे ॥ ३६ ॥ वानरोद्घुष्टघोषश्च राक्षसानां च निस्वनः । ज्याशब्दश्चापि रामस्य त्रयं व्याप दिशो दश ॥ ३७ ॥ तस्य कार्मुकमुक्तैश्च शरैस्तत्पुरगोपुरम् । कैलासशृङ्गप्रतिमं विकीर्णमपतद्भुवि ॥ ३८ ॥ ततो रामशरान् दृष्ट्वा विमानेषु गृहेषु च । सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥ ३९ ॥ तेषां सन्नह्यमानानां सिंहनादं च कुर्वताम् । शर्वरी राक्षसेन्द्राणां रौद्रीव समपद्यत ॥ ४० ॥ आदिष्टा वानरेन्द्रास्तु सुग्रीवेण महात्मना । आसन्नद्वारमासाद्य युध्यध्वं प्लवगर्षभाः ॥ ४१ ॥ यश्च वो वितथं कुर्यात्तत्र तत्र ह्युपस्थितः । स हन्तव्यो हि सम्प्लुत्य राजशासनदूषकः ॥ ४२ ॥ तेषु वानरमुख्येषु दीप्तोल्कोज्ज्वलपाणिषु । स्थितेषु द्वारमासाद्य रावणं मन्युराविशत् ॥ ४३ ॥

॥ ३७ ॥ ३८ ॥ तुमुलः अधिकः ॥ ३९ ॥ तेषामिति । सन्नह्यमानानां कक्ष्याबन्धनादि युद्धसन्नाहं कुर्वताम् । रौद्री प्रलयरात्रिः ॥ ४० ॥ आदिष्टा इत्यादिश्लोकद्वयमेकान्वयम् । अन्ते इतिकरणं बोध्यम् । व इति निर्धारणे षष्ठी । वितथं कुर्यात्, मच्छासनमिति शेषः । आसन्नद्वारं रावणान्तः

संहारकाले संक्रुद्धो भवः । वेदमयं शब्दब्रह्मात्मकम् ॥ ३५--३८ ॥ सन्नाहः उद्योगः ॥ ३९ ॥ रौद्रीव कालरात्रिरिव ॥ ४० ॥ आदिष्टा इत्यादि श्लोकद्वयमेकं वाक्यम् । वः युष्माकं मध्ये यः तत्र तत्र व्यवस्थितस्सन् वितथं कुर्यात, मच्छासनमिति शेषः । राजशासनदूषकः सः हन्तव्यः, अतो युद्ध्यध्वमिति सुग्रीवेण ॥१२९॥

स०–वेदमयं वेदात्मकं तदभिमान्यभिमानिकम् । भारते कर्णपर्वान्तर्गतशल्यदुर्योधनसंवादे "संवत्सरो धनुस्तद्वै" "तस्य संवत्सरो धनुः" इत्युक्तिस्त्वेकस्यानेकेऽभिमानिनो भवन्तीति न विरुणद्धि ॥३५॥ वानरोद्घुष्टशब्दो वानरकृतशब्दजशब्दः । राक्षसानां च निस्वनः रामस्य ज्याशब्दश्चेत्येतत्त्रितयं दश दिशो व्याप व्यापत् । एतच्छब्दद्वयाधरीकरणं च द्वयोस्तस्य च समव्यापनाभावेऽसम्भावितम् । सति तस्मिन्नौत्कट्यानौत्कट्ये विदिते भवत इति अतिक्रमणव्यापने सम्भवत इति न पूर्वोत्तरविरोधः ॥ ३६ ॥ ३७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुरासन्नमध्यकक्ष्याद्वारम् । तत्र तत्र युद्धभूमौ उपस्थितः ॥ ४१–४२ ॥ तस्येति । जृम्भितविक्षेपात् गात्रविनामविस्तारात् । व्यामिश्राः व्याकुलाः, अभवन्निति शेषः । दिशः दिक्स्थिताः । रुद्रस्य कालाग्निरुद्रस्य गात्रे यो रूपवान् मन्युः स इव रावणोऽलक्ष्यत ॥ ४४–४६ ॥ शशासेति । अत्रैव

तस्य जृम्भितविक्षेपाद्व्यामिश्रा वै दिशो दश। रूपवानिव रुद्रस्य मन्युर्गात्रेष्वदृश्यत ॥ ४४ ॥ स निकुम्भं च कुम्भं च कुम्भकर्णात्मजावुभौ। प्रेषयामास संक्रुद्धो राक्षसैर्बहुभिः सह ॥४५॥ यूपाक्षः शोणिताक्षश्च प्रजङ्घः कम्पनस्तथा। निर्ययुः कौम्भकर्णिभ्यां सह रावणशासनात् ॥ ४६ ॥ शशास चैव तान् सर्वान् राक्षसान् सुमहाबलान्। नादयन् गच्छतात्रैव जयध्वं शीघ्रमेव च ॥ ४७ ॥ ततस्तु चोदितास्तेन राक्षसा ज्वलितायुधाः। लङ्काया निर्ययुर्वीराः प्रणदन्तः पुनः पुनः ॥ ४८ ॥ रक्षसां भूषणस्थाभिर्भाभिः स्वाभिश्च सर्वशः। चक्रुस्ते सप्रभं व्योम हरयश्चाग्निभिः सह ॥ ४९ ॥ तत्र ताराधिपस्याभा ताराणां च तथैव च। तयोराभरणस्था च बलयोर्द्यामभासयन् ॥ ५० ॥ चन्द्राभा भूषणाभा च गृहाणां ज्वलतां च भा। हरिराक्षससैन्यानि भ्राजयामास सर्वतः ॥ ५१ ॥

अस्मिन् गृह एवारभ्य। सिंहनादं नादयन् नादयन्तः कुर्वन्तः गच्छत। नादयन्नित्यत्र "व्यत्ययो बहुलम्" इति बहुवचनविषये एकवचनम् ॥ ४७ ॥ ज्वलितेति। आयुधानां ज्वलितत्वं युद्धयात्रासु शिक्षाविशेषप्रदर्शनात्। लङ्काया इति पञ्चमी ॥ ४८ ॥ स्वाभिः स्वासाधारणीभिः। रक्षसां भूषणस्थाभिः भाभिश्च। व्योम सेनामध्याकाशम् ॥ ४९ ॥ तदानीं चन्द्रोदयात् पुनः प्रकाशातिशयमाह–तत्रेति। तत्र तदानीम्। ताराधिपस्याभा ताराणां चाभा तयोर्बलयोराभरणस्था भा च द्याम् आकाशम् अभासयन् ॥ ५० ॥ दह्यमानलङ्कागृहप्रकाशैः पुनरपि स प्रकाशोऽवर्धतेत्याह–चन्द्रेति ॥५१॥

आदिष्टा इति सम्बन्धः ॥ ४१–४३ ॥ तस्येति। जृम्भितविक्षोभाद्धेतोः दश दिशो व्यामिश्राः व्याकुलाः। रुद्रस्य मन्युः रूपवानिव गात्रेष्वदृश्यतेति च सम्बन्धः ॥ ४४–४६ ॥ हे राक्षसाः! अत्रास्मिन् स्थल एवागच्छतेति सिंहनादं नादयन् नादयतः राक्षसान् शशासेति सम्बन्धः। नादयन्निति विभक्तिव्यत्ययेन बहुवचने एकवचनप्रयोगः ॥ ४७ ॥ ४८ ॥ सप्रभं सविस्तरम् ॥ ४९ ॥ तयोर्बलयोः द्याम् अत्र प्रभा कर्त्री बलयोर्द्याम् उभयसेनामध्यगताकाशप्रदेशम् अभासयदिति सम्बन्धः ॥ ५० ॥ (ति०–उत्तश्लोकस्यैव व्याख्यानं–चन्द्राभेति। ग्रहाणां नक्षत्राणाम् ॥ ५१ ॥)

स०–ग्रहाणां नवानाम्। "उक्तश्लोकस्यैव व्याख्यानं चन्द्राभेत्यादि" इति नागोजिभट्टव्याख्यानं पूर्वश्लोके ताराधिपतारातद्द्वयमात्रकर्तृकाकाशकर्मकभासनोक्तेः, अत्र च चन्द्रभूषणग्रहमात्रकर्तृकहरिराक्षससैन्यकर्मकभासनोक्तेरसङ्गतम् ॥ ५१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत्र चेति । संसक्तपातालः पातालपर्यन्तं संसक्तः ॥ ५२ ॥ पताकेत्यादिसार्धचतुःश्लोक्येकान्वया । चलत्पटा पताका । मत्स्यादिचिह्नितं ध्वजम् । उत्तमासिपरश्वधम् परश्वधोऽसिरूपः कुठाररूपश्चास्ति, तत्रासिरूपपरश्वधोऽसिपरश्वधः । तेन वक्ष्यमाणयोः खड्गपरश्वधयोर्न पौनरुक्त्यम् । ज्वलितप्रासमित्यत्र प्रासशब्दः क्षेप्तव्ये ह्रस्वकुन्ते वर्तते, तेन तस्यापि न पौनरुक्त्यम् । पत्तयः पदातयः । तेषां नानात्वं वेषायुधादिभेदात् । प्रासस्य ज्वलितत्वं

तत्र चोर्ध्वं प्रदीप्तानां गृहाणां सागरः पुनः । भाभिः संसक्तपातालश्चलोर्मिः शुशुभेऽधिकम् ॥ ५२ ॥ पताकाध्वजसंसक्तमुत्तमासिपरश्वधम् । भीमाश्वरथमातङ्गं नानापत्तिसमाकुलम् ॥५३॥ दीप्तशूलगदाखड्गप्रासतोमरकार्मुकम् । तद्राक्षसबलं घोरं भीमविक्रमपौरुषम् ॥ ५४ ॥ ददृशे ज्वलितप्रासं किङ्किणीशतनादितम् । हेमजालाचितभुजं व्यामिश्रितपरश्वधम् ॥ ५५ ॥ व्याघूर्णितमहाशस्त्रं बाणसंसक्तकार्मुकम् । गन्धमाल्यमधूत्सेकसंमोदितमहानिलम् ॥ ५६ ॥ घोरं शूरजनाकीर्णं महाम्बुधरनिस्वनम् ॥ ५७ ॥ तद्दृष्ट्वा बलमायान्तं राक्षसानां सुदारुणम् । सञ्चचाल प्लवङ्गानां बलमुच्चैर्ननाद च ॥ ५८ ॥ जवेनाप्लुत्य च पुनस्तद्बलं रक्षसां महत् । अभ्ययात् प्रत्यरिबलं पतङ्गा इव पावकम् ॥ ५९ ॥

युद्धागमनसमये शिक्षाविशेषप्रदर्शकक्रियासंबन्धात् । किङ्किणीशतनादितं रथगजादिकिङ्किणीशतनादितम् । हेमजालाचितभुजं हेमाभरणजालबद्धभुजम् । व्यावेष्टितपरश्वधं मदेन चालितपरश्वधम् । शस्त्रम् उक्तव्यतिरिक्तायुधम् । बाणसंसक्तकार्मुकमिति । दीप्तशूलगदाखड्गप्रासतोमरकार्मुकमित्यत्र यत् पूर्वोक्तं कार्मुकं तद्भङ्गे पुनरादातुं पृष्ठे बद्धमपरमिदं कार्मुकमिति ज्ञेयम् । गन्धेति । गन्धः चन्दनादिः गन्धमाल्याभ्यां मधूत्सेकेन वीरपाणरूपमधुसेवनेन च संमोदितमहानिलं वासितमहावातम् ॥ ५३–५७ ॥ आयान्तमिति पुँल्लिङ्गमार्षम् । सञ्चचाल अभिमुखं जगाम ॥ ५८ ॥ ५९ ॥

संसक्तः पातालो येन सः सागरः भाभिः अधिकं शुशुभे इति सम्बन्धः ॥ ५२ ॥ पताकेत्यादि सार्धपञ्चकमेकान्वयम् । उत्तमासिपरश्वधम्-परश्वधो द्विविधः असिरूपः कुठाररूपश्च, तत्रासिरूपः परश्वधोऽसिपरश्वधः । अनेनोत्तरत्र खड्गपरश्वधाभ्यां न पौनरुक्त्यम् । व्यामिश्रिताः उत्तेजिताः परश्वधाः यस्य तत् ॥५३–६४॥

For Private And Personal Use Only

भुजपरामर्शव्यामृष्टपरिघाशनि सन्ततभुजस्पर्शेन उत्तेजितपरिघवज्रम् ॥ ६०–६३ ॥ कपीनाम् अभिलक्षिताः प्रसिद्धाः । कपिप्रवरा इत्यर्थः ॥ ६४ ॥ तथैवेति । कपीनां मध्ये हरिवीरान् वीरहरीन् निजघ्नुः ॥६५॥६६॥ देहीति । अन्यो वीरः प्रहरणमत्र देहीति बभाषे । अन्यो ददातीति बभाषे । अपरः

तेषां भुजपरामर्शव्यामृष्टपरिघाशनि । राक्षसानां बलं श्रेष्ठं भूयस्तरमशोभत ॥६०॥ तत्रोन्मत्ता इवोत्पेतुर्हरयोऽथ युयुत्सवः । तरुशैलैरभिघ्नन्तो मुष्टिभिश्च निशाचरान् ॥ ६१ ॥ तथैवापततां तेषां कपीनामसिभिः शितैः । शिरांसि सहसा जह्रू राक्षसा भीमदर्शनाः ॥ ६२ ॥ दशनैर्हृतकर्णाश्च मुष्टिनिष्कीर्णमस्तकाः । शिलाप्रहारभग्नाङ्गा विचेरुस्तत्र राक्षसाः ॥६३॥ तथैवाप्यपरे तेषां कपीनामभिलक्षिताः । प्रवीरानभितो जघ्नू राक्षसानां तरस्विनाम् ॥६४॥ तथैवाप्यपरे तेषां कपीनामसिभिः शितैः । हरिवीरान्निजघ्नुश्च घोररूपा निशाचराः ॥६५॥ घ्नन्तमन्यं जघानान्यः पातयन्तमपातयत् । गर्हमाणं जगर्हेऽन्यो दशन्तमपरोऽदशत् ॥६६॥ देहीत्यन्यो ददात्यन्यो ददामीत्यपरः पुनः । किं क्लेशयसि तिष्ठेति तत्रान्योन्यं बभाषिरे ॥६७॥ विप्रलम्बितवस्त्रं च विमुक्तकवचायुधम् । समुद्यतमहाप्रासं यष्टिशूलासिसङ्कुलम् । प्रावर्तत महारौद्रं युद्धं वानररक्षसाम् ॥ ६८ ॥ वानरान् दश सप्तेति राक्षसा जघ्नुराहवे । राक्षसान् दश सप्तेति वानराश्चाभ्यपातयन् ॥६९॥ विस्रस्तकेशवसनं विध्वस्तकवचध्वजम् । बलं राक्षसमालम्ब्य वानराः पर्यवारयन् ॥ ७० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदि० श्रीमद्युद्धकाण्डे पञ्चसप्ततितमः सर्गः ॥७५॥

पुनः ददामीति बभाषे । आत्मानम् आयासेन किं क्लेशयसि ? तिष्ठेत्यन्यो बभाषे । तत्रैवमन्योन्यं बभाषिरे ॥ ६७ ॥ विप्रलम्बितवस्त्रमित्यादि सर्वं क्रियाविशेषणम् ॥ ६८ ॥ वानरान् दश सप्तेति । राक्षसाः दश सप्तेत्यनेन प्रकारेण वानरान् जघ्नुः । वानराश्च दश सप्तेत्यनेन प्रकारेण राक्षसानभ्यपातयन्निति सम्बन्धः ॥ ६९ ॥ विस्रस्तेति । आलम्ब्य वेगेन धावमानं प्रतिष्टभ्य ततः परितोऽवारयन् ॥ ७० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

तथैवेति । अपरे निशाचराः तेषां कपीनां मध्ये हरिवीरान् वीरहरीन् निजघ्नुरिति सम्बन्धः ॥ ६५ ॥ ६६ ॥ देहीत्यादौ युद्धमित्यध्याहार्यम् ॥६७॥ ६८ ॥ वानरानित्यनेन प्रकारेण वानरा राक्षसाश्चान्योन्यं जघ्नुरिति सम्बन्धः ॥६९॥७०॥ इति श्रीमहेश्वर० श्रीरामायण० युद्धकाण्डव्याख्यायां पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

अथ कुम्भवधः षट्सप्ततितमे–प्रवृत्त इत्यादि । सङ्कुले निरन्तरे ॥ १ ॥ आहूयेति । आहूय स्पर्धयित्वा । "ह्वेञ् स्पर्धायां शब्दे च" इति धातो र्ल्यप् । वेगितः सञ्जातवेगः । तारकादित्वादितच् । सः अङ्गदः ॥ २ ॥ स इति । चिक्षेप, कम्पनोरसीति शेषः ॥ ३ ॥ ततस्त्विति । कम्पनं हत

प्रवृत्ते सङ्कुले तस्मिन् घोरे वीरजनक्षये । अङ्गदः कम्पनं वीरमाससाद रणोत्सुकः ॥१॥ आहूय सोऽङ्गदं कोपात् ताडयामास वेगितः । गदया कम्पनः पूर्वं स चचाल भृशाहतः ॥ २ ॥ स संज्ञां प्राप्य तेजस्वी चिक्षेप शिखरं गिरेः । अर्दितश्च प्रहारेण कम्पनः पतितो भुवि ॥३॥ ततस्तु कम्पनं दृष्ट्वा शोणिताक्षो हतं रणे । रथेनाभ्यपतत् क्षिप्रं तत्राङ्गदमभीतवत् ॥ ४ ॥ सोऽङ्गदं निशितैर्बाणैस्तदा विव्याध वेगितः । शरीरदारणैस्तीक्ष्णैः कालाग्निसमविग्रहैः ॥ ५ ॥ क्षुरक्षुरप्रैर्नाराचैर्वत्सदन्तैः शिलीमुखैः । कर्णिशल्यविपाठैश्च बहुभिर्निशितैः शरैः ॥ ६ ॥ अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रः प्रतापवान् । धनुरुग्रं रथं बाणान् ममर्द तरसा बली ॥७॥ शोणिताक्षस्ततः क्षिप्रमसिचर्म समाददे । उत्पपात दिवं क्रुद्धो वेगवानविचारयन् ॥८॥ तं क्षिप्रतरमाप्लुत्य परामृश्याङ्गदो बली । करेण तस्य तं खड्गं समाच्छिद्य ननाद च ॥९॥ तस्यांसफलके खड्गं निजघान ततोऽङ्गदः । यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः॥ १०॥

मित्यन्वयः । तत्र कम्पनयुद्धस्थाने । अभीतवत् अभीतमिति क्रियाविशेषणम् ॥४॥ स इत्यादि । कालाग्निसमविग्रहैः कालाग्नितुल्याकारैरित्यर्थः॥५॥ क्षुरः नापितशस्त्राकारमुखः । क्षुरप्रः अर्धचन्द्राकृतिः । नाराचः शल्यकः । वत्सदन्तैः वत्सदन्ताकारमुखैः । शिलीमुखैः कङ्कपत्राकारमुखैः । उभयपार्श्वकृत कर्णः कर्णी । अर्धनाराचः शल्यः । विपाठः करवीरपत्राग्रसदृशः ॥ ६ ॥ ७ ॥ शोणिताक्ष इति । असिश्चर्म चेत्यसिचर्म । एकवद्भावः । उत्पपात, रथादिति शेषः ॥ ८ ॥ तमिति । परामृश्य प्रगृह्य ॥ ९ ॥ तस्येति । चिच्छेद, छिन्नस्तु न मृतः ॥ १० ॥

॥ १–२ ॥ क्षुरक्षुरप्रैरिति । क्षुरः नापितशस्त्राकारमुखः, क्षुरप्रस्तु अर्धचन्द्राकृतिः, नाराचस्तु आयसशरः वत्सदन्ताकारः, शिलीमुखस्तु कङ्कपत्रसदृशः, कर्णिशरस्तु उभयपार्श्वकृतकर्णालङ्कारावयवः, शल्यस्तु अर्धनाराचाकृतिः, शल्यभूयस्त्वादीर्घफलको बाणः शल्य इत्युच्यते । विपाठस्तु करवीरपत्राग्रसदृशमुखः॥६–८॥ ॥२४१॥

अपरान् प्रजङ्घादीन् ॥ ११ ॥ तमेव अङ्गदमेव ॥ १२ ॥ १३ ॥ तयोरिति । यूपाक्षस्य दूरस्थत्वादनुक्तिः ॥ १४ ॥ अङ्गदमिति । परिरक्षन्तौ, मातुलत्वादिति भावः । परस्परादिदृक्षया स्वानुरूपप्रतिभटराक्षसजिज्ञासयेत्यर्थः ॥ १५ ॥ अभिपेतुरिति । प्रतियत्ताः प्रतियत्नवन्तः । गुणाधानं

तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः । वालिपुत्रोऽभिदुद्राव रणशीर्षे परानरीन् ॥ ११ ॥ आयसीं तु गदां वीरः प्रगृह्य कनकाङ्गदः । शोणिताक्षः समाविध्य तमेवानु पपात ह ॥ १२ ॥ प्रजङ्घसहितो वीरो यूपाक्षस्तु ततो बली । रथेनाभिययौ क्रुद्धो वालिपुत्रं महाबलम् ॥ १३ ॥ तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजङ्घयोः । विशाखयोर्मध्यगतः पूर्णचन्द्र इवाभवत् ॥ १४ ॥ अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च । तस्य तस्थतुरभ्याशे परस्परदिदृक्षया ॥ १५ ॥ अभिपेतुर्महाकायाः प्रतियत्ता महाबलाः । राक्षसा वानरान् रोषादसिचर्मगदाधराः ॥ १६ ॥ त्रयाणां वानरेन्द्राणां त्रिभी राक्षसपुङ्गवैः । संसक्तानां महद्युद्धमभवद्रोमहर्षणम् ॥ १७ ॥ ते तु वृक्षान् समादाय सम्प्रचिक्षिपुराहवे । खड्गेन प्रतिचिच्छेद तान् प्रजङ्घो महाबलः ॥ १८ ॥ रथानश्वान् द्रुमैः शैलैस्ते प्रचिक्षिपुराहवे । शरौघैः प्रतिचिच्छेद तान् यूपाक्षो निशाचरः ॥ १९ ॥ सृष्टान् द्विविदमैन्दाभ्यां द्रुमानुत्पाट्य वीर्यवान् । बभञ्ज गदया मध्ये शोणिताक्षः प्रतापवान् ॥ २० ॥ उद्यम्य विपुलं खड्गं परमर्मनिकृन्तनम् । प्रजङ्घो वालिपुत्राय अभिदुद्राव वेगितः ॥ २१ ॥ तमभ्याशगतं दृष्ट्वा वानरेन्द्रो महाबलः । आजघानाश्वकर्णेन द्रुमेणातिबलस्तदा ॥ २२ ॥ बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना । वालिपुत्रस्य घातेन स पपात क्षिताविसिः ॥ २३ ॥

प्रतियत्नः । आरोपितवीर्या इत्यर्थः ॥ १६–१८ ॥ रथानश्वान्, प्रतीति शेषः ॥ १९ ॥ सृष्टानिति । उत्पाट्य सृष्टानित्यन्वयः ॥ २० ॥ वालिपुत्राय वालिपुत्रं हन्तुम् । " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " इति चतुर्थी ॥ २१ ॥ वानरेन्द्रः अङ्गदः ॥ २२ ॥ सनिस्त्रिंशं सखड्गम् ॥ २३ ॥

अङ्गदमिति । परस्परादिदृक्षया युद्धार्थं स्वानुरूपप्रतिभटराक्षसजिज्ञासयेत्यर्थः ॥ १५–२० ॥ उद्यम्येति । वालिपुत्राय वालिपुत्रं हन्तुम् ॥ २१–३१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

उत्पलसन्निभम्, नीलोत्पलसमानकान्तिमित्यर्थः । महाबलः प्रजङ्घः ॥ २४-२१ ॥ प्लवङ्गाभ्यां मैन्दद्विविदाभ्याम् । आकर्षोत्पाटनम् आकर्षण

तं दृष्ट्वा पतितं भूमौ खड्गमुत्पलसन्निभम् । मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ २४ ॥ ललाटे स महावीर्य
मङ्गदं वानरर्षभम् । आजघान महातेजाः स मुहूर्तं चचाल ह ॥२५॥ स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान् ।
प्रजङ्घस्य शिरः कायात् खड्गेनापातयत् क्षितौ ॥ २६ ॥ स यूपाक्षोऽश्रुपूर्णाक्षः पितृव्ये निहते रणे । अवरुह्य
रथात् क्षिप्रं क्षीणेषुः खड्गमाददे ॥ २७ ॥ तमापतन्तं सम्प्रेक्ष्य यूपाक्षं द्विविदस्त्वरन् । आजघानोरसि क्रुद्धो
जग्राह च बलाद्बली ॥ २८ ॥ गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षो महाबलः । आजघान गदाग्रेण वक्षसि द्विविदं ततः
॥ २९ ॥ स गदाभिहतस्तेन चचाल च महाबलः । उद्यतां च पुनस्तस्य जहार द्विविदो गदाम् ॥ ३० ॥ एत
स्मिन्नन्तरे वीरो मैन्दो वानरयूथपः । यूपाक्षं ताडयामास तलेनोरसि वीर्यवान् ॥ ३१ ॥ तौ शोणिताक्षयूपाक्षौ
प्लवङ्गाभ्यां तरस्विनौ । चक्रतुः समरे तीव्रमाकर्षोत्पाटनं भृशम् ॥ ३२ ॥ द्विविदः शोणिताक्षं तु विददार नखै
र्मुखे । निष्पिपेष च वेगेन क्षितावाविध्य वीर्यवान् ॥ ३३ ॥ यूपाक्षमपि संक्रुद्धो मैन्दो वानरयूथपः । पीडयामास
बाहुभ्यां स पपात हतः क्षितौ ॥ ३४ ॥ हतप्रवीरा व्यथिता राक्षसेन्द्रचमूस्तदा । जगामाभिमुखी सा तु कुम्भकर्ण
सुतो यतः ॥ ३५ ॥ आपतन्तीं च वेगेन कुम्भस्तां सान्त्वयच्चमूम् ॥ ३६ ॥ अथोत्कृष्टं महावीर्यैर्लब्धलक्षैः
प्लवङ्गमैः । निपातितमहावीरां दृष्ट्वा रक्षश्चमूं ततः । कुम्भः प्रचक्रे तेजस्वी रणे कर्म सुदुष्करम् ॥ ३७ ॥

ताडने, अन्योन्यमिति शेषः ॥ ३२-३५ ॥ आपतन्तीमित्यर्धम् । सान्त्वयत् असान्त्वयत् ॥ ३६ ॥ अथेत्यादिसार्धश्लोक एकान्वयः । लब्धलक्षैः
ताविति । प्लवङ्गाभ्यां मैन्दद्विविदाभ्याम ॥ ३२-३५ ॥ आपतन्तीमित्यर्धं भिन्नं वाक्यम् । कुम्भः आपतन्तीं चमूं सान्त्वयत् । अडभाव आर्षः ॥ ३६ ॥
अथेत्यादिसार्धश्लोकमेकं वाक्यम् । उत्कृष्टं रक्षः कुम्भः । महावीर्यैः तेजस्विभिः । लब्धलक्षैः अप्रतिद्वन्द्वैः प्लवङ्गमैः । निपातितमहावीरां चमूं दृष्ट्वा रणे

For Private And Personal Use Only

अप्रतिद्वन्द्विभिः ॥ २७ ॥ ३८ ॥ तस्येति । विद्युदैरावताभ्याम् अर्चिष्मत् । ज्यास्थानीया विद्युत् । बाणस्थानीयमैरावतम् । ऐरावतं नाम दीर्घेन्द्र धनुः । " इन्द्रायुधं शक्रधनुस्तद्दीर्घमृजुरोहितम् । ऐरावतं च " इति वैजयन्ती । एवंभूतं द्वितीयमिन्द्रधनुरिव स्थितम् । ऐरावतादिसंयोग उत्पात

स धनुर्धन्विनां श्रेष्ठः प्रगृह्य सुसमाहितः । मुमोचाशीविषप्रख्यान् शरान् देहविदारणान् ॥ ३८ ॥ तस्य तच्छुशुभे भूयः सशरं धनुरुत्तमम् । विद्युदैरावतार्चिष्मद्द्वितीयेन्द्रधनुर्यथा ॥ ३९ ॥ आकर्णाकृष्टमुक्तेन जघान द्विविदं तदा । तेन हाटकपुङ्खेन पत्रिणा पत्रवाससा ॥ ४० ॥ सहसाऽभिहतस्तेन विप्रमुक्तपदः स्फुरन् । निपपाताद्रिकूटाभो विह्वलः प्लवगोत्तमः ॥ ४१ ॥ मैन्दस्तु भ्रातरं दृष्ट्वा भग्नं तत्र महाहवे । अभिदुद्राव वेगेन प्रगृह्य महतीं शिलाम् ॥ ४२ ॥ तां शिलां तु प्रचिक्षेप राक्षसाय महाबलः । बिभेद तां शिलां कुम्भः प्रसन्नैः पञ्चभिः शरैः ॥ ४३ ॥ सन्धाय चान्यं सुमुखं शरमाशीविषोपमम् । आजघान महातेजा वक्षसि द्विविदाग्रजम् ॥ ४४ ॥ स तु तेन प्रहारेण मैन्दो वानरयूथपः । मर्मण्यभिहतस्तेन पपात भुवि मूर्च्छितः ॥ ४५ ॥ अङ्गदो मातुलौ दृष्ट्वा पतितौ तु महाबलौ । अभिदुद्राव वेगेन कुम्भमुद्यतकार्मुकम् ॥ ४६ ॥ तमापतन्तं विव्याध कुम्भः पञ्चभिरायसैः । त्रिभिश्चान्यैः शितैर्बाणैर्मातङ्गमिव तोमरैः ॥ ४७ ॥

काले भवति । अभूतोपमा वा ॥ ३९ ॥ आकर्णेति । हाटकं स्वर्णम् । पत्रिणा बाणेन । पत्रवाससा वासःस्थानीयकङ्कपत्रेण ॥ ४० ॥ विप्रमुक्तपदः शिथिलपदविन्यासः । स्फुरन् चलन् । विह्वलः विवशः सन् ॥ ४१–४६ ॥ तमिति । तोमरैः अङ्कुशैः ॥ ४७ ॥

सुदुष्करं कर्म प्रचक्र इति सम्बन्धः ॥ ३७ ॥ ३८ ॥ तस्येति । तस्य कुम्भस्य सशरं धनुः विद्युदैरावतार्चिष्मत्सत् अत एव तदुक्तेन्द्रधनुरिव शुशुभ इति सम्बन्धः । ऐरावतं नाम ऋजुदीर्घमिन्द्रधनुः । " इन्द्रायुधं शक्रधनुस्तद्दीर्घमृजुरोहितम् । ऐरावतं च विद्युत्तु चञ्चला चपला चला ॥" इति वैजयन्ती । ज्यास्थानीया विद्युत्, बाणस्थानीयमैरावतम् । अयं भावः–विद्युत्सहितैरावतसदृशद्युतिमत्कुम्भधनुः विद्युत्सहितैरावतसहितद्वितीयेन्द्रधनुरिव चकाश इति । विद्युत्सहिते

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकुण्ठधारैः अभग्नाग्रैः । निशितैः उत्कृष्टैः । तीक्ष्णैः अयोमयैः । " तीक्ष्णं गरे मृधे लोहे " इति रत्नमाला ॥ ४८ ॥ न कम्पते नाकम्पत ॥ ४९ ॥ तान् वृक्षान् प्रचिच्छेद शिलाः बिभेदेत्यन्वयः ॥ ५०–५२ ॥ सम्पीड्येति । एकहस्तस्य नेत्रपिधानव्यापृतत्वादेकहस्तेनोत्पाटनासम्भवादुरसि

सोऽङ्गदं विविधैर्बाणैः कुम्भो विव्याध वीर्यवान् । अकुण्ठधारैर्निशितैस्तीक्ष्णैः कनकभूषणैः ॥ ४८ ॥ अङ्गदः प्रतिविद्धाङ्गो वालिपुत्रो न कम्पते । शिलापादपवर्षाणि तस्य मूर्ध्नि ववर्ष ह ॥ ४९ ॥ स प्रचिच्छेद तान् सर्वान् बिभेद च पुनः शिलाः । कुम्भकर्णात्मजः श्रीमान् वालिपुत्रसमीरितान् ॥ ५० ॥ आपतन्तं च सम्प्रेक्ष्य कुम्भो वानरयूथपम् । भ्रुवोर्विव्याध बाणाभ्यामुल्काभ्यामिव कुञ्जरम् । तस्य सुस्राव रुधिरं पिहिते चास्य लोचने ॥५१ ॥ अङ्गदः पाणिना नेत्रे पिधाय रुधिरोक्षिते । सालमासन्नमेकेन परिजग्राह पाणिना ॥ ५२ ॥ सम्पीड्य चोरसि स्कन्धं करेणाभिनिवेश्य च । किञ्चिदभ्यवनम्यैनमुन्ममाथ यथा गजः ॥ ५३ ॥ तमिन्द्रकेतुप्रतिमं वृक्षं मन्दर सन्निभम् । समुत्सृजन्तं वेगेन पश्यतां सर्वरक्षसाम् ॥ ५४ ॥ स बिभेद शितैर्बाणैः सप्तभिः कायभेदनैः ॥ ५५ ॥ अङ्गदो विव्यथेऽभीक्ष्णं ससाद च मुमोह च ॥५६ ॥ अङ्गदं व्यथितं दृष्ट्वा सीदन्तमिव सागरे । दुरासदं हरिश्रेष्ठं रामायान्ये न्यवेदयन् ॥५७॥ रामस्तु व्यथितं श्रुत्वा वालिपुत्रं रणाजिरे । व्यादिदेश हरिश्रेष्ठान् जाम्बवत्प्रमुखां स्ततः ॥ ५८ ॥ ते तु वानरशार्दूलाः श्रुत्वा रामस्य शासनम् । अभिपेतुः सुसंक्रुद्धाः कुम्भमुद्यतकार्मुकम् ॥५९॥ ततो द्रुमशिलाहस्ताः कोपसंरक्तलोचनाः । रिरक्षिषन्तोऽभ्यपतन्नङ्गदं वानरर्षभाः ॥ ६० ॥ जाम्बवांश्च सुषेणश्च वेगदर्शी च वानरः । कुम्भकर्णात्मजं वीरं क्रुद्धाः समभिदुद्रुवुः ॥ ६१ ॥

सम्पीड्येत्युक्तम् । अभिनिवेश्य अभिगृह्येत्यर्थः ॥ ५३–५८ ॥ तत इति । रिरक्षिषन्तः रक्षितुमिच्छन्तः ॥ ५९–६१ ॥

रावतेन्द्रचापयोस्संयोगः उत्पातकाले सम्भवति, अभूतोपमा वा ॥ ३९–६१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जलाशयं जलप्रवाहम् । नगेनेव वृक्षेणेव । वृक्षौघपरोऽयं शब्दः॥६२॥ अतिवर्तितुम् अतिक्रम्याभिमुख्येन गन्तुम् ॥६३॥ तांस्त्वित्यादिश्लोकद्वयमेकान्वयम् । अङ्गदं पृष्ठतः कृत्वा, अन्यथा हन्यादिति भावः । शैलसानुचरं शैलसानुचरत्वेनातिबलम् । " गिरिचर इव नागः प्राणसारं बिभर्ति "इति कालि

समीक्ष्यापततस्तांस्तु वानरेन्द्रान् महाबलान् । आववार शरौघेण नगेनेव जलाशयम् ॥ ६२ ॥ तस्य बाणपथं प्राप्य न शेकुरतिवर्तितुम् । वानरेन्द्रा महात्मानो वेलामिव महोदधिः ॥ ६३ ॥ तांस्तु दृष्ट्वा हरिगणान् शरवृष्टिभिरर्दितान् । अङ्गदं पृष्ठतः कृत्वा भ्रातृजं प्लवगेश्वरः ॥ ६४ ॥ अभिदुद्राव वेगेन सुग्रीवः कुम्भमाहवे । शैलसानुचरं नागं वेगवानिव केसरी ॥ ६५ ॥ उत्पाटय च महाशैलानश्वकर्णान् धवान् बहून् । अन्यांश्च विविधान् वृक्षांश्चिक्षेप च महाबलः ॥ ६६ ॥ तां छादयन्तीमाकाशं वृक्षवृष्टिं दुरासदाम् । कुम्भकर्णात्मजः शीघ्रं चिच्छेद निशितैः शरैः ॥ ६७ ॥ अभिलक्षेण तीव्रेण कुम्भेन निशितैः शरैः । आचितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः ॥ ६८ ॥ द्रुमवर्षं तु तच्छिन्नं दृष्ट्वा कुम्भेन वीर्यवान् । वानराधिपतिः श्रीमान् महासत्त्वो न विव्यथे ॥ ६९ ॥ निर्भिद्यमानः सहसा सहमानश्च तान् शरान् । कुम्भस्य धनुराक्षिप्य बभञ्जेन्द्रधनुष्प्रभम् ॥ ७० ॥ अवप्लुत्य ततः शीघ्रं कृत्वा कर्म सुदुष्करम् । अब्रवीत् कुपितः कुम्भं भग्नशृङ्गमिव द्विपम् ॥ ७१ ॥ निकुम्भाग्रज वीर्यं ते बाणवेगवदद्भुतम् । सन्नतिश्च प्रभावश्च तव वा रावणस्य वा ॥ ७२ ॥

दासोक्तेः ॥ ६४–६७ ॥ अभिलक्षेणेति । अभिलक्षेण अभिगतलक्ष्येण । आचिताः सर्वतो नीरन्ध्रतया व्याप्ताः । शतघ्नयः शतघ्न्यः । शङ्कुचिता आयुधविशेषाः ॥ ६८–७१ ॥ वीर्यस्य बाणवेगवत्त्वं तद्धेतुत्वात् । सन्नतिः राक्षसेषु विनयः राक्षसप्राचण्यं वा । कम्पनप्रजङ्घयूपाक्षशोणिताक्षमारकाणामङ्गद

समीक्ष्येति । जलाशयं प्रवाहम् ॥ ६२–७१ ॥ निकुम्भाग्रजेति । सन्नतिः राक्षसेषु विनयः ॥ ७२ ॥

For Private And Personal Use Only

मैन्दद्विविदानां निराकरणाद्राक्षसप्राबल्योक्तिः । तव वा रावणस्य वा, रावणतुल्या तव सन्ततिरित्यर्थः ॥ ७२ ॥ पितरमनुजातोऽसि पित्रा सदृशोऽसीत्यर्थः । बलवृत्ततः बलव्यापारेण ॥ ७३ ॥ नातिवर्तन्ते न धर्षयन्तीत्यर्थः ॥ ७४ ॥ विक्रमस्वेत्यर्धम् । कर्माणि युद्धकर्माणि प्रति । विक्रमस्व पराक्रमं

प्रह्लादबलिवृत्रघ्नकुबेरवरुणोपम । एकस्त्वमनुजातोऽसि पितरं बलवृत्ततः ॥ ७३ ॥ त्वामेवैकं महाबाहुं चापहस्तमरिन्दमम् । त्रिदशा नातिवर्तन्ते जितेन्द्रियमिवाधयः ॥७४॥ विक्रमस्व महाबुद्धे कर्माणि मम पश्यतः ॥ ७५ ॥ वरदानात् पितृव्यस्ते सहते देवदानवान् । कुम्भकर्णस्तु वीर्येण सहते च सुरासुरान् ॥७६॥ धनुषीन्द्रजितस्तुल्यः प्रतापे रावणस्य च । त्वमद्य रक्षसां लोके श्रेष्ठोऽसि बलवीर्यतः ॥ ७७ ॥ महाविमर्दं समरे मया सह तवाद्भुतम् । अद्य भूतानि पश्यन्तु शक्रशम्बरयोरिव ॥ ७८ ॥ कृतमप्रतिमं कर्म दर्शितं चास्त्रकौशलम् । पातिता हरिवीराश्च त्वया वै भीमविक्रमाः ॥७९॥ उपालम्भभयाच्चापि नासि वीर मया हतः। कृतकर्मा परिश्रान्तो विश्रान्तः पश्य मे बलम् ॥ ८० ॥ तेन सुग्रीववाक्येन सावमानेन मानितः । अग्नेराज्याहुतस्येव तेजस्तस्याभ्यवर्धत । ततः कुम्भस्तु सुग्रीवं बाहुभ्यां जगृहे तदा ॥ ८१ ॥

कुरु, युद्धकर्मसिद्ध्यर्थं पराक्रमं कुर्वित्यर्थः ॥ ७५ ॥ पितृव्यः रावणः वरदानात् देवदानवान् सहते । कुम्भकर्णस्तु वीर्येण शारीरबलेन सुरासुरान् सहते, रोद्धुं शक्नोतीत्यर्थः । त्वं तु ताभ्यामुभाभ्यां तान् सहस इति भावः ॥ ७६ ॥ ७७ ॥ महाविमर्दं महाप्रहारम् ॥ ७८ ॥ ७९ ॥ उपालम्भभयात् बहुभिः सह युद्धेन श्रान्तो हत इत्यपवादभयात् ॥ ८० ॥ तेनेत्यादि । सावमानेन मानितः बहुमानेन व्याजेनावमानित इत्यर्थः । तस्य तथाऽवमानितस्य

पितरम् अनुजातोऽसि पित्रा सदृशोऽसीत्यर्थः॥७३-७५॥वरदानादिति । पितृव्यो रावणः वरदानात् देवदानवान् सहते, कुम्भकर्णस्तु वीर्येण शरीरबलेन सुरासुरान् सहते, त्वं तु उभाभ्यां तान् सहस इत्यर्थः । महाविमर्दं महायुद्धम् ॥ ७६-७९ ॥ उपालम्भभयात् बहुभिस्सह युद्धश्रान्तो हत इति परीवादभयात् ॥८०॥८१॥

स०-पित्रपेक्षया कीर्तिरधिकेति वक्तुं पितामहपौत्रयोः प्रह्लादबल्योर्ग्रहणम् । वैरिसंहारे वृत्रघ्नोपमा । धनिकत्वाप्रधृष्यत्वयोः कुबेरवरुणोपमतेति ज्ञेयम् ॥ ७३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कुम्भस्य ॥ ८१ ॥ गजावित्यादिसार्धश्लोक एकान्वयः । आहितमदौ आहितमदचेष्टौ । अन्योन्यगात्रग्रथितौ अन्योन्यसंश्लिष्टगात्रौ । परिश्रमात् युद्धजनितश्रमात् मुखतः सधूमां ज्वालां विसृजन्तौ, बभूवतुरिति शेषः ॥ ८२ ॥ ८३ ॥ दर्शयन्नुदधेस्तलम्, निकुम्भो यथा उदधितलं पश्येत्तथा

गजाविवाहितमदौ निश्वसन्तौ मुहुर्मुहुः । अन्योन्यगात्रग्रथितौ कर्षन्तावितरेतरम् । सधूमां मुखतो ज्वालां विसृजन्तौ परिश्रमात् ॥ ८२ ॥ तयोः पादाभिघाताच्च निमग्ना चाभवन्मही । व्याघूर्णिततरङ्गश्च चुक्षुभे वरुणालयः ॥ ८३ ॥ ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि । पातयामास वेगेन दर्शयन्नुदधेस्तलम् ॥८४ ॥ ततः कुम्भ निपातेन जलराशिः समुत्थितः । विन्ध्यमन्दरसङ्काशो विससर्प समन्ततः ॥ ८५ ॥ ततः कुम्भः समुत्पत्य सुग्रीव मभिपत्य च । आजघानोरसि क्रुद्धो वज्रवेगेन मुष्टिना ॥ ८६ ॥ तस्य चर्म च पुस्फोट बहु सुस्राव शोणितम् । स च मुष्टिर्महावेगः प्रतिजघ्नेऽस्थिमण्डले ॥८७॥ तदा वेगेन तत्रासीत्तेजः प्रज्वलितं मुहुः । वज्रनिष्पेषसञ्जाता ज्वाला मेरौ यथा गिरौ ॥ ८८ ॥ स तत्राभिहतस्तेन सुग्रीवो वानरर्षभः । मुष्टिं संवर्तयामास वज्रकल्पं महाबलः ॥ ८९ ॥ अर्चिस्सहस्रविकचं रविमण्डलसप्रभम् । स मुष्टिं पातयामास कुम्भस्योरसि वीर्यवान् ॥ ९० ॥

वेगेन पातयामासेत्यर्थः ॥ ८४ ॥ रामानु०—तत इति । शतयोजनविस्तीर्णत्रिकूटशिखरमध्ये युद्ध्यन् सुग्रीवः कुम्भं लङ्काद्वीपतले लवणाम्भसि पातयामासेत्यभिधानात् सुग्रीवस्य अपरिमेयबलवत्ता द्योत्यते ॥ ८४ ॥ तत इति । विससर्प अभ्यवर्धत ॥ ८५ ॥ ८६ ॥ पुस्फोट विभिन्नम् । स चेति । सः मुष्टिः सुग्रीवस्यास्थिमण्डले । प्रतिजघ्ने प्रतिहतः, मोघो बभूवेत्यर्थः । स च मुष्टिर्महावेग इति पाठः ॥ ८७ ॥ वेगेन कुम्भवेगेन । तत्र सुग्रीववक्षसि । तेजः सङ्घट्टजं प्रज्वलितमासीत् । वज्रनिष्पेषसञ्जाता इन्द्रेण पक्षच्छेदकाले वज्रसङ्घट्टजन्येत्यर्थः ॥ ८८ ॥ संवर्तयामास चकारेत्यर्थः ॥ ८९ ॥ अर्चिःसहस्रविकचम् अर्चिः

अन्योन्यगात्रग्रथितौ, बभूवतुरिति शेषः ॥ ८२–८६ ॥ तस्येति । पुस्फोट भिन्नम् स चेति । सः सुग्रीवो मुष्टिमुद्यम्य अस्थिमण्डले प्रतिजघ्ने पुनर्हत इत्यर्थः ।

स०—समुत्थितः ऊर्ध्वमुत्थितः । विन्ध्यमन्दरसङ्काशः तत्सदृशतरङ्गवान् । समन्ततो विससर्प । विन्ध्यमन्दरसङ्काशः कुम्भः ततो जलात्समुत्पत्येत्यन्वय इति नागोजिभट्टव्याख्या त्वप्रतिपत्त्या ॥ ८९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सहस्रावृतमित्यर्थः । अत एव रविमण्डलसप्रभम् ॥ ९०-९२ ॥ गवां पतेः सूर्यस्य ॥ ९३ ॥ तस्मिन्निति । स्पष्टः ॥ ९४ ॥ इति श्रीगोविन्दराज विरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षट्सप्ततितमः सर्गः ॥ ७६ ॥

स तु तेन प्रहारेण विह्वलो भृशताडितः । निपपात तदा कुम्भो गतार्चिरिव पावकः ॥ ९१ ॥ मुष्टिनाऽभिहतस्तेन निपपाताशु राक्षसः । लोहिताङ्ग इवाकाशाद्दीप्तरश्मिर्यदृच्छया ॥९२॥ कुम्भस्य पततो रूपं भग्नस्योरसि मुष्टिना । बभौ रुद्राभिपन्नस्य यथा रूपं गवां पतेः ॥ ९३ ॥ तस्मिन् हते भीमपराक्रमेण प्लवङ्गमानामृषभेण युद्धे । मही सशैला सवना चचाल भयं च रक्षांस्यधिकं विवेश ॥९४॥ इत्यार्षे० श्रीमद्युद्धकाण्डे षट्सप्ततितमः सर्गः ॥ ७६ ॥

निकुम्भो भ्रातरं दृष्ट्वा सुग्रीवेण निपातितम् । प्रदहन्निव कोपेन वानरेन्द्रमवैक्षत ॥ १ ॥ ततः स्रग्दामसन्नद्धं दत्तपञ्चाङ्गुलं शुभम् । आददे परिघं वीरो नगेन्द्रशिखरोपमम् ॥ २ ॥ हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितम् । यमदण्डोपमं भीमं रक्षसां भयनाशनम् ॥ ३ ॥ तमाविध्य महातेजाः शक्रध्वजसमं तदा । विननाद विवृत्तास्यो निकुम्भो भीमविक्रमः ॥ ४ ॥ उरोगतेन निष्केण भुजस्थैरङ्गदैरपि । कुण्डलाभ्यां च चित्राभ्यां मालया च विचित्रया ॥ ५ ॥

अथ निकुम्भवधः सप्तसप्ततितमे-निकुम्भ इत्यादि ॥ १ ॥ तत इत्यादिश्लोकद्वयमेकान्वयम् । स्रग्दामसन्नद्धं स्रक्समूहनिबद्धम् । दत्तपञ्चाङ्गुलं चन्दन कुङ्कुमादिनार्पितपञ्चाङ्गुलमुद्रामुद्रितम् । अथवा क्रियाविशेषणमेतत् । दत्तपञ्चाङ्गुलं यथा तथा आददे । परिक्षिप्तं परिणद्धम् ॥ २-४ ॥ उरोगतेनेत्यादि

स तु मुष्टिम् इति पाठः ॥ ८७-९२ ॥ मुष्टिनोरसि भग्नस्य पततः कुम्भस्य रूपं रुद्राभिपन्नस्य रुद्रेणाभि भूतस्य गवां पतेः सूर्यस्य ॥ ९३ ॥ ९४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षट्सप्ततितमः सर्गः ॥ ७६ ॥

॥ १ ॥ तत इति । स्रग्दामसन्नद्धं स्रक्समूहनिबद्धम् । दत्तपञ्चाङ्गुलं चन्दनकुङ्कुमादिना अर्पितपञ्चाङ्गुलमुद्रामुद्रितम् ॥ २ ॥ हेमपट्टपरिक्षिप्तमिति । परिक्षिप्तं ॥२४५॥

स०-रुद्राभिपन्नस्य स्ववरतः सूर्यमनु विमानेन गच्छतोऽसुरस्य याने तेनासहमानेन पातिते सति सतीपतिस्तं पातयामासेति पौराणिक्या कथया रुद्राभिपन्नता ज्ञेया ॥ ९३ ॥

For Private And Personal Use Only

श्लोकद्वयमेकान्वयम् । निष्कः पदकम् । भूषणैः हारादिभिः भाति स्म । “ लट् स्मे ” इति भूते लट् । स्तनयित्नुमान् गर्जितवान् । “स्तनयित्नुस्तु गर्जिते मेघे ” इति रत्नमाला । इन्द्रधनुःस्थाने परिघः । विद्युत्स्थाने भूषणानि । विननादेति पूर्वश्लोकोक्तो विनादः स्तनयित्नुस्थान इति नोपमेयन्यूनता ॥ ५ ॥ ६ ॥ परिघाग्रेणेति । वातग्रन्थिः आवहादिसप्तवातस्कन्धः । सघोषः ससिंहनाद इति निकुम्भविशेषणम् । परिघविशेषणं वा ॥७॥

निकुम्भो भूषणैर्भाति तेन स्म परिघेण च। यथेन्द्रधनुषा मेघः सविद्युत् स्तनयित्नुमान् ॥ ६ ॥ परिघाग्रेण पुस्फोट वातग्रन्थिर्महात्मनः । प्रजज्वाल सघोषश्च विधूम इव पावकः ॥ ७ ॥ नगर्या विटपावत्या गन्धर्वभवनोत्तमैः । सह चैवामरावत्या सर्वैश्च भवनैः सह ॥ ८ ॥ सतारग्रहनक्षत्रं सचन्द्रं समहाग्रहम् । निकुम्भपरिघाघूर्णं भ्रमतीव नभस्स्थलम् ॥९॥ दुरासदश्च संजज्ञे परिघाभरणप्रभः। कपीनां स निकुम्भाग्निर्युगान्ताग्निरिवोत्थितः ॥१०॥ राक्षसा वानराश्चापि न शेकुः स्पन्दितुं भयात् । हनुमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ॥ ११ ॥ परिघोपमबाहुस्तु परिघं भास्करप्रभम् । बली बलवतस्तस्य पातयामास वक्षसि ॥१२॥ स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः। विशीर्यमाणः सहसा उल्काशतमिवाम्बरे ॥१३॥ स तु तेन प्रहारेण विचचाल महाकपिः । परिघेण समाधूतो यथा भूमिचलेऽचलः ॥१४॥ स तदाऽभिहतस्तेन हनुमान् प्लवगोत्तमः । मुष्टिं संवर्तयामास बलेनातिमहाबलः ॥ १५ ॥

नगर्येत्यादिश्लोकद्वयमेकान्वयम् । विटपावत्या अलकया । अत्रापि सहेति शेषः । भवनैः अमरभवनैः । ताराः अश्विन्यादयः । ग्रहाः बुधादयः । नक्षत्राणि अश्विन्यादिभिन्नानि । महाग्रहाः शुक्रादयः । अत्र रात्रित्वात् सूर्यो नोक्तः । निकुम्भपरिघाघूर्णम्, अत्र परिघशब्देन तद्वात उपलक्ष्यते । इवशब्दो वाक्यालङ्कारे ॥ ८ ॥ ९ ॥ दुरासदश्चेति । परिघेणाभरणैश्च प्रभातीति परिघाभरणप्रभः । यद्वा परिघाभरणान्येव प्रभा यस्य स तथा । कपीनां दुरासदो जज्ञ इति सम्बन्धः ॥ १० ॥ राक्षसा इति । प्रबलेषु प्रजङ्घादिषु हतेषु दुर्बलैर्भवद्भिः किमर्थं युद्धाय प्रयत्नः कृत इति निकुम्भः कुप्येदिति राक्षसानां भयं वेदितव्यम् । विवृत्य विस्तार्य । प्रमुखतः अग्रे ॥ ११ ॥ परिघोपमबाहुः निकुम्भः ॥ १२ ॥ व्यूढे विशाले । उल्काशतमिव बभाविति ॥ १३ ॥ स त्विति । भूमिचले भूकम्पे ॥ १४ ॥ संवर्तयामास चकारेत्यर्थः ॥ १५–१८ ॥

परिवेष्टितम् ॥ ३–६ ॥ वातग्रन्थिः आवहप्रवहादिसप्तवायुसन्धिः ॥ ७ ॥ विटपावत्या अलकया ॥ ८ ॥ ९ ॥ परिघान्तरणप्रभः परिघान्तकृतरणरक्तप्रभ इत्यर्थः ।

भीमं विचुकुशुः । हनुमद्ग्रहणहर्षादिति भावः । उद्यतं गृहीतम् ॥ १९ ॥ २० ॥ आत्मानमिति । क्षितावभ्यवपद्यत स्थितः ॥ २१ ॥ निक्षिप्य भूमौ पातयित्वा । परमायत्तः अतिप्रयासयुक्तः । उत्पत्य ऊर्ध्वमुद्गत्य । उरसि वेगेन पपात ॥ २२ ॥ बाहुभ्यां शिरोधरां परिगृह्य परिवर्त्य शिर उत्पाटया

तमुद्यम्य महातेजा निकुम्भोरसि वीर्यवान् । अभिचिक्षेप वेगेन वेगवान् वायुविक्रमः ॥ १६ ॥ ततः पुस्फोट चर्मास्य प्रसुस्राव च शोणितम् । मुष्टिना तेन संजज्ञे ज्वाला विद्युदिवोत्थिता ॥ १७ ॥ स तु तेन प्रहारेण निकुम्भो विचचाल ह । स्वस्थश्चापि निजग्राह हनुमन्तं महाबलम् ॥ १८ ॥ विचुक्रुशुस्तदा सङ्ख्ये भीमं लङ्कानिवासिनः । निकुम्भेनोद्यतं दृष्ट्वा हनुमन्तं महाबलम् ॥ १९ ॥ स तदा ह्रियमाणोऽपि कुम्भकर्णात्मजेन ह । आजघानानिलसुतो वज्रकल्पेन मुष्टिना ॥ २० ॥ आत्मानं मोचयित्वाऽथ क्षितावभ्यवपद्यत । हनुमानुन्ममाथाशु निकुम्भं मारुतात्मजः ॥ २१ ॥ निक्षिप्य परमायत्तो निकुम्भं निष्पिपेष ह । उत्पत्य चास्य वेगेन पपातोरसि वीर्यवान् ॥ २२ ॥ परिगृह्य च बाहुभ्यां परिवृत्य शिरोधराम् । उत्पाटयामास शिरो भैरवं नदतो महत् ॥ २३ ॥ अथ विनदति सादिते निकुम्भे पवनसुतेन रणे बभूव युद्धम् । दशरथसुतराक्षसेन्द्रसून्वोर्भृशतरमागतरोषयोः सुभीमम् ॥ २४

मास ॥ २३ ॥ उत्तरसर्गद्वयार्थं संग्रहेण दर्शयति—अथेति । विनदति निकुम्भे पवनसुतेन सादिते सति । दशरथसुतराक्षसेन्द्रसून्वोः राममकराक्षयोः युद्धं

परिघान्तरणप्रभ इति पाठः ॥१०-२३॥ अथेति । विनदति निकुम्भे सादित इति सम्बन्धः । राक्षसेन्द्रसूनुर्मकराक्षः । अनेन वक्ष्यमाणस्य रघुनाथमकराक्षयोर्युद्धस्य

स०—विनदति नानाप्रकारेण कथयति निकुम्भे दशरथसुतराक्षसेन्द्रसून्वोः दशसु दिक्षु रथो गमनम् अप्रतिहतं यस्य तस्य वायोः । " रथः स्यात्स्यन्दने काये चरणे च " इति विश्वः । सुतो हनुमान् । राक्षसेन्द्र सूनुः निकुम्भः तयोः भृशतरमागतरोषयोः यद्युद्धं बभूव तस्मिन्रणे पवनसुतेन सादिते सति राक्षसानां बलं भयमाविवेशेत्याकर्षः । ' अनेन वक्ष्यमाणकथोपक्षेपः ' इत्युभौ । तत्र ' व्यपेते तु जीवे ' इत्यादिक मसङ्गतमिव दृश्यते । अस्मत्पक्षे दशरथशब्द एक एव गौणार्थ इति मन्तव्यम् । दशरथसुतोऽस्यास्तीति दशरथसुत इति वा । पवनसुतेन रणे निकुम्भे सादिते सति युद्धं न्यमाराध्याहारः । न बभूव । परपक्षे रणकर्तुरभावादिति वा ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

बभूव । पुष्पिताग्रावृत्तम् । उत्तरत्र भुजङ्गप्रयातम् ॥ २४ ॥ व्यपेते त्विति । दिशः सस्वनुः प्रतिध्वानिं चक्रुः । पफालेव पुस्फोटेव । बलं कर्म भयं कर्तृ ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तसप्ततितमः सर्गः ॥ ७७ ॥

व्यपेते तु जीवे निकुम्भस्य हृष्टा विनेदुः प्लवङ्गा दिशः सस्वनुश्च । चचालेव चोर्वी पफालेव च द्यौर्भयं राक्षसानां बलं चाविवेश ॥२५॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तसप्ततितमः सर्गः ॥७७॥

निकुम्भं च हतं श्रुत्वा कुम्भं च विनिपातितम् । रावणः परमामर्षी प्रजज्वालानलो यथा ॥ १ ॥ नैर्ऋतः क्रोधशोकाभ्यां द्वाभ्यां तु परिमूर्च्छितः । खरपुत्रं विशालाक्षं मकराक्षमचोदयत् ॥२॥ गच्छ पुत्र मयाऽऽज्ञप्तो बलेनाभिसमन्वितः । राघवं लक्ष्मणं चैव जहि तांश्च वनौकसः ॥ ३ ॥ रावणस्य वचः श्रुत्वा शूरमानी खरात्मजः । बाढमित्यब्रवीद्धृष्टो मकराक्षो निशाचरः ॥ ४ ॥ सोऽभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणम् । निर्जगाम गृहाच्छुभ्राद्रावणस्याज्ञया बली ॥५॥ समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीदिदम् । रथश्चानीयतां शीघ्रं सैन्यं चाहूयतां त्वरात् ॥ ६ ॥ तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः । स्यन्दनं च बलं चैव समीपं प्रत्यपादयत् ॥ ७ ॥

अथ मकराक्षनिर्गमोऽष्टसप्ततितमे । प्रथमपक्षे अयं दशम्यां प्रातः, द्वितीयपक्षे तु दशम्यां प्रातरारभ्य कम्पनवधप्रहस्तवधरावणमुकुटभङ्गकुम्भकर्णप्रबोधतद्वधाः, अथापराह्णे ब्रह्मास्त्रबन्धः, रात्रौ तन्मोक्षलङ्कादहनकुम्भनिकुम्भयूपाक्षशोणिताक्षप्रजङ्घकम्पनमकराक्षवधाः । निकुम्भं चेत्यादि ॥ १ ॥ परिमूर्च्छितः व्याप्तः ॥ २–५ ॥ त्वरात् त्वरया ॥ ६ ॥ प्रत्यपादयत् प्रापयत् ॥ ७ ॥

संक्षेपः कृतः । नवम्यां रात्रियुद्धे कुम्भादीनां वधः ॥२४॥२५॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तसप्ततितमः सर्गः ॥७७॥

॥१॥ परिमूर्च्छितः व्याप्तः ॥ २ ॥ गच्छेति । राघवं लक्ष्मणं च जहि । वस्तुतस्तु–राघवं लक्ष्मणं च, विनेति शेषः । वनौकसः जहीति सम्बन्धः ॥३–५॥ त्वरात्

स०–सामान्यतो मयमित्युक्तम् । तत्र विशेषमाह -व्यपेत इति । जीवे व्यपेते शरीरादपगते ॥ २६ ॥ यद्यपि कुम्भवधः प्रागिति कुम्भं निकुम्भं चेति वक्तव्यम् । तथापि निकुम्भोऽतिवक्रत्वानिति वाऽव्यवहितो निकुम्भवध इति वा निकुम्भग्रहणं प्रागिति मन्तव्यम् ॥ १ ॥ त्वरात् त्वरया, त्वरया अततीति त्वरात् तस्य सम्बुद्धिरिति वा ॥ ६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आवह चोदय । अत्रेतिकरणं द्रष्टव्यम् ॥ ८ ॥ अथ तानित्यादिचतुःश्लोक्येकान्वया ॥ ९–१२ ॥ मकराक्षस्येति । समागताः समाजग्मुः ॥ १३ ॥ ते कामरूपिण इत्यादिश्लोकद्वयमेकान्वयम् । स्पष्टम् ॥ १४–१६ ॥ प्रभ्रष्ट इति । करात्तस्य आत्तकरस्य वशीकृतकरस्य, लघुहस्तस्येति यावत्

प्रदक्षिणं रथं कृत्वा आरुरोह निशाचरः । सूतं संचोदयामास शीघ्रं मे रथमावह ॥८॥ अथ तान् राक्षसान् सर्वान् मकराक्षोऽब्रवीदिदम् । यूयं सर्वे प्रयुद्ध्यध्वं पुरस्तान्मम राक्षसाः ॥ ९ ॥ अहं राक्षसराजेन रावणेन महात्मना । आज्ञप्तः समरे हन्तुं तावुभौ रामलक्ष्मणौ ॥ १० ॥ अद्य रामं वधिष्यामि लक्ष्मणं च निशाचराः । शाखामृगं च सुग्रीवं वानरांश्च शरोत्तमैः ॥ ११ ॥ अद्य शूलनिपातैश्च वानराणां महाचमूम् । प्रदहिष्यामि संप्राप्तः शुष्केन्धनमिवानलः ॥ १२ ॥ मकराक्षस्य तच्छ्रुत्वा वचनं ते निशाचराः । सर्वे नानायुधोपेता बलवन्तः समागताः ॥ १३ ॥ ते कामरूपिणः सर्वे दंष्ट्रिणः पिङ्गलेक्षणाः । मातङ्गा इव नर्दन्तो ध्वस्तकेशा भयानकाः ॥ १४ ॥ परिवार्य महाकाया महाकायं खरात्मजम् । अभिजग्मुस्ततो हृष्टाश्चालयन्तो वसुन्धराम् ॥ १५ ॥ शङ्खभेरीसहस्राणामाहतानां समन्ततः । क्ष्वेलितास्फोटितानां च ततः शब्दो महानभूत् ॥ १६ ॥ प्रभ्रष्टोऽथ करात्तस्य प्रतोदः सारथेस्तदा । पपात सहसा चैव ध्वजस्तस्य च रक्षसः ॥ १७ ॥ तस्य ते रथयुक्ताश्च हया विक्रमवर्जिताः । चरणैराकुलैर्गत्वा दीनाः सास्रमुखा ययुः ॥ १८ ॥ प्रवाति पवनस्तस्मिन् सपांसुः खरदारुणः । निर्याणे तस्य रौद्रस्य मकराक्षस्य दुर्मतेः॥ १९॥

॥ १७ ॥ विक्रमवर्जिताः विविधपदन्यासविरहिताः । प्रथममाकुलैश्चरणैर्गत्वा पश्चाद्ययुरित्यर्थः ॥ १८ ॥ सपांसुः अत एव खरदारुणः खरः परुषः

त्वरया ॥ ६–९ ॥ अहं राक्षसराजेनेत्यादिश्लोकद्वयस्य भातीतिकार्थः स्पष्टः । वस्तुतस्तु–अहं रावणेन रामलक्ष्मणौ हन्तुमद्याज्ञप्तो यद्यपि तथापि लक्ष्मणं रामं, विनेति शेषः । वानरान् वधिष्यामीति सम्बन्धः ॥ १०–१३ ॥ ध्वस्तकेशाः विमर्कीर्णकेशाः अत एव भयावहाः ॥ १४–१७ ॥ तस्येति । विक्रमवर्जिताः विविधपादविन्यासरहिताः । प्रथममाकुलैश्चरणैर्गत्वा पश्चाद्ययुरित्यर्थः ॥ १८ ॥ सपांसुः अत एव खरः परुषः ॥ १९ ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दारुणो भयङ्करश्च ॥१९॥ तानीत्यादिश्लोकद्वयमेकान्वयम्। असकृद्दासिभिन्ना इत्यनेन शौर्यातिशयः सूचितः। युद्धकौशलाः युद्धकुशलाः। स्वार्थेऽण्। अहमहमिति वदन्तः अचिन्त्य निर्गता इति पूर्वेण सम्बन्धः ॥२०॥२१॥ इति श्रीगोविन्द० श्रीरामा० रत्न० युद्धकाण्ड० अष्टसप्ततितमः सर्गः ॥७८॥

तानि दृष्ट्वा निमित्तानि राक्षसा वीर्यवत्तमाः। अचिन्त्य निर्गताः सर्वे यत्र तौ रामलक्ष्मणौ ॥ २० ॥ घनगज महिषाङ्गतुल्यवर्णाः समरमुखेष्वसकृद्गदासिभिन्नाः। अहमहमिति युद्धकौशलास्ते रजनिचराः परितः समुन्नदन्तः ॥ २१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टसप्ततितमः सर्गः ॥ ७८ ॥

निर्गतं मकराक्षं ते दृष्ट्वा वानरयूथपाः। आप्लुत्य सहसा सर्वे योद्धुकामा व्यवस्थिताः ॥ १ ॥ ततः प्रवृत्तं सुमहत् तद्युद्धं रोमहर्षणम्। निशाचरैः प्लवङ्गानां देवानां दानवैरिव ॥ २ ॥ वृक्षशूलनिपातैश्च शिलापरिघपातनैः। अन्योन्यं मर्दयन्ति स्म तदा कपिनिशाचराः ॥ ३ ॥ शक्तिखड्गगदाकुन्तैस्तोमरैश्च निशाचराः। पट्टिशैर्भिन्दिपालैश्च निर्घातैश्च समन्ततः ॥ ४ ॥ पाशमुद्गरदण्डैश्च निखातैश्चापरे तदा। कदनं कपिवीराणां चक्रुस्ते रजनीचराः ॥ ५ ॥ बाणौघैरर्दिताश्चापि खरपुत्रेण वानराः। सम्भ्रान्तमनसः सर्वे दुद्रुवुर्भयपीडिताः ॥ ६ ॥ तान् दृष्ट्वा राक्षसाः सर्वे द्रवमाणान् वलीमुखान्। नेदुस्ते सिंहवद्धृष्टा राक्षसा जितकाशिनः ॥ ७ ॥ विद्रवत्सु तदा तेषु वानरेषु समन्ततः। रामस्तान् वारयामास शरवर्षेण राक्षसान् ॥ ८ ॥

अथ मकराक्षवध एकोनाशीतौ–निर्गतमिति ॥ १–३॥ शक्तीत्यादिश्लोकद्वयमेकान्वयम्। निखातैः आयुधविशेषैः। निर्घातैरिति पाठे अशनिभिरित्यर्थः। केचिन्निशाचराः शक्तिखड्गादिभिः अपरे रजनीचराः पाशमुद्गरादिभिश्च कदनं चक्रुरिति योजना ॥ ४–६ ॥ तान् दृष्ट्वेति। राक्षसाः जित

घनेति। अहमहमिति वदन्त इति सम्बन्धः ॥ २१ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टसप्ततितमः सर्गः ॥ ७८ ॥
॥ १–३ ॥ निर्घातैः निर्घातसंज्ञकायुधविशेषैः ॥४–६॥ तानिति। जितेन जयेन काशन्त इति जितकाशिनः। राक्षसाः जितकाशिनः, अभूवन्निति शेषः ॥७–१०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

काशिन इति भिन्नं वाक्यम् । जितं जयः तेन काशन्त इति तथोक्ता जितकाशिनः, बभूवुरिति शेषः । अन्यथा द्वितीयराक्षसपदवैयर्थ्यं स्यात् ॥७-१०॥ रामानु०-तिष्ठेति । द्वन्द्वयुद्धं ददामि त इति पाठः ॥ १० ॥ यत्तदेति । स्वकर्मस्थं वधकर्मस्थम् । यथा पिता हतस्तथा वध्यमित्यर्थः । यद्वा शास्त्रधर्मकर्मानुतिष्ठन्त

वारितान् राक्षसान् दृष्ट्वा मकराक्षो निशाचरः । क्रोधानलसमाविष्टो वचनं चेदमब्रवीत् ॥ ९ ॥
तिष्ठ राम मया सार्धं द्वन्द्वयुद्धं ददामि ते । त्याजयिष्यामि ते प्राणान् धनुर्मुक्तैः शितैः शरैः ॥ १० ॥
यत्तदा दण्डकारण्ये पितरं हतवान् मम । मदग्रतः स्वकर्मस्थं दृष्ट्वा रोषोऽभिवर्धते ॥ ११ ॥
दह्यन्ते भृशमङ्गानि दुरात्मन् मम राघव । यन्मयाऽसि न दृष्टस्त्वं तस्मिन् काले महावने ॥ १२ ॥
दिष्ट्याऽसि दर्शनं राम मम त्वं प्राप्तवानिह । काङ्क्षितोऽसि क्षुधार्तस्य सिंहस्येवेतरो मृगः ॥ १३ ॥

मित्यर्थः । स्वकर्मस्थमिति सुतरामकृत्यनिरतमिति वाऽर्थः ॥ ११ ॥ दह्यन्त इति । तस्मिन् काले महावने यद्यस्मान्न दृष्टोऽसि तस्मान्ममाङ्गानि दह्यन्ते । तदानीमेव दृष्टश्चेत्प्रतिकारेण तापः शाम्येदित्यर्थः ॥ १२-१५ ॥

यत्तदेति । यस्मान्मम पितरं हतवान् तस्मान्मदग्रतः तिष्ठन्तम् । स्वकर्मस्थमित्यत्र सु अकर्मस्थमिति छेदः । सुतरामकृत्यनिरतं दृष्ट्वा, त्वामिति शेषः ॥ ११ ॥ दह्यन्त इति । तस्मिन् काले पितृवधसमये यस्मान्न दृष्टोऽसि अतो ममाङ्गानि दह्यन्ते, तदानीमेव दृष्टश्चेत्प्रतीकारेण तापश्शाम्येदित्यर्थः ॥ "वारितान् राक्षसान् दृष्ट्वा" इत्यारभ्य-"ये त्वया निहता वीराः" इत्यन्तस्य वास्तवार्थस्तु-मकराक्षो रामनिष्ठुरभाषणप्रवृत्तोऽपि मकराक्षवाणी रामं प्रकारान्तरेणाह-वारिता नित्यारभ्य श्लोकषट्केन । क्रोधानलसमाविष्ट इत्येतत्तस्य स्वरूपकथनम् ॥ तिष्ठेति । हे राम ! ते तव धनुर्मुक्तैः शरैः मे मम प्राणान् त्याजयिष्यामि । मया सार्धं तिष्ठ द्वन्द्वयुद्धे जहीति सम्बन्धः ॥ यत्तदेत्यादि श्लोकद्वयमेकं वाक्यम् । हे दुरात्मन् ! दुष्टेष्वप्यात्मा अन्तःकरणं दयासारं यस्य हे राघव ! यत् यस्मात् मदग्रतः मत् मत्तः अग्रतः पूर्वमेव, मद्धधात्पूर्वमेवेत्यर्थः । दण्डकारण्ये मम पितरं स्वकर्मस्थं सुतरामकृत्यनिरतं दृष्ट्वा हतवान् तस्मात्तस्मिन् काले महावने मया त्वं न दृष्टः, तस्मात्त्वत्कृतवधाभावादिति शेषः । अङ्गानि दह्यन्ते रोषश्चाभिवर्द्धत इति सम्बन्धः ॥ १२ ॥ दिष्ट्येत्यस्य इवशब्दो वाक्यालङ्कारे । सिंहस्य सिंहसदृशस्य क्षुधार्तस्य त्वद्दर्शनं कदा भविष्यतीति क्षुधया आर्तस्य मृग इव मृग्यते ब्रह्मादिभिरिति मृगः सर्वेश्वरः अत एव इतरः प्रपञ्चातीतः अत एव काङ्क्षितः, ब्रह्मादिभि ॥२४८॥

अस्त्रैरिति । महाहवे निमित्ते । येन वा अन्येनायुधेनाभ्यस्तं तेनैव युधि वर्तताम्, भवानिति शेषः ॥ १६ ॥ उत्तरोत्तरवादिनम्, बहुप्रलापिनमित्यर्थः ॥ १७ ॥ युद्धेन विना प्रहारेण विना ॥ १८ ॥ १९ ॥ स्वाशिताः सुष्ठु आशितवन्तः ॥ २०–२३ ॥ ज्यातलयोः शब्दः ज्यातलयोः संघर्षजः शब्दः ।

अद्य मद्बाणवेगेन प्रेतराड्विषयं गतः । ये त्वया निहता वीराः सह तैश्च समेष्यसि ॥ १४ ॥ बहुनाऽत्र किमुक्तेन शृणु राम वचो मम । पश्यन्तु सकला लोकास्त्वां मां चैव रणाजिरे ॥ १५ ॥ अस्त्रैर्वा गदया वापि बाहुभ्यां वा महाहवे । अभ्यस्तं येन वा राम तेनैव युधि वर्तताम् ॥ १६ ॥ मकराक्षवचः श्रुत्वा रामो दशरथात्मजः । अब्रवीत् प्रहसन् वाक्यमुत्तरोत्तरवादिनम् ॥ १७ ॥ कत्थसे किं वृथा रक्षो बहून्यसदृशानि तु । न रणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥ १८ ॥ चतुर्दशसहस्राणि रक्षसां त्वत्पिता च यः । त्रिशिरा दूषणश्चैव दण्डके निहता मया ॥ १९ ॥ स्वाशितास्तव मांसेन गृध्रगोमायुवायसाः । भविष्यन्त्यद्य वै पाप तीक्ष्णतुण्डनखाङ्कुराः ॥ २० ॥ राघवेणैवमुक्तस्तु खरपुत्रो निशाचरः । बाणौघानमुचत्तस्मै राघवाय रणाजिरे ॥ २१ ॥ तान् शरान् शरवर्षेण रामश्चिच्छेद नैकधा । निपेतुर्भुवि ते च्छिन्ना रुक्मपुङ्खाः सहस्रशः ॥२२॥ तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा । रक्षसः खरपुत्रस्य सूनोर्दशरथस्य च ॥२३ ॥ जीमूतयोरिवाकाशे शब्दो ज्यातलयोस्तदा । धनुर्मुक्तः स्वनोत्कृष्टः श्रूयते च रणाजिरे ॥ २४ ॥ देवदानवगन्धर्वाः किन्नराश्च महोरगाः । अन्तरिक्षगताः सर्वे द्रष्टुकामास्तदद्भुतम् ॥ २५ ॥ विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते परम् । कृतप्रतिकृतान्योन्यं कुरुतां तौ रणाजिरे ॥ २६ ॥

स्वनोत्कृष्टः स्वनेषूत्कृष्टः ॥ २४ ॥ २५ ॥ विद्धं वेधनम् । वर्धते अवर्धत । कृतप्रतिकृतान्योन्यं कृतस्य प्रतिकृतं ययोस्तौ तादृशावन्योन्यं यस्मिन्

रिति शेषः । एतादृशस्त्वं दिष्ट्या मद्भाग्येन दर्शनं प्राप्तोऽसि, अतो मद्भाग्यं किं वर्ण्यत इति भावः ॥१३॥ अद्येति । त्वया बाणवेगेन अद्य प्रेतराड्विषयं गतो भवेय मिति शेषः । अतो मत मत्सकाशात् ये शूराः सुग्रीवादयः अनिहताः तैस्सह समेष्यसीति सम्बन्धः ॥ १४ ॥ १५ ॥ अस्त्रैरिति । महाहवे निमित्ते येन वा येन केन वा अभ्यस्तं तेनैव युधि वर्तताम्, भवानिति शेषः ॥ १६ ॥ उत्तरोत्तरवादिनं बहुप्रलापिनमित्यर्थः ॥ १७–१९ ॥ स्वाशिता इति । सुष्ठ्वाशितवन्तः ॥ २०–२२ ॥ राक्षस इत्यादिसार्धमेकं वाक्यम् । धनुर्मुक्तस्वनः धनुर्गुणस्वनः ॥ २३–२५ ॥ विद्धं वेधनं वर्धते अवर्धत । कृतप्रतिकृतान्योन्यं कृतस्य प्रतिकृतं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युद्धकर्मणि तत्तथोक्तम् । कुरुताम् अकुरुताम्, युद्धमिति शेषः ॥२६–२९॥ वसुधां तिष्ठत् वसुधायामतिष्ठत् ॥ ३० ॥ वसुधां वसुधायाम् ॥ ३१–३४॥

राममुक्तांस्तु बाणौघान् राक्षसस्त्वच्छिनद्रणे। रक्षोमुक्तांस्तु रामो वै नैकधा प्राच्छिनच्छरैः ॥२७॥ बाणौघैर्वितताः सर्वा दिशश्च प्रदिशस्तथा । सञ्छन्ना वसुधा चैव समन्तान्न प्रकाशते ॥ २८ ॥ ततः क्रुद्धो महाबाहुर्धनुश्चिच्छेद रक्षसः । अष्टाभिरथ नाराचैः सूतं विव्याध राघवः ॥ २९ ॥ भित्त्वा शरै रथं रामो रथाश्वान् समपातयत् । विरथो वसुधां तिष्ठन् मकराक्षो निशाचरः ॥३०॥ तत्तिष्ठद्वसुधां रक्षः शूलं जग्राह पाणिना । त्रासनं सर्वभूतानां युगान्ताग्निसमप्रभम् ॥ ३१ ॥ विभ्राम्य तु महच्छूलं प्रज्वलत्तन्निशाचरः । स क्रोधात् प्राहिणोत्तस्मै राघवाय महाहवे ॥३२॥ तमापतन्तं ज्वलितं खरपुत्रकराच्च्युतम् । बाणैस्तु त्रिभिराकाशे शूलं चिच्छेद राघवः ॥ ३३ ॥ स च्छिन्नो नैकधा शूलो दिव्यहाटकमण्डितः । व्यशीर्यत महोल्केव रामबाणार्दितो भुवि ॥ ३४ ॥ तच्छूलं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा । साधु साध्विति भूतानि व्याहरन्ति नभोगता ॥ ३५ ॥ तं दृष्ट्वा निहतं शूलं मकराक्षो निशाचरः । मुष्टिमुद्यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाब्रवीत् ॥ ३६ ॥ स तं दृष्ट्वा पतन्तं वै प्रहस्य रघुनन्दनः । पावकास्त्रं ततो रामः सन्दधे तु शरासने ॥ ३७ ॥ तेनास्त्रेण हतं रक्षः काकुत्स्थेन तदा रणे । सञ्छिन्नहृदयं तत्र पपात च ममार च ॥ ३८ ॥ दृष्ट्वा ते राक्षसाः सर्वे मकराक्षस्य पातनम् । लङ्कामेवाभ्यधावन्त रामबाणार्दितास्तदा ॥ ३९ ॥ दशरथनृपपुत्रबाणवेगै रजनिचरं निहतं खरात्मजं तम् । ददृशुरथ सुरा भृशं प्रहृष्टा गिरिमिव वज्रहतं यथा विकीर्णम् ॥ ४० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनाशीतितमः सर्गः ॥ ७९ ॥

तच्छूलमिति । नभोगता नभोगतानि । "सुपां सुलुक्–" इत्यादिना आकारादेशः ॥ ३५–३९ ॥ दशरथेति । गिरिमिव वज्रहतं यथेति । द्वे अप्यव्यय

ययोस्तादृशमन्योन्यं यस्मिन् युद्धकर्मणि तत्तथोक्तम् । कुरुताम् अकुरुताम् ॥ २१–२९ ॥ विरथ इति । वसुधास्थः, अभूदिति शेषः ॥ ३० ॥ तत रक्षः वसुधां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पदे संभूयैकार्थमेवाचक्षाते। पक्षद्वयेऽपि मकराक्षवधेन दशममहः समाप्तम् ॥४०॥ इति श्रीगो० श्रीरामा० रत्न० युद्ध० एकोनाशीतितमः सर्गः ॥७९॥ अथेन्द्रजिन्निर्गमोऽशीतितमे—मकराक्षमित्यादि। आविष्टः, अभूदिति शेषः ॥ १–२ ॥ त्वमिति। जयसि अजैषीः। पुनःशब्दस्त्वर्थे। मानुषौ पुनः

मकराक्षं हतं श्रुत्वा रावणः समितिञ्जयः। क्रोधेन महताऽऽविष्टो दन्तान् कटकटापयन् ॥ १ ॥ कुपितश्च तदा तत्र किं कार्यमिति चिन्तयन्। आदिदेशाथ संक्रुद्धो रणायेन्द्रजितं सुतम् ॥ २ ॥ जहि वीर महावीर्यौ भ्रातरौ रामलक्ष्मणौ। अदृश्यो दृश्यमानो वा सर्वथा त्वं बलाधिकः ॥ ३ ॥ त्वमप्रतिमकर्माणमिन्द्रं जयसि संयुगे। किं पुनर्मानुषौ दृष्ट्वा न वधिष्यसि संयुगे ॥ ४ ॥ तथोक्तो राक्षसेन्द्रेण प्रतिगृह्य पितुर्वचः। यज्ञभूमौ स विधिवत् पावकं जुहवेन्द्रजित् ॥ ५ ॥ जुह्वतश्चापि तत्राग्निं रक्तोष्णीषधराः स्त्रियः। आजग्मुस्तत्र सम्भ्रान्ता राक्षस्यो यत्र रावणिः ॥ ६ ॥ शस्त्राणि शरपत्राणि समिधोऽथ विभीतकाः। लोहितानि च वासांसि स्रुवं कार्ष्णायसं तथा ॥ ७ ॥ सर्वतोऽग्निं समास्तीर्य शरपत्रैः सतोमरैः। छागस्य कृष्णवर्णस्य गलं जग्राह जीवतः ॥ ८ ॥

मानुषौ तु। संयुगे दृष्ट्वाऽपि न वधिष्यसि किम्? दर्शनमात्रेण वधिष्यस्येवेत्यर्थः ॥४॥ तथोक्त इति। जुहव जुहाव। वृद्ध्यभाव आर्षः ॥५॥ जुह्वत इति भावलक्षणे षष्ठी। रक्तोष्णीषधराः ऋत्विग्धारणार्थं रक्तोष्णीषाण्यानयन्त्य इत्यर्थः। "लोहितोष्णीषा ऋत्विजः प्रचरन्ति" इति श्रुतेः। सम्भ्रान्ताः त्वरावत्यः। समयातिक्रमो मा भूदिति त्वरया उष्णीषाण्यानिन्युरित्यर्थः ॥ ६ ॥ शस्त्राणि, अभवन्निति शेषः। शरपत्राणि गुन्द्रपत्राणि। गुन्द्रश्च काश

वसुधायाम् तिष्ठत्सद् शूलं जग्राहेति सम्बन्धः ॥ दशम्यां मकराक्षवधः ॥ ३१–४० ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोनाशीतितमः सर्गः ॥ ७९ ॥ १ ॥ २ ॥ जहि वीरेत्यादिश्लोकद्वयस्य प्रातीतिकार्थः स्पष्टः। वस्तुतस्तु–इन्द्रं जितवतो मम मानुषजयः को वा गरीयानिति गर्विष्ठमिन्द्रजितं प्रत्याह–जहि वीरेत्यादिश्लोकद्वयेन। बलाधिकस्त्वं संयुगे अदृश्यो दृश्यमानो वा सर्वथा इन्द्रं दृष्ट्वा जयसि तथापि मानुषावपि रामलक्ष्मणौ संयुगे वधिष्यसि किम्? न वधिष्यसि अतः तौ जहि त्यज। "ओहाक् त्यागे" इति धातोः। तयोरसाध्यत्वात्तज्जयविषयाशां त्यजेति भावः ॥३॥४॥ तथोक्त इति। जुहव जुहाव, वृद्ध्यभाव आर्षः ॥ ५ ॥ ६ ॥ शस्त्राणीति। शस्त्रादीन्यभवन्निति शेषः ॥ ७ ॥ ८ ॥

For Private And Personal Use Only

जातीयः । 'शुन्द्रस्तेजनकः शरः " इत्यमरः । शस्त्राणि तोमराणि । सतोमरैरित्यनुवादात् । शस्त्राणि शरपत्राणि च परिस्तरणान्यभवन् विभीतकाः समिधः इध्मानि अभवन् । वासांसि ऋत्विगुष्णीषवासांसि । लोहितान्यभवन् । कार्ष्णायसं स्रुवमासीत् ॥ ७ ॥ ८ ॥ सकृदेवेति । विजयं दर्शयन्ति विजय

सकृदेव समिद्धस्य विधूमस्य महार्चिषः । बभूवुस्तानि लिङ्गानि विजयं दर्शयन्ति च ॥ ९ ॥ प्रदक्षिणावर्तशिख स्तप्तहाटकसन्निभः । हविस्तत् प्रतिजग्राह पावकः स्वयमुत्थितः ॥ १० ॥ हुत्वाऽग्निं तर्पयित्वा च देवदानवराक्ष सान् । आरुरोह रथश्रेष्ठमन्तर्धानगतं शुभम् ॥ ११ ॥ स वाजिभिश्चतुर्भिश्च बाणैश्च निशितैर्युतः । आरोपितमहा चापः शुशुभे स्यन्दनोत्तमः ॥ १२ ॥ जाज्वल्यमानो वपुषा तपनीयपरिच्छदः । मृगैश्चन्द्रार्धचन्द्रैश्च स रथः समलंकृतः ॥ १३ ॥ जाम्बूनदमहाकम्बुर्दीप्तपावकसन्निभः । बभूवेन्द्रजितः केतुर्वैडूर्यसमलंकृतः ॥ १४ ॥ तेन चादित्यकल्पेन ब्रह्मास्त्रेण च पालितः । स बभूव दुराधर्षो रावणिः सुमहाबलः ॥ १५ ॥ सोऽभिनिर्याय नगरा दिन्द्रजित् समितिञ्जयः । हुत्वाऽग्निं राक्षसैर्मन्त्रैरन्तर्धानगतोऽब्रवीत् ॥ १६ ॥ अद्य हत्वा रणे यौ तौ मिथ्या प्रव्रा जितौ वने । जयं पित्रे प्रदास्यामि रावणाय रणार्जितम् ॥ १७ ॥

सूचकानि ॥ ९ ॥ १० ॥ हुत्वेति । अन्तर्धानगतम् अन्तर्धानशक्तियुक्तम् ॥ ११ ॥ १२ ॥ जाज्वल्यमान इति । मृगैः मृगाकारप्रतिमाभिः । चन्द्रैः चन्द्राकारैः । अर्धचन्द्रैः रचनाविशेषैः ॥ १३ ॥ जाम्बूनदमहाकम्बुः सौवर्णमहावलययुक्तः । "कम्बुर्ना वलये शङ्खे" इत्यमरः ॥ १४ ॥ १५ ॥ राक्षसैः निर्ऋतिदेवताकैः । अन्तर्धानगतः अन्तर्धानशक्तिं प्राप्तः अतः इत्युक्त्वाऽन्तरधीयतेत्यनेन न विरोधः ॥ १६ ॥ अद्य हत्वेत्यादिश्लोकद्वयमेकान्वयम् ।

शरहोमे विजयं दर्शयन्ति, अन्यत्र युद्धे विजयो नास्ति तथापि जीवतः पुनर्लङ्काप्रवेश एव जय इत्यवगन्तव्यम् ॥९॥१०॥ अन्तर्धानगतम् अन्तर्धानशक्तियुक्तम् ॥११॥१२॥ मृगैः प्रतिमारूपैः चन्द्रार्धचन्द्रैश्च चन्द्रार्धचन्द्राकाररचनाविशेषैः॥१३॥जाम्बूनदमहाकम्बुः सौवर्णवलयसंयुक्तः।"कम्बुर्ना वलये शङ्खे"इत्यमरः॥१४॥१५॥ सोऽभिनिर्याय राक्षसैः मन्त्रैः निर्ऋतिदेवताकैः मन्त्रैः । अन्तर्धानगतः अन्तर्धानशक्तिं प्राप्तः अतः इत्युक्त्वाऽन्तरधीयतेत्युपरितनेन न विरोधः ॥१६॥ अद्य हत्वेत्यादि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अद्य निर्वानरामिति । पितुरित्यध्याहारः । पितुः परमप्रीतिं परमप्रीतिं प्रति, पितुः प्रीतिमुद्दिश्येत्यर्थः । अद्य सलक्ष्मणं रामं हत्वा उर्वीं निर्वानरां करिष्य इति संबन्धः ॥१७–१९॥ स ददर्शेति । नागौ त्रिशिरसाविवेति दृष्टान्तेन रामलक्ष्मणयोर्महापुरुषलक्षणपृथुलोन्नतभुजशिरस्कत्वं द्योत्यते ।

अद्य निर्वानरामुर्वीं हत्वा रामं सलक्ष्मणम् । करिष्ये परमप्रीतिमित्युक्त्वाऽन्तरधीयत ॥ १८ ॥ आपपाताथ संक्रुद्धो दशग्रीवेण चोदितः । तीक्ष्णकार्मुकनाराचैस्तीक्ष्णस्त्विन्द्ररिपू रणे ॥ १९ ॥ स ददर्श महावीर्यौ नागौ त्रिशिरसाविव । सृजन्ताविषुजालानि वीरौ वानरमध्यगौ ॥ २० ॥ इमौ ताविति सञ्चिन्त्य सज्यं कृत्वा च कार्मुकम् । सन्ततानेषुधाराभिः पर्जन्य इव वृष्टिमान् ॥ २१ ॥ स तु वैहायसं प्राप्य सरथो रामलक्ष्मणौ । अचक्षुर्विषये तिष्ठन् विव्याध निशितैः शरैः ॥२२॥ तौ तस्य शरवेगेन परीतौ रामलक्ष्मणौ । धनुषी सशरे कृत्वा दिव्यमस्त्रं प्रचक्रतुः ॥२३॥ प्रच्छादयन्तौ गगनं शरजालैर्महाबलौ । तमस्त्रैः सूर्यसङ्काशैर्नैव पस्पृशतुः शरैः॥२४॥ स हि धूमान्धकारं च चक्रे प्रच्छादयन्नभः । दिशश्चान्तर्दधे श्रीमान्नीहारतमसावृताः ॥ २५ ॥ नैव ज्यातलनिर्घोषो न च नेमिखुरस्वनः । शुश्रुवे चरतस्तस्य न च रूपं प्रकाशते ॥ २६ ॥

सृजन्तौ स्रक्ष्यन्तौ । सकलराक्षसक्षयकारिणावित्यर्थः ॥२०॥ इमौ ताविति । सन्ततान ववर्ष ॥२१॥ वैहायसं विहायसा गमनम् ॥२२–२४॥ स हीति । नभः प्रच्छादयन् । हेतौ शतृप्रत्ययः । अन्तर्धापयामासेत्यर्थः । धूमान्धकारमिति नीहारतमसावृता इति च पूर्वमेवोत्पातकलुषत्वमुच्यते ॥२५॥२६॥

श्लोकद्वयमेकं वाक्यम् । तस्य प्रातीतिकार्थः स्पष्टः । रघ्वे सलक्ष्मणं रामं हत्वा गत्वा वने यौ मिथ्या मयाजितौ रामलक्ष्मणौ, विनेति शेषः । आहवे हत्वा, वानरानिति शेषः । उर्वीं निर्वानरां कृत्वा रावणाय जयं मदास्यामीति एवं पित्रे प्रीतिं करिष्यामि चेत्युक्त्वा अन्तरधीयतेति सम्बन्धः ॥ १७–१९ ॥ सृजन्तौ स्रक्ष्यन्तौ ॥ २० ॥ सन्ततानेषुधाराभिः निरन्तरबाणधाराभिः ॥ २१ ॥ वैहायसं विहायससम्बन्धिमार्गम् ॥ २२–२४ ॥ स हीति । नभः प्रच्छादयन्निति हेतौ शतृप्रत्ययः । दिशम् अन्तर्दधे अन्तर्धापयामास ॥ २५ ॥ २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

घनान्धकार इति । घनान्धकारे घनकालिमवति ॥ २७–२९ ॥ रामानु०–घनान्धकारे घनयुक्तान्धकारवनिबिडे ॥ २७ ॥ पतगाः पक्षिणो भूत्वा । तथा

घनान्धकारे तिमिरे शरवर्षमिवाद्भुतम् । स ववर्ष महाबाहुर्नाराचशरवृष्टिभिः ॥ २७ ॥ स रामं सूर्यसङ्काशैः शरैर्दत्तवरो भृशम् । विव्याध समरे क्रुद्धः सर्वगात्रेषु रावणिः ॥ २८ ॥ तौ हन्यमानौ नाराचैर्धाराभिरिव पर्वतौ । हेमपुङ्खान्नरव्याघ्रौ तिग्मान् मुमुचतुः शरान् ॥ २९ ॥ अन्तरिक्षे समासाद्य रावणिं कङ्कपत्रिणः । निकृत्य पतगा भूमौ पेतुस्ते शोणितोक्षिताः ॥ ३० ॥ अतिमात्रं शरौघेण पीड्यमानौ नरोत्तमौ । तानिषून् पततो भल्लैरनेकैर्निचकृन्ततुः ॥ ३१ ॥ यतो हि ददृशाते तौ शरान्निपततः शितान् । ततस्तु तौ दाशरथी ससृजातेऽस्त्रमुत्तमम् ॥३२॥ रावणिस्तु दिशः सर्वा रथेनातिरथः पतन् । विव्याध तौ दाशरथी लघ्वस्त्रो निशितैः शरैः ॥ ३३ ॥ तेनातिविद्धौ तौ वीरौ रुक्मपुङ्खैः सुसंहितैः । बभूवतुर्दाशरथी पुष्पिताविव किंशुकौ ॥३४॥ नास्य वेद गतिं कश्चिन्न च रूपं धनुः शरान् । न चान्यद्विदितं किंचित् सूर्यस्येवाभ्रसम्प्लवे ॥ ३५ ॥ तेन विद्धाश्च हरयो निहताश्च गतासवः । बभूवुः शतशस्तत्र पतिता धरणीतले ॥ ३६ ॥ लक्ष्मणस्तु सुसंक्रुद्धो भ्रातरं वाक्यमब्रवीत् । ब्राह्ममस्त्रं प्रयोक्ष्यामि वधार्थं सर्वरक्षसाम् ॥ ३७ ॥ तमुवाच ततो रामो लक्ष्मणं शुभलक्षणम् ॥ ३८ ॥ नैकस्य हेतो रक्षांसि पृथिव्यां हन्तुमर्हसि । अयुध्यमानं प्रच्छन्नं प्राञ्जलिं शरणागतम् । पलायन्तं प्रमत्तं वा न त्वं हन्तुमिहार्हसि ॥ ३९ ॥ अस्यैव तु वधे यत्नं करिष्यावो महाबल । आदेक्ष्यावो महावेगानस्त्रानाशीविषोपमान् ॥ ४० ॥

वेगवन्तः इत्यर्थः ॥ ३०–३३ ॥ तेनेति । सुसंहितैः सुष्ठु निर्मितैः ॥ ३४ ॥ नास्येति । अभ्रसम्प्लवे मेघावरणे ॥ ३५–३८ ॥ नैकस्येत्यादि । प्रच्छन्नं युद्धभीत्या प्रच्छन्नम् । पलायन्तं पलायमानम् ॥३९॥ अस्यैव त्विति । आदेक्ष्यावः प्रयोक्ष्यावः । अस्त्रान् अस्त्राणि । लिङ्गव्यत्यय आर्षः ॥४०॥४१॥

घनान्धकारे सान्द्रतिमिरे । शरवर्षमिव उदकवर्षमिव ॥२७–२९॥ अन्तरिक्ष इति । पतगाः शराः ॥३०–३८॥ अस्त्रान् अस्त्राणि । आदेक्ष्यावः प्रयोक्ष्यावः ॥४०॥४१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यद्येष इति । भूमिं भूविवरम् विशते । आत्मनेपदमार्षम् । दिवं स्वर्गम् ॥ ४२ ॥ रामानु०–यदीति । भूमिं भूविवरम् विशते । आत्मनेपदमार्षम् । दिवं स्वर्गम् । एत दुपरितनलोकानामुपलक्षणम् । रसातलम् एतदधस्तनलोकानामुपलक्षणम् ॥ ४२ ॥ इत्येवमिति । प्लवगर्षभैः वृतः निरीक्षते । उपायं चिन्तयति स्मेत्यर्थः ॥ ४३ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अशीतितमः सर्गः ॥ ८० ॥

तमेनं मायिनं क्षुद्रमन्तर्हितरथं बलात् । राक्षसं निहनिष्यन्ति दृष्ट्वा वानरयूथपाः ॥ ४१ ॥ यद्येष भूमिं विशते दिवं वा रसातलं वापि नभस्स्थलं वा । एवं निगूढोऽपि ममास्त्रदग्धः पतिष्यते भूमितले गतासुः ॥ ४२ ॥ इत्येव मुक्त्वा वचनं महात्मा रघुप्रवीरः प्लवगर्षभैर्वृतः । वधाय रौद्रस्य नृशंसकर्मणस्तदा महात्मा त्वरितं निरीक्षते ॥४३॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अशीतितमः सर्गः ॥ ८० ॥

विज्ञाय तु मनस्तस्य राघवस्य महात्मनः । सन्निवृत्याहवात्तस्मात् संविवेश पुरं ततः ॥ १ ॥
सोऽनुस्मृत्य वधं तेषां राक्षसानां तरस्विनाम् । क्रोधताम्रेक्षणः शूरो निर्जगाम महाद्युतिः ॥ २ ॥
स पश्चिमेन द्वारेण निर्ययौ राक्षसैर्वृतः । इन्द्रजित्तु महावीर्यः पौलस्त्यो देवकण्टकः ॥ ३ ॥

अथ मायासीतावधः एकाशीतितमे–विज्ञाय त्वित्यादि । अत्र तृतीयाक्षरभूतो यकारो गायत्र्या एकोनविंशतितमाक्षरम् । अष्टादशसहस्रश्लोका गताः ॥ १ ॥ तेषां कुम्भकर्णादीनाम् ॥ २ ॥ निकुम्भिलायां दुर्जयास्त्रबललाभाय होतुकामस्तावत्पर्यन्तं रामलक्ष्मणयोर्युद्धोद्योगं मन्दीकर्तुं मायामारिप्समाणो(नो) रामलक्ष्मणयोः कुपितत्वेन दुरासदत्वात् सीतास्वरूपाभिज्ञस्यान्यस्याभावाद्धनुमते मायां दर्शयितुं पश्चिमद्वारेण निर्गत इत्याह–स

भूमिं भूविवरम् । दिवं स्वर्गम् । एतदुपरितनलोकानामुपलक्षणम् । रसातलम् एतदधस्तनलोकानामुपलक्षणम् ॥ ४२ ॥ ४३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अशीतितमः सर्गः ॥ ८० ॥ गायत्र्या य इत्येकोनविंशतितमाक्षरं विज्ञाय तु मनस्तस्य इति श्लोकस्य तृतीयाक्षरेण य इत्यनेन संगृह्णाति ॥ १ ॥ सोऽनुस्मृत्येति । तेषां कुम्भकर्णादीनाम् ॥ २ ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पश्चिमेनेत्यादिना ॥ ३ ॥ दृष्ट्वा विचिन्त्य । पश्चिमद्वारनिष्क्रान्तस्य रामलक्ष्मणदर्शनासम्भवात् । मायां परव्यामोहकरीं शक्तिम् । प्रादुष्करोत् प्रादुर्भावयामास ॥ ४ ॥ आवृत्य स्थितेन बलेन, युक्त इति शेषः । युक्ते रथे सीतां स्थाप्य ततस्तस्या वधमरोचयदिति सम्बन्धः ॥ ५-८ ॥ स ददर्शेत्यादि

इन्द्रजित्तु ततो दृष्ट्वा भ्रातरौ रामलक्ष्मणौ । रणायाभ्युद्यतौ वीरौ मायां प्रादुष्करोत्तदा ॥४॥ इन्द्रजित्तु रथे स्थाप्य सीतां मायामयीं ततः । बलेन महताऽऽवृत्य तस्या वधमरोचयत् ॥५॥ मोहनार्थं तु सर्वेषां बुद्धिं कृत्वा सुदुर्मतिः । हन्तुं सीतां व्यवसितो वानराभिमुखो ययौ ॥ ६ ॥ तं दृष्ट्वा त्वभिनिर्यान्तं नगर्याः काननौकसः । उत्पेतुरभिसंक्रुद्धाः शिलाहस्ता युयुत्सवः ॥ ७ ॥ हनुमान् पुरतस्तेषां जगाम कपिकुञ्जरः । प्रगृह्य सुमहच्छृङ्गं पर्वतस्य दुरासदम् ॥ ८ ॥ स ददर्श हतानन्दां सीतामिन्द्रजितो रथे । एकवेणीधरां दीनामुपवासकृशाननाम् ॥ ९ ॥ परिक्लिष्टैकवसनाममृजां राघवप्रियाम् । रजोमलाभ्यामालिप्तैः सर्वगात्रैर्वरस्त्रियम् ॥१०॥ तां निरीक्ष्य मुहूर्तं तु मैथिलीत्यध्यवस्य तु । बभूवाचिरदृष्टा हि तेन सा जनकात्मजा ॥ ११ ॥ तां दीनां मलदिग्धाङ्गीं रथस्थां दृश्य मैथिलीम् । बाष्पपर्याकुलमुखो हनुमान् व्यथितोऽभवत् ॥ १२ ॥ अब्रवीत्तां तु शोकार्तां निरानन्दां तपस्विनीम् । सीतां रथस्थितां दृष्ट्वा राक्षसेन्द्रसुताश्रिताम् । किं समर्थितमस्येति चिन्तयन् स महाकपिः ॥ १३ ॥

श्लोकद्वयमेकान्वयम् । अमृजाम् अनुद्वर्तनाम् । अनलङ्कारामिति वा । "मृजू शौचालङ्कारयोः" इति धातोर्भिदादित्वादङ् । सर्वगात्रैः उपलक्षिताम् ॥ ९ ॥ १० ॥ अध्यवस्य निश्चित्य, विषण्ण इति शेषः । निश्चये हेतुमाह बभूवेति ॥ ११ ॥ दृश्य दृष्ट्वा ॥ १२ ॥ अब्रवीदित्याद्यर्धत्रयमेकान्वयम् ।

मायां परव्यामोहकरीं शक्तिम् । प्रादुष्करोत प्रादुर्भावयामासेत्यर्थः ॥ ४ ॥ निकुम्भिलायां होतुकामः पश्चिमद्वारे निर्गच्छन् इन्द्रजित् स्वगमनविघातुकं रामलक्ष्मणयोर्युद्धोद्योगं दृष्ट्वा तन्निवारणार्थं मायासीतां प्रकटितवानिति मन्तव्यम् ॥ ५-९ ॥ परिक्लिष्टां मलिनाम् । अमृजाम् उद्वर्तनरहिताम् । सर्वगात्रैरुपलक्षिताम् ॥ १० ॥ तां मुहूर्तमात्रं निरीक्ष्य । अचिरदृष्टत्वात् मैथिलीति अध्यवस्य निश्चित्य बभूव, विषण्ण इति शेषः ॥ ११ ॥ १२ ॥ अब्रवीदित्यादि सार्धश्लोकः

स०-या पूर्वम् आचिरात् दृष्टा बहुतिथमवलोकिता । सा जनकात्मजा वा नेति मुहूर्तं निरीक्ष्य आलोच्य तामध्यवस्य सैवेति निश्चित्य अहिते दुःखे बभूव, दुःखितोऽभूदिति यावत् । अचिरदृष्टा अल्पकालव्यवधानेन दृष्टेति वा ॥ ११ ॥

For Private And Personal Use Only

सीतां रथे स्थापितवतोऽस्य किं समर्थितं को वाऽभिप्राय इति चिन्तयन्नब्रवीत्। इतिर्वचनचिन्तनयोः साधारणः ॥ १३ ॥ सह तैरित्यर्धम् । हनुमानिति शेषः ॥ १४ ॥ मूर्च्छितः व्याप्तः ॥१५॥ पश्यतां तेषाम् । अनादरे षष्ठी । मायया परमोहनशक्त्या ॥ १६-१८ ॥ केशपक्षे केशसमूहे । "पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे" इत्यमरः । परामृशः अस्पृशः ॥ १९ ॥ धिगित्यादिसार्धश्लोकः एकान्वयः । ईदृशी जुगुप्सितेत्यर्थः । नृशंस निर्दय !

सह तैर्वानरश्रेष्ठैरभ्यधावत रावणिम् ॥१४॥ तद्वानरबलं दृष्ट्वा रावणिः क्रोधमूर्च्छितः । कृत्वा विकोशं निस्त्रिंशं मूर्ध्नि सीतां परामृशत् ॥१५॥ तां स्त्रियं पश्यतां तेषां ताडयामास रावणिः । क्रोशन्तीं राम रामेति मायया योजितां रथे ॥ १६ ॥ गृहीतमूर्धजां दृष्ट्वा हनुमान् दैन्यमागतः । शोकजं वारि नेत्राभ्यामसृजन्मारुतात्मजः ॥ १७ ॥ तां दृष्ट्वा चारुसर्वाङ्गीं रामस्य महिषीं प्रियाम् । अब्रवीत् परुषं वाक्यं क्रोधाद्रक्षोधिपात्मजम् ॥ १८ ॥ दुरात्मन्नात्मनाशाय केशपक्षे परामृशः । ब्रह्मर्षीणां कुले जातो राक्षसीं योनिमाश्रितः ॥ १९ ॥ धिक् त्वां पापसमाचारं यस्य ते मतिरीदृशी ॥ २० ॥ नृशंसानार्य दुर्वृत्त क्षुद्र पापपराक्रम । अनार्यस्येदृशं कर्म घृणा ते नास्ति निर्घृण ॥ २१ ॥ च्युता गृहाच्च राज्याच्च रामहस्ताच्च मैथिली । किं तवैषाऽपराद्धा हि यदेनां हन्तुमिच्छसि ॥ २२ ॥ सीतां च हत्वा न चिरं जीविष्यसि कथंचन । वधार्ह कर्मणाऽनेन मम हस्तगतो ह्यसि ॥ २३ ॥

अनार्य असज्जन ! दुर्वृत्त दुराचार ! क्षुद्र अल्पबुद्धे ! पापः अधर्म्यः पराक्रमो यस्य स पापपराक्रमः । उक्तमनार्यत्वं कार्यतो दर्शयति—अनार्यस्येति । ईदृशं जुगुप्सितं कर्म अनार्यस्यैव भवति । हे निर्घृण निर्दय ! ते घृणा जुगुप्सा नास्ति । "जुगुप्सा करुणा घृणा" इत्यमरः ॥ २० ॥ २१ ॥ अपराधिषु घृणा न कर्तव्या अत एव एनां हन्मीत्याशङ्क्यापराधलेशोप्यस्यां नास्तीत्याह—च्युतेति । गृहात् स्वसदनात् । चकारात् परिचारकेभ्यश्च । अनेन बन्धुमुखादपराधकरणं नास्तीत्युक्तम् । राज्यात् राज्योपकरणाच्च । अनेन सेनामुखेन नापराध इत्युक्तम् । रामहस्तात् रक्षकहस्ताच्च । तन्मुखादप्यपराध

एकान्वयः । सीतां रथे स्थापितवतोऽस्य किं समर्थितम् को वा अभिप्राय इति चिन्तयन्नब्रवीदिति योजना ॥ १३-१८ ॥ दुरात्मन्निति । केशपक्षे केशसमूहे ॥१९॥ ॥ २० ॥ ईदृशं जुगुप्सितम् ॥ २१ ॥ २२ ॥ हे वधार्ह ! अनेन कर्मणा न चिरं जीविष्यसि । हि यतो मम हस्तगतोऽसि ॥ २३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रसक्तिर्नास्तीत्युक्तम् । मैथिली आचारप्रधानकुले जाता । अनेनापराधस्वरूपमेव न जानातीत्युक्तम् । यत् येनापराधकार्येण एनां हन्तुमिच्छसि तादृशं किं प्रयोजनमुद्दिश्य । अपराद्धा अपराधं कृतवती । कर्तरि क्तः ॥ २२ ॥ २३ ॥ ये चेति । हे लोकवध्य! एषु चतुर्दशलोकेषु स्त्रीघातिनां ये कुत्सिताः लोकाः तान् इह जीवितमुत्सृज्य प्रेत्य यातनाशरीरं प्राप्य प्रतिपत्स्यसे प्राप्स्यसीत्यर्थः ॥ २४ ॥ सायुधैः सहननसाधनैः ॥ २५ ॥ आपतन्तमिति।

ये च स्त्रीघातिनां लोका लोकवध्येषु कुत्सिताः । इह जीवितमुत्सृज्य प्रेत्य तान् प्रतिपत्स्यसे ॥ २४ ॥ इति ब्रुवाणो हनुमान् सायुधैर्हरिभिर्वृतः । अभ्यधावत संक्रुद्धो राक्षसेन्द्रसुतं प्रति ॥ २५ ॥ आपतन्तं महावीर्यं तद नीकं वनौकसाम् । रक्षसां भीमवेगानामनीकं तु न्यवारयत् ॥ २६ ॥ स तां बाणसहस्रेण विक्षोभ्य हरिवाहिनीम् । हरिश्रेष्ठं हनूमन्तमिन्द्रजित् प्रत्युवाच ह ॥२७॥ सुग्रीवस्त्वं च रामश्च यन्निमित्तमिहागताः । तां हनिष्यामि वैदेही मद्यैव तव पश्यतः ॥ २८ ॥ इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर । सुग्रीवं च वधिष्यामि तं चानार्यं विभी षणम् ॥२९॥ न हन्तव्याः स्त्रियश्चेति यदब्रवीषि प्लवङ्गम । पीडाकरममित्राणां यत् स्यात् कर्तव्यमेव तत् ॥३०॥ तमेवमुक्त्वा रुदतीं सीतां मायामयीं तदा । शितधारेण खड्गेन निजघानेन्द्रजित् स्वयम् ॥ ३१ ॥ यज्ञोपवीतमार्गेण भिन्ना तेन तपस्विनी । सा पृथिव्यां पृथुश्रोणी पपात प्रियदर्शना । तामिन्द्रजित्स्वयं हत्वा हनुमन्तमुवाच ह ॥३२॥

अनीकम् अनीकं च ॥ २६-२९ ॥ न हन्तव्या इति यत् ब्रवीषि तत्रोत्तरं शृण्विति वाक्यशेषः ॥ ३० ॥ ३१ ॥ यज्ञोपवीतमार्गेण भिन्ना । मार्ग शब्दः प्रकारवचनः, यज्ञोपवीतधारणप्रकारेण भिन्नेत्यर्थः । यज्ञोपवीतमादाय भिन्नेति पाठान्तरम् । पूर्वं मूर्धजेषु गृहीतामादाय । यज्ञोपवीतं भिन्ना

ये चेति । हे लोकवध्य! एषु लोकेषु चतुर्दशभुवनेषु । स्त्रीघातिनां ये कुत्सिता लोकाः तान् इह जीवितमुत्सृज्य प्रेत्य यातनाशरीरमेत्य प्रतिपत्स्यस प्रतिपद्यसे इति योजना ॥२४॥२५॥ आपतन्तमित्यत्रार्षो लिङ्गव्यत्ययः । रक्षसामनीकं कर्तृ ॥२६-२८॥ इमामित्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु-लक्ष्मणं रामं च आश्रिता मिति शेषः । इमां हत्वा त्वां चानार्यं विभीषणं च हनिष्यामीति सम्बन्धः ॥२९॥ अमित्राणां शत्रूणां यत्पीडाकरं तत्पापमपि कर्तव्यमेव ॥३०॥३१॥ यज्ञोपवीतमार्गेण

For Private And Personal Use Only

यज्ञोपवीतं यथा भवति तथा भिन्ना, यज्ञोपवीतप्रकारेण भिन्नेत्यर्थः ॥ ३२–३४ ॥ रामानु०–यज्ञोपवीतेति। तेन इन्द्रजिता। आधूय मूर्धजेषु गृहीत्वा आधूय। यज्ञोपवीतं यथा भवति तथा भिन्ना यज्ञोपवीतमार्गेण भिन्नेत्यर्थः ॥ ३२ ॥ मयेति। रामस्येमां रामसम्बन्धिनीम्। राममहिषीमिति यावत् ॥ ३३ ॥ वानरा इति। व्यादितास्यस्य

मया रामस्य पश्येमां कोपेन च निषूदिताम्। एषा विशस्ता वैदेही विफलो वः परिश्रमः ॥ ३३ ॥ ततः खड्गेन महता हत्वा तामिन्द्रजित् स्वयम्। हृष्टः स रथमास्थाय विननाद महास्वनम् ॥ ३४ ॥ वानराः शुश्रुवुः शब्दमदूरे प्रत्यवस्थिताः। व्यादितास्यस्य नदतस्तद्दुर्गं संश्रितस्य च ॥ ३५ ॥ तथा तु सीतां विनिहत्य दुर्मतिः प्रहृष्टचेताः स बभूव रावणिः। तं हृष्टरूपं समुदीक्ष्य वानरा विषण्णरूपाः सहसा प्रदुद्रुवुः ॥ ३६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकाशीतितमः सर्गः ॥ ८१ ॥

श्रुत्वा तु भीमनिर्ह्रादं शक्राशनिसमस्वनम्। वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः ॥ १ ॥
तानुवाच ततः सर्वान् हनुमान् मारुतात्मजः। विषण्णवदनान् दीनांस्त्रस्तान् विद्रवतः पृथक् ॥ २ ॥
कस्माद्विषण्णवदना विद्रवध्वे प्लवङ्गमाः। त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतम् ॥ ३ ॥

व्यात्तास्यस्य। तद्दुर्गं व्यूहीकृतराक्षसपरिवेष्टनरूपम् ॥ ३५ ॥ हृष्टरूपम् अत्यन्तहृष्टम्। विषण्णरूपाः अत्यन्तं विषण्णाः ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकाशीतितमः सर्गः ॥ ८१ ॥

अथेन्द्रजितो निकुम्भिलायां होमारम्भः–श्रुत्वेत्यादि। शक्राशनिसमस्वनम् शक्राशनिस्वनसममित्यर्थः ॥ १ ॥ २ ॥ कस्मादिति। विद्रवध्वे विद्रवथ।

भिन्ना। मार्गशब्दः प्रकारवचनः। यज्ञोपवीतधारणप्रकारेण भिन्नेत्यर्थः ॥ ३२ ॥ एषा वैदेही विशस्ता अतो वः परिश्रमो निष्फलः ॥ ३३ ॥ ३४ ॥ वानरा इति। तद्दुर्गं व्यूहीकृतराक्षसपरिवेष्टनरूपं दुर्गं सीतामुद्दिश्योक्तेन्द्रजित्परुषवाक्यानां वानरव्यामोहनाय सम्पादितमायासीताविषयत्वात्तेषामर्थान्तरं नोक्तमित्यवगन्तव्यम् ॥ ३५ ॥ हृष्टरूपम् अतिशयेन हृष्टम्। प्रशंसायां रूपप् ॥ ३६ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकाशीतितमः सर्गः ॥ ८१ ॥
श्रुत्वेति। भीमो यो निर्ह्रादः शब्दः तं श्रुत्वा, इन्द्रजित इति शेषः। शक्राशनिसमस्वनं तमिन्द्रजितं वीक्षमाणा दिशो दुद्रुवुः ॥ १–९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आत्मनेपदमार्षम् ॥ ३ ॥ पृष्ठत इति । अनुव्रजध्वम् अनुव्रजत । पदव्यत्यय आर्षः ॥ ४–१० ॥ तमिति । व्यर्थमुद्यता व्यर्थं प्रयुक्ता ॥ ११–१२ ॥

पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे । शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुम् ॥४॥ एवमुक्ताः सुसंहृष्टा वायुपुत्रेण वानराः । शैलशृङ्गाण्यगांश्चैव जगृहुर्हृष्टमानसाः ॥ ५ ॥ अभिपेतुश्च गर्जन्तो राक्षसान् वानरर्षभाः । परिवार्य हनूमन्तमन्वयुश्च महाहवे ॥६॥ स तैर्वानरमुख्यैश्च हनुमान् सर्वतो वृतः । हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम् ॥ ७ ॥ स राक्षसानां कदनं चकार सुमहाकपिः । वृतो वानरसैन्येन कालान्तकयमोपमः ॥ ८ ॥ स तु कोपेन चाविष्टः शोकेन च महाकपिः । हनुमान् रावणिरथेऽपातयन्महतीं शिलाम् ॥ ९ ॥ तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा । विधेयाश्वसमायुक्तः सुदूरमपवाहितः ॥१०॥ तमिन्द्रजितमप्राप्य रथस्थं सहसारथिम् । विवेश धरणीं भित्त्वा सा शिला व्यर्थमुद्यता ॥ ११ ॥ पातितायां शिलायां तु रक्षसां व्यथिता चमूः । निपतन्त्या च शिलया राक्षसा मथिता भृशम् ॥ १२ ॥ तमभ्यधावञ्छतशो नदन्तः काननौकसः ॥ १३ ॥ ते द्रुमांश्च महावीर्या गिरिशृङ्गाणि चोद्यताः । क्षिपन्तीन्द्रजितः सङ्ख्ये वानरा भीमविक्रमाः ॥ १४ ॥ वृक्षशैलमहावर्षं विसृजन्तः प्लवङ्गमाः । शत्रूणां कदनं चक्रुर्नेदुश्च विविधैः स्वरैः ॥ १५ ॥

ते द्रुमानिति । इन्द्रजितः इन्द्रजितं प्रति ॥ १४–१८ ॥

विधेयाश्वैः सारथ्यधीनाश्वैः समायुक्तः ॥ १० ॥ तमप्राप्य धरणिं विवेश अत एव सा शिला व्यर्थमुद्यता उद्युक्ता, अभवदिति शेषः ॥ ११–१३ ॥ गिरिशृङ्गाणि

स०—धरणीं भित्त्वा व्यर्थम् इन्द्रजिद्धननरूपार्थरहितं यथा भवति तथा । तामेव या विवेश सा शिला पुनरुद्यता उपर्यायाता । एवं शिलायां पातितायां सत्यां रक्षसां चमूः सेना व्यथिता अन्तर्गता चोत्थिता पुनः किं करोतीति व्यथां प्राप्ता भृशं निपतन्त्या तया शिलया च राक्षसा भृशं मथिता इत्यन्वयः । एके तु व्यर्थमुद्यता सा शिलाऽभून् धरणीं चाविवेश । हनुमता शिलायां पातितायां रक्षसां चमूर्व्यथिता । तथा च निपतन्त्या शिलया राक्षसा मथिता इत्यन्वयं मन्वते ॥ ११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शूलैरशनिभिरिति । अशनेरायुधत्वं शक्तिविशेषात् ॥१९॥२०॥ स निवार्येत्यादि । न साध्यं साधयितुमयोग्यम्, प्रयोजनाभावादिति भावः॥२१॥ तदेवाह–

वानरैस्तैर्महावीर्यैर्घोररूपा निशाचराः । वीर्यादभिहता वृक्षैर्व्यवेष्टन्त रणाजिरे ॥ १६॥ स्वसैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित् । प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ ॥ १७ ॥ स शरौघानवसृजन् स्वसैन्येनाभिसंवृतः । जघान कपिशार्दूलान् स बहून् दृष्टविक्रमः ॥१८॥ शूलैरशनिभिः खड्गैः पट्टिशैः कूटमुद्गरैः । ते चाप्यनुचरास्तस्य वानरान् जघ्नुरोजसा ॥ १९ ॥ सस्कन्धविटपैः सालैः शिलाभिश्च महाबलः । हनुमान् कदनं चक्रे रक्षसां भीमकर्मणाम् ॥ २० ॥ स निवार्य परानीकमब्रवीत्तान् वनौकसः । हनुमान् सन्निवर्तध्वं न नः साध्यमिदं बलम् ॥२१॥ त्यक्त्वा प्राणान् विवेष्टन्तो रामप्रियचिकीर्षवः । यन्निमित्तं हि युद्ध्यामो हता सा जनकात्मजा ॥ २२ ॥ इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च । तौ यत् प्रतिविधास्येते तत् करिष्यामहे वयम् ॥ २३ ॥ इत्युक्त्वा वानरश्रेष्ठो वारयन् सर्ववानरान् । शनैः शनैरसंत्रस्तः सबलः सन्न्यवर्तत ॥२४॥ ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः । स होतुकामो दुष्टात्मा गतश्चैत्यनिकुम्भिलाम् ॥२५॥ निकुम्भिलामधिष्ठाय पावकं जुहवेन्द्रजित् ॥ २६ ॥ यज्ञभूम्यां तु विधिवत् पावकस्तेन रक्षसा । हूयमानः प्रजज्वाल मांसशोणितभुक् तदा ॥ २७ ॥

त्यक्त्वेति ॥२२–२४॥ चैत्यनिकुम्भिलां चैत्ये विद्यमानं निकुम्भिलाख्यदेवतायतनमित्यर्थः ॥२५॥ निकुम्भिलामित्यर्धम् । जुहव जुहाव ॥२६॥२७॥

चोद्यताः, गृहीत्वेति शेषः । गृहीत्वा युद्धार्थमुद्यता बभूवुरित्यर्थः । इन्द्रजितं क्षिपन्ति आक्षिपन्ति स्म । तिरस्कृतं चक्रुरिति यावत् ॥ १४–२० ॥ परानीकं राक्षससेनाम् प्राणांस्त्यक्त्वा प्राणस्नेहमपि त्यक्त्वा विचेष्टन्तस्सन्तो यन्निमित्तं युद्ध्यामः सा हतेति व्यर्थोऽयं श्रम इति भावः । तौ रामसुग्रीवौ । प्रतिविधास्येते प्रतिक्रियानुष्ठाने नियोक्ष्येते तत्करिष्यामहे ॥ २१–२५ ॥ निकुम्भिलामिति । जुहव जुहाव ॥ दशम्यां पूर्वाह्णे निकुम्भिलागमनम् ॥ २६ ॥ होमशोणितभुक् होमार्थमाहुतित्वेन प्रक्षिप्तशोणितभुक् ॥ २७ ॥

For Private And Personal Use Only

स इति । होमशोणितं शोणितहोमः ॥ २८॥ नयानयज्ञाः शास्त्रीयाशास्त्रीयविदः ॥ २९॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्व्यशीतितमः सर्गः ॥ ८२ ॥

सोऽर्चि×पिनद्धो ददृशे होमशोणिततर्पितः । सन्ध्यागत इवादित्यः सुतीव्रोऽग्निः समुत्थितः ॥ २८ ॥ अथेन्द्रजिद्राक्षसभूतये तु जुहाव हव्यं विधिना विधानवित् । दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते महासमूहेषु नयानयज्ञाः ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्व्यशीतितमः सर्गः ॥ ८२ ॥

राघवश्चापि विपुलं तं राक्षसवनौकसाम् । श्रुत्वा सङ्ग्रामनिर्घोषं जाम्बवन्तमुवाच ह ॥ १ ॥ सौम्य नूनं हनुमता क्रियते कर्म दुष्करम् । श्रूयते हि यथा भीमः सुमहानायुधस्वनः ॥ २ ॥ तद्गच्छ कुरु साहाय्यं स्वबलेनाभिसंवृतः । क्षिप्रमृक्षपते तस्य कपिश्रेष्ठस्य युध्यतः ॥ ३ ॥ ऋक्षराजस्तथोक्तस्तु स्वेनानीकेन संवृतः । आगच्छत् पश्चिमं द्वारं हनुमान् यत्र वानरः ॥ ४ ॥ अथायान्तं हनूमन्तं ददर्शर्क्षपतिः पथि । वानरैः कृतसङ्ग्रामैः श्वसद्भिरभिसंवृतम् ॥ ५ ॥ दृष्ट्वा पथि हनूमांश्च तदृक्षबलमुद्यतम् । नीलमेघनिभं भीमं सन्निवार्य न्यवर्तत ॥ ६ ॥ स तेन हरिसैन्येन सन्निकर्षं महायशाः । शीघ्रमागम्य रामाय दुःखितो वाक्यमब्रवीत् ॥ ७ ॥ समरे युद्ध्यमानानामस्माकं प्रेक्षतां पुरः । जघान रुदतीं सीतामिन्द्रजिद्रावणात्मजः ॥ ८ ॥ उद्भ्रान्तचित्तस्तां दृष्ट्वा विषण्णोऽहमरिन्दम । तदहं भवतो वृत्तं विज्ञापयितुमागतः ॥ ९ ॥

अथ मायासीतावधमूर्च्छितरामसान्त्वनं त्र्यशीतितमे–राघवश्चापीत्यादि । जाम्बवन्तं यदृच्छया सन्निहितम् ॥ १ ॥ सौम्येति । यथा यतः ॥ २–६ ॥
रामानु०–अथेति । वानरैः कृतसङ्ग्रामैरिति पाठः ॥ ५ ॥ स तेनेति । हरिसैन्येन सह । सन्निकर्षम्, रामस्येति शेषः ॥ ७–११ ॥

होमशोणिततर्पितः शोणितहोमेन तर्पित इत्यर्थः ॥ २८ ॥ २९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्व्यशीतितमः सर्गः ॥ ८२ ॥ १–४ ॥ अथेति । श्वसद्भिः सीताविपत्तिस्मृतिजदुःखान्निश्वसद्भिरित्यर्थः ॥ ५ ॥ उद्यतं युद्धायोद्युक्तम् ॥ ६ ॥ स इति । हरिसैन्येन सह

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असिञ्चन्निति । उच्छिखम् उद्गतज्वालम् । "अर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः ॥१२॥ हेत्वर्थसंयुतं हेतुरुपपत्तिः अर्थः प्रयोजनम् । हेतुरूपोऽर्थोऽभिधेयो हेत्वर्थ इति वा ॥१३॥ एवं सीताहननश्रवणजनितमनवधिकमधैर्यमाश्रयन्तं राममाश्वासयितुं लक्ष्मणोऽन्वारुह्यवादेन धर्माधर्मयोः स्वरूपं खण्डयन् नीतिशास्त्रानुसारेण बलमेव प्रधानतयाऽऽलम्ब्यतामित्याह–शुभ इत्यादिना सर्गशेषेण । पितृवाक्यपरिपालनादिरूपे शुभे वर्त्मनि तिष्ठन्तम्, स्थिरतया

तस्य तद्वचनं श्रुत्वा राघवः शोकमूर्च्छितः । निपपात तदा भूमौ छिन्नमूल इव द्रुमः ॥ १० ॥
तं भूमौ देवसङ्काशं पतितं प्रेक्ष्य राघवम् । अभिपेतुः समुत्पत्य सर्वतः कपिसत्तमाः ॥ ११ ॥
असिञ्चन् सलिलैश्चैनं पद्मोत्पलसुगन्धिभिः । प्रदहन्तमनासाद्यं सहसाऽग्निमिवोच्छिखम् ॥ १२ ॥
तं लक्ष्मणोऽथ बाहुभ्यां परिष्वज्य सुदुःखितः । उवाच राममस्वस्थं वाक्यं हेत्वर्थसंयुतम् ॥ १३ ॥
शुभे वर्त्मनि तिष्ठन्तं त्वामार्य विजितेन्द्रियम् । अनर्थेभ्यो न शक्नोति त्रातुं धर्मो निरर्थकः ॥ १४ ॥

तदनुतिष्ठन्तमित्यर्थः । विजितेन्द्रियं हस्तप्राप्तराज्यपरित्याजकयोः कैकेयीदशरथयोरुपर्यपि मनःकालुष्याभावेन विजितेन्द्रियं त्वाम् । निरर्थकः अवस्तुभूतः, अप्रामाणिक इति यावत् । शशविषाणवत् केवलव्यवहारमात्रावलम्बनो धर्मः अनर्थेभ्यः व्यसनेभ्यः त्रातुं व्यसनानि निवारयितुम् न शक्नोति । 'सति धर्मिणि धर्माश्चिन्त्यन्ते' इति न्यायादिति भावः । निरर्थकमेव त्वया पितृवचनपरिपालनमारब्धम् । आदावेव मयोक्तमिति भावः । धर्म इत्युपलक्षणम् ।

सन्निकर्षम्, रामस्येति शेषः ॥ ७–१२ ॥ तमिति । हेत्वर्थसंयुतं हेतुरूपार्थयुक्तम्, युक्तियुक्तमिति यावत् ॥१३॥ अथ लक्ष्मणो रावणस्याधर्मिष्ठस्य विनाशादर्शनात् प्राप्तराज्यपरित्यागपूर्वकपितृवचनपरिपालनरूपधर्मविशिष्टस्य श्रीरामस्य तत्फलभूतसौख्यादर्शनात् सीतावधरूपदुःखमदर्शनाच्च स्वयं व्यसनातिशयेन कलुषितान्तःकरणस्सन् धर्म एव नास्तीत्याह–शुभे वर्त्मनीत्यादिना । यद्वा लक्ष्मणो धर्माधर्मयोर्हिताहितसाधनत्वं जानन्नपि सीताहननश्रवणजशोकाक्रान्तचित्तस्सन्

स०–शुभे वेदविहिते वर्त्मनि मार्गे तिष्ठन्तं त्वाम् अनर्थेभ्यः दुःखेभ्यः । त्रातुं धर्मो यस्मान्न शक्नोति तस्मान्निरर्थक इति योजना । आर्यविजितेन्द्रियमिति पदमेकं वा । आर्यार्य पित्रर्थं विजितेन्द्रियं राज्यादिविषयस्पृहारहितत्वाद्विजितमनस्कं "नाहमर्थपरो देवि लोकमावस्तुमुत्सहे । विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम्" इत्युक्तेः केवलं धर्मावलम्बिनं त्वां स धर्मः । उर्वरितं पूर्ववत् । इदानीं धर्म एवंविधोऽपि स्वसमये रक्षतीति स कर्तव्य एवेत्यान्तरङ्गिकभावपक्षेऽप्यन्वेतुं शक्यते श्लोकः । तथाहि–अनर्थेभ्यः एवंविधेभ्यः धर्मस्त्वां त्रातुं शक्नोति यतः स न निरर्थक इति ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधर्मोऽपि निरर्थकः सन् रावणमर्थेभ्यो न निवारयितुं शक्नोतीत्यर्थः ॥१४॥ ननु कथमनयोरप्रामाणिकत्वमित्यपेक्षायां तत्र किं प्रत्यक्षं प्रमाणम्, उतानुमानम्, अथ शब्दो वा? नाद्य इत्याह–भूतानामिति। स्थावराणां जङ्गमानां च भूतानां पदार्थानाम् यथा दर्शनं प्रत्यक्षत उपलम्भनम् अस्ति। तथा धर्मा

भूतानां स्थावराणां च जङ्गमानां च दर्शनम्। यथाऽस्ति न तथा धर्मस्तेन नास्तीति मे मतिः ॥ १५ ॥
यथैव स्थावरं व्यक्तं जङ्गमं च तथाविधम्। नायमर्थस्तथा युक्तस्त्वद्विधो न विपद्यते ॥ १६ ॥

धर्मयोः दर्शनं न अस्तीत्यनुषङ्गः। तेन अदर्शनेन धर्मोऽधर्मश्च नास्तीति मे मतिः निर्णयः॥१५॥ उक्तमेवार्थं प्रत्यक्षानुग्राहकेण तर्केण द्रढयति–यथेति। यथैव स्थावरं व्यक्तं प्रत्यक्षत उपलब्धम्। जङ्गमं च तथाविधं व्यक्तं भवति। अयं धर्माधर्मरूपोऽर्थः तथा युक्तो न भवति, तथा प्रत्यक्षो न भवतीत्यर्थः।

अनवरतधर्मसेविना रघुनाथेन 'अयुद्ध्यमानं समरे न हन्तुं त्वमिहार्हसि' इत्यादिना ब्रह्मास्त्रप्रयोगनिवारणेन क्रोधाविष्टस्सन् धर्माधर्मयोरर्थानर्थहेतुत्वनियमं निराकरोति–शुभे वर्त्मनीत्यादिना। पितृवाक्यपरिपालनरूपे शुभे वर्त्मनि धर्ममार्गे तिष्ठन्तं तथापि विजितेन्द्रियं हस्तप्राप्तराज्यपरित्याजकयोः कैकेयीदशरथयोरुपरि मनःकालुष्याभावेन जितेन्द्रियम्। 'नाहमर्थपरो देवि लोकमावस्तुमुत्सहे। विद्धि मामृषिभिस्तुल्यं केवलं धर्ममास्थितम्॥'' इत्युक्तप्रकारेण केवलधर्मैकप्रवणं त्वां धर्मः अनर्थेभ्यस्त्रातुं न शक्नोतीति यत् ततोऽभ्युदयफलत्वेनानुमातुमशक्यत्वान्निरर्थकोऽनुपादेय इत्यर्थः। निष्प्रमाणको वा ॥ १४ ॥ ननु प्रामाणिकस्य धर्मस्य कथमनुपादेयत्वमित्याशङ्क्य तत्सद्भावे किमनुमानं प्रमाणम्, उत प्रत्यक्षम्? इति द्वेधा विकल्प्य धर्मोऽस्ति फलदर्शनादित्यनुमानपक्षं फलादर्शनान्नास्तीति पूर्वश्लोके निराकृत्येदानीं प्रत्यक्षं निराकर्तुमाह–भूतानामिति। भूतत्वं सत्यत्वम्। भूतानां सत्यानामित्यर्थः। स्थावराणां जङ्गमानां च दर्शनं प्रत्यक्षत उपलम्भनं यथाऽस्ति तथा धर्मस्य दर्शनं नास्ति यतः तेन कारणेन धर्मो नास्तीति मे मतिरिति सम्बन्धः ॥ १५ ॥ उक्तमेवार्थं सतर्कं विशदयति–यथैवेति। स्थावरं यथैव व्यक्तं प्रत्यक्षत उपलब्धं जङ्गमं च तथाविधं व्यक्तं भवति, अयं धर्मरूपोऽर्थः तथा युक्तो न भवति प्रत्यक्षो न भवतीत्यर्थः। तेन नास्तीति मे मतिरित्यनुषङ्गः।

स०–धर्मो वर्तत इति प्रवादमात्रतस्ते सिद्धवत्कृत्य वैफल्यमात्रं तस्योक्त्वा वस्तुतस्तु यतस्स फलानुमेयस्तदेव नास्तीति स एव नास्तीत्याह–भूतानामिति। स्थावराणां महीरुहादीनाम्। जङ्गमानां प्राणिनाम् एतदादीनां भूतानाम्। यथा प्रत्यक्षतो दर्शनं यथाऽस्तीति सन्तः। एतेन तथा धर्मः प्रात्यक्षिक इति स नास्त्येवेति चार्वाकमतं प्रसञ्जयतो मे मतिः। यत्तु स्वयं सुखापरोक्षदर्शनं यथाऽस्तीति व्याख्याय "यत्तु यथा स्थावरादीनां दर्शनात्तथा धर्मस्य दर्शनाभावाद्धर्मो नास्तीति" व्याचक्षते तन्न; योग्यानुपलम्भस्यैवाभावसाधकत्वाद्धर्मस्य पिशाचादिवदयोग्यत्वादिति नागोजिभट्टेन व्याख्यातं तत्तु चार्वाकमतावलम्बनेन पूर्वपक्षप्रसञ्जनमेव तीर्थाभिप्रेतमिति न समञ्जसमिवाश्रुतसुखशब्दाध्याहारेणाप्याहृतस्यापि स्थावरपदार्थान्वयायोग्यत्वेन मौलदर्शनपदास्वारस्याच्चाप्ययुक्तम्। न तथा दर्शनमित्येतावता धर्मस्ते त्वद्विषये न नास्तीति मे मतिः। तेन पिशितलोचनानवगमेन धर्मो नास्तीति मे मतिः। पूर्वपक्षमात्रं प्रसञ्जितम्। वस्तुतस्तु कालसहायो व्यक्तो भवति धर्म इति भावः ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यदि कश्चिद्धर्मोऽधर्मो वाऽर्थः प्रत्यक्षसिद्धः स्यात् तर्हि स जङ्गमतया वा स्थावरतया दृश्येत । न च दृश्यते । तस्मान्नासौ प्रत्यक्ष इति भावः । किं च त्वद्विधो न विपद्यते । धर्मस्य प्रत्यक्षसिद्धतया सद्भावे त्वद्विधः धार्मिकः विपत्तिं नाप्नुयात् । रावणश्चार्थं न प्राप्नुयादित्यपि द्रष्टव्यम् ॥ १६ ॥ नाप्यनुमानं धर्माधर्मयोः प्रमाणमित्याह–यदीति । यद्यधर्मो भूतो भवेत् तदा अधर्मयुक्तो रावणः नरकं व्रजेत् व्यसनं गच्छेत् । यदि धर्मो भूतो भवेत् तदा धर्मयुक्तो भवांश्च एवं व्यसनं नाप्नुयात् । व्यसनाव्यसनरूपकार्याभ्यां हि धर्माधर्मावनुमेयौ । न तथा संभवति । धार्मिकतयाऽभिमते त्वयि व्यसनदर्श

यद्यधर्मो भवेद्भूतो रावणो नरकं व्रजेत् । भवांश्च धर्मयुक्तो वै नैवं व्यसनमाप्नुयात् ॥ १७ ॥
तस्य च व्यसनाभावाद् व्यसनं च गते त्वयि । धर्मो भवत्यधर्मश्च परस्परविरोधिनौ ॥ १८ ॥
धर्मेणोपलभेद्धर्ममधर्मं चाप्यधर्मतः । यद्यधर्मेण युज्येयुर्येष्वधर्मः प्रतिष्ठितः ॥ १९ ॥

नात् । अधार्मिकतयाऽभिमते रावणे व्यसनादर्शनाच्च । साध्यवति पक्षे हेत्वभावात् स्वरूपासिद्धो हेतुरित्यर्थः ॥१७॥ विरुद्धत्वाच्च सुखदुःखयोः कार्ययोर्नं धर्माधर्मानुमापकत्वमित्याह–तस्य चेति । तस्य चाधर्मिष्ठस्य रावणस्य व्यसनाभावात् । व्यसनाभावशब्देन सुखं लक्ष्यते, सुखसद्भावादित्यर्थः । त्वयि च परमधार्मिके व्यसनं दुःखं गते सति धर्मः अधर्मो भवति अधर्मफलप्रदो भवति । चकारादधर्मोऽपि धर्मफलाभ्युदयप्रदो भवतीति लभ्यते । अत एव परस्परविरोधिनौ स्वाभावव्याप्तहेतुकावित्यर्थः ॥ १८ ॥ व्यभिचाराव्याप्यत्वासिद्धत्वाद्वा न ताभ्यां तदनुमानमित्याह–धर्मेणेत्यादिना निरर्थका

नन्व प्रत्यक्षमात्रेण धर्मनिरासो नोपपद्यते, अतीन्द्रियस्यापि वस्तुनः सद्भावादित्याशङ्क्य बाधकतर्केण निराकरोति त्वद्विध इति । अतीन्द्रियोऽपि धर्मो यदि स्यात् तर्हि त्वद्विधो न विपद्यते । न चैवम्, तस्मान्नास्ति धर्म इत्यर्थः ॥ १६ ॥ एवं धर्ममात्रसद्भावे बाधकमभिधायेदानीं धर्माधर्मयोरुभयोरपि सद्भावे बाधकमाह–यद्यधर्म इति । यद्यधर्मो भूतो भवेद् सत्यो भवेत् तदा अधर्मयुक्तो रावणो नरकं व्रजेत् व्यसनं प्राप्नुयात् । न चैवं दृश्यते । धर्मयुक्तो धर्मेणैव युक्तो भवांश्च एवं व्यसनं नाप्नुयात् । न चैवं दृश्यते । तस्मात्फलान्वयव्यतिरेकाभावाद्धर्माधर्मौ न स्त इत्यर्थः ॥ १७ ॥ प्रतिनियतफलप्रदत्वाभावाद्धर्माधर्मौ न स्त इत्युक्त्वा फलविपर्यासेनापि तौ न स्त इत्याह–तस्य चेति । तस्याधर्मिष्ठस्य रावणस्य व्यसनाभावाद् व्यसनाभावशब्देन सुखं लक्ष्यते, सुखसद्भावादित्यर्थः । त्वयि च परमधार्मिके व्यसनं गते सति धर्मः अधर्मो भवति, अधर्मफलप्रदो भवति । चकारादधर्मोऽपि धर्मफलप्रदो भवतीति लभ्यते, अत एव परस्परविरोधिनौ प्रत्येकं शास्त्रप्रतिपन्नस्वभावाद्विरुद्धस्वभावावित्यर्थः । भवतीति वचनव्यत्ययः । धर्मोऽधर्मश्च परस्परविरोधिनौ भवत इत्यर्थः ॥ १८ ॥ अस्तु वा अनियमः, एतावता कथं नानुमातुं शक्यते ?

For Private And Personal Use Only

वित्यन्तेन । उपलभेदित्यत्र काकुः । धर्मेण धर्मानुष्ठानेन धर्मं धर्मफलं सुखम् उपलभेत् । अधर्मतः अधर्मानुष्ठानेन अधर्मफलं दुःखम् उपलभेत्, उपलभेतेति मन्यसे किमित्यर्थः । एवमनूद्य तत्र दूषणमाह–यदीति । येष्वधर्मः प्रतिष्ठितः, ये अधार्मिका इति यावत् । ते अधर्मेण अधर्मफलेन यदि युज्येयुः युज्येरन् । नाधर्मरुचयो जनाः, धर्मरुचय इति यावत् । "द्वौ नञौ प्रकृतमर्थं गमयतः" इति न्यायात् । ते धर्मेण धर्मफलेन यदि युज्येरन्, तदा धर्मेण चरतामेषां जनानां धर्मः धर्मफलं सुखं भवेत् । चकारात् अधर्मेण चरतां दुःखं भवेदिति सिद्धम् । न चैवमित्याह–यस्मादिति । अनेन

यदि धर्मेण युज्येरन्नाधर्मरुचयो जनाः । धर्मेण चरतां धर्मस्तथा चैषां फलं भवेत् ॥ २० ॥
यस्मादर्था विवर्धन्ते येष्वधर्मः प्रतिष्ठितः । क्लिश्यन्ते धर्मशीलाश्च तस्मादेतौ निरर्थकौ ॥ २१ ॥
वध्यन्ते पापकर्माणो यद्यधर्मेण राघव । वधकर्म हतोऽधर्मः स हतः कं वधिष्यति ॥ २२ ॥

च हिताहितप्राप्तिलक्षणकार्ययोरनियतत्वेन व्याप्त्यभावान्न ताभ्यां धर्माधर्मावनुमातुं शक्याविति व्याप्यत्वासिद्धिर्व्यभिचारो वा दर्शितः ॥ १९–२१ ॥ शब्दोऽपि न धर्माधर्मयोः प्रमाणमित्याह–वध्यन्त इति । हे राघव ! पापकर्माणः पापिनः । अधर्मेण कर्मरूपेण । वध्यन्ते यदि बाध्यन्ते चेत् । वधकर्म वधकर्मरूपोऽधर्मः । धर्मस्याप्युपलक्षणम् । हतः त्रिक्षणावस्थायित्वेन ध्वस्तो भवति । शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वात् । हतः सः कं वधिष्यति

इत्याशङ्क्य व्याप्तिभङ्गादित्याह–धर्मेणोपलभेदित्यादिना । उपलभेदित्यत्र काकुरनुसन्धेया । धर्मेण धर्मानुष्ठानेन । धर्मं धर्मफलं सुखमुपलभेत अधर्मतः अधर्मानुष्ठानतः अधर्ममधर्मफलं दुःखमुपलभेदिति मन्यसे किमित्यर्थः । एवमस्तु किमित्याशङ्क्य एतन्न सम्भवतीति दूषयितुं सार्धश्लोकेनोक्तमेवानूद्यैकेन श्लोकेन दूषयति–यद्यधर्मेणेत्यादिना । येष्वधर्मः प्रतिष्ठितः ते अधर्मेण अधर्मफलेन युज्येयुर्यदि नाधर्मरुचयो जनाः अधर्मरुचयो न भवन्तीति नाधर्मरुचयः, धार्मिष्ठ जना इति यावत् । ते धर्मेण धर्मफलेन युज्येरन् यदि तथा धर्मेण चरतामेषां जनानां धर्मः धर्मफलं भवेत् सुखं भवेत् । चकाराद्धर्मेण चरतां दुःखफलं भवेत ॥ १९ ॥ २० ॥ न चैवं दृश्यत इत्याह–यस्मादिति । येष्वधर्मः प्रतिष्ठितः, तेषामित्यध्याहार्यम् । अर्था विवर्धन्ते धर्मशीलाश्च क्लिश्यन्ते यस्मात्तस्मादेतौ निर ॥२५७॥
र्थकौ, अव्यवस्थितफलावित्यर्थः । अनेन हिताहितप्राप्तिलक्षणकार्ययोरनियतत्वेन व्याप्त्यभावान्न ताभ्यां धर्माधर्मावनुमातुं शक्याविति भावः ॥२१॥ किञ्च कर्म स्वरूपावेव धर्माधर्मौ कर्मजन्यातिशयौ वेति विकल्प्याद्यं दूषयति–वध्यन्त इत्यादिश्लोकद्वयेन । हे राघव ! पापकर्माणः पापिष्ठाः अधर्मेण कर्मस्वरूपेण वध्यन्ते यदि बाध्यन्ते चेत् वधकर्मस्वरूपाधर्मः हतः त्रिक्षणावस्थायित्वाद्धतस्सन् । सः कर्मस्वरूपाधर्मः कं वधिष्यति स्वयं हतः सन् कमपि न वधिष्यतीत्यर्थः ॥ २२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कं श्रेयसि नियोक्ष्यतीत्यपि द्रष्टव्यम् । धर्माधर्मयोः क्रियारूपयोः क्षणिकत्वेन कालान्तरभाविफलजनकत्वासम्भवात् बाधितविषयो वेदो ग्रावप्लवनादिवाक्यवदुपचरितार्थक इति भावः ॥ २२ ॥ कर्मणः क्षणध्वंसित्वेऽपि तदाराधिता देवतैव फलप्रदेत्यत्राह–अथवेति । विहितेन विधिना, देवतयेत्यर्थः । अयं जनः । हन्यते बाध्यते । परम् अन्यम् । हन्ति या बाधते वा । एवं यदि तेन पापेन कर्मणा पापफलभूतदुःखेन विधिरेव आलिप्यते सम्बध्यते । सः प्रयोज्यकर्ता नालिप्यते । अस्य न्यायस्य पुण्यकर्मण्यपि तुल्यत्वात् सुखेनापि प्रयोज्यो न सम्बध्यते । यदि हि सत्कर्माराधितः असत्कर्मप्रीतो वा ईश्वरः धर्माधर्मशब्दवाच्यः स्यात्, तर्हि स एव सुखदुःखभागी कारयिता स्यात् । न तु प्रयोज्य इति भावः ॥ २३ ॥ ननु यथा स्वतन्त्रो राजा लीलार्थं कामपि

अथवा विहितेनायं हन्यते हन्ति वा परम् । विधिरालिप्यते तेन न स पापेन कर्मणा ॥ २३ ॥
अदृष्टप्रतिकारेण त्वव्यक्तेनासता सता । कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्शन ॥ २४ ॥

मर्यादां प्रवर्त्य तदनुवर्तिनमनुगृह्णाति तदतिलङ्घिनं निगृह्णाति च, तथेश्वरोऽपि स्वाज्ञारूपकर्मानुष्ठायिनमनुगृह्णाति । तदननुष्ठायिनं विपरीतानुष्ठायिनं च निगृह्णातीति चेन्न । स हि किं स्वार्थमनुगृह्णाति उत परार्थम् ? नाद्यः–अवाप्तसमस्तकामस्यावाप्तव्याभावात् । न द्वितीयः–कञ्चन विरिञ्चनं कञ्चनाकिञ्चनं च वितन्वतस्तस्य पक्षपातनैर्घृण्यापत्तेः । तत्तत्कर्मानुगुणतया सृष्टेर्न पक्षपातादिप्रसक्तिरिति चेन्न । समीचीने कर्मण्यप्रवर्तयतस्तस्य सर्वज्ञस्य निर्दयत्वापत्तेः । अनादिकर्मप्रवाहकृतपूर्वपूर्वकर्मानुगुण्येन पुनः पुनः सदसतोः कर्मणोः पुरुषं प्रवर्तयतीति चेत्, तर्हि कस्यचिन्नियमेन दुःखं कस्यचिन्नियमेन सुखं च स्यात् । नच तथा दृश्यते, अनियमदर्शनात् । तर्हि कर्मजन्योऽपूर्वरूपोऽतिशयः फलप्रदो धर्म इत्याशङ्क्याह–अदृष्टेति । हे अरिविकर्शन ! प्रतिक्रियते परप्रतिपत्तिर्जन्यत इति प्रतिकारो लिङ्गम् । अदृष्टप्रतिकारेण अदृष्टलिङ्गेन, अनुमानागम्येनेत्यर्थः । अव्यक्तेन अप्रत्यक्षेण । असता सता

कर्मणः पाक्षिकतया फलप्रदत्वं मा भूत् सदसत्कर्मकारयितृसाक्षिभूतं दैवं दास्यतीत्याशङ्कामनूद्य परिहरति–अथवेति । विहितेन विधिना कारयित्रा दैवेनेत्यर्थः । अयं जनः हन्यते बाध्यते । अपरं हन्ति वा बाधते वा तेन पापेन कर्मणा पापफलदुःखेन विधिरेवालिप्यते सम्बध्यते न स प्रयोज्यकर्ता आलिप्यते अस्य न्यायस्य पुण्यकर्मण्यपि तुल्यत्वात्सुखेनापि प्रयोज्यकर्ता न सम्बध्यते, अतः कर्मस्वरूपस्याधर्मत्वं च न सम्भवतीत्यर्थः ॥ २३ ॥ कर्मजन्यातिशयरूपो धर्मः श्रेयस्साधन इति द्वितीयपक्षे स्वतन्त्र एव श्रेयो जनयति, उत परापेक्षयेति द्वेधा विकल्प्य आद्यं दूषयति–अदृष्टेति । प्रतिक्रियते प्रतिपाद्यते इति प्रतिकारं फलम् अदृष्टप्रतिकारेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

असद्भूतेन अग्नीन्द्रादिवदर्थवादवाक्येनागम्येन । धर्मेण अपूर्वाख्येन परं श्रेयः कथं प्राप्तुं शक्यम् ? न शक्यमित्यर्थः ॥ २४ ॥ उक्तमेवार्थं पुनस्तर्केण दृढीकरोति–यदीति । हे सतां मुख्य ! यदि सत् स्यात्, धर्माख्यं वस्त्विति शेषः । धार्मिकस्य तव असत् अनिष्टम् किंचन न स्यात् । तर्कस्य विपर्यये पर्यवसानमाह त्वयेति । यत् यस्मात्कारणात्, त्वया ईदृशं दुःसहं व्यसनं प्राप्तम्, तस्मात्सन्नोपपद्यते । असदेव भवतीत्यर्थः । कार्यानुपलम्भादपूर्वाख्य धर्मो न कल्प्य इत्यर्थः ॥ २५ ॥ ननु न कार्यानुपलम्भमात्रादर्थस्याभावो निश्चेतुं शक्यः, अतीन्द्रियोच्छेदापत्तेः । किन्तु सहकारिसम्पत्तौ सत्यां

यदि सत् स्यात् सतां मुख्य नासत् स्यात्तव किंचन । त्वया यदीदृशं प्राप्तं तस्मात् सन्नोपपद्यते ॥ २५ ॥
अथवा दुर्बलः क्लीबो बलं धर्मोऽनुवर्तते । दुर्बलो हृतमर्यादो न सेव्य इति मे मतिः ॥ २६ ॥
बलस्य यदि चेद्धर्मो गुणभूतः पराक्रमे । धर्ममुत्सृज्य वर्तस्व यथा धर्मे तथा बले ॥ २७ ॥

कार्यानुपलम्भः कारणत्वाभावं साधयति । सहकारि च पौरुषम् । अतस्तदभावात्फलानुदय इत्यत आह–अथवेति । दुर्बलः बलरहितः निरपेक्षतया कार्याक्षमः । अत एव क्लीबः कातरः स्वतः कार्यकरणासमर्थः । धर्मः बलमनुवर्तते, कार्योत्पादने पौरुषमपेक्षत इत्यर्थः । एवं चेद्दुर्बलो हृतमर्यादः स्वात न्त्र्येण फलप्रदत्वमर्यादाहीनो धर्मः प्राधान्येन न सेव्य इति मे मतिः ॥ २६ ॥ प्रधानभूतं बलमेवाश्रयणीयमित्याह–बलस्येति । पराक्रमे कार्यसाधने विषये, बलस्य धर्मः गुणभूतो यदि चेत् उपसर्जनभूतो यदि स्यात्, तदा यथेदानीं धर्मे वर्तसे, तथा धर्ममुत्सृज्य धर्मप्राधान्यमुत्सृज्य, धर्म इव बलेऽपि

अप्रत्यक्षफलेन अव्यक्तेन स्वयमप्रत्यक्षेण असता सता असद्भूतेन धर्मेण परं श्रेयः कथं प्राप्तुं शक्यम्, न शक्यमित्यर्थः ॥ २४ ॥ तदेवासत्त्वं विपक्षे बाधकतर्कप्रदर्शनमुखेनापि दृढीकरोति–यदीत्यादिना । भो सतां मुख्य ! यदि सत्स्यात् धर्माख्यवस्त्विति शेषः । तर्हि धर्मिष्ठस्य तव असत् अनिष्टम् किंचन न स्यात् । तर्कस्य विपर्यये पर्यवसानमाह त्वयेति । यत् यस्मात्त्वया ईदृशं दुस्सहं व्यसनं प्राप्तम् तस्मान्नोपपद्यते, असन्नेव सदित्यर्थः ॥ २५ ॥ धर्मः पौरुषमाश्रित्यैव फलं प्रयच्छतीत्याशङ्कामनूद्य परिहरति–अथवेति । दुर्बलः बलरहितः अत एव क्लीबः कातरः स्वतः कार्यकरणासमर्थ इति यावत् । धर्मः बलमनुवर्तते, कार्योत्पादने पौरुषं प्रतीक्षत इत्यर्थः । एवं चेद् दुर्बलो हृतमर्यादः धर्मः हितमेव साधयतीत्येताद्दशमर्यादारहितः न सेव्य इति मे मतिरिति योजना ॥ २६ ॥ उपसर्जनभूतं धर्ममुत्सृज्य प्रधानभूतं बलमेवाश्रयणीयमित्याह–बलस्येति । बलस्य धर्मो गुणभूतः उपसर्जनभूतो यदि स्यात्तदा यथेदानीं धर्मे वर्तसे तथा धर्ममुत्सृज्य बले बलसाध्ये पराक्रमे वर्तस्वेत्यन्वयः ॥ २७ ॥ ॥२५८॥

वर्तस्व ॥ २७ ॥ एवं सामान्येन धर्मे दूषितेऽपि सत्यवचनरूपधर्मविशेषस्य रामेण प्राधान्येनानुरोधात्तत्पृथक् दूषयति–अथेति । हे परंतप ! सत्यवचनं धर्मः किल । अथ चेदेवं चेत्, अनृतः त्वामभिषेक्ष्यामीत्युक्त्वा तदकरणेन सत्यत्वरहितः । अनृतमिति पाठे वदन्निति शेषः । त्वयि सकलकल्याण गुणाश्रये ज्येष्ठपुत्रे अकरुणः राज्याद्वनं प्रति निष्कासनान्निर्दयः अतो बन्धयोग्यः पिता त्वया पितृवचनं कारिष्यामीति कृतप्रतिज्ञेन त्वया किन्न बद्धः किं न नियमितः ? सर्वप्रजासन्निधौ राममभिषेक्ष्यामीत्युक्तं प्राथमिकं पितृवचनं परित्यज्य पाश्चात्यं वनगमनविषयं पितृवचनं कारिष्यामीति कृतप्रतिज्ञेन

अथ चेत् सत्यवचनं धर्मः किल परन्तप । अनृतस्त्वय्यकरुणः किं न बद्धस्त्वया पिता ॥ २८ ॥
यदि धर्मो भवेद्भूतो अधर्मो वा परन्तप । न स्म हत्वा मुनिं वज्री कुर्यादिज्यां शतक्रतुः ॥ २९ ॥

त्वया पालयता सत्यवचनमपि सम्यक् न पालितमिति भावः ॥२८॥ धर्माधर्मयोः सद्भावेऽपि राज्ञा धर्मोऽधर्मो वा नियमेन नानुष्ठातव्यः, किन्तु तत्तत्काल प्रयोजनानुगुण्येनोभावपि कर्तव्यावित्यत्र शिष्टाचारं प्रमाणयति–यदीति । भूतो अधर्मो वेत्यत्र वृत्तानुरोधाय सन्ध्यभावः । यदि धर्मो भवेद्भूतः । यदि केवलं धर्म एवानुष्ठेयत्वेन प्राप्तो भवेत्, तदा वज्री शतक्रतुः मुनिं विश्वरूपं हत्वा इज्यां न कुर्यात्, किन्त्विज्यामेव कुर्यात् । अधर्मो वा केवलमधर्मो वा यद्यनुष्ठेयः स्यात्, तदा शतक्रतुः वज्री मुनिं हत्वा इज्यां न कुर्यात्, किंतु हननमेव कुर्यात् । क्षत्रधर्मनिष्ठेनेन्द्रेण धर्माधर्मयोरनुष्ठितत्वाद्राज्ञा

ननु सर्वोऽपि न धर्मो भवति, किन्तु तत्रैकदेशस्सत्यं धर्मः तस्मान्मया वने वत्स्यामीति पितरि प्रतिज्ञातं सत्यवचनमनुष्ठेयं तदर्थमेवमनुभूतमिति सत्याभिनिवेशिनं रामं प्रति धर्ममात्रसाधर्म्ये दूषितेऽपि सत्यवचनस्यापि धर्मतां सार्थक्येन निराकरोति–अथ चेदिति । हे परंतप ! सत्यवचनं धर्मः किल । अथचेदेवं चेत् अनृतः त्वामभिषेक्ष्यामीत्युक्त्वा तदकरणेन सत्यरहितः त्वयि सद्गुणाश्रये ज्येष्ठपुत्रे त्वयि अकरुणः राज्याद्वनं प्रति निष्कासनमकारुण्यम् अतो बन्धयोग्यः पिता त्वया पितृवचनं करिष्यामीति कृतप्रतिज्ञेन किं न बद्धः किमर्थं न नियमितः, सर्वप्रजासन्निधौ राममभिषेक्ष्यामीत्युक्तं प्राथमिकं पितृवचनं परित्यज्य पश्चाद्वनगमन विषयं पितृवचनं करिष्यामीति पालयता त्वया न सत्यवचनमपि सम्यक्परिपालितमिति भावः । अनृतमिति पाठे–अनृतं त्वयि वदन्निति शेषः॥२८॥ धर्माधर्मयोस्सद्भावेऽपि राज्ञा धर्मो वा अधर्मो वा न नियमेनानुष्ठातव्यः, किन्तु तत्तत्कालप्रयोजनानुगुण्येनोभावपि कर्तव्याविस्यत्र शिष्टाचरणं प्रमाणयति–यदीति । यदि धर्मो भवेद् भूतः केवलं धर्म एव अनुष्ठेयत्वेन प्राप्तो भवेत्तर्हि वज्री शतक्रतुः मुनिं विश्वरूपं हत्वा इज्यां न कुर्यात् किन्तु हननमकृत्वा इज्यामेव कुर्यात् । अधर्मो वा केवलमधर्मो वा यद्यनुष्ठेयः स्यात् तर्हि शतक्रतुर्वज्री मुनिं हत्वा इज्यां न कुर्यात् किन्तु हननमेव कुर्यात्, क्षत्रधर्मनिष्ठेनेन्द्रेण धर्माधर्मयोरुभयोरप्यनुष्ठितत्वाद्राज्ञा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथाकालमुभयमपि कर्तव्यमिति भावः। "यान्येतानि देवक्षत्राणीन्द्रो वरुणः पर्जन्यो यम ईशानः" इतीन्द्रस्य क्षत्रियत्वं श्रूयते ॥ २९ ॥ इदानीमभ्युपगमवादेनैकान्ततो धर्माधर्मयोरेकस्याश्रयणमनर्थपर्यवसायीत्याह-अधर्मेति। अधर्मसंश्रितो धर्मः अधर्मसहितो धर्मः, धर्मश्चाधर्मश्चेत्यर्थः। विनाशयति, कर्तारमिति शेषः। नियमेन पृथक्पृथगनुष्ठीयमानौ धर्माधर्मौ कर्तारं विनाशयतः। अत एवैतत्सर्वं धर्माधर्मात्मकं सर्वं कर्मजातम् यथाकामं तत्तत्कालोचितम् अनियमेन नरः कुरुते, कुर्यादित्यर्थः ॥ ३० ॥ अस्मिन्नर्थे न मे सन्देह इत्याह-ममेति। हे तात अनुकम्प्य! "तातोऽनुकम्प्ये

अधर्मसंश्रितो धर्मो विनाशयति राघव। सर्वमेतद्यथाकामं काकुत्स्थ कुरुते नरः ॥ ३० ॥
मम चेदं मतं तात धर्मोऽयमिति राघव। धर्ममूलं त्वया छिन्नं राज्यमुत्सृजता तदा ॥ ३१ ॥
अर्थेभ्यो हि विवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः। क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः ॥ ३२ ॥
अर्थेन हि वियुक्तस्य पुरुषस्याल्पतेजसः। व्युच्छिद्यन्ते क्रियाः सर्वा ग्रीष्मे कुसरितो यथा ॥ ३३ ॥

पितरि" इति रत्नमाला। इदं याथाकाम्येनाचरणं यदस्ति अयं धर्म इति मम मतं सिद्धान्त इत्यर्थः। एवं प्रथमं धर्म एवाप्रामाणिक इत्युक्तम्। पश्चात् कथञ्चित् प्रामाणिकत्वसम्भवेऽपि न तस्य प्राधान्यमित्युक्तम्। इदानीमप्राधान्येनापि धर्मस्तव न सम्भवति, मूलाभावादित्याह धर्ममूलमित्यादिना। धर्मस्य मूलं कारणम् अर्थरूपम्, तदा प्राप्तकाले, राज्यमुत्सृजता त्वया छिन्नम्। मूलच्छेदात्तव कथं धर्म इत्यर्थः ॥ ३१ ॥ तदेव धर्ममूलत्वमर्थस्य प्रतिपादयति-अर्थेभ्य इति। ततस्ततः प्रजापालनाय प्रदेयषड्भागकरप्रदानादिकारणात् संवृत्तेभ्यः प्राप्तेभ्यः क्रमाद्विवृद्धेभ्यः अर्थेभ्यः सर्वाः क्रियाः यज्ञदानादिक्रियाः प्रवर्तन्ते। पर्वतेभ्य इत्युपमानेन मूलधनव्ययमकृत्वैवार्थमूलतया दानादिक्रियाः कार्या इत्युक्तम् ॥ ३२ ॥ व्यतिरेकमुखेनापि

यथाकालमुभयमपि कर्तव्यमिति भावः ॥ २९ ॥ इदानीं धर्माधर्मयोरेकतरस्याश्रयणमनर्थपर्यवसायीत्याह-अधर्मसंश्रित इति। अधर्मसंश्रितो धर्मः अधर्मसहितो धर्मः, धर्मश्चाधर्मश्चेत्यर्थः। विनाशयति, कर्तारमिति शेषः। नियमेन पृथक्पृथगनुष्ठीयमानौ धर्माधर्मौ विनाशयतः, कर्तारमित्यर्थः। अत एवैतत्सर्वं धर्माधर्मात्मकं कर्मजातं यथाकामं तत्तत्कालोचितम् अनियमेन नरः कुरुते, कुर्यादित्यर्थः ॥ ३० ॥ एतदेव मम धर्मत्वेन मतमित्याह-ममेति। इदं याथाकाम्येनोभयाचरणं यत् अयमेव धर्म इति मम मतमित्यर्थः। इदानीमर्थस्य श्रेयोहेतुत्वं केवलं प्रतिपादयन् केवलं धर्म एवाचरणीय इति मन्वानेन त्वया तन्मूलमेव छिन्नमित्याह धर्ममूलमिति। तदा तस्मिन्नेव वनवासारम्भकाल एव धर्मस्य मूलं कारणम्, अर्थात्मकमिति शेषः ॥ ३१ ॥ तदेव धर्ममूलत्वमर्थस्य प्रतिपादयति-अर्थेभ्य इति। ॥२५९॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तदेव प्रतिपादयति–अर्थेनेत्यादिना । कुसरितः अल्पसरितः ॥ ३३ ॥ न केवलमर्थपरित्यागेन धर्मासम्भवः, किंतु दोषप्राप्तिरपीत्याह-सोऽयमिति । सुखेधितः पूर्वं सुखेन संवर्धितः, सोऽयम् अर्थपरित्यागी अर्थं प्राप्तं परित्यज्य सुखकामः सन्, पापम् अन्यायेनार्थार्जनम् सुखसाधनभूतधन सम्पादनार्थं स्तेयादिपापम् आरभते । ततः तेन कर्मणा दोषः प्रवर्तत इत्यर्थः ॥ ३४ ॥ यस्यार्थास्तस्य मित्राणीत्यादिश्लोकद्वयं क्वचित्पठ्यते ।

सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः। पापमारभते कर्तुं ततो दोषः प्रवर्तते ॥ ३४ ॥ यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः। यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥ ३५ ॥ यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान् । यस्यार्थाः स महाभागो यस्यार्थाः स महागुणः ॥ ३६ ॥ अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया। राज्यमुत्सृजता वीर येन बुद्धिस्त्वया कृता ॥ ३७ ॥ यस्यार्थो धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम्। अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥ ३८ ॥

पुमान् पुंस्त्ववान् । अन्यः स्त्रीप्राय इत्यर्थः । महाभागः महाभाग्यः । महागुणः शीलादिगुणवान् ॥ ३५ ॥ ३६ ॥ अर्थस्येति । अर्थस्य परित्यागे एते पूर्वोक्तगुणप्रतियोगिनो निर्मित्रत्वादयो दोषाः, प्रव्याहृताः स्पष्टमुक्ताः । राज्यमुत्सृजता त्वया येन गुणेन बुद्धिः अर्थपरित्यागविषया कृता तं गुणं न जान इत्यर्थः । यद्वा राज्यमुत्सृजता त्वया येन कारणेनार्थपरित्यागे बुद्धिः कृता तेन कारणेन एते दोषाः मया प्रव्याहृता इत्यर्थः ॥ ३७ ॥ यस्येति । धर्मकामार्थाः धर्मकामप्रयोजनानि । प्रदक्षिणम् अनुकूलम् । प्रतिष्ठितमिति वा पाठः। व्यतिरेकमुखेनाप्याह–अधनेनेति । अधनेन धनं विना अर्थकामेनापि । विचिन्वता अर्थार्जनव्यापारं कुर्वता पुरुषेण । अर्थः श्रेयः । न शक्यं न साधयितुं शक्यम् । अव्ययमेतत् । " शक्यमरविन्दसुरभि "

संवृत्तेभ्यः संप्राप्तेभ्यः । क्रियाः धर्ममूलभूतक्रियाः ॥ ३२ ॥ ३३ ॥ न केवलमर्थपरित्यागे धर्माभावः, किन्तु दोषप्राप्तिरपीत्याह–सोऽयमिति । सोऽयमर्थपरित्यागी अर्थं परित्यज्य प्राप्तमैश्वर्यं त्यक्त्वा सुखैधितः । पापमनार्जवम् । ततः तेन पापेन दोषः प्रवर्तते ॥ ३४–३६ ॥ अर्थस्य परित्यागे एते दोषाः प्रव्याहृताः स्पष्टमुक्ताः, राज्यमुत्सृजता त्वया येन गुणेन बुद्धिः अर्थपरित्यागविषया कृता, तन्न जान इति शेषः ॥ ३७ ॥ प्रदक्षिणम् अनुकूलम्। अर्थकामेन श्रेयोर्थिना, अर्थः श्रेयः ॥३८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति प्रयोगात् ॥ ३८ ॥ न केवलमर्थकामावेव धनमूलौ, अन्येऽपि तथेत्याह–हर्ष इति । प्रवर्तन्ते प्रकृष्टानि वर्तन्ते, शोभन्त इत्यर्थः । असतो निर्धनस्य शमदमौ हि धनलाभे निवर्तेते ॥ ३९ ॥ न केवलमामुष्मिकश्रेयःसाधनभूतोऽर्थः, किन्तु ऐहिकश्रेयःसाधनं चेति व्यतिरेकमुखेन प्रतिपादयन् तादृशो ऽर्थस्त्वयि नास्तीत्याह–येषामिति । येषां चरतामित्यनादरे षष्ठी । येषां चरतां यान् चरतो विद्यमानानर्थाननादृत्य धर्मचारिणां केवलं धर्ममाचरताम्

हर्षः कामश्च दर्पश्च धर्मः क्रोधः शमो दमः । अर्थादेतानि सर्वाणि प्रवर्तन्ते नराधिप ॥ ३९ ॥
येषां नश्यत्ययं लोकश्चरतां धर्मचारिणाम् । तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः ॥ ४० ॥
त्वयि प्रव्राजिते वीर गुरोश्च वचने स्थिते । रक्षसाऽपहृता भार्या प्राणैः प्रियतरा तव ॥ ४१ ॥
तदद्य विपुलं वीर दुःखमिन्द्रजिता कृतम् । कर्मणा व्यपनेष्यामि तस्मादुत्तिष्ठ राघव ॥ ४२ ॥

अयं लोको नश्यति, ऐहिकसुखं नास्तीत्यर्थः । ते तादृशाः सुखसाधनभूताः अर्थाः दुर्दिनेषु मेघच्छन्नदिनेषु । "मेघच्छन्नेऽह्नि दुर्दिनम्" इत्यमरः । सूर्यादयो ग्रहाः यथा न दृश्यन्ते, तथा त्वयि न दृश्यन्ते । सकलश्रेयःसाधनभूता अर्थास्त्वया नादृता इत्यर्थः ॥ ४० ॥ अर्थहेतुभूतराज्यपरित्यागेन पितृवचनपरिपालनरूपकेवलधर्मावलम्बनेन च प्राप्तं दोषमाह–त्वयीति । प्राणैः प्राणेभ्यः । प्राणैस्तुल्यं प्रियतरेति वाऽर्थः ॥४१॥ एवं गते किं करणीय मित्यत्राह–तदद्येति । भवत्कर्मणा प्राप्तं दुःखं मत्कर्मणा व्यपनेष्यामीत्यर्थः । कृतप्रतिक्रियया तद्दुःखं निवारयिष्यामीति भावः ॥ ४२ ॥

प्रवर्तन्ते शोभन्ते इत्यर्थः ॥ ३९ ॥ न केवलमामुष्मिकश्रेयस्साधनभूतोऽर्थः, किन्तु ऐहिकश्रेयस्साधनभूतोऽपीति व्यतिरेकं प्रतिपादयन् तादृशोऽर्थस्त्वयि नास्तीत्याह–येषामिति । चरतामित्यनादरे षष्ठी । येषां चरताम् यान् चरतः पुरतो विद्यमानानर्थान् अनादृत्य धर्मचारिणां धर्ममाचरतां पुरुषाणाम् अयं लोको नश्यति ऐहिकसुखं नास्तीत्यर्थः । एतादृशैहिकसुखसाधनभूतार्थाः दुर्दिनेषु ग्रहा यथा तथा त्वयि न दृश्यन्ते सकलश्रेयस्साधनभूतार्थास्त्वया नादृता इत्यर्थः ॥ ४० ॥ अर्थपरित्यागेन धर्मं चरतामनर्थो भवतीत्यस्मिन पक्षे रघुनाथमेव दृष्टान्तयति–त्वयीति । प्राणैः प्राणेभ्यः ॥ ४१ ॥ तद्विपुलं दुःखं कर्मणा व्यप

स०–चरतां "चर गतिभक्षणयोः" गत्यर्थानां ज्ञानार्थत्वाज्ज्ञानिनाम् । धर्मचारिणामपि तेषामृष्यादिजनानां येषामर्थानामभावादयं लोकः ऐहिकसुखं नश्यति, तेऽर्थास्त्वय्यपि न दृश्यन्ते । चरतां भक्षयतां राक्षसानाम् अयं लोको जनः धर्मचारिणां तेषां येभ्यो नश्यति तेऽर्थास्त्वयि न दृश्यन्त इति वा । दुर्दिनं मेघच्छन्नदिनम् ॥ ४० ॥ राज्यत्यागाचातुर्यमूलमेतदित्याह–त्वयीति ॥ ४१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एवं भक्तिवादानुक्त्वा क्षमापणं विदधाति–उत्तिष्ठेति । आत्मानं स्वम् । महात्मानम् महाबुद्धिम् । आत्मानं परमात्मानम् । किं नावबुध्यसे ? तस्मात् भवतः शोककारणं नास्तीति हृदयम् ॥४३॥ अयमिति । अयम् अहं तव विधेयत्वेन सन्निहितः, तव प्रियार्थम् उदितः उद्युक्तः उत्पन्नो वा । अनेन दुःखं व्यपनेष्यामीत्येतद्विवृतम् ॥ ४४ ॥ इति श्रीगोविन्दराज० श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्यशीतितमः सर्गः ॥ ८३ ॥

उत्तिष्ठ नरशार्दूल दीर्घबाहो दृढव्रत । किमात्मानं महात्मानमात्मानं नावबुध्यसे ॥ ४३ ॥ अयमनघ तवोदितः प्रियार्थं जनकसुतानिधनं निरीक्ष्य रुष्टः । सहयगजरथां सराक्षसेन्द्रां भृशमिषुभिर्विनिपातयामि लङ्काम् ॥४४॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्र्यशीतितमः सर्गः ॥ ८३ ॥

रामभाश्वासयाने तु लक्ष्मणे भ्रातृवत्सले । निक्षिप्य गुल्मान् स्वस्थाने तत्रागच्छद्विभीषणः ॥ १ ॥
नानाप्रहरणैर्वीरैश्चतुर्भिः सचिवैर्वृतः । नीलाञ्जनचयाकारैर्मातङ्गैरिव यूथपः ॥ २ ॥
सोऽभिगम्य महात्मानं राघवं शोकलालसम् । वानरांश्चैव ददृशे बाष्पपर्याकुलेक्षणान् ॥ ३ ॥

अथेन्द्रजिद्वधोपायदर्शनम्–राममाश्वासयान इत्यादि । आश्वासयाने आश्वासयमाने । आगमशासनस्यानित्यत्वान्मुगभावः । अनेन पूर्वोक्तवादा भ्रातृवात्सल्यात्तदाश्वासनार्थाः, न तु परमार्था इत्युक्तम् । पूर्वोक्तयुक्तिपरिहारस्तु "हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्" इतिमनूक्तरीत्या प्रेक्षणीयः । गुल्मान् सेनासन्निवेशान् । स्वस्थाने स्वकार्यकरणार्थम् ॥ १ ॥ २ ॥ सोऽभिगम्येति । अत्र राघवपदं लक्ष्मणपरम् । उत्तरश्लोके रामदर्शनस्य वक्ष्यमाण

नेष्यामि भवत्कर्मणा प्राप्तं दुःखं मच्छौर्यकर्मणा व्यपनेष्यामीत्यर्थः ॥ ४२ ॥ आत्मानं परमात्मानम् ॥ ४३ ॥ सीतानिधनश्रवणजनितदुःखार्दितोऽहम् इतःपरं किमपि कर्तुं न शक्नोमीत्याशङ्क्य तर्ह्यहमेव करिष्यामि मां नियोजयेत्याशयेनाह–अयमिति । अयमहं तव प्रियार्थमुदितः उत्पन्नः, त्वन्नियोजितकार्यं कर्तुमेवाहमुत्पन्न इत्यर्थः । अतः जनकसुतानिधनं निरीक्ष्य रुष्टस्सन् लङ्कां विनिपातयामीत्यर्थः । यद्वा सकलशास्त्रतत्त्वज्ञस्त्वं किमर्थमेवं धर्माधर्मखण्डनं करोषि, शक्तश्चेच्छौर्यं प्रदर्शयेत्यत आह–अयमिति । जनकसुतानिधनं निरीक्ष्य रुष्टस्सन् अयमहं धर्माधर्मखण्डनरूपमर्थम् उदितः उक्तवानस्मि, इतःपरं तव प्रियार्थं तव प्रिया या सीता तदर्थं सीतानिधनप्रतिकारार्थं लङ्कां विनिपातयामीत्यर्थः ॥ ४४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्र्यशीतितमः सर्गः ॥ ८३ ॥ राममिति । आश्वासयाने आश्वासयमाने ॥ १–११ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वात् । ददृशे ददर्श ॥३॥४॥ सः विभीषणः रामं दृष्ट्वा दीनात्मा दीनमनस्कः सन्, अन्तर्दुःखेन अबहिःप्रकटितदुःखविकारेण उपलक्षितः सन् अब्रवीत॥५॥ लक्ष्मणोवाचेत्यत्र छान्दसः सुलोपः । मन्दार्थम् अल्पार्थम्, संगृहीतार्थमित्यर्थः ॥ ६॥ ७ ॥ कथयन्तमित्यर्थम् । मध्ये निवारणोक्तिः सर्वस्य वृत्तान्तस्य

राघवं च महात्मानमिक्ष्वाकुकुलनन्दनम् । ददर्श मोहमापन्नं लक्ष्मणस्याङ्कमाश्रितम् ॥ ४ ॥ व्रीडितं शोकसन्तप्तं दृष्ट्वा रामं विभीषणः । अन्तर्दुःखेन दीनात्मा किमेतदिति सोऽब्रवीत् ॥ ५ ॥ विभीषणमुखं दृष्ट्वा सुग्रीवं तांश्च वानरान् । लक्ष्मणोवाच मन्दार्थमिदं बाष्पपरिप्लुतः ॥६॥ हतामिन्द्रजिता सीतामिह श्रुत्वैव राघवः । हनुमद्वचनात् सौम्य ततो मोहमुपागतः ॥ ७ ॥ कथयन्तं तु सौमित्रिं सन्निवार्य विभीषणः+ ॥८॥ मनुजेन्द्रार्तरूपेण यदुक्तं च हनूमता । तदयुक्तमहं मन्ये सागरस्येव शोषणम् ॥ ९ ॥ अभिप्रायं तु जानामि रावणस्य दुरात्मनः । सीतां प्रति महाबाहो न च घातं करिष्यति ॥ १० ॥ याच्यमानस्तु बहुशो मया हितचिकीर्षुणा । वैदेहीमुत्सृजस्वेति न च तत् कृतवान् वचः ॥ ११ ॥ नैव साम्ना न दानेन न भेदेन कुतो युधा । सा द्रष्टुमपि शक्येत नैव चान्येन केनचित्*॥ १२ ॥

स्वेनावगतत्वात् । विभीषणः, उवाचेति शेषः ॥ ८ ॥ ९ ॥ अभिप्रायं त्विति । करिष्यति, रावण इति शेषः ॥ १० ॥ तत्र हेतुमाह–याच्यमान इत्यादिना ॥ ११ ॥ सा साम्ना द्रष्टुमपि नैव शक्येत । दानेनापि द्रष्टुं न शक्येत । भेदेनापि द्रष्टुं न शक्येत । युधा दण्डेन कुतो द्रष्टुमपि शक्येत । अन्येन नैवेति । अन्येन मायोपायेन, केनचिदपि पुरुषेणेत्यर्थः ॥ १२ ॥

स०–आर्तरूपेण दीनसदृशेन । सागरस्य शोषणम् अगस्त्यादिसमावेशाभावदशायां यथाऽयुक्तं तथेदमयुक्तं मन्ये ॥ ९ ॥ हता सीतेत्यभिहितं श्रुतवतो दुःखं कथय कथमयुक्तमित्यतो वक्ति–अभिप्रायमिति । सीतां प्रति तामुद्दिश्य दुरात्मनोऽपि रावणस्याभिप्रायं जानामि । कोऽसावभिप्राय इत्यत आह–न चेति । सीताया इति शेषः । सीतां प्रति सीताया घातं न च करिष्यतीति दुरात्मनो रावणस्याभिप्रायं जानामि, अद्य वा श्वो वाऽहमपि हतः स्यां न त्यजेयं जानकीं पाक्षिक्या दुराशयाऽपि दुराशयो न नाशयतीति तदभिप्रायं जानामीति भावः ॥ १० ॥ हे स्व स्वकीय ! भ्रातरिति यावत् । सीतामुत्सृजेति याच्यमानः नच तत् मयाचितप्रमेयकं वचः कृतवान् ॥ ११ ॥ सा तु स्वनिमित्तमशेषनक्तञ्चरनाशो माभूदित्येव रावणकरमहं प्राप्ता कुपिता चेत्सद्यो नाशयेदिति वक्तुं तद्गुणानाह–नैवेति । युधा युद्धेन । किंवन्तः । अन्येन केनापि वञ्चनाद्युपायेन । किञ्च सीता अन्येन केनापि केनाप्युपायेन द्रष्टुमेवाशक्या कुतस्तस्या हरणपूर्वकं वध इत्याहेति पद्यमवतारयता नागोजिभट्टेन समग्रं रामायणं द्वादशवारं श्रुतवतः सीताया रामस्य च कोऽनुबन्ध इति प्रश्न नीतिरुपार्जितेति सन्तोष्टव्यम् ॥ १२ ॥ ॥२६१॥

+ पुष्कलार्थमिदं वाक्यं विसंज्ञं राममब्रवीत् ॥ * मायामयीं महाबाहो तां विद्धि जनकात्मजाम् ॥ इतिचाधिकः पाठः ।

For Private And Personal Use Only

मायोपायेन केनाचिद्द्रष्टुमपि नैव शक्येत ॥ १२ ॥ कथं तर्हीन्द्रजिता हतेत्याशङ्क्य मायेयमित्याह-वानरानित्यादिना । मोहयित्वा, लङ्कायां स्वव्यतिरिक्तस्य योद्धुरभावात् स्वस्मिन् कर्मव्याकुले वानराः प्रहरेयुः यज्ञश्च विच्छिद्येत विच्छिन्ने च तस्मिन् ब्रह्मवरानुसारेण स्वस्य विनाशो भविष्यतीति

वानरान् मोहयित्वा तु प्रतियातः स राक्षसः । चैत्यं निकुम्भिलां नाम यत्र होमं करिष्यति ॥ १३ ॥ हुतवानुपयातो हि देवैरपि सवासवैः । दुराधर्षो भवत्येव सङ्ग्रामे रावणात्मजः ॥ १४ ॥ तेन मोहयता नूनमेषा माया प्रयोजिता । विघ्नमन्विच्छता तत्र वानराणां पराक्रमे ॥ १५ ॥ ससैन्यास्तत्र गच्छामो यावत्तन्न समाप्यते । त्यजेमं नरशार्दूल मिथ्या सन्तापमागतम् । सीदते हि बलं सर्वं दृष्ट्वा त्वां शोककर्शितम् ॥ १६ ॥ इह त्वं स्वस्थहृदयस्तिष्ठ सत्त्वसमुच्छ्रितः । लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः ॥ १७ ॥ एष तं नरशार्दूलो रावणिं निशितैः शरैः । त्याजयिष्यति तत् कर्म ततो वध्यो भविष्यति ॥ १८ ॥ तस्यैते निशितास्तीक्ष्णाः पत्रिपत्राङ्गवाजिनः । पतत्रिण इवासौम्याः शराः पास्यन्ति शोणितम् ॥ १९ ॥ तं सन्दिश महाबाहो लक्ष्मणं शुभलक्षणम् । राक्षसस्य विनाशाय वज्रं वज्रधरो यथा ॥ २० ॥ मनुजवर न कालविप्रकर्षो रिपुनिधनं प्रति यत् क्षमोऽद्य कर्तुम् । त्वमतिसृज रिपोर्वधाय वाणीममररिपोर्मथने यथा महेन्द्रः ॥ २१ ॥

मत्वा वञ्चनमिति भावः ॥ १३ ॥ १४ ॥ अन्विच्छता चिन्तयता ॥ १५ ॥ ससैन्या इत्यादि । तत् होमरूपं कर्म ॥ १६ ॥ इहेति । सैन्यानुकर्षिभिः सैन्यपालैः ॥ १७ ॥ तत् कर्म होमकर्म । णिजन्तत्वाद्द्विकर्मकत्वम् ॥ १८ ॥ एते लक्ष्मणीयाः । पत्रिपत्राणि पक्षिपक्षाः तेषामङ्गानि बर्हाणि तैः वाजिनः वेगवन्तः ॥ १९ ॥ २० ॥ यद्यस्मात्कारणात् रिपुनिधनं प्रति कालविप्रकर्षः कालविलम्बः अद्य कर्तुं न क्षमः । तत्तस्मात् त्वं रिपुवधाय

तर्हि कथं हननमित्याशङ्क्य तदिन्द्रजितो मायेत्याह-वानरानिति ॥ १३-१५ ॥ ससैन्या इति । तत होमकर्म ॥ १६ ॥ सैन्यानुकर्षिभिः सैन्यपालैः ॥ १७ ॥ तत्कर्म होमकर्म ॥ १८ ॥ पत्रिपत्राङ्गवाजिनः पत्रिपत्राणि पक्षिपक्षाः तेषामङ्गानि बर्हाणि तैर्वाजिनः पक्षवन्तः । पत्रिपत्राङ्गवाजिता इति पाठे-पत्रिणां पत्ररूपाङ्गैः सञ्जातवेगाः ॥१९॥२०॥ मनुजवरेति । यद्यस्मात्कारणात् रिपुनिधनं प्रति कालविप्रकर्षोऽद्य कर्तुं न क्षमः तस्मात्त्वं रिपोर्वधाय वाणीमतिसृजेत्यन्वयः ॥ २१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ब्राणीमतिसृज, आज्ञापयेत्यर्थः । यथा महेन्द्र इत्यापन्मात्रे दृष्टान्तः ॥ २१ ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नाकराख्याने युद्धकाण्डव्याख्याने चतुरशीतितमः सर्गः ॥ ८४ ॥

समाप्तकर्मा हि स राक्षसाधिपो भवत्यदृश्यः समरे सुरासुरैः । युयुत्सता तेन समाप्तकर्मणा भवेत् सुराणामपि संशयो महान् ॥ २२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुरशीतितमः सर्गः ॥ ८४ ॥

तस्य तद्वचनं श्रुत्वा राघवः शोककर्शितः । नोपधारयते व्यक्तं यदुक्तं तेन रक्षसा ॥ १ ॥ ततो धैर्यमवष्टभ्य रामः परपुरञ्जयः । विभीषणमुपासीनमुवाच कपिसन्निधौ ॥ २ ॥ नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण । भूयस्तच्छ्रोतुमिच्छामि ब्रूहि यत्ते विवक्षितम् ॥ ३ ॥ राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः । यत्तत्पुनरिदं वाक्यं बभाषे स विभीषणः ॥ ४ ॥ यथाज्ञप्तं महाबाहो त्वया गुल्मनिवेशनम् । तत्तथाऽनुष्ठितं वीर त्वद्वाक्यसमनन्तरम् ॥ ५ ॥ तान्यनीकानि सर्वाणि विभक्तानि समन्ततः । विन्यस्ता यूथपाश्चैव यथान्यायं विभागशः ॥ ६ ॥ भूयस्तु मम विज्ञाप्यं तच्छृणुष्व महायशः ॥ ७ ॥

अथेन्द्रजिद्वधाय लक्ष्मणनिर्गमनम्—तस्य तद्वचनमित्यादि । व्यक्तं नोपधारयते हृदि सम्यङ्निधातुं नाशकदित्यर्थः ॥ १ ॥ २ ॥ ते त्वया ॥ ३ ॥ यत्तत् पुनरिति । यद्वाक्यं पूर्वमुक्तवान् तदिदं पुनर्बभाष इत्यन्वयः ॥ ४ ॥ यथाज्ञप्तमित्याद्युक्तिः रामस्य व्याकुलत्वनिवारणाय ॥ ५–७ ॥

॥ २२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुरशीतितमः सर्गः ॥ ८४ ॥ १ ॥ तस्य इति । उपासीनं उपसमीपे ॥ २ ॥ ३ ॥ राघवस्येति । यद्वाक्यं पूर्वमुक्तवान् तदिदं पुनर्बभाष इति सम्बन्धः ॥ ४–१२ ॥

स०–प्रेष्यप्रेषणावश्यम्भावितासूचनाय पुनरुक्तीकरोति–**समाप्तकर्मे**ति । सुराणामपि संशयः प्राणसंशयः । पूर्वं सुरासुरैरिति प्रकृतत्वात्सुरासुराणां संशय इति वाच्यम्, तथापि केचिदेव देवपक्षिणोऽसुरा एतद्धेत्वाःतरे त्वेतत्कूटघटिता एवेति सुराणामित्येवोक्तमिति मन्तव्यम् ॥ २२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सन्तापं सन्तापं च। मिथ्येति शोकसन्तापयोर्विशेषणम्। सन्तापः शोककार्यमिति तयोर्भेदः ॥८॥ उद्यमः उत्साहः ॥९-१२॥ ब्रह्मशिरः ब्रह्मशिरःसंज्ञकमस्त्रम्। तुरङ्गमशब्दो रथस्याप्युपलक्षणम्। प्राप्तम्, होमद्वारेति शेषः ॥ १३ ॥ यदीति। यदि च निकुम्भिलाया उत्तिष्ठेत्, यदि कर्म कृतं स्यात्,

त्वय्यकारणसन्तप्ते सन्तप्तहृदया वयम्। त्यज राजन्निमं शोकं मिथ्या सन्तापमागतम् ॥ ८ ॥ तदियं त्यज्यतां चिन्ता शत्रुहर्षविवर्धनी। उद्यमः क्रियतां वीर हर्षः समुपसेव्यताम् ॥ ९ ॥ प्राप्तव्या यदि ते सीता हन्तव्याश्च निशाचराः। रघुनन्दन वक्ष्यामि श्रूयतां मे हितं वचः ॥ १० ॥ साध्वयं यातु सौमित्रिर्बलेन महता वृतः। निकुम्भिलायां सम्प्राप्य हन्तुं रावणिमाहवे॥ ११ ॥ धनुर्मण्डलनिर्मुक्तैराशीविषविषोपमैः। शरैर्हन्तुं महेष्वासो रावणिं समितिञ्जयः ॥ १२ ॥ तेन वीर्येण तपसा वरदानात् स्वयम्भुवः। अस्त्रं ब्रह्मशिरः प्राप्तं कामगाश्च तुरङ्गमाः ॥ १३ ॥ स एष सह सैन्येन प्राप्तः किल निकुम्भिलाम्। यद्युत्तिष्ठेत् कृतं कर्म हतान् सर्वांश्च विद्धि नः ॥ १४ ॥ निकुम्भिलामसम्प्राप्तमहुताग्निं च यो रिपुः। त्वामाततायिनं हन्यादिन्द्रशत्रोः स ते वधः। वरो दत्तो महाबाहो सर्वलोकेश्वरेण वै ॥ १५ ॥

तदा हतान् विद्धीत्यन्वयः ॥ १४ ॥ तर्हि कथं स वध्य इत्यत्राह—निकुम्भिलामित्यादिसार्धश्लोक एकान्वयः। यो रिपुः। अहुताग्निम् असमाप्तहोमम्, तेनेत्यादि। तपसा ब्रह्मशिरः ब्रह्मशिरस्संज्ञकमस्त्रम्। तेन वीरेण प्राप्तं निकुम्भिलायां होमकर्मणि परिसमाप्ते कामगतुरगयुक्तो रथः अग्नेस्सकाशादुत्पत्स्यते तद्रथस्थस्य तवावध्यत्वं भविष्यतीति वरदानात्कामगास्तुरङ्गमाः प्राप्ताः। तुरङ्गमशब्दो रथस्याप्युपलक्षणम् ॥१३॥ सः एषः पूर्वमकारेण किल लब्धवरः स इन्द्रजित्सैन्येन सह निकुम्भिलां प्राप्तः होमकर्मणा रथादिकं प्राप्नुवन् निकुम्भिलां गत इत्यर्थः। कृतार्थः कृतकर्मा समाप्तहोमो यद्युत्तिष्ठेत्सर्वान्नः हतान्विद्धीत्यर्थः ॥ १४ ॥ निकुम्भिला

स०—अकारणसन्तप्ते मिथ्या वार्तोत्थितेति अकारणं सन्तप्ते सति। वयं सन्तप्तहृदयाः "अस्मदो द्वयोश्च" इति वयमिति बहुवचनम्। अस्मदादय इत्याद्यर्थो वा। मिथ्येति भिन्नं पदम्। सन्तापं सम् अत्यन्तं तापयति पार्श्वस्थानसमानिति स तथा तम्। मिथ्या मिथ्याभूतसीतावधश्रवणजत्वान्मिथ्याभूतम् आगतं शोकं त्यज ॥ ८ ॥ यदि सीता प्राप्तव्या निशाचराश्च यदि हन्तव्यास्तर्हि हे वीर! उद्यमः क्रियताम्। त्वया हर्षस्समुपसेव्यताम् ॥ १० ॥ यदि कृतं कर्म निमित्तीकृत्योत्तिष्ठेत् तदा नः सर्वान् हतान् विद्धि ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निकुम्भिलामसम्प्राप्तं निकुम्भिलाख्यन्यग्रोधमूलस्थानमसम्प्राप्तं च। "रामप्रविश्यन्यग्रोधम्" इत्युत्तरसर्गे वक्ष्यति। आततायिनं शस्त्रपाणिम्, रिपुवधोद्यतं च त्वां यो हन्यात् हिंस्यात्, सः इन्द्रशत्रोस्ते वधो मारक इति सर्वलोकेश्वरेण ब्रह्मणा वरो दत्त इति योजना। "वध हतौ" इति धातोः पचाद्यचि वध इति रूपम्। यद्यप्येतच्छापवचनमिव प्रतिभाति, तथापि निकुम्भिलाप्राप्तिहोमयोर्विघ्नाभावे अवध्य इति पर्यवसानाद्वररूपत्वं द्रष्टव्यम् ॥ १५ ॥ इत्येव

इत्येवं विहितो राजन् वधस्तस्यैष धीमतः। वधायेन्द्रजितो राम सन्दिशस्व महाबल। हते तस्मिन् हतं विद्धि रावणं ससुहृज्जनम् ॥ १६ ॥ विभीषणवचः श्रुत्वा राघवो वाक्यमब्रवीत् ॥ १७ ॥ जानामि तस्य रौद्रस्य मायां सत्यपराक्रम। स हि ब्रह्मास्त्रवित् प्राज्ञो महामायो महाबलः। करोत्यसंज्ञान् सङ्ग्रामे देवान् सवरुणानपि ॥ १८ ॥ तस्यान्तरिक्षे चरतो रथस्थस्य महायशः। न गतिर्ज्ञायते तस्य सूर्यस्येवाभ्रसम्प्लवे ॥१९॥ राघवस्तु रिपोर्ज्ञात्वा मायावीर्यं दुरात्मनः। लक्ष्मणं कीर्तिसम्पन्नमिदं वचनमब्रवीत् ॥ २० ॥ यद्वानरेन्द्रस्य बलं तेन सर्वेण संवृतः। हनुमत्प्रमुखैश्चैव यूथपैः सह लक्ष्मण ॥ २१ ॥ जाम्बवेनर्क्षपतिना सहसैन्येन संवृतः। जहि तं राक्षससुतं मायाबलविशारदम् ॥ २२ ॥ अयं त्वां सचिवैः सार्द्धं महात्मा रजनीचरः। अभिज्ञस्तस्य देशस्य पृष्ठतोऽनुगमिष्यति ॥ २३ ॥ राघवस्य वचः श्रुत्वा लक्ष्मणः सविभीषणः। जग्राह कार्मुकश्रेष्ठमत्यद्भुतपराक्रमः ॥ २४ ॥

मित्यादिसार्धश्लोक एकान्वयः। इत्येवंप्रकारेण। एषः होमविघ्नकारी तस्य इन्द्रजितः वधः मारकः विहितः ब्रह्मणा कृतः। तस्मात् तस्य इन्द्रजितो वधाय सन्दिशस्व, अस्मासु कञ्चिदिति शेषः ॥१६–१८॥ तस्य प्रसिद्धस्येति सूर्यविशेषणं द्वितीयं तस्येति पदम्। अभ्रसंप्लवे मेघावरणे ॥१९ ॥ २०॥ यद्वानरेन्द्रस्येत्यादिश्लोकत्रयमेकान्वयम्। जाम्बवेन जाम्बवता। सहसैन्येन सैन्यसहितेन। "वोपसर्जनस्य" इति विकल्पेन सभावाभावः। संवृतः, त्वमिति

मित्यादि श्लोकद्वयमेकं वाक्यम्। अहुताग्निमसमाप्तहोमम्। निकुम्भिलां निकुम्भिलाख्यं न्यग्रोधमूलस्थानमसंप्राप्तम् आततायिनं शस्त्रपाणिं च हन्यात् हिंस्यात् इन्द्रशत्रोस्ते स एव वधः मारक इति वरः सर्वलोकेश्वरेण ब्रह्मणा दत्तः। राजन्! धीमतस्तस्यैवं वधो विहित इति योजना। एवमुत्तरश्रीरामायणे इन्द्रजिद्वरप्रकारस्योक्तत्वात्तदानुगुण्येन व्याख्यातम् ॥ १५–१८ ॥ तस्यान्तरिक्ष इति। अभ्रसंप्लवे मेघसमूहे ॥ १९–२७ ॥

For Private And Personal Use Only

शेषः ॥२१–२७॥ स एवमिति। असत्यपि कर्तृभेदे क्रियाभेदमाश्रित्य स इति द्विरुक्तिः । स एवमुक्त्वा स ययाविति निर्वाहः । वस्तुतस्तु स लक्ष्मणः । सः तादृशवीरवेषविशिष्ट एवेत्यर्थः । यद्वा सरावणिवधाकाङ्क्षीत्येकं पदम् । रावणिना सह वर्तन्त इति सरावणयः निकुम्भिलास्था राक्षसाः तेषां

सन्नद्धः कवची खड्गी सशरो हेमचापधृत् । रामपादावुपस्पृश्य हृष्टः सौमित्रिरब्रवीत् ॥ २५ ॥ अद्य मत्कार्मुकोन्मुक्ताः शरा निर्भिद्य रावणिम् । लङ्कामभिपतिष्यन्ति हंसाः पुष्करिणीमिव ॥ २६ ॥ अद्यैव तस्य रौद्रस्य शरीरं मामकाः शराः । विधमिष्यन्ति भित्त्वा तं महाचापगुणच्युताः ॥ २७ ॥ स एवमुक्त्वा द्युतिमान् वचनं भ्रातुरग्रतः । स रावणिवधाकांक्षी लक्ष्मणस्त्वरितो ययौ ॥२८॥ सोऽभिवाद्य गुरोः पादौ कृत्वा चापि प्रदक्षिणम् । निकुम्भिलामभिययौ चैत्यं रावणिपालितम् ॥ २९ ॥ विभीषणेन सहितो राजपुत्रः प्रतापवान् । कृतस्वस्त्ययनो भ्रात्रा लक्ष्मणस्त्वरितो ययौ ॥ ३० ॥ वानराणां सहस्रैस्तु हनुमान् बहुभिर्वृतः । विभीषणश्च सामात्यस्तदा लक्ष्मणमन्वगात् ॥ ३१ ॥ महता हरिसैन्येन सवेगमभिसंवृतः । ऋक्षराजबलं चैव ददर्श पथि विष्ठितम् ॥ ३२ ॥ स गत्वा दूरमध्वानं सौमित्रिर्मित्रनन्दनः । राक्षसेन्द्रबलं दूरादपश्यद्व्यूहमास्थितम् ॥ ३३ ॥ स तं प्राप्य धनुष्पाणिर्मायायोगमरिन्दमः । तस्थौ ब्रह्मविधानेन विजेतुं रघुनन्दनः ॥ ३४ ॥ विभीषणेन सहितो राजपुत्रः प्रतापवान् । अङ्गदेन च वीरेण तथाऽनिलसुतेन च ॥ ३५ ॥

वधाकांक्षीत्यर्थः ॥ २८–३३ ॥ स तं प्राप्येत्यादिश्लोकद्वयमेकान्वयम् । ब्रह्मविधानेन 'निकुम्भिलामसंप्राप्तम्' इत्यादिनोक्तब्रह्मवरदानप्रकारेण, माया

स एवमुक्त्वेति । स लक्ष्मणः एवमुक्त्वा स एव लक्ष्मणः ययाविति तच्छब्दद्वयस्य निर्वाहः । एवमुक्त्वा तु वचनमिति पाठः सम्यक् ॥२८–३३॥ स तमिति । सः रघुनन्दनः मायायोगं मायैव योग उपायो यस्य तमिन्द्रजितं प्राप्य ब्रह्मविधानेन 'निकुम्भिलामसंप्राप्तम्' इत्यादिनोक्तब्रह्मवरदानप्रकारेण विजेतुं तस्थाविति सम्बन्धः ॥३४॥३५॥

कतक०–तस्थौ ब्रह्मविमानेनेति पाठान्तरम् । ब्रह्मविमानेन ब्रह्मणो भगवतस्तेजोंऽशोऽहमस्मीति विशिष्य जायमानेन ध्यानेन शत्रुं जेतुं तस्थौ । सङ्कटकाले तादृशध्यानस्य निसर्गसिद्धत्वात् ॥ ३४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

योगं मायारूपोपायम्, तम् इन्द्रजितम्, विजेतुं प्राप्य तस्थौ । मायायागमिति पाठे मायायागं जेतुं नाशयितुं तं देशं प्राप्य तस्थावित्यन्वयः ॥३४॥३५॥ विविधमिति । प्रतिभयतमम् अतिशयेन भयङ्करम् ॥३६॥ इति श्रीगो० श्रीरामा० रत्नकिरी० युद्धकाण्ड० पञ्चाशीतितमः सर्गः ॥८५॥

विविधममलशस्त्रभास्वरं तद् ध्वजगहनं विपुलं महारथैश्च । प्रतिभयतममप्रमेयवेगं तिमिरमिव द्विषतां बलं विवेश ॥ ३६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चाशीतितमः सर्गः ॥ ८५ ॥

अथ तस्यामवस्थायां लक्ष्मणं रावणानुजः । परेषामहितं वाक्यमर्थसाधकमब्रवीत् ॥ १ ॥ यदेतद्राक्षसानीकं मेघश्यामं विलोक्यते । एतदायोध्यतां शीघ्रं कपिभिः पादपायुधैः ॥ २ ॥ अस्यानीकस्य महतो भेदने यत लक्ष्मण । राक्षसेन्द्रसुतोऽप्यत्र भिन्ने दृश्यो भविष्यति ॥ ३ ॥ स त्वमिन्द्राशनिप्रख्यैः शरैरवकिरन् परान् । अभिद्रवाशु यावद्वै नैतत् कर्म समाप्यते ॥ ४ ॥ जहि वीर दुरात्मानं मायापरमधार्मिकम् । रावणिं क्रूरकर्माणं सर्वलोकभयावहम् ॥ ५ ॥ विभीषणवचः श्रुत्वा लक्ष्मणः शुभलक्षणः । ववर्ष शरवर्षाणि राक्षसेन्द्रसुतं प्रति ॥ ६ ॥ ऋक्षाः शाखामृगाश्चापि द्रुमाद्रिनखयोधिनः । अभ्यधावन्त सहितास्तदनीकमवस्थितम् ॥ ७ ॥

अथेन्द्रजिद्युद्धारम्भः—अथ तस्यामित्यादि । तस्यामवस्थायां निकुम्भिलासमीपगमनावसरे । अर्थसाधकम्, स्वानामिति शेषः ॥ १ ॥ यदेतदिति । आयोध्यतां हन्यताम् । शीघ्रमिति । विलम्बे यागः समाप्येतेति भावः ॥ २ ॥ अस्येति । यत यतस्व । अत्र राक्षसानीके ॥ ३–५ ॥ विभीषणेति । शुभलक्षणः सुहृद्वचनसारग्राहित्वलक्षणयुक्तः ॥ ६ ॥ ७ ॥

प्रतिभयतमम् अतिशयेन भयङ्करम् ॥ ३६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चाशीतितमः सर्गः ॥ ८५ ॥

॥ १ ॥ यदेतदिति । आयोध्यतां महार्थताम् ॥ २ ॥ यत यतस्व ॥ ३ ॥ ४ ॥ मायापरमधार्मिकं परमधार्मिकवत्प्रतीयमानम् ॥ ५ ॥ राक्षसेन्द्रसुतं प्रति ववर्ष तमुद्दिश्य तत्सेनायां ववर्षेत्यर्थः ॥ ६–९ ॥

स०—मायापरमधार्मिकं मायया परमधनुर्धारिणं वा । मायापरम् अधार्मिकमिति वा ॥ ५ ॥

For Private And Personal Use Only

राक्षसा इति । कपिसैन्यजिघांसवः कपिसैन्यं हन्तुमिच्छवः ॥ ८ ॥ स इति । संप्रहारः युद्धम् ॥ ९ ॥ १० ॥ ते राक्षसा इति । शस्त्रनिवेशन विकृताननबाहुत्वरूपक्रियाभेदात् तच्छब्दद्वयनिर्वाहः ॥ ११-१२ ॥ स्वमनीकमिति । तत्कर्मणि तस्मिन् होमकर्मणि ॥ १४ ॥ वृक्षान्धकारात्

राक्षसाश्च शितैर्बाणैरसिभिः शक्तितोमरैः । उद्यतैः समवर्तन्त कपिसैन्यजिघांसवः ॥ ८ ॥ स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिरक्षसाम् । शब्देन महता लङ्कां नादयन् वै समन्ततः ॥ ९ ॥ शस्त्रैश्च बहुधाकारैः शितैर्बाणैश्च पादपैः । उद्यतैर्गिरिशृङ्गैश्च घोरैराकाशमावृतम् ॥ १० ॥ ते राक्षसा वानरेषु विकृताननबाहवः । निवेशयन्तः शस्त्राणि चक्रुस्ते सुमहद्भयम् ॥ ११ ॥ तथैव सकलैर्वृक्षैर्गिरिशृङ्गैश्च वानराः । अभिजघ्नुर्निजघ्नुश्च समरे राक्षसर्षभान् ॥ १२ ॥ ऋक्षवानरमुख्यैश्च महाकायैर्महाबलैः । रक्षसां वध्यमानानां महद्भयमजायत ॥ १३ ॥ स्वमनीकं विषण्णं तु श्रुत्वा शत्रुभिरर्दितम् । उदतिष्ठत दुर्धर्षस्तत्कर्मण्यननुष्ठिते ॥ १४ ॥ वृक्षान्धकारान्निर्गत्य जातक्रोधः स रावणिः । आरुरोह रथं सज्जं पूर्वयुक्तं सराक्षसः ॥ १५ ॥ स भीमकार्मुकधरः कालमेघसमप्रभः । रक्तास्यनयनः क्रुद्धो बभौ मृत्युरिवान्तकः ॥ १६ ॥ दृष्ट्वैव तु रथस्थं तं पर्यवर्तत तद्बलम् । रक्षसां भीमवेगानां लक्ष्मणेन युयुत्सताम् ॥ १७ ॥ तस्मिन् काले तु हनुमानुद्यम्य सुदुरासदम् । धरणीधरसङ्काशो महावृक्षमरिन्दमः ॥ १८ ॥ स राक्षसानां तत्सैन्यं कालाग्निरिव निर्दहन् । चकार बहुभिर्वृक्षैर्निस्संज्ञं युधि वानरः ॥ १९ ॥

नीरन्ध्रवृक्षषण्डादित्यर्थः । सज्जम् आयुधादिभिः, पूर्वयुक्तं पूर्वमेव युक्ताश्वम् । सराक्षसः राक्षससहितः ॥ १५ ॥ अन्तकः अन्तकरः ॥ १६ ॥ पर्यवर्तत परितोऽतिष्ठत ॥ १७ ॥ तस्मिन्नित्यादि । आदावेकं वृक्षमुद्यम्य निर्दहन् सन् पश्चात् बहुभिर्वृक्षैस्तद्रक्षोबलं निःसंज्ञं चकारेत्यन्वयः ॥ १८-२० ॥

शस्त्रैरिति । बहुधाकारैः बहुप्रकारैः ॥ १० ॥ राक्षसाः वानरेषु शस्त्राणि निवेशयन्तः विकृताननबाहवस्सन्तः ते सुमहद्भयं चक्रुरिति सम्बन्धः । [illegible] द्वयस्य न पौनरुक्त्यम् ॥ ११-१३ ॥ स्वमनीकमिति । अननुष्ठिते असमाप्ते सति ॥ १४ ॥ वृक्षान्धकारान्निरन्ध्रवृक्षसम्बाधात् ॥ १५-२७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवाकिरन्नित्युक्तं मपञ्चयति–शितेत्यादि । शितशूलधरा इत्यादिविशेषणेन येषां येष्वस्त्रेष्वत्यन्तपाटवमस्ति तैस्ते अवाकिरन्निति गम्यते ॥ २१ ॥ परिघैरित्यादौ परिघपाणय इत्याद्यूह्यम् । शुभदर्शनैरित्यनेन तैक्ष्ण्यमुपलक्ष्यते ॥ २२ ॥ पर्वतोपमम्, हनुमन्तमिति शेषः ॥ २३ ॥ तेषामित्यर्धम् ।

विध्वंसयन्तं तरसा दृष्ट्वैव पवनात्मजम् । राक्षसानां सहस्राणि हनुमन्तमवाकिरन् ॥ २० ॥ शितशूलधराः शूलै रसिभिश्चासिपाणयः । शक्तिभिः शक्तिहस्ताश्च पट्टिशैः पट्टिशायुधाः ॥ २१ ॥ परिघैश्च गदाभिश्च चक्रैश्च शुभदर्शनैः । शतशश्च शतघ्नीभिरायसैरपि मुद्गरैः ॥ २२ ॥ घोरैः परश्वधैश्चैव भिन्दिपालैश्च राक्षसाः । मुष्टिभिर्वज्रकल्पैश्च तलैरशनिसन्निभैः । अभिजघ्नुः समासाद्य समन्तात् पर्वतोपमम् ॥ २३ ॥ तेषामपि च संक्रुद्धश्चकार कदनं महत् ॥ २४ ॥ स ददर्श कपिश्रेष्ठमचलोपममिन्द्रजित् । सूदयन्तममित्रघ्नममित्रान् पवनात्मजम् ॥ २५ ॥ स सारथिमुवाचेदं याहि यत्रैष वानरः । क्षयमेष हि नः कुर्याद्राक्षसानामुपेक्षितः ॥ २६ ॥ इत्युक्तः सारथिस्तेन ययौ यत्र स मारुतिः । वहन् परमदुर्धर्षं स्थितमिन्द्रजितं रथे ॥ २७ ॥ सोऽभ्युपेत्य शरान् खड्गान् पट्टिशांश्च परश्वधान् । अभ्यवर्षत दुर्द्धर्षः कपिमूर्ध्नि स राक्षसः ॥ २८ ॥ तानि शस्त्राणि घोराणि प्रतिगृह्य स मारुतिः । रोषेण महताऽऽविष्टो वाक्यं चेदमुवाच ह ॥ २९ ॥ युद्ध्यस्व यदि शूरोऽसि रावणात्मज दुर्मते । वायुपुत्रं समासाद्य जीवन्न प्रतियास्यसि ॥ ३० ॥ बाहुभ्यां प्रतियुध्यस्व यदि मे द्वन्द्वमाहवे । वेगं सहस्व दुर्बुद्धे ततस्त्वं रक्षसां वरः ॥ ३१ ॥

संक्रुद्धः, हनुमानिति शेषः ॥ २४ ॥ २५ ॥ हि यस्मात् कारणात् उपेक्षितः एषः नः अस्माकं सम्बन्धिनां राक्षसानां क्षयं कुर्यात् । अतः एष वानरो यत्र, वर्तत इति शेषः । तत्र याहीतीदं वचः सारथिमुवाचेत्यन्वयः ॥ २६ ॥ इत्युक्त इति । वहन् प्रापयन् ॥ २७ ॥ सोऽभ्युपेत्येति । अत्रापि क्रियाभेदात् तच्छब्दस्य द्विः प्रयोगः ॥ २८–३० ॥ द्वन्द्वं द्वन्द्वयुद्धम्, ददासीति शेषः । यदि ददासि तर्हि शस्त्राणि त्यक्त्वा बाहुभ्यां ॥२६५॥

सोऽभ्युपेत्येत्यत्रापि क्रियाभेदात्तच्छब्दद्वयस्य प्रयोगः ॥ २८–३० ॥ बाहुभ्यामिति । द्वन्द्वं, ददासीति शेषः । तर्हि बाहुभ्यां युध्यस्व ॥ ३१–३३ ॥

For Private And Personal Use Only

प्रतिबुध्यस्वेत्यन्वयः । ततः तदानीं द्वन्द्वयुद्धकाले ॥ ३१ ॥ ३२ ॥ यः सः प्रसिद्धो थ इत्यर्थः ॥ ३३ ॥ तमिति । अप्रतिमसंस्थानैः अनुपम सन्निवेशैः, करवीरपत्राद्याकारैरित्यर्थः ॥ ३४ ॥ इत्येवमिति । अरिविभीषणेन शत्रुभयङ्करेण ॥ ३५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडशीतितमः सर्गः ॥ ८६ ॥

हनुमन्तं जिघांसन्तं समुद्यतशरासनम् । रावणात्मजमाचष्टे लक्ष्मणाय विभीषणः ॥ ३२ ॥ यः स वासवनिर्जेता रावणस्यात्मसम्भवः । स एष रथमास्थाय हनुमन्तं जिघांसति ॥ ३३ ॥ तमप्रतिमसंस्थानैः शरैः शत्रुविदारणैः । जीवितान्तकरैर्घोरैः सौमित्रे रावणिं जहि ॥३४॥ इत्येवमुक्तस्तु तदा महात्मा विभीषणेनारिविभीषणेन । ददर्श तं पर्वतसन्निकाशं रणे स्थितं भीमबलं नदन्तम् ॥ ३५ ॥ इत्यार्षे० श्रीमद्युद्धकाण्डे षडशीतितमः सर्गः ॥ ८६ ॥
एवमुक्त्वा तु सौमित्रिं जातहर्षो विभीषणः । धनुष्पाणिनमादाय त्वरमाणो जगाम ह ॥ १ ॥ अविदूरं ततो गत्वा प्रविश्य च महद्वनम् । दर्शयामास तत्कर्म लक्ष्मणाय विभीषणः ॥२॥ नीलजीमूतसङ्काशं न्यग्रोधं भीमदर्शनम् । तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदयत् ॥ ३ ॥ इहोपहारं भूतानां बलवान् रावणात्मजः । उपहृत्य ततः पश्चात् सङ्ग्राममभिवर्तते ॥ ४ ॥ अदृश्यः सर्वभूतानां ततो भवति राक्षसः । निहन्ति समरे शत्रून् बध्नाति च शरोत्तमैः ॥ ५ ॥ तमप्रविष्टन्यग्रोधं बलिनं रावणात्मजम् । विध्वंसय शरैस्तीक्ष्णैः सरथं साश्वसारथिम् ॥ ६ ॥

अथेन्द्रजिद्विभीषणसंवादः—एवमुक्त्वेत्यादि । धनुष्पाणिनमिति नकारान्तत्वमार्षम् ॥ १ ॥ तत्कर्म होमकर्मस्थानम् ॥२॥३॥ इहेति । उपहारं बलिम् । उपहृत्य कृत्वा । ओदनपाकं पचतीतिवत् । ततः तस्माद्देशात् ॥ ४ ॥ ५ ॥ अप्रविष्टन्यग्रोधं रावणात्मजं विध्वंसय । पुनः प्रवेशात्पूर्वमेव विध्वंसये

अप्रतिमसंस्थानैः अनुपमैरित्यर्थः ॥ ३४ ॥ ३५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षडशीतितमः सर्गः ॥ ८६ ॥
॥ १ ॥ अविदूरमिति । तत्कर्म होमस्थानम् ॥ २–५ ॥ तमिति । अप्रविष्टन्यग्रोधं रावणात्मजं विध्वंसय, न्यग्रोधमूलप्रवेशे दुस्साध्यो भवतीति भावः ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्यर्थः ॥ ६–८ ॥ तमिति । महातेजा इति लक्ष्मणो विशेष्यः । सम्यग्युद्धम् अमायायुद्धम् ॥ ९ ॥ एवमिति । मनस्वी दृढमनस्कः ॥ १० ॥ इहेति । इह लङ्कायां जातसंवृद्धः । "पूर्वकाल–" इत्यादिना पूर्वकालार्थवाचिनो जातशब्दस्य उत्तरकालार्थवाचिना संवृद्धशब्देन सह समासः । पुत्रस्य

तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रनन्दनः । बभूवावस्थितस्तत्र चित्रं विस्फारयन् धनुः ॥ ७ ॥ स रथेनाग्निवर्णेन बलवान् रावणात्मजः । इन्द्रजित् कवची धन्वी सध्वजः प्रत्यदृश्यत ॥ ८ ॥ तमुवाच महातेजाः पौलस्त्यमपराजितम् । समाह्वये त्वां समरे सम्यग्युद्धं प्रयच्छ मे ॥ ९ ॥ एवमुक्तो महातेजा मनस्वी रावणात्मजः । अब्रवीत् परुषं वाक्यं तत्र दृष्ट्वा विभीषणम् ॥ १० ॥ इह त्वं जातसंवृद्धः साक्षाद्भ्राता पितुर्मम । कथं द्रुह्यसि पुत्रस्य पितृव्यो मम राक्षस ॥ ११ ॥ न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते । प्रमाणं न च सोदर्यं न धर्मो धर्मदूषण ॥ १२ ॥ शोच्यस्त्वमसि दुर्बुद्धे निन्दनीयश्च साधुभिः । यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः ॥ १३ ॥ नैतच्छिथिलया बुद्ध्या त्वं वेत्सि महदन्तरम् । क्व च स्वजनसंवासः क्व च नीचपराश्रयः ॥ १४ ॥ गुणवान् वा परजनः स्वजनो निर्गुणोऽपि वा । निर्गुणः स्वजनः श्रेयान् यः परः पर एव सः ॥ १५ ॥

पुत्राय । "क्रुधद्रुह–" इत्यादिना चतुर्थीनियमात् । राक्षसेत्यनेन साजात्यमपि न दृष्टवानसीति व्यज्यते ॥ ११ ॥ न ज्ञातित्वमिति । प्रमाणं मर्यादानियामकम् ॥ १२ ॥ शोच्यत्वादौ हेतुमाह–यस्त्वमिति ॥ १३ ॥ नैतदिति । शिथिलया कोमलया, तुच्छया वा । अन्तरं तारतम्यम् ॥ १४ ॥ ननु परस्य

तत्र न्यग्रोधमूले ॥ ७ ॥ ८ ॥ महातेजाः लक्ष्मणः ॥ ९–१० ॥ इह अस्मिन् राक्षसकुले जातः संवृद्धः तत्रैवोत्पन्नस्तत्रैव वृद्धिं प्राप्त इत्यर्थः । पुत्रस्य पुत्राय ॥ ११ ॥ प्रमाणं मर्यादा ॥ १२ ॥ १३ ॥ शिथिलया तुच्छया । महदन्तरं महद्वैषम्यम् । स्वजनपरित्यागपरभृत्यत्वयोः महद्वैषम्यमस्तीत्यर्थः ॥ १४ ॥ परस्य नीचत्वे भवदुक्तं

स०–एकैक एव प्रयोजकः प्रीतावेतम्मध्येऽन्यत्र । ते सर्वेऽपि त्वय्यन्यथा जाता इत्याह–न ज्ञातित्वमित्यादिना । जातिः राक्षसजातिः । प्रमाणं ज्येष्ठविरोधेन विरोध्याश्रयो न सम्पाद्य इति प्रवेदयत्प्रमाणम् । सौदर्यं सोदरत्वम् । त्रयाणामपि कैकसीपुत्रत्वात् । न च पद्मपुराणे "निकषापुत्रमाहूय । निकषा चाब्रवीद्रामम्" इत्युक्तेः भागवतोत्तरकाण्डादौ कैकसीपुत्रत्वं कथितम्, तदसङ्गतमिति वाच्यम्; तस्या एव नामान्तरं तदित्यविरोधः ॥ १२ ॥ टीका–निर्गुणोपि स्वजनः श्रेयान् भवति । परो यः सगुणोपि स पर एव । स्वकुलेन सह विरोधे मित्र एव भवतीत्यर्थः ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नीचत्वाभावान्न भवदुक्तदोष इत्यत्राह–गुणवानिति ॥ १५ ॥ तदेव वैषम्यं स्वरूपतो दर्शयति–य इति ॥ १६ ॥ निरनुकोशतेति । इयं होमविघात पूर्वकं लक्ष्मणस्य न्यग्रोधप्रवेशकरणरूपा निरनुकोशता निर्दयता, यादृशी यथा घोरा, तादृशं परुषं निर्दयत्वं स्वजनेन बन्धुभूतेन त्वयैव कर्तुं शक्यम्, नान्येनेत्यर्थः । यद्वा स्वजने विषये त्वया न शक्यं न कर्तव्यम्, अनुचितं कृतमिति भावः ॥ १७ ॥ १८ ॥ गौरवात् गुरोर्भावो गौरवम्, पितृव्यत्वा

यः स्वपक्ष परित्यज्य परपक्षं निषेवते । स स्वपक्षे क्षयं प्राप्ते पश्चात्तैरेव हन्यते ॥१६॥ निरनुक्रोशता चेयं यादृशी ते निशाचर । स्वजनेन त्वया शक्यं परुषं रावणानुज ॥ १७ ॥ इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः ॥१८॥ अजानन्निव मच्छीलं किं राक्षस विकत्थसे । राक्षसेन्द्रसुतासाधो पारुष्यं त्यज गौरवात् ॥ १९ ॥ कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणाम् । गुणोऽयं प्रथमो नृणां तन्मे शीलमराक्षसम् ॥ २० ॥ न रमे दारुणेनाहं न चाधर्मेण वै रमे । भ्रात्रा विषमशीलेन कथं भ्राता निरस्यते ॥ २१ ॥ धर्मात् प्रच्युतशीलं हि पुरुषं पापनिश्चयम् । त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा ॥ २२ ॥

दित्यर्थः ॥ १९ ॥ रक्षसां कुले यद्यप्यहं जातः, तत् तथापि मे शीलम् अराक्षसम् अक्रूरम् । अयं मे शीलाख्यो गुणः नृणां सत्पुरुषाणां प्रथमः मुख्यः ॥ २० ॥ तन्मे शीलमराक्षसमित्युक्तमेव दर्शयति–न रम इति । दारुणेन कर्मणा न रमे । अधर्मेण परपीडाकरेण च कर्मणा न रमे । न केवलं मय्येव दोषः रावणेऽपीत्याह–भ्रात्रेति । निरस्यते 'त्वां तु धिक्कुलपांसनम्' इति वचनेनेत्यर्थः ॥ २१ ॥ इन्द्रजिदुक्तस्वदोषपरिहाराय परित्यागहेतून्

वैषम्यम्, गुणवत्त्वे तु तन्नास्तीत्यत्राह–गुणवान्वेति ॥१५॥ तदेव वैषम्यं स्वरूपतो दर्शयति–यस्स्वपक्षमिति । अतः स्वपक्षाश्रयणमेव श्रेयस्करमिति भावः ॥१६ ॥ निरनुक्रोशतेति । सेयं होमविघातपूर्वकं लक्ष्मणस्य न्यग्रोधप्रवेशकरणरूपा निरनुक्रोशता निर्दयता यादृशी यथा घोरा ईदृशं परुषम्, निदर्शयेति शेषः । स्वजनेन बन्धुभूतेन त्वयैव कर्तुं शक्यम्, नान्येनेत्यर्थः । यद्वा स्वजने विषये त्वया न शक्यं न कर्तव्यम्, अनुचितं कृतमिति भावः ॥ १७ ॥ १८ ॥ गौरवात् पितृव्यत्वात् । यद्वा शूरोऽहमिति गौरवाद्धेतोर्यत्पारुष्यं तत्त्यजेत्यर्थः ॥ १९ ॥ नृणां सज्जनानां यः प्रथमः मुख्यो गुणः सात्त्विकं तत् मे अराक्षसम् अक्रूरम् । शीलं गुण इत्यर्थः ॥ २० ॥ न रम इति । दारुणेन कर्मणा न रमे अधर्मेण च न रमे अन्यथा विषमशीलेन रावणशीलाद्विलक्षणशीलेन भ्रात्रा कथमयं भ्राता रावणो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रावणदोषानाह–धर्मादित्यादिना ॥ २२ ॥ हिंसा च परस्वहरणं च ते हिंसापरस्वहरणे । हिंसादिरूपं दुराचाररूपं कर्म त्याज्यमाहुः तद्युक्तस्त्याज्य इत्यर्थः ॥ २३ ॥ परस्वानामिति । सुहृदामतिशङ्का सुहृत्स्वविश्वासः ॥ २४ ॥ दोषवत्तया यदि त्याज्यत्वम्, तर्ह्यभिजनविद्यादिगुणवत्तया किमिति न ग्राह्यत्वमित्यत आह–महर्षीणामिति सार्धश्लोकद्वयमेकान्वयम् । अभिमानः गर्वः । वैरित्वं बद्धवैरत्वम् । प्रतिकूलता परश्रेयोद्वेषित्वम् । तथा च

हिंसापरस्वहरणे परदाराभिमर्शनम् । त्याज्यमाहुर्दुराचारं वेश्म प्रज्वलितं यथा ॥ २३ ॥ परस्वानां च हरणं परदाराभिमर्शनम् । सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः ॥ २४ ॥ महर्षीणां वधो घोरः सर्वदेवैश्च विग्रहः । अभिमानश्च कोपश्च वैरित्वं प्रतिकूलता ॥२५॥ एते दोषा मम भ्रातुर्जीवितैश्वर्यनाशनाः। गुणान् प्रच्छादयामासुः पर्वतानिव तोयदाः । दोषैरेतैः परित्यक्तो मया भ्राता पिता तव ॥ २६ ॥ नेयमस्ति पुरी लङ्का न च त्वं न च ते पिता ॥ २७ ॥ अतिमानी च बालश्च दुर्विनीतश्च राक्षस । बद्धस्त्वं कालपाशेन ब्रूहि मां यद्यदिच्छसि ॥ २८ ॥ अद्य ते व्यसनं प्राप्तं किं मां त्वमिह वक्ष्यसि । प्रवेष्टुं न त्वया शक्यो न्यग्रोधो राक्षसाधम ॥ २९ ॥

अभिजनविद्यादिगुणवत्त्वेऽपि परस्त्रीहरणादिदोषदूषिततया विषसंपृक्तमधुवन्न ग्राह्योऽयमिति भावः ॥ २५ ॥ २६ ॥ नेयमित्यादि । उत्तरक्षणे अवश्यं नशिष्यतीत्यर्थः ॥ २७–२९ ॥

निरस्यते हिंस्यते ॥ २१॥२२॥ हिंसा च परस्वहरणं च हिंसापरस्वहरणे । दुराचारं हिंसादिरूपदुराचारम् ॥ २३ ॥ इन्द्रजिदुक्तदोषपरिजिहीर्षया परित्यागहेतून् रावण दोषानाह–परस्वानामित्यादिना । सुहृदामतिशङ्का सुहृत्स्वविश्वास इत्यर्थः ॥ २४ ॥ दोषवत्तया यद्यपि त्याज्यत्वं तर्ह्यभिजनविद्यादिगुणवत्तया किमिति न ग्राह्यत्वमित्यत आह–महर्षीणामिति । अभिमानो गर्वः । वैरित्वं बद्धवैरित्वम् । प्रतिकूलता परश्रेयोद्वेषित्वम् । अभिजनविद्यादिगुणवत्त्वेऽपि परस्त्रीहरणादिदोषदूषिततया विषसम्पृक्तान्नवत्तस्य न ग्राह्यत्वमिति भावः ॥ २५–२९ ॥ ॥२६७॥

For Private And Personal Use Only

देवताकार्यं यमदूतरूपदेवताकार्यम् । नरकयातनानुभवं वा ॥३०॥३१॥ इति श्रीगो० श्रीरामा० रत्न० युद्धकाण्डव्याख्याने सप्ताशीतितमः सर्गः॥८७॥ अथेन्द्रजिल्लक्ष्मणयुद्धम्--विभीषणवच इत्यादि। अभ्युत्पपात अभिमुखमुज्जगाम ॥ १ ॥ कीदृग्भूतोऽभ्युज्जगामेत्यत्राह--उद्यतेत्यादि श्लोकद्वयेन । सुसमलंकृते सुष्ठु समन्तात् अलंकृते । महाप्रमाणं महादीर्घम्, धनुरुद्यम्य शरान् परामृश्य गृहीत्वा अभ्युज्जगाम अब्रवीदित्यन्वयः । अमित्रान् शत्रून्

धर्षयित्वा च काकुत्स्थौ न शक्यं जीवितुं त्वया । युद्धयस्व नरदेवेन लक्ष्मणेन रणे सह । हतस्त्वं देवताकार्यं करिष्यसि यमक्षये ॥ ३० ॥ निदर्शयस्वात्मबलं समुद्यतं कुरुष्व सर्वायुधसायकव्ययम् । न लक्ष्मणस्यैत्य हि बाणगोचरं त्वमद्य जीवन् सबलो गमिष्यसि ॥३१॥ इत्यार्षे श्रीरामा० श्रीमद्युद्धकाण्डे सप्ताशीतितमः सर्गः॥८७॥
विभीषणवचः श्रुत्वा रावणिः क्रोधमूर्च्छितः । अब्रवीत् परुषं वाक्यं वेगेनाभ्युत्पपात ह ॥ १ ॥ उद्यतायुधनिस्त्रिंशो रथे सुसमलङ्कृते । कालाश्वयुक्ते महति स्थितः कालान्तकोपमः ॥२ ॥ महाप्रमाणमुद्यम्य विपुलं वेगवद्दृढम् । धनुर्भीमं परामृश्य शरांश्चामित्रशातनान् ॥३॥ तं ददर्श महेष्वासो रथे सुसमलंकृतः । अलंकृतममित्रघ्नं राघवस्यानुजं बली । हनुमत्पृष्ठमासीनमुदयस्थरविप्रभम् ॥४॥ उवाचैनं समारब्धः सौमित्रिं सविभीषणम् । तांश्च वानरशार्दूलान् पश्यध्वं मे पराक्रमम् ॥५॥ अद्य मत्कार्मुकोत्सृष्टं शरवर्षं दुरासदम् । मुक्तं वर्षमिवाकाशे वारयिष्यथ संयुगे ॥६॥

शातयन्ति खण्डयन्तीत्यमित्रशातनान् ॥ २ ॥ ३ ॥ रथे, स्थित इति शेषः । अलंकृतं स्वतेजसा भूषितम् । हनुमत्पृष्ठमासीनमित्यनुवादेन हनुमान् पूर्वं राक्षसैर्युद्धा इन्द्रजित्यागते लक्ष्मणं स्वपृष्ठभागमारोप्य स्थितवानिति गम्यते । उदयस्थरविप्रभमित्यनेन हनुमतः काञ्चनाकृतित्वं लक्ष्मणस्य रविवर्णत्वं चोक्तम् ॥ ४ ॥ उवाचैनमिति त्रिपाच्छ्लोक एकान्वयः । एतदब्रवीत् परुषमिति पूर्वोक्तस्य विवरणं न भवति । तद्विभीषणमात्रं प्रति । इदं तु सर्वान्

युद्धयस्वेति । देवताकार्यं करिष्यसि यमदूतरूपदेवतादीष्टकार्यं करिष्यसीत्यर्थः । यमक्षये यमनिलये । यमदूतकिङ्करो भविष्यसीति यावत् ॥ ३० ॥ ३१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्ताशीतितमः सर्गः ॥ ८७ ॥ विभीषणवच इत्यादि श्लोकत्रयमेकं वाक्यम् । परुषं वाक्यमित्येतद्वक्ष्यमाणमिति ज्ञेयम् । कालाश्वाः नीलाश्वाः । रथे स्थितस्सन् महाप्रमाणं धनुरुद्यम्य शरान् परामृश्य अभ्युत्पपात अभ्युज्जगाम, अब्रवीदिति सम्बन्धः ॥ १-३ ॥ अलंकृतं स्वतेजोभूषितम् ॥ ४ ॥ उवाचैनमित्यादिना पूर्वोक्तमब्रवीत् परुषं वाक्यमित्येतदेव विवृणोति ॥ ५ ॥ मुक्तं वर्षं मेघोत्सृष्टं

प्राति । तच्च परुषम् । इदं तु पराक्रमविषयम् । समारब्धः संरब्धः । पश्यध्वमिति । मुक्तं मेघमुक्तम् । वारयिष्यथेत्येतत् सापहासोक्तिः ॥ ५ ॥ ६ ॥ अद्येति । वः युष्माकम् । विधमिष्यन्ति धक्ष्यन्ति ॥ ७ ॥ तीक्ष्णेति । तीक्ष्णसायकेति लुप्तविभक्तिकं पदम् । तीक्ष्णसायकैरित्यर्थः । शूलशक्त्यष्टि

अद्य वो मामका बाणा महाकार्मुकनिस्सृताः । विधमिष्यन्ति गात्राणि तूलराशिमिवानलः ॥ ७ ॥ तीक्ष्णसायक निर्भिन्नान् शूलशक्त्यष्टितोमरैः । अद्य वो गमयिष्यामि सर्वानेव यमक्षयम् ॥ ८ ॥ क्षिपतः शरवर्षाणि क्षिप्र हस्तस्य मे युधि । जीमूतस्येव नदतः कः स्थास्यति ममाग्रतः ॥ ९ ॥ रात्रियुद्धे मया पूर्वं वज्राशनिसमैः शरैः । शायितौ स्थो मया भूमौ विसंज्ञौ सपुरस्सरौ ॥ १० ॥ स्मृतिर्न तेऽस्ति वा मन्ये व्यक्तं वा यमसादनम् । आशीविषमिव क्रुद्धं यन्मां योद्धुं व्यवस्थितः ॥ ११ ॥ तच्छ्रुत्वा राक्षसेन्द्रस्य गर्जितं लक्ष्मणस्तदा । अभीत वदनः क्रुद्धो रावणिं वाक्यमब्रवीत् ॥ १२ ॥ उक्तश्च दुर्गमः पारः कार्याणां राक्षस त्वया । कार्याणां कर्मणा पारं यो गच्छति स बुद्धिमान् ॥ १३ ॥

तोमरैः इत्यत्र शक्तियष्टितोमरैरित्यर्थः । सन्धिरार्षः।तीक्ष्णसायकैः शूलशक्त्यष्टितोमरैश्च निर्भिन्नान् वः युष्मान्,यमक्षयं यमनिलयम्,गमयिष्यामीत्यन्वयः ॥ ८ ॥ क्षिपत इति । जीमूतस्येति नादमात्रे दृष्टान्तः॥ ९ ॥ रात्रीति । आग्रहातिशयेन मयेति द्विरुक्तिः॥१०॥ रामानु०—रात्रीति । शायितौ, युवामिति शेषः॥१०॥ स्मृतिरिति । यन्मां योद्धुं व्यवस्थितः, अतः स्मृतिर्नास्तीति वा मन्ये । अथवा यमसादनं यमप्रापणम् । व्यक्तं प्रत्यक्षम् प्रत्यासन्नमिति यावत् । यद्वा सादनं सदनम् । स्वार्थेऽण् प्रत्ययः ॥ ११ ॥ तच्छ्रुत्वेति । अभीतवदनः भयविकृतिशून्यवदनः ॥ १२ ॥ दुर्गमः दुर्लभः । कार्याणां यमप्रापणादीनाम् । पारः

वर्षम् ॥ ६–८ ॥ क्षिपत इति । मे युधि ममाग्रत इति सम्बन्धः ॥ ९ ॥ शायितौ, युवामिति शेषः ॥ १० ॥ यन्मां योद्धुं व्यवस्थितः अतस्ते स्मृतिर्नास्ति वा यमसादनं यमलोकप्रापणं व्यक्तं प्रकाशं सन्निहितं न इति सम्बन्धः ॥ रात्रियुद्ध इत्यादिश्लोकद्वयस्य वास्तवार्थस्तु–रात्रियुद्धे मया शरैर्विसंज्ञौ भूमौ शायितौ अथापि ते तव यमसादनं वा यमलोकप्रापणं च अत एव स्मृतिर्वा, भयरूपेति शेषः । भयरूपा स्मृतिश्च नास्तीति व्यक्तं मन्ये । कुतः ? आशीविषमिव क्रुद्धं मां योद्धुं व्यवस्थित इति सम्बन्धः ॥ ११–१२ ॥ उक्तश्चेति । कार्याणां शत्रुविजयरूपकर्तव्यानां दुर्गमः अपारः दुष्प्रापान्तः त्वया उक्तश्च उक्तः । एतदुक्तिमात्रेण

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निर्वाहः । उक्तश्च उक्त एव, न कृतः। अतो दुर्बुद्धिरसीत्यर्थः । कस्तर्हि बुद्धिमानित्यत आह–कार्याणामिति । कार्याणां कर्मणा, आचरणेनेत्यर्थः ॥ १३ ॥ स त्वमिति । अर्थस्येति तादर्थ्यसंबन्धे षष्ठी । अर्थस्य वचः प्रयोजनार्थं वचः ॥ १४ ॥ दृष्टेऽप्यस्मत्पराक्रमे कथमित्थं कथ्यत इत्याशङ्क्य मायामयत्वान्न स वीरसंमत इत्याह–अन्तर्धानेति । आजौ युद्धे ॥ १५ ॥ प्रत्यक्षेणापि योद्धुं शक्तोऽस्मीत्यत आह–यथेति । यथा स्थितोऽस्मि तथैव,

स त्वमर्थस्य हीनार्थो दुरवापस्य केनचित् । वचो व्याहृत्य जानीषे कृतार्थोऽस्मीति दुर्मते ॥ १४ ॥ अन्तर्धानगतेनाजौ यस्त्वयाऽऽचरितस्तदा । तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ १५ ॥ यथा बाणपथं प्राप्य स्थितोऽहं तव राक्षस । दर्शयस्वाद्य तत्तेजो वाचा त्वं किं विकत्थसे ॥ १६ ॥ एवमुक्तो धनुर्भीमं परामृश्य महाबलः । ससर्ज निशितान् बाणानिन्द्रजित् समितिञ्जयः ॥ १७ ॥ ते निसृष्टा महावेगाः शराः सर्पविषोपमाः । संप्राप्य लक्ष्मणं पेतुः श्वसन्त इव पन्नगाः ॥ १८ ॥ शरैरति महावेगैर्वेगवान् रावणात्मजः । सौमित्रिमिन्द्रजिद्युद्धे विव्याध शुभलक्षणम् ॥ १९ ॥ स शरैरतिविद्धाङ्गो रुधिरेण समुक्षितः । शुशुभे लक्ष्मणः श्रीमान् विधूम इव पावकः ॥ २० ॥ इन्द्रजित्त्वात्मनः कर्म प्रसमीक्ष्याधिगम्य च । विनद्य सुमहानादमिदं वचनमब्रवीत् ॥ २१ ॥ पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः । आदास्यन्तेऽद्य सौमित्रे जीवितं जीवितान्तगाः ॥ २२ ॥

तत्तेजः पूर्वकृतं तेजः दर्शयस्वेत्यन्वयः ॥ १६ ॥ १७ ॥ सर्पविषोपमाः सर्पविषवत् घोराः । पेतुः, भूमाविति शेषः ॥ १८ ॥ शरैरिति । अतिविव्याधे त्यन्वयः । " व्यवहिताश्च " इति व्यवहितप्रयोगः ॥ १९ ॥ २० ॥ अधिगम्य फलवत्त्वेन दृष्ट्वा ॥ २१–२४ ॥

किमायातमिति भावः । यस्तु कार्याणां पारं कर्मणा आचरणेन गच्छति प्राप्नोति स बुद्धिमान् स एव समर्थ इत्यर्थः ॥ १३ ॥ स त्वमिति । दुर्मते ! हीनार्थः शत्रुविजयरूपप्रयोजनहीनः स त्वं केनचित् केनापि दुरवाप्यस्यार्थस्य विजयप्रयोजनस्य सम्बन्धि वचो व्याहृत्य कृतार्थोऽस्मि कृतकृत्योऽस्मीति जानीष इति योजना ॥ १४ ॥ मत्कृतं पराक्रमं सम्यगनुभूयापि किमर्थमेवमुच्यत इत्यत्राह–अन्तर्धानगतेनेति ॥ १५ ॥ विनाप्यन्तर्धानेन पराक्रमितुं शक्यमित्यत्राह–यथेति । यथा यत्तेजः पूर्वं कृतं तत्तेजः ॥ १६–२१ ॥ पत्रिणश्शितधारा इत्यादिश्लोकचतुष्टयस्य प्रकृतार्थः स्पष्टः । वास्तवार्थस्तु–हे सौमित्रे ! मत्कार्मुकच्युताः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

विशस्तेति । विशस्तं भिन्नं कवचं यस्य तं त्वां रामो द्रक्ष्यतीत्यनुषङ्गेण योजना ॥ २५ ॥ २६ ॥ अथ इदानीम् ॥२७-३०॥ सुपत्रवाजिताः सुपत्रैः

अद्य गोमायुसङ्घाश्च श्येनसङ्घाश्च लक्ष्मण । गृध्राश्च निपतन्तु त्वां गतासुं निहतं मया ॥ २३ ॥ क्षत्रबन्धुं सदानार्यं रामः परमदुर्मतिः । भक्तं भ्रातरमद्यैव त्वां द्रक्ष्यति मया हतम् ॥ २४ ॥ विशस्तकवचं भूमौ व्यपविद्धशरासनम् । हृतोत्तमाङ्गं सौमित्रे त्वामद्य निहतं मया ॥ २५ ॥ इति ब्रुवाणं संरब्धं परुषं रावणात्मजम् । हेतुमद्वाक्यमत्यर्थं लक्ष्मणः प्रत्युवाच ह ॥२६॥ वाग्बलं त्यज दुर्बुद्धे क्रूरकर्माऽसि राक्षस । अथ कस्माद्वदस्येतत् सम्पादय सुकर्मणा ॥२७॥ अकृत्वा कत्थसे कर्म किमर्थमिह राक्षस । कुरु तत्कर्म येनाहं श्रद्दध्यां तव कत्थनम् ॥२८॥ अनुक्त्वा परुषं वाक्यं किंचिदप्यनवक्षिपन् । अविकत्थन् वधिष्यामि त्वां पश्य पुरुषाधम ॥२९॥ इत्युक्त्वा पञ्च नाराचानाकर्णापूरितान् शितान् । निजघान महावेगान् लक्ष्मणो राक्षसोरसि ॥ ३० ॥ सुपत्रवाजिता बाणा ज्वलिता इव पन्नगाः । नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा ॥ ३१ ॥ स शरैराहतस्तेन सरोषो रावणात्मजः । सुप्रयुक्तैस्त्रिभिर्बाणैः प्रतिविव्याध लक्ष्मणम् ॥ ३२ ॥ स बभूव तदा भीमो नरराक्षससिंहयोः । विमर्दस्तुमुलो युद्धे परस्परजयैषिणोः ॥३३॥

सञ्जातवेगाः ॥ ३१ ॥ ३२ ॥ स बभूवेति । विमर्दः सङ्घर्षः ॥ ३३ ॥

अशराः, अमयोजकशरा इत्यर्थः । ते तव शितधाराः जीवितान्तगाः पत्रिणः मत्तः जीवितमादास्यन्त इति सम्बन्धः ॥ २२ ॥ हे लक्ष्मण ! त्वां त्वामुद्दिश्य । मया लक्ष्म्या लङ्केश्वर्येण सह गतासुम्, मामिति शेषः । गोमाय्वादयः निपतन्त्विति सम्बन्धः ॥ २३ ॥ सदानार्यमित्यत्र सदान आर्यमिति छेदः । हे सदान दानसहित ! दानशीलेत्यर्थः । क्षत्रबन्धुं क्षत्रस्य राघवस्य बन्धुम् । कुतः भ्रातरम् अत एव आर्यं मया अहतं त्वां परमदुर्मतिः परमदुष्टेष्वपि मतिः अनुग्रहरूपा यस्य सः रामः, अद्य द्रक्ष्यतीति सम्बन्धः ॥ २४ ॥ विशस्तेति । हे सौमित्रे ! त्वां विनेति शेषः । विशस्तकवचं हृतोत्तमाङ्गं मया निहतं, सैन्यं त्विति शेषः । रामो द्रक्ष्यतीति पूर्वेण सम्बन्धः ॥ २५-३० ॥ सुपत्रेति । सुपत्रवाजिताः सुपत्रैस्सञ्जातवेगाः ॥ ३१ ॥ ३२ ॥ विमर्दः सङ्घर्षः ॥ ३३ ॥ ३४ ॥

For Private And Personal Use Only

उभौ हीत्यादिसार्धश्लोक एकान्वयः । सुविक्रान्तौ सुष्ठुपराक्रमौ ॥ ३४ ॥ ३५ ॥ युयुधाते इत्याद्यर्धम् ॥३६॥ बलेति । बलशब्दो बलशत्रिन्द्रपरः । नामैकदेशे नामग्रहणात् ॥ ३७॥ ३८॥ सुसंप्रहृष्टाविति । शरौघः, मेघपक्षे जलौघः । शरशब्दो हि जलवाची, शरधिरिति समुद्रपर्यायात् ॥ ३९ ॥ ४० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाशीतितमः सर्गः ॥ ८८ ॥

उभौ हि बलसम्पन्नावुभौ विक्रमशालिनौ ॥ ३४ ॥ उभावपि सुविक्रान्तौ सर्वशस्त्रास्त्रकोविदौ । उभौ परमदुर्जेयावतुल्यबलतेजसौ ॥ ३५ ॥ युयुधाते तदा वीरौ ग्रहाविव नभोगतौ ॥३६॥ बलवृत्राविवाभीतौ युधि तौ दुष्प्रधर्षणौ । युयुधाते महात्मानौ तदा केसरिणाविव ॥ ३७॥ बहूनवसृजन्तौ हि मार्गणौघानवस्थितौ । नरराक्षससिंहौ तौ प्रहृष्टावभ्ययुध्यताम् ॥ ३८ ॥ सुसंप्रहृष्टौ नरराक्षसोत्तमौ जयैषिणौ मार्गणचापधारिणौ । परस्परं तौ प्रववर्षतुर्भृशं शरौघवर्षेण बलाहकाविव ॥ ३९ ॥ अभिप्रवृद्धौ युधि युद्धकोविदौ शरासिचण्डौ शितशस्त्रधारिणौ । अभीक्ष्णमाविव्यधतुर्महाबलौ महाहवे शम्बरवासवाविव ॥ ४० ॥ इत्यार्षे० श्रीमद्युद्धकाण्डे अष्टाशीतितमः सर्गः ॥८८॥

ततः शरं दाशरथिः सन्धायामित्रकर्शनः । ससर्ज राक्षसेन्द्राय क्रुद्धः सर्प इव श्वसन् ॥ १ ॥ तस्य ज्यातलनिर्घोषं स श्रुत्वा रावणात्मजः । विवर्णवदनो भूत्वा लक्ष्मणं समुदैक्षत ॥ २ ॥ तं विवर्णमुखं दृष्ट्वा राक्षसं रावणात्मजम् । सौमित्रिं युद्धसंयुक्तं प्रत्युवाच विभीषणः ॥ ३ ॥ निमित्तान्यनुपश्यामि यान्यस्मिन् रावणात्मजे । त्वर तेन महाबाहो भग्न एष न संशयः ॥ ४ ॥

अथ लक्ष्मणेन्द्रजितोः सुमहान् संप्रहारः—ततः शरमित्यादि ॥ १ ॥ २ ॥ तमिति । सौमित्रिं प्रति उद्दिश्य ॥ ३ ॥ निमित्तानीति । अस्मिन् यानि मुख

अतिविक्रान्तौ कृतपराक्रमौ ॥ ३५ ॥३६ ॥ बलवृत्राविवेत्यत्र बलशब्दः पुरन्दरवाची ॥३७–४०॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायाम् अष्टाशीतितमः सर्गः ॥ ८८ ॥ [सुसंप्रहृष्टावित्यादिश्लोकद्वयं सर्गान्त्यवृत्तभेदकत्वेन प्रक्षिप्तमिति सम्प्रदायः] ॥१॥२॥ युद्धसंयुक्तं युद्धजनकहर्षसंयुक्तम् ॥ ३ ॥ निमित्तानीति । अस्मिन्

वैवर्ण्यस्तब्धत्वादीनि निमित्तानि अनुपश्यामि, तैरयं भग्न इति जाने । तेन कारणेन त्वर त्वरस्व ॥ ४ ॥ ५ ॥ शक्राशनीति । सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः ॥६–८॥ किमिति । त्वं भ्रात्रा सह निबद्ध इति यत्, प्रथमे तद्युद्धे तस्मिन् युद्धे मत्पराक्रमं त्वन्निबन्धनरूपं न स्मरसि किम् ? यदा यत्र

ततः सन्धाय सौमित्रिर्बाणानग्निशिखोपमान् । मुमोच निशितांस्तस्मिन् सर्पानिव महाविषान् ॥५॥ शक्राशनिसमस्पर्शैर्लक्ष्मणेनाहतः शरैः । मुहूर्तमभवन्मूढः सर्वसंक्षुभितेन्द्रियः ॥ ६ ॥ उपलभ्य मुहूर्तेन संज्ञां प्रत्यागतेन्द्रियः । ददर्शावस्थितं वीरं वीरो दशरथात्मजम् ॥ ७ ॥ सोऽभिचक्राम सौमित्रिं रोषात् संरक्तलोचनः । अब्रवीच्चैनमासाद्य पुनः स परुषं वचः ॥ ८ ॥ किं न स्मरसि तद्युद्धे प्रथमे मत्पराक्रमम् । निबद्धस्त्वं सह भ्रात्रा यदा भुवि विवेष्टसे ॥ ९ ॥ युवां खलु महायुद्धे शक्राशनिसमैः शरैः । शायितौ प्रथमं भूमौ विसंज्ञौ सपुरस्सरौ ॥१०॥ स्मृतिर्वा नास्ति ते मन्ये व्यक्तं वा यमसादनम् । गन्तुमिच्छसि यस्मात्त्वं मां धर्षयितुमिच्छसि ॥ ११ ॥ यदि ते प्रथमे युद्धे न दृष्टो मत्पराक्रमः । अद्य ते दर्शयिष्यामि तिष्ठेदानीं व्यवस्थितः ॥ १२ ॥ इत्युक्त्वा सप्तभिर्बाणैरभिविव्याध लक्ष्मणम् । दशभिस्तु हनूमन्तं तीक्ष्णधारैः शरोत्तमैः ॥ १३ ॥ ततः शरशतेनैव सुप्रयुक्तेन वीर्यवान् । क्रोधाद्द्विगुणसंरब्धो निर्बिभेद विभीषणम् ॥ १४ ॥

युद्धकाले, विवेष्टसे विवेष्टितवानसि ॥ ९॥ तमेव पराक्रमं विशिनष्टि--युवामिति ॥१०॥ स्मृतिरिति । व्यक्तं नूनमित्यर्थः ॥११–१२॥ तत इति । क्रोधा

यानि मुखवैवर्ण्यादीनि निमित्तान्यनुपश्यामि तैरयं भग्न इति जाने, तेन कारणेन त्वर त्वरस्वेत्यर्थः ॥ ४ ॥ ५ ॥ सर्वसंक्षुभितेन्द्रियः संक्षुभितसर्वेन्द्रियः ॥ ६–८ ॥ किमिति । प्रथमे तद्युद्धे भ्रात्रा सह बद्ध इति यत् तत्पराक्रमं न स्मरसि किम् ? ॥ ९ ॥ तमेव पराक्रमं विशिनष्टि--युवामिति । युवामिति श्लोकद्वयस्य भातीति कार्थः स्पष्टः । वस्तुतस्तु--शरैर्युवां विसंज्ञौ भूमौ शायितौ तथापि ते नव यमसादनं वा यमलोकगमनं च स्मृतिर्वा भयरूपा स्मृतिश्च नास्तीति व्यक्तं मन्ये । कुतः ? यस्मान्मां धर्षयितुमिच्छसीति सम्बन्धः ॥ १०–१४ ॥

For Private And Personal Use Only

द्विगुणसंरब्ध इति । लक्ष्मणादिविषयरोषापेक्षया विभीषणविषये द्विगुणं कुपित इत्यर्थः ॥ १४ ॥ तदृष्ट्वेत्यादिसार्धश्लोक एकान्वयः । नैतत्किञ्चिदिति ब्रुवन् एतदकिञ्चित्करमिति ब्रुवन्नित्यर्थः ॥ १५ ॥ अभीतवदन इत्यादिसार्धश्लोकद्वयमेकान्वयम् । अकिञ्चित्करत्वमेवाह–नैवमिति ॥ १६–१९ ॥

तद्दृष्ट्वेन्द्रजिता कर्म कृतं रामानुजस्तदा । अचिन्तयित्वा प्रहसन् नैतत् किञ्चिदिति ब्रुवन् । मुमोच स शरान् घोरान् संगृह्य नरपुङ्गवः ॥१५॥ अभीतवदनः क्रुद्धो रावणिं लक्ष्मणो युधि । नैवं रणगताः शूराः प्रहरन्ते निशाचर ॥१६॥ लघवश्चाल्पवीर्याश्च सुखा हीमे शरास्तव । नैवं शूरास्तु युध्यन्ते समरे जयकांक्षिणः ॥ १७ ॥ इत्येवं तं ब्रुवाणस्तु शरवर्षैरवाकिरत् ॥ १८ ॥ तस्य बाणैः सुविध्वस्तं कवचं हेमभूषितम् । व्यशीर्यत रथोपस्थे ताराजालमिवाम्बरात् ॥ १९ ॥ विधूतवर्मा नाराचैर्बभूव स कृतव्रणः । इन्द्रजित् समरे वीरः प्ररूढ इव सानुमान् ॥ २० ॥ ततः शरसहस्रेण संक्रुद्धो रावणात्मजः । बिभेद समरे वीरं लक्ष्मणं भीमविक्रमः ॥ २१ ॥ व्यशीर्यत महादिव्यं कवचं लक्ष्मणस्य च । कृतप्रतिकृतान्योन्यं बभूवतुरभिद्रुतौ ॥ २२ ॥ अभीक्ष्णं निश्वसन्तौ तौ युद्ध्येतां तुमुलं युधि । शरसंकृत्तसर्वाङ्गौ सर्वतो रुधिरोक्षितौ ॥२३॥ सुदीर्घकालं तौ वीरावन्योन्यं निशितैः शरैः । ततक्षतुर्महात्मानौ रणकर्मविशारदौ ॥ २४ ॥ बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ । तौ शरौघैस्तदा कीर्णौ निकृत्तकवचध्वजौ । स्रवन्तौ रुधिरं चोष्णं जलं प्रस्रवणाविव ॥ २५ ॥ शरवर्षं ततो घोरं मुञ्चतोर्भीमनिस्वनम् । सासारयोरिवाकाशे नीलयोः कालमेघयोः ॥ २६ ॥

विधूतेति । प्ररूढः प्ररूढवृक्षः ॥ २० ॥ २१ ॥ व्यशीर्यतेति । कृते प्रतिकृतम् अन्योन्यं यस्मिन् कर्मणि तत्तथोक्तम् ॥ २२ ॥ युद्ध्येताम् अयुद्ध्येताम् ॥ २३ ॥ सुदीर्घकालमिति । ततक्षतुः अन्योन्यं बभञ्जतुः ॥ २४ ॥ बभूवतुरित्यादि । यत्तौ यत्नवन्तौ ॥ २५ ॥ शरवर्षमित्यादिश्लोकद्वयमेका

नैतत्किञ्चित्तदाऽब्रवीत् एतन्न किञ्चिदकिञ्चित्करमित्यब्रवीदित्यर्थः ॥ १५ ॥ अकिञ्चित्करत्वमेवाह–नैवमिति ॥ १६ ॥ एधंशब्दार्थो लघव इति । पुष्पमालावल्लघव इमे तव शरा मे सुखाः, न तु क्लेशदा इत्यर्थः ॥ १७–१९ ॥ प्ररूढ इव सानुमान् सानुमानिव प्ररूढः निश्चलः बभूव ॥ २० ॥ २१ ॥ कृतप्रतिकृतान्योन्यं कृते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

न्वयम् । सासारयोः सधारापातयोः । "धारासंपात आसारः" इत्यमरः ॥ २६–२८ ॥ व्यपेतदोषं व्यपगतमोहत्वदोषम् । अस्यन्तौ बाणान् क्षिपन्तौ ॥ २९–३१ ॥ धृतौ अवहितौ ॥ ३२ ॥ ३३ ॥ अन्य इति । तयोः अन्ये केचन बाणाः आकाशे सुनिशितैः शस्त्रैः सञ्जघट्टिरे सङ्घट्टिताः । अन्ये बाणाः

तयोरथ महान् कालो व्यत्ययाद्युध्यमानयोः । न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ॥२७॥ अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः । शरानुच्चावचाकारानन्तरिक्षे बबन्धतुः ॥२८॥ व्यपेतदोषमस्यन्तौ लघु चित्रं च सुष्ठु च । उभौ तौ तुमुलं घोरं चक्रतुर्नरराक्षसौ ॥ २९ ॥ तयोः पृथक्पृथग् भीमः शुश्रुवे तलनिस्वनः । प्रकम्पयन् जनं घोरो निर्घात इव दारुणः ॥ ३० ॥ स तयोर्भ्राजते शब्दस्तदा समरसक्तयोः । सुघोरयोर्निष्टनतोर्गगने मेघयोर्यथा ॥ ३१ ॥ सुवर्णपुङ्खैर्नाराचैर्बलवन्तौ कृतव्रणौ । प्रसुस्रुवाते रुधिरं कीर्तिमन्तौ जये धृतौ ॥ ३२ ॥ ते गात्रयोर्निपतिता रुक्मपुङ्खाः शरा युधि । असृङ्दिग्धा विनिष्पत्य विविशुर्धरणीतलम् ॥ ३३ ॥ अन्ये सुनिशितैः शस्त्रैराकाशे सञ्जघट्टिरे । बभञ्जुश्चिच्छिदुश्चान्ये तयोर्बाणाः सहस्रशः ॥३४॥ स बभूव रणो घोरस्तयोर्बाणमयश्चयः । अग्निभ्यामिव दीप्ताभ्यां सत्रे कुशमयश्चयः ॥ ३५ ॥ तयोः कृतव्रणौ देहौ शुशुभाते महात्मनोः । सपुष्पाविव निष्पत्रौ वने शाल्मलिकिंशुकौ ॥ ३६ ॥ चक्रतुस्तुमुलं घोरं सन्निपातं मुहुर्मुहुः । इन्द्रजिल्लक्ष्मणश्चैव परस्परवधैषिणौ ॥ ३७ ॥ लक्ष्मणो रावणिं युद्धे रावणिश्चापि लक्ष्मणम् । अन्योन्यं तावभिघ्नन्तौ न श्रमं प्रत्यपद्यताम् ॥ ३८ ॥

बाणान् सहस्रशः बभञ्जुः चिच्छिदुश्चेति सम्बन्धः ॥ ३४ ॥ सः रणः घोरो बभूव । यस्मिन् तयोर्बाणमयश्चयः सत्रे दीप्ताभ्यामग्निभ्यां सहितः कुशमयश्चय इवासीत् । अग्नी गार्हपत्याहवनीयौ ॥ ३५ ॥ ३६ ॥ सन्निपातं युद्धम् ॥ ३७ ॥ प्रत्यपद्यतां प्रत्यपद्येताम् ॥ ३८ ॥ ३९ ॥ ॥२७१॥

प्रतिकृतम् अन्योन्यं यस्मिन् कर्मणि तत्तथा ॥ २२–२६ ॥ महान् कालः अनेकदिनरूपः ॥ २७–३१ ॥ जये धृतौ दृढोत्साहौ ॥ ३२–३४ ॥ स रावणिः घोरो बभूव । तस्मिन् रणे तयोर्बाणमयः चयः सत्रे दीप्ताभ्यामग्निभ्यां सहितः कुशमयश्चय इव आस्ते ॥ ३५ ॥ ३६ ॥ सन्निपातं युद्धम् ॥ ३७ ॥ ३८ ॥

For Private And Personal Use Only

तयोरिति । बभ्राजुः । आर्षं परस्मैपदम् ॥४०-४२॥ इति श्रीगोविन्द॰श्रीरामायणभू॰ रत्नकिरी॰ युद्धकाण्डव्याख्याने एकोननवतितमः सर्गः ॥८९॥ अथेन्द्रजितो रथभङ्गः—युध्यमानौ त्वित्यादिश्लोकद्वयमेकान्वयम् । प्रभिन्नौ मत्तमातङ्गाविव परस्परगतौ परस्परं युद्धार्थं सक्तौ तौ लक्ष्मणेन्द्रजितौ

बाणजालैः शरीरस्थैरवगाढैस्तरस्विनौ । शुशुभाते महावीर्यौ प्ररूढाविव पर्वतौ ॥ ३९ ॥ तयो रुधिरसिक्तानि संवृतानि शरैर्भृशम् । बभ्राजुः सर्वगात्राणि ज्वलन्त इव पावकाः ॥ ४० ॥ तयोरथ महान् कालो व्यत्ययाद्युध्यमानयोः । न च तौ युद्धवैमुख्यं श्रमं वाप्युपजग्मतुः ॥ ४१ ॥ अथ समरपरिश्रमं निहन्तुं समरमुखेष्वजितस्य लक्ष्मणस्य । प्रियहितमुपपादयन् महौजाः समरमुपेत्य विभीषणोऽवतस्थे ॥ ४२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोननवतितमः सर्गः ॥ ८९ ॥

युध्यमानौ तु तौ दृष्ट्वा प्रसक्तौ नरराक्षसौ । प्रभिन्नाविव मातङ्गौ परस्परवधैषिणौ ॥ १ ॥
तौ द्रष्टुकामः सङ्ग्रामे परस्परगतौ बली । शूरः स रावणभ्राता तस्थौ सङ्ग्राममूर्धनि ॥ २ ॥
ततो विस्फारयामास महद्धनुरवस्थितः । उत्ससर्ज च तीक्ष्णाग्रान् राक्षसेषु महाशरान् ॥ ३ ॥

प्रथमं द्रष्टुकामः स विभीषणस्तौ दृष्ट्वा संग्राममूर्धनि योद्धुं तस्थावित्यन्वयः। स्वयं प्रथमं युद्धं कर्तुमुद्युक्तोऽपि तयोर्बलाधिक्यं द्रष्टुं तूष्णीं स्थितः। तयोर्बलतौल्ये दृष्टे स्वस्य रामविषयकिञ्चित्कारार्थमिदानीं युद्धाय तस्थावित्यर्थः ॥ १॥२॥ तत इति । धनुः तादात्विकं किंचित्। विभीषणस्य केवलगदा

प्ररूढौ रूढवृक्षौ ॥ ३९-४१ ॥ समरपरिश्रमम्, इन्द्रजितमिति शेषः ॥ ४२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोननवतितमः सर्गः ॥ ८९ ॥ युद्ध्यमानावित्यादि श्लोकद्वयमेकं वाक्यम् । प्रभिन्नौ मत्तौ । परस्परगतौ परस्परं युद्धार्थं सक्तौ । लक्ष्मणेन्द्रजितौ प्रथमं द्रष्टुकामः स विभीषणः तौ दृष्ट्वा सङ्ग्राममूर्धनि योद्धुं तस्थावित्यर्थः ॥ १-३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पाणित्वात् ॥ ३ ॥ ते शरा इति । वज्राणि अशनयः ॥ ४–७ ॥ परायणं गतिः ॥ ८॥ ९ ॥ उक्तानुक्तांश्च राक्षसान् युद्धे हतान् कांश्चित्परिगणयत्यु त्साहनाय–प्रहस्त इत्यादिना श्लोकपञ्चकेन । अकम्पनः कम्पनश्च राक्षसौ सर्वत्र निहत इत्यनेनान्वयः । देवान्तकनरान्तकावित्यत्र निहताविति विपरि

ते शराः शिखिसङ्काशा निपतन्तः समाहिताः । राक्षसान् दारयामासुर्वज्राणीव महागिरीन् ॥४॥ विभीषणस्यानु चरास्तेऽपि शूलासिपट्टिशैः । चिच्छिदुः समरे वीरान् राक्षसान् राक्षसोत्तमाः ॥ ५ ॥ राक्षसैस्तैः परिवृतः स तदा तु विभीषणः । बभौ मध्ये प्रहृष्टानां कलभानामिव द्विपः ॥ ६ ॥ ततः सञ्चोदयानो वै हरीन् रक्षो रणप्रियान् । उवाच वचनं काले कालज्ञो रक्षसां वरः ॥ ७ ॥ एकोऽयं राक्षसेन्द्रस्य परायणमिव स्थितः । एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः॥८॥ अस्मिन् विनिहते पापे राक्षसे रणमूर्धनि । रावणं वर्जयित्वा तु शेषमस्य हतं बलम् ॥९॥ प्रहस्तो निहतो वीरो निकुम्भश्च महाबलः। कुम्भकर्णश्च कुम्भश्च धूम्राक्षश्च निशाचरः॥१०॥ जम्बुमाली महामाली तीक्ष्णवेगोऽशनिप्रभः । सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्षसः ॥ ११ ॥ संह्रादी विकटो निघ्नस्तपनो दम एव च । प्रघासः प्रघसश्चैव प्रजङ्घो जङ्घ एव च ॥ १२ ॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् । विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः ॥१३॥ अकम्पनः सुपार्श्वश्च चक्रमाली च राक्षसः । कम्पनः सत्त्ववन्तौ तौ देवान्तकनरान्तकौ ॥ १४ ॥ एतान्निहत्यातिबलान् बहून् राक्षससत्तमान् । बाहुभ्यां सागरं तीर्त्वा लङ्घ्यतां गोष्पदं लघु ॥ १५ ॥

णामः कार्यः ॥ १०-१४ ॥ एतान् राक्षससत्तमान् निहत्य स्थितानां भवताम् इन्द्रजितो हननम्, बाहुभ्यां सागरं तीर्त्वा स्थितस्य पुंसो गोष्पदतरण मिव सुकरमिति निदर्शना । बाहुभ्यां सागरं तीर्त्वैव एतानतिबलान् बहून् राक्षससत्तमान् निहत्य स्थितैः भवद्भिः गोष्पदमिव लघु इन्द्रजिद्धननरूपं

वज्राणि अशनयः ॥ ४–१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्वल्पं कार्यं लङ्घ्यतामित्यन्वयः ॥ १५ ॥ एतावदेव इन्द्रजिन्मात्रमेव ॥ १६ ॥ जनितुः जनयितुः, पितृव्यस्येत्यर्थः ॥ १७ ॥ हन्तुकामस्येति । बाष्पं

एतावदेव शेषं वो जेतव्यमिह वानराः । हताः सर्वे समागम्य राक्षसा बलदर्पिताः ॥ १६ ॥ अयुक्तं निधनं कर्तुं पुत्रस्य जनितुर्मम । घृणामपास्य रामार्थे निहन्यां भ्रातुरात्मजम् ॥ १७ ॥ हन्तुकामस्य मे बाष्पं चक्षुश्चैव निरुद्ध्यति । तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति । वानरा घ्नत सम्भूय भृत्यानस्य समीपगान् ॥ १८ ॥ इति तेनातियशसा राक्षसेनाभिचोदिताः । वानरेन्द्रा जहृषिरे लाङ्गूलानि च विव्यधुः ॥ १९ ॥ ततस्ते कपिशार्दूलाः क्ष्वेलन्तश्च मुहुर्मुहुः । मुमुचुर्विविधान्नादान् मेघान् दृष्ट्वेव बर्हिणः ॥२०॥ जाम्बवानपि तैः सर्वैः स्वयूथैरपि संवृतः । अश्मभिस्ताडयामास नखैर्दन्तैश्च राक्षसान् ॥ २१ ॥ निघ्नन्तमृक्षाधिपतिं राक्षसास्ते महाबलाः । परिवव्रुर्भयं त्यक्त्वा तमनेकविधायुधाः ॥ २२ ॥ शरैः परशुभिस्तीक्ष्णैः पट्टिशैर्यष्टितोमरैः । जाम्बवन्तं मृधे जघ्नुर्निघ्नन्तं राक्षसीं चमूम् ॥ २३ ॥ स सम्प्रहारस्तुमुलः सञ्जज्ञे कपिरक्षसाम् । देवासुराणां क्रुद्धानां यथा भीमो महास्वनः ॥ २४ ॥ हनुमानपि संक्रुद्धः सालमुत्पाट्य वीर्यवान् । [स लक्ष्मणं स्वयं पृष्ठादवरोप्य महामनाः ॥] रक्षसां कदनं चक्रे समासाद्य सहस्रशः ॥ २५ ॥ स दत्त्वा तुमुलं युद्धं पितृव्यस्येन्द्रजिद्युधि । लक्ष्मणं परवीरघ्नं पुनरेवाभ्यधावत ॥ २६ ॥ तौ प्रयुद्धौ तदा वीरौ मृधे लक्ष्मणराक्षसौ । शरौघानभिवर्षन्तौ जघ्नतुस्तौ परस्परम् ॥ २७ ॥ अभीक्ष्णमन्तर्दधतुः शरजालैर्महाबलौ । चन्द्रादित्याविवोष्णान्ते यथा मेघैस्तरस्विनौ ॥ २८ ॥

कर्तृ, चक्षुः निरुद्ध्यति निरुणद्धि ॥ १८–२३ ॥ यथा भीम इति । महास्वनो देवानां संप्रहारो यथा तथेत्यर्थः ॥ २४ ॥ हनुमानिति । अत्र हनुमतो

एतावदेवेति । एतावदेव इन्द्रजिन्मात्रमेव शेषम् ॥ १६ ॥ जनितुः पितृव्यस्य ॥ १७ ॥ हन्तुकामस्येति । बाष्पं कर्तृ । निरुध्यति निरुणद्धि ॥ १८–२४ ॥ हनुमानपीति । अत्र हनुमतो युद्धकथनात विश्रमार्थं स्वस्मिन स्थितो लक्ष्मणोऽवरोपित इत्यवगम्यते ॥ २५ ॥ २६ ॥ प्रयुद्धौ योद्धुमुपक्रान्तौ ॥२७॥ उष्णान्ते वर्षादौ ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युद्धकथनात् किंचिद्विश्रमार्थं तस्य पृष्ठादवरूढो लक्ष्मण इत्यवगम्यते । राक्षसशः कदनमित्यन्वयः ॥ २५-२८ ॥ न ह्यादानमित्यादिश्लोकद्वयमेकान्वयम् । आदानं बाणस्य तूणादुद्धरणम् । सन्धानम् उद्धृतस्य बाणस्य धनुष्यवस्थापनम् । धनुषो वा परिग्रहः सव्यापसव्यत्वेन कार्मुकग्रहणम् । बाणानां

न ह्यादानं न सन्धानं धनुषो वा परिग्रहः । न विप्रमोक्षो बाणानां न विकर्षो न विग्रहः ॥२९॥ न मुष्टिप्रतिसन्धानं न लक्ष्यप्रतिपादनम् । अदृश्यत तयोस्तत्र युध्यतोः पाणिलाघवात् ॥ ३० ॥ चापवेगविनिर्मुक्तबाणजालैः समन्ततः । अन्तरिक्षे हि सञ्छन्ने न रूपाणि चकाशिरे ॥ ३१ ॥ लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम् । अव्यवस्था भवत्युग्रा ताभ्यामन्योन्यविग्रहे ॥ ३२ ॥ ताभ्यामुभाभ्यां तरसा विसृष्टैर्विशिखैः शितैः । निरन्तरमिवाकाशं बभूव तमसावृतम् ॥ ३३ ॥

विप्रमोक्षः विसर्जनम् । विकर्षः आकर्णग्रहणम् । विग्रहः आलीढाद्यवस्थानविशेषः, सावष्टम्भावस्थानं वा, धनुर्ज्यादीनां प्रविभागो वा । "विग्रहः समरे काये विरोधप्रविभागयोः" इति विश्वः । मुष्टिप्रतिसन्धानं ज्याकार्मुकयोर्मुष्टिबन्धनम् । लक्ष्यप्रतिपादनं लक्ष्यप्रापणम्, लक्ष्यवेध इति यावत् ॥२९॥३०॥ चापवेगेति । रूप्यन्त इति रूपाणि वस्तूनि । बाणव्यतिरेकेण न किंचित्तदानीं दृश्यत इति भावः ॥ ३१ ॥ लक्ष्मण इति । लोकव्यवहारानुसारेणात्र क्रियाकारकसम्बन्धः । लक्ष्मणो रावणिं रावणिश्चापि लक्ष्मणं प्राप्य ताभ्यामन्योन्यविग्रहे अन्योन्याभिभवे उग्रा अव्यवस्था भवति । अन्योन्यप्रतिावय

चन्द्रादित्याविव स्थितौ महाबलौ मेघैर्यथा मेघैरिव शरजालैः अभीक्ष्णम् अन्तर्दधतुः अदृश्यौ बभूवतुः ॥२८॥ न ह्यादानमिति । धनुषो वा परिग्रहः सव्यापसव्येन कार्मुकग्रहणम् । विग्रहः आलीढाद्यवस्थानविशेषः । मुष्टेः प्रतिसन्धानं ज्याकार्मुकयोर्मुष्टिबन्धनम् । लक्ष्यप्रतिपादनं लक्ष्यवेधः ॥ २९ ॥ ३० ॥ चापवेगेति । रूप्यन्त इति रूपाणि । बाणव्यतिरेकेण न किञ्चित्तदानीमदृश्यतेति भावः ॥ ३१ ॥ लक्ष्मण इति । लक्ष्मणश्च रावणिं रावणिश्चापि लक्ष्मणं प्राप्य, अयुध्येतामिति शेषः ।

स०-लक्ष्मणो रावणिं प्राप्य रावणिरपि लक्ष्मणं प्राप्येत्येवं स्थिताभ्यां ताभ्याम् अन्योन्यविग्रहे युद्धे उग्रा दुःखकारणत्वात्क्रूरा अव्यवस्था इममिदानीं जेष्यामीति सङ्कल्पासिद्धिरूपा भवति अभूत् । एवं चोक्तरीत्याऽव्यवस्थाया उग्रत्वे सम्भवति सति 'उग्रत्वस्य निरूपयितुमशक्यत्वात्' इति यत्नागोजिभट्टेनोक्तं तदसङ्गतम् । उग्रत्वस्य निरूपयितुमशक्यत्वादित्यनेनैव वैयर्थ्यलाभे उग्रेति विशेषणवैयर्थ्यांचेति दूषणान्तरं तथा कथनं त्वसङ्गततरमिति ज्ञेयम् ॥ ३२ ॥

॥२७१॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेनं निगृह्णाति अयं वा एनमिति निश्चयो नाभवदित्यर्थः । यद्वा रावणिं लक्ष्मणो रावणिश्चापि लक्ष्मणं प्राप्य, अयुध्येतामिति शेषः । ताभ्यां तथा युद्धं कुर्वद्भ्याम्, अन्योन्यविग्रहे परस्परप्रहारे क्रियमाणे उग्रा अव्यवस्था भवति, क्षणे क्षणे जयपराजयनियमो नाभूदित्यर्थः ॥ ३२ ॥ ३३ ॥ तैः पतद्भि

तैः पतद्भिश्च बहुभिस्तयोः शरशतैः शितैः । दिशश्च प्रदिशश्चैव बभूवुः शरसङ्कुलाः ॥ ३४ ॥ तमसा संवृतं सर्वमासीद्भीमतरं महत् । अस्तं गते सहस्रांशौ संवृतं तमसेव हि ॥ ३५ ॥ रुधिरौघमहानद्यः प्रावर्तन्त सहस्रशः । क्रव्यादा दारुणा वाग्भिश्चिक्षिपुर्भीमनिस्वनम् ॥ ३६ ॥ न तदानीं ववौ वायुर्न च जज्वाल पावकः । स्वस्त्यस्तु लोकेभ्य इति जजल्पुश्च महर्षयः ॥ ३७ ॥ सम्पेतुश्चात्र सम्प्राप्ता गन्धर्वाः सह चारणैः ॥ ३८ ॥ अथ राक्षससिंहस्य कृष्णान् कनकभूषणान् । शरैश्चतुर्भिः सौमित्रिर्विव्याध चतुरो हयान् ॥ ३९ ॥ ततोऽपरेण भल्लेन शितेन निशितेन च । सम्पूर्णायतमुक्तेन सुपत्रेण सुवर्चसा ॥ ४० ॥ महेन्द्राशनिकल्पेन सुतस्य विचरिष्यतः । स तेन बाणाशनिना तलशब्दानुनादिना ॥ ४१ ॥ लाघवाद्राघवः श्रीमान् शिरः कायादपाहरत् ॥ ४२ ॥ स यन्तरि महातेजा हते मन्दोदरीसुतः ॥ ४३ ॥ स्वयं सारथ्यमकरोत् पुनश्च धनुरस्पृशत् । तदद्भुतमभूत्तत्र सामर्थ्यं पश्यतां युधि ॥ ४४ ॥ हयेषु व्यग्रहस्तं तं विव्याध निशितैः शरैः । धनुष्यथ पुनर्व्यग्रे हयेषु मुमुचे शरान् ॥ ४५ ॥

रित्यादिश्लोकद्वयमेकान्वयम् । शरशतैः निमित्तभूतैः । महत् अत्यन्तम् ॥ ३४ ॥ ३५ ॥ रुधिरौघेति । चिक्षिपुः चक्रुः ॥ ३६ ॥ न तदानीमित्यादि । अत्र युद्धस्थले पूर्वं संप्राप्ताः गन्धर्वाः चारणैः सह संपेतुः, अन्यत्र गता इत्यर्थः । अतिघोरयुद्धदर्शनभयादिति भावः ॥ ३७–३९ ॥ ततोऽपरेणेत्यादि

तथा युद्धं कुर्वद्भ्याम् अन्योन्यविग्रहे अन्योन्याभिभवे उग्रा अव्यवस्था भवति अभूत्, अन्योन्यमासौ अयमेनं निगृह्णाति अयं वा एनं निगृह्णातीति निश्चयो नाभव दित्यर्थः ॥ ३२–३९ ॥ तत इति । सम्पूर्णायतमुक्तेन संपूर्णाकृष्टमुक्तेन ॥ ४० ॥ विचरिष्यतः रथसञ्चारं करिष्यतः । तलशब्दानुनादिना तलं ज्याघातवारणं तस्य ज्याघट्टनजो यः शब्दः तस्यानुनादो यस्यास्ति तेन ॥ ४१–४४ ॥ हयेषु हयप्रेरणविषये । व्यग्रहस्तं, दृष्ट्वा तत्समय इति शेषः ॥ ४५ ॥ ४६ ॥

सार्धश्लोकद्वयमेकान्वयम् । संपूर्णायतमुक्तेन संपूर्णाकृष्टमुक्तेन ॥ ४०–४५ ॥ छिद्रेषु रन्ध्रेषु बाणेषु बाणप्रयोगेषु शीघ्रविक्रम इत्यन्वयः ॥ ४६ ॥ समरोद्धर्षं युद्धगर्वम् ॥ ४७–४९ ॥ समहावीर्याः महावीर्यसहिताः ॥ ५० ॥ रक्तं शोणितम् ॥ ५१–५२ ॥ तत इति । पदातिनं पदाभ्यामापतन्तं

छिद्रेषु तेषु बाणेषु सौमित्रिः शीघ्रविक्रमः । अर्दयामास बाणौघैर्विचरन्तमभीतवत् ॥ ४६ ॥ निहतं सारथिं दृष्ट्वा समरे रावणात्मजः । प्रजहौ समरोद्धर्षं विषण्णः स बभूव ह ॥ ४७ ॥ विषण्णवदनं दृष्ट्वा राक्षसं हरियूथपाः । ततः परमसंहृष्टा लक्ष्मणं चाभ्यपूजयन् ॥४८॥ ततः प्रमाथी शरभो रभसो गन्धमादनः । अमृष्यमाणाश्चत्वारश्चक्रुर्वेगं हरीश्वराः ॥ ४९ ॥ ते चास्य हयमुख्येषु तूर्णमुत्प्लुत्य वानराः । चतुर्षु समहावीर्या निपेतुर्भीमविक्रमाः ॥ ५० ॥ तेषामधिष्ठितानां तैर्वानरैः पर्वतोपमैः । मुखेभ्यो रुधिरं रक्तं हयानां समवर्तत ॥ ५१ ॥ ते हया मथिता भग्ना व्यसवो धरणीं गताः । ते निहत्य हयांस्तस्य प्रमथ्य च महारथम् ॥५२॥ पुनरुत्पत्य वेगेन तस्थुर्लक्ष्मणपार्श्वतः । स हताश्वादवप्लुत्य रथान्मथितसारथेः । शरवर्षेण सौमित्रिमभ्यधावत रावणिः ॥ ५३ ॥ ततो महेन्द्रप्रतिमः स लक्ष्मणः पदातिनं तं निशितैः शरोत्तमैः । सृजन्तमाजौ निशितान् शरोत्तमान् भृशं तदा बाणगणैर्न्यवारयत् ॥ ५४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे नवतितमः सर्गः ॥ ९० ॥

स हताश्वो महातेजा भूमौ तिष्ठन्निशाचरः । इन्द्रजित् परमक्रुद्धः सम्प्रजज्वाल तेजसा ॥ १ ॥
तौ धन्विनौ जिघांसन्तावन्योन्यमिषुभिर्भृशम् । विजयेनाभिनिष्क्रान्तौ वने गजवृषाविव ॥ २ ॥

गच्छन्तम् । "अत सातत्यगमने" इत्यस्माण्णिनिः॥५४॥ इति श्रीगोविन्द० श्रीरामा० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवतितमः सर्गः॥९०॥ अथेन्द्रजिद्वधः–स हताश्व इत्यादि ॥ १ ॥ विजयेनेति प्रयोजने तृतीया । विजयायेत्यर्थः । अभिनिष्क्रान्तौ, बभूवतुरिति शेषः । गजवृषाविव गज

समरोद्धर्षं समरोत्साहम् । प्रजहौ त्यक्तवान्॥४७–५४॥इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां नवतितमः सर्गः॥९०॥ ॥ १ ॥ ताविति । विजयेन विजयहेतुना । अभिनिष्क्रान्तौ अभिमुखमधावताम् ॥ २ ॥

For Private And Personal Use Only

श्रेष्ठाविव । यद्वा किंचिद्धीनबलत्वादिन्द्रजितो वृषभतुल्यत्वम् ॥२॥ सम्पतन्तः परितः सञ्चरन्त इत्यर्थः ॥३॥ स्तुवानः स्तुवन् । हर्षमाणः, आर्षः शानच्

निबर्हयन्तश्चान्योन्यं ते राक्षसवनौकसः । भर्तारं न जहुर्युद्धे सम्पतन्तस्ततस्ततः ॥ ३ ॥ ततस्तान् राक्षसान् सर्वान् हर्षयन् रावणात्मजः । स्तुवानो हर्षमाणश्च इदं वचनमब्रवीत् ॥ ४ ॥ तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः । नेह विज्ञायते स्वो वा परो वा राक्षसोत्तमाः ॥ ५ ॥ धृष्टं भवन्तो युध्यन्तु हरीणां मोहनाय वै । अहं तु रथमास्थाय आगमिष्यामि संयुगम् ॥६॥ तथा भवन्तः कुर्वन्तु यथेमे काननौकसः । न युद्ध्येयुर्दुरात्मानः प्रविष्टे नगरं मयि ॥ ७ ॥ इत्युक्त्वा रावणसुतो वञ्चयित्वा वनौकसः । प्रविवेश पुरीं लङ्कां रथहेतोरमित्रहा ॥ ८ ॥ स रथं भूषयित्वा तु रुचिरं हेमभूषितम् । प्रासासिशतसम्पूर्णं युक्तं परमवाजिभिः ॥ ९ ॥ अधिष्ठितं हयज्ञेन सूतेनाप्तोपदेशिना । आरुरोह महातेजा रावणिः समितिञ्जयः ॥ १० ॥ स राक्षसगणैर्मुख्यैर्वृतो मन्दोदरीसुतः । निर्ययौ नगरात्तूर्णं कृतान्तबलचोदितः ॥ ११ ॥ सोऽभिनिष्क्रम्य नगरादिन्द्रजित् परवीरहा । अभ्યयाज्जवनैरश्वै र्लक्ष्मणं सविभीषणम् ॥ १२ ॥ ततो रथस्थमालोक्य सौमित्री रावणात्मजम् । वानराश्च महावीर्या राक्षसश्च विभीषणः । विस्मयं परमं जग्मुर्लाघवात्तस्य धीमतः ॥ १३ ॥

॥ ४ ॥ ५ ॥ धृष्टमिति । मोहनाय मन्निर्गमनापरिज्ञानाय ॥ ६–८ ॥ स रथमित्यादिश्लोकद्वयमेकान्वयम् । भूषयित्वा स्वतेजसा भूषयित्वा । आप्तोपदेशिना हितोपदेशिना ॥ ९–१२ ॥ तत इत्यादिसार्धश्लोक एकान्वयः । ततः तस्माद्युद्धप्रदेशात् ॥ १३–१७ ॥

निबर्हयन्तः मारयन्तः ॥ ३ ॥ स्तुवानः स्तुवन् ॥ ४ ॥ बहुलेन तमसा दिशः संसक्ताः संवृताः । एवं चास्माकं बलकरी रात्रिरागतेति भावः ॥ ५ ॥ धृष्टमिति । मोहनाय गमनापरिज्ञानाय ॥ ६ ॥ प्रविष्टे प्रवेष्टुमुपक्रान्ते, न युध्येयुः मम नगरप्रवेशविघातार्थं मया सह वानरा यथा युद्धं न कुर्युः तथा भवन्तः कुर्वन्त्वि त्यर्थः ॥ ७-९ ॥ हयज्ञेन अश्वहृदयज्ञेन । आप्तं हितमुपदेष्टुं शीलमस्त्यस्य, तेन ॥ १०-१६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वरन्निवेति । इवशब्दो वाक्यालङ्कारे । निरकृन्तत अच्छिनत् ॥१८–२३ ॥ रामानु०–स भिन्नवर्मेति । अनेन पुनश्च कवचान्तरमपि स्वीकृतवानित्यवगम्यते ॥ २१ ॥

रावणिश्चापि संक्रुद्धो रणे वानरयूथपान् । पातयामास बाणौघैः शतशोऽथ सहस्रशः ॥ १४ ॥ स मण्डलीकृतधनू रावणिः समितिञ्जयः । हरीनभ्यहनत् क्रुद्धः परं लाघवमास्थितः ॥१५॥ ते वध्यमाना हरयो नाराचैर्भीमविक्रमाः । सौमित्रिं शरणं प्राप्ताः प्रजापतिमिव प्रजाः ॥ १६ ॥ ततः समरकोपेन ज्वलितो रघुनन्दनः । चिच्छेद कार्मुकं तस्य दर्शयन् पाणिलाघवम् ॥ १७ ॥ सोऽन्यत् कार्मुकमादाय सज्यं चक्रे त्वरन्निव । तदप्यस्य त्रिभिर्बाणैर्लक्ष्मणो निरकृन्तत ॥ १८ ॥ अथैनं छिन्नधन्वानमाशीविषविषोपमैः । विव्याधोरसि सौमित्री रावणिं पञ्चभिः शरैः ॥१९॥ ते तस्य कायं निर्भिद्य महाकार्मुकनिस्सृताः । निपेतुर्धरणीं बाणा रक्ता इव महोरगाः ॥ २० ॥ स भिन्नवर्मा रुधिरं वमन् वक्त्रेण रावणिः । जग्राह कार्मुकश्रेष्ठं दृढज्यं बलवत्तरम् ॥२१॥ स लक्ष्मणं समुद्दिश्य परं लाघवमास्थितः । ववर्ष शरवर्षाणि वर्षाणीव पुरन्दरः ॥ २२ ॥ मुक्तमिन्द्रजिता तत्तु शरवर्षमरिन्दमः । अवारयदसम्भ्रान्तो लक्ष्मणः सुदुरासदम् ॥ २३ ॥ दर्शयामास च तदा रावणिं रघुनन्दनः । असम्भ्रान्तो महातेजास्तदद्भुतमिवाभवत् ॥२४॥ ततस्तान् राक्षसान् सर्वांस्त्रिभिरेकैकमाहवे ॥२५॥ अविध्यत् परमक्रुद्धः शीघ्रास्त्रं सम्प्रदर्शयन् । राक्षसेन्द्रसुतं चापि बाणौघैः समताडयत् ॥२६॥ सोऽतिविद्धो बलवता शत्रुणा शत्रुघातिना । असक्तं प्रेषयामास लक्ष्मणाय बहून् शरान् २७

दर्शयामास, पराक्रममिति शेषः ॥ २४ ॥ रामानु०–स दर्शयामासेति । हस्तलाघवमिति शेषः । रावणिं हस्तलाघवं दर्शयामासेति सम्बन्धः ॥ २४ ॥ ततस्तानित्यादिसार्धश्लोक एकान्वयः । शीघ्रास्त्रं शीघ्रमन्त्रम् ॥ २५ ॥ २६ ॥ असक्तम् अव्यासङ्गम्, अविलम्बितं वा ॥ २७ ॥

समरकोपेन रावणिसमरजन्यकोपेन ॥ १७ ॥ त्वरन्निव शीघ्रमेव ॥ १८ ॥ १९ ॥ रक्ताः, बाणानामपि रुधिरसम्बन्धाद्रक्तत्वम् ॥ २०–२३ ॥ दर्शयामास, आत्मपौरुषमिति शेषः ॥ २४–२६ ॥ असक्तं सन्ततम् ॥ २७ ॥ २८ ॥

For Private And Personal Use Only

तानप्रासानित्यादिसार्धश्लोक एकान्वयः । रथिनोऽस्य रावणेः सारथेरित्यन्वयः ॥ २८ ॥ अविक्लवाः अनाकुलाः । शिक्षापाटवातिशयादिति मन्तव्यम् ॥ २९-३१ ॥ विलयं नाशम् ॥ ३२ ॥ अभेद्येत्यादिसार्धश्लोकः । अभेद्यकवचमित्यनेन पूर्वकवचस्य भग्नत्वात् कवचान्तरं धृतमिति गम्यते ।

तानप्रासान् शितैर्बाणैश्चिच्छेद रघुनन्दनः । सारथेरस्य च रणे रथिनो रथसत्तमः । शिरो जहार धर्मात्मा भल्लेनानतपर्वणा ॥ २८ ॥ अमृतास्ते हयास्तत्र रथमूहुरविक्लवाः । मण्डलान्यभिधावन्तस्तदद्भुतमिवाभवत् ॥ २९ ॥ अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः । प्रत्यविध्यद्धयांस्तस्य शरैर्वित्रासयन् रणे ॥ ३० ॥ अमृष्यमाणस्तत्कर्म रावणस्य सुतो बली । विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणम् ॥ ३१ ॥ ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः । विलयं जग्मुराहत्य कवचं काञ्चनप्रभम् ॥ ३२ ॥ अभेद्यकवचं मत्वा लक्ष्मणं रावणात्मजः । ललाटे लक्ष्मणं बाणैः सुपुङ्खैस्त्रिभिरिन्द्रजित् । अविध्यत् परमक्रुद्धः शीघ्रास्त्रं च प्रदर्शयन् ॥ ३३ ॥ तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनन्दनः । रणाग्रे समरश्लाघी त्रिशृङ्ग इव पर्वतः ॥ ३४ ॥ स तथा ह्यर्दितो बाणै राक्षसेन महामृधे । तमाशु प्रतिविव्याध लक्ष्मणः पञ्चभिः शरैः । विकृष्येन्द्रजितो युद्धे वदने शुभकुण्डले ॥ ३५ ॥ लक्ष्मणेन्द्रजितौ वीरौ महाबलशरासनौ । अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीमविक्रमौ ॥ ३६ ॥ ततः शोणितदिग्धाङ्गौ लक्ष्मणेन्द्रजितावुभौ । रणे तौ रेजतुर्वीरौ पुष्पिताविव किंशुकौ ॥ ३७ ॥

शीघ्रास्त्रं च प्रदर्शयन् आत्मनः शीघ्रास्त्रत्वं प्रदर्शयन्नित्यर्थः ॥३३॥ समरं श्लाघत इति समरश्लाघी, समरप्रिय इत्यर्थः । पृषत्कैः बाणैः ॥ ३४ ॥ स तथेत्यादिसार्धश्लोक एकान्वयः । विकृष्य धनुराकृष्य ॥३५॥ लक्ष्मणेन्द्रजितावित्यादि । विशिखैः विविधशिखैः, करवीरपत्राद्याकारामैरित्यर्थः॥३६॥३७॥

अमृताः असारथयः । अविक्लवाः अनाकुलाः ॥ २९-३२ ॥ अभेद्यकवचमित्यनेन पूर्वं धृतकवचस्य विशीर्णत्वात्कवचान्तरं धृतमिति गम्यते ॥ ३३ ॥ समरश्लाघी समरं श्लाघत इति, समरप्रिय इत्यर्थः ॥ ३४ ॥ स इति । युद्धे धनुर्विकृष्य शरैरिन्द्रजितो वदने विव्याधेति सम्बन्धः ॥ ३५ ॥ विशिखैः विशिष्टशिखैः, निशितैरिति यावत् ॥ ३६ ॥ ३७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताविति । जये कृतभावावित्यन्वयः ॥ ३८–४१ ॥ रथशक्तिं रथेऽवस्थितां शक्तिम् ॥ ४२ ॥ ४३ ॥ दृढधनुः दृढधन्वा । समासान्तविधेरनित्यत्वात् साधुः ॥ ४४ ॥ निमित्तगाः लक्ष्यगाः । "वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुः" इति निघण्टुः ॥ ४५ ॥ रक्षसां मध्य आदद इत्यन्वयः ॥४६॥

तौ परस्परमभ्येत्य सर्वगात्रेषु धन्विनौ । घोरैर्विव्यधतुर्बाणैः कृतभावावुभौ जये ॥ ३८ ॥ ततः समरकोपेन संयुक्तो रावणात्मजः । विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे ॥ ३९ ॥ अयोमुखैस्त्रिभिर्विद्ध्वा राक्षसेन्द्रं विभीषणम् । एकैकेनाभिविव्याध तान् सर्वान् हरियूथपान् ॥ ४० ॥ तस्मै दृढतरं क्रुद्धो जघान गदया हयान् । विभीषणो महातेजा रावणेः स दुरात्मनः ॥ ४१ ॥ स हताश्वादवप्लुत्य रथान्निहतसारथेः । रथशक्तिं महातेजाः पितृव्याय मुमोच ह ॥ ४२ ॥ तामापतन्तीं सम्प्रेक्ष्य सुमित्रानन्दवर्धनः । चिच्छेद निशितैर्बाणैर्दशधा साऽपतद्भुवि ॥ ४३ ॥ तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः । वज्रस्पर्शसमान् पञ्च ससर्जोरसि मार्गणान् ॥ ४४ ॥ ते तस्य कायं निर्भिद्य रुक्मपुङ्खा निमित्तगाः । बभूवुर्लोहितादिग्धा रक्ता इव महोरगाः ॥ ४५ ॥ स पितृव्याय संक्रुद्ध इन्द्रजिच्छरमाददे । उत्तमं रक्षसां मध्ये यमदत्तं महाबलः ॥ ४६ ॥ तं समीक्ष्य महातेजा महेषुं तेन संहितम् । लक्ष्मणोऽप्याददे बाणमन्यं भीमपराक्रमः ॥ ४७ ॥ कुबेरेण स्वयं स्वप्ने स्वस्मै दत्तं महात्मना । दुर्जयं दुर्विषह्यं च सेन्द्रैरपि सुरासुरैः ॥ ४८ ॥ तयोस्ते धनुषी श्रेष्ठे बाहुभिः परिघोपमैः । विकृष्यमाणे बलवत् क्रौञ्चाविव चुकूजतुः ॥ ४९ ॥ ताभ्यां तौ धनुषि श्रेष्ठे संहितौ सायकोत्तमौ । विकृष्यमाणौ वीराभ्यां भृशं जज्वलतुः श्रिया ॥ ५० ॥

तं समीक्ष्येत्यादिश्लोकद्वयमेकान्वयम् । महात्मना अप्रमेयबुद्धिना । भाविवृत्तान्तज्ञेनेति यावत् ॥ ४७–५० ॥

जये कृतभावौ कृताभिप्रायौ ॥ ३८–४४ ॥ ते तस्येति । निमित्तगाः निमित्तं लक्ष्यं गच्छन्तीति निमित्तगाः । "वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुः" इति शास्त्रनात ॥ ४५ ॥ स पितृव्यायेति । रक्षसां मध्ये आदद इति सम्बन्धः ॥ ४६–४९ ॥ संहितौ योजितौ ॥ ५० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ताविति । सन्निपेततुः सङ्घर्षं प्राप्तौ ॥ ५१ ॥ तज्जः सन्निपातजः ॥ ५२–५६ ॥ संक्षिपन् संहरन् ॥ ५७ ॥ सौरेण सूर्यदेवताकेन । " सूर्यतिष्या गस्त्य–" इत्यादिना यलोपः ॥५८॥५९॥ तस्मादिति । असुरास्त्रप्रयोगाद्धेतोः चापात् इन्द्रजिद्धनुषोऽपादानात् कूटमुद्गरादयो विनिष्पेतुरित्यन्वयः ।

तौ भासयन्तावाकाशं धनुर्भ्यां विशिखौ च्युतौ । मुखेन मुखमाहत्य संनिपेततुरोजसा ॥ ५१ ॥ सन्निपातस्तयो रासीच्छरयोर्घोररूपयोः । सधूमविस्फुलिङ्गश्च तज्जोऽग्निर्दारुणोऽभवत् ॥ ५२ ॥ तौ महाग्रहसङ्काशावन्योन्यं सन्निपत्य च । सङ्ग्रामे शतधा यान्तौ मेदिन्यां विनिपेततुः ॥५३॥ शरौ प्रतिहतौ दृष्ट्वा तावुभौ रणमूर्धनि । व्रीडितौ जातरोषौ च लक्ष्मणेन्द्राजितौ तदा ॥ ५४ ॥ सुसंरब्धस्तु सौमित्रिरस्त्रं वारुणमाददे ॥ ५५ ॥ रौद्रं महेन्द्रजिद्युद्धे व्यसृजद्युधि निष्ठितः । तेन तद्विहतं त्वस्त्रं वारुणं परमाद्भुतम् ॥५६॥ ततः क्रुद्धो महातेजा इन्द्रजित् समितिञ्जयः । आग्नेयं सन्दधे दीप्तं स लोकं संक्षिपन्निव ॥५७॥ सौरेणास्त्रेण तद्वीरो लक्ष्मणः प्रत्यवारयत् ॥५८॥ अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः । आसुरं शत्रुनाशाय घोरमस्त्रं समाददे ॥ ५९ ॥ तस्माच्चापाद्विनिष्पेतुर्भास्वराः कूट मुद्गराः । शूलानि च भुशुण्ड्यश्च गदाः खड्गाः परश्वधाः ॥ ६० ॥ तद्दृष्ट्वा लक्ष्मणः सङ्ख्ये घोरमस्त्रमथासुरम् । अवार्यं सर्वभूतानां सर्वशत्रुविनाशनम् । माहेश्वरेण द्युतिमांस्तदस्त्रं प्रत्यवारयत् ॥ ६१ ॥ तयोः सुतुमुलं युद्धं संबभूवाद्भुतोपमम् । गगनस्थानि भूतानि लक्ष्मणं पर्यवारयन् ॥ ६२ ॥

भुशुण्ड्यः मुसलविशेषाः ॥६०॥ तद्दृष्ट्वेत्यादिसार्धश्लोक एकान्वयः । क्रियाद्वयार्थं तदस्त्रमिति द्विरुक्तिः ॥ ६१ ॥ तयोरिति । स्पष्टः ॥ ६२ ॥

संनिपेततुः सङ्घर्षं प्राप्तौ ॥ ५१ ॥ ५२ ॥ महाग्रहः अङ्गारकशन्यादिः ॥ ५३ ॥ व्रीडितौ स्वस्वप्रयुक्तशरस्य मोघत्वदर्शनेन सञ्जातलज्जौ । यद्यपि रावणे रपि व्रीडा युक्ता, लक्ष्मणस्य तु तद्बाणनिवारणाय प्रयोक्तुस्स्वार्थक्यसत्त्वेन व्रीडाभावस्तथापि तन्निराकरणपूर्वकं रिपुवधपर्यन्तव्यापारेणोपादानात् तदभावेन तस्यापि लज्जेति बोध्यम् । [छत्रिन्यायेन द्विवचनप्रयोग इति कतकः ।] जातरोषौ रामाविशेषे विभीषणे बाधः प्रयुक्त इति लक्ष्मणस्य रोषः, लक्ष्मणस्तं परिहृतवानिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भैरवाभिरुते भयंकरशब्दे ॥ ६३ ॥ ऋषय इति । रक्षुः जय जयेत्याद्युक्तिभिरित्यर्थः ॥ ६४॥६५ ॥ सुपत्रमित्यादिचतुःश्लोक्येकान्वया । अनुवृत्ताङ्गं वर्तुलस्वरूपम् । सुसंस्थितं सुसंस्थानम् । सुवर्णविकृतं सुवर्णैर्विचित्रितम् । हरिवाहनः हरितवर्णाश्वः ऐन्द्रमस्त्रम् ऐन्द्रास्त्रमन्त्रयोजितम् ॥६६-६९॥

भैरवाभिरुते भीमे युद्धे वानररक्षसाम् । भूतैर्बहुभिराकाशं विस्मितैरावृतं बभौ ॥६३॥ ऋषयः पितरो देवा गन्धर्वा गरुडोरगाः । शतक्रतुं पुरस्कृत्य ररक्षुर्लक्ष्मणं रणे ॥ ६४ ॥ अथान्यं मार्गणश्रेष्ठं सन्दधे रावणानुजः । हुताशनसमस्पर्शं रावणात्मजदारणम् ॥ ६५ ॥ सुपत्रमनुवृत्ताङ्गं सुपर्वाणं सुसंस्थितम् । सुवर्णविकृतं वीरः शरीरान्तकरं शरम् ॥ ६६ ॥ दुरावारं दुर्विषह्यं राक्षसानां भयावहम् । आशीविषविषप्रख्यं देवसङ्घैः समर्चितम् ॥ ६७ ॥ येन शक्रो महातेजा दानवानजयत् प्रभुः । पुरा देवासुरे युद्धे वीर्यवान् हरिवाहनः ॥ ६८ ॥ तदैन्द्रमस्त्रं सौमित्रिः संयुगेष्वपराजितम् । शरश्रेष्ठं धनुःश्रेष्ठे नरश्रेष्ठोऽभिसन्दधे ॥६९॥ सन्धायामित्रदलनं विचकर्ष शरासनम् । सज्यमायम्य दुर्धर्षं कालो लोकक्षये यथा ॥ ७० ॥ सन्धाय धनुषि श्रेष्ठे विकर्षन्निदमब्रवीत् । लक्ष्मीवाँल्लक्ष्मणो वाक्यमर्थसाधकमात्मनः ॥ ७१ ॥ धर्मात्मा सत्यसन्धश्च रामो दाशरथिर्यदि । पौरुषे चाप्रतिद्वन्द्वः शरैनं जहि रावणिम् ॥ ७२ ॥ इत्युक्त्वा बाणमाकर्णं विकृष्य तमजिह्मगम् । लक्ष्मणः समरे वीरः ससर्जेन्द्रजितं प्रति । ऐन्द्रास्त्रेण समायोज्य लक्ष्मणः परवीरहा ॥ ७३ ॥

अमित्रदलनं शत्रुनाशनम् । कालः यमः ॥ ७०-७२ ॥ इत्युक्त्वेत्यादिसार्धश्लोक एकान्वयः । बाणमैन्द्रास्त्रमन्त्रेण समायोज्य ससर्जेत्यन्वयः । एको लक्ष्मणशब्दो लक्ष्मीयुक्तवचनः । "लक्ष्मीवान् लक्ष्मणः श्रीलः श्रीमान्" इत्यमरः ॥ ७३ ॥

रावणेः रोषः ॥ ५४-६२ ॥ भैरवाभिरुते भैरवमभिरुतं यस्मिंस्तादृशे । भूतैः प्राणिभिः ॥ ६३ ॥ ६४ ॥ सन्निहितैर्लक्ष्मणेनैवायं वध्य इति निश्चित्यैन्द्रास्त्रं सन्दध इत्याह-अथेति । अत्र प्रत्यस्त्रं रावणेर्ब्रह्मशापवशान्न बुद्ध्यारूढम् ॥ ६५ ॥ सुसंस्थितं संस्थिताङ्गम् । सुवर्णविकृतं सुवर्णालंकृतम् ॥ ६६-७२ ॥ इत्युक्त्वेत्यादि

स०-पौरुषे पराक्रमे । अप्रतिद्वन्द्वः असदृशो यदि तर्हि तेन सत्येन त्वमेतं जहि । अनेन रामगुणशपथपुरःसरमस्त्रमोचनादस्त्रास्याप्रतिहतता ज्ञेया ॥ ७२ ॥

For Private And Personal Use Only

स शिरः सशिरस्त्राणमिति । स बाणः ॥७४॥ ७५॥ कवचीति । कवचादिभिः सह विध्वस्तः हतः धरण्यां निपपातेत्यन्वयः ॥ ७६–८४ ॥

स शिरः सशिरस्त्राणं श्रीमज्ज्वलितकुण्डलम् । प्रमथ्येन्द्रजितः कायात् पातयामास भूतले ॥ ७४ ॥ तद्राक्षस तनूजस्य छिन्नस्कन्धं शिरो महत् । तपनीयनिभं भूमौ ददृशे रुधिरोक्षितम् ॥ ७५ ॥ हतस्तु निपपाताशु धरण्यां रावणात्मजः । कवची सशिरस्त्राणो विध्वस्तः सशरासनः ॥ ७६ ॥ चुक्रुशुस्ते ततः सर्वे वानराः सविभीषणाः । हृष्यन्तो निहते तस्मिन् देवा वृत्रवधे यथा ॥ ७७ ॥ अथान्तरिक्षे देवानामृषीणां च महात्मनाम् । अभिजज्ञे च सन्नादो गन्धर्वाप्सरसामपि ॥ ७८ ॥ पतितं तमभिज्ञाय राक्षसी सा महाचमूः । वध्यमाना दिशो भेजे हरिभिर्जित काशिभिः ॥ ७९ ॥ वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः । लङ्कामभिमुखाः सस्रुर्नष्टसंज्ञाः प्रधाविताः ॥८०॥ दुद्रुवुर्बहुधा भीता राक्षसाः शतशो दिशः । त्यक्त्वा प्रहरणान् सर्वे पट्टिशासिपरश्वधान् ॥८१॥ केचिल्लङ्कां परित्रस्ताः प्रविष्टा वानरार्दिताः । समुद्रे पतिताः केचित् केचित् पर्वतमाश्रिताः ॥८२॥ हतमिन्द्रजितं दृष्ट्वा शयानं समरक्षितौ । राक्षसानां सहस्रेषु न कश्चित् प्रत्यदृश्यत ॥ ८३ ॥ यथाऽस्तं गत आदित्ये नावतिष्ठन्ति रश्मयः । तथा तस्मिन्निपतिते राक्षसास्ते गता दिशः ॥८४॥ शान्तरश्मिरिवादित्यो निर्वाण इव पावकः । स बभूव महातेजा व्यपास्तगतजीवितः ॥८५॥ प्रशान्तपीडाबहुलो नष्टारिष्टः प्रतापवान् । बभूव लोकः पतिते राक्षसेन्द्रसुते तदा ॥८६॥

व्यपास्तगतजीवितः व्यपास्तो विक्षिप्ताङ्गो गतजीवितश्च, सः शान्तरश्मिरादित्य इव, निर्वाणः शान्तः पावक इव च बभूव, निस्तेजस्कोऽभूदित्यर्थः ॥८५॥

। मान्नु०—शान्तरश्मिरिति । गतजीवितः सः शान्तरश्मिरादित्य इव बभूव । निर्वाणः पावक इव व्यपास्तः अतिष्ठदिति संबन्धः ॥ ८५ ॥ प्रशान्तेति । इदमारभ्य लोकविशेषणम् ।

सपादमेकं वाक्यम् । लक्ष्मणः परवीरहेत्येतदुत्तरशेषः । एकवाक्यत्वे एको लक्ष्मणशब्दः लक्ष्मीवद्वचनः । “ लक्ष्मीवान् लक्ष्मणः श्रीलः श्रीमान् ” इत्यमरः । बाणमैन्द्रास्त्रेण समायोज्य ससर्जेति सम्बन्धः ॥ ७३–८४ ॥ शान्तरश्मिरिति । व्यपास्तगतजीवितः व्यपास्तो विक्षिप्ताङ्गो गतजीवितश्च स रावणिः शान्तरश्मि रादित्य इव निर्वाणः पावक इव च बभूवेत्यर्थः ॥ ८५ ॥ प्रशान्तपीडाबहुलः प्रशान्तबहुलपीडः । एकादश्यां द्वादश्यां त्रयोदश्यां चेन्द्रजिद्युद्धम् । “अहोरात्रै

प्रशान्तपीडाबहुलः प्रशान्तबहुलपीडः । प्रतापवान् सूर्यप्रकाशवान्, पूर्वं भयेन मन्दसूर्यत्वात् ॥८६॥८७॥ आकाश इत्यर्धम् ॥ ८८॥ नृत्यद्भिरिति । अप्सरोभिर्गन्धर्वैश्च कृतनर्तनगानजन्यस्वनः शुश्रुव इत्यर्थः । नृत्यद्भिरित्यत्र ङीबभाव आर्षः ॥८९॥ ववृषुरिति । अत्रापि देवाः कर्तारः । ववृषुः प्रशशं

हर्षं च शक्रो भगवान् सह सर्वैः सुरर्षभैः । जगाम निहते तस्मिन् राक्षसे पापकर्मणि ॥ ८७ ॥ आकाशे चापि देवानां शुश्रुवे दुन्दुभिस्वनः ॥ ८८ ॥ नृत्यद्भिरप्सरोभिश्च गन्धर्वैश्च महात्मभिः ॥ ८९ ॥ ववृषुः पुष्पवर्षाणि तदद्भुतमभूत्तदा । प्रशशंसुर्हते तस्मिन् राक्षसे क्रूरकर्मणि ॥ ९० ॥ शुद्धा आपो दिशश्चैव जहृषुर्दैत्यदानवाः ॥ ९१ ॥ आजग्मुः पतिते तस्मिन् सर्वलोकभयावहे । ऊचुश्च सहिताः सर्वे देवगन्धर्वदानवाः । विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति ॥ ९२ ॥ ततोऽभ्यनन्दन् संहृष्टाः समरे हरियूथपाः । तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुङ्गवम् ॥९३॥ विभीषणो हनूमांश्च जाम्बवांश्चर्क्षयूथपः । विजयेनाभिनन्दन्तस्तुष्टुवुश्चापि लक्ष्मणम् ॥९४॥ क्ष्वेलन्तश्च नदन्तश्च गर्जन्तश्च प्लवङ्गमाः । लब्धलक्षा रघुसुतं परिवार्योपतस्थिरे ॥९५॥ लाङ्गूलानि प्रविध्यन्तः स्फोटयन्तश्च वानराः । लक्ष्मणो जयतीत्येवं वाक्यं विश्रावयंस्तदा ॥ ९६ ॥ अन्योन्यं च समाश्लिष्य कपयो हृष्टमानसाः । चक्रुरुच्चावचगुणा राघवाश्रयजाः कथाः ॥ ९७ ॥ तदसुकरमथाभिवीक्ष्य हृष्टाः प्रियसुहृदो युधि लक्ष्मणस्य कर्म । परममुपलभन् मनःप्रहर्षं विनिहतमिन्द्ररिपुं निशम्य देवाः ॥ ९८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकनवतितमः सर्गः ॥ ९१ ॥

सुश्च ॥९० ॥ ९१ ॥ आजग्मुरित्यादिसार्धश्लोक एकान्वयः । देवगन्धर्वदानवाः आजग्मुः विचरन्त्वित्यूचुश्चेति संबन्धः ॥ ९२–९५ ॥ विश्रावयन् व्यश्रावयन् ॥ ९६ ॥ ९७ ॥ असुकरं दुष्करम्, सर्वेषां प्राणप्रतिष्ठापकमिति वा । प्रियसुहृदः सर्वप्रियसुहृदः । उपलभन्नित्यत्र अडात्मनेपदाभावावार्षौ । त्रिभिर्वीरः कथञ्चिद्विनिपातितः" इत्युत्तरत्राभिधानात् ॥८६–९८॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायाम् एकनवतितमः सर्गः ॥ ९१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

देवाः इन्द्ररिपुं विनिहतं निशम्य परमं मनःप्रहर्षम् उपलभन् उपालभन्त । अथ असुकरं तत् इन्द्रजिद्धननं प्रियसुहृदः लक्ष्मणस्य, कर्म कृतिविषय भूतम् अभिवीक्ष्य हृष्टाः विस्मिताः, आसन्निति शेषः । "विस्मितप्रतिघातयोश्चेति वक्तव्यम्" इति हृषेः पाक्षिक इडभावः । देवाश्चारणादिमुखेन प्रथममिन्द्रजिद्धननं श्रुत्वा सन्तुष्टाः सन्तः पश्चात्तस्यात्यन्ताशक्यत्वादतथ्यं मन्वाना युद्धभूमिमागत्य तत्प्रत्यक्षीकृत्य विस्मिता आसन्निति भावः॥९८॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकनवतितमः सर्गः ॥ ९१ ॥

रुधिरक्लिन्नगात्रस्तु लक्ष्मणः शुभलक्षणः । बभूव हृष्टस्तं हत्वा शक्रजेतारमाहवे ॥ १ ॥ ततः स जाम्बवन्तं च हनुमन्तं च वीर्यवान् । सन्निहत्य महातेजास्तांश्च सर्वान् वनौकसः ॥ २ ॥ आजगाम ततस्तीव्रं यत्र सुग्रीवराघवौ । विभीषणमवष्टभ्य हनूमन्तं च लक्ष्मणः ॥ ३ ॥ ततो राममभिक्रम्य सौमित्रिरभिवाद्य च । तस्थौ भ्रातृसमीपस्थ इन्द्रस्येव बृहस्पतिः ॥ ४ ॥ निष्टनन्निव चागम्य राघवाय महात्मने । आचचक्षे तदा वीरो घोरमिन्द्रजितो वधम् ॥ ५ ॥ रावणेस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना । न्यवेदयत रामाय तदा हृष्टो विभीषणः ॥ ६ ॥ श्रुत्वैतत्तु महावीर्यो लक्ष्मणेनेन्द्रजिद्वधम् । प्रहर्षमतुलं लेभे रामो वाक्यमुवाच ह ॥ ७ ॥ साधु लक्ष्मण तुष्टोऽस्मि कर्मणा सुकृतं कृतम् । रावणेर्हि विनाशेन जितमित्युपधारय ॥ ८ ॥

अथ लक्ष्मणश्लाघनं–रुधिरक्लिन्नगात्रेत्यादि ॥ १ ॥ तत इत्यादिश्लोकद्वयमेकान्वयम् । सन्निहत्य सङ्घीभूय । अवष्टभ्य युद्धपारवश्यादवलम्ब्य ॥ २ ॥ ३ ॥ तत इति । इन्द्रस्येव बृहस्पतिरिति पारतन्त्र्यमात्रे साम्यम् ॥ ४ ॥ निष्टनन् अव्यक्ताक्षरं वदन्नित्यर्थः । इवशब्दो वाक्यालङ्कारे । आयासस्याभिनयनमात्रेणालीकत्वद्योतनाय वा ॥ ५ ॥ रामसन्निधौ सङ्कोचवता लक्ष्मणेनाविशेषेणेन्द्रजिद्वधकथनाद्विभीषणः स्पष्टतयाऽऽह–रावणेरिति । यद्वा लक्ष्मणेन सूचनयोक्तावपि हर्षप्रकर्षेण विभीषणः पुनराह–रावणेरिति ॥ ६ ॥ महावीर्यो राम इत्यन्वयः ॥ ७ ॥ सुकृतं कृतं सुकर्तव्यं कृतम् । कर्मणा

॥ १ ॥ २ ॥ आजगामेति । अवष्टभ्य अवलम्ब्य, युद्धपारवश्यादिति भावः ॥ ३ ॥ इन्द्रस्येव बृहस्पतिः प्रधानोपसर्जनभावेनावस्थानमात्रे दृष्टान्तः ॥ ४ ॥ निश्वसन्निवेत्यत्र इवशब्दो वाक्यालङ्कारे ॥ ५ ॥ स्वपौरुषकथनव्रीडितेन लक्ष्मणेन सर्वकर्तृकत्वाभिधानेन कथितमिन्द्रजिद्वधं लक्ष्मणकर्तृकनिर्देशपूर्वकं विभीषणो

For Private And Personal Use Only

युद्धकर्मणा ॥ ८ ॥ स तमित्यादिश्लोकद्वयमेकान्वयम् । आरोप्य आरोपणायाकृष्य । अवपीडितं शल्यपीडितम्, गाढं यथा भवति तथेति वा । क्रियाभेदात्तमिति द्विरुक्तिः ॥ ९ ॥ १० ॥ शल्यसंपीडितमित्यादिश्लोकद्वयमेकान्वयम् । शस्तं प्रहृतम्, निश्वसितः स्वयंकृतनिश्वासः, त्वरन्

स तं शिरस्युपाघ्राय लक्ष्मणं लक्ष्मिवर्धनम् । लज्जमानं बलात् स्नेहादङ्कमारोप्य वीर्यवान् ॥ ९ ॥ उपवेश्य तमुत्सङ्गे परिष्वज्यावपीडितम् । भ्रातरं लक्ष्मणं स्निग्धं पुनः पुनरुदैक्षत ॥ १० ॥ शल्यसंपीडितं शस्तं निश्वसन्तं तु लक्ष्मणम् । रामस्तु दुःखसन्तप्तस्तदा निश्वसितो भृशम् ॥ ११ ॥ मूर्ध्नि चैनमुपाघ्राय भूयः संस्पृश्य च त्वरन् । उवाच लक्ष्मणं वाक्यमाश्वास्य पुरुषर्षभः ॥ १२ ॥ कृतं परमकल्याणं कर्म दुष्करकर्मणा । अद्य मन्ये हते पुत्रे रावणं निहतं युधि । अद्याहं विजयी शत्रौ हते तस्मिन् दुरात्मनि ॥ १३ ॥ रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे । छिन्नो हि दक्षिणो बाहुः स हि तस्य व्यपाश्रयः ॥ १४ ॥ विभीषणहनूमद्भ्यां कृतं कर्म महद्रणे । अहोरात्रैस्त्रिभिर्वीरः कथञ्चिद्विनिपातितः ॥ १५ ॥ निरमित्रः कृतोऽस्म्यद्य निर्यास्यति हि रावणः । बलव्यूहेन महता श्रुत्वा पुत्रं निपातितम् ॥ १६ ॥ तं पुत्रवधसन्तप्तं निर्यान्तं राक्षसाधिपम् । बलेनावृत्य महता निहनिष्यामि दुर्जयम् ॥ १७ ॥ त्वया लक्ष्मण नाथेन सीता च पृथिवी च मे । न दुष्प्रापा हते त्वद्य शक्रजेतरि चाहवे ॥ १८ ॥

संस्पृश्य, त्वरा च प्रहारव्यथापनयनायेति भावः ॥ ११ ॥ १२ ॥ कृतमित्यादिसार्धश्लोकः । दुष्करकर्मणा, त्वयेति शेषः ॥ १३ ॥ रावणस्येति । व्यपाश्रयः आलम्बनम् ॥ १४ ॥ विभीषणेति । अहोरात्रैस्त्रिभिरिति एकादशीद्वादशीत्रयोदशीभिरित्यर्थः ॥ १५ ॥ निरमित्र इत्यादिश्लोकद्वयमेकान्वयम् ॥ १६ ॥ १७ ॥ त्वयेति । नाथेन याचमानेन । "नाथृ याच्ञायाम्" इत्यस्मात्पचाद्यच् ॥ १८ ॥

ऽनुवदति–रावणेस्त्विति ॥ ६–८ ॥ स तमित्यादिश्लोकद्वयमेकं वाक्यम् । क्रियाबाहुल्यात्तमिति द्विरुक्तिः । अङ्कमारोप्य अङ्कं प्रत्यारोपणायाकृष्य उत्सङ्गे उपवेश्य अवपीडितं गाढं यथा तथा परिष्वज्य तं पुनः पुनरुदैक्षतेत्यन्वयः ॥ ९–१२ ॥ दुष्करकर्मणा दुष्करपौरुषेण, त्वयेति शेषः ॥ १३ ॥ व्यपाश्रयः अवलम्ब

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स तमिति । समाभाष्य आमन्त्र्य ॥ १९ ॥ सशल्योऽयमिति । समुपाचर चिकित्सां कुरु ॥ २० ॥ विशल्य इति श्लोकद्वयमेकान्वयम् । ऋक्षवानर सैन्यानामिति निर्धारणे षष्ठी ॥ २१ ॥ २२ ॥ एवमिति । नस्तः नासिकायाम् ॥ २३ ॥ निर्वेदनः वेदनारहितः ॥ २४–२६॥ तथैवेति । मुदा, युक्तमिति

स तं भ्रातरमाश्वास्य परिष्वज्य च राघवः । रामः सुषेणं मुदितः समाभाष्येदमब्रवीत् ॥ १९ ॥ सशल्योऽयं महाप्राज्ञ सौमित्रिर्मित्रवत्सलः । यथा भवति सुस्वस्थस्तथा त्वं समुपाचर ॥ २० ॥ विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः । ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम् ॥ २१ ॥ ये चाप्यन्येऽत्र युध्यन्ति सशल्या व्रणिनस्तथा । तेऽपि सर्वे प्रयत्नेन क्रियन्तां सुखिनस्त्वया ॥ २२ ॥ एवमुक्तस्तु रामेण महात्मा हरियूथपः । लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधिम् ॥ २३ ॥ स तस्या गन्धमाघ्राय विशल्यः समपद्यत । तथा निर्वेदनश्चैव संरूढव्रण एव च ॥ २४ ॥ विभीषणमुखानां च सुहृदां राघवाज्ञया । सर्ववानरमुख्यानां चिकित्सां स तदाऽकरोत् ॥ २५ ॥ ततः प्रकृतिमापन्नो हृतशल्यो गतव्यथः । सौमित्रिर्मुदितस्तत्र क्षणेन विगतज्वरः ॥ २६ ॥ तथैव रामः प्लवगाधिपस्तदा विभीषणश्चर्क्षपतिश्च जाम्बवान् । अवेक्ष्य सौमित्रिमरोगमुत्थितं मुदा ससैन्याः सुचिरं जहर्षिरे ॥ २७ ॥ अपूजयत् कर्म स लक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा । हृष्टा बभूवुर्युधि यूथपेन्द्रा निपातितं शक्रजितं निशम्य ॥ २८ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्विनवतितमः सर्गः ॥ ९२ ॥

शेषः । मुदा युक्तं सौमित्रिमवेक्ष्य जहर्षिर इति सम्बन्धः । जहर्षिर इत्यत्र गुण आर्षः ॥ २७ ॥ २८ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्विनवतितमः सर्गः ॥ ९२ ॥

भूतः ॥ १४–१८ ॥ समाभाष्य सम्बोध्य ॥ १९ ॥ २० ॥ ऋक्षवानरसैन्यानामिति निर्धारणे षष्ठी ॥ २१ ॥ २२ ॥ नस्तः नासिकायाम् ॥ २३–२८ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्विनवतितमः सर्गः ॥ ९२ ॥

For Private And Personal Use Only

अथ सीतावधोद्योगपर्यन्तो रावणस्य पुत्रशोकातिशय उच्यते–ततः पौलस्त्यसचिवा इत्यादि । पौलस्त्यसचिवाः रावणागारवर्तिनः सहायभूताः, इन्द्रजितं हतं श्रुत्वा स्वयमभिज्ञाय साभिज्ञानं दृष्ट्वा, सव्यथाः सन्तो रावणाय आचचक्षुः आचचक्षिरे । अथवा अभिज्ञायेति चतुर्थी । पूर्वमेव यज्ञविघ्नेन निश्चिततद्वधायेत्यर्थः । अवज्ञायेति पाठेऽपि चतुर्थीपक्षे अयमेवार्थः । पक्षान्तरं साक्षात्कारपर्यन्तदर्शनं प्राप्येत्यर्थः ॥ १ ॥ मिषतां नः अस्मासु पश्यत्सु

ततः पौलस्त्यसचिवाः श्रुत्वा चेन्द्रजितं हतम् । आचचक्षुरभिज्ञाय दशग्रीवाय सव्यथाः ॥ १ ॥ युद्धे हतो महाराज लक्ष्मणेन तवात्मजः । विभीषणसहायेन मिषतां नो महाद्युतिः ॥ २ ॥ शूरः शूरेण सङ्गम्य संयुगेष्वपराजितः । लक्ष्मणेन हतः शूरः पुत्रस्तु विबुधेन्द्रजित् । गतः स परमान् लोकान् शरैः सन्ताप्य लक्ष्मणम् ॥ ३ ॥ स तं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणम् । घोरमिन्द्रजितः सङ्ख्ये कश्मलं चाविशन्महत् ॥ ४ ॥ उपलभ्य चिरात् संज्ञां राजा राक्षसपुङ्गवः । पुत्रशोकार्दितो दीनो विललापाकुलेन्द्रियः ॥ ५ ॥ हा राक्षसचमूमुख्य मम वत्स महारथ । जित्वेन्द्रं कथमद्य त्वं लक्ष्मणस्य वशं गतः ॥ ६ ॥ ननु त्वामिषुभिः क्रुद्धो भिन्द्याः कालान्तकावपि । मन्दरस्यापि शृङ्गाणि किं पुनर्लक्ष्मणं युधि ॥ ७ ॥ अद्य वैवस्वतो राजा भूयो बहुमतो मम । येनाद्य त्वं महाबाहो संयुक्तः कालधर्मणा ॥ ८ ॥

सत्स्वित्यर्थः । अनन्तरयोजनायामस्मासु जीवत्स्वित्यर्थः । अनादरे षष्ठी ॥ २ ॥ शूर इत्यादिसार्धश्लोक एकान्वयः । क्रियाभेदाच्छूरपदद्वयम् । विबुधेन्द्रजित् देवेन्द्राजित् ॥ ३ ॥ दारुणं करुणम् । घोरं तीक्ष्णम् । कश्मलं मूर्च्छाम् । "मूर्च्छा तु कश्मलं मोहः" इत्यमरः ॥ ४–६ ॥ ननु त्वामिति । नन्वित्यामन्त्रणे । कालान्तकौ यमस्य मूर्तिभेदौ ॥ ७ ॥ भूयः अतिशयेन । कालधर्मणा मरणेन । आर्षोऽनिच् समासान्तः । संयुक्तः संयोजितः ॥ ८ ॥

तत इति । स्वेनस्वेन सैन्येन परिवृताः ततस्ततो वानरैस्सह युद्ध्यन्तः पौलस्त्यसचिवास्तत्रेन्द्रजितं हतं श्रुत्वा अभिज्ञाय दृष्ट्वा सव्यथा रावणायाचचक्षुः आचचक्षिरे इत्यत्रगन्तव्यम् । मिषतां नो महाद्युतिरित्यनुपदमेवाभिधानात् ॥ १–३ ॥ दारुणं करुणम् । घोरं तीक्ष्णम् । प्रतिभयं भयङ्करम् । कश्मलं मूर्च्छाम् ॥ ४–६ ॥ कालान्तकावपि कालः सर्वसंहारकः, अन्तकः कालाभिमानी पुरुषः ॥ ७ ॥ अद्येति । भूयो बहुमतः, अतिशयेन सम्मत इति दुःखातिशयोक्तिः । येन वैवस्वतेन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

युद्धमरणस्य सर्वाकाङ्क्षितत्वाद्युद्धहतं त्वां न शोचामीत्याह–एष इति। एषः युद्धमरणरूपः पन्थाः ॥ ९ ॥ एवं यशस्यत्वादशोच्यत्वमुक्त्वा स्वर्ग्यत्वादशोच्यत्वमाह–य इति ॥ १० ॥ ११ ॥ लोकास्त्रय इत्युक्तावपि पृथिव्याः पृथगुपादानं प्राधान्यात्। यथा ब्राह्मणा आगता वसिष्ठोऽप्यागत

एष पन्थाः सुयोधानां सर्वामरगणेष्वपि ॥ ९ ॥ यः कृते हन्यते भर्तुः स पुमान् स्वर्गमृच्छति। अद्य देवगणाः सर्वे लोकपालास्तथर्षयः। हतमिन्द्राजितं श्रुत्वा सुखं स्वप्स्यन्ति निर्भयाः ॥ १० ॥ अद्य लोकास्त्रयः कृत्स्ना पृथिवी च सकानना। एकेनेन्द्रजिता हीना शून्येव प्रतिभाति मे ॥ ११ ॥ अद्य नैर्ऋतकन्यानां श्रोष्याम्यन्तःपुरे रवम्। करेणुसङ्घस्य यथा निनादं गिरिगह्वरे ॥ १२ ॥ यौवराज्यं च लङ्कां च रक्षांसि च परन्तप। मातरं मां च भार्यां च क गतोऽसि विहाय नः ॥ १३ ॥ मम नाम त्वया वीर गतस्य यमसादनम्। प्रेतकार्याणि कार्याणि विपरीते हि वर्तसे ॥ १४ ॥ स त्वं जीवति सुग्रीवे लक्ष्मणे च सराघवे। मम शल्यमनुद्धृत्य क गतोऽसि विहाय नः ॥ १५ ॥ एवमादि विलापार्तं रावणं राक्षसाधिपम्। आविवेश महान् कोपः पुत्रव्यसनसम्भवः ॥ १६ ॥ प्रकृत्या कोपनं ह्येनं पुत्रस्य पुनराधयः। दीप्तं सन्दीपयामासुर्घर्मेऽर्कमिव रश्मयः ॥ १७ ॥

इत्यादौ ॥१२॥ नः सर्वानिति योजनीयम् ॥१३–१६॥ प्रकृत्या कोपनमित्यस्य विवरणं दीप्तमिति। पुत्रस्य पुत्रसंबन्धिन्यः, पुत्रविषया इत्यर्थः। आधयः

कालधर्मणा संयोजितः ॥ ८ ॥ युद्धमरणस्य सकलशूरजनकाङ्क्षिततया युद्धहतं त्वां न शोचामीत्याह–एष इति। सुयोधानां मरणाय एष पन्थाः। सर्वामरगणेष्वपीति। न केवलं मनुष्येषु सर्वामरगणेष्वपि स श्लाघ्य इति भावः ॥ ९ ॥ एतेन यशस्करत्वादशोच्यत्वमुक्तम्। इदानीं स्वर्गहेतुत्वादप्यशोच्यत्वमाह–यः कृत इति। भर्तुः कृते यः हन्यते सः स्वर्गमृच्छतीति सम्बन्धः ॥ १० ॥ त्रयो लोकाः पातालान्तरिक्षस्वर्गाः, पृथिव्याः पृथगभिधानात् ॥ ११–१३ ॥ मम त्वया प्रेतकार्याणि कर्तव्यानि, विपरीते व्युत्क्रमे वर्तसे इति सम्बन्धः ॥१४॥ स त्वमित्यस्य प्रातीतिकार्थः स्पष्टः। वस्तुतस्तु–सलक्ष्मणे रामे जीवति सति यस्त्वं जीवितं कस्माद्व्रजसि, तयोरसाध्यत्वादिति भावः ॥ १५ ॥ १६ ॥ प्रकृत्येति। पुत्रस्याधयः पुत्रसम्बन्ध्याधयः, पुत्रमरणजनितमनःपीडेति यावत् ॥ १७–१९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शोकाः । पुनः भूयः । सन्दीपयामासुः कोपयामासुः । अकर्मपक्षे क्रूरयामासुरित्यर्थः ॥ १७ ॥ ललाट इति । भ्रुकुटीभिरिति बहुवचनं दशशिरस्कत्वात् ॥ १८–२३ ॥ आवेष्टयमानस्य भ्राम्यमाणस्य, यन्त्रस्य तिलपीडनयन्त्रस्य । दानवैर्बलवद्भिरित्यर्थः ॥ २४ ॥ संविलिल्यिरे स्तम्भादिव्यव

ललाटे भ्रुकुटीभिश्च सङ्गताभिर्व्यरोचत । युगान्ते सह नक्रैस्तु महोर्मिभिरिवोदधिः ॥ १८ ॥ कोपाद्विजृम्भमाणस्य वक्त्राद् व्यक्तमभिज्वलन् । उत्पपात स भूयोऽग्निर्वृत्रस्य वदनादिव ॥१९॥ स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः । समीक्ष्य रावणो बुद्ध्या वैदेह्या रोचयद्वधम् ॥२०॥ तस्य प्रकृत्या रक्ते च रक्ते क्रोधाग्निनाऽपि च । रावणस्य महाघोरे दीप्ते नेत्रे बभूवतुः ॥ २१ ॥ घोरं प्रकृत्या रूपं तत्तस्य क्रोधाग्निमूर्च्छितम् । बभूव रूपं क्रुद्धस्य रुद्रस्येव दुरासदम् ॥ २२ ॥ तस्य क्रुद्धस्य नेत्राभ्यां प्रापतन्नस्रबिन्दवः । दीप्ताभ्यामिव दीपाभ्यां सार्चिषः स्नेहबिन्दवः ॥ २३ ॥ दन्तान् विदशतस्तस्य श्रूयते दशनस्वनः । यन्त्रस्यावेष्ट्यमानस्य महतो दानवैरिव ॥२४॥ कालाग्निरिव संक्रुद्धो यां यां दिशमवैक्षत । तस्यां तस्यां भयत्रस्ता राक्षसाः संविलिल्यिरे ॥ २५ ॥ तमन्तकमिव क्रुद्धं चराचरचिखादिषुम् । वीक्षमाणं दिशः सर्वा राक्षसा नोपचक्रमुः ॥ २६ ॥ ततः परमसंक्रुद्धो रावणो राक्षसाधिपः । अब्रवीद्रक्षसां मध्ये संस्तम्भयिषुराहवे ॥ २७ ॥ मया वर्षसहस्राणि चरित्वा दुश्चरं तपः । तेषु तेष्ववकाशेषु स्वयम्भूः परितोषितः ॥२८॥ तस्यैव तपसो व्युष्ट्या प्रसादाच्च स्वयम्भुवः । नासुरेभ्यो न देवेभ्यो भयं मम कदाचन ॥२९॥

हिता बभूवुरित्यर्थः ॥ २५ ॥ तमिति । चिखादिषुं संहर्तुमिच्छुमित्यर्थः । नोपचक्रमुः नोपसेदुः ॥ २६ ॥ संस्तम्भयिषुराहवे युद्धभीतान् राक्षसान् युद्धे स्थापयितुकामः । सनि द्विर्वचनाभाव आर्षः ॥२७॥ अवकाशेषु तपःसमाप्तिषु ॥२८॥ तस्यैवेत्यादि । व्युष्ट्या समृद्ध्या । "व्युष्टिः फले समृद्धौ च"

स पुत्रवधेत्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु–रावणो वैदेह्या हेतुभूतया वधं स्ववधं बुद्ध्या समीक्ष्य इतः परं रामो मामवश्यं वधिष्यतीति निश्चित्येत्यर्थः । अरोचयत स्ववधमित्यनुषङ्गः । रावणक्रोधावेशस्य सीताहननोद्योगस्य चायमाशयः–स्वस्य रामहस्तवधेच्छया सकलराक्षसकुलनाशं मत्वमितीतरराक्षसानामवकटनाय क्रोधावेशादिकमित्यर्थः ॥ २०–२३ ॥ दन्तानिति । यन्त्रस्य घटयन्त्रस्य दानवैरावेष्ट्यमानस्य भ्राम्यमाणस्य ॥२४॥२५॥ नोपचक्रमुः नोपसेदुः ॥२६॥ तत इति । संस्तम्भयितुमाहवे इति पाठः । युद्धभीतान् राक्षसान् युद्धे पातयितुमित्यर्थः ॥ २७ ॥ अवकाशेषु तपस्समाप्तिसमयेषु ॥२८॥ व्युष्ट्या वृद्ध्या ॥ २९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इत्यमरः । भयाभावे हेतुमाह—कवचमिति । यत् यस्मात् कवचमस्ति तस्मादिति पूर्वेणान्वयः ॥ २९ ॥ ३० ॥ तेन कवचेन संयुक्तं रथस्थं माम् इह संयुगे कः प्रतीयात् आभिमुख्येनागच्छेत् ? अद्य मामाजौ साक्षात्पुरन्दरोऽपि न प्रतीयादिति च योज्यम् । अर्थसिद्धौ नञ् । क्रियापदमस्त्येव ।

कवचं ब्रह्मदत्तं मे यदादित्यसमप्रभम् । देवासुरविमर्देषु न भिन्नं वज्रशक्तिभिः ॥ ३० ॥ तेन मामद्य संयुक्तं रथस्थमिह संयुगे । प्रतीयात् कोऽद्य मामाजौ साक्षादपि पुरन्दरः ॥ ३१ ॥ यत्तदाऽभिप्रसन्नेन सशरं कार्मुकं महत् । देवासुरविमर्देषु मम दत्तं स्वयम्भुवा ॥ ३२ ॥ अद्य तूर्यशतैर्भीमं धनुरुत्थाप्यतां मम । रामलक्ष्मणयोरेव वधाय परमाहवे ॥३३॥ स पुत्रवधसन्तप्तः शूरः क्रोधवशं गतः । समीक्ष्य रावणो बुद्ध्या सीतां हन्तुं व्यवस्यत ॥३४॥ प्रत्यवेक्ष्य तु ताम्राक्षः सुघोरो घोरदर्शनः । दीनो दीनस्वरान् सर्वांस्तानुवाच निशाचरान् ॥ ३५ ॥ मायया मम वत्सेन वञ्चनार्थं वनौकसाम् । किञ्चिदेव हतं तत्र सीतेयमिति दर्शितम् ॥ ३६ ॥ तदिदं तथ्यमेवाहं करिष्ये प्रियमात्मनः । वैदेहीं नाशयिष्यामि क्षत्रबन्धुमनुव्रताम् ॥ ३७ ॥ इत्येवमुक्त्वा सचिवान् खड्गमाशु परामृशत् ॥३८॥

अनेवंव्याख्याने अद्य मामाजाविति पुनरुक्तं स्यात् ॥ ३१ ॥ यत्तदेत्यादिश्लोकद्वयमेकान्वयम् । देवासुरविमर्देषु विमर्दकाल इत्यर्थः । अद्य तूर्यशतैरित्यनेन इतःपूर्वमिदं धनुर्न नीतमिति गम्यते ॥ ३२-३३ ॥ प्रत्यवेक्ष्येति । सुघोरः सुघोरप्रकृतिः ॥ ३५ ॥ माययेत्यादिश्लोकद्वयमेकान्वयम् । सीतेयमिति दर्शितं किञ्चित् अलीकमेवेत्यर्थः ॥ ३६ ॥ ३७ ॥ इत्येवमित्यर्धम् । परामृशत् आददे ॥ ३८ ॥

भयाभावे हेतुमाह—कवचमित्यर्धेन । आदित्यसदृशप्रभं यत्कवचं ब्रह्मदत्तं तस्मिन् सति मम सुरेभ्यो भयं नास्तीति पूर्वेण सम्बन्धः ॥ ३०॥ तेन कवचेन संयुक्तं मां कः प्रतीयात् को वा आभिमुख्येनागच्छेत् ? साक्षात्पुरन्दरोऽप्याजौ मां, न प्रतीयादिति शेषः ॥ ३१ ॥ देवासुरविमर्देषु विषये स्वयम्भुवा मम दत्तम् ॥ ३२ ॥ अद्य तूर्येत्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु—रामलक्ष्मणयोस्सम्बन्धयाहवे वधाय, वानराणामिति शेषः । मम भीमं धनुः तूर्यशतैस्सहोत्थाप्यतामिति सम्बन्धः ॥ ३३ ॥ सीतां हन्तुं व्यवस्यत निश्चितवान् । वस्तुतस्तु—सीतां हन्तुं गन्तुम्, सीतादर्शनार्थं गन्तुं व्यवस्यतेत्यर्थः । "हन हिंसागत्योः" इति धातुः ॥३४-३५ ॥ वनौकसां वञ्चनाय इयं सीतेति किञ्चिदेव व्यलीकमेव वस्तु हतमिति दर्शितम् ॥ ३६ ॥ तत् हननं तथ्यमेव करिष्ये । तदेवाह वैदेहीमिति । माययेत्यादिश्लोक

For Private And Personal Use Only

उद्धृत्येत्यादिश्लोकद्वयमेकं वाक्यम् । गुणसम्पन्नं माल्यालंकृतम्, विमलाम्बरवर्चसं विमलाकाशसदृशम् खड्गमादाय कोशादुद्धृत्य यत्र मैथिली तं देशं प्रति निष्पपातेत्यन्वयः ॥३९॥४०॥ व्रजन्तमित्यादिसार्धश्लोकत्रयमेकान्वयम् । रत्नानि श्रेष्ठवस्तूनि । "रत्नं स्वजातिश्रेष्ठेऽपि" इत्यमरः॥४१–४५॥

उद्धृत्य गुणसम्पन्नं विमलाम्बरवर्चसम् । निष्पपात स वेगेन सभार्यः सचिवैर्वृतः ॥ ३९ ॥ रावणः पुत्रशोकेन भृशमाकुलचेतनः । संक्रुद्धः खड्गमादाय सहसा यत्र मैथिली ॥ ४० ॥ व्रजन्तं राक्षसं प्रेक्ष्य सिंहनादं प्रचुक्रुशुः । ऊचुश्चान्योन्यमाश्लिष्य संक्रुद्धं प्रेक्ष्य राक्षसाः ॥ ४१ ॥ अद्यैनं तावुभौ दृष्ट्वा भ्रातरौ प्रव्यथिष्यतः । लोकपाला हि चत्वारः क्रुद्धेनानेन निर्जिताः॥४२॥ बहवः शत्रवश्चापि संयुगेषु निपातिताः । त्रिषु लोकेषु रत्नानि भुङ्क्ते चाहृत्य रावणः ॥ ४३ ॥ विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि ॥ ४४ ॥ तेषां सञ्जल्पमानानामशोकवनिकां गताम् । अभिदुद्राव वैदेहीं रावणः क्रोधमूर्च्छितः ॥४५॥ वार्यमाणः सुसंक्रुद्धः सुहृद्भिर्हितबुद्धिभिः । अभ्यधावत संक्रुद्धः खेग्रहो रोहिणीमिव ॥ ४६ ॥ मैथिली रक्ष्यमाणा तु राक्षसीभिरनिन्दिता । ददर्श राक्षसं क्रुद्धं निस्त्रिंशवरधारिणम् ॥ ४७ ॥ तं निशाम्य सनिस्त्रिंशं व्यथिता जनकात्मजा । निवार्यमाणं बहुशः सुहृद्भिरनुवर्तिनम् । सीता दुःखसमाविष्टा विलपन्तीदमब्रवीत् ॥४८॥ यथाऽयं मामभिक्रुद्धः समभिद्रवति स्वयम् । वधिष्यति सनाथां मामनाथामिव दुर्मतिः ॥ ४९ ॥ बहुशश्चोदयामास भर्तारं मामनुव्रताम् । भार्या भव रमस्वेति प्रत्याख्यातो ध्रुवं मया ॥ ५० ॥

ग्रहः अङ्गारकः ॥ ४६–४८ ॥ रामानु०–तमिति । निशाम्य दृष्ट्वा ॥ ४८ ॥ यथेति । यथा यस्मादित्यर्थः ॥ ४९ ॥ ५० ॥

द्वयस्य वास्तवार्थस्तु–मम वत्सेन बालेनापि सतेन्द्रजिता वनौकसां वञ्चनार्थम् इयं सीतेति किञ्चिदेव अलीकमेव हतं दर्शितम् । अहं क्षत्रबन्धुं क्षत्राणां बन्धुं परमार्तं राममनुव्रतां वैदेहीं तथ्यं यथा तथा नाशयिष्यामि यदि नदिदम् आत्मनः अप्रियम् एव स्यात् अतः करिष्ये, इतरराक्षससन्तोषार्थं तस्याः किञ्चिद्दुःखमिति शेषः ॥३७॥३८॥ उद्धृत्येत्यादि श्लोकद्वयमेकं वाक्यम् । विमलाम्बरवर्चसं निर्मलाकाशसदृशं खड्गमादाय उद्धृत्य कोशादुद्धृत्य यत्र मैथिली तं देशं प्रति सचिवैर्वृतस्सन् निष्पपातेति सम्बन्धः ॥ ३९–४२ ॥ त्रिषु लोकेषु रत्नानि आहृत्य रावणः भुङ्क्ते । विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि इति पाठः । आवृत्येति पाठे–आवृत्य आक्रम्य ॥ ४३–४७ ॥ अनुवर्तिनम् अभिमुखमागच्छन्तम् ॥ ४८ ॥ यथा यस्मात्कारणात् ॥ ४९ ॥ वधिष्यतीत्यत्र कारणमाह–बहुश इति ॥ ५० ॥

For Private And Personal Use Only

सोऽयमिति । अनुपस्थाने अनुपस्थानात् ॥ ५१ ॥ रामानु०—सोऽयं ममानुपस्थाने व्यक्तं नैराश्यमागत इति पाठः । अनुपस्थाने अनुपस्थाने सति ॥ ५१ ॥ तौ निहत्य तेन निस्त्रिंशेन सह प्रवेशनमपि संभवतीत्यभिप्रायेणाह--अथवेत्यादि ॥ ५२ ॥ अत्र निमित्तान्तरमाशङ्कते--अथवा पुत्रशोकेनेति । अहत्वा हन्तुमशक्तो

सोऽयं ममानुपस्थाने व्यक्तं नैराश्यमागतः । क्रोधमोहसमाविष्टो निहन्तुं मां समुद्यतः ॥ ५१ ॥ अथवा तौ नरव्याघ्रौ भ्रातरौ रामलक्ष्मणौ । मन्निमित्तमनार्येण समरेऽद्य निपातितौ । अहो धिङ्मन्निमित्तोऽयं विनाशो राजपुत्रयोः ॥ ५२ ॥ अथवा पुत्रशोकेन अहत्वा रामलक्ष्मणौ । विधमिष्यति मां रौद्रो राक्षसः पापनिश्चयः ॥ ५३ ॥ हनूमतोऽपि यद्वाक्यं न कृतं क्षुद्रया मया ॥ ५४ ॥ यद्यहं तस्य पृष्ठेन तदा यायामनिन्दिता । नाद्यैवमनुशोचेयं भर्तुरङ्कगता सती ॥ ५५ ॥ मन्ये तु हृदयं तस्याः कौसल्यायाः फलिष्यति । एकपुत्रा यदा पुत्रं विनष्टं श्रोष्यते युधि ॥ ५६ ॥ सा हि जन्म च बाल्यं च यौवनं च महात्मनः । धर्मकार्यानुरूपं च रुदन्ती संस्मरिष्यति ॥५७॥ निराशा निहते पुत्रे दत्त्वा श्राद्धमचेतना । अग्निमारोक्ष्यते नूनमपो वाऽपि प्रवेक्ष्यति ॥५८॥ धिगस्तु कुब्जामसतीं मन्थरां पापनिश्चयाम् । यन्निमित्तमिदं दुःखं कौसल्या प्रतिपत्स्यते ॥ ५९ ॥ इत्येवं मैथिलीं दृष्ट्वा विलपन्तीं तपस्विनीम् । रोहिणीमिव चन्द्रेण विना ग्रहवशं गताम् ॥ ६० ॥ एतस्मिन्नन्तरे तस्य अमात्यो बुद्धिमान् शुचिः । सुपार्श्वो नाम मेधावी राक्षसो राक्षसेश्वरम् । निवार्यमाणं सचिवैरिदं वचनमब्रवीत् ॥ ६१ ॥

भूत्वा ॥ ५३ ॥ हनूमत इत्यर्धम् । क्षुद्रया विचारमूढया ॥ ५४ ॥ यदीति । यायामनुशोचेयमिति "हेतुहेतुमतोर्लिङ्" इति लिङ् ॥ ५५ ॥ प्रथमपक्षानुसारेण शोचति--मन्य इति ॥ ५६ ॥ सा हीति । धर्मकार्यानुरूपं धर्मकार्यानुरूपत्वम् ॥ ५७ ॥ अचेतना मूर्च्छिता ॥ ५८ ॥ ५९ ॥ इत्येवमित्यादि । मैथिलीं दृष्ट्वा रावणमब्रवीदित्यन्वयः ॥ ६०--६४ ॥

अनुपस्थाने सति अनङ्गीकारे सति ॥ ५१ ॥ पुत्रशोकेन रामलक्ष्मणवधोद्युक्तस्सन् तौ अहत्वा हन्तुमशक्नुवन् ॥ ५२–५५ ॥ मन्ये त्विति । यदा श्रोष्यते तदैव

अभ्युत्थानं युद्धनिर्याणप्रारम्भम् । चतुर्दशीं चतुर्दश्याम् । अमावास्याम् अमावास्यायाम् । अनेन त्रयोदशयुद्धदिनान्यतीतानीत्यवगम्यते । तथा हि–" ततोऽस्तमगमत्सूर्यः सन्ध्यया प्रतिरञ्जितः । पूर्णचन्द्रप्रदीपा च क्षपा समभिवर्तत ॥ " इति वचनात् पौर्णमास्यां सुवेलप्रवेशः, ततः कृष्णपक्षप्रथमायां युद्धस्यारम्भः, तस्यामेव रात्रौ नागपाशबन्धतद्विमोक्षौ, द्वितीयायां धूम्राक्षस्य वधः, तृतीयायां वज्रदंष्ट्रस्य, चतुर्थ्या

कथं नाम दशग्रीव साक्षाद्वैश्रवणानुज । हन्तुमिच्छसि वैदेहीं क्रोधाद्धर्ममपास्य हि ॥ ६२ ॥ वेदविद्याव्रतस्नातः स्वकर्मनिरतः सदा । स्त्रियाः कस्माद्वधं वीर मन्यसे राक्षसेश्वर ॥६३॥ मैथिलीं रूपसम्पन्नां प्रत्यवेक्षस्व पार्थिव । त्वमेव तु सहास्माभी राघवे क्रोधमुत्सृज ॥ ६४ ॥ अभ्युत्थानं त्वमद्यैव कृष्णपक्षचतुर्दशीम् । कृत्वा निर्याह्यमावास्यां विजयाय बलैर्वृतः ॥ ६५ ॥ शूरो धीमान् रथी खड्गी रथप्रवरमास्थितः । हत्वा दाशरथिं रामं भवान् प्राप्स्यति मैथिलीम् ॥ ६६ ॥ स तद्दुरात्मा सुहृदा निवेदितं वचः सुधर्म्यं प्रतिगृह्य रावणः । गृहं जगामाथ ततश्च वीर्यवान् पुनः सभां च प्रययौ सुहृद्वृतः ॥६७॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे त्रिनवतितमः सर्गः॥९३॥

मकम्पनस्य, प्रहस्तस्य पञ्चम्याम्, षष्ठ्यां रावणमुकुटभङ्गः, सप्तम्यां कुम्भकर्णस्य वधः, अष्टम्यामतिकायादीनाम्, नवम्यां पुनरिन्द्रजिद्युद्धम्, तस्यामेव रात्रौ कुम्भनिकुम्भादीनां वधः, दशम्यां मकराक्षस्य, एकादश्यां द्वादश्यां त्रयोदश्यां चेन्द्रजिद्वधः । वस्तुतस्तु नवम्यां युद्धारम्भात्तदारभ्य दिनद्वयेन रावणेन्द्रजिन्मूलबलव्यतिरिक्तराक्षसनिबर्हणात् एकादशीद्वादशीत्रयोदशीभिरिन्द्रजिद्वध इति चतुर्दश्यामभ्युत्थानवचनं युज्यत एव ॥६५–६७॥ रामानु०–शूर इति । रथी महारथ इत्यर्थः ॥ ६६ ॥ इति श्रीगोविन्दराज० श्रीरामायण० रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिनवतितमः सर्गः ॥ ९३ ॥

फालिष्यति स्फुटिष्यति ॥ ५६–६३ ॥ मैथिलीमिति । प्रत्यवेक्षस्व कालान्तरे मैथिली वशगा भविष्यतीति प्रत्यवेक्षस्वेत्यर्थः ॥ ६४ ॥ अद्य चतुर्दशीं चतुर्दश्याम् अभ्युत्थानं समरोद्योगं युद्धाय प्रस्थानं कृत्वा अमावास्यायां विजयाय निर्याहि ॥ ६५ ॥ शूर इत्यस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु–दाशरथिं प्रति गत्वा, दाशरथिं मैथिलीं भवान् प्राप्स्यति, रणे हतस्सन् तयोः पार्षदतां प्राप्स्यतीत्यर्थः॥६६॥६७॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायण०युद्धकाण्ड० त्रिनवतितमः सर्गः॥९३॥

For Private And Personal Use Only

अथ मूलबलयुद्धम्—स प्रविश्येत्यादि ॥१॥ अब्रवीदिति । रावणः प्राञ्जलिरिति । अनुनयार्थमञ्जलिकरणम् ॥२॥३॥ रामानु०—अब्रवीदिति । रावणः प्राञ्जलि र्वाक्यमिति पाठः ॥ २ ॥ एकमिति । परिक्षिप्य आवार्य, शरवर्षेण वृष्ट्वा हन्तुमर्हथेत्यन्वयः ॥ ४ ॥ स रामो यदि हन्तुं न शक्येत तथापि भवतां शरैः

स प्रविश्य सभां राजा दीनः परमदुःखितः । निषसादासने मुख्ये सिंहः क्रुद्ध इव श्वसन् ॥ १ ॥ अब्रवीच्च स तान् सर्वान् बलमुख्यान् महाबलः । रावणः प्राञ्जलिर्वाक्यं पुत्रव्यसनकर्शितः ॥ २ ॥ सर्वे भवन्तः सर्वेण हस्त्यश्वेन समावृताः । निर्यान्तु रथसङ्घैश्च पादातैश्चोपशोभिताः ॥ ३ ॥ एकं रामं परिक्षिप्य समरे हन्तुमर्हथ । वर्षन्तः शरवर्षेण प्रावृट्काल इवाम्बुदाः ॥ ४ ॥ अथवाऽहं शरैस्तीक्ष्णैर्भिन्नगात्रं महारणे । भवद्भिः श्वो निहन्तास्मि रामं लोकस्य पश्यतः ॥५॥ इत्येतद्राक्षसेन्द्रस्य वाक्यमादाय राक्षसाः । निर्ययुस्ते रथैः शीघ्रैर्नानानीकैः सुसंवृताः ॥ ६ ॥ परिघान् पट्टिशांश्चैव शरखड्गपरश्वधान् । शरीरान्तकरान् सर्वे चिक्षिपुर्वानरान् प्रति ॥ ७ ॥ वानराश्च द्रुमान् शैलान् राक्षसान् प्रति चिक्षिपुः ॥८॥ स सङ्ग्रामो महान् भीमः सूर्यस्योदयनं प्रति । रक्षसां वानराणां च तुमुलः समपद्यत ॥ ९ ॥ ते गदाभिर्विचित्राभिः प्रासैः खड्गैः परश्वधैः । अन्योन्यं समरे जघ्नुस्तदा वानरराक्षसाः ॥ १० ॥ एवं प्रवृत्ते सङ्ग्रामे ह्युद्धूतं सुमहद्रजः । रक्षसां वानराणां च शान्तं शोणितविस्रवैः ॥ ११ ॥

भिन्नगात्रः स्यात्, तेन तस्य वधः सुकरो मे भवेदित्यभिप्रायेणाह—अथवेति । इदानीं यूयं तं हन्तुं न शक्ताश्चेदिदानीं तीक्ष्णैः शरैर्भवद्भिर्भिन्नगात्रं श्वो निहन्तास्मि ॥ ५–८ ॥ सूर्यस्योदयनं प्रति सूर्योदयमारभ्य ॥ ९ ॥ ते गदाभिरिति । अन्योन्यं जघ्नुरित्यत्र शिलावृक्षाणामप्युपलक्षणम् । राक्षसेभ्यो ॥ १–३ ॥ एकमिति । परिक्षिप्य परितो निरुध्य ॥ ४ ॥ अथवा अद्य रामहननासम्भवपक्षे भवद्भिर्भिन्नगात्रं श्वो निहन्तास्मीति सम्बन्धः । एकं राममित्यादि श्लोकद्वयस्य वास्तवार्थस्तु—शरान् वर्षन्तो यूयं परिक्षिप्य मिलित्वा एकं मुख्यं रामं समरे हन्तुं गन्तुमर्हथेति सम्बन्धः । अथ भवद्भिर्वा शरैर्महारणे भिन्नगात्रं रामं लोकस्य पश्यतः अहं श्वो निहन्ता गन्ता गमिष्यामीत्यर्थः ॥ ५–८ ॥ स सङ्ग्राम इति । सूर्यस्योदयनं प्रति सूर्योदयमारभ्य ॥ ९ ॥ अन्योन्यं जघ्नुरित्यत्र

स०—आहवे सर्वान् हतान् श्रुत्वा अनुत्साहान् युद्धाय प्रोत्साहयितुं प्राञ्जलिर्भूत्वाऽब्रवीदित्यर्थः ॥२॥ शरवर्षाणि जलवर्षाणि बाणवर्षाणीति नीरदसेनोभयपक्षेऽपि क्रमादर्थो बोध्यः । प्रकृष्टाः शस्त्रवर्षाणीति पाठः ॥४॥

ऽपहृतानि गदाखड्गादीनि राक्षसानामिव वानराणामपि संभवन्तीति वा तथोक्तमिति ज्ञेयम् ॥ १० ॥ ११ ॥ मातङ्गेति । शरीराण्येव सङ्घाटाः प्लवाः तान् वहन्तीति शरीरसङ्घाटवहाः ॥ १२ ॥ ततस्ते वानराः सर्वे शोणितौघपरिप्लुता इत्यारभ्य-राक्षसानां बभञ्जिर इत्यन्तं सार्धश्लोक एकान्वयः ॥ १३ ॥

मातङ्गरथकूलाश्च वाजिमत्स्या ध्वजद्रुमाः । शरीरसङ्घाटवहाः प्रसस्रुः शोणितापगाः ॥ १२ ॥ ततस्ते वानराः सर्वे शोणितौघपरिप्लुताः । ध्वजवर्मरथानश्वान्नानाप्रहरणानि च । आप्लुत्याप्लुत्य समरे राक्षसानां बभञ्जिरे ॥ १३ ॥ केशान् कर्णललाटांश्च नासिकाश्च प्लवङ्गमाः । रक्षसां दशनैस्तीक्ष्णैर्नखैश्चापि न्यकर्तयन् ॥ १४ ॥ एकैकं राक्षसं सङ्ख्ये शतं वानरपुङ्गवाः । अभ्यधावन्त फलिनं वृक्षं शकुनयो यथा ॥ १५ ॥ तथा गदाभिर्गुर्वीभिः प्रासैः खड्गैः परश्वधैः । निजघ्नुर्वानरान् घोरान् राक्षसाः पर्वतोपमाः ॥ १६ ॥ राक्षसैर्युद्ध्यमानानां वानराणां महाचमूः । शरण्यं शरणं याता रामं दशरथात्मजम् ॥१७॥ ततो रामो महातेजा धनुरादाय वीर्यवान् । प्रविश्य राक्षसं सैन्यं शरवर्षं ववर्ष ह ॥१८॥ प्रविष्टं तु तदा रामं मेघाः सूर्यमिवाम्बरे । नाभिजग्मुर्महाघोरं निर्दहन्तं शराग्निना ॥१९॥ कृतान्येव सुघोराणि रामेण रजनीचराः । रणे रामस्य ददृशुः कर्माण्यसुकराणि च ॥ २० ॥ चालयन्तं महानीकं विधमन्तं महारथान् । ददृशुस्ते न वै रामं वातं वनगतं यथा ॥ २१ ॥

केशानिति । रक्षसां केशानिति क्रमेणान्वयः । न्यकर्तयन् चिच्छिदुः ॥ १४-१६ ॥ राक्षसैरिति । वानरसेनाशरणागतिरियम् । राक्षसैर्वध्यमानानामित्याकिञ्चन्यानन्यगतिकत्वोक्तिः । शरण्यमिति दयाद्युक्तिः । राममिति परत्वोक्तिः । दशरथात्मजमिति सौलभ्योक्तिः ॥ १७-१९ ॥ कृतान्येवेति । कृतान्येव ददृशुः, नतु क्रियमाणानीत्यर्थः ॥२०॥ न केवलं हस्तलाघवातिशयेन कर्मणामदर्शनं रणसञ्चारलाघवातिशयेन कर्तारमपि न ददृशुरित्याह-चालयन्त

वानराणां गदाद्यायुधाभावाद्राक्षसहस्तादाच्छिद्य गृहीतैस्तैरेव राक्षसहननं भविष्यतीति वेदितव्यम् ॥ १०-१९ ॥ कृतान्येवेति । रजनीचरा रामस्य रणे असुकराणि कर्माणि रामेण कृतान्येव ददृशुः, न क्रियमाणानीत्यर्थः ॥ २० ॥ न केवलं हस्तलाघवातिशयेन तस्य कर्माणि न ददृशुः किन्तु तत्कर्तारमपि न ददृशुरित्याह-चालयन्तमिति । चालनादिकार्यलिङ्गाद्यथा वायुरनुमितो भवति तद्वद्रामोऽपि विधमनादिकार्यलिङ्गादनुमितः, न तु प्रत्यक्षेण दृष्टः ॥ २१ ॥ ११ ॥ ॥२८४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिति। यथा चालनविधमनादिकार्यलिङ्गात् वायुरनुमितो भवति तद्वद्रामोऽप्यनुमितः, न तु प्रत्यक्षित इत्यर्थः ॥ २१ ॥ उक्तमर्थं विशदयति–छिन्नमिति। छिन्नं खण्डितम्। भिन्नं विदारितम्। प्रभग्नं शकलीकृतम्। शस्त्रपीडितं हृदयार्पितशल्यम् ॥ २२ ॥ इन्द्रियार्थेषु तिष्ठन्तम् इन्द्रियार्थाननुतिष्ठन्तम् अनुभवन्तम्, तेनानुभवेनानुमीयमानमपि भूतात्मानं भूतस्य पञ्चभूतात्मकशरीरस्य आत्मानं जीवात्मानं प्रजाः यथा न पश्यन्ति, तथैव

छिन्नं भिन्नं शरैर्दग्धं प्रभग्नं शस्त्रपीडितम्। बलं रामेण ददृशुर्न रामं शीघ्रकारिणम् ॥ २२ ॥
प्रहरन्तं शरीरेषु न ते पश्यन्ति राघवम्। इन्द्रियार्थेषु तिष्ठन्तं भूतात्मानमिव प्रजाः॥ २३ ॥
एष हन्ति गजानीकमेष हन्ति महारथान्। एष हन्ति शरैस्तीक्ष्णैः पदातीन् वाजिभिः सह ॥ २४ ॥
इति ते राक्षसाः सर्वे रामस्य सदृशान् रणे। अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य ते ॥ २५ ॥
न ते ददृशिरे रामं दहन्तमरिवाहिनीम्। मोहिताः परमास्त्रेण गान्धर्वेण महात्मना ॥ २६ ॥

शरीरेषु प्रहरन्तं तेन प्रहारेणानुमीयमानमपि राघवं पुरतश्चक्षुषा नाद्राक्षुरित्यर्थः। यद्वा इन्द्रियार्थेषु प्रत्यक्षतोऽनुभूयमानेषु गन्धादिगुणेषु, निराश्रयगुणावस्थानासम्भवात् सौक्ष्म्येणानुवृत्तं भूतात्मानमिव पुष्पाद्यवयवभूतपृथिव्यादिस्वरूपमिवेत्यर्थः ॥ २३ ॥ एष हन्तीत्यादिश्लोकद्वयमेकान्वयम्। सदृशान् सादृश्येन प्रतीयमानान्। अन्योन्यं सादृश्यादेव हेतोर्जघ्नुश्चेत्यन्वयः ॥ २४ ॥ २५ ॥ राक्षसानां रामादर्शनकारणमाह--न त इति। इदमुपप्रहरन्तमिति। इन्द्रियार्थेषु तिष्ठन्तम् इन्द्रियाविषयेषु प्रेरकत्वेन शरीरेष्ववतिष्ठन्तम्। भूतात्मानं परमात्मानम, प्रजा इव ते शरीरेषु प्रहरन्तं वेगातिशयेन स्वशरीरेषु यौगपद्येन शरैः प्रहरन्तं राघवं न पश्यन्ति नाद्राक्षुरिति सम्बन्धः। यद्वा इन्द्रियार्थेषु तिष्ठन्तम् इन्द्रियार्थाननुभवन्तम्। तेनानुभवेनानुमीयमानमपि भूतात्मानं जीवात्मानं प्रजा यथा न पश्यन्ति तद्वदिति। यद्वा इन्द्रियार्थेषु शब्दादिविषयेषु तिष्ठन्तं भूतात्मानं परमात्मानं प्रजा इव परमात्मनस्सर्वव्यापितया शब्दादिविषयेषु उपादानचैतन्यरूपतया सूक्ष्मरूपेण तिष्ठन्तं तेभ्योऽन्यत्वेन ते यथा नोपलभन्ते ॥ २३ ॥ एष हन्तीति श्लोकद्वयमेकं वाक्यम्। ते राक्षसाः रामस्य सदृशान् सदृशत्वेन प्रतीयमानान्। 'एष हन्ति गजानीकम्' इति कुपितास्सर्वे ते राक्षसा रामस्य सादृश्यादेव अन्योन्यं जघ्नुरिति सम्बन्धः ॥ २४ ॥ २५ ॥ राक्षसानां राघव

स०–इति रामाकारकज्ञानेन। ते सर्वे राक्षसाः एकसैन्यस्था रणे राघवास्त्रेण मोहिताः सन्तः रामस्य सदृशा बभूवुः। ततश्च राघवस्य सादृश्यात्कुपितास्सन्तः अन्योन्यम् अयं राम इति स राम इति परस्परं जघ्नुः ॥ २५ ॥ एतदेव विशदयति–न ते इति। सैन्यैकदेशस्थाः रामम् अरिवाहिनीं गान्धर्वास्त्रेण दहन्तं स्वस्थाने स्थितं तेनास्त्रेण महात्मना कर्त्रा मोहिताः सन्तः न ददृशिरे इति योजना ॥ २६ ॥

For Private And Personal Use Only

लक्षणम् । सादृश्यदर्शनमपि मोहनास्त्रेणेति द्रष्टव्यम् । महात्मना महास्वभावेन ॥ २६ ॥ अदर्शनवत्सदृशदर्शनवच्चानेकत्वदर्शनं नास्त्रकृतम्, किंतु भीतिकृतमित्याह–ते त्विति । तुशब्दः पूर्वस्माद्विशेषपरः । मारीचेनाप्युक्तम्–"अपि रामसहस्राणि भीतः पश्यामि रावण" इति ॥२७॥ भ्रमन्तीं रामस्य मण्डलाकारगतिविशेषेष्विति केचित् । निरन्तरज्याकर्षणादिति वयम् । अलातचक्रप्रतिमां निर्ज्वालं काष्ठं निरन्तरभ्रमणेनान्तरालाग्रहणाच्चक्रत्वेन प्रतीयमानामिवेत्यर्थः ॥ २८ ॥ अथ तत्र समरसमये मण्डलीकृतकार्मुकं रामं सकलरिपुनिपातिसुदर्शनत्वेन रूपयति–शरीरेत्यादिना । "ज्वालानेम्यर

ते तु रामसहस्राणि रणे पश्यन्ति राक्षसाः । पुनः पश्यन्ति काकुत्स्थमेकमेव महाहवे ॥ २७ ॥
भ्रमन्तीं काञ्चनीं कोटिं कार्मुकस्य महात्मनः । अलातचक्रप्रतिमां ददृशुस्ते न राघवम् ॥ २८ ॥
शरीरनाभि सत्त्वार्चिः शरारं नेमिकार्मुकम् । ज्याघोषतलनिर्घोषं तेजोबुद्धि गुणप्रभम् ॥ २९ ॥

नाभ्यक्षपुरुषाङ्गं सुदर्शनम्" इत्युक्तरीत्या चक्रं षडङ्गं भवति । तत्र कोदण्डचक्रमध्यस्थत्वाद्दृढत्वाच्च शरीरं नाभित्वेन दर्शयति–शरीरेति । नाभिः चक्रमध्योन्नतप्रदेशः, शरीरमेव नाभिर्यस्य तत्तथोक्तम् । सत्त्वं बलमेवार्चिः ज्वाला यस्य तत् सत्त्वार्चिः । "वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्" इत्यमरः । सत्त्वस्य परसन्तापहेतुत्वादर्चिष्ट्वेन निरूपणम् । शरा एवाराणि चक्रमध्यशलाकाः यस्य तच्छरारम् । सुदर्शनस्य सहस्रारत्वाच्छराणामरत्वरूपणेन युगपत्सहस्रशरसन्धानं व्यज्यते । नेमिः आधारश्चक्रप्रान्तः, नेमिभूतं मण्डलीकृतकार्मुकं यस्य तत्कार्मुकनेमीत्यर्थः । एतेन मण्डलीकृत

सादृश्यप्रतीतौ कारणमाह–न ते ददृशिर इत्यादिना ॥ २६ ॥ २७ ॥ भ्रमन्तीं रामस्य मण्डलाकारगतिविशेषेषु भ्रमन्तीम् अत एव अलातचक्रप्रतिमां कार्मुककोटिं ददृशुः न राघवमिति सम्बन्धः ॥ २८ ॥ धनुर्विशिक्षाकृतलाघवातिशयान्मण्डलीकृतकार्मुकत्वेन राक्षसान्निघ्नन्तं रामं चक्रत्वेन निरूपयति–शरीरेत्यादिना । शरीरनाभि शरीरमेव नाभिः मध्यप्रदेशो यस्य तत् । सत्त्वार्चिः सत्त्वं बलं तदेवार्चिर्यस्य तत् । शरारं शरा एव अराणि यस्य तत् । अराणि नाभेः परितोवर्तिशलाका

स०–तत्रैव सैन्यान्तरे वृत्तं रामचरितमाह–त इति । ते रावणप्रेरिता राक्षसाः । रामसहस्राणि विश्वरूपत्वाद्रामस्य तद्गृहीतान्यनन्तरामरूपाणीत्यर्थः । रणे पश्यन्ति । उक्तं च भगवत्पादैः–"स एव सर्वत्र च दृश्यमानो विदिक्षु दिक्षु प्रजज्वाल सर्वशः" इति । पुनः क्षणान्तरे एकमेव पश्यन्ति । उक्तं च संग्रहरामायणे "अपाङ्गमात्रेण जगन्नियन्ता नन्वेकरूपोऽपि विरूपितः स्यात् । ऐश्वर्यमेवं च निदर्शयन् हि स विश्वरूपोऽभवदेकरूपः ॥" इत्याचार्यस्य–" एकाकिनाऽथ स रामदेवो दर्पाभिमानी हि यथाऽग्निदेवः " इत्यन्तेन । यत्तु भारते–" मायावी चासृजन्मायां रावणो राक्षसाधिपः ।" " अथ भूयोऽपि मायां स व्यदधाद्राक्षसाधिपः " इत्यादिना रावणमायया अनेकराक्षसरामलक्ष्मणरूपनिर्माणकथनं तदविरुद्धमित्यत्रापि ग्राह्यम् ॥ २७ ॥

For Private And Personal Use Only

दशायामपि नाभिभूतरामशरीरपरिवेषेण धनुषो महोन्नतत्वमुच्यते। सुदर्शनस्य ज्वालामालया निरन्तरघोषवत्त्वाज्ज्यातलघोषं तद्घोषत्वेन रूपयति ज्याघोषतलनिर्घोषमिति। तलं ज्याघातवारणम्, तेन तद्घोषो लक्ष्यते। ज्याघोषतलघोषावेव निर्घोषौ यस्य तत्तथोक्तम्। तेजः पराक्रम एव बुद्धिः अक्षं यस्य तत्तेजोबुद्धि। यथा "प्लवगसैन्यमुलूकाजिता जितम्" इत्यत्र उलूकशब्दो लक्षणया कौशिकशब्दं लक्षयित्वा इन्द्रजितमाह तथा बुद्धिशब्दो बुद्धिजनकाक्षलक्षणया अक्षप्रदेशमाह। गुणः शरीरकान्तिः, स एव प्रभा यस्य तत्तथोक्तम्। दिव्यास्त्राणां गुणः शक्तिः माहात्म्यं वा तदेव पर्यन्तो धारा

दिव्यास्त्रगुणपर्यन्तं निघ्नन्तं युधि राक्षसान्। ददृशू रामचक्रं तत् कालचक्रमिव प्रजाः॥ ३०॥
अनीकं दशसाहस्रं रथानां वातरंहसाम्। अष्टादश सहस्राणि कुञ्जराणां तरस्विनाम्॥ ३१॥

यस्य तद्दिव्यास्त्रगुणपर्यन्तम्। निघ्नन्तं निघ्नत्। लिङ्गव्यत्यय आर्षः। किञ्च कालचक्रं ज्योतिश्चक्रमिव स्थितम्। विष्णुपुराणे 'यत्र कालचक्रं प्रतिष्ठितम्' इति प्रयोगात्। रामचक्रम् उक्तरीत्या चक्रमिव स्थितं रामं ददृशुः। ननु यदि रामो मोहनास्त्रेण राक्षसान् संहरेत्तदेन्द्रजितोऽस्य को विशेषः? उच्यते। नात्र गान्धर्वास्त्रेण मोहनं कृतम्। अपितु गान्धर्वप्रयोगे सति वेगातिशयेनाज्ञातस्वपरविभेदतया मोहिताः परस्परं जघ्नुः। यत्र रामो दृष्टः तत्क्षणे तत्र तस्यादर्शनाद्राममुद्दिश्य क्षिप्ताः शराः स्वकीयानेव घ्नन्ति। वेगातिशयादेव नानादिक्षु चक्षुःप्रसरे नानात्वेन दर्शनम्। अत एव 'न रामं शीघ्रकारिणम्' इत्युक्तिः। कार्मुककोटेरलातचक्रप्रतिमत्वं रामस्य चक्रत्वरूपणं च प्रयोगशैघ्र्यादेव सङ्गच्छते। अत एव सुग्रीवादयो मायाबलत्वं शङ्केरन्निति परिहरिष्यति 'एतदस्त्रबल'मिति। न ते ददृशिर इत्यस्य श्लोकस्यैवं योजना—गान्धर्वास्त्रेण दहन्तं रामं मोहिताः सन्तो न ददृशिरे। मोहोऽत्र वेगादग्रहणम्। गान्धर्वास्त्रं दाहमात्रे हेतुरिति बोध्यम्॥ २९॥ ३०॥ अनीकमित्यादि। "एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका। पत्त्यङ्गैस्त्रिगुणैः सर्वैः क्रमादाख्या

कृत्स्नचयवविशेषाः। नेमिकार्मुकं नेमयः पृथिव्यां भ्रमन्त्यो वलयाकारेण स्थिताः, नेमिभूतं कार्मुकं यस्य तद। ज्याघोषतलनिर्घोषं तलं ज्याघातस्थलम्, तल शब्देन तलघोषो लक्ष्यते, ज्याघोषतलघोषौ निर्घोषौ यस्य तत्। तेजोबुद्धिगुणप्रभं तेजः शरीरकान्तिः, बुद्धिः ज्ञानम्, तेजोबुद्धिगुणावेव प्रभा यस्य तत्। दिव्यास्त्रगुणपर्यन्तं दिव्यास्त्राणां गुणः माहात्म्यं शक्तिर्वा, तदेव पर्यन्तः धारा यस्य तत्तथोक्तम्। निघ्नन्तं निघ्नत्। पूर्वं रूपकेण निरूप्य पुनरुपमया निरूपयति कालचक्रमिव प्रजा इति॥ २९॥३०॥ अनीकमित्यादि श्लोकत्रयमेकं वाक्यम्। "एकेभैकरथा त्र्यश्वा पत्तिः पञ्चपदातिका। पत्त्यङ्गैस्त्रिगुणैस्सर्वैः क्रमादाख्या यथोत्तरम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथोत्तरम्। सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः॥" इत्युक्तरीत्या दशसङ्ख्यासङ्ख्याता पत्तिः। पत्तितास्त्रिगुणं सेनामुखम्। सेनामुखतास्त्रिगुणो गुल्मः। गुल्मतस्त्रिगुणो गणः। गणतस्त्रिगुणा वाहिनी। तत्रिगुणा पृतना। पृतनातस्त्रिगुणा चमूः। एवञ्च दशोनत्रिशताधिकसप्तसहस्रसङ्ख्यालक्षणा चमूरनीकशब्देनोच्यते। सहस्राण्येव साहस्राणि दश साहस्राण्यस्मिन्सन्तीति दशसाहस्रम्, रथानां दशसहस्राण्यनीकानीत्यर्थः। एकोनत्रिंशल्लक्षाधिकसप्तकोटिसंख्यासंख्याता रथा इत्युक्तं भवति। रथाः–७,२९०००००। अष्टादश सहस्राणीत्यनेन अनीकामित्येतद्विभक्तिविपरिणामेनानुषज्यते। अष्टादश

चतुर्दश सहस्राणि सारोहाणां च वाजिनाम्। पूर्णे शतसहस्रे द्वे राक्षसानां पदातिनाम्॥ ३२॥
दिवसस्याष्टमे भागे शरैरग्निशिखोपमैः। हतान्येकेन रामेण रक्षसां कामरूपिणाम्॥ ३३॥
ते हताश्वा हतरथाः शान्ता विमथितध्वजाः। अभिपेतुः पुरीं लङ्कां हतशेषा निशाचराः॥ ३४॥

सहस्राण्यनीकानीत्यर्थः। विंशतिसहस्राधिकद्वादशलक्षोत्तरत्रयोदशकोटिसंख्यासंख्यातास्तरस्विनः कुञ्जरा इत्यर्थः। गजाः–१३,१२,२००००। चतुर्दशसहस्राणीत्यत्रापि अनीकमित्येतद्विपरिणाम्यानुषञ्जनीयम्। चतुर्दश सहस्राण्यनीकानीत्यर्थः। षष्टिसहस्राधिकविंशतिलक्षोत्तरदशकोटिसंख्यासंख्याताः सारोहा वाजिन इत्यर्थः। तुरगाः–१०,२०,६००००। पूर्णे शतसहस्रे द्वे अनीकानीत्यर्थः। अशीतिलक्षोत्तरपञ्चचत्वारिंशत्कोट्यधिकशतकोटिसङ्ख्यासङ्ख्याताः पदातयो राक्षसा इत्यर्थः। पदातयः–१४५,८००००००। वातरंहसामित्यादिविशेषणमहिम्ना तद्भिन्ना रथगजतुरगपदातयोऽसङ्ख्येया इति भावः। अत एवैवमनुसन्दधते–" नागानामयुतं तुरङ्गनियुतं सार्धं रथानां शतं पादातं शतकोटिकर्तनविधावेकः कबन्धो रणे। एवं कोटिकबन्धनर्तनविधौ किञ्चिद्ध्वनिः किङ्किणी यामार्धं परमात्मनो रघुपतेः कोदण्डघण्टारवः॥" इति। कामरूपिणां रक्षसां सम्बन्धीनि। रथादि

सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः। अनीकिनी दशानीकिन्योऽक्षौहिणी " इत्यमरोक्तक्रमकारेण सङ्ख्याता पत्तिः, तत्रिगुणं सेनामुखम्, सेनामुखत्रिगुणो गुल्मः, गुल्मत्रिगुणो गणः, गणत्रिगुणा वाहिनी, वाहिनीत्रिगुणा पृतना, पृतनात्रिगुणा चमूः, चमूत्रिगुणा अनीकिनी, दशोनत्रिशताधिकसप्तसहस्रसङ्ख्यालक्षणा चमूः अनीकशब्देनोच्यते। सहस्राण्येव साहस्राणि। स्वार्थेऽण्। दश साहस्राण्यस्मिन् सन्तीति दशसाहस्रम्। वातरंहसां रथानां दशसहस्राण्यनीकानीत्यर्थः(?) षष्टिसहस्राधिकविंशतिलक्षोत्तरदशकोटिसङ्ख्यासङ्ख्यातास्सारोहा वाजिन इत्युक्तं भवति। पूर्णे शतसहस्रे द्वे अनीकानीत्यर्थः। अशीतिलक्षोत्तरपञ्चचत्वारिंशत्कोट्यधिकशतसंख्यासंख्याता राक्षसा इत्युक्तं भवति। कामरूपिणां रक्षसां सम्बन्धीनि रथादिचतुरङ्गबलानि एकेन रामेण दिवसस्याष्टमे भागे पादघटिकोन

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चतुरङ्गबलानि एकेन रामेण दिवसस्याष्टमे भागे पादोनघटिकाचतुष्टये निहतानीत्यन्वयः॥२१-२४॥ हतैरिति। हतगजाद्युपलक्षितं सुमहात्मनोरामस्य तद्रणाजिरं रुद्रस्य आक्रीडं क्रीडास्थानं श्मशानमिव बभूव। आर्षं नपुंसकत्वम्। "अचिरेण पुरी लङ्का श्मशानसदृशी भवेत्" इति पूर्वोक्तेः ॥२५॥ ॥ २६ ॥ अब्रवीच्चेत्यादिश्लोकद्वयमेकान्वयम्। प्रत्यनन्तरं समीपस्थम्। क्षणेनानेन रक्षःप्रतिक्षेपजनितां मायावित्वशङ्कां वारयति-एतदस्त्रबलमिति।

हतैर्गजपदात्यश्वैस्तद्बभूव रणाजिरम्। आक्रीडमिव रुद्रस्य क्रुद्धस्य सुमहात्मनः ॥ ३५ ॥ ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः। साधु साध्विति रामस्य तत् कर्म समपूजयन् ॥ ३६ ॥ अब्रवीच्च तदा रामः सुग्रीवं प्रत्यनन्तरम्। विभीषणं च धर्मात्मा हनूमन्तं च वानरम् ॥३७॥ जाम्बवन्तं हरिश्रेष्ठं मैन्दं द्विविदमेव च। एतदस्त्रबलं दिव्यं मम वा त्र्यम्बकस्य वा ॥ ३८ ॥ निहत्य तां राक्षसवाहिनीं तु रामस्तदा शक्रसमो महात्मा। अस्त्रेषु शस्त्रेषु जितक्लमश्च संस्तूयते देवगणैः प्रहृष्टैः ॥३९॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे चतुर्नवतितमः सर्गः ॥९४॥

तानि तानि सहस्राणि सारोहाणां च वाजिनाम्। रथानां त्वग्निवर्णानां सध्वजानां सहस्रशः ॥ १ ॥
राक्षसानां सहस्राणि गदापरिघयोधिनाम्। काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम् ॥ २ ॥
निहतानि शरैस्तीक्ष्णैस्तप्तकाञ्चनभूषणैः। रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ॥ ३ ॥
दृष्ट्वा श्रुत्वा च सम्भ्रान्ता हतशेषा निशाचराः। राक्षसीश्च समागम्य दीनाश्चिन्तापरिप्लुताः ॥ ४ ॥

अत्रान्ते इतिकरणं द्रष्टव्यम्। अस्त्रबलम् अस्त्रप्रयोगशक्तिः। न त्वस्त्रमपि, गान्धर्वेण च गान्धर्वमिति रावणादेरपि तत्संभवकथनात्। त्र्यम्बकस्य वा संहारकाले, अस्तीति शेषः ॥ ३७ ॥ ३८ ॥ निहत्येति। संस्तूयत इति वर्तमाननिर्देशेन स्तुतेरद्याप्यविच्छिन्नत्वमुच्यते ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्नवतितमः सर्गः ॥ ९४ ॥

अथ राक्षसीनां प्रलापः-तानि तानीत्यादिचतुःश्लोकी। वाजिनामित्येतद्गजानामप्युपलक्षणम्। सहस्रशः सहस्राणि। राक्षसीः राक्षसस्त्रियः, समागम्य मुहूर्तद्वयेन हतानीत्यर्थः। चतुर्दश्यां मूलबलवधः ॥ ११-३९ ॥ इति श्रीमहेश्वरतीर्थ० युद्धकाण्डव्याख्यायां चतुर्नवतितमः सर्गः ॥९४॥१-३॥ दृष्ट्वेति। हतशेषाः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिन्तापरिप्लुताः, आसन्निति शेषः ॥ १–४ ॥ विधवा इति । सङ्गम्य सङ्घीभूय, परस्परमालिङ्गिता इत्यर्थः ॥ ५ ॥ कथमित्यादिसार्धश्लोकमेकं वाक्यम् । कराला विकटा ॥ ६ ॥ तं दृष्ट्वेत्यादि सार्धश्लोकमेकं वाक्यम् । प्रकामिता सा कथं कामयामास ॥ ७ ॥ ८ ॥ जनस्येत्यादिसार्धश्लोकद्वयमेकं वाक्यम् ।

विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः । राक्षस्यः सह सङ्गम्य दुःखार्ताः पर्यदेवयन् ॥ ५ ॥ कथं शूर्पणखा वृद्धा कराला निर्णतोदरी । आससाद वने रामं कन्दर्पमिव रूपिणम् । सुकुमारं महासत्त्वं सर्वभूतहिते रतम् ॥६॥ तं दृष्ट्वा लोकनिन्द्या सा हीनरूपा प्रकामिता ॥ ७ ॥ कथं सर्वगुणैर्हीना गुणवन्तं महौजसम् । सुमुखं दुर्मुखी रामं कामयामास राक्षसी ॥ ८ ॥ जनस्यास्याल्पभाग्यत्वाद्वलिनी श्वेतमूर्धजा । अकार्यमपहास्यं च सर्वलोकविगर्हितम् ॥ ९ ॥ राक्षसानां विनाशाय दूषणस्य खरस्य च । चकाराप्रतिरूपा सा राघवस्य प्रधर्षणम् ॥१०॥ तन्निमित्तमिदं वैरं रावणेन कृतं महत् । वधाय सीता साऽऽनीता दशग्रीवेण रक्षसा ॥ ११ ॥ न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम् । बद्धं बलवता वैरमक्षयं राघवेण च ॥ १२ ॥ वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसम् । हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् ॥ १३ ॥

वलयोऽस्याः सन्तीति वलिनी । पामादित्वान्नः । आर्षो ङीप् । अप्रतिरूपा अननुरूपा । तन्निमित्तं प्रधर्षणनिमित्तात् । शूर्पणखयाऽन्यथोक्तावपि तत्कामनादिकमकम्पनादिमुखात् सर्वैर्ज्ञातमिति ज्ञेयम ॥ ९–१२ ॥ वैदेहीमिति । विराधं प्रेक्ष्य ज्ञात्वा, स्थितानामस्माकं तत् विराधहननं विरोधि

निशाचराः रणात्प्रतिनिवृत्ता लङ्कास्थाश्च दृष्ट्वा श्रुत्वा च सम्भ्रान्ताः, अभवन्निति शेषः । राक्षस्यश्च समागम्य सङ्घीभूय दीनाश्चिन्तापरिप्लुताः, अभूवन्निति शेषः । राक्षस्यश्चेति पाठः ॥ ४ ॥ ५ ॥ निर्णतोदरी करभोदरी ॥ ६ ॥ तं दृष्ट्वेत्यर्धमेकं वाक्यम् । प्रकामिता प्रकृष्टः कामः प्रकामः सोऽस्यास्सञ्जातः प्रकामिता ॥ ७ ॥ कामयामास छन्दयामास ॥ ८ ॥ वलिनी वलयः अस्यास्सन्तीति वलिनी, व्रीह्यादित्वादिनिः ॥ ९ ॥ अप्रतिरूपा विकृतरूपा ॥ १० ॥ तन्निमित्तं प्रधर्षणनिमित्तम् । वधाय राक्षसनाशाय ॥ ११ ॥ १२ ॥ वैदेहीं प्रार्थयानम् एकेन रामेण हतं विराधं प्रेक्ष्य स्थितानामस्माकं तत् विराधहननं पर्याप्तं निदर्शनम् रामस्य ॥२८७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निरसनाय पर्याप्तं पूर्णं निदर्शनम् ॥ १२ ॥ चतुर्दशेति श्लोके पर्याप्तं तन्निदर्शनमित्यनुषज्यते । उत्तरश्लोकेनैकवाक्यत्वे शरपदद्वयवैयर्थ्यम् ॥ १४ ॥ ॥ १५ ॥ हत इति । अथ खरवधानन्तरम् । नादं शब्दम् । नदन् कुर्वन् । सः प्रसिद्धः कबन्धः ॥ १६–२० ॥ कुम्भकर्णमित्यादि । नावबुध्यते, राम

चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥ १४ ॥ खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा । शरैरादित्यसङ्काशैः पर्याप्तं तन्निदर्शनम् ॥ १५ ॥ हतो योजनबाहुश्च कबन्धो रुधिराशनः । क्रोधान्नादं नदन् सोऽथ पर्याप्तं तन्निदर्शनम् ॥ १६ ॥ जघान बलिनं रामः सहस्रनयनात्मजम् । वालिनं मेरुसङ्काशं पर्याप्तं तन्निदर्शनम् ॥ १७ ॥ ऋष्यमूके वसन् शैले दीनो भग्नमनोरथः । सुग्रीवः स्थापितो राज्ये पर्याप्तं तन्निदर्शनम् ॥ १८ ॥ धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम् । युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते ॥ १९ ॥ विभीषणवचः कुर्याद्यदि स्म धनदानुजः । श्मशानभूता दुःखार्ता नेयं लङ्का पुरी भवेत् ॥ २० ॥ कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम् । अतिकायं च दुर्धर्षं लक्ष्मणेन हतं पुनः । प्रियं चेन्द्रजितं पुत्रं रावणो नावबुध्यते ॥२१॥ मम पुत्रो मम भ्राता मम भर्ता रणे हतः । इत्येवं श्रूयते शब्दो राक्षसानां कुलेकुले ॥ २२॥ रथाश्चाश्वाश्च नागाश्च हताः शतसहस्रशः । रणे रामेण शूरेण राक्षसाश्च पदातयः ॥ २३ ॥ रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः । हन्ति नो रामरूपेण यदि वा स्वयमन्तकः ॥ २४ ॥ हतप्रवीरा रामेण निराशा जीविते वयम् । अपश्यन्तो भयस्यान्तमनाथा विलपामहे ॥ २५ ॥

प्रभावमिति शेषः ॥ २१ ॥ ममेति । कुलेकुले गृहेगृहे । इदमपि राक्षसीवाक्यमेव ॥ २२–२४ ॥ हतप्रवीरा इति । वयमित्येतदपेक्षया अपश्यन्त इति

सर्वातिशायित्वपरिज्ञानाय निरपेक्षं निदर्शनमित्यर्थः ॥ १३–२० ॥ कुम्भकर्णमित्यादि सार्धम् । रावणो नावबुध्यते, रामपराक्रममिति शेषः ॥ २१ ॥ कुलेकुले गृहेगृहे ॥ २२–२४ ॥ अपश्यन्तः अपश्यन्त्यः ॥ २५ ॥ २६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुंलिङ्गम् । विलपामहे इत्यात्मनेपदमार्षम् ॥ २५ ॥ २६ ॥ न देवा इति । उपसृष्टम् उपद्रुतम् ॥ २७ ॥ उत्पाताश्चापीति । कथयिष्यन्ति, इतः परमपि कानिचिन्निमित्तानि प्रादुर्भूय कथयिष्यन्तीत्यर्थः । वर्तमाने तात्पर्यमित्यप्याहुः ॥ २८ ॥ रामानु०–कथयिष्यन्ति कथयन्तीत्यर्थः ॥ २८ ॥ पिता

रामहस्ताद्दशग्रीवः शूरो दत्तमहावरः । इदं भयं महाघोरमुत्पन्नं नावबुध्यते ॥ २६ ॥ न देवा न च गन्धर्वा न पिशाचा न राक्षसाः । उपसृष्टं परित्रातुं शक्ता रामेण संयुगे ॥ २७ ॥ उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे । कथयिष्यन्ति रामेण रावणस्य निबर्हणम् ॥२८॥ पितामहेन प्रीतेन देवदानवराक्षसैः । रावणस्याभयं दत्तं मानुषेभ्यो न याचितम् ॥२९॥ तदिदं मानुषं मन्ये प्राप्तं निस्संशयं भयम् । जीवितान्तकरं घोरं रक्षसां रावणस्य च ॥३०॥ पीड्यमानास्तु बलिना वरदानेन रक्षसा । दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन् ॥ ३१ ॥ देवतानां हितार्थाय महात्मा वै पितामहः । उवाच देवताः सर्वा इदं तुष्टो महद्वचः ॥३२॥ अद्यप्रभृति लोकांस्त्रीन् सर्वे दानवराक्षसाः । भयेन प्रावृता नित्यं विचरिष्यन्ति शाश्वतम् ॥ ३३ ॥ दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः । वृषध्वजस्त्रिपुरहा महादेवः प्रसादितः ॥ ३४ ॥ प्रसन्नस्तु महादेवो देवानेतद्वचोऽब्रवीत् । उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा ॥ ३५ ॥ एषा देवैः प्रयुक्ता तु क्षुद्यथा दानवान् पुरा । भक्षयिष्यति नः सीता राक्षसघ्नी सरावणान् ॥ ३६ ॥

महेनेति । देवदानवराक्षसैः देवदानवराक्षसेभ्यः ॥ २९ ॥ मानुषं मानुषादागतम् । मन्ये मन्यामहे ॥ ३० ॥ रक्षसा रावणेन । वरदानेन कारणेन ॥ ३१ ॥ ३२ ॥ दानवराक्षसा इत्युक्तेर्मन्दोदरीसम्बन्धेन दानवाश्च केचिद्राक्षसैः सह तिष्ठन्तीति ज्ञेयम् ॥३३–३५॥ क्षुद्यथा दानवान् पुरेति । देवेभ्यो ॥२८८॥

उपसृष्टं हन्तुमारब्धम् ॥ २७ ॥ कथयिष्यन्ति सूचयिष्यन्ति ॥ २८ ॥ देवदानवराक्षसैः देवदानवराक्षसेभ्यः ॥ २९ ॥ ३० ॥ इदानीं ब्रह्मवाक्यादपि राक्षसानां क्षयो नियत इत्याहुः–पीड्यमाना इति ॥ ३१–३४ ॥ साम्प्रतं महादेववाक्याद्व्यवस्थितसामर्थ्यात्वपि रक्षसां क्षयं निश्चिन्वन्ति–उत्पत्स्यतीति ॥ ३५ ॥ ३६ ॥

ऽमृतप्रदानानन्तरमिति बोध्यम् । अस्मच्छन्दापेक्षया सरावणानित्युक्तिः ॥ ३६ ॥ निष्ठानकः नाश इत्याहुः ॥ ३७ ॥ रामानु०–रावणस्येति । अपनीतेन अपनयेन । निष्ठानको विनाशः ॥ ३७ ॥ तमिति । पश्यामह इत्यात्मनेपदमार्षम् ॥ ३८ ॥ ३९ ॥ प्राप्तकालम् उचितम् । पौलस्त्येन विभीषणेन । इतः

रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः । अयं निष्ठानको घोरः शोकेन समभिप्लुतः ॥३७॥ तं न पश्यामहे लोके यो नः शरणदो भवेत् । राघवेणोपसृष्टानां कालेनेव युगक्षये ॥३८॥ नास्ति नः शरणं कश्चिद्भये महति तिष्ठताम् । दवाग्निवेष्टितानां हि करेणूनां यथा वने ॥ ३९ ॥ प्राप्तकालं कृतं तेन पौलस्त्येन महात्मना । यत एव भयं दृष्टं तमेव शरणं गतः ॥ ४० ॥ इतीव सर्वा रजनीचरस्त्रियः परस्परं संपरिरभ्य बाहुभिः । विषेदुरार्ता भयभारपीडिता विनेदुरुच्चैश्च तदा सुदारुणम् ॥४१॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदि० श्रीमद्युद्धकाण्डे पञ्चनवतितमः सर्गः ॥९५॥
आर्तानां राक्षसीनां तु लङ्कायां वै कुले कुले । रावणः करुणं शब्दं शुश्राव परिदेवितम् ॥ १ ॥ स तु दीर्घं विनिश्वस्य मुहूर्तं ध्यानमास्थितः । बभूव परमक्रुद्धो रावणो भीमदर्शनः ॥ २ ॥ सन्दश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः । राक्षसैरपि दुर्दर्शः कालाग्निरिव मूर्च्छितः ॥ ३ ॥

परं तस्यैव पौलस्त्यकुलप्रतिष्ठापकत्वात्तच्छब्दप्रयोगः । अत्र पितामहादिवरप्रदानवृत्तान्तो राक्षसीभिर्मन्दोदरीसकाशाच्छ्रुत इति ज्ञेयम् । सा च ज्ञानवृद्धेति वक्ष्यते ॥ ४० ॥ ४१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चनवतितमः सर्गः ॥ ९५ ॥
अथ रावणनिर्याणम्–आर्तानामित्यादि । परिदेवितं परिदेवितरूपं शब्दम् ॥ १ ॥ २ ॥ सन्दश्येत्यादिश्लोकत्रयमेकान्वयम् । मूर्च्छितः अभिवृद्धः कालाग्नि

रावणस्येति । अपनीतेन अपनयेन । निष्ठानकः नाशः ॥ ३७–३९ ॥ प्राप्तकालम् उचितम् । पौलस्त्येन विभीषणेन कृतमिति सम्बन्धः ॥ ४० ॥ ४१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चनवतितमः सर्गः ॥ ९५ ॥ १ ॥ २ ॥ सन्दश्येति । मूर्च्छितः प्रज्वलितः ।

स०–करुणम् करुणयतीति करुणस्तम् । परिदेवितं प्रलापात्मकम् ॥ १ ॥

रिव स्थितः। भयाव्यक्तकथः भयादव्यक्तवचनः। ममाज्ञया वदतेत्युवाचेत्यन्वयः। इमौ महोदरमहापार्श्वौ सचिवौ। पूर्वहतौ तु मत्तप्रमत्तापरपर्यायौ रावणभ्रातरौ ॥ ३-८ ॥ रामानु०-भयाव्यक्तकथः स्वानिष्टभयेनास्पष्टाक्षमकथ इत्यर्थः। भयाव्यक्तकथानिति च पाठः ॥ ४ ॥ अथेति। प्रहस्येति, शत्रुषु तृणीकारात्

उवाच च समीपस्थान् राक्षसान् राक्षसेश्वरः। भयाव्यक्तकथस्तत्र निर्दहन्निव चक्षुषा ॥ ४ ॥ महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम्। शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ॥ ५ ॥ तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः। चोदयामासुरव्यग्रान् राक्षसांस्तान् नृपाज्ञया ॥ ६ ॥ ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः। कृतस्वस्त्ययनाः सर्वे रणायाभिमुखा ययुः ॥ ७ ॥ प्रतिपूज्य यथान्यायं रावणं ते निशाचराः। तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः ॥ ८ ॥ अथोवाच प्रहस्यैतान् रावणः क्रोधमूर्च्छितः। महोदरमहापार्श्वौ विरूपाक्षं च राक्षसम् ॥ ९ ॥ अद्य बाणैर्धनुर्मुक्तैर्युगान्तादित्यसन्निभैः। राघवं लक्ष्मणं चैव नेष्यामि यमसादनम् ॥ १० ॥ खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा। करिष्यामि प्रतीकारमद्य शत्रुवधादहम् ॥ ११ ॥ नैवान्तरिक्षं न दिशो न नद्यो नापि सागराः। प्रकाशत्वं गमिष्यन्ति मद्बाणजलदावृताः ॥ १२ ॥ अद्य वानरमुख्यानां तानि यूथानि भागशः। धनुषा शरजालेन विधमिष्यामि पत्रिणा ॥ १३ ॥

॥ ९ ॥ १० ॥ खरस्येत्यादिषु वधस्येति शेषः ॥ ११-१४ ॥

भयाव्यक्तकथान् स्वानिष्टकथनभयादस्पष्टवचनानित्यर्थः। भयाव्यक्तकथ इति वा पाठः ॥ ३-५ ॥ अव्यग्रान् रणोत्साहरहितान् ॥ ६-९ ॥ अद्य बाणैरिति। राघवं लक्ष्मणं यमसादनं नेष्यामि। वस्तुतस्तु-राघवं लक्ष्मणं विना अन्यानिति शेषः ॥ १० ॥ खरस्येत्यादिषु हननस्येति शेषः ॥ ११ ॥ १२ ॥ पत्रिणा

स०-भयाव्यक्तकथः भयेन रामभीत्या अव्यक्ता मन्दा कथा कथनं यस्य सः। भयाद्व्यक्तकथ इति पाठे व्यक्ता अन्तर्हितप्रकाशयार्थस्यापि प्रकाशिका कथा यस्य। आच्छादनाच्छादनहेतुर्भीतिरिति भावः ॥ ४ ॥ भयार्दिताः गमनं रामतो भीतिः भीतिश्चागमने रावणादिति भयार्दिताः। अव्यग्रान् सहनामिभामि रावणनिर्गीतमरणत्वेनाव्यक्तान् ॥ ६ ॥ सर्वे हिंसके रामे तद्विषये रणाभिमुखास्सर्वे कृतस्वस्त्ययना ययुः ॥ ७ ॥ यं रामम् असादनम् असंहार्यम् मन्यध्वे तं राघवं लक्ष्मणं च। यमसादनं यमलोकम् ॥ १० ॥

॥२८९॥

आक्रोशेति । आक्रोशपद्मवक्राणि ईषद्विकसितपद्मभूतवक्राणि । पद्मकेसरवर्चसाम्, वानराणामिति शेषः । प्रमथामि प्रमथ्नामि । श्नाभाव आर्षः ॥ १५–१८ ॥ अद्येति । गतचेतनैः गतप्राणैः । यत्नावेक्ष्यतलामिति । नैरन्ध्र्येण भूमौ वानरान् पातयिष्यामीत्यर्थः ॥ १९ ॥ २० ॥ कल्प्यतामिति ।

अद्य वानरसैन्यानि रथेन पवनौजसा । धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः ॥ १४ ॥ आक्रोशपद्मवक्राणि पद्मकेसरवर्चसाम् । अद्य यूथतटाकानि गजवत् प्रमथाम्यहम् ॥ १५ ॥ सशरैरद्य वदनैः सङ्ख्ये वानरयूथपाः । मण्डयिष्यन्ति वसुधां सनालैरिव पङ्कजैः ॥ १६ ॥ अद्य युद्धप्रचण्डानां हरीणां द्रुमयोधिनाम् । मुक्तेनैकेषुणा युद्धे भेत्स्यामि च शतं शतम् ॥ १७ ॥ हतो भर्ता हतो भ्राता यासां च तनया हताः । वधेनाद्य रिपोस्तासां करोम्यस्रप्रमार्जनम् ॥ १८ ॥ अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः । करोमि वानरैर्युद्धे यत्नावेक्ष्यतलां महीम् ॥ १९॥ अद्य गोमायवो गृध्रा ये च मांसाशिनोऽपरे । सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्पितैः ॥२०॥ कल्प्यतां मे रथः शीघ्रं क्षिप्रमानीयतां धनुः । अनुप्रयान्तु मां सर्वे येऽवशिष्टा निशाचराः ॥ २१ ॥ तस्य तद्वचनं श्रुत्वा महापार्श्वोऽब्रवीद्वचः । बलाध्यक्षान् स्थितांस्तत्र बलं सन्त्वर्यतामिति ॥२२॥ बलाध्यक्षास्तु संरब्धा राक्षसांस्तान् गृहाद्गृहात् । चोदयन्तः परिययुर्लङ्कायां तु महाबलाः ॥ २३ ॥ ततो मुहूर्तान्निष्पेतू राक्षसा भीमदर्शनाः । नर्दन्तो भीमवदना नानाप्रहरणैर्भुजैः ॥ २४ ॥

कल्प्यताम् आकल्प्यताम्, अलंकियतामित्यर्थः ॥ २१ ॥ २२ ॥ बलाध्यक्षास्त्विति । संरब्धा इति । पुनः पुनराह्वानेप्यनागमनात् कुपिता इत्यर्थः । परिययुः प्रतिरथ्यं ययुरित्यर्थः ॥ २३ ॥ तत इत्यादिश्लोकत्रयमेकान्वयम् । हुलैः द्विफलपत्राग्रायुधविशेषैः । "हुलं द्विफलपत्राग्रम्" इति वैजयन्ती ।

शोभनपक्षवता ॥ १३ ॥ १४ ॥ पद्मकेसरवर्चसाम्, वानराणामिति शेषः । यूथतटाकानि प्रमथामीति सम्बन्धः ॥ १५–२३ ॥ ततो मुहूर्तादिति । भुजैरित्यादुर लक्षणे तृतीया ॥ २४–२८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भुजैरित्याद्युपलक्षणे तृतीया ॥ २४-२६ ॥ अथेति । अथानयद्बलाध्यक्षः सत्वरो रावणाज्ञया । द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथमिति पाठः ॥ २७ ॥ आरुरोहेत्यर्धमेकं वाक्यम् । भीमः रावणः ॥ २८ ॥ ततः प्रयात इति । सत्त्वगाम्भीर्यात् बलातिशयात् ॥ २९-३२ ॥ द्वारेणेति । उत्तरद्वारेणेत्यर्थः

असिभिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हलैः । शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः ॥ २५ ॥ यष्टिभिर्विमलैश्चक्रैर्निशितैश्च परश्वधैः । भिण्डिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः ॥ २६ ॥ अथानयद्बलाध्यक्षः सत्वरो रावणाज्ञया । द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम् ॥ २७ ॥ आरुरोह रथं भीमो दीप्यमानं स्वतेजसा ॥ २८ ॥ ततः प्रयातः सहसा राक्षसैर्बहुभिर्वृतः । रावणः सत्त्वगाम्भीर्याद्दारयन्निव मेदिनीम् ॥ २९ ॥ रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ । विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा ॥ ३० ॥ ते तु हृष्टा विनर्दन्तो भिन्दन्त इव मेदिनीम् । नादं घोरं विमुञ्चन्तो निर्ययुर्जयकाङ्क्षिणः ॥ ३१ ॥ ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः । निर्ययावुद्यतधनुः कालान्तकयमोपमः ॥ ३२ ॥ ततः प्रजवनाश्वेन रथेन स महारथः । द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ ॥ ३३ ॥ ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः ॥३४॥ द्विजाश्च नेदुर्घोराश्च सञ्चचालेव मेदिनी । ववर्ष रुधिरं देवश्चस्खलुस्तुरगाः पथि ॥ ३५ ॥ ध्वजाग्रे न्यपतद्गृध्रो विनेदुश्चाशिवं शिवाः । नयनं चास्फुरद्वामं सव्यो बाहुरकम्पत ॥३६॥ विवर्णं वदनं चासीत् किंचिदभ्रश्यत स्वरः ॥३७॥ ततो निष्पततो युद्धे दशग्रीवस्य रक्षसः । रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे ॥३८॥ अन्तरिक्षात् पपातोल्का निर्घातसमनिस्वना । विनेदुरशिवा गृध्रा वायसैरनुनादिताः ॥३९॥ एतानचिन्तयन् घोरानुत्पातान् समुपस्थितान् । निर्ययौ रावणो मोहाद्वधार्थी कालचोदितः ॥४०॥

॥ ३३ ॥ ततो नष्टप्रभ इत्यादिश्लोकचतुष्टयमेकान्वयम् । रूपाणि दुर्निमित्तरूपाणि । ततः अनन्तरं, ततः उत्तरद्वारात् । निष्पततः निष्क्रमतः ।

ततः प्रयात इति । सत्त्वगाम्भीर्यात् बलातिशयात् ॥ २९-३७ ॥ रूपाणि दुर्निमित्तस्वरूपाणि ॥ ३८-४० ॥

For Private And Personal Use Only

सूर्यनष्टप्रभत्वादीनि रूपाणि जज्ञिर इति सम्बन्धः ॥ २४–४१ ॥ तेषां त्विति । आह्वयानानाम् आह्वयमानानाम्, स्पर्धया आह्वयताम् । आगमशास नस्यानित्यत्वान्मुगागमाभावः ॥ ४२ ॥ ४३ ॥ निकृत्तशिरस इत्यादिश्लोकद्वयम् । स्पष्टम् ॥ ४४–४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायण भूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षण्णवतितमः सर्गः ॥ ९६ ॥

तेषां तु रथघोषेण राक्षसानां महात्मनाम् । वानराणामपि चमूर्युद्धायैवाभ्यवर्तत ॥ ४१ ॥ तेषां तु तुमुलं युद्धं बभूव कपिरक्षसाम् । अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम् ॥ ४२ ॥ ततः क्रुद्धो दशग्रीवः शरैः काञ्चन भूषणैः । वानराणामनीकेषु चकार कदनं महत् ॥४३॥ निकृत्तशिरसः केचिद्रावणेन वलीमुखाः । केचिद्विच्छिन्न हृदयाः केचिच्छ्रोत्रविवर्जिताः । निरुच्छ्वासा हताः केचित् केचित् पार्श्वेषु दारिताः ॥ ४४ ॥ केचिद्विभिन्नशिरसः केचिच्चक्षुर्विवर्जिताः ॥ ४५ ॥ दशाननः क्रोधविवृत्तनेत्रो यतो यतोऽभ्येति रथेन सङ्ख्ये । ततस्ततस्तस्य शरप्रवेगं सोढुं न शेकुर्हरिपुङ्गवास्ते ॥४६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे षण्णवतितमः सर्गः ॥९६॥

तथा तैः कृत्तगात्रैस्तु दशग्रीवेण मार्गणैः । बभूव वसुधा तत्र प्रकीर्णा हरिभिस्तदा ॥ १ ॥ रावणस्याप्रसह्यं तं शरसम्पातमेकतः । न शेकुः सहितुं दीप्तं पतङ्गा ज्वलनं यथा ॥ २॥ तेऽर्दिता निशितैर्बाणैः क्रोशन्तो विप्रदुद्रुवुः। पावकार्चिस्समाविष्टा दह्यमाना यथा गजाः ॥ ३ ॥ प्लवङ्गानामनीकानि महाभ्राणीव मारुतः । स ययौ समरे तस्मिन् विधमन् रावणः शरैः ॥ ४ ॥ कदनं तरसा कृत्वा राक्षसेन्द्रो वनौकसाम् । आससाद ततो युद्धे राघवं त्वरितस्तदा ॥५॥ सुग्रीवस्तान् कपीन् दृष्ट्वा भग्नान् विद्रवतो रणे । गुल्मे सुषेणं निक्षिप्य चक्रे युद्धेऽद्भुतं मनः ॥६॥

अथ विरूपाक्षवधः—तथा तैरित्यादि ॥ १ ॥ एकतः एकस्य अद्वितीयस्य ॥ २–५ ॥ अद्भुतमिति क्रियाविशेषणम् ॥ ६ ॥ ७ ॥

॥ ४१–४६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षण्णवतितमः सर्गः ॥ ९६ ॥ १ ॥ रावणस्येति । एकतः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महाद्रुमान्, उत्पाट्येति शेषः। उत्पाट्य अस्य पार्श्वतः पृष्ठतश्चानुजह्रुरिति सम्बन्धः। यथा महाराजे युद्धाय गच्छति तदायुधानि भृत्या आहरन्ति तथा वानरराजे युद्धाय निष्क्रामति तदायुधभूतान् शैलवृक्षादीन् समये दातुं वानरा आजह्रुरिति भावः ॥ ८ ॥ ९ ॥ ममन्थ चेति। अगमान् वृक्षान्।

आत्मनः सदृशं वीरः स तं निक्षिप्य वानरम्। सुग्रीवोऽभिमुखः शत्रुं प्रतस्थे पादपायुधः ॥ ७ ॥ पार्श्वतः पृष्ठतश्चास्य सर्वे यूथाधिपाः स्वयम्। अनुजह्रुर्महाशैलान् विविधांश्च महाद्रुमान् ॥ ८ ॥ स नर्दन् युधि सुग्रीवः स्वरेण महता महान्। पातयन् विविधांश्चान्यान् जगामोत्तमराक्षसान् ॥ ९ ॥ ममन्थ च महाकायो राक्षसान् वानरेश्वरः। युगान्तसमये वायुः प्रवृद्धानगमानिव ॥ १० ॥ राक्षसानामनीकेषु शैलवर्षं ववर्ष ह। अश्मवर्षं यथा मेघः पक्षिसङ्घेषु कानने ॥ ११ ॥ कपिराजविमुक्तैस्तैः शैलवर्षैस्तु राक्षसाः। विकीर्णशिरसः पेतुर्निकृत्ता इव पर्वताः ॥ १२ ॥ अथ संक्षीयमाणेषु राक्षसेषु समन्ततः। सुग्रीवेण प्रभग्नेषु पतत्सु निनदत्सु च ॥ १३ ॥ विरूपाक्षः स्वकं नाम धन्वी विश्राव्य राक्षसः। रथादाप्लुत्य दुर्धर्षो गजस्कन्धमुपारुहत् ॥ १४ ॥ स तं द्विरदमारुह्य विरूपाक्षो महारथः। विनदन् भीमनिर्ह्रादं वानरानभ्यधावत ॥ १५ ॥ सुग्रीवे स शरान् घोरान् विससर्ज चमूमुखे। स्थापयामास चोद्विग्नान् राक्षसान् सम्प्रहर्षयन् ॥ १६ ॥ स तु विद्धः शितैर्बाणैः कपीन्द्रस्तेन रक्षसा। चुक्रोध स महाक्रोधो वधे चास्य मनो दधे ॥ १७ ॥ ततः पादपमुद्धृत्य शूरः सम्प्रधनो हरिः। अभिपत्य जघानास्य प्रमुखे तु महागजम् ॥ १८ ॥ स तु प्रहाराभिहतः सुग्रीवेण महागजः। अपासर्पद्धनुर्मात्रं निषसाद ननाद च ॥ १९ ॥

"पलाशी द्रुद्रुमागमाः" इत्यमरः ॥ १०-१२ ॥ संक्षीयमाणेषु हिंस्यमानेषु। "क्षि हिंसायाम्" इति धातुः ॥ १३-१७ ॥ तत इति। सम्प्रधनः। बहुलग्रहणात् कर्तरि ल्युट्। प्रहर्तेत्यर्थः। प्रमुखे मुखे ॥ १८ ॥ रामानु०-सम्प्रधने युद्धे ॥ १८ ॥ धनुर्मात्रं धनुःप्रमाणम्। "प्रमाणे द्वयसज्दघ्नञ्मात्रचः"

एकस्य रावणस्य शरसम्पातमिति सम्बन्धः ॥ २-९ ॥ ममन्थेति। अगमान् वृक्षान् ॥ १०-१२ ॥ संक्षीयमाणेषु हिंस्यमानेषु। "क्षि हिंसायाम्" इति

For Private And Personal Use Only

इति मात्रच्प्रत्ययः॥१९॥ गजात्त्विति श्लोकद्वयमेकं वाक्यम् । व्यवस्थितं निश्चलतया स्थितम् ॥ २०–२२ ॥ स तामिति । अपक्रम्य शिलापातपरिहारार्थमन्यतोऽपसृत्य । प्राहरत्, सुग्रीवमिति शेषः ॥ २३–२५ ॥ मुष्टिप्रहारेत्यादिसार्धश्लोक एकान्वयः । कवचमिति । अनेन सुग्रीवस्यापि कवच

गजात्तु मथितात्तूर्णमपक्रम्य स वीर्यवान् । राक्षसोऽभिमुखः शत्रुं प्रत्युद्गम्य ततः कपिम् ॥ २० ॥ आर्षभं चर्म खड्गं च प्रगृह्य लघुविक्रमः । भर्त्सयन्निव सुग्रीवमाससाद व्यवस्थितम् ॥ २१ ॥ स हि तस्याभिसंक्रुद्धः प्रगृह्य विपुलां शिलाम् । विरूपाक्षाय चिक्षेप सुग्रीवो जलदोपमाम् ॥२२॥ स तां शिलामापतन्तीं दृष्ट्वा राक्षसपुङ्गवः । अपक्रम्य सुविक्रान्तः खड्गेन प्राहरत्तदा ॥ २३ ॥ तेन खड्गप्रहारेण रक्षसा बलिना हतः । मुहूर्तमभवद्वीरो विसंज्ञ इव वानरः ॥ २४ ॥ स तदा सहसोत्पत्य राक्षसस्य महाहवे । मुष्टिं संवर्त्य वेगेन पातयामास वक्षसि ॥ २५ ॥ मुष्टिप्रहाराभिहतो विरूपाक्षो निशाचरः । तेन खड्गेन संक्रुद्धः सुग्रीवस्य चमूमुखे । कवचं पातयामास पद्भ्यामभिहतोऽपतत् ॥ २६ ॥ स समुत्थाय पतितः कपिस्तस्य व्यसर्जयत् । तलप्रहारमशनेः समानं भीमनिस्वनम् ॥ २७ ॥ तलप्रहारं तद्रक्षः सुग्रीवेण समुद्यतम् । नैपुण्यान्मोचयित्वैनं मुष्टिनोरस्यताडयत् ॥ २८ ॥ ततस्तु संक्रुद्धतरः सुग्रीवो वानरेश्वरः । मोक्षितं चात्मनो दृष्ट्वा प्रहारं तेन रक्षसा । स ददर्शान्तरं तस्य विरूपाक्षस्य वानरः ॥२९॥ ततो न्यपातयत् क्रोधाच्छङ्खदेशे महत्तलम् ॥३०॥ महेन्द्राशनिकल्पेन तलेनाभिहतः क्षितौ ॥ ३१ ॥

धारणमस्तीति गम्यते । पद्भ्यामिति । अभिहतः सन् पद्भ्यामपतदित्यन्वयः ॥२६ ॥ २७ ॥ रामानु०–तेनेति । सखड्गाभिहतोऽपतत् सखड्गश्चासावभिहतश्च सखड्गाभिहतः । विरूपाक्षमेरितखड्गसहितोऽपतदित्यर्थः । उत्तरत्र विरूपाक्षस्य मुष्टिनैव युद्धाभिधानात् ॥ २६ ॥ नैपुण्यात् शिक्षापाटवात् ॥ २८ ॥ ततस्त्विति सार्धश्लोकमेकं वाक्यम् । अन्तरम् अवकाशम् ॥ २९ ॥ तत इत्यर्धम् । शङ्खदेशे ललाटास्थिप्रदेशे । "शङ्खो निधौ ललाटास्थि" इत्यमरः ॥३०॥ महेन्द्राशनीत्यादि धातुः ॥ १३–२२ ॥ स तामिति । अपक्रम्य शिलाप्रहारमोघकरणार्थं पार्श्वतोऽपसृत्य सुग्रीवं प्राहरदिति भावः ॥ २३–२७ ॥ तलेति । नैपुण्यात् युद्धगतिविशेषलाघवात् मोचयित्वा मोघीकृत्य स ददर्शान्तरमिति सम्बन्धः ॥ २८ ॥ २९ ॥ शङ्खदेशे ललाटास्थिदेशे । " शङ्खो निधौ ललाटास्थ्नि " इत्यमरः ॥ ३० ॥ ३१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सार्धश्लोकमेकं वाक्यम् । स्रोतोभ्यः नासादिनवद्वारेभ्यः ॥ ३१ ॥ ३२ ॥ विरूपाक्षतरं नेत्रोद्गमनेनात्यन्तविकटाक्षम् ॥३३ ॥ स्फुरन्तमूर्ध्वमुत्पतन्तम् । परिवर्तन्तं परिवर्तमानम् ॥ ३४ ॥ तथा त्विति । भिन्नवेलौ विदीर्णवेलौ ॥ ३५ ॥ विनाशितमिति । उन्मत्तगङ्गा उद्वेलगङ्गा ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तनवतितमः सर्गः ॥ ९७ ॥

पपात रुधिरक्लिन्नः शोणितं च समुद्वमन् । स्रोतोभ्यस्तु विरूपाक्षो जलं प्रस्रवणादिव ॥३२॥ विवृत्तनयनं क्रोधात् सफेनं रुधिराप्लुतम् । ददृशुस्ते विरूपाक्षं विरूपाक्षतरं कृतम् ॥ ३३ ॥ स्फुरन्तं परिवर्तन्तं पार्श्वेन रुधिरोक्षितम् । करुणं च विनर्दन्तं ददृशुः कपयो रिपुम् ॥ ३४ ॥ तथा तु तौ संयति सम्प्रयुक्तौ तरस्विनौ वानरराक्षसानाम् । बलार्णवौ सस्वनतुः सुभीमं महार्णवौ द्वाविव भिन्नवेलौ ॥३५॥ विनाशितं प्रेक्ष्य विरूपनेत्रं महाबलं तं हरिपार्थिवेन । बलं समस्तं कपिराक्षसानामुन्मत्तगङ्गाप्रतिमं बभूव ॥३६॥ इत्यार्षे० श्रीमद्युद्धकाण्डे सप्तनवतितमः सर्गः ॥९७॥

हन्यमाने बले तूर्णमन्योन्यं ते महामृधे । सरसीव महाघर्मे सोपक्षीणे बभूवतुः ॥ १ ॥ स्वबलस्य विघातेन विरूपाक्षवधेन च । बभूव द्विगुणं क्रुद्धो रावणो राक्षसाधिपः ॥२॥ प्रक्षीणं तु बलं दृष्ट्वा वध्यमानं वलीमुखैः । बभूवास्य व्यथा युद्धे प्रेक्ष्य दैवविपर्ययम् । उवाच च समीपस्थं महोदरमरिन्दमम् ॥३॥ अस्मिन् काले महाबाहो जयाशा त्वयि मे स्थिता । जहि शत्रुचमूं वीर दर्शयाद्य पराक्रमम् ॥४॥ भर्तृपिण्डस्य कालोऽयं निर्वेष्टुं साधु युध्यताम् ॥५॥

अथ महोदरवधः–हन्यमान इत्यादि । सरसी इवेति वक्तव्ये सरसीवेति सन्धिरार्षः ॥ १–३ ॥ अस्मिन् काल इत्यादिसार्धश्लोक एकान्वयः । भर्तृपिण्ड

स्रोतोभ्यः नासादिनवरन्ध्रेभ्यः ॥ ३२ ॥ विरूपाक्षतरम् अतिविरूपाक्षम् ॥ ३३ ॥ पार्श्वेन परिवर्तन्तं रिपुं विरूपाक्षं ददृशुरिति सम्बन्धः ॥ ३४ ॥ भिन्नवेलौ विदीर्णवेलौ ॥ ३५ ॥ उन्मत्तगङ्गाप्रतिमम् उद्वेलगङ्गासदृशम् ॥३६॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तनवतितमस्सर्गः ॥९७॥

हन्यमान इति । सरसीव सरसी इव । सन्धिरार्षः । सोपक्षीणे उपक्षीणमुपक्षयः तत्सहिते ॥१–४॥ भर्तृपिण्डस्येति । निर्वेष्टुं स्वामिदत्तवेतनसममुपकर्तुमित्यर्थः ॥५–१०॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स्येति संवन्धमात्रे षष्ठी । भर्तृपिण्डस्य निर्वेष्टुं स्वामिदत्तवेतनमपाकर्तुमित्यर्थः ॥ ४--६॥ भर्तृवाक्येन चोदितः सन् स्वेन वीर्येण कदनं चक्र इत्यन्वयः ॥ ७ ॥ ८ ॥ पाणिपादोरूनिति । एकवद्भावाभाव आर्षः ॥ ९ ॥ १० ॥ अनन्तरं समीपस्थम् ॥ ११--१३ ॥ गृध्रचक्रं गृध्रसमूहः ॥ १४ ॥ १५ ॥

एवमुक्तस्तथेत्युक्त्वा राक्षसेन्द्रो महोदरः। प्रविवेशारिसेनां तां पतङ्ग इव पावकम् ॥ ६ ॥ ततः स कदनं चक्रे वानराणां महाबलः। भर्तृवाक्येन तेजस्वी स्वेन वीर्येण चोदितः ॥ ७ ॥ वानराश्च महासत्त्वाः प्रगृह्य विपुलाः शिलाः। प्रविश्यारिबलं भीमं जघ्नुस्ते रजनीचरान् ॥ ८ ॥ महोदरस्तु संक्रुद्धः शरैः काञ्चनभूषणैः। चिच्छेद पाणिपादोरून् वानराणां महाहवे ॥ ९ ॥ ततस्ते वानराः सर्वे राक्षसैरर्दिता भृशम्। दिशो दश द्रुताः केचित् केचित् सुग्रीवमाश्रिताः ॥१०॥ प्रभग्नां समरे दृष्ट्वा वानराणां महाचमूम्। अभिदुद्राव सुग्रीवो महोदरमनन्तरम् ॥ ११ ॥ प्रगृह्य विपुलां घोरां महीधरसमां शिलाम्। चिक्षेप च महातेजास्तद्वधाय हरीश्वरः॥ १२ ॥ तामापतन्तीं सहसा शिलां दृष्ट्वा महोदरः। असम्भ्रान्तस्ततो बाणैर्निर्बिभेद दुरासदाम् ॥ १३ ॥ रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा। निपपात शिला भूमौ गृध्रचक्रमिवाकुलम् ॥ १४ ॥ तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्च्छितः। सालमुत्पाट्य चिक्षेप राक्षसे रणमूर्धनि ॥१५॥ शरैश्च विददारैनं शूरः परपुरञ्जयः ॥ १६ ॥ स ददर्श ततः क्रुद्धः परिघं पतितं भुवि ॥१७॥ आविध्य तु स तं दीप्तं परिघं तस्य दर्शयन्। परिघाग्रेण वेगेन जघानास्य हयोत्तमान् ॥ १८ ॥ तस्माद्धतहयाद्वीरः सोऽवप्लुत्य महारथात्। गदां जग्राह संक्रुद्धो राक्षसोऽथ महोदरः ॥ १९ ॥ गदापरिघहस्तौ तौ युधि वीरौ समीयतुः। नर्दन्तौ गोवृषप्रख्यौ घनाविव सविद्युतौ ॥ २० ॥

शरैरित्यर्धम्। शूरः महोदरः एनं च सालं च शरैः विददारेत्यन्वयः ॥ १६ ॥ सः सुग्रीवः ॥ १७ ॥ आविध्येति, आदायेति शेषः। तस्य महोदरस्य। मर्ममिति। अनन्तरं सन्निहितम् ॥ ११--२० ॥

For Private And Personal Use Only

दर्शयन्, पाणिलाघवमिति शेषः ॥ १८–२० ॥ तत इति । भास्कराभासां भास्करवद्भासमानाम् ॥ २१ ॥ गदां तामित्यादि । गदां, दृष्ट्वेति शेषः ।

ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः । ज्वलन्तीं भास्कराभासां सुग्रीवाय महोदरः ॥ २१ ॥ गदां तां सुमहाघोरामापतन्तीं महाबलः । सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे । आजघान गदां तस्य परिघेण हरीश्वरः ॥ २२ ॥ पपात स गदोद्भिन्नः परिघस्तस्य भूतले ॥ २३ ॥ ततो जग्राह तेजस्वी सुग्रीवो वसुधातलात् । आयसं मुसलं घोरं सर्वतो हेमभूषितम् ॥ २४ ॥ स तमुद्यम्य चिक्षेप सोऽप्यन्यां व्याक्षिपद्गदाम् । भिन्नावन्योन्यमासाद्य पेततुर्धरणीतले ॥२५॥ ततो भग्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः । तेजोबलसमाविष्टौ दीप्ताविव हुताशनौ ॥२६॥ जघ्नतुस्तौ तदाऽन्योन्यं नेदतुश्च पुनः पुनः । तलैश्चान्योन्यमाहत्य पेततुर्धरणीतले ॥ २७ ॥ उत्पेततुस्ततस्तूर्णं जघ्नतुश्च परस्परम् । भुजैश्चिक्षिपतुर्वीरावन्योन्यमपराजितौ । जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परन्तपौ ॥ २८ ॥ आजहार ततः खड्गमदूरपरिवर्तिनम् । राक्षसश्चर्मणा सार्धं महावेगो महोदरः ॥ २९ ॥ तथैव च महाखड्गं चर्मणा पतितं सह । जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः ॥ ३० ॥ तौ तु रोषपरीताङ्गौ नर्दन्तावभ्यधावताम् । उद्यतासी रणे हृष्टौ युधि शस्त्रविशारदौ ॥ ३१ ॥ दक्षिणं मण्डलं चोभौ सुतूर्णं सम्परीयतुः । अन्योन्यमभिसंक्रुद्धौ जये प्रणिहितावुभौ ॥ ३२ ॥

समुद्यम्य परिघमिति सिद्धम् ॥२२॥ पपात स गदोद्भिन्न इत्यर्धम् । उभावपि परस्पराभिहतौ विशीर्णौ पेततुरिति भावः॥२३–२१॥दक्षिणं प्रदक्षिणम्,

ततः क्रुद्ध इति । भास्कराभासां भास्करवद्भासमानाम् ॥ २१ ॥ सुमहाघोरां तां गदाम्, दृष्ट्वेति शेषः । समुद्यम्य, परिघमिति शेषः । सुग्रीवः परिघेण अघानेति सम्बन्धः ॥ २२ ॥ गदा पपात स परिघश्च उद्भिन्न इत्यर्थः ॥ २३ ॥ तत इत्यादिश्लोकद्वयमेकं वाक्यम् । स सुग्रीवः तं मुसलम् । सोऽपि महोदरोऽपि । अन्यां गदां व्याक्षिपत चिक्षेप ॥ २४–३१ ॥ दक्षिणं प्रदक्षिणं चकारात्सव्यं च सुतूर्णं सम्परीयतुः अकुर्वाताम् ॥ ३२ ॥

चकारात् सव्यं च । सुतूर्णं सम्परीयतुः अकुर्वाताम् ॥ ३२ ॥ वीर्येण श्लाघत इति वीर्यश्लाघी ॥ ३३ ॥ लग्नं चर्मलग्नम् । उत्कर्षतः, महोदरस्येति शेषः ॥ ३४ ॥ तत् शिरः । न तिष्ठते नातिष्ठत ॥ ३५ ॥ ३६ ॥ विषण्णवदनाः, अभवन्निति शेषः । अतः सर्वशब्दापौनरुक्त्यम् ॥ ३७ ॥ लक्ष्म्या

स तु शूरो महावेगो वीर्यश्लाघी महोदरः । महाचर्मणि तं खड्गं पातयामास दुर्मतिः ॥ ३३ ॥ लग्नमुत्कर्षतः खड्गं खड्गेन कपिकुञ्जरः । जहार सशिरस्त्राणं कुण्डलोपहितं शिरः ॥ ३४ ॥ निकृत्तशिरसस्तस्य पतितस्य महीतले । तद्बलं राक्षसेन्द्रस्य दृष्ट्वा तत्र न तिष्ठते ॥ ३५ ॥ हत्वा तं वानरैः सार्धं ननाद मुदितो हरिः । चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ ३६ ॥ विषण्णवदनाः सर्वे राक्षसा दीनचेतसः । विद्रवन्ति ततः सर्वे भयवित्रस्तचेतसः ॥३७॥ महोदरं तं विनिपात्य भूमौ महागिरेः कीर्णमिवैकदेशम् । सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥ ३८ ॥ अथ विजयमवाप्य वानरेन्द्रः समरमुखे सुरयक्षसिद्धसङ्घैः । अवनितलगतैश्च भूतसङ्घैर्हरुष समाकुलितैः स्तुतो महात्मा॥३९॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे अष्टनवतितमः सर्गः॥९८॥

महोदरे तु निहते महापार्श्वो महाबलः । सुग्रीवेण समीक्ष्याथ क्रोधात् संरक्तलोचनः । अङ्गदस्य चमूं भीमां क्षोभयामास सायकैः ॥ १ ॥ स वानराणां मुख्यानामुत्तमाङ्गानि सर्वशः । पातयामास कायेभ्यः फलं वृन्तादिवानिलः ॥ २ ॥ केषांचिदिषुभिर्बाहून् स्कन्धांश्चिच्छेद राक्षसः । वानराणां सुसंक्रुद्धः पार्श्वं केषां व्यदारयत् ॥ ३ ॥

जयलक्ष्म्या ॥ ३८ ॥ ३९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टनवतितमः सर्गः ॥ ९८ ॥

अथ महापार्श्ववधः—महोदरे त्वित्यादि । महोदरे सुग्रीवेण निहत इत्यन्वयः ॥ १–७ ॥

वीर्येण श्लाघत इति वीर्यश्लाघी ॥ ३३–३६ ॥ विषण्णवदना इति । सर्वे दीनचेतसः, बभूवुरिति शेषः । भयवित्रस्तचेतसः भयकृतविनस्तचित्ताः सर्वे विद्रवन्ति व्यद्रवन् अतः सर्वशब्दापुनरुक्तिः ॥३७–३९॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टनवतितमस्सर्गः ॥ ९८ ॥

महोदर इति । महोदर इत्येतन्महापार्श्वविशेषणम् । महोदरस्तु इति पाठः ॥ १–७ ॥

सर्क्षराजस्त्वित्यादिश्लोकद्वयमेकान्वयम् । ऋक्षराजः जाम्बवान् तेन सहितः सर्क्षराजः गवाक्षः । 'जाम्बवन्तं गवाक्षं च' इत्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८–१० ॥ ऋक्षराजं जाम्बवन्तं त्रिभिर्बाणैराजघान । गवाक्षं च बहुभिः शरैर्जघानेत्यन्वयः ॥ ११ ॥ १२॥ तस्याङ्गद इत्यादिश्लोकद्वयमेकान्वयम् ।

तेऽर्दिता बाणवर्षेण महापार्श्वेन वानराः । विषादविमुखाः सर्वे बभूवुर्गतचेतसः ॥ ४ ॥ निरीक्ष्य बलमुद्विग्नमङ्गदो राक्षसार्दितम् । वेगं चक्रे महाबाहुः समुद्र इव पर्वणि ॥ ५ ॥ आयसं परिघं गृह्य सूर्यरश्मिसमप्रभम् । समरे वानरश्रेष्ठो महापार्श्वे न्यपातयत् ॥६॥ स तु तेन प्रहारेण महापार्श्वो विचेतनः । ससूतः स्यन्दनात्तस्माद्विसंज्ञः प्रापतद्भुवि ॥ ७ ॥ सर्क्षराजस्तु तेजस्वी नीलाञ्जनचयोपमः । निष्पत्य सुमहावीर्यः स्वाद्व्यूहान्मेघसंनिभात् ॥ ८ ॥ प्रगृह्य गिरिशृङ्गाभां क्रुद्धः सुविपुलां शिलाम् । अश्वान् जघान तरसा स्यन्दनं च बभञ्ज तम् ॥ ९ ॥ मुहूर्ताल्लब्धसंज्ञस्तु महापार्श्वो महाबलः । अङ्गदं बहुभिर्बाणैर्भूयस्तं प्रत्यविध्यत ॥ १० ॥ जाम्बवन्तं त्रिभिर्बाणै राजघान स्तनान्तरे । ऋक्षराजं गवाक्षं च जघान बहुभिः शरैः ॥ ११ ॥ जाम्बवन्तं गवाक्षं च स दृष्ट्वा शरपीडितौ । जग्राह परिघं घोरमङ्गदः क्रोधमूर्च्छितः ॥१२॥ तस्याङ्गदः प्रकुपितो राक्षसस्य तमायसम् । दूरस्थितस्य परिघं रविरश्मिसमप्रभम् ॥१३॥ द्वाभ्यां भुजाभ्यां संगृह्य भ्रामयित्वा च वेगवान् । महापार्श्वस्य चिक्षेप वधार्थं वालिनः सुतः ॥ १४ ॥ स तु क्षिप्तो बलवता परिघस्तस्य रक्षसः । धनुश्च सशरं हस्ताच्छिरस्त्रं चाप्यपातयत् ॥ १५ ॥ तं समासाद्य वेगेन वालिपुत्रः प्रतापवान् । तलेनाभ्यहनत् क्रुद्धः कर्णमूले सकुण्डले ॥ १६ ॥ स तु क्रुद्धो महावेगो महापार्श्वो महाद्युतिः । करेणैकेन जग्राह सुमहान्तं परश्वधम् ॥ १७ ॥

दूरस्थितस्य तस्य वधार्थमित्यन्वयः ॥ १३–१७ ॥

सर्क्षराज इति । ऋक्षराजेन जाम्बवता सहितः, जाम्बवन्तं गवाक्षं चेत्युत्तरत्र वक्ष्यमाणत्वात् ॥ ८–१२ ॥ तस्याङ्गद इत्यादि श्लोकद्वयमेकं वाक्यम् । दूर

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तामात । तैलधौत प्रातोदन तैलसेचनान्निष्कल्मषम्, शैलसारमयं तद्वत्कठिनमित्यर्थः । दृढम् अशिथिलम् ॥ १८ ॥ १९ ॥ स वीर इति । आत्मन इत्यस्य पितुस्तुल्यपराक्रम इत्यनेन संबन्धः । संवर्तयत् समवर्तयत्, आमयामासेत्यर्थः ॥ २०–२३ ॥ वानराणामित्यादि । स्फोटयन् दलयन् ।

तं तैलधौतं विमलं शैलसारमयं दृढम् । राक्षसः परमक्रुद्धो वालिपुत्रे न्यपातयत् ॥ १८ ॥ तेन वामांसफलके भृशं प्रत्यवपादितम् । अङ्गदो मोक्षयामास सरोषः स परश्वधम् ॥ १९ ॥ स वीरो वज्रसङ्काशमङ्गदो मुष्टिमात्मनः । संवर्तयत् सुसंक्रुद्धः पितुस्तुल्यपराक्रमः ॥ २० ॥ राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयं प्रति । इन्द्राशनिसमस्पर्शं स मुष्टिं विन्यपातयत् ॥ २१ ॥ तेन तस्य निपातेन राक्षसस्य महामृधे । पफाल हृदयं चाशु स पपात हतो भुवि ॥ २२ ॥ तस्मिन्निपतिते भूमौ तत् सैन्यं संप्रचुक्षुभे । अभवच्च महान् क्रोधः समरे रावणस्य तु ॥ २३ ॥ वानराणां च हृष्टानां सिंहनादश्च पुष्कलः । स्फोटयन्निव शब्देन लङ्कां साट्टालगोपुराम् ॥ २४ ॥ महेन्द्रेणेव देवानां नादः समभवन्महान् ॥ २५ ॥ अथेन्द्रशत्रुस्त्रिदिवालयानां वनौकसां चैव महाप्रणादम् । श्रुत्वा सरोषं युधि राक्षसेन्द्रः पुनश्च युद्धाभिमुखोऽवतस्थे ॥ २६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनशततमः सर्गः ॥ ९९ ॥

वानराणां च सिंहनादः समभवत्, महेन्द्रेण सह देवानां नाद इव वानराणां च देवानां च नादः समभवादित्यर्थः । एतच्चानन्तरश्लोके स्फुटी भविष्यति ॥ २४–२६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनशततमः सर्गः ॥ ९९ ॥

स्थितस्य यथार्थं परिघं चिक्षेपेति सम्बन्धः ॥ १३–१९ ॥ स वीर इति । संवर्तयत् समवर्तयत् ॥ २०–२३ ॥ वानराणामित्यादि सार्धश्लोकमेकं वाक्यम् । इन्द्रेण सह देवानां नाद इव अङ्गदेन सहितानां वानराणां सिंहनादस्समभवत् ॥ २४–२६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोनशततमस्सर्गः ॥ ९९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रामरावणयुद्धारम्भः शततमे–महोदरेत्यादि । तस्मिन् विरूपाक्षे निहते सति पश्चान्महोदरमहापार्श्वौ हतौ दृष्ट्वा, स्थितमिति शेषः ॥ १–८ ॥
रामानु०–रामवृक्षमिति । सीतापुष्पफलप्रदं सीता पुष्पं यस्य सः सीतापुष्पः सीतापुष्पश्चासौ फलप्रदश्च तम् ॥ ४ ॥ उत्पपातेति । सहितुं सोढुम् । आर्ष इडागमः ॥९॥१० ॥

महोदरमहापार्श्वौ हतौ दृष्ट्वा तु राक्षसौ । तस्मिंश्च निहते वीरे विरूपाक्षे महाबले । आविवेश महान् क्रोधो रावणं तं महामृधे ॥ १ ॥ सूतं सञ्चोदयामास वाक्यं चेदमुवाच ह ॥ २ ॥ निहतानाममात्यानां रुद्धस्य नगरस्य च । दुःखमेषोऽपनेष्यामि हत्वा तौ रामलक्ष्मणौ ॥ ३ ॥ रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदम् । प्रशाखा यस्य सुग्रीवो जाम्बवान् कुमुदो नलः ॥ ४ ॥ मैन्दश्च द्विविदश्चैव ह्यङ्गदो गन्धमादनः । हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः ॥ ५ ॥ स दिशो दश घोषेण रथस्यातिरथो महान् । नादयन् प्रययौ तूर्णं राघवं चाभ्यवर्तत ॥ ६ ॥ पूरिता तेन शब्देन सनदीगिरिकानना । संचचाल मही सर्वा सवराहमृगद्विपा ॥७॥ तामसं स महाघोरं चकारास्त्रं सुदारुणम् । निर्ददाह कपीन् सर्वांस्ते प्रपेतुः समन्ततः ॥ ८ ॥ उत्पपात रजो घोरं तैर्भग्नैः सम्प्रधावितैः । न हि तत्सहितुं शेकुर्ब्रह्मणा निर्मितं स्वयम् ॥ ९ ॥ तान्यनीकान्यनेकानि रावणस्य शरोत्तमैः । दृष्ट्वा भग्नानि शतशो राघवः पर्यवस्थितः ॥ १० ॥ ततो राक्षसशार्दूलो विद्राव्य हरिवाहिनीम् । स ददर्श ततो रामं तिष्ठन्तमपराजितम् ॥ ११ ॥ लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा । आलिखन्तमिवाकाशमवष्टभ्य महद्धनुः । पद्मपत्र विशालाक्षं दीर्घबाहुमरिन्दमम् ॥ १२ ॥

तत इत्यादिसार्धश्लोकद्वयेन रामस्यापराजितत्वं निरवधिकसौन्दर्यनिधित्वेन वैरं विहाय निरन्तरानुभाव्यत्वं रावणस्य दुर्बुद्धित्वम् अमृतप्रवाहमाव ॥२९५॥
॥ १ ॥ २ ॥ निहतानामित्यादिश्लोकत्रयस्य प्रातीतिकार्थः स्पष्टः । वस्तुतस्तु–रामलक्ष्मणौ हत्वा गत्वा निहतानाममात्यानां दुःखमपनेष्यामि । ननु तौ गत्वा केन प्रकारेण दुःखमपनेष्यसीत्यत आह–रामवृक्षमिति । वृश्चतीति वृक्षः तम्, शत्रुसंहारकं राममित्यर्थः । सीतापुष्पफलप्रदं सीता पुष्पं यस्य सः स चासौ फलप्रदश्चेति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तेनैव महता धनुर्वरेणावर्तितं श्रीरामदेहलावण्यामृतपूरमनवगाहमानस्य तस्य दौर्भाग्यं चोच्यते ॥ ११ ॥ १२ ॥ ततो राम इत्यादिसार्धश्लोक एका न्वयः । हृष्टः चिराद्वैरी समागत इति सन्तुष्टः कार्मुकं जग्राह । विस्फारयितुमारेभ इत्यादि विलम्बोक्त्या किमिदानीमपि वा नतो भविष्यति रावण इति

ततो रामो महातेजाः सौमित्रिसहितो बली । वानरांश्च रणे भग्नानापतन्तं च रावणम् ॥ १३ ॥ समीक्ष्य राघवो हृष्टो मध्ये जग्राह कार्मुकम् ॥ १४ ॥ विस्फारयितुमारेभे ततः स धनुरुत्तमम् । महावेगं महानादं निर्भिन्दन्निव मेदिनीम् ॥ १५ ॥ रावणस्य च बाणौघै रामविस्फारितेन च । शब्देन राक्षसास्ते च पेतुश्च शतशस्तदा ॥ १६ ॥ तयोः शरपथं प्राप्तो रावणो राजपुत्रयोः । स बभौ च यथा राहुः समीपे शशिसूर्ययोः ॥ १७ ॥ तमिच्छन् प्रथमं योद्धुं लक्ष्मणो निशितैः शरैः । मुमोच धनुरायम्य शरानग्निशिखोपमान् ॥ १८ ॥ तान्मुक्तमात्रानाकाशे लक्ष्मणेन धनुष्मता । बाणान् बाणैर्महातेजा रावणः प्रत्यवारयत् ॥ १९ ॥ एकमेकेन बाणेन त्रिभिस्त्रीन् दशभिर्दश । लक्ष्मणस्य प्रचिच्छेद दर्शयन् पाणिलाघवम् ॥ २० ॥ अभ्यतिक्रम्य सौमित्रिं रावणः समितिञ्जयः । आससाद ततो रामं स्थितं शैलमिवाचलम् ॥ २१ ॥

रामस्य दयालुतोच्यते ॥ १३–१५ ॥ रावणस्येति । रावणस्य बाणौघैः रामविस्फारितेन च जातेन शब्देनेत्यर्थः ॥ १६ ॥ रामानु०–रावणस्येति । शब्देन राक्षसास्ते चेति पाठः । ते च वानराश्च ॥ १६ ॥ तयोरिति । शशिसूर्ययोरिति, अमायामिति शेषः ॥ १७–२० ॥ रामानु०–तयोः शरपथं प्राप्तो रावणो राजपुत्रयोः । स बभौ च यथा राहुः समीपे शशिसूर्ययोरिति । अतिक्रूरस्वभावस्य रावणस्य रामलक्ष्मणयोः समीपागमनममावास्यायां राहोश्चन्द्रसूर्यसमीपागमनमिवेतिकृत्वा दृष्टान्तदार्ष्टान्तिकयोरैकरूप्यम् ॥ १७॥ अभ्यतिक्रम्य एकस्यापि बाणस्य स्वस्मिन्नपतनादनादरेणातिक्रम्य ॥ २१–२६ ॥

सीतापुष्पफलप्रदः तम्, गत्वेत्यनुषज्यते । यस्य वृक्षस्य ये सुग्रीवादयः शाखाः तान् हन्तीति सम्बन्धः । शाखारूपसुग्रीवादीन् हत्वा दुःखमपनेष्यामीत्यर्थः ॥ ३–१५ ॥ रावणस्येति । रावणस्य बाणौघैः रामविस्फारितेन च यश्शब्दो जनितः तेन पेतुरिति सम्बन्धः ॥ १६ ॥ तयोश्शरपथमिति । सः रावणः । राजपुत्रयोस्समीपे शशिसूर्ययोस्समीपे राहुर्यथा तथा बभाविति सम्बन्धः ॥ १७–२० ॥ अभ्यतिक्रम्येति । शैलमिवाचलम् अचलं स्थितं राममाससादेति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तयोरिति । यमान्तकनिकाशयोः यमलदन्तकौ यमरुद्रौ तत्तुल्ययोः ॥ २७ ॥ गगनं सन्ततं निबिडं बभूवेत्यन्वयः ॥ २८ ॥ गवाक्षितमित्यर्धस्य । गवाक्षितं सञ्जातगवाक्षम् ॥ २९ ॥ महावेगैरित्यादिसार्धश्लोक एकान्वयः । गृध्रपत्रैः हेतुभिः, सुवाजितैः सञ्जातशोभनपक्षैः, बाणैरिति शेषः ॥ ३० ॥

स सङ्ख्ये राममासाद्य क्रोधसंरक्तलोचनः । व्यसृजच्छरवर्षाणि रावणो राघवोपरि ॥ २२ ॥ शरधारास्ततो रामो रावणस्य धनुश्च्युताः । दृष्ट्वैवापततः शीघ्रं भल्लान् जग्राह सत्वरम् ॥ २३ ॥ तान् शरौघांस्ततो भल्लैस्तीक्ष्णै श्चिच्छेद राघवः । दीप्यमानान् महाघोरान् क्रुद्धानाशीविषानिव ॥ २४ ॥ राघवो रावणं तूर्णं रावणो राघवं तदा । अन्योन्यं विविधैस्तीक्ष्णैः शरैरभिववर्षतुः ॥ २५ ॥ चेरतुश्च चिरं चित्रं मण्डलं सव्यदक्षिणम् । बाणवेगान् समुत्क्षिप्तावन्योन्यमपराजितौ ॥२६॥ तयोर्भूतानि वित्रेसुर्युगपत् संप्रयुध्यतोः । रौद्रयोः सायकमुचोर्यमान्तकनिका शयोः ॥ २७॥ सन्ततं विविधैर्बाणैर्बभूव गगनं तदा । घनैरिवातपापाये विद्युन्मालासमाकुलैः ॥ २८ ॥ गवाक्षित मिवाकाशं बभूव शरवृष्टिभिः ॥ २९ ॥ महावेगैः सुतीक्ष्णाग्रैर्गृध्रपत्रैः सुवाजितैः । शरान्धकारं तौ भीमं चक्रतुः समरं तदा । गतेऽस्तं तपने चापि महामेघाविवोत्थितौ ॥ ३० ॥ बभूव तुमुलं युद्धमन्योन्यवधकांक्षिणोः । अनासाद्यमचिन्त्यं च वृत्रवासवयोरिव ॥ ३१ ॥ उभौ हि परमेष्वासावुभौ शस्त्रविशारदौ । उभावस्त्रविदां मुख्या वुभौ युद्धे विचेरतुः ॥३२॥ उभौ हि येन व्रजतस्तेन तेन शरोर्मयः । ऊर्मयो वायुना विद्धा जग्मुः सागरयोरिव ॥३३॥

बभूवेति । अनासाद्यम् इतः पूर्वं केनापि दुर्लभम् । आचिन्त्यं रावणस्यैवं भविष्यतीति चिन्तानर्हम् ॥३१॥३२॥ उभाविति । येन येन मण्डलचारेण ॥३३॥

सम्बन्धः ॥ २१–२५ ॥ अन्योन्यं बाणवेगान् समुत्क्षिप्तौ समुत्क्षिप्तवन्तौ, निवारयन्ताविति यावत् । अपराजितौ अप्रतिहतौ ॥ २६ ॥ २७ ॥ सन्ततमाक्रान्तम् ॥ २८ ॥ २९ ॥ गृध्रपत्रैः सुवाजितैः गृध्रपत्रैर्हेतुभिः सुवाजितैः सञ्जातशोभनपक्षैः ॥ ३०–३१ ॥ रयेण मण्डलचारेण । उभौ रयेण व्रजतः इति पाठः ॥ ३३ ॥ ॥१९६॥

स०–तपने सूर्ये च अस्तं तन्नामकं पर्वतं गते सति, प्रदोषसमय इति यावत् । उत्थितौ महामेघाविव । चन्द्रादिकमाच्छाद्य सतिमिरीकरणं चमत्कार इति 'न कश्चिच्चमत्कारः' इति नागोजिभट्टोक्तिरेव निश्चमत्कारा ।–

For Private And Personal Use Only

तत इति । संसक्तहस्तः बाणप्रयोगासक्तहस्तः ॥ ३४ ॥ ३५ ॥ अथेत्यादि । शरान् रौद्रास्त्रप्रपञ्चरूपान् बाणान् मुमोचेत्यन्वयः । मुमोच च महातेजा श्चापमायम्य वीर्यवानिति पाठः । तदनन्तरं—ते महामेघसङ्काशे इति श्लोकः । तदनन्तरं—पुनरेवेति श्लोकः । तदनन्तरं—ते भित्त्वेति श्लोकात्पूर्वं मन्य

ततः संसक्तहस्तस्तु रावणो लोकरावणः । नाराचमालां रामस्य ललाटे प्रत्यमुञ्चत ॥ ३४ ॥ रौद्रचापप्रयुक्तां तां नीलोत्पलदलप्रभाम् । शिरसा धारयन् रामो न व्यथां प्रत्यपद्यत ॥३५॥ अथ मन्त्रानभिजपन् रौद्रमस्त्रमुदीरयन् । शरान् भूयः समादाय रामः क्रोधसमन्वितः । मुमोच च महातेजाश्चापमायम्य वीर्यवान् ॥३६॥ ते महामेघसङ्काशे कवचे पतिताः शराः । अवध्ये राक्षसेन्द्रस्य न व्यथां जनयंस्तदा ॥३७॥ पुनरेवाथ तं रामो रथस्थं राक्षसाधिपम् । ललाटे परमास्त्रेण सर्वास्त्रकुशलो रणे ॥ ३८ ॥ ते भित्त्वा बाणरूपाणि पञ्चशीर्षा इवोरगाः । श्वसन्तो विविशुर्भूमिं रावणप्रतिकूलिताः ॥३९॥ निहत्य राघवस्यास्त्रं रावणः क्रोधमूर्च्छितः । आसुरं सुमहाघोरमस्त्रं प्रादुश्चकार ह ॥४०॥

पतनमस्ति, तदन्वेष्टव्यम् ॥ ३६ ॥ अवध्ये अभेद्ये । व्यथां न जनयन् नाजनयन् ॥ ३७ ॥ ललाटे विषये ललाटमुद्दिश्येत्यर्थः । यद्वा परमास्त्राणि, विव्याधेति शेषः ॥ ३८ ॥ त इति । ते अस्त्रविकृतिरूपाः शराः, बाणरूपाणि रावणास्त्राणि भित्त्वा, रावणप्रतिकूलिताः रावणेन निवारिताः सन्तः, भूमिं विविशुः ॥ ३९ ॥ ४० ॥ रामानु०—अवध्ये अभेद्ये । पुनरिति । ललाटे ललाटविषये, ललाटमुद्दिश्येति यावत् । परमास्त्रेण श्रेष्ठास्त्रमन्त्रेण, योजितान् बाणान् मुमोचेत्यध्याहर्तव्यम् । समनन्तरश्लोके बाणबहुत्वाभिधानात् । ते भित्त्वेति । श्वसन्तः पञ्चशीर्षा उरगा इव स्थिताः ते बाणाः रावणप्रतिकूलिताः रावणेन प्रत्यस्त्रेण खण्डिताः, अत एव बाण

संसक्तहस्तः बाणप्रयोगासक्तहस्तः ॥३४–३६॥ अवध्ये अभेद्ये वध्यतां जनयन् भेद्यत्वमजनयन् । अडभाव आर्षः । वध्यतां जनयन्निति पाठः॥३७॥ पुनरेवेति । ललाटे ललाटमुद्दिश्येत्यर्थः । परमास्त्रेण श्रेष्ठमन्त्रेण योजितान् बाणान्, मुमोचेति शेषः ॥३८॥ बाणरूपाणि प्रशंसायां रूपप् प्रत्ययः । प्रशस्तबाणा इत्यर्थः । आर्षो लिङ्गव्यत्ययः । ते प्रशस्तबाणाः रावणप्रतिकूलिताः रावणेन निवारिता अपि रावणस्य कवचं भित्त्वा श्वसन्तः पञ्चशीर्षा उरगा इव भूमिं विविशुरिति सम्बन्धः ॥३९–४६॥

—यद्वा तपने सूर्ये सति अस्तंगत इव यथा तथा महामेघाविव चक्रतुः । चापिशब्दादित्यादिचमत्कृत्यपेक्षया चमत्कृतिरस्तिचमत्कृतिर्वा नवेति कृतिनो विदांकुर्वन्तु ॥ सूर्येऽस्तं गते चाप्युदिते इत्येतन्मध्येऽस्तं गत इत्यस्याभिव्येनावक्तव्यत्वाच ॥३०॥ ते शराः बाणरूपाणि बाणं कायं रूपयन्ति सुन्दरीकुर्वन्तीति तानि करायक्षानि भित्त्वा पञ्चशीर्षा उरगा इव श्वसन्तः रावणप्रतिकूलिताः व्यंसिताः भूमिं विविशुः ॥ ३९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपाणि भित्त्वा भूमिं विविशुरिति योजना ॥ ३७-४० ॥ आसुरास्त्रं प्रपञ्चयति–सिंहेत्यादिश्लोकचतुष्टयेन । लेलिहानान् सर्पान्, तदाकारानिति यावत् । श्वान शब्दोऽप्यस्ति । मकराशीविषाननानित्यत्र आशीविषशब्दः पञ्चास्यसर्पेतरसर्पपरः ॥ ४१-४४ ॥ आसुरेणेति । पावकं पावकसम्बन्धि ॥ ४५ ॥ पावकास्त्रं

सिंहव्याघ्रमुखांश्चान्यान् कङ्ककाकमुखानपि । गृध्रश्येनमुखांश्चापि शृगालवदनांस्तथा ॥ ४१ ॥ ईहामृगमुखांश्चान्यान् व्यादितास्यान् भयानकान् । पञ्चास्यान् लेलिहानांश्च ससर्ज निशितान् शरान् ॥ ४२ ॥ शरान् खरमुखांश्चान्यान् वराहमुखसंस्थितान् । श्वानकुक्कुटवक्त्रांश्च मकराशीविषाननान् ॥ ४३ ॥ एतानन्यांश्च मायावी ससर्ज निशितान् शरान् । रामं प्रति महातेजाः क्रुद्धः सर्प इव श्वसन् ॥४४॥ आसुरेण समाविष्टः सोऽस्त्रेण रघुनन्दनः । ससर्जास्त्रं महोत्साहः पावकं पावकोपमः ॥४५॥ अग्निदीप्तमुखान् बाणान् तथा सूर्यमुखानपि । चन्द्रार्धचन्द्रवक्त्रांश्च धूमकेतुमुखानपि ॥४६॥ ग्रहनक्षत्रवक्त्रांश्च महोल्कामुखसंस्थितान् । विद्युज्जिह्वोपमांश्चान्यान् ससर्ज निशितान् शरान् ॥ ४७ ॥ ते रावणशरा घोरा राघवास्त्रसमाहताः॥४८॥ विलयं जग्मुराकाशे जग्मुश्चैव सहस्रशः ॥ ४९ ॥ तदस्त्रं निहतं दृष्ट्वा रामेणाक्लिष्टकर्मणा । हृष्टा नेदुस्ततः सर्वे कपयः कामरूपिणः । सुग्रीवप्रमुखा वीराः परिवार्य तु राघवम् ॥ ५० ॥ ततस्तदस्त्रं विनिहत्य राघवः प्रसह्य तद्रावणबाहुनिस्सृतम् । मुदाऽन्वितो दाशरथिर्महाहवे विनेदुरुच्चैर्मुदिताः कपीश्वराः ॥ ५१ ॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे शततमः सर्गः ॥ १०० ॥

प्रपञ्चयति–अग्नीत्यादिश्लोकद्वयेन । महोल्कामुखसंस्थितान् महोल्कामुखेन वर्तमानान् । विद्युज्जिह्वोपमान् विद्युदर्चिःसदृशान् । "कणा जिह्वास्तथाऽर्चिषः" इति हलायुधः ॥४६-५०॥ तत इति । तत् प्रसिद्धम् । मुदाऽन्वितः, बभूवेति शेषः ॥ ५१ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने शततमः सर्गः ॥ १०० ॥

विद्युज्जिह्वोपमान् विद्युदर्चिस्सदृशान् । "कणा जिह्वास्तथाऽर्चिषः" इति हलायुधः ॥ ४७-५१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां शततमः सर्गः ॥ १०० ॥

For Private And Personal Use Only

अथ लक्ष्मणस्य शक्त्या पतनम्–तस्मिन्नित्यादि । क्रोधाच्चास्त्रमनन्तरमित्यत्रापि चक्र इत्यनुषज्यते ॥ १ ॥ किं तदस्त्रमित्यपेक्षायामाह–मयेनेति । रौद्रं रुद्रदेवताकम् ॥ २ ॥ ततः शूलानीत्यादिश्लोकद्वयमेकान्वयम् । कूटपाशाः कपटपाशाः ॥ ३–७ ॥ तैरिति । चन्द्रसूर्यग्रहैरिवेति । तत्समानाकारै

तस्मिन् प्रतिहतेऽस्त्रे तु रावणो राक्षसाधिपः । क्रोधं च द्विगुणं चक्रे क्रोधाच्चास्त्रमनन्तरम् ॥ १ ॥ मयेन विहितं रौद्र मन्यदस्त्रं महाद्युतिः । उत्स्रष्टुं रावणो घोरं राघवाय प्रचक्रमे ॥ २ ॥ ततः शूलानि निश्चेरुर्गदाश्च मुसलानि च । कार्मुकाद्दीप्यमानानि वज्रसाराणि सर्वशः ॥ ३ ॥ मुद्गराः कूटपाशाश्च दीप्ताश्चाशनयस्तथा । निष्पेतुर्विविधा स्तीक्ष्णा वाता इव युगक्षये ॥ ४ ॥ तदस्त्रं राघवः श्रीमानुत्तमास्त्रविदां वरः । जघान परमास्त्रेण गान्धर्वेण महा द्युतिः ॥ ५ ॥ तस्मिन् प्रतिहतेऽस्त्रे तु राघवेण महात्मना । रावणः क्रोधताम्राक्षः सौरमस्त्रमुदैरयत् ॥ ६ ॥ तत श्चक्राणि निष्पेतुर्भास्वराणि महान्ति च । कार्मुकाद्भीमवेगस्य दशग्रीवस्य धीमतः ॥७॥ तैरासीद्गगनं दीप्तं सम्पतद्भि रितस्ततः । पतद्भिश्च दिशो दीप्ताश्चन्द्रसूर्यग्रहैरिव ॥ ८ ॥ तानि चिच्छेद बाणौघैश्चक्राणि स तु राघवः । आयु धानि च चित्राणि रावणस्य चमूमुखे ॥ ९ ॥ तदस्त्रं तु हतं दृष्ट्वा रावणो राक्षसाधिपः । विव्याध दशभिर्बाणै रामं सर्वेषु मर्मसु ॥ १० ॥ स विद्धो दशभिर्बाणैर्महाकार्मुकनिस्सृतैः । रावणेन महातेजा न प्राकम्पत राघवः ॥ ११ ॥ ततो विव्याध गात्रेषु सर्वेषु समितिञ्जयः । राघवस्तु सुसंक्रुद्धो रावणं बहुभिः शरैः ॥ १२ ॥ एतस्मिन्नन्तरे क्रुद्धो राघवस्यानुजो बली । लक्ष्मणः सायकान् सप्त जग्राह परवीरहा ॥ १३ ॥

रित्यर्थः ॥ ८–१२ ॥ एतस्मिन्नन्तर इति । एवं रावणं प्रहृत्य क्षणं रामे विश्राम्यति सतीत्यर्थः । लक्ष्मणः पूर्वं युद्धे प्रवृत्तो मध्ये रामेण युद्धकरणा

तस्मिन्निति । क्रोधाच्चास्त्रमनन्तरमित्यत्रापि चक्र इति क्रिया सम्बध्यते ॥ १ ॥ तत्किमस्त्रमत आह–मयेनेति ॥ २–१२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दवसरप्रतीक्ष इत्यर्थः । एवमव्याख्याने कथमन्येन युध्यमानमन्यो युध्येतेति महान् दोषः स्यात् ॥ १३ ॥ गृहीतानां सप्तबाणानां विनियोगप्रकारमाह– तैः सायकैरित्यादिश्लोकत्रयेण । तैः सायकैरिति षष्ठ्यर्थे तृतीया । तेषां सायकानां मध्ये एकेन बाणेन ध्वजम्, एकेन बाणेन सारथिशिरः, पञ्चभि

तैः सायकैर्महावेगै रावणस्य महाद्युतिः । ध्वजं मनुष्यशीर्षं तु तस्य चिच्छेद नैकधा ॥ १४ ॥ सारथेश्चापि बाणेन शिरो ज्वलितकुण्डलम् । जहार लक्ष्मणः श्रीमान् नैर्ऋतस्य महाबलः ॥ १५ ॥ तस्य बाणैश्च चिच्छेद धनुर्गजकरोपमम् । लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिर्निशितैः शरैः ॥ १६ ॥ नीलमेघनिभांश्चास्य सदश्वान् पर्वतोपमान् । जघानाप्लुत्य गदया रावणस्य विभीषणः ॥ १७ ॥ हताश्वाद्वेगवान् वेगादवप्लुत्य महारथात् । क्रोधमाहारयत्तीव्रं भ्रातरं प्रति रावणः ॥१८॥ ततः शक्तिं महाशक्तिर्दीप्तां दीप्ताशनीमिव । विभीषणाय चिक्षेप राक्षसेन्द्रः प्रतापवान् ॥१९॥ अप्राप्तामेव तां बाणैस्त्रिभिश्चिच्छेद लक्ष्मणः । अथोदतिष्ठत् सन्नादो वानराणां तदा रणे ॥ २० ॥ सा पपात त्रिधा च्छिन्ना शक्तिः काञ्चनमालिनी । सविस्फुलिङ्गा ज्वलिता महोल्केव दिवश्च्युता ॥२१॥ ततः सम्भाविततरां कालेनापि दुरासदाम् । जग्राह विपुलां शक्तिं दीप्यमानां स्वतेजसा ॥ २२ ॥ सा वेगिता बलवता रावणेन दुरासदा । जज्वाल सुमहाघोरा शक्राशनिसमप्रभा ॥ २३ ॥ एतस्मिन्नन्तरे वीरो लक्ष्मणस्तं विभीषणम् । प्राणसंशयमापन्नं तूर्णमभ्यवपद्यत ॥२४॥ तं विमोक्षयितुं वीरश्चापमायम्य लक्ष्मणः । रावणं शक्तिहस्तं वै शरवर्षैरवाकिरत् ॥२५॥

र्धनुश्च चिच्छेदेत्यर्थः । निशितैः शरैरित्यत्र शरशब्दः काशदण्डविशेषमयत्वपरो बाणविशेषणम् ॥ १४–१६ ॥ एवं धनुषि छिन्ने क्षणं तूष्णीं तिष्ठति रावणे विभीषणेन किंचित्कारमाह–नीलेति ॥ १७–२१ ॥ तत इति । सम्भाविततरां चन्दनादिभिरर्चिताम् ॥ २२ ॥ २३ ॥ एतस्मिन्निति । अभ्यवपद्यत तमाच्छाद्य स्वयमतिष्ठदित्यर्थः ॥ २४ ॥ २५ ॥

सा वेगितेति । दुरासदा दुस्सहा । वेगिता वेगं प्रापिता ॥ २३ ॥ अभ्यवपद्यत विभीषणसमीपमागत इत्यर्थः ॥ २४ ॥ २५ ॥

For Private And Personal Use Only

कीर्यमाण इति । विमुखीकृतविक्रमः विमुखीकृतविभीषणविषयपराक्रमः ॥ २६ ॥ २७ ॥ ते त्वया ॥ २८ ॥ लोहितलक्षणा रुधिरचिह्ना । अनेन पूर्वमपि बहुधा रिपवोऽनया हता इति व्यज्यते । लोहितलक्षणा सती यास्यतीति वा ॥ २९–३२ ॥ तामिति । राघवः लक्ष्मणाय स्वस्त्यस्तु त्वं हतोद्यमा नष्ट

कीर्यमाणः शरौघेण विसृष्टेन महात्मना । स प्रहर्तुं मनश्चक्रे विमुखीकृतविक्रमः ॥ २६ ॥ मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः । लक्ष्मणाभिमुखस्तिष्ठन्निदं वचनमब्रवीत् ॥ २७ ॥ मोक्षितस्ते बलश्लाघिन् यस्मादेवं विभीषणः । विमुच्य राक्षसं शक्तिस्त्वयीयं विनिपात्यते ॥ २८ ॥ एषा ते हृदयं भित्त्वा शक्तिर्लोहितलक्षणा । मद्बाहुपरिघोत्सृष्टा प्राणानादाय यास्यति ॥ २९ ॥ इत्येवमुक्त्वा तां शक्तिमष्टघण्टां महास्वनाम् । मयेन मायाविहिताममोघां शत्रुघातिनीम् ॥ ३० ॥ लक्ष्मणाय समुद्दिश्य ज्वलन्तीमिव तेजसा । रावणः परमक्रुद्धश्चिक्षेप च ननाद च ॥ ३१ ॥ सा क्षिप्ता भीमवेगेन शक्राशनिसमस्वना । शक्तिरभ्यपतद्वेगाल्लक्ष्मणं रणमूर्धनि ॥ ३२ ॥ तामनुव्याहरच्छक्तिमापतन्तीं स राघवः । स्वस्त्यस्तु लक्ष्मणायेति मोघा भव हतोद्यमा ॥ ३३ ॥ रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा । मुक्ताऽऽशूरस्यभीतस्य लक्ष्मणस्य ममज्ज सा ॥ ३४ ॥ न्यपतत् सा महावेगा लक्ष्मणस्य महोरसि । जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः ॥ ३५ ॥ ततो रावणवेगेन सुदूरमवगाढया । शक्त्या निर्भिन्नहृदयः पपात भुवि लक्ष्मणः ॥ ३६ ॥ तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः । भ्रातृस्नेहान्महातेजा विषण्णहृदयोऽभवत् ॥ ३७ ॥ स मुहूर्तमनुध्याय बाष्पव्याकुललोचनः । बभूव संरब्धतरो युगान्त इव पावकः ॥ ३८ ॥

हननोद्योगा मोघा भवेति तामनुव्याहरदित्यन्वयः ॥ ३३ ॥ क्षणात् भस्मीकरणक्षमा शक्तिः रामेण मोघीकृता सती केवलमपतदित्याह–रावणेनेति । मुक्तेति । आशु उरसि अभीतस्येति पदानि । लक्ष्मणस्योरसि ममज्जेति सम्बन्धः ॥ ३४–३७ ॥ स मुहूर्तमिति । अनुध्याय तत्कालकर्तव्यं

महात्मना लक्ष्मणेन विमुखीकृतविक्रमः विमुखीकृतविभीषणविषयपराक्रम इत्यर्थः ॥ २६–२८ ॥ एषेति । लोहितलक्षणा शत्रुरुधिरचिह्निता ॥ २९–३२ ॥ तामिति ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिन्तयित्वा ॥ २८ ॥ न विषादस्येति सार्धश्लोकमेकं वाक्यम् । लक्ष्मणं सन्निरीक्ष्य महता सर्वयत्नेन रावणस्य वधे धृतः अवहितः सुतुमुलं युद्धं चक्र इत्यन्वयः । न केवलं सीताहरणात् किन्तु लक्ष्मणदर्शनादपीति चशब्दार्थः ॥ २९ ॥ कथं लक्ष्मणदर्शनं रावणवधकारणं भवतीत्यत्राह–

न विषादस्य कालोऽयमिति सञ्चिन्त्य राघवः । चक्रे सुतुमुलं युद्धं रावणस्य वधे धृतः । सर्वयत्नेन महता लक्ष्मणं सन्निरीक्ष्य च ॥ ३९ ॥ स ददर्श ततो रामः शक्त्या भिन्नं महाहवे । लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलम् ॥४०॥ तामपि प्रहितां शक्तिं रावणेन बलीयसा । यत्नतस्ते हरिश्रेष्ठा न शेकुरवमर्दितुम् ॥४१॥ अर्दिताश्चैव बाणौघैः क्षिप्रहस्तेन रक्षसा ॥ ४२ ॥ सौमित्रिं सा विनिर्भिद्य प्रविष्टा धरणीतलम् ॥ ४३ ॥ तां कराभ्यां परामृश्य रामः शक्तिं भयावहाम् । बभञ्ज समरे क्रुद्धो बलवान् विचकर्ष च ॥ ४४ ॥ तस्य निष्कर्षतः शक्तिं रावणेन बलीयसा । शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः ॥ ४५ ॥ अचिन्तयित्वा तान् बाणान् समाश्लिष्य च लक्ष्मणम् । अब्रवीच्च हनूमन्तं सुग्रीवं चैव राघवः ॥ ४६ ॥ लक्ष्मणं परिवार्येह तिष्ठध्वं वानरोत्तमाः ॥ ४७ ॥ पराक्रमस्य कालोऽयं सम्प्राप्तो मे चिरेप्सितः । पापात्माऽयं दशग्रीवो वध्यतां पापनिश्चयः । कांक्षतः स्तोककस्येव घर्मान्ते मेघदर्शनम् ॥ ४८ ॥

स ददर्शेति । तदानीं लक्ष्मणस्य तादृशं शोच्यत्वदर्शनं रावणवधनिश्चयकारणं भवतीत्याशयः ॥ ४० ॥ तामपीति । अपिशब्दस्य यत्नतोऽपीत्युत्तरत्रान्वयः । बाणार्दितत्वेन सुतरां न शेकुरित्याह–अर्दिताश्चेति ॥ ४१ ॥ ४२ ॥ कारणान्तरमाह–सौमित्रिमिति ॥ ४३–४७ ॥ पराक्रमस्येत्यादि

राघवः, लक्ष्मणाय स्वस्त्यस्तु, त्वं हतोद्यमा नष्टहननोद्योगा मोघा भवेति आपतन्तीं शक्तिमनु व्याहरत् शक्तिमुद्दिश्य व्याहृतवानिति योजना ॥३३–४३॥तामिति । यामवमर्दितुं वानरा न शेकुः तां कराभ्यां विचकर्ष बभञ्ज चेति सम्बन्धः ॥ ४४–४७ ॥ पराक्रमस्येत्यादि सार्धश्लोकमेकं वाक्यम् । कांक्षतश्चातकस्य घर्मान्ते मेघदर्शनमिव चिरेप्सितः पराक्रमस्य कालः मे मया सम्प्राप्तः, अतः पापात्मा दशग्रीवो वध्यतामिति योजना। कांक्षतस्स्तोककस्य इति पाठे–स्तोककः चातकः । ॥९९९॥

For Private And Personal Use Only

सार्धश्लोक एकान्वयः । वध्यतामिति प्राप्तकाले लोट् । स्तोककस्य चातकस्य । " स्तोककश्चातकः समाः " इत्यमरः ॥ ४८ ॥ अस्मिन्मुहूर्ते तत्रापि नचिराद्द्रक्ष्यथेत्यन्वयः ॥ ४९ ॥ राज्यनाशमित्यादिश्लोकद्वयमेकान्वयम् । प्राप्तं पम्पोपवनादौ । क्लेशं लक्ष्मणप्रहरणजन्यम् ॥५०॥५१ ॥ यदर्थमित्यादि

अस्मिन् मुहूर्ते नचिरात् सत्यं प्रतिशृणोमि वः । अरावणमरामं वा जगद्द्रक्ष्यथ वानराः ॥ ४९ ॥ राज्यनाशं वने वासं दण्डके परिधावनम् । वैदेह्याश्च परामर्शं रक्षोभिश्च समागमम् ॥ ५० ॥ प्राप्तं दुःखं महद्घोरं क्लेशं च निरयोपमम् । अद्य सर्वमहं त्यक्ष्ये निहत्वा रावणं रणे ॥ ५१ ॥ यदर्थं वानरं सैन्यं समानीतमिदं मया । सुग्रीवश्च कृतो राज्ये निहत्वा वालिनं रणे ॥५२॥ यदर्थं सागरः क्रान्तः सेतुर्बद्धश्च सागरे । सोऽयमद्य रणे पापश्चक्षुर्विषयमागतः ॥ ५३ ॥ चक्षुर्विषयमागम्य नायं जीवितुमर्हति । दृष्टिं दृष्टिविषस्येव सर्पस्य मम रावणः ॥ ५४ ॥ स्वस्थाः पश्यत दुर्धर्षा युद्धं वानरपुङ्गवाः । आसीनाः पर्वताग्रेषु ममेदं रावणस्य च ॥ ५५ ॥ अद्य रामस्य रामत्वं पश्यन्तु मम संयुगे । त्रयो लोकाः सगन्धर्वाः सदेवाः सर्षिचारणाः ॥ ५६ ॥ अद्य कर्म करिष्यामि यल्लोकाः सचराचराः । सदेवाः कथयिष्यन्ति यावद्भूमिर्धरिष्यति । समागम्य सदा लोके यथा युद्धं प्रवर्तितम् ॥ ५७ ॥ एवमुक्त्वा शितैर्बाणैस्तप्तकाञ्चनभूषणैः । आजघान दशग्रीवं रणे रामः समाहितः ॥ ५८ ॥

श्लोकत्रयमेकान्वयम् । दृष्टिं दृष्टिविषयम् । दृष्टौ विषं यस्यासौ दृष्टिविषः तस्य । केचिद्धि सर्पाः दर्शनमात्रेण मनुष्यान् मारयन्तीति प्रसिद्धिः ॥ ५२-५५ ॥ अद्येति । रामत्वं जगदेकवीरत्वम् । आचार्यास्तु—रामावतारप्रयोजनमित्याहुः ॥ ५६ ॥ अद्येत्यादिसार्धश्लोक एकान्वयः । सदेवाः " स्तोककश्चातकस्समाः " इत्यमरः ॥ ४८ ॥ प्रतिशृणोमि प्रतिजानामि ॥४९॥ राज्यनाशमित्यादि सार्धश्लोकमेकं वाक्यम् । राज्यनाशं राज्यनाशजनितं दुःखम् । वने वासं वनवासजनितं दुःखम् । एवमुत्तरत्रापि दुःखविशेषणानि । क्लेशं च निरयोपममतिजुगुप्सितं लक्ष्मणप्रहारजनितमित्यर्थः ॥ ५०-५३ ॥ दृष्टिविषस्य सर्पस्य दृष्टिं दृष्टिविषयं प्राप्तो जन इव अयं जीवितुं नार्हतीति सम्बन्धः ॥५४॥५५॥ अद्येति । रामस्य रामत्वं रमयतीति राम इति व्युत्पत्त्या पराक्रमेणापि रमयितृत्वमुच्यते ॥ ५६ ॥ सदेवास्सचराचराः लोका जनास्समागम्य सम्भूय मया प्रवर्तितं युद्धं गुरुरूपं यत्कर्म यावद्युद्धभूमिर्धरिष्यति अवस्थास्यते तावन्तं कालं सदा नित्यवाः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सचराचराः लोकाः जनाः, समागम्य सङ्गीभूय, यथेदानीं युद्धं प्रवर्तितं तथा यावत् भूमिर्धरिष्यति, तावत्कालं सदा नित्यशः लोके यत्कर्म कथयिष्यन्ति, तत् कर्माद्य करिष्यामीत्यन्वयः ॥५७–६३॥ इति श्रीगोविन्द० श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोत्तरशततमः सर्गः॥१०१

अथ प्रदीप्तैर्नाराचैर्मुसलैश्चापि रावणः । अभ्यवर्षत्तदा रामं धाराभिरिव तोयदः ॥५९॥ रामरावणमुक्तानामन्योन्यमभिनिघ्नताम् । शराणां च शराणां च बभूव तुमुलः स्वनः ॥ ६० ॥ ते भिन्नाश्च विकीर्णाश्च रामरावणयोः शराः । अन्तरिक्षात् प्रदीप्ताग्रा निपेतुर्धरणीतले ॥ ६१ ॥ तयोर्ज्यातलनिर्घोषो रामरावणयोर्महान् । त्रासनः सर्वभूतानां संबभूवाद्भुतोपमः ॥६२॥ स कीर्यमाणः शरजालवृष्टिभिर्महात्मना दीप्तधनुष्मताऽर्दितः । भयात् प्रदुद्राव समेत्य रावणो यथाऽनिलेनाभिहतो बलाहकः ॥ ६३ ॥ इत्यार्षे० श्रीमद्युद्धकाण्डे एकोत्तरशततमः सर्गः ॥ १०१ ॥

शक्त्या विनिहतं दृष्ट्वा रावणेन बलीयसा । लक्ष्मणं समरे शूरं रुधिरौघपरिप्लुतम् ॥ १ ॥ स दत्त्वा तुमुलं युद्धं रावणस्य दुरात्मनः । विसृजन्नेव बाणौघान् सुषेणं वाक्यमब्रवीत् ॥ २॥ एष रावणवीर्येण लक्ष्मणः पतितः क्षितौ । सर्पवद्वेष्टते वीरो मम शोकमुदीरयन् ॥ ३ ॥ शोणितार्द्रमिमं वीरं प्राणैरिष्टतमं मम । पश्यतो मम का शक्तिर्योद्धुं पर्याकुलात्मनः ॥ ४ ॥ अयं स समरश्लाघी भ्राता मे शुभलक्षणः । यदि पञ्चत्वमापन्नः प्राणैर्मे किं सुखेन च ॥ ५ ॥ लज्जतीव हि मे वीर्यं भ्रश्यतीव कराद्धनुः । सायका व्यवसीदन्ति दृष्टिर्बाष्पवशं गता । अवसीदन्ति गात्राणि स्वप्नयाने नृणामिव ॥ ६ ॥ चिन्ता मे वर्धते तीव्रा मुमूर्षा चोपजायते ॥ ७ ॥

अथ लक्ष्मणसञ्जीवनं द्विशततमे—शक्त्या विनिहतमित्यादिश्लोकद्वयमेकं वाक्यम् । विसृजन्नेवेत्यादिवर्तमाननिर्देशेन रावणपलायनानन्तरं लक्ष्मणयोगक्षेमानुसन्धाने अविलम्बः सूचितः ॥ १ ॥ २ ॥ एष इति । उदीरयन् जनयन् ॥ ३ ॥ शोणितार्द्रमिति । प्राणैः प्राणेभ्यः ॥ ४ ॥ ५ ॥ लज्जतीवेत्यादि

यथा लोके कथयिष्यन्ति तथा तत्कर्म करिष्यामीति सम्बन्धः ॥ ५७–६३ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकोत्तरशततमः सर्गः ॥ १०१ ॥ १ ॥ २ ॥ एष इति । शोकमुदीरयन् जनयन् ॥ ३ ॥ ४ ॥ प्राणैः प्राणेभ्यः ॥ ५ ॥ लज्जतीति परस्मैपदमार्षम् ॥ ६ ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सार्धश्लोकद्वयमेकान्वयम् । लज्जतीव । आर्षं परस्मैपदम् । स्वप्नयाने स्वप्नगमने । स्वप्ने हि गच्छतां पुरुषाणां पादाः पश्चादाकृष्टा भवन्ति । भ्रातरं निहतं दृष्ट्वेति पूर्वशेषः ॥ ६–८॥ विनिष्टनन्तमित्यादिसार्धश्लोकमेकं वाक्यम् । विनिष्टनन्तं निश्वसन्तम् । ध्यानशोकपरायणः, अभूदिति शेषः ॥९॥ परं विषाद

भ्रातरं निहतं दृष्ट्वा रावणेन दुरात्मना ॥ ८ ॥ विनिष्टनन्तं दुःखार्तं मर्मण्यभिहतं भृशम् । राघवो भ्रातरं दृष्ट्वा प्रियं प्राणं बहिश्चरम् । दुःखेन महताऽऽविष्टो ध्यानशोकपरायणः ॥९॥ परं विषादमापन्नो विललापाकुलेन्द्रियः ॥१०॥ न हि युद्धेन मे कार्यं नैव प्राणैर्न सीतया । भ्रातरं निहतं दृष्ट्वा लक्ष्मणं रणपांसुषु ॥११॥ किं मे राज्येन किं प्राणै र्युद्धे कार्यं न विद्यते । यत्रायं निहतः शेते रणमूर्धनि लक्ष्मणः ॥१२॥ देशे देशे कलत्राणि देशे देशे च बान्धवाः । तं तु देशं न पश्यामि यत्र भ्राता सहोदरः ॥ १३ ॥ इत्येवं विलपन्तं तं शोकविह्वलितेन्द्रियम् । विवेष्टमानं करुण मुच्छ्वसन्तं पुनः पुनः । राममाश्वासयन् वीरः सुषेणो वाक्यमब्रवीत् ॥ १४ ॥ न मृतोऽयं महाबाहो लक्ष्मणो लक्ष्मिवर्धनः । न चास्य विकृतं वक्त्रं नापि श्यावं न निष्प्रभम् ॥१५॥ सुप्रभं च प्रसन्नं च मुखमस्याभिलक्ष्यते । पद्मरक्ततलौ हस्तौ सुप्रसन्ने च लोचने ॥१६॥ एवं न विद्यते रूपं गतासूनां विशांपते । दीर्घायुषस्तु ये मर्त्यास्तेषां तु मुखमीदृशम् ॥ १७ ॥ नायं प्रेतत्वमापन्नो लक्ष्मणो लक्ष्मिवर्धनः । मा विषादं कृथा वीर सप्राणोऽयमरिन्दमः॥ १८॥

मित्यर्धम् । राघव इत्यनुपञ्जनीयम् ॥१०॥ न हि युद्धेनेति । दृष्ट्वा, स्थितस्येति शेषः ॥११॥ किं मे राज्येनेति । यत्र यतः ॥१२–१४॥ न मृतोऽयमिति ।

भ्रातरं निहतं दृष्ट्वेत्येनत पूर्वशेषम् ॥ ८–११ ॥ किमिति । यत्र यतः कारणात्, तेन ॥ १२–१४ ॥ नेति । श्यावं कपिशम्, विवर्णमिति यावत् । " श्यावः

स०—सहोदरः तत्तुल्यः । पायसस्य कौसल्याविभागादुद्धृतस्य सुमित्रायै प्रदानान्निमित्ताद्वा लक्ष्मणस्य साहोदर्यम् । सहोदरस्य मेलनं भवेत् । असहोदरस्सन्नेतादृशो भ्राता यत्र मिलेत्तं देशं न पश्यामीत्यर्थो वा । भिन्नोदरे एतादृशं सौहार्दं दुर्लभमिति भावः ॥ १३ ॥

For Private And Personal Use Only

श्यावं कपिशम्, विवर्णमिति यावत् । "श्यावः स्यात्कपिशः" इत्यमरः ॥ १५-१८ ॥ आख्यास्यत इति । मुहुर्मुहुः कम्पमानं हृदयमेनं सोच्छ्वासं सप्राणम् आख्यास्यते आचष्टे । लडर्थे लट् ॥ १९ ॥ २० ॥ सौम्य शीघ्रमित्यादि सार्धश्लोकत्रयमेकान्वयम् । ओषधिपर्वतम् ओषधिपर्वताख्यम् ।

आख्यास्यते प्रसुप्तस्य स्रस्तगात्रस्य भूतले । सोच्छ्वासं हृदयं वीर कम्पमानं मुहुर्मुहुः ॥ १९ ॥ एवमुक्त्वा तु वाक्यज्ञः सुषेणो राघवं वचः । हनुमन्तमुवाचेदं हनुमन्तमभित्वरन् ॥ २० ॥ सौम्य शीघ्रमितो गत्वा शैलमोषधिपर्वतम् । पूर्वं ते कथितो योऽसौ वीर जाम्बवता शुभः ॥२१॥ दक्षिणे शिखरे तस्य जातामोषधिमानय । विशल्यकरणीं नाम विशल्यकरणीं शुभाम् ॥ २२ ॥ सवर्णकरणीं चापि तथा सञ्जीवनीमपि । सन्धानकरणीं चापि गत्वा शीघ्रमिहानय ॥२३॥ सञ्जीवनार्थं वीरस्य लक्ष्मणस्य महात्मनः । इत्येवमुक्तो हनुमान् गत्वा चौषधिपर्वतम् । चिन्तामभ्यगमच्छ्रीमानजानंस्तां महौषधिम् ॥ २४ ॥ तस्य बुद्धिः समुत्पन्ना मारुतेरमितौजसः । इदमेव गमिष्यामि गृहीत्वा शिखरं गिरेः ॥ २५ ॥ अस्मिन् हि शिखरे जातामोषधीं तां सुखावहाम् । प्रतर्केणावगच्छामि सुषेणोऽप्येवमब्रवीत् ॥ २६ ॥

द्वितीयो विशल्यकरणीशब्दो गुणवचनः । विशल्याः क्रियन्तेऽनयेति विशल्यकरणी ताम् ॥ २१-२४ ॥ तस्य बुद्धिरित्यादिश्लोकत्रयमेकान्वयम् । प्रतर्केण अन्तःकरणप्रसादादिना लिङ्गेन । सुषेणोऽप्येवमब्रवीदिति । "दक्षिणे शिखरे तस्य जातामोषधिमानय" इति सुषेणवचनम् ।

स्यात्कपिशो नीले " इति विश्वः ॥१५-१८॥ आख्यास्यत इति । मुहुर्मुहुः कम्पमानं हृदयमेनं सोच्छ्वासं सप्राणमाख्यास्यते आख्यास्यति अतो विषादं मा कृथा इति पूर्वेण सम्बन्धः ॥ १९ ॥ एवमिति । अत्र द्वितीयो हनुमच्छब्दः प्रशस्तहनुमद्वचनः । यद्वा हनुशब्दो ज्ञानवाची । "ज्ञानवान् हनुमान् स्वतः" इति शब्दार्णवे ॥ २० ॥ शैलं समुच्छ्रितम् ॥ २१ ॥ विशल्यकरणीमिति । द्वितीयो विशल्यकरणीशब्दो गुणवचनः । विशल्याः क्रियन्तेऽनयेति विशल्यकरणी ताम् ॥ २२-२५ ॥ अस्मिन्निति । प्रतर्कोत अन्तःकरणप्रसादादिलिङ्गेन इत्यर्थः । सुषेणो मां यथा यथावत् अब्रवीत् । अतः अस्मिन् शैलशिखरे सञ्जातामोषधि

अगृह्य यदि गच्छामि, पुनः सुषेणं प्रष्टुमिति भावः। दोषः लक्ष्मणहानिरूपः। वैक्लव्यं निष्पौरुषत्वम्। अन्ते इतिकरणेन पूर्वमन्वयः कार्यः॥२६–२७॥ इति सञ्चिन्त्येत्यादि श्लोकद्वयमेकान्वयम्। समतोलयत् उदक्षिपत्॥२८–३०॥ रामानु०–'लक्ष्मणाय ददौ नस्यं सुषेणः परमौषधम्' इत्येवंप्रकारेण इन्द्रजिद्युद्धे शल्यपीडितानां

अगृह्य यदि गच्छामि विशल्यकरणीमहम्। कालात्ययेन दोषः स्याद्वैक्लव्यं च महद्भवेत् ॥२७॥ इति सञ्चिन्त्य हनुमान् गत्वा क्षिप्रं महाबलः। आसाद्य पर्वतश्रेष्ठं त्रिः प्रकम्प्य गिरेः शिरः ॥२८॥ फुल्लनानातरुगणं समुत्पाट्य महाबलः। गृहीत्वा हरिशार्दूलो हस्ताभ्यां समतोलयत् ॥ २९ ॥ स नीलमिव जीमूतं तोयपूर्णं नभस्स्थलात्। आपपात गृहीत्वा तु हनुमान् शिखरं गिरेः ॥३०॥ समागम्य महावेगः संन्यस्य शिखरं गिरेः। विश्रम्य किञ्चिद्धनुमान् सुषेणमिदमब्रवीत् ॥३१॥ ओषधिं नावगच्छामि तामहं हरिपुङ्गव। तदिदं शिखरं कृत्स्नं गिरेस्तस्याहृतं मया ॥ ३२ ॥ एवं कथयमानं तं प्रशस्य पवनात्मजम्। सुषेणो वानरश्रेष्ठो जग्राहोत्पाट्य चौषधीम् ॥ ३३ ॥ विस्मितास्तु बभूवुस्ते रणे वानरराक्षसाः। दृष्ट्वा हनुमतः कर्म सुरैरपि सुदुष्करम् ॥ ३४ ॥ ततः संक्षोदयित्वा तामोषधीं वानरोत्तमः। लक्ष्मणस्य ददौ नस्तः सुषेणः सुमहाद्युतेः ॥ ३५ ॥ सशल्यस्तां समाघ्राय लक्ष्मणः परवीरहा। विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥ ३६ ॥ तमुत्थितं ते हरयो भूतलात् प्रेक्ष्य लक्ष्मणम्। साधु साध्विति सुप्रीताः सुषेणं प्रत्यपूजयन् ॥ ३७ ॥

लक्ष्मणादीनां चिकित्सां कृतवता संगृहीतौषधेन सुषेणेन, सौम्य शीघ्रमितो गत्वा शैलमोषधिपर्वतमिति हनुमत्प्रेषणमनुपपन्नमिव प्रतीयते। अत्र लक्ष्मणविभीषणादिचिकित्सायामोषधिजातं सर्वं विनियुक्तमिति परिहारस्य वक्तुं शक्यत्वेऽपि अविस्मरणशीलस्य हनुमतः स्वेनैवाचिरस्थापितपर्वतविषयकं प्रतर्केणावगच्छामीत्यभिधानम्, त्रिः प्रकम्प्योत्पाटनं च विरुद्धमिव प्रतीयते। अत्र परिहारो विद्वद्भिश्चिन्तनीयः ॥ २८ ॥ समागम्येति। संन्यस्य सेनामध्ये निक्षिप्य ॥ ३१–३८ ॥

मवगच्छामि, मनःमहर्षलिङ्गेन सुषेणयथार्थवाक्येन चात्र महौषधिं जानामीत्यर्थः ॥ २६–४१ ॥

अब्रवीदित्यादिश्लोकद्वयमेकान्वयम् ॥ ३९–४१ ॥ तामिति । तां प्रतिज्ञां रावणं हत्वा विभीषणमभिषेक्ष्यामीत्येवरूपाम् ॥४२॥४३॥ नैराश्यमिति । नैराश्यं सीतायां विजये चोपेक्षाम् ॥ ४४ ॥ न जीवन्निति। यास्यते यास्यति ॥ ४५ ॥ अहं त्विति । कृतकर्मा कृतसञ्चारः ॥ ४६ ॥ यदीति । कर्ता

एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा । सस्वजे स्नेहगाढं च बाष्पपर्याकुलेक्षणः ॥ ३८ ॥ अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा । दिष्ट्या त्वां वीर पश्यामि मरणात् पुनरागतम् ॥ ३९ ॥ न हि मे जीवितेनार्थः सीतया चापि लक्ष्मण । को हि मे विजयेनार्थस्त्वयि पञ्चत्वमागते ॥ ४० ॥ इत्येवं वदतस्तस्य राघवस्य महात्मनः । खिन्नः शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ ४१ ॥ तां प्रतिज्ञां प्रतिज्ञाय पुरा सत्य पराक्रम । लघुः कश्चिदिवासत्त्वो नैवं वक्तुमिहार्हसि ॥ ४२ ॥ न हि प्रतिज्ञां कुर्वन्ति वितथां साधवोऽनघ । लक्षणं हि महत्त्वस्य प्रतिज्ञापरिपालनम् ॥४३॥ नैराश्यमुपगन्तुं ते तदलं मत्कृतेऽनघ । वधेन रावणस्याद्य प्रतिज्ञामनु पालय ॥ ४४ ॥ न जीवन् यास्यते शत्रुस्तव बाणपथं गतः । नर्दतस्तीक्ष्णदंष्ट्रस्य सिंहस्येव महागजः ॥ ४५ ॥ अहं तु वधमिच्छामि शीघ्रमस्य दुरात्मनः । यावदस्तं न यात्येष कृतकर्मा दिवाकरः ॥४६॥ यदि वधमिच्छसि रावणस्य सङ्ख्ये यदि च कृतां त्वमिहेच्छसि प्रतिज्ञाम् । यदि तव राजवरात्मजाभिलाषः कुरु च वचो मम शीघ्रमद्य वीर ॥४७॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

निर्व्यूढाम् ॥ ४७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

तां प्रतिज्ञामिति । ' अहं हत्वा दशग्रीवं सप्रहस्तं सबान्धवम् । राजानं त्वां करिष्यामि लङ्काया राक्षसेश्वर " इत्येवंरूपां प्रतिज्ञाम् ॥ ४२–४७ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथेन्द्ररथमारुह्य सङ्ग्रामस्त्रिंशततमे–लक्ष्मणेनेत्यादि ॥ १–६ ॥ तत इत्यादिसार्धश्लोकत्रयमेकान्वयम् । कूबरः युगाधारदारु । "कूबरस्तु युगन्धरः" इत्यमरः । काञ्चनापीडैः काञ्चनालङ्कारैः । श्वेतप्रकीर्णकैः श्वेतचामरैः । "चामरं तु प्रकीर्णकम्" इत्यमरः । हरिभिः हरितवर्णैः । रुक्मवेणुध्वजः कनकदण्ड

लक्ष्मणेन तु तद्वाक्यमुक्तं श्रुत्वा स राघवः । सन्दधे परवीरघ्नो धनुरादाय वीर्यवान् । रावणाय शरान् घोरान् विससर्ज चमूमुखे ॥ १ ॥ अथान्यं रथमारुह्य रावणो राक्षसाधिपः । अभ्यद्रवत काकुत्स्थं स्वर्भानुरिव भास्करम् ॥ २ ॥ दशग्रीवो रथस्थस्तु रामं वज्रोपमैः शरैः । आजघान महाघोरैर्धाराभिरिव तोयदः ॥ ३ ॥ दीप्तपावकसङ्काशैः शरैः काञ्चनभूषणैः । निर्बिभेद रणे रामो दशग्रीवं समाहितम् ॥ ४ ॥ भूमौ स्थितस्य रामस्य रथस्थस्य च रक्षसः । न समं युद्धमित्याहुर्देवगन्धर्वदानवाः ॥५॥ ततः काञ्चनचित्राङ्गः किङ्किणीशतभूषितः । तरुणादित्यसङ्काशो वैडूर्यमयकूबरः ॥ ६ ॥ सदश्वैः काञ्चनापीडैर्युक्तः श्वेतप्रकीर्णकैः । हरिभिः सूर्यसङ्काशैर्हेमजालविभूषितैः ॥ ७ ॥ रुक्मवेणुध्वजः श्रीमान् देवराजरथो वरः । देवराजेन सन्दिष्टो रथमारुह्य मातलिः ॥८॥ अभ्यवर्तत काकुत्स्थमवतीर्य त्रिविष्टपात् ॥९॥ अब्रवीच्च तदा रामं सप्रतोदो रथे स्थितः । प्राञ्जलिर्मातलिर्वाक्यं सहस्राक्षस्य सारथिः ॥ १० ॥ सहस्राक्षेण काकुत्स्थ रथोऽयं विजयाय ते । दत्तस्तव महासत्त्व श्रीमन् शत्रुनिबर्हण ॥ ११ ॥ इदमैन्द्रं महच्चापं कवचं चाग्निसन्निभम् । शराश्चादित्यसङ्काशाः शक्तिश्च विमला शिता ॥१२॥ आरुह्येमं रथं वीर राक्षसं जहि रावणम् । मया सारथिना राजन् महेन्द्र इव दानवान् ॥ १३ ॥

ध्वजः । देवराजरथ इति । य इति शेषः । योऽस्ति तमारुह्येत्युत्तरत्रान्वयः । सन्दिष्टः चोदितः ॥६–८॥ त्रिविष्टपात् स्वर्गात् ॥९॥ अब्रवीच्चेति । प्रतोदः अश्वप्रेरणकाष्ठम् ॥ १० ॥ सहस्राक्षेणेत्यादिश्लोकद्वयमेकान्वयम् । इदमिति । अत्र चापादिषु यथायोग्यं दत्त इत्येतल्लिङ्गवचनविपरिणामेन योजनीयम् ॥ ११–१३ ॥

॥१–५॥ तत इत्यादि सार्धश्लोकत्रयमेकं वाक्यम् । कूबरो युगाधारदारु । "कूबरस्तु युगन्धरः" इत्यमरः ॥ ६ ॥ काञ्चनापीडैः स्वर्णालङ्कारैः । श्वेतप्रकीर्णकैः शुभ्रचामरैः । "चामरं तु प्रकीर्णकम्" इत्यमरः । हरिभिः हयैः एतैः देवराजरथो वरः, योऽस्तीति शेषः । तमारुह्येत्युत्तरेण सम्बन्धः ॥ ७–११ ॥ इदमिति । अत्र

For Private And Personal Use Only

इत्युक्त इति । सम्परिक्रम्य प्रदक्षिणीकृत्य । लोकान् लक्ष्म्या विराजयन् चन्द्रप्रभयेव स्वकान्त्या सर्वलोकान् प्रकाशयन्नित्यर्थः ॥ १४-१८ ॥ ते दीप्तवदना इति । व्यादितास्याः व्यात्ताननाः । भयानकाः भयङ्कराः ॥१९॥ तैरिति । दीप्तभोगैः दीप्तफणैः । "भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः"

इत्युक्तः सम्परिक्रम्य रथं समभिवाद्य च। आरुरोह तदा रामो लोकान् लक्ष्म्या विराजयन् ॥ १४ ॥ तद्बभूवाद्भुतं युद्धं तुमुलं रोमहर्षणम् । रामस्य च महाबाहो रावणस्य च रक्षसः ॥१५॥ स गान्धर्वेण गान्धर्वं दैवं दैवेन राघवः। अस्त्रं राक्षसराजस्य जघान परमास्त्रवित् ॥ १६ ॥ अस्त्रं तु परमं घोरं राक्षसं राक्षसाधिपः । ससर्ज परमक्रुद्धः पुनरेव निशाचरः ॥ १७ ॥ ते रावणधनुर्मुक्ताः शराः काञ्चनभूषणाः । अभ्यवर्तन्त काकुत्स्थं सर्पा भूत्वा महाविषाः ॥१८॥ ते दीप्तवदना दीप्तं वमन्तो ज्वलनं मुखैः । राममेवाभ्यवर्तन्त व्यादितास्या भयानकाः ॥ १९ ॥ तैर्वासुकिसमस्पर्शैर्दीप्तभोगैर्महाविषैः । दिशश्च सन्तताः सर्वाः प्रदिशश्च समावृताः ॥ २० ॥ तान् दृष्ट्वा पन्नगान् रामः समापतत आहवे । अस्त्रं गारुत्मतं घोरं प्रादुश्चक्रे भयावहम् ॥ २१ ॥ ते राघवशरा मुक्ता रुक्मपुङ्खाः शिखिप्रभाः । सुपर्णाः काञ्चना भूत्वा विचेरुः सर्पशत्रवः ॥२२ ॥ ते तान् सर्वान् शरान् जघ्नुः सर्परूपान् महाजवान् । सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥ २३ ॥ अस्त्रे प्रतिहते क्रुद्धो रावणो राक्षसाधिपः । अभ्यवर्षत्तदा रामं घोराभिः शरवृष्टिभिः ॥ २४ ॥ ततः शरसहस्रेण राममक्लिष्टकारिणम् । अर्दयित्वा शरौघेण मातलिं प्रत्यविध्यत ॥ २५ ॥

इत्यमरः । प्रदिशः दिक्कोणाः ॥ २० ॥ तान् दृष्ट्वेति । प्रादुश्चक्रे प्रयुयुजे ॥ २१ ॥ त इति । शिखिप्रभाः अग्निप्रभाः । सुपर्णाः गरुडाः ॥ २२-२५ ॥ ॥३०२॥

पूर्वश्लोकस्थदत्तशब्दः पतश्चापादिषु यथायोग्यं लिङ्गवचनविपरिणामेन योजनीयः ॥ १२ ॥ १३ ॥ सम्परिक्रम्य प्रदक्षिणीकृत्य ॥ १४-१८ ॥ व्यादितास्याः व्यादितवदनाः ॥ १९ ॥ २० ॥ प्रादुश्चक्रे प्रयुयुजे ॥ २१ ॥ शिखिप्रभाः अग्निप्रभाः ॥ २२-२५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चिच्छेदेत्यादिसार्धश्लोकमेकं वाक्यम् । केतुं ध्वजपटम् । उद्दिश्य लक्षीकृत्य । रथात् रथावयवदण्डात् ॥ २६–२८ ॥ रामस्य तादृशदशादर्शनेन सञ्जातानि दिव्यानि भौमानि च वैकृतान्याह–रामचन्द्रमसमित्यादिना । प्राजापत्यं नक्षत्रं प्रजापतिदेवताकनक्षत्रभूतां रोहिणीम् । बुधे रोहिणीं प्राप्ते जग

चिच्छेद केतुमुद्दिश्य शरेणैकेन रावणः । पातयित्वा रथोपस्थे रथात् केतुं च काञ्चनम् । ऐन्द्रानपि जघानाश्वान् शरजालेन रावणः ॥ २६ ॥ तं दृष्ट्वा सुमहत्कर्म रावणस्य दुरात्मनः । विषेदुर्देवगन्धर्वा दानवाश्चारणैः सह ॥ २७ ॥ राममार्तं तदा दृष्ट्वा सिद्धाश्च परमर्षयः । व्यथिता वानरेन्द्राश्च बभूवुः सविभीषणाः ॥ २८ ॥ रामचन्द्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा । प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियाम् ॥ २९ ॥ समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥ ३० ॥ सधूमपरिवृत्तोर्मिः प्रज्वलन्निव सागरः । उत्पपात तदा क्रुद्धः स्पृशन्निव दिवाकरम् ॥ ३१ ॥ शस्त्रवर्णः सुपरुषो मन्दरश्मिर्दिवाकरः । अदृश्यत कबन्धाङ्कः संसक्तो धूमकेतुना ॥ ३२ ॥ कोसलानां च नक्षत्रं व्यक्तमिन्द्राग्निदैवतम् । आक्रम्याङ्गारकस्तस्थौ विशाखामपि चाम्बरे ॥ ३३ ॥ दशास्यो विंशतिभुजः प्रगृहीतशरासनः । अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥३४॥ निरस्यमानो रामस्तु दशग्रीवेण रक्षसा । नाशक्नोदभिसन्धातुं सायकान् रणमूर्धनि ॥ ३५ ॥ स कृत्वा भ्रुकुटिं क्रुद्धः किंचित् संरक्तलोचनः । जगाम सुमहाक्रोधं निर्दहन्निव चक्षुषा ॥३६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्र्युत्तरशततमः सर्गः १०३

त्पीडा भवतीति भावः ॥ २९–३१ ॥ शस्त्रवर्ण इति । शस्त्रवर्णः असितश्यामः ॥ ३२ ॥ कोसलानामिति । कोसलानाम् इक्ष्वाकूणाम् । विशाखाथास्तन्नक्षत्रत्वमेतत्काण्डचतुर्थसर्गे दर्शितम् ॥ ३३ ॥ ३४ ॥ निरस्यमान इति । अभिसन्धातुं धनुष्यारोपयितुम् ॥ ३५ ॥ अथैतद्दर्शनेन रामकोपं

केतुमुद्दिश्य लक्षीकृत्य, केतुं चिच्छेदेत्यर्थः । रथात् रथावयवकेतुदण्डात् केतुं पातयित्वा । यद्वा केतुरूपं दण्डं रथात् रथोपस्थे पातयित्वा ॥ २६–२८ ॥ रामस्य तादृग्दशादर्शनेन सञ्जातानि दिव्यानि भौमानि च वैकृतान्याह–रामचन्द्रमसं दृष्ट्वेत्यादिना । प्राजापत्यं च नक्षत्रं प्रजापतिदैवत्यनक्षत्रभूतां रोहिणीम् ॥२९–३१॥ शस्त्रवर्णः असितश्यामः ॥ ३२ ॥ इन्द्राग्निदैवतं विशाखानक्षत्रमिति सम्बन्धः ॥ ३३–३५ ॥ क्रुद्धः स रामः । सुमहाक्रोधं जगाम सुमहाक्रोधमाप्तो स्वजनार्तिभूत

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दर्शयति-स कृत्वेति ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्र्युत्तरशततमः सर्गः ॥ १०३ ॥
अथ रावणस्य शूलोद्धरणं चतुःशततमे-तस्येत्यादि ॥ १ ॥ २ ॥ खगाश्चेति । औत्पातिकानि उत्पातसूचकानि । नर्दन्तः गर्जन्तः ॥ ३ ॥ ४ ॥

तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धीमतः। सर्वभूतानि वित्रेसुः प्राकम्पत च मेदिनी ॥ १ ॥ सिंहशार्दूलवान् शैलः सञ्चचाल चलद्रुमः। बभूव चातिक्षुभितः समुद्रः सरितां पतिः ॥ २ ॥ खगाश्च खरनिर्घोषा गगने परुषा घनाः। औत्पातिकानि नर्दन्तः समन्तात् परिचक्रमुः ॥ ३ ॥ रामं दृष्ट्वा सुसंक्रुद्धमुत्पातांश्च सुदारुणान्। वित्रेसुः सर्वभूतानि रावणस्याभवद्भयम् ॥ ४ ॥ विमानस्थास्तदा देवा गन्धर्वाश्च महोरगाः। ऋषिदानवदैत्याश्च गरुत्मन्तश्च खेचराः ॥ ५ ॥ ददृशुस्ते महायुद्धं लोकसंवर्तसंस्थितम्। नानाप्रहरणैर्भीमैः शूरयोः सम्प्रयुद्ध्यतोः ॥ ६ ॥ ऊचुः सुरासुराः सर्वे तदा विग्रहमागताः। प्रेक्षमाणा महद्युद्धं वाक्यं भक्त्या प्रहृष्टवत् ॥ ७ ॥ दशग्रीवं जयेत्याहुरसुराः समवस्थिताः। देवा राममथोचुस्ते त्वं जयेति पुनः पुनः ॥ ८ ॥

विमानस्था इत्यादिश्लोकद्वयमेकान्वयम्। लोकसंवर्तस्य प्रलयस्येव संस्थितं संस्थानं यस्य तत्तथोक्तम् ॥ ५ ॥ ६ ॥ विग्रहमागताः विग्रहं युद्धम् उद्दिश्य आगताः, युद्धं द्रष्टुमागता इत्यर्थः। यद्वा विग्रहमागताः रामरावणपक्षपातात् परस्परं कलहायमाना इत्यर्थः। भक्त्या प्रेक्षमाणाः सन्तः प्रहृष्टवद्वाक्यमूचुरिति सम्बन्धः ॥ ७ ॥ तद्वाक्यं विविच्य दर्शयति-दशग्रीवमिति। यद्यप्यसुराणामपि रावणो बाधकः तथापि देवानामतिशयो मा

वैपरीत्यं रावणस्य पराक्रमश्च निमित्तम् ॥ २६ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायां त्र्युत्तरशततमः सर्गः ॥१०३॥१॥ २ ॥ खगाश्चेति। औत्पातिकानि उत्पातसूचकानि ॥ ३ ॥ ४ ॥ विमानस्था इति सार्धमेकं वाक्यम्। लोकसंवर्तस्य संस्थितं संस्थानं यस्य तत्तथोक्तम् ॥ ५ ॥ ६ ॥ विग्रहमागताः

स०-उत्तरग्रन्थेन सहैकः खण्डः एकोनसप्ततिश्लोकात्मा सर्ग इति केचिदाहुः। सर्गान्तिमश्लोकवृत्तादिभेदस्य प्रायिकत्वात् 'तस्य क्रुद्धस्य' इति सर्गारम्भणयमिति केचित् ॥ १ ॥ यद्यपि पूर्वं सुरासुरा इति समीरणाद्देवा राममथोचुरिति पूर्वं देवाः पूर्वदेवास्तु तदनन्तरमुदाहर्तव्याः। तथापि तेषां बाहुल्यात्तथाऽऽशया नैष्फल्यान्निर्देशमात्रेण माननीयताभिप्रेणनाद्वा प्रथमतो निर्देशः। तत्रापि साधवोऽसुराः रामपक्षपातिनः सन्तीति विशेषद्योतनाय व्युत्क्रमनिर्देशश्चेति वा रामपराजयरूपो व्युत्क्रमो न, अपितु निर्देशमात्र इति ज्ञापनाय वाऽयं निर्देश इति ज्ञेयम् ॥ ८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भूदित्यसूयया रावणं वर्धयन्तीति बोध्यम् ॥ ८ ॥ एतस्मिन्नन्तर इत्यादिश्लोकचतुष्टयमेकान्वयम् । राघवस्य क्रोधात् राघवविषयक्रोधात् । प्रहरणम् आयुधम्, स्पृशन् परामृशन् । किं वेदानीं ग्रहीतुमुचितमिति क्षणं चिन्तयन्नित्यर्थः । कूटैः शिखराकारैरयःशङ्कुभिः, चितं युक्तमित्यर्थः । अतिरौद्रं

एतस्मिन्नन्तरे क्रोधाद्राघवस्य स रावणः । प्रहर्तुकामो दुष्टात्मा स्पृशन् प्रहरणं महत् ॥९॥ वज्रसारं महानादं सर्व शत्रुनिबर्हणम् । शैलशृङ्गनिभैः कूटैश्चितं दृष्टिभयावहम् ॥ १० ॥ सधूममिव तीक्ष्णाग्रं युगान्ताग्निचयोपमम् । अतिरौद्रमनासाद्यं कालेनापि दुरासदम् ॥ ११ ॥ त्रासनं सर्वभूतानां दारणं भेदनं तदा । प्रदीप्तमिव रोषेण शूलं जग्राह रावणः ॥ १२ ॥ तच्छूलं परमक्रुद्धो मध्ये जग्राह वीर्यवान् । अनेकैः समरे शूरै राक्षसैः परिवारितः ॥ १३ ॥ समुद्यम्य महाकायो ननाद युधि भैरवम् । संरक्तनयनो रोषात् स्वसैन्यमभिहर्षयन् ॥ १४ ॥ पृथिवीं चान्तरिक्षं च दिशश्च प्रदिशस्तथा । प्राकम्पयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः ॥ १५ ॥ अतिनादस्य नादेन तेन तस्य दुरात्मनः । सर्वभूतानि वित्रेसुः सागरश्च प्रचुक्षुभे ॥ १६ ॥ स गृहीत्वा महावीर्यः शूलं तद्रावणो महत् । विनद्य सुमहानादं रामं परुषमब्रवीत् ॥ १७ ॥ शूलोऽयं वज्रसारस्ते राम रोषान्मयोद्यतः । तव भ्रातृसहायस्य सद्यः प्राणान् हरिष्यति ॥ १८ ॥ रक्षसामद्य शूराणां निहतानां चमूमुखे । त्वां निहत्य रणश्लाघिन् करोमि तरसा समम् । तिष्ठेदानीं निहन्मि त्वामेष शूलेन राघव ॥ १९ ॥

रौद्रं शूलमतिवर्तमानम् । अनासाद्यं शत्रुभिरप्रधृष्यम् । कालेन यमेन । दारणं क्रकचवत् कृन्तनम् । भेदनम् द्विधाकरणम् । दुष्टात्मा रावणः राघवस्य क्रोधात् प्रहर्तुकामः महत्प्रहरणं स्पृशन् सन् वज्रसारत्वादिविशिष्टं शूलं रोषेण प्रदीप्त इव स्थितो रावणो जग्राहेति सम्बन्धः ॥ ९–१६ ॥ विनद्येति । पूर्वं शूलोद्यमनजनितोत्साहकृतो नाद उक्तः । इह प्रक्षेपजनितोत्साहकृतो नाद इति विवेकः ॥ १७ ॥ १८ ॥ रक्षसामित्यादिसार्धश्लोकमेकान्वयम् ।

रामरावणपक्षपातात्सुरासुराश्च परस्परं कलहायमाना इत्यर्थः॥७–१८॥ रक्षसामिति । त्वां निहत्य निहतानां रक्षसां समं करिष्यामि, रक्षोभिस्समं करिष्यामीत्यर्थः।

For Private And Personal Use Only

त्वां विनिहत्य रक्षोभिः समं करिष्यामीत्यर्थः । "तुल्यार्थैः–" इत्यादिना षष्ठी ॥ १९ ॥ २० ॥ तदिति । विद्युज्ज्वाला विद्युत्सदृशज्वाला ॥२१–२८॥

एवमुक्त्वा स चिक्षेप तच्छूलं राक्षसाधिपः ॥ २० ॥ तद्रावणकरान्मुक्तं विद्युज्ज्वालासमाकुलम् । अष्टघण्टं महानादं वियद्गतमशोभत ॥२१॥ तच्छूलं राघवो दृष्ट्वा ज्वलन्तं घोरदर्शनम् । ससर्ज विशिखान् रामश्चापमायम्य वीर्यवान् ॥२२॥ आपतन्तं शरौघेण वारयामास राघवः । उत्पतन्तं युगान्ताग्निं जलौघैरिव वासवः ॥२३॥ निर्ददाह स तान् बाणान् रामकार्मुकनिस्सृतान् । रावणस्य महाशूलः पतङ्गानिव पावकः ॥ २४ ॥ तान् दृष्ट्वा भस्मसाद्भूतान् शूलसंस्पर्शचूर्णितान् । सायकानन्तरिक्षस्थान् राघवः क्रोधमाहरत् ॥२५॥ स तां मातलिनाऽऽनीतां शक्तिं वासवनिर्मिताम् । जग्राह परमक्रुद्धो राघवो रघुनन्दनः ॥२६॥ सा तोलिता बलवता शक्तिर्घण्टाकृतस्वना । नभः प्रज्वालयामास युगान्तोल्केव सप्रभा ॥२७॥ सा क्षिप्ता राक्षसेन्द्रस्य तस्मिन् शूले पपात ह । भिन्नः शक्त्या महान् शूलो निपपात हतद्युतिः ॥ २८ ॥ निर्बिभेद ततो बाणैर्हयानस्य महाजवान् । रामस्तीक्ष्णैर्महावेगैर्वज्रकल्पैः शितैः शरैः ॥ २९ ॥ निर्बिभेदोरसि ततो रावणं निशितैः शरैः । राघवः परमायत्तो ललाटे पत्रिभिस्त्रिभिः ॥ ३० ॥

निर्बिभेदेति । बाणैः शब्दायमानैः । "अण बाण शब्दे" इत्यस्मात् पचाद्यच् । बाणशब्दः शरभेदसंज्ञेत्यप्याहुः ॥ २९ ॥ निर्बिभेदोरसि तत इति ।

शूलोऽयं वज्रसार इत्यादिसार्धश्लोकद्वयस्य वास्तवार्थस्तु–मया उद्यतः मे शूलः तव भ्रातृसहायस्य भ्रात्रे लक्ष्मणाय सहायस्य वानरसमूहस्येत्यर्थः । सद्यः प्राणान् हरिष्यतीति सम्बन्धः । रक्षसामित्यादिसार्धश्लोकमेकं वाक्यम् । शूरे सत्यपि पक्षोऽहं त्वां न निहन्मि अतः त्वं तिष्ठ, किन्तु त्वां निहत्य आगत्येत्यर्थः । "हन हिंसागत्योः" इति धातोरयमर्थः । निहतानां शूराणां रक्षसाम् । तृतीयार्थे षष्ठी । समं करोमि, वानरानिति शेषः । निहतराक्षसप्रतीकारार्थं वानरान् हनिष्यामीति भावः ॥ १९ ॥ २० ॥ तदिति । विद्युज्ज्वालासमाकुलं विद्युत्सदृशज्वाला विद्युज्ज्वालाः ताभिर्व्याप्तम् ॥ २१–२८ ॥ निर्बिभेदेति । बाणैः बाणवद्भिः, शब्दायमानैरित्यर्थः ॥ २९ ॥ पत्रिभिः पत्रवद्भिः ॥ ३० ॥ ॥१०५॥

स०–राम. क्षिप्तैर्महावेगैर्बाणवद्भिरजिह्मगैः । इति पाठः ।

बाणवद्भिः "वण शब्दे बाणेत्येके" इत्युक्तेः शब्दायमानैः । बाणवद्भिः केषुचित्प्रधानेषु साक्षाज्ज्याविसृष्टेष्विषुषु तेभ्योऽपि राममाहात्म्येन निस्सरन्ति बाण । इति बाणानां बाणवत्त्वं सम्भवतीति वा तथोक्तिः ॥ २९ ॥

पत्रिभिस्त्रिभिरिति प्रयोगभेदान्न पुनरुक्तिः। पत्रिभिः पत्रवद्भिरित्येके ॥३०॥ स इति । समूहस्थः युद्धस्थः ॥३१॥ स रामबाणैरिति । समाजे युद्धे ॥३२॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

स शरैर्भिन्नसर्वाङ्गो गात्रप्रस्रुतशोणितः । राक्षसेन्द्रः समूहस्थः फुल्लाशोक इवाबभौ ॥३१॥ स रामबाणैरभिविद्धगात्रो निशाचरेन्द्रः क्षतजार्द्रगात्रः । जगाम खेदं च समाजमध्ये क्रोधं च चक्रे सुभृशं तदानीम् ॥ ३२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

स तेन तु तथा क्रोधात् काकुत्स्थेनार्दितो रणे । रावणः समरश्लाघी महाक्रोधमुपागमत् ॥ १ ॥ स दीप्तनयनो रोषा च्चापमायम्य वीर्यवान् । अभ्यर्दयत् सुसंक्रुद्धो राघवं परमाहवे ॥ २ ॥ बाणधारासहस्रैस्तैः स तोयद इवाम्बरात् । राघवं रावणो बाणैस्तटाकमिव पूरयत् ॥ ३ ॥ पूरितः शरजालेन धनुर्मुक्तेन संयुगे । महागिरिरिवाकम्प्यः काकुत्स्थो न प्रकम्पते ॥ ४ ॥ स शरैः शरजालानि वारयन् समरे स्थितः । गभस्तीनिव सूर्यस्य प्रतिजग्राह वीर्यवान् ॥ ५ ॥ ततः शरसहस्राणि क्षिप्रहस्तो निशाचरः । निजघानोरसि क्रुद्धो राघवस्य महात्मनः ॥ ६ ॥ स शोणित समादिग्धः समरे लक्ष्मणाग्रजः । दृष्टः फुल्ल इवारण्ये सुमहान् किंशुकद्रुमः ॥७॥ शराभिघातसंरब्धः सोऽपि जग्राह सायकान् । काकुत्स्थः सुमहातेजा युगान्तादित्यतेजसः ॥ ८ ॥

अथ श्रान्तस्य रावणस्य सूतेन रथापवाहनं पञ्चशततमे–स तु तेनेत्यादि ॥ १ ॥ २ ॥ बाणधारेति । बाणधारासहस्रैः हेतुभिः, तोयद इव रावणः,

॥ ३१ ॥ ३२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुरुत्तरशततमः सर्गः ॥ १०४ ॥ १ ॥ २ ॥ बाणधारेति । अम्बरात्तोयद इव स रावणः तटाकमिव तोयैः, बाणैः बाणन्ति शब्दायन्त इति बाणाः तैः बाणधारासहस्रैः राघवं पूरयत अपूरयदिति सम्बन्धः ॥ ३–८ ॥

तैः धाराभूतैः बाणैः, तटाकमिव रामं पूरयत् अपूरयत् ॥ ३--८ ॥ तत इति । अन्योन्यं नोपालक्षयतामित्यन्वयः ॥ ९ ॥ १० ॥ मम अज्ञानात् ममादर्शनात्, त्वदविवेकादिति वा । ते त्वया ॥ ११ ॥ १२ ॥ स्त्रीष्विति । कापुरुषं कापुरुषसम्बन्धि ॥ १३ ॥ १४ ॥ शूरेणेत्यादि सोपहासोक्तिः ॥ १५ ॥

ततोऽन्योन्यं सुसंरब्धावुभौ तौ रामरावणौ । शरान्धकारे समरे नोपालक्षयतां तदा ॥ ९ ॥ ततः क्रोधसमाविष्टो रामो दशरथात्मजः । उवाच रावणं वीरः प्रहस्य परुषं वचः ॥ १० ॥ मम भार्या जनस्थानादज्ञानाद्राक्षसाधम । हृता ते विवशा यस्मात्तस्मात्त्वं नासि वीर्यवान् ॥ ११ ॥ मया विरहितां दीनां वर्तमानां महावने । वैदेहीं प्रसभं हृत्वा शूरोऽहमिति मन्यसे ॥ १२ ॥ स्त्रीषु शूर विनाथासु परदाराभिमर्शक । कृत्वा कापुरुषं कर्म शूरोऽहमिति मन्यसे ॥ १३ ॥ भिन्नमर्याद निर्लज्ज चारित्रेष्वनवस्थित । दर्पान्मृत्युमुपादाय शूरोऽहमिति मन्यसे ॥ १४ ॥ शूरेण धनदभ्रात्रा बलैः समुदितेन च । श्लाघनीयं यशस्यं च कृतं कर्म महत्त्वया ॥ १५ ॥ उत्सेकेनाभिपन्नस्य गर्हितस्याहितस्य च । कर्मणः प्राप्नुहीदानीं तस्याद्य सुमहत् फलम् ॥ १६ ॥ शूरोऽहमिति चात्मानमवगच्छसि दुर्मते । नैव लज्जाऽस्ति ते सीतां चोरवद् व्यपकर्षतः ॥ १७ ॥ यदि मत्सन्निधौ सीता धर्षिता स्यात्त्वया बलात् । भ्रातरं तु खरं पश्येस्तदा मत्सायकैर्हतः ॥ १८ ॥ दिष्ट्याऽसि मम दुष्टात्मंश्चक्षुर्विषयमागतः । अद्य त्वां सायकैस्तीक्ष्णैर्नयामि यमसादनम् ॥ १९ ॥ अद्य ते मच्छरैश्छिन्नं शिरो ज्वलितकुण्डलम् । क्रव्यादा व्यपकर्षन्तु विकीर्णं रणपांसुषु ॥ २० ॥

उत्सेकेन गर्वेण ॥ १६–१९ ॥ अद्य त इति । शिरो ज्वलितकुण्डलमित्यनेन तदानीमन्तकाले रावण एकशिरस्कः स्थित इति गम्यते ॥ २० ॥

तत इति । अन्योन्यं नोपालक्षयतामिति सम्बन्धः ॥ ९ ॥ १० ॥ अज्ञानात् अविवेकात् । विवशा ममादर्शनादिति भावः ॥ ११–१४ ॥ शूरेणेत्याक्षेपोक्तिः । कर्म कापुरुषसम्बन्धि । श्लाघनीयमित्यादि व्यतिरेकोक्तिः ॥ १५ ॥ अभिपन्नस्य अनुष्ठितस्य ॥ १६–२० ॥

तर्षः पिपासा । शरशल्यान्तरोत्थितं शरशल्यक्षतविवरादुत्थितमित्यर्थः ॥२१-२६॥ राघवात् राघवस्य । विभक्तिव्यत्यय आर्षः । विघूर्णहृदयः भ्रान्तहृदयः ॥ २७ ॥ यदा चेत्यादिश्लोकत्रयमेकान्वयम् । यदा शस्त्रं नारेभे शस्त्रं न प्रयुक्तवान् । शरासनं च न व्यकर्षत् । यदा च विक्लवेन विवशेन, अन्त

निपत्योरसि गृध्रास्ते क्षितौ क्षिप्तस्य रावण । पिबन्तु रुधिरं तर्षाच्छरशल्यान्तरोत्थितम् ॥ २१ ॥ अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते । कर्षन्त्वन्त्राणि पतगा गरुत्मन्त इवोरगान् ॥ २२ ॥ इत्येवं संवदन् वीरो रामः शत्रुनिबर्हणः । राक्षसेन्द्रं समीपस्थं शरवर्षैरवाकिरत् ॥२३॥ बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे । रामस्यास्त्रबलं चैव शत्रोर्निधनकांक्षिणः ॥२४॥ प्रादुर्बभूवुरस्त्राणि सर्वाणि विदितात्मनः । प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोऽभवत् ॥ २५ ॥ शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः । भूय एवार्दयद्रामो रावणं राक्षसान्तकृत् ॥ २६ ॥ हरीणां चाश्मनिकरैः शरवर्षैश्च राघवात् । हन्यमानो दशग्रीवो विघूर्णहृदयोऽभवत् ॥ २७ ॥ यदा च शस्त्रं नारेभे न व्यकर्षच्छरासनम् । नास्य प्रत्यकरोद्वीर्यं विक्लवेनान्तरात्मना ॥२८॥ क्षिप्ताश्चापि शरास्तेन शस्त्राणि विविधानि च । न रणार्थाय वर्तन्ते मृत्युकालेऽभिवर्ततः ॥२९॥ सूतस्तु रथनेताऽस्य तदवस्थं समीक्ष्य तम् । शनैर्युद्धादसम्भ्रान्तो रथं तस्यापवाहयत् ॥ ३० ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

रात्मना मनसा हेतुना, अस्य रामस्य वीर्यं स्ववीर्यं च न प्रत्यकरोत् न प्रतिजघान । तेन रावणेन क्षिप्ताः शरा अपि विविधानि शस्त्राणि च न रणार्थाय वर्तन्ते छेदनभेदनादिरणप्रयोजनं कर्तुं यदा नाशक्नुवन् । तदा मृत्युकाले । अभिवर्ततः अभिवर्तमानस्य अस्य रावणस्य, रथनेता सूतः असम्भ्रान्तः सन् तदवस्थं पूर्वोक्तावस्थं रावणं समीक्ष्य तस्य रथं युद्धात् युद्धस्थलात्, शनैः अपवाहयत् अपावाहयत्, अन्यत्रानयदिति योजना ॥ २८-३० ॥

निपत्येति । तर्षात् पिपासया । बाणशल्यान्तरोत्थितं बाणशल्यक्षतविवरोत्थितम् ॥ २१-२३ ॥ अस्त्रबलम् अस्त्रबलविषयस्मरणं द्विगुणं बभूवेत्यर्थः ॥ २४-२६ ॥ राघवात् राघवस्य । विघूर्णहृदयो विह्वलहृदयः ॥ २७ ॥ यदा चेत्यादिश्लोकत्रयमेकं वाक्यम् । विक्लवेन विवशेन । शस्त्रं शस्त्रप्रयोगं नारेभे

स०-सूतः " सारथौ रथिके रक्षेत्सम्प्राप्ते प्राणसङ्कटे " इत्याद्युक्तिधर्मर्यादावेदितृस्वान्तरात्मप्रेरितः । रथनेता सारथिः । " सूतः प्रसूते प्रेरितेऽपि च " इति विश्वः ॥ ३० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामानुजीयम्–यदेत्यादि । शस्त्रं न मायुद्ध, न रणार्थाय वर्तन्ते, छेदनभेदनादिरणप्रयोजनं कर्तुं यदा नाशक्नुवन् तदा सुतस्तस्य रथमपवाहयदिति सम्बन्धः ॥ २८–३० ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

स तु मोहात् सुसंक्रुद्धः कृतान्तबलचोदितः । क्रोधसंरक्तनयनो रावणः सूतमब्रवीत् ॥ १ ॥ हीनवीर्यमिवाशक्तं पौरुषेण विवर्जितम् । भीरुं लघुमिवासत्त्वं विहीनमिव तेजसा ॥ २ ॥ विमुक्तमिव मायाभिरस्त्रैरिव बहिष्कृतम् । मामवज्ञाय दुर्बुद्धे स्वया बुद्ध्या विचेष्टसे॥ ३॥ किमर्थं मामवज्ञाय मच्छन्दमनवेक्ष्य च । त्वया शत्रोः समक्षं मे रथोऽयमपवाहितः ॥ ४ ॥ त्वयाऽद्य हि ममानार्य चिरकालसमार्जितम् । यशो वीर्यं च तेजश्च प्रत्ययश्च विनाशितः॥५॥ शत्रोः प्रख्यातवीर्यस्य रञ्जनीयस्य विक्रमैः । पश्यतो युद्धलुब्धोऽहं कृतः कापुरुषस्त्वया ॥ ६ ॥ यस्त्वं रथमिमं मोहात् न चोद्वहसि दुर्मते । सत्योऽयं प्रतितर्को मे परेण त्वमुपस्कृतः ॥ ७ ॥

अथ रावणरथप्रत्यानयनं षड्शततमे–स तु मोहादित्यादि । मोहात् अविवेकात् ॥ १ ॥ हीनवीर्यमिवेत्यादिश्लोकद्वयमेकान्वयम् । यत्र यत्र इव शब्दो नास्ति तत्र तत्रानुषञ्जनीयः । हीनवीर्यमिव हीनबलमिव । अशक्तमिव निरुत्साहमिव । असत्त्वमिव अधीरमिव । तेजसा परिभवासहनेन ॥२॥३॥ मच्छन्दं मदभिप्रायम् । "वशाभिप्राययोश्छन्दः" इत्यमरः ॥ ४ ॥ प्रत्ययः रावणस्य युधि पलायनं नास्तीति सर्वेषां विश्वासः । विनाशित इत्यस्य यश आदिषु लिङ्गविपरिणामः ॥५॥ शत्रोः पश्यतः शत्रौ पश्यति ॥६॥ यः नोद्वहसि अभिमुखं न प्रापयसि, किं त्वपवाहयसि । स त्वम् उपस्कृतः परेणोत्कोचादिना

शरासनं च न व्यकर्षत् । अस्य रामस्य वीर्यं स्ववीर्यं च न प्रत्यकरोत् न प्रतिजघान । तेन रामेण । रावणार्थाय रावणस्यार्थाय निवृत्तये पराजयाय क्षिप्ताः शराश्च यदा वर्तन्ते तदा मृत्युकालेऽभिवर्तनतः अस्य रावणस्य सूतः रथमपवाहयदिति सम्बन्धः ॥२८–३०॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चोत्तरशततमः सर्गः ॥१०५॥ स त्विति । मोहात् अविवेकात् ॥१॥ हीनवीर्यमिव हीनविक्रममिव । अशक्तमिव निरुत्साहमिव । असत्त्वमिव अल्पबलमिव । तेजसा पराभिभवसामर्थ्येन । विहीनमिवेति इवशब्दस्य सर्वत्र सम्बन्धः ॥२॥ ३ ॥ मच्छन्दं मदभिप्रायम् ॥ ४ ॥ प्रत्ययः रावणस्य युधि पलायनं नास्तीति सर्वेषां विश्वासः ॥ ५ ॥ शत्रोः पश्यतः सतः त्वया अहं कापुरुषः कुत्सितपुरुषः कृतः ॥ ६ ॥ उपस्कृतः उत्कोचादिना वशीकृतः । तर्कः ऊहः ॥ ७ ॥

For Private And Personal Use Only

वशीकृत इत्ययं प्रतितर्कः सत्यः प्रतिभाति ॥ ७ ॥ न हीति । न त्वयैतत् स्वनुष्ठितमिति । त्वयाऽनुष्ठितमेतत् न तु स्वनुष्ठितं तत् ॥ ८ ॥ अध्युषितः सहवासी, सुहृदिति यावत् । उपधयोपसर्पितो वा । गुणाः सत्काराः ॥ ९ ॥ १० ॥ रामानु०—निवर्तयेति । यदि वाऽध्युषितो वासि, चिरकालं मत्समीप इति

न हि तद्विद्यते कर्म सुहृदो हितकांक्षिणः। रिपूणां सदृशं चैतन्न त्वयैतत् स्वनुष्ठितम् ॥ ८ ॥ निवर्तय रथं शीघ्रं यावन्नोपैति मे रिपुः । यदि वाऽध्युषितो वाऽसि स्मर्यन्ते यदि वा गुणाः ॥९॥ एवं परुषमुक्तस्तु हितबुद्धिरबुद्धिना । अब्रवीद्रावणं सूतो हितं सानुनयं वचः ॥ १० ॥ न भीतोऽस्मि न मूढोऽस्मि नोपजप्तोऽस्मि शत्रुभिः । न प्रमत्तो न निस्नेहो विस्मृता न च सत्क्रिया ॥ ११ ॥ मया तु हितकामेन यशश्च परिरक्षता । स्नेहप्रस्कन्नमनसा प्रियमित्यप्रियं कृतम् ॥ १२ ॥ नास्मिन्नर्थे महाराज त्वं मां प्रियहिते रतम् । कश्चिल्लघुरिवानार्यो दोषतो गन्तुमर्हसि ॥ १३ ॥ श्रूयतां त्वभिधास्यामि यन्निमित्तं मया रथः । नदीवेग इवाभोगे संयुगे विनिवार्तितः ॥ १४ ॥ श्रमं तवावगच्छामि महता रणकर्मणा । न हि ते वीर सौमुख्यं प्रहर्षं वोपधारये ॥ १५ ॥

शेषः। स्मर्यन्ते यदि वा गुणाः, मन्निष्ठा उपकर्तृत्वादिगुणाः स्मर्यन्ते यदि ॥ ९ ॥ ॥ न भीतोऽस्मीति । नोपजप्तः उपजापं भेदं न गमितः। "भेदोपजापौ" इत्यमरः ॥११॥१२॥ अस्मिन्नर्थे रथापवाहनरूपेऽर्थे । कश्चित् कुत्रापि कुले जातः । लघुः अल्पबुद्धिः । अनार्यः दुष्टहृदय इव, मां दोषतः गन्तुं ज्ञातुं नार्हसि । गत्यर्था ज्ञानार्थाः ॥१३॥ यन्निमित्तं यत्कारणात् । "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" इति प्रथमा । नदीति । आभोगे उन्नतप्रदेशे । आभोगान्नदीवेग इव रथः संयुगाद्विनिवर्तित इत्यर्थः । आभोगे संयुग इत्यत्र विभक्तिव्यत्ययः ॥ १४ ॥ श्रममिति । सौमुख्यं सुमुखत्वम् तन्मूलं प्रहर्षम् ॥ १५ ॥
तत् हितकाङ्क्षिणः सुहृदः कर्म न, किन्तु रिपूणां सदृशं चैतत्, अतः न त्वयैतत्स्वनुष्ठितम्, त्वयाऽनुष्ठितमेतत्सुष्ठ्वनुष्ठितं न भवतीत्यर्थः ॥८॥ यदि वाऽध्युषितश्चासि चिरकालं मत्समीप इत्यर्थः । स्मर्यन्ते यदि वा गुणाः उपकर्तृत्वादिमन्निष्ठा गुणाः स्मर्यन्ते॥९॥१०॥ नोपजप्तः उपजापं भेदं न गमितः। "भेदोपजापावुपधा" इत्यमरः ॥ ११ ॥ स्नेहप्रस्कन्नमनसा स्नेहार्द्रहृदयेन ॥ १२ ॥ प्रियहिते रतं मां कश्चिदनार्य इव दोषतः गन्तुं नार्हसि, मयि दोषदृष्टिं कर्तुं नार्हसीत्यर्थः ॥ १३ ॥ यन्निमित्तं यस्मात्कारणात् नदीवेगइवाम्भोभिः चन्द्रोदयादिना प्रवृद्धसमुद्रोदकैर्नदीवेग इव युद्धाद्रथः विनिवार्तितः प्रतिनिवर्तितः तत् श्रूयतामिति सम्बन्धः । नदीवेग इवाभोग इति पाठे–आभोगे पर्वताद्युन्नतप्रदेशे नदीवेग इवेत्यर्थः ॥ १४ ॥ रणकर्मणा युद्धेन ॥ १५ ॥ १६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रथेति । अत्र आसन्निति शेषः ॥ १६ ॥ अभिपन्नेषु आविर्भूतेषु सत्सु । अप्रदक्षिणं प्रतिकूलम् ॥ १७ ॥ निमित्तानि किमर्थं त्वया विचारणीयानी त्यत आह–देशेत्यादिना । श्लोकत्रयमेकान्वयम् । लक्षणानि शुभाशुभनिमित्तानि । इङ्गितानि मुखप्रसादवैगुण्यादीनि । दैन्यम् अनुत्साहः । स्थलानि उन्नतप्रदेशाः । निम्नानि अवनतप्रदेशाः । समानि सर्वत्र समप्रदेशाः । विषमाणि निम्नोन्नतप्रदेशाः । युद्धकाल इति पूर्वोक्तानुवादः । अन्तरदर्शनं

रथोद्वहनखिन्नाश्च त इमे रथवाजिनः । दीना घर्मपरिश्रान्ता गावो वर्षहता इव ॥ १६ ॥ निमित्तानि च भूयिष्ठं यानि प्रादुर्भवन्ति नः । तेषु तेष्वभिपन्नेषु लक्षयाम्यप्रदक्षिणम् ॥ १७ ॥ देशकालौ च विज्ञेयौ लक्षणानीङ्गितानि च । दैन्यं खेदश्च हर्षश्च रथिनश्च बलाबलम् ॥ १८ ॥ स्थलनिम्नानि भूमेश्च समानि विषमाणि च । युद्धकालश्च विज्ञेयः परस्यान्तरदर्शनम् ॥ १९ ॥ उपयानापयाने च स्थानं प्रत्यपसर्पणम् । सर्वमेतद्रथस्थेन ज्ञेयं रथकुटुम्बिना ॥ २० ॥ तव विश्रमहेतोश्च तथैषां रथवाजिनाम् । रौद्रं वर्जयता खेदं क्षमं कृतमिदं मया ॥ २१ ॥ न मया स्वेच्छया वीर रथोऽयमपवाहितः ॥ २२ ॥

दृश्यत इति दर्शनं, द्रष्टव्यम् । द्रष्टव्यं रन्ध्रमित्यर्थः । अन्तरदर्शनं रन्ध्रदर्शनं कर्तव्यमित्यध्याहारो वा । उपयानं समीपगमनम् । अपयानं पार्श्वतो गमनम् । स्थानं स्थैर्येणावस्थानम् । प्रत्यपसर्पणम् अभिमुखस्थित्या पृष्ठतोऽपसरणम् । रथकुटुम्बिना सारथिना ॥ १८–२० ॥ तवेत्यादिसार्धश्लोक

प्रादुर्भवन्तीति । तेषु तेष्वभिपन्नेषु अभिभूतेषु सत्सु सः अप्रदक्षिणं प्रतिकूलं लक्षयामीति सम्बन्धः ॥ १७ ॥ न तु तावदेतानि श्रमादिनिमित्तानि, तदेतत्पूरयेत्या शङ्कायामाह–देशकालाविति । लक्षणानि अस्त्रशस्त्रप्रयोगमान्द्यादीनि । यद्वा शुभाशुभनिमित्तानि । इङ्गितानि मुखहस्तादिवैवर्ण्यादीनि लक्षणेनेङ्गितेन । दैन्यमनु त्साहः । स्थलनिम्नानि विषमाणि रथचक्रनिम्नोन्नतावस्थानहेतुभूतप्रदेशाः । अन्तरदर्शनं तीव्रप्रहाराय छिद्रदर्शनम् । उपयानापयाने च उपयानं समीपगमनम् अपयानं पश्चाद्गमनम्, स्थानं स्थैर्येणावस्थानम् । अपसर्पणम् अभिमुखस्थित्या हष्टिनोऽपसरणम् । रथकुटुम्बिना रथनिर्वाहकेन सारथिना ॥१८–२०॥ तवेत्यादिसार्धम् । ॥३०८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एकान्वयः । तथा वाजिनां विश्रमहेतोश्चेत्यन्वयः । रौद्रं दुस्सहम् । वर्जयता अपनयता । हेतौ शतृप्रत्ययः । क्षमं युक्तम् । स्वेच्छया अपनयननिमित्तं विना ॥ २१ ॥ २२ ॥ भर्तृस्नेहेत्यर्धम् । मया यत्कृतं तदिदं भर्तृस्नेहपरीतेनैव कृतमित्यर्थः ॥ २३ ॥ आज्ञापयेति । यथातत्त्वं यत् कार्यस्वरूपं

भर्तृस्नेहपरीतेन मयेदं यत्कृतं विभो ॥ २३ ॥ आज्ञापय यथातत्त्वं वक्ष्यस्यरिनिषूदन । तत्करिष्याम्यहं वीर गतानृण्येन चेतसा ॥ २४ ॥ सन्तुष्टस्तेन वाक्येन रावणस्तस्य सारथेः । प्रशस्यैनं बहुविधं युद्धलुब्धोऽब्रवीदिदम् ॥ २५ ॥ रथं शीघ्रमिमं सूत राघवाभिमुखं कुरु । नाहत्वा समरे शत्रून् निवर्तिष्यति रावणः ॥ २६ ॥ एवमुक्त्वा ततस्तुष्टो रावणो राक्षसेश्वरः । ददौ तस्मै शुभं ह्येकं हस्ताभरणमुत्तमम् ॥ २७ ॥ श्रुत्वा रावणवाक्यं तु सारथिः संन्यवर्तत ॥ २८ ॥ ततो द्रुतं रावणवाक्यचोदितः प्रचोदयामास हयान् स सारथिः । स राक्षसेन्द्रस्य ततो महारथः क्षणेन रामस्य रणाग्रतोऽभवत् ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षडुत्तरशततमः सर्गः ॥ १०६ ॥

वक्ष्यसि तत्तथा गतानृण्येन आनृण्यं गतेन, आनृण्यं कर्तव्यमिति कृतसङ्कल्पेन । चेतसा मनसा करिष्यामि ॥ २४ ॥ २५ ॥ रथमिति । निवर्तिष्यति निवर्तिष्यते ॥ २६–२८ ॥ तत इति । महांश्चासौ रथश्च महारथ इति विग्रहः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षडुत्तरशततमः सर्गः ॥ १०६ ॥

रौद्रं दुस्सहघटकम्, वर्जयता अपनयता । हेतौ शतृप्रत्ययः । क्षमं युक्तम् । स्वेच्छया निमित्तं विना रथोऽयं नापवाहितः ॥ २१ ॥ २२ ॥ भर्तृस्नेहेति । मया यत्कृतं तदिदं भर्तृस्नेहपरीतेन कृतमित्यर्थः ॥ २३ ॥ यथातत्त्वं यत्कार्यस्वरूपम् । गतानृण्येन प्रेक्षितानृण्येन चेतसा करिष्यामीत्यर्थः ॥ २४–२९ ॥ इति श्रीमहेश्वरतीर्थ विरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षडुत्तरशततमः सर्गः ॥ १०६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथादित्यहृदयोपदेशः। ततो युद्धपरिश्रान्तमित्यादिश्लोकद्वयमेकान्वयम्। रणं द्रष्टुं दैवतैः समागम्य आगतः दैवतैः सहागतः अगस्त्यः, युद्धपरिश्रान्तम् उपस्थितं रावणं दृष्ट्वा कथमेनं परत्वप्रकटनं विना जेष्यामीति चिन्तया स्थितं चिन्तयन्तं च रामं दृष्ट्वा उपागम्याब्रवीत् ॥ १ ॥ २ ॥ राम रामेत्यादिश्लोकत्रयमेकान्वयम्। रामस्य चिन्ताविष्टत्वात् स्वादरातिशयात्कार्यत्वरया च द्विरुक्तिः। महाबाहो इत्यनेन पूर्वकृतपराक्रमप्रकटनम्। सनातनं वेदवन्नित्यम्। गुह्यं रहस्यं शृणु ॥ ३ ॥ तदेव रहस्यमाह–आदित्यहृदयमित्यादि। आदित्यस्य हृदयम् आदित्यमनःप्रसादकमित्यर्थः। पुण्यं

॥ *आदित्यहृदयप्रारम्भः ॥

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्। रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ॥१॥ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्। उपागम्याब्रवीद्राममगस्त्यो भगवानृषिः ॥२॥ राम राम महाबाहो शृणु गुह्यं सनातनम्। येन सर्वानरीन् वत्स समरे विजयिष्यसि ॥३॥ आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम्। जयावहं जपेन्नित्यमक्षय्यं परमं शिवम् ॥ ४ ॥ सर्वमङ्गलमङ्गल्यं सर्वपापप्रणाशनम्। चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ॥ ५ ॥

पठतां पुण्यवर्धकम्। सर्वशत्रुविनाशेऽपि तुल्यायव्ययन्यायेन कस्यचिन्न जयः स्यात्, न तथा भवतीदमित्याह–जयावहमिति। अक्षय्यम् अक्षय्यफलकम्। परमं शिवम्, परमपावनम् ॥ ४ ॥ तनि०–आदित्यशब्देन तन्मण्डलमुच्यते। "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इत्यत्रादित्यशब्दवत्। तस्य हृदयमन्तः तन्मण्डलमध्यवर्ती पुरुषः। यद्वा आदित्यः सूर्यः तस्य हृदयं हृद्गतम्। "अय पय गतौ" इति धातुः। "य आदित्ये तिष्ठन्। य आदित्यमन्तरो यमयति" इत्यादिश्रुतेः। तत्प्रतिपादकं स्तोत्रमित्यर्थः ॥ ४ ॥ सर्वमङ्गलमङ्गल्यम् सर्वमङ्गलानामपि मङ्गलम्। "मङ्गलानां च मङ्गलम्" इतिवत्। स्वार्थे यत्प्रत्ययः। ततो युद्धपरिश्रान्तमित्यादि श्लोकद्वयमेकं वाक्यम्। रणं युद्धं द्रष्टुं दैवतैसह समागम्यागतोऽगस्त्यः ततस्सर्वास्त्रयुद्धपरिश्रान्तस्य रावणस्य रथे सूतेन रणाद्युद्धादपनीते सति तदनन्तरं भोद्यति च भास्करे युद्धपरिश्रान्तं समरे चिन्तया स्थितं रावणवधोपायचिन्तयोपलक्षितं रामम्। अग्रतस्समनन्तरकाले युद्धाय युद्धं कर्तुं समुपस्थितं रावणं च दृष्ट्वा तदा तस्मिन् काले रावणमद्यैव जेष्यसि मा चिन्तापरो भूः किन्तु स्ववीर्योपबृंहणाय आदित्यहृदयाख्येन स्तोत्रेणैनं सूर्यमुपतिष्ठस्वेति स्तोत्रमुपदेक्ष्यन् अन्तरिक्षाद्भुवमुपागम्य राममब्रवीदित्यर्थः ॥ १ ॥ २ ॥ प्रथमं रुच्युत्पादनाय प्रयोजनदर्शनपूर्वकं तन्माहात्म्यं वर्णयति–राम रामेत्यादिश्लोकत्रयेण। येन स्तोत्रेण सर्वानरीन् विजयिष्यसि विजेष्यसे। गुह्यं रहस्यम् सर्वशत्रुविनाशनत्वादिविशेषणयुक्तम् आदित्यहृदयाख्यं जपं जप्यम् इति

* अस्य स्तोत्रस्य अगस्त्य ऋषिः, अनुष्टुप् छन्दः, आदित्यहृदयभूतो भगवान् ब्रह्मा देवता, निरस्ताशेषविघ्नतया ब्रह्मविद्यासिद्धौ सर्वत्र जयसिद्धौ च विनियोगः, अस्य षडङ्गं प्रणवेन, रश्मिमते नम इत्यनेन वा। गायत्र्या षडङ्गमित्यन्ये ॥

For Private And Personal Use Only

सर्वश्रेयस्साधनमित्यर्थः । सर्वपापप्रणाशनं सर्वपूर्वाघविनाशनम् । चिन्ताशोकप्रशमनम् आधिव्याधिनिवर्तकम् । आयुर्वर्धनम् विहितायुषोऽप्यधिकायुःप्रदम् । उत्तमं जप्येषु श्रेष्ठम् । आदित्यहृदयाख्यं स्तोत्रं जपेत्, आदित्यहृदयस्तोत्रजपे पुण्यादिवृद्धिर्भवति अतोऽवश्यं तत्कामस्तज्जपेदिति भावः ॥ ५ ॥ स्तोतव्यदेवतास्वरूपमाह–रश्मिमन्तमिति । रश्मिमन्तं स्वर्णवर्णतया प्रशस्तकिरणम् । समुद्यन्तम् अर्घोदयादिकं विना सम्यगुदयं प्राप्नुवन्तम् । इदं च ध्येयाभिप्रायेणोक्तम्, न तु तदानीं सूर्योदयकालः, अगस्त्यागमनकालस्यापराह्णत्वात् । अत एव लक्ष्मणवचनम्–" अहं तु वधमिच्छामि शीघ्र

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् । पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम् ॥ ६ ॥
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः । एष देवासुरगणान् लोकान् पाति गभस्तिभिः ॥ ७ ॥

मस्य दुरात्मनः । यावदस्तं न यात्येष कृतकर्मा दिवाकरः॥" इति । विवस्ते आच्छादयति तेजोन्तरमिति विवस्वान् तम्, स्वभासा सर्वतेजसामाच्छादकमित्यर्थः । भास्करम् भाः करोतीति भास्करः । " दिवाविभानिशाप्रभाभास्कारा–" इत्यादिना टः सकारश्च । भुवनेश्वरं वर्षातपाभ्यां समस्तभुवननियन्तारम् । पूजयस्व आदित्यहृदयेन तोषयस्वेत्यर्थः ॥ ६ ॥ तनि०–रश्मिमन्तं रश्मिशब्दो नित्यसुरिपरः तद्वन्तं तन्मध्ये भासमानम् । " रश्मिर रश्मीनां मध्ये तपन्तम् " इति सुवर्णसूक्तोक्तेः । समुद्यन्तं नित्योदितदशावन्तम् । यद्वा " यः पूर्व्याय वेधसे नवीयसे " इत्याद्युक्तरीत्या नवंनवमुदितमिव स्थितम् ॥ ६ ॥ ननु सत्सु देवतान्तरेषु कथमस्यैव पूज्यत्वम् ? तत्राह–सर्वदेवात्मक इति । सर्वदेवात्मकः सर्वदेवानामात्मा । स्वार्थे कः । "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः ॥

जपं स्तोत्रं शृणिवाति सम्बन्धः । अस्य च स्तोत्रस्यादित्यहृदयसंज्ञा सूर्यमण्डलमध्यवर्तिनः परमपुरुषस्य प्रतिपादनात् । यद्वा आदित्यहृदयम् आदित्यः सूर्यः तस्य हृत अयत इति हृदयम् । " अय पय गतौ " इति धातुः । आदित्यहृद्गतोऽन्तर्याम्यादित्यहृदयशब्देनोच्यते " य आदित्ये तिष्ठन् । य आदित्यमन्तरो यमयति । अन्तरादित्ये मनसा चरन्तम् " इत्यादिश्रुतिभ्यः तत्प्रतिपादकं स्तोत्रमित्यर्थः ॥ ३–५ ॥ रश्मिमन्तमिति । रश्मिशब्दः परमान्तरङ्गभक्तवाचकः, तद्वन्तं तन्मध्ये भासमानम् । " रश्मिर रश्मीनां मध्ये तपन्तम् " इति सुवर्णधर्मानुवाकोक्तेः । समुद्यन्तं " यः पूर्व्याय वेधसे नवीयसे " इति श्रुत्युक्तरीत्या नवंनवमुदितमिव स्थितम् । देवासुरनमस्कृतम् " देवानां दानवानां च सामान्यमधिदैवतम् " इत्युक्तरीत्या सर्वोपास्यम् । विवस्वन्तं निरतिशयदीप्तिमन्तम् " अथ यदतः परो दिवो ज्योतिर्दीप्यते । विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु " इति श्रुतेः । भास्करं सूर्यचन्द्राग्निप्रभृतीनामपि प्रभासम्पादकम् " न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति " इति श्रुतेः । भुवनेश्वरं भुवनशब्दः सकलाण्डवाची, तेषामीश्वरम् । एतादृशं भगवन्तं पूजयस्व अनेन स्तोत्रेणोपतिष्ठस्वेत्यर्थः ॥६॥ अस्य स्तोत्रस्य कथमेतादृशमाहात्म्यमित्याशङ्क्य तत्प्रतिपाद्यस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रश्मिभिर्लोकाननुभावयतीति रश्मिभावनः, रश्मिभिः रक्षतीत्यर्थः । एतदेवाह–एष इति । देवासुरगणान् लोकान् देवासुरगणरूपान् जनानित्यर्थः । पाति रक्षति । "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" इति श्रुतेः॥७॥ तनि०–अत्र देवासुरशब्दौ तत्तत्प्रकृतिपरौ । "दैवी सम्पद्विमोक्षाय निब

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः । महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः ॥ ८ ॥
पितरो वसवः साध्या ह्यश्विनौ मरुतो मनुः । वायुर्वह्निः प्रजाप्राण ऋतुकर्ता प्रभाकरः ॥ ९ ॥

न्धायासुरी मता" इति गीतोक्तेः । गभस्तिभिः तेजोलेशैः 'तेजोंऽशसंभवम्' इत्युक्ततेजोलेशैः॥७॥ सर्वदेवात्मकत्वमाह–एष ब्रह्मेत्यादिना । अयमेव ब्रह्मादिसमस्तदेवताशरीरे वर्तत इत्यर्थः । प्रजापतिरिति जात्येकवचनम् । नव प्रजापतय उच्यन्ते । कालशब्देन मृत्युरुच्यते । यमस्तु ततोऽन्यः । मरुतः आवहादि सर्वदेवतामयत्वात्सम्भवतीति तस्य सर्वदेवतामयत्वं प्रतिपादयति–सर्वदेवात्मक इत्यादिना । सर्वदेवात्मकः सर्वदेवशरीरः "यः सर्वेषु देवेषु तिष्ठन्" इत्यादिश्रुतेः । तेजस्वी पराभिभवनसामर्थ्यवान् । रश्मिभावनः रश्मीन् नित्यमुक्तान् भावयति तत्सत्तां निर्वहतीति तथोक्तः, तेषां भगवन्नित्येच्छाधीनसत्ताकत्वात् "नित्यं प्रियास्तव तु केचन ते हि नित्याः" इत्युक्तत्वात् । एष देवासुरगणान् लोकान् पाति गभस्तिभिः इति । "अग्नौ प्रास्ताऽऽहुतिस्सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥" इत्याद्युक्तरीत्या वृष्ट्यन्नदानेन "देवान् भावयतानेन ते देवा भावयन्तु वः" इति पुरोडाशादिदानेन च सर्वान् पातीत्यर्थः । "याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति" इत्यादिश्रुत्युक्तरीत्या गभस्तिभिः पातीत्युक्तम् ॥ ७ ॥ एष ब्रह्मेत्यादि । "य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते" इत्युक्तयोगिजनसाक्षात्कारेण एष इति पुनः पुनर्निर्देशः । ब्रह्मा चतुर्मुखशरीरः । "तवान्तरात्मा मम च ये चान्ये देहिसंज्ञिताः" इति शिवं प्रति चतुर्मुखवचनात् । विष्णुः उपेन्द्रावतारः । शिवः शिवशरीरकः "स ब्रह्मा स शिवः स हरिस्सेन्द्रः" इत्युभयत्रापि श्रुतेः । स्कन्दः "स्कन्दिर् गतिशोषणयोः" इति धातोः, शत्रून् शोषयतीति स्कन्दः, षण्मुखशरीरको वा । प्रजापतिः "प्रजापतिश्चरति गर्भे अन्तः" इत्युक्तप्रजापतिशब्दवाच्यः । महेन्द्रः स्वरूपत ऐश्वर्यतश्च निरवधिकः, "इन्द्रं निचिक्युः परमे व्योमन् । इन्द्रो मायाभिः पुरुरूप ईयते" इति श्रुतेः । धनदः "अन्नादो वसुदानः" इति श्रुतिप्रसिद्धस्सकलफलप्रदः । कालः जगत्संहारकः "कालाय महाग्रासाय वै नमः" "अत्ता चराचरग्रहणात्" इति श्रुतिसूत्राभ्याम् "अनादिर्भगवान् कालः" इति पराशरस्मरणाच्च । यमः यमयति शिक्षयतीति यमः "यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः" इति मनुस्मरणात् । सोमः सूतेऽमृतमिति सोमः "षु प्रसवैश्वर्ययोः" इति धातुः । "सोमः पवते जनिता मतीनां जनिता दिवः" इत्याद्युक्तसकलकारणसोमशब्दवाच्यः । अपांपतिः "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ॥" इत्युक्तेः । "अप एव ससर्जादौ" इत्युक्तेश्चाप्छब्दवाच्यानां स्वामी ॥ ८ ॥ पितरः अग्निष्वात्तादयः । वसवः सदा वसन्तीति वसवः । ते चाष्टौ–"ध्रुवो धरस्तथा सोम आपो वैश्वानरोऽनिलः । प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ॥" यद्वा "अग्निश्च पृथिवी

॥३१०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वायवः । वायुर्भूलोकसञ्चारी । प्राणः शरीरान्तस्स्थो वायुः । ऋतुकर्तेति प्रभाकरविशेषणम् । ऋतूनां वसन्तादीनां कर्ता, एष प्रभाकरः ब्रह्मा चेत्यादिरीत्या ऽन्वयः ॥ ८ ॥ ९ ॥ तनि०—स्कन्दः संसारदुःखं स्कन्नं करोतीति स्कन्दः । महेन्द्रो वरुण इति पाठे—वरुणो वरुणपदाभिधेयः । "वरुणो वारुणो वृक्षः" इति सहस्रनामोक्तेः । मनुः सर्वज्ञः । "मनु अवबोधने" इति धातुः ॥ ८ ॥ ९ ॥ एवमादित्यस्वरूपमुपदिश्य तद्विषयमादित्यहृदयस्तोत्रमुपादिशति—आदित्यः सवितेत्यादिना

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् । सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः ॥ १० ॥

लोकसाक्षिण इत्यन्तेन । तत्र आदित्यादिप्रथमान्तपदेषु त्वंपदमध्याहार्यम् । अदितेरपत्यत्वेनावतीर्ण आदित्यः । "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" इति ण्यप्रत्ययः । अदितेः अखण्डिताया भूमेरयं पतिरित्यादित्यः । सूते जगदिति सविता । सुवति प्रेरयति जनान् कर्मणीति सूर्यः । "षू प्रेरणे"

च वायुश्चान्तरिक्षं च आदित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि चैते वै वसवः" इति श्रुतेः । साध्याः सिद्धिरेषामस्तीति साध्याः । अर्वाआश्वन् । ते च द्वादश । तदुक्तं वायुपुराणे—"ब्रह्मणो वै मुखात्सृष्टा ये तु देवाः प्रजेप्सया । साध्या मन्त्रशरीरास्ते स्थिता मन्वन्तरेष्वपि । धर्मपुत्रा महाभागा विज्ञेया द्वादशामराः । मनुर्मन्त्रः प्राणदक्ष चेतयानश्च वीर्यवान् । विवित्तिर्जयो नयश्चैव हंसो नारायणस्तथा । प्रभवोऽथ विदुश्चैव साध्या द्वादश जज्ञिरे ॥" इति । अश्विनौ बडवारूपिण्या आदित्यमहिष्या संज्ञया अश्वरूपयुक्तस्यादित्यस्य तस्यां जातावश्विनौ । मरुतः 'म्रियन्ते न कदाचित्' इति मरुतः । ते च वायुपुराणोक्ताः शक्रज्योतिःप्रभृतय एकोनपञ्चाशत । मनुः मननान्मनुः "नान्योऽतोऽस्ति मन्ता" इति श्रुतेः । वाति सुरभीकरोतीति वायुः "वा गतिगन्धनयोः" इति धातुः । "सर्वकर्मा सर्वकामस्सर्वगन्धस्सर्वरसः" इति श्रुतेः । वह्निः वहति हव्यमिति वह्निः "वह प्रापणे" "इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः" इति श्रुतेः । प्रजाप्राणः प्रजानां प्राणनहेतुः "को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात्" इति श्रुतेः । ऋतुः अर्यत इति ऋतुः । "ऋ गतौ" "ऋतुः सुदर्शनः कालः" इति सहस्रनामपाठात् । कर्ता 'तेन विना तृणाग्रमपि न चलति' इति कृत्वा सर्वभूतान्तःप्रवेशेन सकलकर्मकर्ता । 'अन्तः प्रविष्टं कर्तारमेतम्' । "अथ रथान् रथयोगान् पथस्सृजते स हि कर्ता सर्वकर्मा" इत्यादिश्रुतिभ्यः । प्रभाकरः प्रभां करोति सृजतीति प्रभाकरः, प्रकृष्टज्ञानसाधनम् । "तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् । ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥" इत्यादिवचनात् ॥ ९ ॥ अधुना स्तोत्रस्वरूपं दर्शयति—आदित्यस्सवितेत्यादिना । अत्र प्रथमान्तेषु शब्देषु त्वंशब्दमध्याहृत्य त्वमादित्यस्त्वं सवितेत्येवं योजनीयम् । आदित्यः "यस्मात्सर्वमादत्ते तस्मादादित्यः" इत्याद्यौपनिषदव्युत्पत्त्या अशेषविषयभोक्ता आदित्य इत्यर्थः । सविता सर्वस्य जगतः प्रसविता । सूते जगदिति वा सविता । सुवति प्रेरयति जगदिति वा सविता । सूर्यः सुवति प्रेरयति कर्मणीति सूर्यः । सुष्ठु ईरयति प्रेरयतीति वा सूर्यः परमात्मा । प्रेरणसौष्ठवं च निरुपाधिकत्वम्, तच्च भगवत एव "अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा" "यस्सर्वाणि भूतान्यन्तरो यमयति" इत्यादिश्रुतेः । खगः खं परमाकाशं गच्छति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति धातोः "राजसूयसूर्य–" इति निपातनात् क्यप्प्रत्ययो रुडागमश्च । खे गच्छतीति खगः, लोकोपकारार्थमाकाशे सञ्चरन्नित्यर्थः । वर्षेण पुष्णाति जगदिति पूषा । "श्वन्नुक्षन्–" इत्यादौ निपातितः । गभस्तयः किरणाः अस्य सन्तीति गभस्तिमान् । सुवर्णसदृशः सुवर्णवर्णः । "हिरण्यश्मश्रु हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः" इति श्रुतेः । भातीति भानुः । "दाभाभ्यां नुः" इति नुप्रत्ययः । हिरण्यं रेतो यस्य स हिरण्यरेताः, हिरण्मय

हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान् । तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्ड अंशुमान् ॥ ११ ॥

ब्रह्माण्डकर्तेत्यर्थः । अक्षराधिक्यमार्षत्वात् । दिवा करोतीति दिवाकरः, दिवा अह्नि प्राणिनः चेष्टां करोतीति वा दिवाकरः ॥ १० ॥ तनि०–सूर्यः स्थावरजङ्गमात्मकजगदन्तर्यामी सूर्यशब्दवाच्यः । "सूर्य आत्मा जगतस्तस्थुषश्च" इति श्रुतेः ॥ १० ॥ हरितः श्यामा अश्वा अस्य सन्तीति हरिदश्वः । सहस्रार्चिः सहस्रकिरणः । सप्तनामा सप्तिरश्वो यस्यासौ सप्तसप्तिः । "एको अश्वो वहति सप्तनामा" इति श्रुतेः । मरीचयोऽस्य सन्तीति मरीचिमान्, प्रकाशवानित्यर्थः । तिमिराण्युन्मथ्नातीति तिमिरोन्मथनः । शं सुखं भवत्यस्मादिति शम्भुः । डुप्रकरणे "मितद्र्वादिभ्य उपसङ्ख्यानम्" इति डुः ।

अध्यास्त इति खगः । "यो अस्याध्यक्षः परमे व्योमन्" इति श्रुतेः । पूषा पुष्णातीति पूषा, स्थितिकर्तेत्यर्थः । "पुष पुष्टौ" इति धातुः । गभस्तिमान् गां दिशं व्याप्य भासित प्रकाशयतीति गभस्तिः "भास दीप्तौ" इति धातुः । पृषोदरादित्वात्साधुः । तथा च गभस्तिः सर्वव्यापिनी लक्ष्मीः तद्वान्, लक्ष्मीनित्ययुक्त इत्यर्थः । नित्ययोगे मतुप् । "भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥" इत्यनुशासनात् । लक्ष्म्याः सर्वव्यापित्वम्–"यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम" इति पराशरस्मरणात्सिद्धम् । सुपर्णः शोभनौ पर्णौ पक्षौ यस्य सः सुपर्णः परमात्मा । "द्वा सुपर्णा सयुजा सखाया समानम्" इति श्रुतेः । तपनः तपतीति तपनः "तप सन्तापे" "सुखप्सुतः परंतपः" इति स्मरणात् । सुवर्णसदृश इति पाठे–सुवर्णवर्ण इत्यर्थः । "हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्णः" इति श्रुतेः । भानुः भातीति भानुः । "तमेव भान्तमनुभाति सर्वम्" इति श्रुतेः । हिरण्यरेताः हिरण्यं हिरण्मयं रेतः अण्डोत्पादकद्रव्यं यस्य सः । "अप एव ससर्जादौ तासु वीर्यमपासृजत । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥" इति मनुस्मरणात् । दिवाकरः अज्ञाननिवर्तनद्वारा दिवा द्युतिं ज्ञानं करोति व्युत्पादयतीति दिवाकरः ॥ १० ॥ हरिदश्वः हरति मन इति हरित मनोहरः अश्वो वाहनं गरुडो यस्य सः । पृषदश्व इतिवत् । सहस्रार्चिः, अर्च्यत इति अर्चिः अर्चिश्शब्देन पूज्या मङ्गलगुणा उच्यन्ते, अनन्तकल्याणगुण इत्यर्थः । सप्तसप्तिः सप्ताख्यः सप्तिः अश्वो यस्य सः । "एको अश्वो वहति सप्तनामा" इति श्रुतेः । अनेन कल्क्यवतारस्सूचितः । मरीचिमान् म्रियन्ते शत्रवोऽनेनेति मरीचिः चक्रं तद्वान् । उपलक्षणमेतदितरायुधानाम् । शङ्खचक्रगदाधर इत्यर्थः । तिमिरोन्मथनः ज्ञानोत्पत्तिप्रतिबन्धकदोषनिवर्तकः । "हृद्यन्तस्थो ह्यभद्राणि विधुनोति सुहृत्सताम्" इति स्मरणात् । शम्भुः शं सुखं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सर्वाणि रूपाणि त्वक्षति तनूकरोतीति त्वष्टा, सर्वसंहारक इत्यर्थः । मृतेऽण्डे जातो मार्तण्डः, सर्वसंहारे तत्सृष्टये पुनः प्रादुर्भूत इत्यर्थः । अंशवोऽस्य सन्तीत्यंशुमान्, प्रकाशमान इत्यर्थः ॥ ११ ॥ हिरण्यं हिरण्मयाण्डम् । "तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्" इति स्मृतेः । तस्य गर्भो हिरण्यगर्भः । ब्रह्माण्डोदरवर्तीत्यर्थः । यद्वा हिरण्यं हितरमणीयं गर्भमन्तःकरणं यस्यासौ हिरण्यगर्भः । तापत्रयतप्तानां विश्रमस्थानत्वाच्छिशिरः । तपतीति

हिरण्यगर्भः शिशिरस्तपनो भास्करो रविः । अग्निगर्भोऽदितेःपुत्रः शङ्खः शिशिरनाशनः ॥ १२ ॥
व्योमनाथस्तमोभेदी ऋग्यजुस्सामपारगः । घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ॥ १३ ॥

तपनः । भासः करोतीति भास्करः । रूयते स्तूयते सर्वैरिति रविः । "अच इः" इतीप्रत्ययः । दिवा अग्निर्गर्भे यस्यासावग्निगर्भः । "उद्यन्तं वावादित्यमग्निरनुसमारोहति" इति श्रुतेः । आदितेःपुत्रः अदितेः पुत्रत्वेनावतीर्णः । शाम्यति स्वयमेव सायंकाल इति शङ्खः । "शमेः खः" । शिशिरं हिमं नाशयतीति शिशिरनाशनः ॥ १२ ॥ व्योम्नो नाथो व्योमनाथः । तमः राहुं भेत्तुं शीलमस्यास्तीति तमोभेदी । ऋग्यजुस्साम्नां पारं गच्छतीति

भवत्यस्मादिति शम्भुः "विश्वाक्षं विश्वशंभुवम्" इति श्रुतेः । त्वष्टा त्वक्ष्णोति त्रिस्सप्तकृत्वः सक्षत्रियां भुवमिति त्वष्टा "तक्षू त्वक्षू तनूकरणे" इति धातुः अनेन परशुरामावतार उक्तः । मार्तण्डः मृतम् अचेतनं ब्रह्माण्डं जीवयतीति मार्तण्डः "जीवाजीवमजीवयत" इति श्रीभागवतोक्तेः । अंशुमान् अन्तर्बहिर्व्याप्तिमान "अशू व्याप्तौ" इति धातुः । "अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः" इति श्रुतेः ॥ ११ ॥ हिरण्यगर्भः हिरण्यं सकलजगदुत्पादकसमष्टिजीवजातं तत् गर्भे यस्य सः । "हिरण्यगर्भस्समवर्तताग्रे" 'हिरण्यगर्भो भूगर्भः' इति श्रवणात् । शिशिरः तापत्रयतप्तानां विश्रमस्थानत्वात् शिशिरः । तपनः स्वाश्रितविरोधिनां तापकारीत्यर्थः । "तप सन्तापे" इति धातुः । भास्करः सर्ववस्तुसाक्षात्कारहेतुभूतः लोककर्ता । रविः रूयते स्तूयते सर्वैरिति रविः । रौत्युपदिशति वेदानिति वा रविः । "यो वै वेदांश्च प्रहिणोति तस्मै" इति श्रुतेः । अग्निगर्भः अग्निः कालाग्निरुद्रो गर्भे यस्य सः अग्निगर्भः । "नारायणाद्रुद्रोऽजायत" इति श्रुतेः । अदितेःपुत्रः अदितेः पुमपत्यं पुरन्दरं त्रायत इति अदितेःपुत्रः । शङ्खः शं सुखं खे आकाशे हृदयाकाशे यस्य सः शङ्खः निरवधिकानन्दवानित्यर्थः । शिशिरनाशनः सूर्यरूपेण शिशिरं हिमं नाशयतीति तथा ॥ १२ ॥ व्योमनाथः व्योम्नो नाथः कर्ता । तामसाहङ्काररूपेण आकाशस्रष्टेत्यर्थः । "आत्मन आकाशः सम्भूतः" इति श्रुतेः । तमोभेदी तमः भक्तानां तमोगुणं भिनत्तीति तमोभेदी । ऋग्यजुस्सामपारगः सकलवेदपर्यवसानभूमिः "वेदैश्च सर्वैरहमेव वेद्यः" "ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः । ते वदन्ति महात्मानं कृष्णं धर्मं सनातनम् ॥" इत्यादिवचनात् । घनवृष्टिः घना अधिका वृष्टिः सकलकर्मफलरूपा यस्मात्सः घनवृष्टिः । "अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ।" "फलमत उपपत्तेः" इत्यादिप्रमाणात् । अपां मित्रः महार्णवशायी "यमन्तस्समुद्रे

ऋग्यजुस्सामपारगः । " ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते । वेदैरशून्यास्त्रिभिरेति सूर्यः ॥ " इति श्रुतेः । घना वृष्टिर्यस्मादसौ घनवृष्टिः । "अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः॥ " इति स्मृतेः । अत एवापां मित्रः । पुँल्लिङ्गत्वमार्षम् । दक्षिणायने विन्ध्यो वीथी सञ्चारभूमिर्यस्यासौ विन्ध्यवीथिः । प्लुवं यथा तथा गच्छतीति प्लवङ्गमः । विन्ध्यवीथीप्लवङ्गम इत्येकपदत्वेन पाठे विन्ध्यवीथी गगनमार्गः ॥१३॥ आतपोऽस्यास्तीत्यातपी । मण्डलं वृत्ताकारो बिम्बोऽस्यास्तीति मण्डली । मृत्युः विरोधि

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः । कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः ॥ १४ ॥
नक्षत्रग्रहताराणामधिपो विश्वभावनः । तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते ॥ १५ ॥

निवर्तकः । उदयसमये पिङ्गलवर्णत्वात् पिङ्गलः । सर्वानपि मध्याह्ने तापयतीति सर्वतापनः । कविः पण्डितः, व्याकरणादिसर्वशास्त्रप्रवर्तक इत्यर्थः । विश्वः विश्वनिर्वाहकः । महान्ति तेजांसि यस्य स महातेजाः । रक्तः सर्वेष्वनुरक्तः । सर्वेषां भवः संसारः उद्भवत्यस्मादिति सर्वभवोद्भवः ॥१४॥ नक्षत्राणां ग्रहाणां ताराणां चाधिपः । विश्वं भावयति स्थापयतीति विश्वभावनः । तेजसामग्न्यादीनां तेजसामपि तेजस्वी, प्रशस्ततेजाः । द्वादश आत्मानो मूर्तयो यस्य स द्वादशात्मा । ते च दर्शिताः स्मृतौ–" इन्द्रो धाता भगः पूषा मित्रोऽथ वरुणोऽर्यमा । अर्चिर्विवस्वान् त्वष्टा च सविता विष्णुरेव च ॥ " इति।

कवयो वयन्ति " इत्यादिश्रुतेः । विन्ध्यवीथीप्लवङ्गमः विन्ध्यवदुर्गमायां वीथ्यां सुषुम्णामार्गेण प्लवं शीघ्रं गमयतीति विन्ध्यवीथीप्लवङ्गमः, मुक्तप्रापक इत्यर्थः । " स एतान् ब्रह्म गमयति । हार्दानुगृहीतश्शताधिकया " इत्यादिश्रवणात् ॥ १३ ॥ आतपी आ समन्तात्तपो जगन्निर्माणसङ्कल्पोऽस्यास्तीति आतपी " तप आलोचने " इति धातुः । " यस्य ज्ञानमयं तपः " इत्यादिश्रुतेः । मण्डली मण्ड्यतेऽनेनेति मण्डलं कौस्तुभादि तदस्यास्तीति मण्डली । " मडि भूषायाम् " इति धातुः । मृत्युः अत्र मृत्युशब्दः प्रकृतिवाची, मृत्युशरीरक इत्यर्थः । " यस्य मृत्युः शरीरम् " इति श्रुतेः । पिङ्गलः पिङ्गति मिलतीति पिङ्गलः । " पिङ्ग मेलने " इति धातुः । मेलनं सुशीलस्यैव सम्भवति, अतः पिङ्गलः । सौशील्यं नाम महात्मनो मन्दैः सह नीरन्ध्रेण संश्लेषः । सर्वतापनः युगपत्सकलाण्डसंहारकः । कविः विदिताखिलवेद्यः " यः सर्वज्ञः सर्ववित् " इति श्रुतेः । विश्वः विश्वशरीरकः " विश्वमेवेदं पुरुषः " इति श्रुतेः । महातेजाः महत् निरवधिकं तेजः पराभिभवनसामर्थ्यं यस्य सः । रक्तः सर्वरञ्जकः । सर्वभवोद्भवः भवन्तीति भवः कार्यवर्गः, सर्वोत्पत्तिहेतुरित्यर्थः । यद्वा सर्वेषां भवः संसारो यस्मादुद्भवति स तथा ॥ १४ ॥ नक्षत्रग्रहताराणामधिपः नक्षत्रग्रहताराणामन्तर्यामीत्यर्थः । " यश्चन्द्रतारकमन्तरो यमयति " इत्यादिश्रुतेः । विश्वभावनः विश्वस्थितिहेतुः " द्यौः सचन्द्रार्कनक्षत्रं खं दिशो भूर्महोदधिः । वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥ " इति श्रवणात् । तेजसामपि तेजस्वी प्रशस्ततेजस्क इत्यर्थः । " येन सूर्य ॥११२॥

एवंभूतस्त्वमसि अतस्तुभ्यं नम इति योजना ॥ १५ ॥ नमः पूर्वायेत्यादिश्लोकषट्कमेकान्वयम् । पूर्वाय गिरये पूर्वभागस्थगिर्युपलक्षिताय । पश्चिमे गिरये पश्चिमभागस्थपर्वतोपलक्षिताय । जयाय उपासकानां जयकराय । जयतीति जयः जयी तस्मा इति वा । जयभद्राय जयभद्रयोः प्रदात्रे । हर्यश्वाय श्यामाश्वाय । अत्र स्तुतित्वान्न पुनरुक्तिश्चिन्त्या । आदरातिशयेन नमःशब्दस्य द्विरुक्तिः ॥ १६ ॥ १७ ॥ उग्राय अनुपासकानामुग्राय । विविध

नमः पूर्वाय गिरये पश्चिमे गिरये नमः । ज्योतिर्गणानां पतये दिनाधिपतये नमः ॥ १६ ॥
जयाय जयभद्राय हर्यश्वाय नमो नमः । नमो नमः सहस्रांशो आदित्याय नमो नमः ॥ १७ ॥
नम उग्राय वीराय सारङ्गाय नमो नमः । नमः पद्मप्रबोधाय मार्ताण्डाय नमो नमः ॥ १८ ॥
ब्रह्मेशानाच्युतेशाय सूर्यायादित्यवर्चसे । भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ॥ १९ ॥

मीरयति प्रेरयति प्राणिनश्चेष्टयतीति वीरः तस्मै । सारं शीघ्रं गच्छतीति सारङ्गः तस्मै । एकेन निमिषार्धेन द्विसहस्रयोजनं गच्छतीति पुराणप्रसिद्धिः ॥ १८ ॥ ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तॄणामीशाय । परब्रह्मरूपत्वेन स्तूयते “ असावादित्यो ब्रह्म ” इति श्रुतिः । अथवा ब्रह्मेशानयोः ब्रह्मरुद्रयोः अच्युतेशः अच्युतनियन्ता, सर्वापत्स्वपि पालक इत्यर्थः । वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्टफलप्रदातेत्यर्थः । ब्रह्मेशायाच्युतेशायेत्यपि पाठः, तस्मै । आदित्यरूपं वर्चो दीप्तिर्यस्य तस्मै आदित्यवर्चसे । भा अस्यास्तीति भास्वान् तस्मै । सर्वभक्षाय सर्वसंहर्त्रे । अत एव तस्मिन्समये रौद्राय वपुषे ॥ १९ ॥

तपति तेजसेद्धः ” इति श्रुतेः । “ सूर्यस्यापि भवेत्सूर्यः ” इत्युक्तत्वाच्च । द्वादशात्मन् द्वादशमण्डलान्तर्वर्तिन् ! ते तुभ्यं नमोऽस्तु ॥१५॥ पूर्वाय गिरये श्रीविष्णुपुराणोक्ततत्तद्गिर्यन्तर्यामिण इत्यर्थः । ज्योतिर्गणानां पतये ज्योतिर्गणानां नक्षत्राणां पतये स्वामिने । सूर्यपर्यायनामानि सर्वाण्यपि तदन्तर्यामिपर्यवसितानीति हृदि निधायाह दिनाधिपतय इति ॥ १६ ॥ जयाय जयतीति जयः अप्रतिहतपराक्रमः तस्मै । जयत्यनेन सङ्कटान्संसारमिति वा जयः । जयभद्राय उपासकानां रोगपापादिजयं भद्रं कल्याणं च प्रयच्छतीति जयभद्रः । हर्यश्वाय हरिः हनुमान् अश्वः वाहनं यस्य सः । अनेन रामायणरहस्यसूचितः । आदरातिशयेन नमःपदस्य द्विरुक्तिः । सहस्रांशो सहस्राण्यंशवो जीवा यस्य सः सहस्रांशुः “ ममैवांशो जीवलोके जीवभूतः ” इति स्मरणात् ॥ १७ ॥ उग्राय अनुपासकानामुग्ररूपाय । वीराय विविधम् ईरयति प्रेरयति प्राणिनश्चेष्टयतीति वीरः तस्मै । सारङ्गाय सारं शीघ्रं गच्छतीति सारङ्गः । यद्वा सारग्राहिणे । यद्वा हंसावताराय । यद्वा सारं प्रणवः तेन प्रतिपाद्यत इति सारङ्गः ॥ १८ ॥ ब्रह्मेशानाच्युतेशाय ब्रह्मेशानाच्युतानां सृष्टिसंहारस्थितिकर्तॄणामीशः स्वामी परब्रह्मणस्तादृशत्वात् “ सृष्टि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तमः अन्धकारं हन्तीति तमोघ्नः। आश्रितशत्रून् हन्तीति शत्रुघ्नः। अमितः अपरिच्छिन्नः आत्मा स्वरूपं यस्यासौ अमितात्मा। कृतघ्नं हन्तीति कृतघ्नघ्नः। देवाय दीप्यमानाय॥२०॥ तप्तचामीकराभाय हिरण्यवपुषे। वह्नये अग्निरूपेण हव्यवाहनाय। विश्वं जगत् कर्म कर्तव्यं यस्य तस्मै विश्वकर्मणे। सर्वजगत्कर्त्रे इत्यर्थः। लोकसाक्षिणे लोकानां जनानाम् अन्तर्यामितया सुकृतदुष्कृतकर्मसाक्षिणे ॥ २१ ॥ एवमादित्यहृदयमुपदिश्य पुनरपि तत्प्रतिपाद्यदेवतां

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने। कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ॥ २० ॥
तप्तचामीकराभाय वह्नये विश्वकर्मणे। नमस्तमोभिनिघ्नाय रुचये लोकसाक्षिणे ॥ २१ ॥
नाशयत्येष वै भूतं तदेव सृजति प्रभुः। पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ॥ २२ ॥
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः। एष एवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ॥ २३ ॥

स्तौति–नाशयतीत्यादिना श्लोकत्रयेण। भवतीति भूतं जगत् नाशयति, महाप्रलये पुनस्तदेव सृजति। अत्ययकालनिवृत्तौ प्रभुः पालकः। पालकत्व मेव प्रपञ्चयति–पायतीति। पायति शोषयति। " पै शोषणे " इति धातुः ॥ २२ ॥ एष इति। सुप्तेषु भूतेषु प्राणिषु परिनिष्ठितः अन्तर्यामित्वेन

स्थित्यन्तकरिणीं ब्रह्मविष्णुशिवात्मिकाम्। संज्ञां स याति भगवानेक एव जनार्दनः॥ " इति स्मरणात्। सर्वभक्षाय सर्वयज्ञभोक्त्रे सर्वसंहर्त्रे वा। "यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः " इति श्रुतेः। शत्रुसंहारार्थं रौद्राय वपुषे। अनेन नृसिंहावतारस्सूचितः ॥ १९ ॥ शत्रुघ्नाय शत्रुसंहर्त्रे, निगृहीतहृषीकायेत्यर्थः। अमितात्मने अपरिमितमहिम्ने। कृतघ्नान् हन्तीति कृतघ्नघ्नः तस्मै। देवाय स्वयंप्रकाशाय ॥ २० ॥ तप्तचामीकराभाय हिरण्मयपुरुषाय। वह्नये "वसूनां पावकः" इति स्मरणात्। हरये इति पाठे हरत्यशेषमज्ञानं तत्कार्यमिति हरिः। विश्वकर्मणे विश्वं कर्म कार्यं यस्य सः " सर्वकर्मा सर्वकामः " इति श्रुतेः। तमोभिनिघ्नाय अज्ञाननाशकाय। रुचये रोचत इति रुचिः तस्मै। घृणये लोकसाक्षिणे इति पाठे " घृ क्षरणदीप्त्योः " इति धातोः स्वयंप्रकाशैकतानत्वात् घृणिः। लोकसाक्षिणे सर्वसाक्षिणे। 'सर्वदेवात्मको ह्येषः' इत्यारभ्य घृणये लोकसाक्षिणे इत्येतदन्ता अष्टोत्तरशतसङ्ख्या आदित्यहृदयस्तोत्रनाममन्त्रा वेदितव्याः [पञ्चविंशत्युत्तरशतसंख्या भगवत्पूजारहस्यनाममन्त्रा इति कतकः] ॥ २१ ॥ पुनरपि श्लोकत्रयेण तमेव स्तौति। जगज्जन्मादिकर्तृत्वमाह–नाशयत्येष इति ॥ २२ ॥ स्वप्रद्रष्टृत्वमाह–एष सुप्तेष्विति। भूतेषु परिनिष्ठितः भूतेष्वन्तर्यामितया स्थितः। सुप्तेषु जागर्ति भूतानां सुषुप्तिदशायां स्वयंप्रकाश इत्यर्थः। इदानीं सकलयज्ञभोक्तृत्वफलप्रदत्वान्याह–एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणामिति ॥ २३ ॥

For Private And Personal Use Only

स्थितः जागर्ति। सकलयज्ञकर्तृत्वफलप्रदत्वान्याह–एष इति ॥ २३ ॥ वेदवेद्यत्वमाह–वेदा इति। सर्वकर्मसमाराध्यत्वमाह क्रतव इति। क्रतुफलप्रदत्व माह क्रतूनामिति। लौकिककर्मफलप्रदत्वमाह यानीति। तेषामिति शेषः। सर्वः सर्वात्मको रविरेव प्रभुः नियन्ता ॥ २४ ॥ इदानीं स्तोत्रस्य फल माह–एनमिति। कृच्छ्रेषु कष्टेषु। कान्तारेषु दुर्गममार्गेषु। भयेषु भयहेतुषु सत्सु। कश्चिदित्यधिकारिनियमाभावो दर्शितः ॥ २५–२७ ॥ एतच्छ्रुत्वे

वेदाश्च क्रतवश्चैव क्रतूनां फलमेव च। यानि कृत्यानि लोकेषु सर्व एष रविः प्रभुः ॥ २४ ॥ एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च। कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ॥ २५ ॥ पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्। एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यसि ॥ २६ ॥ अस्मिन् क्षणे महाबाहो रावणं त्वं वधिष्यसि। एवमुक्त्वा तदाऽगस्त्यो जगाम च यथागतम् ॥ २७ ॥ एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा। धारयामास सुप्रीतो राघवः प्रयतात्मवान् ॥२८॥ आदित्यं प्रेक्ष्य जप्त्वा तु परं हर्षमवाप्तवान्। त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ॥ २९ ॥ रावणं प्रेक्ष्य हृष्टात्मा युद्धाय समुपागमत्। सर्वयत्नेन महता वधे तस्य धृतोऽभवत् ॥ ३० ॥ अथ रविरवदन्निरीक्ष्य रामं मुदितमनाः परमं प्रहृष्यमाणः। निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वच स्त्वरेति ॥३१॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

त्यादिश्लोकद्वयमेकान्वयम्। त्रिराचम्येत्यन्त्याचमनमाद्याचमनस्याप्युपलक्षणम्। धारयामास, जप्त्वेत्यत्र आदित्यहृदयमिति शेषः ॥ २८ ॥ २९ ॥ रावणमिति। युद्धाय युद्धं कर्तुम्। "तुमर्थाच्च भाववचनात्" इति चतुर्थी। सर्वयत्नेन सर्वप्रकारेण यत्नेन ॥ ३० ॥ अथेति। प्रहृष्यमाणः प्रहृष्यन्, पुलकित इति यावत्। निशिचरपतीरिति। "तत्पुरुषे कृति बहुलम्" इति सप्तम्या अलुक्। रविः आत्मानं स्तुवन्तं रामं निरीक्ष्य मुदितमनाः स्तोत्रेण सन्तुष्टमनाः प्रहृष्यमाणस्सन् निशिचरपतेः संक्षयं विदित्वा अनुगृह्य सुरगणमध्यगतस्सन्, त्वर रावणवधं प्रति त्वरस्वेति वचोऽवदत्।

वेदवेद्यत्वमाह–वेदा इति। कर्माराध्यत्वमाह क्रतव इति। सर्वकर्माधिष्ठातृत्वमाह यानि कृत्यानीति ॥ २४ ॥ सर्वापन्निवारकत्वमाह–एनमापत्स्विति ॥ २५ ॥ पूजयस्वेति। एनम्, आदित्यहृदयमिति शेषः ॥ २६–२९ ॥ सर्वयत्नेनेति। धृतोऽभवत्, दृढनिश्चयं कृतवान् ॥३०॥ अथ रविरिति। र[illegible] निरीक्ष्य मुदित

अत्र सुरगणमध्यगत इत्यनेन युद्धदर्शनार्थं स्वमण्डलादवतीर्य रामसमीपे गगने स्थित्वा स्तोत्रफलमनुगृहीतवानित्युच्यते । ननूत्तरत्र ब्रह्मरुद्रादयः सर्वे एकवाक्यतया "भवान्नारायणो देवः" इत्यादिना विष्णोरेव सर्वस्मात् परत्वं महता ग्रन्थेन प्रतिपादितवन्तः, अत्र सूर्यस्यैव सर्वोत्तरत्वमुच्यते, कथमिदं सङ्गच्छते ? उच्यते—यथा मधुविद्यायामादित्यस्य परतया प्रतिपादनेऽपि तदन्तर्यामिण्येव परमात्मनि मधुविद्यायास्तात्पर्यमिति बादरायणो ब्रह्ममीमांसायामुक्तवान्, तथाऽस्य मन्त्रस्यादित्यान्तर्यामिविषयतया सर्वमिदं सङ्गच्छते । नारायणपरत्वं ह्युपक्रमप्रभृत्योपसंहारमविवादमिति पूर्वमेव बहुलं

स रथं सारथिर्हृष्टः परसैन्यप्रधर्षणम् । गन्धर्वनगराकारं समुच्छ्रितपताकिनम् ॥ १ ॥
युक्तं परमसम्पन्नैर्वाजिभिर्हेममालिभिः । युद्धोपकरणैः पूर्णं पताकाध्वजमालिनम् ॥ २ ॥

प्रतिपादितम् । ब्रह्मेशानाच्युतेशायेत्येतदपि मूर्तित्रयस्य परमात्मजन्यत्वादुपपद्यते । अयं च सर्गः केषुचित् कोशेषु न दृश्यते । उडारिणा न व्याख्यातश्च । आरम्भात्प्रभृति प्रबन्धप्रतिपादितनारायणपरत्वविरुद्धं चात्र प्रतिभाति सूर्यपरत्वम् । अस्मिंश्च काण्डे त्रिंशदुत्तरशतसर्गा उडारिणा गणिताः, एतदन्तर्भावे एकत्रिंशदुत्तरशतसर्गास्तेन गणिता भवेयुः ॥३१॥ इति श्रीगोविन्द० श्रीरामायणभू० रत्न० युद्धकाण्ड० सप्तोत्तरशततमः सर्गः ॥१०७॥
अथ रावणदुर्निमित्तानि—स रथमित्यादिसार्धश्लोकत्रयमेकान्वयम् । अत्र द्वितीयसारथिशब्दः अनेकविशेषणव्यवधानात् पूर्वोक्ताविस्मरणाय । गन्धर्वनगराकारं गन्धर्वनगरसदृशम् । तल्लक्षणमुक्तं मिहिरेण—"चित्रवर्णं चित्ररूपप्राकारगृहगोपुरम् । अलंकृतमनेकाभैर्वितानध्वजतोरणैः । गन्धर्वनगरं दन्तिनृवाजिक्षययुद्धकृत । दृश्यते चेन्महद्युद्धमन्योन्यं धरणीभुजाम् ॥" इति ॥१॥ युद्धोपकरणैः धनुःकवचादिभिः । पताकायुक्ताः ध्वजाः तैर्मालन्त इति

मनाः परमं प्रहृष्यमाणः प्रहृष्यन्, पुलकित इत्यर्थः । निशिचरपतिसंक्षयं रावणविनाशं विदित्वा निश्चित्य सुरगणमध्यगतस्सन् त्वरेति वचः अवददिति सम्बन्धः । अत्र सुरगणमध्यगत इत्यनेन युद्धदर्शनार्थं स्वमण्डलादवतीर्य रामसमीपे गगने स्थित्वा त्वरेत्यवादीदित्यवगम्यते ॥३१॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तोत्तरशततमः सर्गः ॥१०७॥ स रथमित्यादि सार्धश्लोकत्रयमेकं वाक्यम् । गन्धर्वनगराकारम्, अत्याश्चर्यकरमित्यर्थः । परमसम्पन्नैः परमजवसम्पन्नैः । समुच्छ्रितपताकिनमित्यनेन पताकानामौन्नत्यं कथितम् । पताकाध्वजमालिनमित्यनेन बाहुल्यं कथितम्, अतो न पुनरुक्तिः ।

स०—परमेति भावप्रधानं परमत्वेन सम्पन्नैः उत्तमैः ॥ तिल०—परमसम्पन्नैः परमैः रथवहनोचिताश्वगुणैर्जवादिभिः सम्पन्नैः ॥ २ ॥

For Private And Personal Use Only

पताकाध्वजमाली तम् । " मल मल्ल धारणे " इत्यस्माण्णिनिः ॥ २ ॥ ग्रसन्तमिव । स्वविस्तारेणेति भावः । प्रणाशयतीति प्रणाशम् ॥ ३ ॥
रामानु०—पताकाध्वजमालिनं पताकायुक्तश्चासौ ध्वजश्च पताकाध्वजः, पताकाध्वजश्च मालाश्च पताकाध्वजमालं तदस्यास्तीति पताकाध्वजमाली तम् । रावणस्य रथं क्षिप्रं चोदयामास सारथिः इत्यत्र द्वितीयो रथसारथिशब्दोऽनेकविशेषणव्यवधानात्पूर्वोक्तविस्मरणार्थो ॥ २ ॥ ३ ॥ तमिति । स्वनवन्तं शब्दवन्तम् । महास्वनं प्रतिध्वनियुक्तमित्यर्थः ॥ ४ ॥

ग्रसन्तमिव चाकाशं नादयन्तं वसुन्धराम् । प्रणाशं परसैन्यानां स्वसैन्यानां प्रहर्षणम् । रावणस्य रथं क्षिप्रं चोदयामास सारथिः ॥ ३ ॥ तमापतन्तं सहसा स्वनवन्तं महास्वनम् । रथं राक्षसराजस्य नरराजो ददर्श ह ॥ ४ ॥ कृष्णवाजिसमायुक्तं युक्तं रौद्रेण वर्चसा । तडित्पताकागहनं दर्शितेन्द्रायुधायुधम् ॥ ५ ॥ शरधारा विमुञ्चन्तं धारासारमिवाम्बुदम् । तं दृष्ट्वा मेघसङ्काशमापतन्तं रथं रिपोः ॥६॥ गिरेर्वज्राभिमृष्टस्य दीर्यतः सदृशस्वनम् । विस्फारयन् वै वेगेन बालचन्द्रनतं धनुः ॥ ७ ॥ उवाच मातलिं रामः सहस्राक्षस्य सारथिम् ॥ ८ ॥ मातले पश्य संरब्धमापतन्तं रथं रिपोः ॥९॥ यथाऽऽपसव्यं पतता वेगेन महता पुनः । समरे हन्तुमात्मानं तथा तेन कृता मतिः ॥ १० ॥

कृष्णवाजिसमायुक्तमित्यादिसार्धश्लोकत्रयमेकान्वयम् । रौद्रेण उग्रेण । तडित्पताकागहनं ताडित्तुल्यपताकावनम् । दर्शितेन्द्रायुधायुधं दर्शितानीन्द्रायुधसदृशानि आयुधानि येन तम् । यद्वा दर्शितेन्द्रायुधानि स्वप्रभाविशेषविरचितेन्द्रचापान्यायुधानि यस्मिन् दृश्यन्ते तादृशम् । यद्वा आयुधं धनुः दर्शितेन्द्रधनुस्तुल्यधनुष्कम् ॥ ५ ॥ धारासारं धारासमूहमित्यर्थः ॥ ६ ॥ वज्राभिमृष्टस्य वज्राहतस्य । अत एव दीर्यतः भिद्यमानस्य । बालचन्द्रनतम् आरोपितमौर्वीकत्वेन बालचन्द्रवन्नतम् ॥ ७ ॥ ८ ॥ मातले इत्यर्धमेकं वाक्यम् । संरब्धं वेगवन्तम् ॥ ९ ॥ यथापसव्यमिति । यथा आ अपसव्य

एतादृशं रावणस्य रथं क्षिप्रं चोदयामास सारथिरिति सम्बन्धः । द्वितीयस्सारथिशब्दः अनेकविशेषणव्यवधानात् पूर्वोक्तस्मरणार्थः ॥ १-४ ॥ कृष्णेति । तडित्पताकागहनं तडित्तुल्याभिः पताकाभिः गहनं सङ्कीर्णम् । दर्शितेन्द्रायुधायुधं दर्शितानि इन्द्रायुधानि इन्द्रायुधसदृशान्यायुधानि येन तम् ॥ ५ ॥ ६ ॥ वज्राभिमृष्टस्य वज्राभिहतस्य ॥ ७-९ ॥ अपसव्यं यथा तथा आपतता नेनेति सम्बन्धः ॥ १० ॥

स०—सारथिर्मातलिः यं रथं चोदयामास तं प्रति रावणस्य सारथिः रथं प्रचोदयामासेत्यन्वयेनानयो रथसारथिशब्दयोः पुनरुक्ततामीत्याऽनुवादताङ्गीकरणप्रयास उभयोरफलः ॥ ३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मिति छंदः । अपसव्यम् अप्रदक्षिणं यथा स्यात्तथा महता वेगेन पुनः आपतता आगच्छता तेन रावणेन समरे आत्मानं हन्तुं मतिः कृता । अपसव्य तया गमनं विनाशद्योतकमित्यर्थः ॥ १० ॥ तत् अपसव्यगमनस्य विनाशहेतुत्वात्, अप्रमादमातिष्ठन् सावधानतामवलम्बमानः, अपसव्यतां परिहर न्नित्यर्थः । रिपोः रथं प्रत्युद्गच्छ ॥ ११ ॥ अविक्लवम् अदीनम् । असम्भ्रान्तम् अप्रमादम् । अव्यग्रहृदयेक्षणम् अव्याकुलमनोनयनम् । रश्मिसञ्चार

तदप्रमादमातिष्ठन् प्रत्युद्गच्छ रथं रिपोः । विध्वंसयितुमिच्छामि वायुर्मेघमिवोत्थितम् ॥११॥ अविक्लवमसम्भ्रान्त मव्यग्रहृदयेक्षणम् । रश्मिसञ्चारनियतं प्रचोदय रथं द्रुतम् ॥ १२ ॥ कामं न त्वं समाधेयः पुरन्दररथोचितः । युयुत्सुरहमेकाग्रः स्मारये त्वां न शिक्षये ॥ १३ ॥ परितुष्टः स रामस्य तेन वाक्येन मातलिः । प्रचोदयामास रथं सुरसारथिसत्तमः ॥ १४ ॥ अपसव्यं ततः कुर्वन् रावणस्य महारथम् । चक्रोत्क्षिप्तेन रजसा रावणं व्यवधानयत् ॥ १५ ॥ ततः क्रुद्धो दशग्रीवस्ताम्रविस्फारितेक्षणः । रथप्रतिमुखं रामं सायकैरवधूनयत् ॥ १६ ॥ धर्षणामर्षितो रामो धैर्यं रोषेण लम्भयन् । जग्राह सुमहावेगमैन्द्रं युधि शरासनम् । शरांश्च सुमहातेजाः सूर्यरश्मिसमप्रभान् ॥ १७ ॥ तदोपोढं महद्युद्धमन्योन्यवधकांक्षिणोः । परस्पराभिमुखयोर्दृप्तयोरिव सिंहयोः ॥ १८ ॥

नियतं नियतरश्मिसञ्चारम् । एतानि क्रियाविशेषणानि ॥ १२ ॥ काममिति । न समाधेयः नोपदेष्टव्यः । अत्र हेतुः पुरन्दररथोचित इति । अभ्यस्त पुरन्दररथ इत्यर्थः ॥ १३ ॥ १४ ॥ अपसव्यमिति । रावणस्य महारथमपसव्यं कुर्वन् स्वरथस्यापसव्यतां परिहरन्नित्यर्थः । चक्रोत्क्षिप्तेन रथचक्रो त्थापितेन रजसा, रावणं व्यवधानयत् व्यवहितमकरोत् ॥ १५ ॥ रथप्रतिमुखं सर्वथाऽभिमुखम्, अवधूनयत् प्राहरत् ॥ १६ ॥ धर्षणेत्यादिसार्धश्लोक मेकं वाक्यम् । धैर्यं रोषेण लम्भयन् रोषेण निवृत्तधैर्य इत्यर्थः । ऐन्द्रं मातलिनाऽऽनीतं शरासनं शरांश्च जग्राहेति योजना ॥१७॥ उपोढं प्रवृत्तम्॥१८॥

तदप्रमादमातिष्ठन् प्रत्युद्गच्छ ॥ ११ ॥ अविक्लवमिति क्रियाविशेषणम् । अविक्लवम् अकातरम् । असम्भ्रान्तम् भ्रान्तिरहितम् । अव्यग्रहृदयेक्षणम् अव्यग्रे हृदय दर्शने यथा तथा । रश्मिसञ्चारनियतं रश्मीनां सञ्चारे आकुञ्चनप्रसारे नियतं यथा तथा रथं प्रचोदयेति सम्बन्धः ॥१२॥ काममिति । न समाधेयः नोपदेष्टव्यः ॥१३॥१४॥ चक्रोत्क्षिप्तेन रथचक्रोत्थितेन । व्यवधूनयत् चालयामास ॥ १५ ॥ १६ ॥ ऐन्द्रं शरासनम् “ इदि परमैश्वर्ये ” इति धातोरिन्द्रः परमात्मा, तदीयम् निजायुधं

For Private And Personal Use Only

द्वैरथं द्वाभ्यां रथाभ्यां प्रवर्तितं युद्धम् ॥ १९ ॥ समुत्पेतुरिति । अत्रोत्पातानां राघवजयसूचकत्वं रावणवधद्वारा ॥ २० ॥ देवः पर्जन्यः । मण्डलिनो वाताः वात्याः । अपसव्यम् अप्रदक्षिणम्, प्रचक्रमुः चेरुः ॥ २१ ॥ अस्य रावणस्य रथो येन मार्गेण याति स्म तेन मार्गेण महत् गृध्रकुलं नभःस्थले भ्रममाणं सत् प्रधावति स्म । अनेन रावणस्यासन्नमरणत्वं सूचितम् । तदुक्तं शकुनार्णवे–" आसन्नमृत्योर्निकटे चरन्ति गृध्रादयो मूर्ध्नि गृहोर्ध्व

ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । समेयुर्द्वैरथं द्रष्टुं रावणक्षयकांक्षिणः ॥१९॥ समुत्पेतुरथोत्पाता दारुणा रोमहर्षणाः । रावणस्य विनाशाय राघवस्य जयाय च ॥ २० ॥ ववर्ष रुधिरं देवो रावणस्य रथोपरि । वाता मण्डलिनस्तीक्ष्णा ह्यपसव्यं प्रचक्रमुः ॥ २१ ॥ महद् गृध्रकुलं चास्य भ्रममाणं नभस्स्थले । येन येन रथो याति तेन तेन प्रधावति ॥ २२ ॥ सन्ध्यया चावृता लङ्का जपापुष्पनिकाशया । दृश्यते सम्प्रदीप्तेव दिवसेऽपि वसुन्धरा ॥२३॥ सनिर्घाता महोल्काश्च सम्प्रचेरुर्महास्वनाः । विषादयंस्ते रक्षांसि रावणस्य तदाऽहिताः ॥ २४ ॥ रावणश्च यतस्तत्र सञ्चचाल वसुन्धरा । रक्षसां च प्रहरतां गृहीता इव बाहवः ॥ २५ ॥ ताम्राः पीताः सिताश्वेताः पतिताः सूर्यरश्मयः । दृश्यन्ते रावणस्याङ्गे पर्वतस्येव धातवः ॥ २६ ॥

भागे" इति ॥ २२ ॥ जपापुष्पनिकाशया सन्ध्यया लङ्का आवृता । अत एव वसुन्धरा लङ्कापर्यन्तभूमिः रात्रावग्निना संप्रदीप्तेव दिवसेऽपि सम्प्रदीप्ता दृश्यत इत्यर्थः ॥ २३ ॥ सनिर्घाता महोल्काः सम्प्रचेरुः । ते उल्काः । लिङ्गव्यत्ययः । रावणस्याहिताः प्रतिकूलाः सन्तः रक्षांसि विषादयन् व्यथादयन् ॥ २४ ॥ रामानु०–विषादयन् विषादयन्त्यः ॥ २४ ॥ यतः यत्र रावणो गतः तत्र वसुन्धरा सञ्चचाल, रावणसमीप एव भूकम्पो जात इत्यर्थः । गृहीता इव बाहवः, कैश्चिद्गृहीता बाहवो यथा प्रहर्तुं न क्षमन्ते तथाऽभूवन्नित्यर्थः ॥ २५ ॥ ताम्रा इति । सिताः अश्वेताश्च सिताश्वेताः । पर्वतस्येवेति । जन्माहेत्यर्थः ॥ १७ ॥ १८ ॥ ततो देवा इति । द्वैरथं द्वाभ्यां रथाभ्यां प्रवर्तितं युद्धं द्वैरथम् ॥ १९ ॥ २० ॥ मण्डलिनः वाताः, वात्या इत्यर्थः ॥ २१ ॥ महदिति । गृध्रकुलस्य रावणरथानुगमनेन रावणस्यासन्नमरणत्वं सूचितम् । उक्तं च शकुनार्णवे–" आसन्नमृत्योर्निकटे चरन्ति गृध्रादयो मूर्ध्नि गृहोर्ध्वभागे " इति ॥ २२ ॥ जपापुष्पनिकाशया सन्ध्यया, अकालिकयेति शेषः । लङ्का वृता अत एव वसुन्धरा, लङ्कापर्यन्तभूमिः । रात्रावग्निना सम्प्रदीप्तेव दिवसेऽपि संप्रदीप्ता दृश्यत इत्यर्थः ॥ २३ ॥ विषादयन विषादयन्त्यः ते रक्षांसि तानि रक्षांसि ॥ २४ ॥ रक्षसामित्यादि सार्धम् । प्रहरतां रक्षसां बाहव इव पर्वतस्य धातव इव च ताम्रादि

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पर्वतस्याङ्के धातव इवेति योजना ॥ २६ ॥ गृध्रैरनुगताः गृध्रसहिता इत्यर्थः । शिवाः गोमायवः, मुखैर्ज्वलनं वमन्त्यः सत्यः अस्य रावणस्य मुख मीक्षन्त्यः, रावणाभिमुखा इत्यर्थः । संरब्धं कुपितम्, अशिवम् अमङ्गलं च यथा भवति तथा प्रणेदुः । गृध्राणां साहित्यमात्रम्, नतु ज्वलनवमनादिकम् ॥ २७ ॥ प्रतिकूलमिति । वायुः रणे पांसून् समाकिरन्, तेन तस्य रावणस्य दृष्टिविलोपनं दृष्टिप्रतिघातं कुर्वन्, प्रतिकूलम् अभिमुखं ववौ ॥ २८ ॥

गृध्रैरनुगताश्चास्य वमन्त्यो ज्वलनं मुखैः । प्रणेदुर्मुखमीक्षन्त्यः संरब्धमशिवं शिवाः ॥ २७ ॥ प्रतिकूलं ववौ वायू रणे पांसून् समाकिरन् । तस्य राक्षसराजस्य कुर्वन् दृष्टिविलोपनम् ॥ २८ ॥ निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः । दुर्विषह्यस्वना घोरा विना जलधरस्वनम् ॥ २९ ॥ दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृताः । पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत् ॥ ३० ॥ कुर्वन्त्यः कलहं घोरं शारिकास्तद्रथं प्रति । निपेतुः शतशस्तत्र दारुणं दारुणारुताः ॥ ३१ ॥ जघनेभ्यः स्फुलिङ्गांश्च नेत्रेभ्योऽश्रूणि सन्ततम् । मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ॥ ३२ ॥ एवंप्रकारा बहवः समुत्पाता भयावहाः । रावणस्य विनाशाय दारुणाः सम्प्रजज्ञिरे ॥ ३३ ॥ रामस्यापि निमित्तानि सौम्यानि च शुभानि च । बभूवुर्जयशंसीनि प्रादुर्भूतानि सर्वशः ॥ ३४ ॥ निमित्तानि च सौम्यानि राघवः स्वजयाय च । दृष्ट्वा परमसंहृष्टो हतं मेने च रावणम् ॥ ३५ ॥

इन्द्राशनयः उल्काशनयः । उल्काशन्योः स्वरूपमुक्तं मिहिरेण— " उल्का शिरसि विशाला निपतन्ती वर्धते च तनुपुच्छा । अशनिः स्वनेन महता युक्ता नृगजाश्वतरुपशुसुखेषु । निपतति विदारयन्ती धरातलं चक्रसंस्थाना ॥" इति ॥ २९ ॥ ३० ॥ रामानु०—दुर्दर्शं च नभोऽभवदिति पाठः ॥ ३० ॥ कुर्वन्त्य इति । तद्रथं प्रति तद्रथोपरि ॥ ३१ ॥ तुरगाः जघनेभ्यः स्फुलिङ्गान् नेत्रेभ्यः अश्रूणि च मुमुचुः । एवमग्निं च वारि च तुल्यं यथा भवति तथा मुमुचुः ॥ ३२ ॥ ३३ ॥ एवं रावणपराजयसूचकदुर्निमित्तान्युक्तानि, इदानीं रामजयसूचकनिमित्तान्याह—रामस्यापीति । सौम्यानि मनोज्ञानि । शुभानि शुभोदर्काणि । अत एव जयशंसीनि निमित्तानि प्रादुर्बभूवुः सत्तां लेभिरे । रामविषये किञ्चित्कारो हि सत्तालाभहेतुः ॥ ३४ ॥ जयाय निमित्तानि जय रूपाः सूर्यरश्मयः रावणस्याङ्के पतितास्सन्तो दृश्यन्त इति सम्बन्धः ॥ २५ ३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सूचकनिमित्तानीत्यर्थः ॥ २५ ॥ तत इति । रणे आत्मगतानि आत्मार्थं प्रादुर्भूतानि । हर्षं पुलकं निर्वृतिं सुखं च जगाम ॥ २६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टोत्तरशततमः सर्गः ॥ १०८॥

ततो निरीक्ष्यात्मगतानि राघवो रणे निमित्तानि निमित्तकोविदः। जगाम हर्षं च परां च निर्वृतिं चकार युद्धे ह्यधिकं च विक्रमम् ॥२६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टोत्तरशततमः सर्गः ॥१०८॥

ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा। सुमहद्द्वैरथं युद्धं सर्वलोकभयावहम् ॥ १ ॥ ततो राक्षससैन्यं च हरीणां च महद्बलम्। प्रगृहीतप्रहरणं निश्चेष्टं समतिष्ठत ॥ २ ॥ सम्प्रयुद्धौ ततो दृष्ट्वा बलवन्नरराक्षसौ। व्याक्षिप्तहृदयाः सर्वे परं विस्मयमागताः ॥३॥ नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः। सर्पन्तं प्रेक्ष्य सङ्ग्रामं नाभिजग्मुः परस्परम् ॥४॥ रक्षसां रावणं चापि वानराणां च राघवम्। पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ ॥ ५ ॥ तौ तु तत्र निमित्तानि दृष्ट्वा रावणराघवौ। कृतबुद्धी स्थिरामर्षौ युयुधाते ह्यभीतवत् ॥ ६ ॥ जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः। धृतौ स्ववीर्यसर्वस्वं युद्धेऽदर्शयतां तदा ॥ ७ ॥

ततः प्रवृत्तमित्यादि। द्वैरथं द्वाभ्यां रथाभ्यां प्रवृत्तं युद्धं प्रवृत्तमिति योजना ॥ १ ॥ निश्चेष्टं समतिष्ठत, युद्धाद्भुतदर्शनकुतूहलादिति भावः ॥ २ ॥ एतदेव विवृणोति द्वाभ्याम्–सम्प्रयुद्धावित्यादि। सम्प्रयुद्धौ सम्यग्योद्धुमुपक्रान्तौ। कर्मणि क्तः। बलवत् अत्यन्तम्, व्याक्षिप्तहृदयाः युद्धदर्शनसक्तचित्ताः ॥ ३ ॥ नानेति। भुजैरित्युपलक्षणे तृतीया ॥४॥ रावणं पश्यतां विस्मिताक्षाणां विकसितनेत्राणां रक्षसां सैन्यम्, राघवं पश्यतां विस्मिताक्षाणां वानराणां सैन्यं च चित्रमिवाबभौ ॥ ५ ॥ निमित्तानि दुर्निमित्तानि शुभनिमित्तानि चेत्यर्थः। कृतबुद्धी निश्चितबुद्धी ॥ ६ ॥ निश्चयमेवाह–जेतव्यमिति।

॥२६॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टोत्तरशततमः सर्गः ॥१०८॥१ ॥ तत इति। निश्चेष्टं समतिष्ठत अत्यद्भुतयुद्धं दृष्ट्वेति भावः ॥ २ ॥ संप्रयुद्धौ सम्यग्योद्धुमुपक्रान्तौ ॥ ३ ॥ नानेति। भुजैरुपलक्षिताः सर्पन्तं समीपमागच्छन्तं प्रेक्ष्य प्रेक्ष्यापि विस्मयात्परस्परं नाभिजग्मुः, प्रहर्तुमिति शेषः ॥ ४ ॥ चित्रमिव चित्रलिखितमिव ॥५॥ कृतबुद्धी निश्चितबुद्धी। अभीतवत् अभीतार्हम् ॥ ६ ॥ निश्चयप्रकारमेवाह–जेतव्यमिति।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

जयोऽवश्यंभावीति । मर्तव्यमिति मरणमवश्यंभावीति । आवश्यकत्वार्थे तव्यः । धृतौ धैर्यवन्तौ ॥ ७ ॥ ८ ॥ रथशक्तिं रथबलम् , परामृश्य प्राप्य । रथशक्तिप्रघातेन ध्वजमनासाद्य निपेतुरित्यर्थः ॥ ९ ॥ सम्प्रचक्रमे उद्युक्तवान्, सङ्कल्पितवानित्यर्थः ॥ १० ॥ असह्यं दुर्दर्शमित्यर्थः ॥ ११ ॥ सः शरः ध्वजं छित्त्वा जगाम न तु केवलं जगाम ॥ १२ ॥ क्रोधादमर्षाच्च प्रदहन्निव प्रदहन्नग्निरिव, सम्प्रदीप्तः ज्वलितः अभवत् ॥ १३ ॥ शरवर्षं वमन्

ततः क्रोधाद्दशग्रीवः शरान् सन्धाय वीर्यवान् । मुमोच ध्वजमुद्दिश्य राघवस्य रथे स्थितम् ॥ ८ ॥ ते शरास्त मनासाद्य पुरन्दररथध्वजम् । रथशक्तिं परामृश्य निपेतुर्धरणीतले ॥ ९ ॥ ततो रामोऽभिसंक्रुद्धश्चापमायम्य वीर्यवान् । कृतप्रतिकृतं कर्तुं मनसा सम्प्रचक्रमे ॥ १० ॥ रावणध्वजमुद्दिश्य मुमोच निशितं शरम् । महासर्प मिवासह्यं ज्वलन्तं स्वेन तेजसा ॥ ११ ॥ जगाम स महीं छित्त्वा दशग्रीवध्वजं शरः । स निकृत्तोऽपतद्भूमौ रावणस्य रथध्वजः ॥१२॥ ध्वजस्योन्मथनं दृष्ट्वा रावणः सुमहाबलः । सम्प्रदीप्तोऽभवत् क्रोधादमर्षात् प्रदहन्निव ॥१३॥ स रोषवशमापन्नः शरवर्षं महद्वमन् । रामस्य तुरगान् दीप्तैः शरैर्विव्याध रावणः॥१४॥ ते विद्धा हरयस्तत्र नास्खलन्नापि बभ्रमुः । बभूवुः स्वस्थहृदयाः पद्मनालैरिवाहताः ॥१५॥ तेषामसम्भ्रमं दृष्ट्वा वाजिनां रावणस्तदा । भूय एव सुसंक्रुद्धः शरवर्षं मुमोच ह ॥ १६ ॥ गदाश्च परिघाश्चैव चक्राणि मुसलानि च । गिरिशृङ्गाणि वृक्षांश्च तथा शूलपरश्वधान् ॥ १७ ॥ मायाविहितमेतत्तु शस्त्रवर्षमपातयत् । तुमुलं त्रासजननं भीमं भीमप्रतिस्वनम् ॥ १८ ॥ तद्वर्षमभवद्युद्धे नैकशस्त्रमयं महत् । विमुच्य राघवरथं समन्ताद्वानरे बले ॥ १९ ॥

वमन्निवेत्यर्थः ॥ १४ ॥ हरयः हरितवर्णाः, इन्द्राश्वत्वादिति भावः ॥ १५ ॥ १६ ॥ गदाश्चेति । मुमोचेत्यनुषज्यते ॥ १७ ॥ धनुषा कथं गदादि मोचनमित्यत्राह–मायेति । शस्त्रवर्षं गदादिवर्षम् । मायाविहितम् आश्चर्यकरशक्तिकृतम् । तुमुलं नानाविधमित्यर्थः ॥ १८ ॥ नैकशस्त्रमयम् ॥३१७॥

जयोऽवश्यम्भावीत्यर्थः ॥ ७ ॥ ८ ॥ ते शरा इति । रथशक्तं शक्तरथम्, दृढरथमिति यावत् । परामृश्य स्पृष्ट्वा । रथशक्तिमिति पाठे-दिव्यरथवैभवं रथावयव विशेषं वा ॥ ९–१२ ॥ ध्वजस्येति । अमर्षात् असहनात् ॥ १३–१८ ॥ तद्वर्षमिति । राघवरथं विमुच्य क्रोधातिशयेन प्रयुक्तत्वाल्लक्ष्यभूतं रामरथमतिक्रम्य

For Private And Personal Use Only

अनेकशस्त्रप्रचुरम्, तद्दर्पं कोधातिशयेन प्रयुक्ते रामशरैर्निवारणाल्लक्ष्यभूतं रावणरथं विमुच्य वानरबले अभवत्, तत्रापतदित्यर्थः ॥ १९ ॥ सायकैरित्यादिसार्धश्लोक एकान्वयः। ततः दशग्रीवः अश्रान्तहृदयोद्यमः अविच्छिन्नोत्साहस्सन्, निस्सङ्गेन अव्यासक्तेन, अन्तरात्मना मनसा उपलक्षितः, सहस्रशो बाणान् मुमोच। सायकैरन्तरिक्षं च निरन्तरं चकार ॥ २० ॥ रामानु०-सायकैरन्तरिक्षं च चकाराशु निरन्तरम्। सहस्रशस्ततो बाणानश्रान्तहृदयो

सायकैरन्तरिक्षं च चकाराशु निरन्तरम्। सहस्रशस्ततो बाणानश्रान्तहृदयोद्यमः। मुमोच च दशग्रीवो निस्सङ्गेनान्तरात्मना ॥ २० ॥ व्यायच्छमानं तं दृष्ट्वा तत्परं रावणं रणे। प्रहसन्निव काकुत्स्थः सन्दधे सायकान् शितान् ॥ २१ ॥ स मुमोच ततो बाणान् रणे शतसहस्रशः। तान् दृष्ट्वा रावणश्चक्रे स्वशरैः खं निरन्तरम् ॥ २२ ॥ ततस्ताभ्यां प्रमुक्तेन शरवर्षेण भास्वता। शरबद्धमिवाभाति द्वितीयं भास्वदम्बरम् ॥२३॥ नानिमित्तोऽभवद्बाणो नातिभेत्ता न निष्फलः ॥ २४ ॥ अन्योन्यमभिसंहत्य निपेतुर्धरणीतले। तथा विसृजतोर्बाणान् रामरावणयोर्मृधे ॥ २५ ॥ प्रायुद्ध्यतामविच्छिन्नमस्यन्तौ सव्यदक्षिणम्। चक्रतुश्च शरौघैस्तौ निरुच्छ्वासमिवाम्बरम् ॥ २६ ॥

द्यमः। मुमोच च दशग्रीवो निःसङ्गेनान्तरात्मनेति पाठक्रमः ॥ २० ॥ व्यायच्छमानं व्यायच्छन्तम्, यत्नं कुर्वन्तम्। रणे तत्परं सक्तम्। प्रहसन्निव सन्दधे अनायासेन सन्दधे ॥ २१ ॥ २२ ॥ शरवर्षेण भास्वत् अम्बरं शरबद्धं द्वितीयमम्बरमिवाभाति स्म ॥ २३ ॥ नानिमित्त इत्यर्धम्। अनिमित्तः लक्ष्यविशेषोद्देशरहितः। अतिभेत्ता अपेक्षितप्रमाणादधिकभेत्ता। निष्फलः लक्ष्ये पतितोऽपि प्रयोजनाकारी ॥ २४ ॥ अन्योन्यमिति। तथा विसृजतोः उक्तप्रकारेण विसृजतोः। अत्र बाणा इत्यध्याहार्यम् ॥ २५ ॥ अस्यन्तौ शरान् क्षिपन्तौ। इवशब्दो वाक्यालङ्कारे। निरुच्छ्वासम् उच्छ्वासावकाशरहितम् ॥२६॥

वानरे बले अभवदिति सम्बन्धः ॥ १९ ॥ निस्सङ्गेन प्राणाशासङ्गरहितेन ॥ २० ॥ व्यायच्छमानं व्यायच्छन्तम्, प्रवर्तयन्तमित्यर्थः ॥ २१ ॥ २२ ॥ शरबद्धं शररचिताम्बरम् ॥ २३ ॥ अनिमित्तः अलक्षणः। अतिभेत्ता प्रहरणादधिकं भेत्ता। न निष्फलः लक्ष्ये पतितोऽपि निष्प्रयोजनश्च नाभवदित्यर्थः ॥ २४ ॥ २५ ॥ निरुच्छ्वासं नीरन्ध्रम् ॥ २६-२८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रावणस्येति । अत्र जघानेति वचनविपरिणामेनानुषज्यते । तौ अन्योन्यं कृतानुकृतकारिणौ कृतप्रतिक्रियाकारिणौ सन्तौ तथा जघ्नतु हय इवान्यत्रापि सारथ्यादौ जघ्नतुरित्यर्थः ॥ २७ ॥ २८ ॥ प्रयुध्यमानाविति । यदा बभूवतुरित्युपस्कार्यम् ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने नवोत्तरशततमः सर्गः ॥ १०९ ॥

रावणस्य हयान् रामो हयान् रामस्य रावणः । जघ्नतुस्तौ तथाऽन्योन्यं कृतानुकृतकारिणौ ॥ २७ ॥ एवं तौ तु सुसंक्रुद्धौ चक्रतुर्युद्धमद्भुतम् । मुहूर्तमभवद्युद्धं तुमुलं रोमहर्षणम् ॥ २८ ॥ प्रयुध्यमानौ समरे महाबलौ शितैः शरै रावणलक्ष्मणाग्रजौ । ध्वजावपातेन स राक्षसाधिपो भृशं प्रचुक्रोध तदा रघूत्तमे ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे नवोत्तरशततमः सर्गः ॥ १०९ ॥

तौ तदा युद्ध्यमानौ तु समरे रामरावणौ । ददृशुः सर्वभूतानि विस्मितेनान्तरात्मना ॥ १ ॥ अर्दयन्तौ तु समरे तयोस्तौ स्यन्दनोत्तमौ । परस्परमभिक्रुद्धौ परस्परमभिद्रुतौ ॥ २ ॥ परस्परवधे युक्तौ घोररूपौ बभूवतुः । मण्डलानि च वीथीश्च गतप्रत्यागतानि च । दर्शयन्तौ बहुविधां सूतसारथ्यजां गतिम् ॥ ३ ॥

अथ रावणशिरश्छेदः—तौ तदेत्यादि । समरे युद्धभूमौ । तदा उत्पातकाले । अन्तरात्मना अन्तःकरणेन उपलक्षितानि ॥ १ ॥ अर्दयन्तावित्यादिसार्धश्लोकद्वयमेकान्वयम् । अर्दयन्तौ परस्परं पीडयन्तौ । रथयोः क्रोधादिकं रथिकद्वारा । मण्डलानि मण्डलगतीः । गतप्रत्यागतानि, शत्रुरथं प्रति गमनं गतम्, पुनः स्थानं प्रत्यागमनं प्रत्यागतम् तयोरावृत्त्या बहुवचनम् । एवंप्रकारेण बहुविधां सूतसारथ्यजां सूतस्य यत् सारथ्यं सारथिकर्म तज्जाम्, गतिं

प्रयुद्ध्यमानावित्यत्र यदा बभूवतुरिति शेषः । तदा ध्वजावपातेन राक्षसाधिपो भृशं चुक्रोधेति सम्बन्धः ॥ २९ ॥ (तुमुलं रोमहर्षणमित्येतदनन्तरं प्रयुध्यमानावित्येकं श्लोकं प्रक्षिप्यात्र सर्गविच्छेदं कुर्वन्ति, तदयुक्तम् । पश्चादपि तुमुलयुद्धस्यैव सन्दाटकप्रकरणत्वाच्च अनवच्छेदस्यैव बहुषु पुस्तकेषु दर्शनाच्चेति कतकः ॥) इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां नवोत्तरशततमः सर्गः ॥ १०९ ॥ १ ॥ २ ॥ दर्शयन्ताविति । सूतसारथ्यजां सूतकर्मनैपुण्यरूपाम् ॥ ३ ॥

स० ०—तौ परस्परमभिक्रुद्धौ परस्परवधे युक्तौ समरे अर्दयन्तौ रामरावणौ तयोस्स्यन्दनोत्तमावित्यन्वयः । मण्डलानि कौशल्यातिशयद्योतको वा प्रयोगः । सारथ्यं तत्कर्म । सूतं सम्यक् सम्बद्धं विराम्यस्तमिति यावत् ॥ २ ॥ ३ ॥

For Private And Personal Use Only

सञ्चारं दर्शयन्तौ तयोः रथौ घोररूपौ बभूवतुः ॥ २ ॥ ३ ॥ रावणमर्दयन् रामो राघवमर्दयन् रावणश्चोभौ प्रवर्तननिवर्तने तद्रूपं गतिवेगं समापन्नौ, बभूवतुरिति शेषः ॥ ४ ॥ सासारौ सजलधारौ ॥ ५ ॥ तथा गतिं पूर्वोक्तगतिभेदम् ॥६॥ धुरं युगम् । धुरेण । अकारान्तत्वमार्षम् । स्थितयोः युद्धे गतिं

अर्दयन् रावणं रामो राघवं चापि रावणः । गतिवेगं समापन्नौ प्रवर्तननिवर्तने ॥ ४ ॥ क्षिपतोः शरजालानि तयोस्तौ स्यन्दनोत्तमौ । चेरतुः संयुगमहीं सासारौ जलदौ यथा ॥ ५ ॥ दर्शयित्वा तथा तौ तु गतिं बहुविधां रणे । परस्परस्याभिमुखौ पुनरेवावतस्थतुः ॥६॥ धुरं धुरेण रथयोर्वक्त्रं वक्त्रेण वाजिनाम् । पताकाश्च पताकाभिः समेयुः स्थितयोस्तदा ॥७॥ रावणस्य ततो रामो धनुर्मुक्तैः शितैः शरैः । चतुर्भिश्चतुरो दीप्तैर्हयान् प्रत्यपसर्पयत् ॥८॥ स क्रोधवशमापन्नो हयानामपसर्पणे । मुमोच निशितान् बाणान् राघवाय निशाचरः ॥९॥ सोऽतिविद्धो बलवता दशग्रीवेण राघवः । जगाम न विकारं च न चापि व्यथितोऽभवत् ॥ १० ॥ चिक्षेप च पुनर्बाणान् वज्रपातसमस्वनान् । सारथिं वज्रहस्तस्य समुद्दिश्य निशाचरः ॥ ११ ॥ मातलेस्तु महावेगाः शरीरे पतिताः शराः । न सूक्ष्ममपि संमोहं व्यथां वा प्रददुर्युधि ॥ १२ ॥ तया धर्षणया क्रुद्धो मातलेर्न तथाऽऽत्मनः । चकार शरजालेन राघवो विमुखं रिपुम् ॥१३॥ विंशतं त्रिंशतं षष्टिं शतशोऽथ सहस्रशः । मुमोच राघवो वीरः सायकान् स्यन्दने रिपोः॥१४॥

विना स्थितयोः, तयोरिति शेषः ॥ ७ ॥ प्रत्यपसर्पयत् न्यवर्तयत् ॥ ८ ॥ स इति । अपसर्पणे विषये ॥ ९ ॥ विकारं वेदनासूचकमुखविकारम् ॥ १० ॥ वज्रपातः अशनिपातः ॥ ११ ॥ सूक्ष्मम् अल्पम् ॥ १२ ॥ यथा मातलेः तया धर्षणया क्रुद्धः तथा आत्मनो धर्षणया न क्रुद्धः । एवं क्रुद्धो रिपुं विमुखं चकार ॥१३॥ विंशतमिति । इकारलोपश्छान्दसः ॥ १४ ॥ रामानु०—मुमोच राघवो वीरः सायकान् स्यन्दने रिपोरित्यनन्तरम्—रावणोऽपि । गदामुसलवर्षेण । तत्प्रवृत्तं

अर्दयन् पीडयन्, बभूवेति शेषः ॥ ४ ॥ सासारौ धारासम्पात आसारस्तत्सहितौ ॥५–७॥ रावणस्येति । प्रत्यपसर्पयत न्यवर्तयत ॥ ८–१२ ॥ (ति०—मातलेर्व्यथां न प्रददुः देवत्वेन दिव्यशक्तिमत्त्वात्, अपसर्पणकाले रावणेन प्रक्षिप्तानामतिवेगसामर्थ्याभावाच्च ॥ १२ ॥) तया मातलेर्धर्षणया यथा तथा आत्मनो धर्षणया

स०—व्यथां न प्रददुः श्रीरामसान्निध्यात् ॥ यत्तु नागोजिभट्टेन देवत्वेन दिव्यशक्तिमत्त्वादपसर्पणकाले रावणेन प्रक्षिप्तानामतिवेगासामर्थ्याच्चेति व्याख्यातं तत् यदा इन्द्रादीनां दशाननदत्ता चिन्ता तदा किया नयं यन्त्येति सत्ये सति समग्ररामायणं श्रुत्वापि नीता रामस्य किम्भाविनीत्याभाणकमनुकरोति ॥ १२ ॥

महद्युद्धम् इत्यर्धत्रयं द्रष्टव्यम् ॥ १४ ॥ रथस्थः रथे निश्चलतया स्थित इत्यर्थः ॥१५॥ ततः प्रवृत्तमित्यर्धमेकं वाक्यम् ॥१६॥ निस्वनैः, वेगजैरिति शेषः॥१७॥ क्षुब्धानामिति। क्षुब्धेषु सागरेष्वित्यर्थः ॥ १८–२२ ॥ गन्धर्वाप्सरसामित्यर्धानन्तरं गगनं गगनाकारमिति श्लोकः । तदनन्तरम् एवं ब्रुवन्त इत्यर्धम् ।

रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः । गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ १५ ॥ तत्प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् ॥ १६ ॥ गदानां मुसलानां च परिघाणां च निस्वनैः । शराणां पुङ्खपातैश्च क्षुभिताः सप्त सागराः ॥ १७ ॥ क्षुब्धानां सागराणां च पातालतलवासिनः । व्यथिताः पन्नगाः सर्वे दानवाश्च सहस्रशः ॥ १८ ॥ चकम्पे मेदिनी कृत्स्ना सशैलवनकानना । भास्करो निष्प्रभश्चासीन्न ववौ चापि मारुतः ॥ १९ ॥ ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः । चिन्तामापेदिरे सर्वे सकिन्नरमहोरगाः ॥२०॥ स्वस्ति गोब्राह्मणेभ्यस्तु लोकास्तिष्ठन्तु शाश्वताः । जयतां राघवः सङ्ख्ये रावणं राक्षसेश्वरम् ॥ २१ ॥ एवं जपन्तोऽपश्यंस्ते देवाः सर्षिगणास्तदा । रामरावणयोर्युद्धं सुघोरं रोमहर्षणम् ॥ २२ ॥ गन्धर्वाप्सरसां सङ्घा दृष्ट्वा युद्धमनूपमम् ॥ २३ ॥ गगनं गगनाकारं सागरः सागरोपमः । रामरावणयोर्युद्धं रामरावणयोरिव । एवं ब्रुवन्तो ददृशुस्तद्युद्धं रामरावणम् ॥ २४ ॥

गन्धर्वाप्सरसां सङ्घाः अनूपमम् अनुपमम्, युद्धं दृष्ट्वा गगनं गगनाकारामित्येवं ब्रुवन्तस्सन्तः पुनर्ददृशुरित्यन्वयः । अनुपमत्वमेवाह–गगनमिति । यथा गगनसागरयोः सदृशवस्त्वन्तराभावः तथा रामरावणयुद्धस्य सदृशं युद्धं किंचिन्नास्तीत्यर्थः । सदृशान्तरनिवृत्तिफलकोऽनन्वयालङ्कारः । राम

न क्रुद्धः अत एव रिपुं विमुखं चकारेति सम्बन्धः ॥ १३–१७ ॥ क्षुब्धानामिति । सागराणां क्षुब्धानां सतां पातालतलवासिनो व्यथिताः, आसन् इति शेषः ॥ १८–२१ ॥ एवमिति । जपन्तः वदन्तः ॥ २२ ॥ रामरावणानुपमयुद्धदर्शनविस्मितदेवादिजल्पनप्रकारमाह–गन्धर्वाप्सरसामित्यादि । श्लोकद्वयमेकं वाक्यम् । यथा गगनसागरयोस्सदृशवस्त्वन्तराभावाद्गगनं गगनेनैवोपमीयते सागरस्सागरेणैवोपमीयते तथैव रामरावणयुद्धं रामरावणयोर्युद्धमिवाभवदित्येवं ब्रुवन्तो गन्धर्वादयः रामरावणं रामरावणयोः सम्बन्धि तद्युद्धं ददृशुरित्यन्वयः । अनन्वयश्चात्रालङ्कारः । तदुक्तं काव्यप्रकाशिकायाम्–" एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः " इति । राहोश्शिर इतिवद्भेदेऽपि भेदव्यवहारः ॥ २३ ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रावणं रामरावणसम्बन्धि ॥ २३ ॥२४ ॥ ततः क्रुद्ध इत्यादिसार्धश्लोकपञ्चकमेकं वाक्यम् । क्षुरं क्षुराग्रबाणम् ॥ २५ ॥ शिरः अच्छिन्दत् अच्छिनत् । एकवचनात्तदानीं रावण एकशिरा एव युद्धमकरोदिति गम्यते । अत एव वक्ष्यति–" विक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ " इत्यादिना ॥२६॥२७॥

ततः क्रुद्धो महाबाहू रघूणां कीर्तिवर्धनः । सन्धाय धनुषा रामः क्षुरमाशीविषोपमम् ॥ २५ ॥ रावणस्य शिरोऽच्छिन्दच्छ्रीमज्ज्वलितकुण्डलम् । तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ॥ २६ ॥ तस्यैव सदृशं चान्यद्रावणस्योत्थितं शिरः । तत् क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ॥ २७ ॥ द्वितीयं रावणशिरश्छिन्नं संयति सायकैः । छिन्नमात्रं तु तच्छीर्षं पुनरन्यत् स्म दृश्यते ॥ २८ ॥ तदप्यशनिसङ्काशैश्छिन्नं रामेण सायकैः । एवमेकशतं छिन्नं शिरसां तुल्यवर्चसाम् ॥ २९ ॥ न चैव रावणस्यान्तो दृश्यते जीवितक्षये ॥ ३० ॥ ततः सर्वास्त्रविद्वीरः कौसल्यानन्दवर्धनः । मार्गणैर्बहुभिर्युक्तश्चिन्तयामास राघवः ॥ ३१ ॥

छिन्नमात्रं तु तच्छीर्षमिति । तच्छीर्षे छिन्ने तदानीमेवेत्यर्थः ॥ २८ ॥ एकशतं छिन्नम् एकोत्तरशतवारं छिन्नमित्यर्थः । पुनः पुनः शिरश्छेदनं चिरतृषितशरतृष्णानिवृत्त्यर्थम् ॥ २९ ॥ न चेति । जीवितक्षये विषये । अन्तः अवधिः निश्चयो वा । न दृश्यते नादृश्यत ॥ ३० ॥ ३१ ॥

तत इति । ततस्साम्यप्रत्यायकवचनश्रवणानन्तरं रावणस्य शिरः शिरांसि, जातावेकवचनम् । अच्छिन्दत् अच्छिनत् । " दशास्यो विंशतिभुजः प्रगृहीतशरासनः । अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥ " इति दशशिरस्सहितस्य योद्धृत्वाभिधानात् शिर इत्यत्र शिरांसीत्युक्तम् । प्रधानशिरो वा ॥ २५–२७ ॥ छिन्नमात्र इति । छिन्नमात्रे तच्छीर्षे तदानीमेव अन्यच्छिरोऽदृश्यतेति सम्बन्धः ॥ २८ ॥ एकशतम् एकोत्तरशतम्, एकोत्तरशतवारं छिन्नमित्यर्थः ॥२९॥ न चेति । रावणस्य जीवितक्षये विषये अन्तो निश्चयो नैव दृश्यते इति ॥ ३०–३२ ॥

स०–शिरः एकवचनं जातावेकवचनमत्रोत्तरत्र च " दशास्यो विंशतिभुजः प्रगृहीतशरासनः । अदृश्यत दशग्रीवो मैनाक इव पर्वतः ॥ " इतीव ' तस्योत्तमाङ्गदशकं युगपन्न्यकृन्तत् कृत्तानि तानि पुनरेव समुत्थितानि " इत्याचार्यैरप्युक्तेः । पद्मपुराणे च–" दशग्रीवस्य चिच्छेद शिरांसि रघुनन्दनः । समुत्थितानि बहुशो वरदानान्ममाम्बिके " इति ॥ २६ ॥

For Private And Personal Use Only

मारीच इत्यादिसार्धश्लोकद्वयमेकान्वयम् । क्रौञ्चावने कबन्धः, दण्डकावने विराध इत्यन्वयः ॥ ३२ ॥ प्रात्ययिकाः विश्वस्ताः । त इमे रावणे विषये मन्दतेजसः अल्पशक्तिकाः अभवन् । तत्कारणं किं नु, न जानामीति शेषः ॥ ३३–३५ ॥ तदिति ॥ त्रिकूटशिखरे युध्यतोस्तयोराग्रहकृतगतिवशेन

मारीचो निहतो यैस्तु खरो यैस्तु सदूषणः । क्रौञ्चावने विराधस्तु कबन्धो दण्डकावने ॥ ३२ ॥ यैः साला गिरयो भग्ना वाली च क्षुभितोऽम्बुधिः । त इमे सायकाः सर्वे युद्धे प्रात्ययिका मम । किं नु तत्कारणं येन रावणे मन्दतेजसः ॥ ३३ ॥ इति चिन्तापरश्चासीदप्रमत्तश्च संयुगे । ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ ३४ ॥ रावणोऽपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः । गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे ॥ ३५ ॥ तत् प्रवृत्तं महद्युद्धं तुमुलं रोमहर्षणम् । अन्तरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि ॥ ३६ ॥ देवदानवयक्षाणां पिशाचोरगरक्षसाम् । पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥३७॥ नैव रात्रं न दिवसं न मुहूर्तं न च क्षणम् । रामरावणयोर्युद्धं विराममुपगच्छति ॥ ३८

अन्तरिक्षे भूमौ च पुनश्च गिरिमूर्धनि त्रिकूटशिखरे च तन्महद्युद्धं प्रवृत्तमित्यर्थः ॥३६॥ देवदानवेति । "यस्य च भावेन–" इति भावलक्षणे षष्ठी । सर्वरात्रम् अहोरात्रमित्यर्थः । सप्तरात्रमित्यपपाठः । वक्ष्यमाणदिनसङ्ख्याविरोधात् । यद्वा सर्वरात्रमित्यपपाठः । सप्तरात्रमित्येव सम्यक् पाठः । फाल्गुनचतुर्दश्यां हनुमता लङ्कादाहः । पौर्णमास्यां रामस्य समुद्रतीरप्राप्तिः । प्रथमाद्वितीयातृतीयासु दर्भशयनम् । अष्टम्यां सुवेलारोहणम् । नवम्यां युद्धारम्भ इति सप्तरात्रं रामरावणयुद्धमिति । इदं च " इतस्तु नवमेऽहनि " इत्यत्र विस्तृतम् ॥ ३७ ॥ नैव रात्रमिति । " कालाध्वनोरत्यन्तसंयोगे " इति द्वितीया ॥ ३८ ॥ रामानु०–देवदानवयक्षाणां पिशाचोरगरक्षसाम् । पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥ नैव रात्रं न दिवसं न मुहूर्तं न च क्षणम् । रामरावणयोर्युद्धं विराममुपगच्छति ॥ इति श्लोकद्वयं केषुचित्कोशेषु पतितम् ॥ ३७ ॥ ३८ ॥

त इम इति । प्रात्ययिकाः विश्वस्ताः, अमोघा इत्यर्थः ॥ ३३–३५ ॥ त्रिकूटशिखरे युद्ध्यतोस्तयोराग्रहादन्तरिक्षे भूमौ च त्रिकूटशिखरस्याधस्तनभूमौ पुनश्च गिरिमूर्धनि त्रिकूटशिखरे च तन्महद्युद्धं प्रवृत्तमित्यर्थः ॥ ३६ ॥ देवादीनां पश्यतां सतां सप्तरात्रं महद्युद्धमवर्ततेति सम्बन्धः । अगस्त्यागमनात्प्रागेव सिद्धस्य

स०–यैरिति । जातौ बहुवचनम् । येन, एकेनैवेति प्रतिज्ञाकाल उक्ते । वाली च भग्न इत्यन्वयः ॥ ३३ ॥

॥३२०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशरथेति । निर्धारणे षष्ठी । दशरथसुतराक्षसेन्द्रयोः रामरावणयोर्मध्ये राघवस्य जयमनवेक्ष्य महान् महाबुद्धिरित्यर्थः । सुरवररथसारथिः एनं रामम् उवाच ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने दशोत्तरशततमः सर्गः ॥ ११० ॥

दशरथसुतराक्षसेन्द्रयोर्जयमनवेक्ष्य रणे स राघवस्य । सुरवररथसारथिर्महान् रणगतमेनमुवाच वाक्यमाशु ॥ २९॥
इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥
अथ संस्मारयामास राघवं मातलिस्तदा । अजानन्निव किं वीर त्वमेनमनुवर्तसे ॥ १ ॥ विसृजास्मै वधाय त्वमस्त्रं पैतामहं प्रभो । विनाशकालः कथितो यः सुरैः सोऽद्य वर्तत ॥२॥ ततः संस्मारितो रामस्तेन वाक्येन मातलेः । जग्राह सशरं दीप्तं निश्वसन्तमिवोरगम् ॥ ३ ॥ यमस्मै प्रथमं प्रादादगस्त्यो भगवानृषिः । ब्रह्मदत्तं महाबाण ममोघं युधि वीर्यवान् ॥ ४ ॥ ब्रह्मणा निर्मितं पूर्वमिन्द्रार्थममितौजसा । दत्तं सुरपतेः पूर्वं त्रिलोकजयकांक्षिणः ॥५॥ यस्य वाजेषु पवनः फले पावकभास्करौ । शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥ ६ ॥

अथ रावणवधः—अथ संस्मारयामासेत्यादिश्लोकद्वयमेकान्वयम् । अजानन्निव ब्रह्मास्त्रमजानन्निव । एनं रावणम्, अनुवर्तसे अस्त्रस्य प्रत्यस्त्रप्रयोग मात्रं करोषि । विनाशकालः मानुषेण वधः इत्युक्तः कालः ॥ १ ॥ २ ॥ ततः संस्मारित इत्याद्येकादश श्लोका एकान्वयाः । प्रथमं पूर्वं दण्डकारण्ये ॥ ३ ॥ ४ ॥ ब्रह्मदत्तमित्येतद्विवृणोति—ब्रह्मणेत्यादिना ॥ ५ ॥ यस्य वाजेष्विति । पवनादीनामधिदेवतात्वेनावस्थानम् । फले शल्ये ॥ ६ ॥

युद्धस्यायमनुवादः । अस्मिन् पाठे सप्तरात्रकृतरामरावणयुद्धस्यास्मिन् रामायणे अश्रूयमाणत्वेन अनुपपन्नत्वाच्च सर्वरात्रमवर्ततेति पाठः समीचीनः । सर्वरात्रम् अहोरात्रमित्यर्थः ॥ ३७ ॥ ३८ ॥ दशरथसुतराक्षसेन्द्रयोरित्यत्र निर्द्धारणे षष्ठी ॥ ३९ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां दशोत्तरशततमः सर्गः ॥ ११० ॥ अथेत्यादि । अनुवर्तसे अनुकरोषि, उपेक्षस इति यावत् ॥ १ ॥ अस्मै एनं मति ॥ २–५ ॥ यस्येत्यादि ।

स०—संस्मरयामास रावणस्य ब्रह्मास्त्रवध्यतामिति शेषः । अजानन्निवेत्यनेन रामस्य सार्वज्ञं सूचयति ॥ १ ॥

For Private And Personal Use Only

तेजसा सारांशेन कृतम् ॥ ७ ॥ ८ ॥ द्वाराणां रिपुगोपुराणाम् । नानारुधिरेति वध्यासुरभेदात् । मेदः मांसविशेषः ॥९॥ रामानु०–द्वाराणां पुरद्वाराणाम्, गोपुराणामिति यावत् । परिघाणामित्येतत्सर्वायुधानामप्युपलक्षणम् ॥ ९ ॥ वज्रसारं वज्रतुल्यदार्ढ्यम् । नानासमितिदारणं कपटयुद्धस्यापि निवर्तकम् । सर्ववित्रा

जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम् । तेजसा सर्वभूतानां कृतं भास्करवर्चसम् ॥ ७ ॥ सधूममिव कालाग्निं दीप्तमाशीविषं यथा । परनागाश्ववृन्दानां भेदनं क्षिप्रकारिणम् ॥८॥ द्वाराणां परिघाणां च गिरीणामपि भेदनम् । नानारुधिरसिक्ताङ्गं मेदोदिग्धं सुदारुणम् ॥ ९ ॥ वज्रसारं महानादं नानासमितिदारणम् । सर्ववित्रासनं भीमं श्वसन्तमिव पन्नगम् ॥ १० ॥ कङ्कगृध्रवलानां च गोमायुगणरक्षसाम् । नित्यं भक्ष्यप्रदं युद्धे यमरूपं भयावहम् ॥११॥ नन्दनं वानरेन्द्राणां रक्षसामवसादनम् । वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः ॥१२॥ तमुत्तमेषुं लोकाना मिक्ष्वाकुभयनाशनम् । द्विषतां कीर्तिहरणं प्रहर्षकरमात्मनः ॥ १३ ॥ अभिमन्त्र्य ततो रामस्तं महेषुं महाबलः । वेदप्रोक्तेन विधिना सन्दधे कार्मुके बली ॥ १४ ॥ तस्मिन् सन्धीयमाने तु राघवेण शरोत्तमे । सर्वभूतानि वित्रेसु श्चचाल च वसुन्धरा ॥१५॥ स रावणाय संक्रुद्धो भृशमायम्य कार्मुकम् । चिक्षेप परमायत्तस्तं शरं मर्मघातिनम् ॥ १६॥

सनत्वे हेतुः भीमामिति । दीप्तं श्वसन्तमिति भेदादुपमानभेदः ॥ १० ॥ वलाः गृध्रविशेषाः । रक्षसां पिशाचसहचारिणाम् । यमरूपं यमतुल्यं यथा भवति तथा भयावहमिति वित्रासनात् भेदः ॥ ११ ॥ वाजितामिति । गरुत्मतः वाजैः पत्रैः वाजितं सञ्जातपत्रम्, गरुडपत्रकृतपत्रमित्यर्थः ॥ १२ ॥ लोकानां मध्ये उत्तमेषुं प्रहर्षकरमात्मन इत्यन्तस्य जग्राहेत्यनेन संबन्धः ॥ १३ ॥ ततः ग्रहणानन्तरम्, तम् इषुं सन्दधे ॥ १४ ॥ १५ ॥ स इति ।

यस्य वाजेषु पक्षेषु । यस्य वाजेषु पवनः इत्यादिषु पवनादीनामधिदेवतात्वेनावस्थानं विवक्षितम् ॥ ६ ॥ तेजसा सारांशेन कृतं निर्मितम् । द्वाराणां गोपुराणाम् ॥ ७–११ ॥ गरुत्मतः चारुचित्रैः वाजैः । यमित्याद्युक्तविशेषणविशिष्टं तमुत्तमेषुमित्येतदन्तम् अभिमन्त्र्येत्यनेन सम्बध्यते ॥ १२ ॥ १३ ॥ तं महेषुमिति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रावणाय चिक्षेपेत्यन्वयः ॥ १६ ॥ स वज्र इति । वज्रिबाहुविसर्जितो वज्र इवेत्यन्वयः ॥ १७–१९ ॥ स शर इति । निभृतवत् विनीतवत् ॥ २० ॥ तस्येति । प्राणैः सह जीवितात् प्राणधारणयत्नात्, भ्रश्यमानस्य तस्य हस्तात् ससायकं कार्मुकं पपात ॥ २१–२३ ॥ नर्दन्तश्चेत्यर्धमेकं वाक्यम्

स वज्र इव दुर्धर्षो वज्रिबाहुविसर्जितः । कृतान्त इव चावार्यो न्यपतद्रावणोरसि ॥ १७ ॥ स विसृष्टो महावेगः शरीरान्तकरः शरः । बिभेद हृदयं तस्य रावणस्य दुरात्मनः ॥ १८ ॥ रुधिराक्तः स वेगेन जीवितान्तकरः शरः । रावणस्य हरन् प्राणान् विवेश धरणीतलम् ॥ १९ ॥ स शरो रावणं हत्वा रुधिरार्द्रीकृतच्छविः । कृतकर्मा निभृतवत् स्वतूणीं पुनरागमत् ॥ २० ॥ तस्य हस्ताद्धतस्याशु कार्मुकं तत् ससायकम् । निपपात सह प्राणैर्भ्रश्यमानस्य जीवितात् ॥ २१ ॥ गतासुर्भीमवेगस्तु नैर्ऋतेन्द्रो महाद्युतिः । पपात स्यन्दनाद्भूमौ वृत्रो वज्रहतो यथा ॥ २२ ॥ तं दृष्ट्वा पतितं भूमौ हतशेषा निशाचराः । हतनाथा भयत्रस्ताः सर्वतः सम्प्रदुद्रुवुः ॥ २३ ॥ नर्दन्तश्चाभिपेतुस्तान् वानरा द्रुमयोधिनः ॥ २४ ॥ दशग्रीववधं दृष्ट्वा विजयं राघवस्य च । अर्दिता वानरैर्हृष्टैर्लङ्कामभ्यपतन् भयात् । गताश्रयत्वात् करुणैर्बाष्पप्रस्रवणैर्मुखैः ॥ २५ ॥ ततो विनेदुः संहृष्टा वानरा जितकाशिनः । वदन्तो राघवजयं रावणस्य च तद्वधम् ॥ २६ ॥ अथान्तरिक्षे व्यनदत् सौम्यस्त्रिदशदुन्दुभिः । दिव्यगन्धवहस्तत्र मारुतः ससुखो ववौ ॥ २७ ॥ निपपातान्तरिक्षाच्च पुष्पवृष्टिस्तदा भुवि । किरन्ती राघवरथं दुरवापा मनोरमा ॥ २८ ॥ राघवस्तवसंयुक्ता गगनेऽपि च शुश्रुवे । साधु साध्विति वागग्र्या देवतानां महात्मनाम् ॥ २९ ॥

॥ २४ ॥ दशग्रीवेत्यादिसार्धश्लोक एकान्वयः । मुखैः उपलक्षिताः, राक्षसा इति शेषः ॥ २५ ॥ तत इति । तद्वधं तं वधम् ॥ २६–२८ ॥ राघवेति ।

सन्दध इत्यनेन सम्बन्धः ॥ १४–१९ ॥ स शर इति । निभृतवत् विनीतवत् ॥ २०–३१ ॥

For Private And Personal Use Only

राघवस्तवसंयुक्ता वागित्यन्वयः ॥ २९ ॥ चारणैः सह चारणैः सहितान् देवानित्यर्थः ॥ ३० ॥ तत इति । सुग्रीवस्य युवराजत्वेन प्रत्युपकारायाङ्गदेनापि रावणवधस्य काङ्क्षितत्वात् सकामत्वम् ॥ ३१ ॥ प्रशमं प्रसादम् । मरुद्गणाः देवगणाः । मही न चकम्पे महीकम्पाभावस्य शुभसूचकत्वात् इत्याहुः । रावणवधपर्यन्तं सकम्पा स्थिता मही तद्वधानन्तरं निष्कम्पाऽभवादिति चाहुः । ववौ, सुखमिति शेषः ॥ ३२ ॥ सुहृद्विशेषाः जाम्बवदादयः ।

आविवेश महाहर्षो देवानां चारणैः सह। रावणे निहते रौद्रे सर्वलोकभयङ्करे ॥ ३० ॥ ततः सकामं सुग्रीवमङ्गदं च महाबलम् । चकार राघवः प्रीतो हत्वा राक्षसपुङ्गवम् ॥ ३१ ॥ ततः प्रजग्मुः प्रशमं मरुद्गणा दिशः प्रसेदुर्विमलं नभोऽभवत् । मही चकम्पे न हि मारुतो ववौ स्थिरप्रभश्चाप्यभवद्दिवाकरः ॥ ३२ ॥ ततस्तु सुग्रीवविभीषणादयः सुहृद्विशेषाः सहलक्ष्मणास्तदा । समेत्य हृष्टा विजयेन राघवं रणेऽभिरामं विधिना ह्यपूजयन् ॥ ३३ ॥ स तु निहतरिपुः स्थिरप्रतिज्ञः स्वजनबलाभिवृतो रणे रराज । रघुकुलनृपनन्दनो महौजास्त्रिदशगणैरभिसंवृतो यथेन्द्रः ॥ ३४ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकादशोत्तरशततमः सर्गः ॥ १११ ॥

भ्रातरं निहतं दृष्ट्वा शयानं रामनिर्जितम् । शोकवेगपरीतात्मा विललाप विभीषणः ॥ १ ॥
वीर विक्रान्त विख्यात विनीत नयकोविद । महार्हशयनोपेत किं शेषेऽद्य हतो भुवि ॥ २ ॥
विक्षिप्य दीर्घौ निश्चेष्टौ भुजावङ्गदभूषितौ । मुकुटेनापवृत्तेन भास्कराकारवर्चसा ॥ ३ ॥

हिशब्दः पादपूरणे । विजयेन हृष्टा इत्यन्वयः । विधिना क्रमेण ॥ ३३ ॥ फाल्गुनामावास्यायां रावणवधः । यद्वा चैत्रशुद्धप्रतिपदि शिष्टामावास्यायां प्रातःकाले रावणवधः । पूर्वं सर्वरात्रमवर्ततेत्युक्तेः ॥ ३४ ॥ इति श्रीगोवि० श्रीरामा० रत्नकिरी० युद्धकाण्डव्याख्याने एकादशोत्तरशततमः सर्गः ॥ १११ ॥
अथ भ्रातृवधदर्शनेन हठात् प्रवृत्तं प्रकृतिसंबन्धकृतं शोकं सोढुमशक्नुवन् विभीषणो विलपति–भ्रातरमित्यादि । शयानं शयानमिव स्थितम् । शोकवेगपरीतात्मा शोकवेगेन परीतमनस्कः । वेगशब्देन हठकृतः शोक इति द्योत्यते ॥ १ ॥ वीरेत्यादि । विनीत विद्यासु शिक्षित । विक्षिप्येत्यस्य ॥३२२॥
ततः प्रजग्मुः प्रशमं प्रसादं मरुद्गणाः मही न चकम्पे मारुतो ववौ, सुखमिति शेषः । अमावास्यायां रावणवधः ॥ इति० युद्ध० एकादशोत्तरशततमस्सर्गः ॥ १११ ॥ १-४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्लोकस्य पूर्वश्लोकेनान्वयः। भुजावित्यनेनान्त्ययुद्धे द्विभुजस्थितिर्गम्यते। मुकुटेन, उपलक्षित इति शेषः। अपवृत्तेन पतनवेगादीषच्चलितेन ॥ २॥३॥ तदिदमिति। मया पूर्वं समीरितं यद्वचः काममोहपरीतस्य ते न रुचितं नेष्टमासीत्। तदिदं वचः सम्प्राप्तम्, त्वयाऽनुभूतमित्यर्थः ॥ ४ ॥ यदित्यादि सार्धश्लोक एकान्वयः। यत्पापकर्म प्रहस्तो दर्पात् नामन्यतेति विपरिणामेनानुषज्यते। एवं सर्वत्र योजनीयम्। अतिरथ इत्यतिकायविशेषणम्।

तदिदं वीर सम्प्राप्तं मया पूर्वं समीरितम्। काममोहपरीतस्य यत्ते न रुचितं वचः ॥ ४ ॥ यत्र दर्पात् प्रहस्तो वा नेन्द्रजिन्नापरे जनाः। न कुम्भकर्णोऽतिरथो नातिकायो नरान्तकः। न स्वयं त्वममन्येथास्तस्योदर्कोऽयमागतः ॥ ५ ॥ गतः सेतुः सुनीतानां गतो धर्मस्य विग्रहः। गतः सत्त्वस्य संक्षेपः प्रस्तावानां गतिर्गता ॥ ६ ॥ आदित्यः पतितो भूमौ मग्नस्तमसि चन्द्रमाः ॥ ७ ॥ चित्रभानुः प्रशान्तार्चिर्व्यवसायो निरुद्यमः। अस्मिन्निपतिते भूमौ वीरे शस्त्रभृतां वरे ॥८॥ किं शेषमिव लोकस्य हतवीरस्य साम्प्रतम्। रणे राक्षसशार्दूले प्रसुप्त इव पांसुषु ॥ ९ ॥

अमन्येथाः अमन्यथाः। एत्त्वमार्षम्। तृणीकृतवानसीत्यर्थः। तस्य सीताहरणरूपस्य उदर्कः फलमागतम् ॥५॥ गत इति। सुनीतानां नयानां सेतुः मर्यादा। धर्मस्य विग्रहः विरोधः। यद्वा अधर्मस्येति छेदः। विग्रहः देहः। यद्वा धर्मस्य विग्रहः देहः। "एषोहिताग्निश्च महातपाश्च" इत्यादिना रावणस्य धार्मिकत्वकथनात्। सत्त्वस्य बलस्य, संक्षेपः सङ्ग्रहः। प्रस्तावानां प्रकृष्टस्तुतीनां गतिः विषयः ॥ ६ ॥ आदित्य इत्यादिसार्धश्लोक एकान्वयः। अस्मिन्निति। अस्मिन्निपतिते आदित्यः पतित इत्याद्यभेदातिशयोक्तिः। चित्रभानुः वह्निः। "सूर्यवह्नी चित्रभानू" इत्यमरः। व्यवसायो निरुद्यमः, रावणसदृशाश्रयाभावाद्व्यवसायः उत्साहशक्तिः निर्व्यापारोऽभूदित्यर्थः ॥ ७ ॥ ८॥ राक्षसशार्दूले रावणे पांसुषु प्रसुप्त इव स्थिते, मृत इति

यदित्यादि। न स्वयमिति। अमन्येथाः। एत्त्वमार्षम् ॥५॥ गत इति। सेतुः मर्यादा। सुनीतानां नयानां संक्षेपः संक्षिप्यत इति संक्षेपः संग्रहः। प्रस्तावानामुचितोक्तीनां स्तुतीनां वा ॥ ६ ॥ आदित्य इत्यादि। व्यवसायः उत्साहशक्तिः। रावणसदृशाश्रयणीयस्याभावाद्व्यवसायो निर्व्यापारोऽभूदित्यर्थः। अस्मिन्निपतिते भूमावित्यर्धं पूर्वशेषम् ॥ ७ ॥ ८ ॥ किं शेषमिवेत्यर्धमुत्तरशेषम्। पांसुषु प्रसुप्त इव स्थिते सति साम्प्रतं हतवीरस्य लोकस्य किं शेषम्, न किञ्चिदव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यावत् । साम्प्रतं हतवीरस्य लोकस्य किमिव शेषम्, सर्वं शून्यमभूदित्यर्थः ॥ ९ ॥ धृतिरेव प्रवालो यस्य स तथा । धैर्यं हि वृक्षस्य पल्लववत् प्रथम फलम् । प्रसहन इति प्रसहः । पचाद्यच् । भावप्रधानो निर्देशः । स एव अग्र्यपुष्पं श्रेष्ठपुष्पं यस्य स तथा । प्रसहनं हि पुष्पवत्कार्यफलस्य अव्यवहितहेतुः । तप एव बलं स्थैर्यांशो यस्य स तथा । शौर्यमेव निबद्धमूलं निश्चलमूलं यस्य स तथा, शौर्यमूलत्वात् तपःप्रभृतीनां सर्वेषाम् ॥ १० ॥

धृतिप्रवालः प्रसहाग्र्यपुष्पस्तपोबलः शौर्यनिबद्धमूलः । रणे महान् राक्षसराजवृक्षः सम्मर्दितो राघवमारुतेन ॥ १० ॥ तेजोविषाणः कुलवंशवंशः कोपप्रसादापरगात्रहस्तः । इक्ष्वाकुसिंहावगृहीतदेहः सुप्तः क्षितौ रावणगन्धहस्ती ॥ ११ ॥ पराक्रमोत्साहविजृम्भितार्चिर्निश्वासधूमः स्वबलप्रतापः । प्रतापवान् संयति राक्षसाग्निर्निर्वापितो रामपयोधरेण ॥ १२ ॥

तेजः पराक्रम एव विषाणो यस्य स तथा । तेजो हि विषाणवत् परमर्मभेदि । कुलवंशवंशः कुलं पितृपितामहादयः तेषां वंशः सर्गः स एव वंशः पृष्ठावयवविशेषो यस्य स तथा । "वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च" इत्युभयत्रापि विश्वः । कुलेन हि वंशेनेव स्वाश्रितधारणम् । कोप एवापरगात्रं शिरोव्यतिरिक्तशरीरं यस्य स तथा । प्रसाद एव हस्तो यस्य स तथा । कोपस्य बहुत्वादपरगात्रत्वेन रूपणम् । इक्ष्वाकुः रामः स एव सिंहः तेन अवगृहीत देहः रावणगन्धहस्ती रावण एव मत्तगजः क्षितौ सुप्तः, मृत इत्यर्थः ॥ ११ ॥ पराक्रमोत्साहावेव विजृम्भितार्चिः विस्तृतज्वालः । निश्वास एव धूमो यस्य स तथा । स्वबलप्रतापः स्वबलोष्णः । प्रतापवान् तेजस्वी । राक्षसाग्निः रामपयोधरेण निर्वापितः ॥ १२ ॥

शिष्टामित्यर्थः ॥ ९ ॥ प्रसहाग्र्यपुष्पः प्रसहत इति प्रसहः । पचाद्यच् । भावप्रधानोऽयं निर्देशः । प्रसहः प्रसहत्वं तदेवाग्र्यपुष्पं यस्य सः । प्रसवाग्र्यपुष्पः इति पाठे प्रसवः सन्तानः ॥ १० ॥ कुलवंशवंशः कुलं पितृपितामहादयः तेषां वंशो वर्गः स एव वंशः पृष्ठावयवविशेषो यस्य सः । "वंशो वेणौ कुले वर्गे पृष्ठस्यावयवेऽपि च" इति विश्वः । कोपप्रसादापरगात्रहस्तः कोपापरगात्रः प्रसादहस्तश्चेत्यर्थः । इक्ष्वाकुः रघुनाथः ॥ ११ ॥ पराक्रमोत्साहावेव विजृम्भितार्चिः । स्वबलमेव प्रतापः । प्रतापवान् तेजस्वी ॥ १२ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सिंहर्क्षाः राक्षसाः त एव लाङ्गूलककुद्विषाणानि यस्य स तथा। "सिंहर्क्षा राक्षसाः प्रोक्ता यक्षा उष्णीषिणो मताः।" इति निघण्टुः। यद्वा सिंहर्क्षं मूलानक्षत्रं तच्च राक्षसनक्षत्रम्। यथाऽऽह ज्योतिषे काश्यपः-"अग्निर्मघा विशाखा च आश्लेषा शततारका। धनिष्ठा चित्रया युक्ता ज्येष्ठा मूला च राक्षसाः॥" इति। तत्सम्बन्धाद्राक्षसा अपि तच्छब्देनोच्यन्ते। राक्षसतत्वृद्धेर्गर्वहेतुत्वेन लाङ्गूलादित्वेन रूपणम्। परानभिजयतीति पराभिजित्। गन्धने परोत्सादने गन्धहस्ती मुख्यः। "गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने" इति विश्वः। चापलं विषयलौल्यम्, तदेव कर्णचक्षुषी यस्य

सिंहर्क्षलाङ्गूलककुद्विषाणः पराभिजिद्गन्धनगन्धहस्ती। रक्षोवृषश्चापलकर्णचक्षुः क्षितीश्वरव्याघ्रहतोऽवसन्नः ॥१३॥ वदन्तं हेतुमद्वाक्यं परिमृष्टार्थनिश्चयम्। रामः शोकसमाविष्टमित्युवाच विभीषणम् ॥ १४ ॥ नायं विनष्टो निश्चेष्टः समरे चण्डविक्रमः। अत्युन्नतमहोत्साहः पतितोऽयमशङ्कितः ॥१५॥ नैवं विनष्टाः शोच्यन्ते क्षत्रधर्ममवस्थिताः। वृद्धिमाशंसमाना ये निपतन्ति रणाजिरे ॥ १६ ॥

स तथा। रक्षोवृषः रावणवृषभः, क्षितीश्वरव्याघ्रेण रामशार्दूलेन, हतः अवसन्नः मृतः॥ १३ ॥ वदन्तमिति। परिमृष्टार्थनिश्चयं कृतार्थनिश्चयम् ॥१४॥ अयं निश्चेष्टः निर्विक्रमः न विनष्टः, अपि त्वयं समरे चण्डविक्रमः अत्युन्नतमहोत्साहः अशङ्कितः पतितः विनष्टः॥ १५ ॥ यदि समरे विक्रम्य नष्टः ततः किमित्यत्राह-नैवमित्यादि। ये वृद्धिं परलोकवृद्धिम्, आशंसमानाः आकाङ्क्षमाणाः सन्तः रणाजिरे निपतन्ति। क्षत्रधर्ममवस्थिताः शूरधर्मं

सिंहर्क्षलाङ्गूलककुद्विषाणः सिंहर्क्षाः राक्षसाः त एव लाङ्गूलककुद्विषाणानि यस्य सः। "सिंहर्क्षा राक्षसाः प्रोक्ता यक्षा उष्णीषिणो मताः।" इति शाश्वतः। परानभिजयतीति पराभिजित्। गन्धनगन्धहस्ती गन्धने उत्सादने गन्धहस्ती मदगजतुल्यः। "गन्धनं सूचनोत्साहहिंसनेषु प्रकाशने" इति विश्वः। चापलकर्णचक्षुः चापलं धर्मस्खलनं तदेव कर्णचक्षुषी यस्य सः॥ १३ ॥ १४ ॥ नायमिति। अयं निश्चेष्टः निर्विक्रमो न विनष्टः, अपितु समरे चण्डविक्रमः उन्नतमहोत्साहः अशङ्कितः पतितः नष्टः ॥ १५ ॥ ततः किमित्यत आह-नैवं विनष्टा इति। ये वृद्धिमाशंसमाना रणाजिरे निपतन्ति क्षत्रधर्मव्यवस्थिताः केवलं

स०-पराभिजिद्गन्धनगन्धहस्ती परानभिजयन्तीति पराभिजितः, तद्गन्धने हिंसायां गन्धहस्ती मतंगजतुल्यः। चापलकर्णचक्षुः चापलं चञ्चलं कर्णचक्षुः यस्य सः। कर्णयोश्चापलम् अश्राव्यशूर्पणखादिप्रलपितश्रवणेन तत्र चित्तप्रणिधानम्। चक्षुषोः अनवलोकनीयपरदारसौन्दर्यदर्शनम् ॥ १३ ॥ यमशङ्कितः यमः शङ्कितो यस्मादिति वा ॥ १५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यवस्थिताः । एवं विनष्टाः ते न शोच्यन्ते ॥ १६ ॥ न केवलं समरमरणादेव नशोच्यत्वम्, किंतु यशःप्रत्यासक्त्यापीत्याह–येनेति । येन वित्रासिताः तस्मिन् रावणे कालसमायुक्ते शोचितुं न कालः नावसरः, तद्विषये शोको न युक्तः, वीरस्वर्गगमनादिति भावः ॥ १७ ॥ तथाऽपि मरणे सति कथं न शोचितव्यमित्याशङ्क्य जयवत्पराजयोऽपि न शोकस्थानमित्याह–नैकान्तेति । एकान्तविजयः न भूतपूर्वः इतः पूर्वं न भूतः । अनैकान्त्यमुपपाद

येन सेन्द्रास्त्रयो लोकास्त्रासिता युधि धीमता । तस्मिन् कालसमायुक्ते न कालः परिशोचितुम् ॥ १७ ॥ नैकान्त विजयो युद्धे भूतपूर्वः कदाचन । परैर्वा हन्यते वीरः परान् वा हन्ति संयुगे ॥ १८ ॥ इयं हि पूर्वैः सन्दिष्टा गतिः क्षत्रिय संमता । क्षत्रियो निहतः सङ्ख्ये न शोच्य इति निश्चयः ॥ १९ ॥ तदेवं निश्चयं दृष्ट्वा तत्त्वमास्थाय विज्वरः । यदिहा नन्तरं कार्यं कल्प्यं तदनुचिन्तय ॥ २० ॥ तमुक्तवाक्यं विक्रान्तं राजपुत्रं विभीषणः । उवाच शोकसन्तप्तो भ्रातुर्हितमनन्तरम् ॥ २१ ॥ योऽयं विमर्देषु न भग्नपूर्वः सुरैः समेतैः सह वासवेन । भवन्तमासाद्य रणे विभग्नो वेलामिवासाद्य यथा समुद्रः ॥ २२ ॥ अनेन दत्तानि सुपूजितानि भुक्ताश्च भोगा निभृताश्च भृत्याः । धनानि मित्रेषु समर्पितानि वैराण्यमित्रेषु च यापितानि ॥ २३ ॥

यति परैर्वेति ॥ १८ ॥ क्षत्रधर्मपर्यालोचनेनापि न शोच्य इत्याह–इयं हीति । क्षत्रियः शूरः ॥ १९ ॥ तदेवमिति । दृष्ट्वा ज्ञात्वा । तत्त्वमास्थाय परमार्थ बुद्धिमवलम्ब्य, जनिमतामवश्यं मृत्युं ज्ञात्वेत्यर्थः । विज्वरः निःशोकः । यत् कार्यं कर्म । कल्प्यम् अनुष्ठेयम् । तदनुचिन्तय । कल्यमिति पाठे यत् कार्यं कल्यम्, योग्यमित्यर्थः । "कल्यो योग्यश्च ते समाः" इति निघण्टुः ॥ २० ॥ २१ ॥ योऽयमिति । विमर्देषु समरेषु । अनेन महावीरतया सम्यक् संस्कार मर्हतीत्युक्तम् ॥ २२ ॥ धर्मशीलत्वाच्च तदर्हतीत्याह–अनेनेति । दत्तानि दानानि कृतानि । सुपूजितानि, गुरुदेवतानीति शेषः । निभृताः नितरां भृताः । ॥१२४॥

विनष्टास्ते न शोच्यन्ते ॥ १६ ॥ न केवलं समरमरणादेवाशोच्यत्वम्, किन्तु यशःप्रतापसम्पत्त्याऽपीत्याह–येन सेन्द्रा इति ॥ १७ ॥ तथापि मरणे सति न शोचितव्यम् ? इत्याशङ्क्य जयवत्पराजयोऽपि न शोकस्थानमित्याह–नैकान्तविजय इति ॥ १८ ॥ क्षत्रधर्मपर्यालोचनयाऽपि न शोच्य इत्याह–इयं हीति ॥ १९ ॥ दृष्ट्वा ज्ञात्वा । तत्त्वमास्थाय निश्चितत्वमवलम्ब्य । कल्प्यम् अनुष्ठेयम् ॥ २०–२२ ॥ अनेन दत्तानि दानानि कृतानि । सुपूजितानि स्वनुष्ठितानि । निभृताः नितरां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यापितानि सफलीकृतानीत्यर्थः ॥२३॥ आहिताग्न्यादित्वाच्च तदर्हतीत्याह—एषोहिताग्निरिति। हिताग्निः आहिताग्निः। सन्धिरार्षः। वेदान्तं गच्छति जानातीति वेदान्तगः। कर्मसु चाग्र्यवीर्यः कर्मशूर इत्यर्थः। प्रेतगतस्य प्रेतत्वं गतस्य। इच्छामि, पुत्राणां विनष्टत्वेन भ्रातुरेवाधिकारित्वादिति भावः ॥२४॥ स तस्येति। करुणैरित्यनेन दुःखातिशयादिदानीमेवभुक्तमिति द्योत्यते। वक्ष्यति हि नाहमस्य संस्कारं करिष्यामीति। स्वर्गीयं स्वर्गाय हितम्।

एषोहिताग्निश्च महातपाश्च वेदान्तगः कर्मसु चाग्र्यवीर्यः। एतस्य यत् प्रेतगतस्य कृत्यं तत् कर्तुमिच्छामि तव प्रसादात् ॥ २४ ॥ स तस्य वाक्यैः करुणैर्महात्मा सम्बोधितः साधु विभीषणेन। आज्ञापयामास नरेन्द्रसूनुः स्वर्गीयमाधानमदीनसत्त्वः ॥ २५ ॥ मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम्। क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ २६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदि० श्रीमद्युद्धकाण्डे द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

आधानम् अन्त्येष्टिसंज्ञिकं कर्म ॥ २५ ॥ वैरातिरेकात् संस्कारे मम द्वेष इति न शङ्कनीयामित्याह—मरणेति। मरणानन्तरमपि वैरकरणं निष्प्रयोजनमित्याह—निर्वृत्तमिति। प्रयोजनं सीतालाभरूपम्। अस्य संस्कारः यायजूकोचितसंस्कारः, क्रियताम्। ममाप्येष यथा तव। तव यथा भ्राता तथा ममापि भ्राता, मद्भ्रातृभूतस्य तव भ्रातृत्वात्। त्वमस्य दोषं दृष्ट्वा न करोषि चेदहमेव करिष्यामि, भ्रातृषु येन केनापि कर्तव्यमिति भावः। अत्र श्लोके न इति गायत्र्यक्षरम्। अत्राचार्या व्याचख्युः—मरणान्तानि वैराणि, ऋषिजनस्थानभ्रंशमैथिलीहरणमत्प्राणभूतजटायुविध्वंसनप्रभृतिमद्द्वेषाचरणमितः परं कर्तुं न शक्नोति हीति भावः। निर्वृत्तं नः प्रयोजनम् 'यदि वा रावणः स्वयम्' इति वदता मयाऽस्य विषये किञ्चिच्छुभं कर्तव्यमिति मनसि कृतम्। तदनेन 'द्विधा भज्येयमप्येवं न नमेयं तु कस्यचित्' इति वदता प्रतिहतम्। तत्करणस्येदानीमवसरः सञ्जात इति भावः। क्रियतामस्य संस्कारः, मत्कृतहितप्रतिषेधानर्हावस्था इदानीमस्य सञ्जाता, अतोऽयं न त्याज्यः। अतः परं यत्कर्तव्यं तत्कार्यमेव। ममाप्येष यथा तव, अयं मच्चित्तानुकूलो जातः, अतो मन्मित्रभूतो भवानपि तमनुवर्तितुमर्हति। अथवा एषः तव यथा तथा ममापि, अस्य संस्कारस्तव यथा प्राप्तः तथा ममापीत्यर्थः।

पोषिताः ॥ २३ ॥ एष इति। आहिताग्निः कर्मसु अग्र्यः शूरः कर्मठः। प्रेतगतस्य प्रेतत्वं गतस्य ॥२४॥ संबोधितः आज्ञप्तः। स्वर्गीयं स्वर्गाय हितम्। आधानं संस्कारम् ॥ २५ ॥ गायत्र्याः विंशतितमाक्षरं "मरणान्तानि वैराणि" इत्यस्य श्लोकस्य द्वादशाक्षरेण न इत्यनेन संगृह्णाति-मरणान्तानीति। एष रावणः तव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भवानस्य संस्कारं न करोति चेदहमेव करोमि । बन्धुषु येन केनापि कर्तव्यं खल्विदम्, तद्दूरे तिष्ठ अहमेव करिष्यामीत्यर्थ इति ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥

रावणं निहतं श्रुत्वा राघवेण महात्मना । अन्तःपुराद्विनिष्पेतू राक्षस्यः शोककर्शिताः ॥१॥ वार्यमाणाः सुबहुशो वेष्टन्त्यः क्षितिपांसुषु । विमुक्तकेश्यो दुःखार्ता गावो वत्सहता इव ॥ २ ॥ उत्तरेण विनिष्क्रम्य द्वारेण सह राक्षसैः । प्रविश्यायोधनं घोरं विचिन्वन्त्यो हतं पतिम् ॥ ३ ॥ राजपुत्रेतिवादिन्यो हा नाथेति च सर्वशः । परिपेतुः कबन्धाङ्कां महीं शोणितकर्दमाम् ॥ ४ ॥ ता बाष्पपरिपूर्णाक्ष्यो भर्तृशोकपराजिताः । करेण्व इव नर्दन्त्यो विनेदुर्हतयूथपाः ॥५॥ ददृशुस्तं महावीर्यं महाकायं महाद्युतिम् । रावणं निहतं भूमौ नीलाञ्जनचयोपमम् ॥६॥ ताः पतिं सहसा दृष्ट्वा शयानं रणपांसुषु । निपेतुस्तस्य गात्रेषु च्छिन्ना वनलता इव ॥ ७ ॥ बहुमानात् परिष्वज्य काचिदेनं रुरोद ह । चरणौ काचिदालिङ्ग्य काचित् कण्ठेऽवलम्ब्य च ॥८॥ उद्धृत्य च भुजौ काचिद्भूमौ स्म परिवर्तते । हतस्य वदनं दृष्ट्वा काचिन्मोहमुपागमत् ॥ ९ ॥ काचिदङ्के शिरः कृत्वा रुरोद मुखमीक्षती । स्नापयन्ती मुखं बाष्पैस्तुषारैरिव पङ्कजम् ॥ १० ॥ एवमार्ताः पतिं दृष्ट्वा रावणं निहतं भुवि । चुक्रुशुर्बहुधा शोकाद्भूयस्ताः पर्यदेवयन् ॥ ११ ॥ येन वित्रासितः शक्रो येन वित्रासितो यमः । येन वैश्रवणो राजा पुष्पकेण वियोजितः ॥ १२ ॥

अथ रावणान्तःपुरस्त्रीविलापः—रावणमित्यादिश्लोकद्वयमेकान्वयम् । वत्सहताः हतवत्साः ॥ १ ॥ २ ॥ उत्तरेणेत्यादिश्लोकद्वयमेकान्वयम् । शोणितैः कर्दमो यस्यास्तां शोणितकर्दमाम् ॥ ३ ॥ ४ ॥ ता इति । हतयूथपा इति करेणुविशेषणम् । अत एव नर्दन्त्यः करेण्व इव विनेदुरित्यन्वयः ॥५–७॥ बहुमानादित्यादिश्लोकत्रयमेकान्वयम् । परिवर्तते वेष्टते । ईक्षती ईक्षमाणा ॥ ८–१० ॥ एवमिति । चुक्रुशुरिति । क्रोशः निरक्षरध्वनिः । परिदेवनं ॥२२५॥

यथा ममापि तथा, ममापि स्नेहविषय इत्यर्थः । अतः संस्क्रियतां शङ्कां मा कुर्विति भावः ॥२६॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥ रावणमित्यादि श्लोकद्वयमेकं वाक्यम् । वार्यमाणा इति । वत्सहताः हतवत्साः ॥ १–१५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

साक्षरशब्दः ॥ ११–१२ ॥ असुरेभ्य इति । मानुषाद्भयम्, जातमिति शेषः ॥ १४ ॥ १५ ॥ य इति । कश्चिदिव यः कश्चित् पुरुष इव । लम्भितः प्रापितः ॥ १६ ॥ १७ ॥ अशृण्वतेति । सुहृदां सुहृद्भ्यः । पञ्चम्यर्थे षष्ठी । वचनमिति वा शेषः । अशृण्वता त्वया ॥ १८ ॥ एताः वयं ते राक्षसाः आत्मा च समं युगपत् इदानीं पातिताः, मारिता इत्यर्थः । ब्रुवाण इति । इष्टः प्रीतिमान् ॥ १९ ॥ यदीत्यादिश्लोकद्वयमेकान्वयम् । ते त्वया ।

गन्धर्वाणामृषीणां च सुराणां च महात्मनाम् । भयं येन महद्दत्तं सोऽयं शेते रणे हतः ॥१३॥ असुरेभ्यः सुरेभ्यो वा पन्नगेभ्योऽपि वा तथा । न भयं यो विजानाति तस्येदं मानुषाद्भयम् ॥१४॥ अवध्यो देवतानां यस्तथा दानवरक्षसाम् । हतः सोऽयं रणे शेते मानुषेण पदातिना ॥ १५॥ यो न शक्यः सुरैर्हन्तुं न यक्षैर्नासुरैस्तथा । सोऽयं कश्चिदिवासत्त्वो मृत्युं मर्त्येन लम्भितः ॥ १६ ॥ एवं वदन्त्यो बहुधा रुरुदुस्तस्य ताः स्त्रियः । भूय एव च दुःखार्ता विलेपुश्च पुनःपुनः ॥ १७ ॥ अशृण्वता च सुहृदां सततं हितवादिनाम् । मरणायाहृता सीता घातिताश्च निशाचराः ॥ १८ ॥ एताः सममिदानीं ते वयमात्मा च पातिताः । ब्रुवाणोऽपि हितं वाक्यमिष्टो भ्राता विभीषणः । धृष्टं परुषितो मोहात्त्वयाऽऽत्मवधकांक्षिणा ॥१९॥ यदि निर्यातिता ते स्यात् सीता रामाय मैथिली । न नः स्याद्व्यसनं घोरमिदं मूलहरं महत् ॥२०॥ वृत्तकामो भवेद्भ्राता रामो मित्रकुलं भवेत् । वयं चाविधवाः सर्वाः सकामा न च शत्रवः ॥२१॥ त्वया पुनर्नृशंसेन सीतां संरुन्धता बलात् । राक्षसा वयमात्मा च त्रयं तुल्यं निपातितम् ॥२२॥

निर्यातिता प्रत्यर्पिता । मूलहरं मूलभूतत्वत्पर्यन्तहरम् । वृत्तेति । यदि सीता निर्यातिता स्यात्तदा भ्राता विभीषणो वृत्तकामः निष्पन्नमनोरथः भवेत्, स्ववाक्यकरणादिति भावः । तथा रामः मित्रकुलं कुलमित्रम् । शत्रवः देवादयः ॥ २० ॥ २१ ॥ त्वयेति । तुल्यमिति । युगपदित्यर्थः ॥

य इति । लम्भितः प्रापितः ॥ १६ ॥ १७ ॥ अशृण्वतेति । सुहृदां, वाक्यमिति शेषः ॥ १८ ॥ एताः वयं ते राक्षसाः आत्मा त्वं च सममेककालमेव पातिताः धृष्टं मत्यक्षम् ॥ १९ ॥ यदीत्यादि श्लोकद्वयमेकं वाक्यम् । ते त्वया निर्यातिता प्रत्यर्पिता चेत् ॥ २० ॥ वृत्तकामः निष्पन्नमनोरथः । स्ववाक्य

स०–असत्त्वः अल्पबल इत्यर्थः, असुदरा कन्येत्यत्रेव । मर्त्येन स्वकर्तृकमरणयोग्येन रामेण । लम्भितः प्रापितः मृत्युं यमं प्रतीति वा ॥ १६ ॥

For Private And Personal Use Only

दित्यर्थः ॥ २२ ॥ एवं रावणस्वेच्छाचरणस्य राक्षसनाशहेतुतामभिधाय सम्प्रति तन्निरासपूर्वकं दैवकारितत्वं दर्शयति–न कामकार इति । कामकारः स्वच्छन्दकरणम्, कामं प्रकामं नास्ति । कुतः ? दैवं चेष्टयते सर्वं, हतं दैवेन हन्यते । दैवेन हतमन्येन हन्यते ॥ २३ ॥ २४ ॥ नैवेति । उद्यता कार्योन्मुखी दैवगतिः अर्थादिना न निवर्तयितुं शक्या । कामेन स्वेच्छया ॥ २५ ॥ विलेपुरिति । कुरर्यः क्रौञ्च्यः ॥२६॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥

न कामकारः कामं वा तव राक्षसपुङ्गव । दैवं चेष्टयते सर्वं हतं दैवेन हन्यते ॥ २३ ॥ वानराणां विनाशोऽयं रक्षसां च महाहवे । तव चैव महाबाहो दैवयोगादुपागतः ॥ २४ ॥ नैवार्थेन न कामेन विक्रमेण न चाज्ञया । शक्या दैवगतिर्लोके निवर्तयितुमुद्यता ॥ २५ ॥ विलेपुरेवं दीनास्ता राक्षसाधिपयोषितः । कुरर्य इव दुःखार्ता बाष्पपर्याकुलेक्षणाः ॥२६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रयोदशोत्तरशततमः सर्गः॥११३॥

तासां विलपमानानां तथा राक्षसयोषिताम् । ज्येष्ठा पत्नी प्रिया दीना भर्तारं समुदैक्षत ॥ १ ॥
दशग्रीवं हतं दृष्ट्वा रामेणाचिन्त्यकर्मणा । पतिं मण्डोदरी तत्र कृपणा पर्यदेवयत् ॥ २ ॥

अथ मण्डोदरीप्रलापादि–तासामित्यादि । विलपमानानां विलपन्तीनाम् । तथा विलपमानानामित्यन्वयः । दीना सती समुदैक्षत ॥ १ ॥ दशग्रीवमिति । मण्डोदरी मण्डनभूतोदरी, कृशोदरीति यावत् । "मडि भूषायाम्" इति धातोर्भावे कप् प्रत्ययः । मण्डं सारं सुन्दरमिति यावत् । तादृशोदरीत्येके ।

करणादिति भावः । मित्रकुलं मित्रपक्षः ॥ २१ ॥ २२ ॥ एवं रावणस्य स्वेच्छाचरणस्य राक्षसनाशहेतुतामभिधायेदानीं तन्निरासपूर्वकं दैवस्य तत्कारणत्वं दर्शयति–न कामकार इति । तव कामकारः स्वेच्छाचरणं कामं वा नास्ति, तव स्वेच्छाधीनव्यवहारो नास्तीत्यर्थः । कुतः ? दैवं चेष्टयते सर्वं हतं दैवेन हन्यते दैवेन हतमन्येन हन्यते ॥ २३ ॥ २४ ॥ उद्यता सर्वयत्नेनापि ॥ २५ ॥ २६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रयोदशोत्तरशततमः सर्गः ॥ ११३ ॥ १ ॥ दशग्रीवमिति । मण्डोदरी मण्डनभूतोदरी । कृशोदरीति यावत् । "मडि भूषायाम्" इति धातुः ॥ २–५ ॥ ॥३२६॥

स०–दैवम् अदृष्टप्रेरको हरिरेव । सर्वं चराचरं चेष्टयते चेष्टयति । अतोऽन्येषां तत्रास्वातन्त्र्यमप्यर्थः । दैवेन हतमेव केनचिन्निमित्तेन हन्यते न त्वन्यथा ॥ २३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मण्डा पृथुपिपीलिका तस्या इव उदरं यस्याः सा मण्डोदरीत्यप्याहुः ॥ २ ॥ यद्यपि समरमरणं शूराणां श्लाघ्यमिति न वीरपत्नी तच्छोचितुमर्हा, तथाप्यसमानान्मानुषात् प्राप्तमिदं लज्जावहमिति शोचति—ननु नाम तवेत्यादिना सार्धश्लोकेन। नाम प्रसिद्धौ। महीदेवाः ब्राह्मणाश्च, त्रस्यन्तीत्यनुषङ्गः। स कथं मानुषेण जित इति शेषः ॥ ३ ॥ ४ ॥ ननु नामेत्यादिसार्धश्लोक एकान्वयः। चारणाश्च आकाशचारिणश्च। न व्यपत्रपसे, मानुषविजयेनेति

ननु नाम महाभाग तव वैश्रवणानुज। क्रुद्धस्य प्रमुखे स्थातुं त्रस्यत्यपि पुरन्दरः ॥ ३ ॥ ऋषयश्च महीदेवा गन्धर्वाश्च यशस्विनः ॥४॥ ननु नाम तवोद्वेगाच्चारणाश्च दिशो गताः। स त्वं मानुषमात्रेण रामेण युधि निर्जितः। न व्यपत्रपसे राजन् किमिदं राक्षसर्षभ ॥ ५ ॥ कथं त्रैलोक्यमाक्रम्य श्रिया वीर्येण चान्वितम्। अविषह्यं जघान त्वां मानुषो वनगोचरः ॥ ६ ॥ मानुषाणामविषये चरतः कामरूपिणः। विनाशस्तव रामेण संयुगे नोपपद्यते ॥ ७ ॥ न चैतत् कर्म रामस्य श्रद्दधामि चमूमुखे। सर्वतः समुपेतस्य तव तेनाभिमर्शनम् ॥ ८ ॥

शेषः। किमिदं किमेवमवस्थानकारणमित्यर्थः ॥ ५ ॥ कथमिति। वीर्येण त्रैलोक्यमाक्रम्य श्रियाऽन्वितं त्वां मानुषस्तत्रापि वनगोचरः कथं जघान, अद्भुतमित्यर्थः ॥ ६ ॥ तदेवासम्भावितत्वं निरूपयति—मानुषाणामिति। अविषये अगम्यदेशे ॥ ७ ॥ न चैतदिति। सर्वतः समुपेतस्य सर्वयुद्धोपकरणैः पूर्णस्य तव, तेन रामेण अभिमर्शनम् आक्रमणमिति यत्, एतद्रामस्य न श्रद्दधामि रामसम्बन्धिकर्मेति न श्रद्दधामि ॥८॥ रामानु०—नचैतत्कर्मेत्येतच्छ्लोकानन्तरं, यदैव च जनस्थाने राक्षसैर्बहुभिर्वृतः। खरस्तव हतो भ्राता तदैवासौ न मानुषः॥ यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि। प्रविष्टो हनुमान् वीर्यात् तदैव व्यथिता वयम्॥ यदैव वानरै र्घोरैर्बद्धः सेतुर्महार्णवे। तदैव हृदयेनाहं शङ्के रामममानुषम्॥ अथवा रामरूपेण कृतान्तः स्वयमागतः। मायां तव विनाशाय विधायाप्रतितर्किताम्॥ अथवा वासवेन त्वं धर्षितोऽसि महाबल। वासवस्य कुतः शक्तिस्त्वां द्रष्टुमपि संयुगे॥ इति पाठक्रमः। अन्यथापाठस्तु लेखकप्रमादकृतः। रामस्य सामान्यतो मानुषत्वप्रतिपादनानन्तरमुत्तरोत्तरोत्कृष्टयमेन्द्रादिदेवताविशेषत्वप्रतिपादनौचित्यात्। यदैवेति। न मानुषः, निश्चित इति शेषः ॥ ८ ॥ ९ ॥

कथमिति। वीर्येण त्रैलोक्यमाक्रम्य श्रियाऽन्वितं त्वामिति सम्बन्धः॥६॥ मानुषाणामविषये अप्राप्यदेशे॥७॥सर्वतस्समुपेतस्य सर्वैस्साधनैस्समुपेतस्य तव तेन रामेण

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रावणवधस्य मानुषेणाकृतत्वे केन कृतः स्यादित्याशङ्क्य पक्षान्तरमुपक्षिपति–यदैवेत्यादिना ॥ ९–११ ॥ एवं सामान्यतो रामस्यामानुषत्वं प्रतिपाद्य उत्तरोत्तरोत्कृष्टयमेन्द्रादिदेवताविशेषत्वं प्रतिपादयति–अथवेत्यादिना । मायां सीतारूपाम् । अप्रतितर्किताम् अपरिमेयरूपलावण्याम् ॥ १२ ॥१३॥ यदैवेत्यादिना सामान्यत उपन्यस्तममानुषत्वमेकत्र व्यवस्थापयितुमाह–व्यक्तमित्यादिना । महायोगित्वादिगुणविशिष्टो यो विष्णुः स एवैष राम इति

यदैव च जनस्थाने राक्षसैर्बहुभिर्वृतः । खरस्तव हतो भ्राता तदैवासौ न मानुषः ॥९॥ यदैव नगरीं लङ्कां दुष्प्रवेशां सुरैरपि । प्रविष्टो हनुमान् वीर्यात्तदैव व्यथिता वयम् ॥ १० ॥ यदैव वानरैर्घोरैर्बद्धः सेतुर्महार्णवे । तदैव हृदयेनाहं शङ्के रामममानुषम् ॥११॥ अथवा रामरूपेण कृतान्तः स्वयमागतः । मायां तव विनाशाय विधायाप्रतितर्किताम् ॥ १२ ॥ अथवा वासवेन त्वं धर्षितोऽसि महाबल । वासवस्य कुतः शक्तिस्त्वां द्रष्टुमपि संयुगे ॥ १३ ॥ व्यक्तमेष महायोगी परमात्मा सनातनः । अनादिमध्यनिधनो महतः परमो महान् ॥ १४ ॥

स्त्रीवचनमुखेनैव विष्णोः सर्वदेवतापारम्यं भगवान् वाल्मीकिर्व्यवस्थापयति। महान् योगः लोकरक्षणोपायचिन्ता सोऽस्यास्तीति महायोगी । परमश्चासावात्मा च परमात्मा, सर्वजीवात्मभ्य उत्कृष्ट इत्यर्थः । परमत्वमस्य कथमित्याशङ्क्य षड्भावविकाररहितत्वादित्याह सनातन इति । सदाऽस्तित्वयुक्त इत्यर्थः । अनादिमध्यानिधनः जन्मवृद्धिविनाशशून्यः । शाश्वतः अपक्षयरहितः । ध्रुवः परिणामरहितः । एतैर्विशेषणैर्जीवगतषड्भावविकारशून्यत्वमुक्तम् । तथोक्तं श्रीविष्णुपुराणे–"अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः।वर्जितः शक्यते वक्तुं यः सदाऽस्तीति केवलम्॥" इति। परमात्मशब्दार्थं विवृणोति महतः परमो महानिति । महान् इन्द्रादिः, तस्मान्महान् ब्रह्मादिः, तस्मादपि महानित्यर्थः ॥ १४ ॥ तनि०– व्यक्तमेषः परिशेषतः प्रमाणेन निश्चितो

अभिमर्शनम् आक्रमणं यत् एतत् रामस्य न श्रद्दधामि रामसम्बन्धीति न श्रद्दधामीत्यर्थः ॥ ८ ॥ तस्मिन्नमानुषत्वे लिङ्गान्याह–यदैव च जनस्थान इत्यादित्रिभिः । व्यथिताः रामस्यामानुषत्वादिनिश्चयेनेति भावः ॥ ९–११ ॥ तर्हि केन वधः कृत इत्यत्राह–अथवेति । रामरूपेण मानुषरूपेण मायाम् अपेक्षितशरीरग्रहणहेतुभूतां काञ्चिच्छक्तिं विधाय । इदानीं पक्षान्तरमवलम्बते–अथवेति । अथवा अन्यः पक्षोऽस्तीत्यर्थः । पूर्वस्मिन् पक्षे को दोष इत्याशङ्क्याह–वासवस्येति । वासवेन धर्षितोऽसीति यत् तन्नैवोपपद्यते । वासवस्य त्वां द्रष्टुमपि शक्तिः कुतः ? नास्तीत्यर्थः ॥ १२ ॥१३ ॥ पक्षान्तरं विशिनष्टि–व्यक्तमेष इत्यादिद्वाभ्याम् । महायोगी

For Private And Personal Use Only

दशग्रीवहन्ता रामः । महायोगी महासन्नहनः आश्रितत्राणसन्नाहवान् । महायोगी विविधविचित्रजगन्निर्माणोपायचतुरः । महायोगी "बहु स्यां प्रजायेयेति" इत्याद्युक्त बहुभवनसङ्कल्पवान् । "सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः" इति मनुस्मरणात् । महायोगी जगन्निर्माणोपयुक्तप्रकृतिपुरुषकारकर्मसंसर्गवान् । महायोगी शरणागतरक्षणादिष्वसद्भाल्पयुक्तिमान् । "योगः सन्नहनोपायध्यानसङ्गतियुक्तिषु" इत्यमरः । परमात्मा चेतनाचेतनशरीरः । सकलशरीरत्वप्रसक्तदोषासंस्पर्शमाह सनातन इति । अनादिमध्यनिधनः आदिमध्यान्तशून्यः । महतः परमो महान् । "अणोरणीयान् महतो महीयान्" इत्याद्युक्तपरममहत्त्ववान् ॥ १४ ॥ स्थानविशेषेणापि परमत्वमाह–तमस इति । तमसः प्राकृतमण्डलस्य, परमः परस्तादप्राकृते वैकुण्ठे विद्यमानः । "आदित्यवर्णं तमसः परस्तात्" "आदित्यवर्णं तमसस्तु पारे" इति श्रुतेः । सर्वत्र व्याप्तस्य कथं तत्रावस्थानमित्याशङ्क्य विग्रहद्वारेत्याह शङ्खेत्यादिना । सदा शङ्खचक्रधारणप्रयोजनमाह

तमसः परमो धाता शङ्खचक्रगदाधरः । श्रीवत्सवक्षा नित्यश्रीरजय्यः शाश्वतो ध्रुवः ॥ १५ ॥

धातेति । धाता पोषकः । "डुधाञ् धारणपोषणयोः" इत्यस्मात्तृच् । सर्वदा रक्षणार्थमायुधधारणमित्यर्थः । तथोक्तमभियुक्तैः–"पातु प्रणतरक्षायां विलम्बमसहन्निव । सदा पञ्चायुधीं बिभ्रत्स नः श्रीरङ्गनायकः ॥" इति । तस्य सर्वेश्वरत्वद्योतकं लक्षणमाह श्रीवत्सवक्षा इति । श्रीकरो वत्सः श्रीवत्सः, स च रक्तवर्णो मत्स्यविशेषः, सः वक्षसि दक्षिणे यस्य स श्रीवत्सवक्षाः । जगद्रक्षणोपयोगिपुरुषकारसंबन्धमाह नित्यश्रीरिति । नित्या अनपायिनी श्रीर्यस्यासौ नित्यश्रीः । "विष्णोः श्रीरनपायिनी" इत्यन्यत्रोक्तेः । अत एव अजय्यः जेतुमशक्यः । "क्षय्यजय्यौ शक्यार्थे" इति निपातनात् । एष रामः एवंभूतः परमात्मा, व्यक्तं निश्चितमिति संबन्धः ॥ १५ ॥ तनि०–तमसः परमः "अक्षरात्परतः परः" "यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः" इति श्रुतिस्मृतिभ्यां तमसः परमः । "आदित्यवर्णं तमसः परस्तात्" इत्युक्तपरमपदवासी । धाता भूतभविष्यद्वर्तमानकालावच्छिन्नसकलजगन्निर्माता । "सूर्याचन्द्रमसौ धाता

स्वाभाविकज्ञानशक्तियुक्तः । "पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुतेः । परमात्मा आत्मनामात्मा, सर्वान्तर्यामीति यावत् । "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति" इति श्रुतेः । सनातनः सदाऽस्तित्वयुक्तः । अनादिमध्यनिधनः जन्मवृद्धिनाशशून्यः । शाश्वतः अपक्षयरहितः । ध्रुवः परिणामशून्यः । एतेन षड्भावविकारशून्यत्वमुक्तम् । तथा च श्रीविष्णुपुराणे–"अपक्षयविनाशाभ्यां परिणामर्द्धिजन्मभिः । वर्जितः शक्यते वक्तुं यस्सदाऽस्तीति केवलम् ॥" इति । महतः परमः महतोऽपि महीयान् । तमसः परमः । धाता स्रष्टा । "यतो वा इमानि भूतानि जायन्ते" इति श्रुतेः । प्रथमं स्वरूपमुक्त्वा इदानीं विग्रहगुणानाह–शङ्खचक्रगदाधर इत्यादिना । नित्यश्रीः नित्यानपायिश्रीः । अजय्यः जेतु

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यथापूर्वमकल्पयत् " इति श्रुतेः। धाता स्थितिकर्ता। सा च स्थितिरनेकरूपा जगद्विविधकरणेन। " डुधाञ् धारणपोषणयोः " इति धातोः धारणं प्रशासनाधीनलोकत्वम्। " एतस्य वा अक्षरस्य प्रशासने " इत्यादिश्रुतेः। एवं कारणस्वरूपमुपास्यं तदुपयुक्ता गुणाश्चोक्ताः। अथ दिव्यमङ्गलविग्रहयोगमाह–शङ्खचक्रगदाधर इति। अनेन उपास्यत्वानुगुणशरणागतविरोधिनिरसनजागरूकत्वमुक्तम्। श्रीवत्सवक्षाः श्रीवत्सकौस्तुभादीनां नित्यत्वाच्छ्रुद्रादिवैलक्षण्यमुक्तम्। नित्यश्रीरिति। नित्या अनपायिनी श्रीर्यस्य सः। अत्र विग्रहनित्यत्वमेवोक्तम्, स्वरूपनित्यत्वस्य साधारणप्राप्तत्वात्। नित्यैवैषा जगन्मातेति यावत्। श्रीसंबन्धादुत्तेजितपराभिभवनसामर्थ्यमाह–अजय्य इति। "अप्रमेयं हि तत्तेजो यस्य सा जनकात्मजा" इति ह्युक्तम्। अजय्यः उपासकव्यतिरिक्तैर्जेतुमशक्यः। अजय्यः " अप्रधृष्यश्च सङ्ग्रामे सेन्द्रैरपि सुरासुरैः " इत्याद्युक्तरीत्या

मानुषं वपुरास्थाय विष्णुः सत्यपराक्रमः। सर्वैः परिवृतो देवैर्वानरत्वमुपागतैः ॥ १६ ॥
सर्वलोकेश्वरः साक्षाल्लोकानां हितकाम्यया। सराक्षसपरीवारं हतवांस्त्वां महाद्युतिः ॥ १७ ॥
इन्द्रियाणि पुरा जित्वा जितं त्रिभुवनं त्वया। स्मरद्भिरिव तद्वैरमिन्द्रियैरेव निर्जितः ॥ १८ ॥
क्रियतामविरोधश्च राघवेणेति यन्मया। उच्यमानो न गृह्णासि तस्येयं व्युष्टिरागता ॥ १९ ॥

जेतुमशक्यः। शाश्वतः त्रिविधपरिच्छेदरहितः विकारशून्यश्च। ध्रुवः अप्रकम्प्यः। अत्र धातेति रूढ्या विशेषणनिर्देशः। "अनादिनिधनो धाता" इति सहस्रनामपाठात्। नित्यश्रीरिति च ॥ १५ ॥ एवंभूतस्य परमात्मनः किमर्थमेवं व्यापार इत्यत्राह द्वाभ्याम्–मानुषमित्यादि। सर्वलोकेश्वरः सर्वलोकानां नियन्ता अनिष्टनिवृत्तीष्टप्रापणयोः कर्ता। विष्णुः विष्णुसकाशादविनाशित्ववरं परिहर्तुं मानुषं वपुः आस्थाय परिगृह्य, साक्षात् अव्यवधानेन, लोकानां हितकाम्यया लोकहितेच्छया सर्वलोकविरोधिनं त्वां हतवान्। व्यक्तमित्यत्रानुषज्यते ॥ १६ ॥ १७ ॥ त्वद्दोषकृत एवायं वध इत्याह–इन्द्रियाणीति ॥ १८ ॥ एवं सर्वज्ञा त्वं पूर्वं किमिति नोक्तवतीत्यत्राह–क्रियतामिति। न गृह्णासि नागृह्णाः। व्युष्टिः फलम्। " व्युष्टिः फले समृद्धौ च " इत्यमरः ॥ १९ ॥

मशक्यः। महायोगित्वादिविशेषणविशिष्टो यो विष्णुस्स एव रघुनाथ इत्यर्थः ॥ १४ ॥ १५ ॥ तस्य सर्वेश्वरस्य कथं मानुषतया प्रतिभानम्, कथं च वानरैस्सह संवासः, अवाप्तसमस्तकामस्य रावणहनने वा किं प्रयोजनम्? इत्याशङ्क्य क्रमेणोत्तराण्याह–मानुषं वपुरास्थायेत्यादिश्लोकद्वयेन ॥ १६ ॥ १७ ॥ लोकान्तर्भूतस्य रावणस्य हनने सर्वलोकेश्वरस्य रामस्य वैषम्यनैर्घृण्ये स्यातामित्याशङ्कायां स्वकृतकर्मवशादेव स्वस्य नाशाद्रामस्य वैषम्यनैर्घृण्ये न स्त इत्याशयेनाह–इन्द्रियाणीति ॥ १८ ॥ क्रियतामिति। व्युष्टिः समृद्धिः " व्युष्टिः फले समृद्धौ च " इत्यमरः ॥ १९ ॥ ॥३२८॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अकस्मान्निर्हेतुकं सीतामुद्दिश्य अभिकामोऽसि अभिलाष्यासि, तां प्रति त्वदभिलाषः अयुक्त इत्यर्थः ॥ २० ॥ अयुक्ततामेवाह–अरुन्धत्या इति। विशिष्टाम् उत्कृष्टाम् । मान्यामित्यनेन न केवलमरुन्धत्यादिवत् पातिव्रत्यमात्रम्, किंतु मातृत्वं चेत्युच्यते । असदृशम् अनुचितम् ॥ २१ ॥ सा पतिव्रता चेत्, किमर्थं न दग्धवतीत्यत्राह–वसुधाया इत्यादिसार्धश्लोकद्वयेन । वसुधायाश्च वसुधाम् अत्यन्तक्षमावतीमित्यर्थः । श्रीमित्यत्र

अकस्माच्चाभिकामोऽसि सीतां राक्षसपुङ्गव। ऐश्वर्यस्य विनाशाय देहस्य स्वजनस्य च ॥ २० ॥ अरुन्धत्या विशिष्टां तां रोहिण्याश्चापि दुर्मते। सीतां धर्षयता मान्यां त्वया ह्यसदृशं कृतम् ॥ २१ ॥ वसुधायाश्च वसुधां श्रियः श्रीं भर्तृवत्सलाम्। सीतां सर्वानवद्याङ्गीमरण्ये विजने शुभाम् ॥ २२ ॥ आनयित्वा तु तां दीनां छद्मना ऽऽत्मस्वदूषण। अप्राप्य चैव तं कामं मैथिलीसङ्गमे कृतम्। पतिव्रतायास्तपसा नूनं दग्धोऽसि मे प्रभो ॥ २३ ॥ तदैव यन्न दग्धस्त्वं धर्षयंस्तनुमध्यमाम्। देवा बिभ्यति ते सर्वे सेन्द्राः साग्निपुरोगमाः ॥ २४ ॥

इयङभाव आर्षः। सर्वसम्पदधिष्ठात्रीमित्यर्थः । भर्तृवत्सलां पतिव्रताम् । सर्वानवद्याङ्गीम् अनवद्यसर्वाङ्गीम् । अरण्ये विजने, स्थितामिति शेषः। दीनां त्वदनभिलाषिणीमित्यर्थः । छद्मना मारीचमुखेन आनयित्वा । तं पूर्वमुक्तम् । पतिव्रतायास्तस्यास्तपसा दग्धोऽसि। मे प्रभो इत्यनेन अस्य सर्वस्य मद्दौर्भाग्यमेव निमित्तमिति द्योत्यते । आत्मस्वदूषणेत्यनेन निजस्वभूताया मम त्यागे त्वद्दूषणमेव हेतुः, न त्वस्मत्सौन्दर्यहानिरित्युच्यते ॥ २२ ॥ २३ ॥ रामानु०–अरण्ये विजने शुभामित्यस्यानन्तरम्, आनयित्वा तु तां दीनां छद्मनाऽऽत्मस्वदूषण । अप्राप्य चैव तं कामं मैथिलीसङ्गमे कृतम् । पतिव्रतायाः सहसा नूनं दग्धोऽसि मे प्रभो ॥ इत्येवं पाठक्रमः । अन्यथापाठस्तु लेखकप्रमादकृतः ॥ २२॥२३॥ तदैवेति । तनुमध्यमां धर्षयन् सन् त्वं तदैव न दग्ध इति यत् तेन माहात्म्येन

अकस्मादिति । अभिकामः अभिलषितवान् ॥ २० ॥ २१ ॥ वसुधाया अपि वसुधां क्षमावतां निदर्शनभूतायाः भूमेरपि दृष्टान्तभूमिमित्यर्थः । श्रियः श्रीं सर्वसौभाग्ययुक्तानां दृष्टान्तभूतायाः श्रियोऽपि दृष्टान्तभूमिमित्यर्थः ॥ २२ ॥ आत्मस्वदूषण आत्मीयदूषण ! ॥ २३ ॥ तनुमध्यमां धर्षयन् तदैव धर्षणसमये न दग्ध इति यत् तेन माहात्म्येन देवा अपि बिभ्यतीति सम्बन्धः ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्वत्तो देवा बिभ्यतीति संबन्धः । भीता देवाः कथं ते धर्षणफलं दाहं ददुरिति भावः ॥ २४ ॥ अवश्यमिति । कर्ता घोरं पापस्य फलं काले पर्यागते प्राप्ते अवश्यं लभते, नात्र संशयः ॥ २५ ॥ पापं दुःखम् ॥ २६ ॥ तुभ्यं तव । ततः तस्याः सीतायाः । न बुध्यसे, अभ्यधिकत्वमिति शेषः ॥ २७ ॥ मैथिली मया कुलेन तुल्या अधिका वा न इत्येवं योज्यम् । दाक्षिण्येन विद्यासामर्थ्येन ॥ २८ ॥ अलक्षणः निर्निमित्तः । मैथिल्याः

अवश्यमेव लभते फलं पापस्य कर्मणः । घोरं पर्यागते काले कर्ता नास्त्यत्र संशयः ॥२५॥ शुभकृच्छुभमाप्नोति पापकृत् पापमश्नुते । विभीषणः सुखं प्राप्तस्त्वं प्राप्तः पापमीदृशम् ॥ २६ ॥ सन्त्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्ततः । अनङ्गवशमापन्नस्त्वं तु मोहान्न बुध्यसे ॥ २७ ॥ न कुलेन न रूपेण न दाक्षिण्येन मैथिली । मयाऽधिका वा तुल्या वा त्वं तु मोहान्न बुध्यसे ॥ २८ ॥ सर्वथा सर्वभूतानां नास्ति मृत्युरलक्षणः । तव तावदयं मृत्युर्मैथिलीकृतलक्षणः ॥ २९ ॥ सीतानिमित्तजो मृत्युस्त्वया दूरादुपाहृतः ॥ ३० ॥ मैथिली सह रामेण विशोका विहरिष्यति । अल्पपुण्या त्वहं घोरे पतिता शोकसागरे ॥ ३१ ॥ कैलासे मन्दरे मेरौ तथा चैत्ररथे वने । देवोद्यानेषु सर्वेषु विहृत्य सहिता त्वया ॥ ३२ ॥ विमानेनानुरूपेण या याम्यतुलया श्रिया । पश्यन्ती विविधान् देशांस्तांस्तांश्चित्रस्रगम्बरा । भ्रंशिता कामभोगेभ्यः साऽस्मि वीर वधात्तव ॥३३॥ सैवान्येवास्मि संवृत्ता धिग् राज्ञां चञ्चलाः श्रियः ॥३४॥ हा राजन् सुकुमारं ते सुभ्रु सुत्वक् समुन्नसम् । कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः ॥ ३५ ॥ किरीटकूटोज्ज्वलितं ताम्रास्यं दीप्तकुण्डलम् । मदव्याकुललोलाक्षं भूत्वा यत् पानभूमिषु ॥ ३६ ॥

कृतं मैथिलीकृतम्, मैथिल्यानयनमित्यर्थः । तदेव लक्षणं निमित्तं यस्य स तथा ॥ २९–३१ ॥ कैलास इत्यादिसार्धश्लोकद्वयमेकान्वयम् । याऽहं कैलासादिषु विहृत्य विमानेन विविधान् देशान् पश्यन्ती यामि अथ सा भ्रंशिताऽस्मीत्येवं सम्बन्धः ॥ ३२ ॥ ३३ ॥ सैवेत्यर्धम् । सैव एवंभुक्तभोगैव । अन्येव अस्पृष्टभोगेव ॥ ३४ ॥ एवं रावणस्य मतिं राज्यश्रियं च निन्दित्वा भर्तृसौन्दर्यवैपरीत्यं शोचति—हा राजन्नित्यादि श्लोकचतुष्टयमेका ॥३२९॥

अवश्यमेवेति । काले परिपाकसमये पर्यागते सति ॥ २५ ॥ शुभं सुखम् । पापं दुःखम् ॥ २६ ॥ तुभ्यं तव । ततः सीताया अपि ॥ २७ ॥ २८ ॥ सर्वभूतानामलक्षणः अहेतुको मृत्युः नास्ति, अत एव तथापि मैथिलीकृतलक्षणः मैथिल्या कृतचिह्नः, मैथिलीहेतुक इत्यर्थः ॥ २९–३४ ॥ हा राजन्नित्यादि सार्धश्लोकद्वयमेकं

For Private And Personal Use Only

न्यम् । सुत्वक् स्निग्धत्वक् । समुन्नसं समुन्नतनासिकम् । कान्तिः प्रभा । श्रीः सौन्दर्यम् । द्युतिः तेजः । किरीटकूटोज्ज्वलितं शिखरतुल्यकिरीटविराजितम् । ताम्रास्यं रक्ताधरमित्यर्थः । चारु सुन्दरं तव यद्वक्रं मदव्याकुललोलाक्षं भूत्वा अभ्राजत, तदेवेदं वक्रमद्य न भ्राजते ॥ ३५–३७ ॥ अप्रकाश

विविधस्रग्धरं चारु वल्गुस्मितकथं शुभम् । तदेवाद्य तवेदं हि वक्त्रं न भ्राजते प्रभो ॥ ३७ ॥ रामसायकनिर्भिन्नं सिक्तं रुधिरविस्रवैः । विशीर्णमेदोमस्तिष्कं रूक्षं स्यन्दनरेणुभिः ॥ ३८ ॥ हा पश्चिमा मे सम्प्राप्ता दशा वैधव्यकारिणी । या मयाऽऽसीन्न सम्बुद्धा कदाचिदपि मन्दया ॥३९॥ पिता दानवराजो मे भर्ता मे राक्षसेश्वरः । पुत्रो मे शक्रनिर्जेता इत्येवं गर्विता भृशम् ॥ ४० ॥ दृप्तारिमर्दनाः शूराः प्रख्यातबलपौरुषाः । अकुतश्चिद्भया नाथा ममेत्यासीन्मतिर्दृढा ॥४१॥ तेषामेवंप्रभावानां युष्माकं राक्षसर्षभ । कथं भयमसम्बुद्धं मानुषादिदमागतम् ॥४२॥

निमित्तमाह–रामेति । विस्रवैः प्रवाहैः । मेदः वसा । मस्तिष्कं मांसविशेषः ॥ ३८ ॥ हेति । मे वैधव्यकारिणी ते पश्चिमावस्था मृतिः सम्प्राप्ता ॥३९॥ अस्थिरस्य देहस्य विनाशः कुतो न सम्बुद्ध इत्यत्राह–पितेति । दानवराजः मयः ॥ ४० ॥ ४१ ॥ तेषामिति । तेषु युष्मास्वेवम्प्रभावेष्वित्यर्थः । मयस्य

वाक्यम् । समुन्नसम् उन्नतनासम् । कीर्तिश्रीद्युतिभिस्तुल्यं कीर्त्या प्रसादेन । "प्रसादयशसोः कीर्तिः" इति विश्वः । श्रिया शोभया, द्युत्या दीप्त्या च क्रमेणेन्दुपद्मदिवाकरैस्तुल्यम् । किरीटकूटोज्ज्वलितं किरीटकूटः किरीटाग्रं तेन उज्ज्वलितम् । ताम्रास्यं ताम्रोष्ठं ते यद्वक्रं पानभूमिषु मदव्याकुललोलाक्षं भूत्वा अभ्राजत तदेवाद्य वक्रं रामसायकनिर्भिन्नम् अत एव विकीर्णमेदोमस्तिष्कं मेदो वसा, मस्तिष्कं शिरः, मेदोयुक्तशिरः इत्यर्थः । एतादृशं सत् न भ्राजत इति सम्बन्धः ॥ ३५–३८ ॥ हेति । न संबुद्धा न विचारिता । मन्दया मन्दभाग्यया ॥ ३९–४१ ॥ तेषामिति । असम्बुद्धम् असम्भावितम् ॥ ४२–४४ ॥

स० - ननु श्रीमन्महाभारते वनपर्वणि " शरीरधातवो ह्यस्य मांसं रुधिरमेव च । नेशुर्ब्रह्मास्त्रनिर्दग्धं न च भस्माप्यदृश्यत ॥" इति रावणशरीरभस्मनोऽप्यदर्शनोक्तेः कथमेवं तच्छिरोवर्णनमिति चेन्न; ब्रह्मास्त्रनिर्दग्धं मांसं रुधिरं चेत्येते अस्य शरीरधातवो नेशुः अदर्शनं गताः । ब्रह्मास्त्रदाहे देहस्य भस्म दृश्येत कथं शरीरस्य दर्शनमित्यत आह न चेति । भस्मापि भस्म तु न दृश्यते विचित्रोऽयं दाह इति भारतस्यैतदर्थकताङ्गीकारेणाविरोधोपपत्तेः । तथा चोक्तमाचार्यैः– "बाणेन वज्रसदृशेन स भिन्नहृत्को रक्तं वमन्न्यपतदाशु महाविमानात्" इति । तथैव च पाद्मोत्तरखण्डे–"स गतासुर्महादैत्यः पपात च ममार च" इत्यादि॥ ३८॥

मरणाभावेऽपि इदानीमकार्यकरत्वादेवमुक्तम् । असम्बुद्धं पूर्वमचिन्तितम् ॥ ४२ ॥ स्निग्धेत्यादि सार्धश्लोकचतुष्टयमेकान्वयम् । प्रांशुशैलः उन्नतशैलः । अङ्गदवैडूर्यं वैडूर्यमयाङ्गदमिति केयूराङ्गदभेदः । यच्छरीरं भाति आलिङ्गनयोग्यमभूत् । तदेव शरीरं दुर्लभसंस्पर्शं सत् पुनः परिष्वक्तुं न शक्यते॥४३–४५॥

स्निग्धेन्द्रनीलनीलं तु प्रांशुशैलोपमं महत् । केयूराङ्गदवैडूर्यमुक्तादामस्रगुज्ज्वलम् ॥ ४३ ॥ कान्तं विहारेष्वधिकं दीप्तं सङ्ग्रामभूमिषु । भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः ॥ ४४ ॥ तदेवाद्य शरीरं ते तीक्ष्णैर्नैकैः शरैश्चितम् । पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ॥ ४५ ॥ श्वाविधः शललैर्यद्वद्बाणैर्लग्नैर्निरन्तरम् । स्वर्पितैर्मर्मसु भृशं सञ्छिन्नस्नायुबन्धनम् । क्षितौ निपतितं राजन् श्यावं रुधिरसच्छवि ॥४६॥ वज्रप्रहाराभिहतो विकीर्ण इव पर्वतः ॥ ४७ ॥ हा स्वप्नः सत्यमेवेदं त्वं रामेण कथं हतः । त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः ॥ ४८ ॥

दुर्लभसंस्पर्शत्वमुपपादयति–श्वाविध इत्यादिना । श्वाविधः शल्यमृगस्य, शललैः तल्लोमभिः, यद्वत् यथा । कण्टकाकारश्वाविल्लोमतुल्यैरिति शरविशेषणम् । मर्मसु स्वर्पितैः क्षितैः । तत्रैव मर्मसु निरन्तरं लग्नैरिति योजना । श्यावं कपिशवर्णम् । "श्वावित्तु शल्यस्तल्लोम्नि शलली शललं शलम् ।" "श्यावः स्यात्कापिशः" इत्युभयत्राप्यमरः । स्नायवः धमन्यः । रुधिरसच्छवि रुधिरतुल्यकान्ति । स्वकान्तिं विहाय रुधिरकृतकान्त्यन्तरमित्यर्थः ॥४६॥ वज्रेत्यर्धम् । असीति शेषः ॥४७॥ हेति । इदं ते मरणं स्वप्नः स्वप्नानुभवविषयः सत्यमेव, नात्र संशयः । तत्र हेतुमाह त्वमिति । तत्रापि हेतुमाह त्वं मृत्यो

तदेवेत्यादिसार्धश्लोकद्वयमेकं वाक्यम् । बाणैर्लग्नैः निरन्तरमित्युत्तरशेषः । तदेव पूर्वोक्तविशेषणविशिष्टम् । श्वाविधः शल्यकस्य शललैः रोमभिरिव नैकैः शरैश्चितं व्याप्तं ते शरीरं परिष्वक्तुं न शक्यते इति सम्बन्धः । "श्वावितु शल्यस्तल्लोम्नि शलली शललं शलम्" इत्युभयत्राप्यमरः । बाणैर्लग्नैरित्यादि । मर्मसु सर्वतो लग्नैर्बाणैर्निरन्तरं नीरन्ध्रम्, संछिन्नस्नायुबन्धनं स्नायवः अस्थिबन्धका धमनीविशेषाः, रुधिरसच्छवि रक्तकान्ति ॥ ४५ ॥ ४६ ॥ वज्रप्रहाराभिहतः विकीर्णः पर्वत इव क्षितौ निपतितं ते शरीरमित्यनुकर्षः । पश्यामीति शेषः ॥ ४७ ॥ ४८ ॥ ॥३३०॥

स०–मुक्ताहारस्रगुज्ज्वलं मुक्तानां हाराः, स्रजः इतरा मणिमय्यः ताभिरुज्ज्वलम् । यद्वा मुक्तानां हारः परस्परं सङ्घर्षजं युद्धमिव स यासां ताः स्रजो मुक्तामालाः तदुज्ज्वलम् " हारो मुक्तावली युद्धे " इति विश्वः ॥ ४३ ॥

रिति ॥ ४८ ॥ त्रैलोक्येत्यादि हतप्रियेत्यन्तं श्लोकाष्टकमेकं वाक्यम् । एवंभूतं भर्तारं दृष्ट्वा या इमं देहं धारयामि साऽहं स्थिराऽस्मि वज्रसारमय्यस्मि कथमन्यथा न शीर्येदिति भावः । महदिति त्रैलोक्यवसुविशेषणम् । यद्वा त्रैलोक्योद्वेगदं महद्वसु महत् यथा भवति तथा त्रैलोक्योद्वेगदमिति वा । उद्वेगो भयसम्भ्रमः । शङ्करस्य क्षेप्तारं कैलासचलनद्वारा ॥ ४९ ॥ ५० ॥ स्वयूथाः स्वबन्धवः निवातकवचा नाम केचनासुराः । तेषां संग्रहीतारं तैः

त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत् । जेतारं लोकपालानां क्षेप्तारं शङ्करस्य च ॥ ४९ ॥ दृप्तानां निग्रहीतारमाविष्कृतपराक्रमम् । लोकक्षोभयितारं च नादैर्भूतविराविणम् ॥ ५० ॥ ओजसा दृप्तवाक्यानां वक्तारं रिपुसन्निधौ । स्वयूथभृत्यवर्गाणां गोप्तारं भीमकर्मणाम् ॥ ५१ ॥ हन्तारं दानवेन्द्राणां यक्षाणां च सहस्रशः । निवातकवचानां च सङ्ग्रहीतारमीश्वरम् ॥ ५२ ॥ नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च । धर्मव्यवस्थाभेत्तारं मायास्रष्टारमाहवे ॥५३॥ देवासुरनृकन्यानामाहर्तारं ततस्ततः । शत्रुस्त्रीशोकदातारं नेतारं स्वजनस्य च ॥ ५४ ॥ लङ्काद्वीपस्य गोप्तारं कर्तारं भीमकर्मणाम् । अस्माकं कामभोगानां दातारं रथिनां वरम् ॥५५॥ एवंप्रभावं भर्तारं दृष्ट्वा रामेण पातितम् । स्थिराऽस्मि या देहमिमं धारयामि हतप्रिया ॥ ५६ ॥ शयनेषु महार्हेषु शयित्वा राक्षसेश्वर । इह कस्मात् प्रसुप्तोऽसि धरण्यां रेणुपाटलः ॥ ५७ ॥

सख्यकृतमित्यर्थः ॥ ५१ ॥ ५२ ॥ स्वजनस्य स्वाश्रितजनस्य । धर्मव्यवस्था आचारव्यवस्था । यज्ञकर्मभेत्तृत्वकथनेनातीव स्वतन्त्रत्वमुक्तम् ॥५३॥ कन्यानामिति स्त्रीमात्रमुच्यते । स्वजनस्य नेतारमिति । पूर्वत्रानिष्टनिवर्तकत्वमुक्तम्, अत्रेष्टप्रापकत्वम् ॥ ५४ ॥ भीमकर्मणां स्वशिरोहवनादी

वसूनि रत्नानि " रत्ने धने वसु " इत्यमरः । महत् अत्यर्थम् । ओजसा दर्पेण । भीमकर्मणां नृशंसानाम् ॥ ४९–५५ ॥ एवंप्रभावं त्वां दृष्ट्वा हतप्रिया इमं देहं धारयामि अतः स्थिरा कठिनहृदयाऽस्मीति सम्बन्धः ॥ ५६–६३ ॥

नाम् ॥५५-५७॥ यदेति। शस्तः हतः। तदा अभिहता प्रहता। अद्य अस्मिन् त्वद्धनने सति तीव्रं निपातिता, मारितेत्यर्थः ॥५८॥ बन्धुजनैः हीनाऽहं न शोचिष्ये, यदि त्वं स्थितः स्याः। किंतु त्वया हीना अत एव कामभोगैर्विहीना शोचिष्य इति योजना ॥ ५९ ॥ दीर्घमध्वानं वीरस्वर्गम् ॥ ६० ॥

यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद्युधि। तदाऽस्म्यभिहता तीव्रमद्य त्वस्मिन्निपातिता ॥ ५८॥ नाहं बन्धुजनै हीना हीना नाथेन तु त्वया। विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः ॥ ५९ ॥ प्रपन्नो दीर्घमध्वानं राज न्नद्यासि दुर्गमम्। नय मामपि दुःखार्ता न जीविष्ये त्वया विना ॥ ६०॥ कस्मात् त्वं मां विहायेह कृपणां गन्तु मिच्छसि। दीनां विलपितैर्मन्दां किंवा मां नाभिभाषसे ॥ ६१ ॥ दृष्ट्वा न खल्वसि क्रुद्धो मामिहानवकुण्ठिताम्। निर्गतां नगरद्वारात् पद्भ्यामेवागतां प्रभो ॥ ६२॥ पश्येष्टदार दारांस्ते भ्रष्टलज्जावकुण्ठितान्। बहिर्निष्पतितान् सर्वान् कथं दृष्ट्वा न कुप्यसि ॥ ६३ ॥ अयं क्रीडासहायस्ते नाथ लालप्यते जनः। न चैनमाश्वासयसे किंवा न बहुमन्यसे ॥ ६४ ॥ यास्त्वया विधवा राजन् कृता नैकाः कुलस्त्रियः। पतिव्रता धर्मपरा गुरुशुश्रूषणे रताः। ताभिः शोकाभितप्ताभिः शप्तः परवशं गतः ॥ ६५ ॥ त्वया विप्रकृताभिर्यत्तदा शप्तं तदागतम् ॥ ६६ ॥

विलपितैः प्रलापैः दीनां मन्दाम् अभाग्याम् ॥ ६१ ॥ अनवकुण्ठिताम् अनावरणाम् इहागतामित्यन्वयः ॥ ६२ ॥ पश्येति। इष्टदारेति संबुद्धिः। भ्रष्टलज्जावकुण्ठितान् हीनलज्जावकुण्ठितान् ॥६३॥ अयमिति। क्रीडासहायस्तेनाथो लालप्यत इति पाठे–अनाथ इति छेदः ॥६४॥ यास्त्वयेत्यादि सार्धश्लोक एकान्वयः। परवशं परवशत्वम्, शत्रुवशत्वमिति यावत् ॥६५॥ त्वयेत्यर्धम्। त्वया विप्रकृताभिः परिभूताभिः। तदा भर्तृवधकाले, यच्छप्तं

अयमिति। तेनाथ इत्यत्र अनाथ इति पदच्छेदः ॥ ६४ ॥ परवशं शत्रुवशम्। ताभिः तप्ताभिः तदा यच्छप्तं तत्फलमागतमित्यर्थः ॥ ६५ ॥ ६६ ॥ ॥३३१॥

स०–शस्तः विशस्तः। अभिहता अभिघातमात्रं प्राप्ता। अद्य तु निपातिताऽस्मि। सति त्वयि मयि जायेत तनय हत्याशासम्भवादभिहतमात्रता मारणे इन्द्रजितः। इदानीं तव नाशादाऽऽशावकाशमासादयतीति निपातितेति सम्भवतीति भावः ॥ ५८ ॥ शाश्वतीः समाः यावदायुः ॥ ५९ ॥ नयमो न विद्यते यमो यस्मात्ता तामपि मां नय, त्वया सहेति शेषः। इति तान्त्रिकोऽर्थः ॥ ६० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत् आगतम्, फलदभासीदित्यर्थः ॥ ६६ ॥ प्रवाद इति । पतिव्रतानामश्रूणि अकस्मान्निर्हेतुकतया भूतले न पतन्ति । पतन्ति चेत् किंचित् कुर्वन्त्येव । इत्येवं प्रायशः प्रवादः जनवार्ता त्वां प्रत्येव सत्यः यथार्थो जातः । पतिव्रतानामास्रपातकरणमनर्थावहमित्येवं जनवादः तथा कुर्वति त्वयि दृष्टफल आसीदित्यर्थः ॥ ६७ ॥ शौण्डीर्यमानिना शूरमानिना ॥ ६८ ॥ त्वया कर्त्रा, मृगच्छद्मना मृगरूपकपटोपायेन । कातर्यलक्षणं कातर्यसूचनम् ॥ ६९ ॥

प्रवादः सत्य एवायं त्वां प्रति प्रायशो नृप । पतिव्रतानां नाकस्मात् पतन्त्यश्रूणि भूतले ॥ ६७ ॥ कथं च नाम ते राजन् लोकानाक्रम्य तेजसा । नारीचौर्यमिदं क्षुद्रं कृतं शौण्डीर्यमानिना ॥ ६८ ॥ अपनीयाश्रमाद्रामं यन्मृगच्छद्मना त्वया । आनीता रामपत्नी सा तत्ते कातर्यलक्षणम् ॥ ६९ ॥ कातर्यं च न ते युद्धे कदाचित् संस्मराम्यहम् । तत्तु भाग्यविपर्यासान्नूनं ते पक्वलक्षणम् ॥ ७० ॥ अतीतानागतार्थज्ञो वर्तमानविचक्षणः । मैथिलीमाहृतां दृष्ट्वा ध्यात्वा निश्वस्य चायतम् ॥ ७१ ॥ सत्यवाक् स महाभागो देवरो मे यदब्रवीत् । सोऽयं राक्षसमुख्यानां विनाशः पर्युपस्थितः । कामक्रोधसमुत्थेन व्यसनेन प्रसङ्गिना ॥ ७२ ॥ निर्वृत्तस्त्वत्कृतेऽनर्थः सोऽयं मूलहरो महान् । त्वया कृतमिदं सर्वमनाथं रक्षसां कुलम् ॥ ७३ ॥ न हि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः । स्त्रीस्वभावात्तु मे बुद्धिः कारुण्ये परिवर्तते ॥ ७४ ॥ सुकृतं दुष्कृतं च त्वं गृहीत्वा स्वां गतिं गतः । आत्मानमनुशोचामि त्वद्वियोगेन दुःखिता ॥ ७५ ॥

ते युद्धे कातर्यं कदाचिदपि न स्मरामि, न जानामीत्यर्थः । एवमकातरप्रकृतेस्तव भाग्यविपर्यासात् यत्कातर्यं चौर्यरूपमस्ति तत् पक्वलक्षणं पक्वत्वलक्षणम्, विनाशज्ञापकमिति यावत् । महतो हीनकृत्यं हानिकरमिति लोकप्रवादादिति भावः ॥ ७० ॥ अतीतेत्यादिसार्धश्लोकद्वयमेकान्वयम् । देवरो यदब्रवीत् अयं तद्वाक्यार्थभूतो विनाशः प्रसङ्गिना प्रसक्तेन व्यसनेन हेतुना पर्युपस्थितः ॥ ७१ ॥ ७२ ॥ निर्वृत्त इति । त्वत्कृते त्वन्निमित्तम् । निर्वृत्तः प्रवृत्तः ॥ ७३ ॥ कारुण्ये दैन्ये ॥ ७४ ॥ ७५ ॥

प्रवाद इति । पतिव्रतानामश्रूणि प्रायशो भूतले अकस्मान्न पतन्तीत्ययं प्रवादस्त्वां प्रति सत्य एव जात इति सम्बन्धः ॥ ६७–६९ ॥ तं त्वया यत्कृतं तत् पक्वलक्षणं पक्वः विपाको विनाश इति यावत्, तस्य लक्षणं ज्ञापकम् ॥ ७० ॥ अतीतेत्यादिसार्धश्लोकद्वयमेकं वाक्यम् । मे देवरः यत् विनाशप्रतिपादकं

For Private And Personal Use Only

सुहृदामिति । कार्त्स्न्येनोक्तं हितं त्वया न श्रुतमित्यनुषज्यते ॥ ७६ ॥ हेत्वर्थयुक्तं युक्तिप्रयोजनाभ्यां युक्तम् । विधिवत् शास्त्रोक्तप्रकारवत् । श्रेयस्करं हितभूतम् । अदारुणं सान्त्वपूर्वकम् । विभीषणेनाभिहितं वचनं त्वया हेतुमद्युक्तिमद्यथा भवति तथा न गृहीतम् । ज्ञातित्वेन मद्व्यसनं काङ्क्षसे इत्यादिना हेतूपपादनपूर्वकं न गृहीतमित्यर्थः ॥ ७७ ॥ मारीचकुम्भकर्णाभ्यां सह मम पितुर्मयस्य वाक्यं न श्रुतम् । तस्य अश्रवणस्य ईदृशं फलम्,

सुहृदां हितकामानां न श्रुतं वचनं त्वया । भ्रातॄणां चापि कार्त्स्न्येन हितमुक्तं त्वयाऽनघ ॥ ७६ ॥ हेत्वर्थयुक्तं विधिवत् श्रेयस्करमदारुणम् । विभीषणेनाभिहितं न कृतं हेतुमत्त्वया ॥ ७७ ॥ मारीचकुम्भकर्णाभ्यां वाक्यं मम पितुस्तदा । न श्रुतं वीर्यमत्तेन तस्येदं फलमीदृशम् ॥ ७८ ॥ नीलजीमूतसङ्काश पीताम्बर शुभाङ्गद ॥ ७९ ॥ स्वगात्राणि विनिक्षिप्य किं शेषे रुधिराप्लुतः । प्रसुप्त इव शोकार्तां किं मां न प्रतिभाषसे ॥८०॥ महावीर्यस्य दक्षस्य संयुगेष्वपलायिनः । यातुधानस्य दौहित्र किं च मां नाभ्युदीक्षसे ॥८१॥ उत्तिष्ठोत्तिष्ठ किं शेषे प्राप्ते परिभवे नवे । अद्य वै निर्भया लङ्कां प्रविष्टाः सूर्यरश्मयः ॥८२॥ येन सूदयसे शत्रून समरे सूर्यवर्चसा । वज्रो वज्रधरस्येव सोऽयं ते सततार्चितः ॥ ८३ ॥ रणे शत्रुप्रहरणो हेमजालपरिष्कृतः । परिघो व्यवकीर्णस्ते बाणैश्छिन्नः सहस्रधा ॥८४॥

आगतमिति शेषः । अत्रानुवादान्मयोप्यस्तीत्यवगन्तव्यम् ॥ ७८ ॥ नीलेत्यादिसार्धश्लोक एकान्वयः । विनिक्षिप्य भूमौ प्रसार्य प्रसुप्त इव शेषे, शोकार्तां मां च किमिति न प्रतिभाषस इत्यन्वयः ॥ ७९ ॥ ८० ॥ यातुधानस्य माल्यवतः । सुमालिनो वा । तत्संबन्धकीर्तनमप्रतिहतकुलप्रभावप्रकटनार्थम् ॥ ८१ ॥ ८२ ॥ येनेत्यादिश्लोकद्वयमेकान्वयम् । ते त्वया सततार्चितः, बाणैः रामबाणैश्छिन्नः वज्रधरस्य वज्र इव स्थितः ते परिघः अद्य ॥२२२॥

वाक्यमब्रवीत् सोऽयं विनाशः पर्युपस्थित इति सम्बन्धः ॥ ७१–७६ ॥ हेत्वर्थयुक्तं हेतुप्रयोजनाभ्यां सहितं हेतुमत् न कृतं फलवशात्तुष्ठितमित्यर्थः ॥ ७७ ॥ मारीचकुम्भकर्णाभ्याम्, उक्तमिति शेषः । मम पितुः माल्यवतः ॥ ७८–८२ ॥ येनेत्यादि श्लोकद्वयमेकं वाक्यम् । सूर्यवर्चसा येन परिघेण शत्रून सूदयन् एतेन सूदनेन हेतुना वज्रधरस्य वज्र इव अर्चितो बहुमतः प्रह्रियतेऽनेनेति प्रहरणः परिघः बाणैस्सहस्रधा छिन्नो व्यवकीर्ण इति सम्बन्धः ॥ ८३–८५ ॥

विशीर्णः ॥ ८३-८५ ॥ धिगिति । यस्या मम हृदयं न फलते न स्फुटति तादृशीं मां धिगित्यन्वयः ॥८६॥ अवस्कन्नहृदया विलीनहृदया ॥८७॥ कश्मलेन अभिहता मूर्च्छिता । सन्ना कृशा ॥८८॥८९॥ नेत्यादिश्लोकद्वयमेकान्वयम् । दशाविभागपर्याये दशानां बाल्यकौमारयौवनवार्धकाद्यवस्थानां

प्रियामिवोपगुह्य त्वं शेषे समरमेदिनीम् । अप्रियामिव कस्माच्च मां नेच्छस्यभिभाषितुम् ॥ ८५ ॥ धिगस्तु हृदयं यस्या ममेदं न सहस्रधा । त्वयि पञ्चत्वमापन्ने फलते शोकपीडितम् ॥ ८६ ॥ इत्येवं विलपन्त्येवं बाष्पव्याकुललोचना । स्नेहावस्कन्नहृदया देवी मोहमुपागमत् ॥ ८७ ॥ कश्मलाभिहता सन्ना बभौ सा रावणोरसि । सन्ध्यानुरक्ते जलदे दीप्ता विद्युदिवासिते ॥ ८८ ॥ तथागतां समुत्पत्य सपत्न्यस्ता भृशातुराः । पर्यवस्थापयामासू रुदन्त्यो रुदतीं भृशम् ॥ ८९ ॥ न ते सुविदिता देवि लोकानां स्थितिरध्रुवा । दशाविभागपर्याये राज्ञां चञ्चलया श्रिया ॥ ९० ॥ इत्येवमुच्यमाना सा सशब्दं प्ररुरोद ह । स्नापयन्ती त्वभिमुखौ स्तनावस्राम्बुविस्रवैः ॥ ९१ ॥ एतस्मिन्नन्तरे रामो विभीषणमुवाच ह । संस्कारः क्रियतां भ्रातुः स्त्रियश्चैता निवर्तय ॥ ९२ ॥ तं प्रश्रितस्ततो रामं श्रुतवाक्यो विभीषणः । विमृश्य बुद्ध्या धर्मज्ञो धर्मार्थसहितं वचः । रामस्यैवानुवृत्त्यर्थमुत्तरं प्रत्यभाषत ॥९३॥

विभागस्य भेदस्य पर्याये प्राप्तौ विषये, लोकानामध्रुवा स्थितिः राज्ञां चञ्चलया श्रिया सह ते त्वया सुविदिता नेति काकुः, सुविदितैवेत्यर्थः। लोकानां स्थितिरध्रुवेति राज्ञां श्रीश्चञ्चलेति च त्वया सुविदितैवेत्यर्थः। उच्यमाना, बन्धुवृद्धादिभिरिति शेषः। अभिमुखौ उन्नतौ ॥ ९०-९२ ॥ तामित्यादि। प्रश्रितः विनयान्वितः। विमृश्य "एतस्य यत् प्रेतगतस्य कृत्यं तत्कर्तुमिच्छामि तव प्रसादात्" इत्युक्तमङ्गीकृतं विचिन्त्येत्यर्थः। रामस्यैवानुवृत्त्यर्थं

यस्या मम हृदयं शोकपीडितं सत् न फलते न स्फुटति तां मां धिगित्यर्थः ॥ ८६ ॥ ८७ ॥ कश्मलं मूर्च्छा ॥ ८८ ॥ ८९ ॥ नेत्यादिश्लोकद्वयमेकं वाक्यम् । श्रियेति सहार्थे तृतीया। दशाविभागपर्याये दशानामवस्थानां विभागो भेदः तस्य पर्याये प्राप्तौ सति लोकानां स्थितिः राज्ञां चञ्चलया श्रिया सह अध्रुवेति त्वया न सुविदिता किम्? विदितैव। राजश्रीः लोकस्थितिश्च अस्थिरेति जानास्येवेत्यर्थः ॥ ९० ॥ इत्येवमिति। अभिमुखौ उन्नतौ ॥ ९१ ॥ ९२ ॥ तं श्रुतवाक्यम्।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रामेणानुज्ञातोऽस्मि चेत्तदा करिष्यामि नान्यथेत्येवमनुवृत्त्यर्थम् ॥ ९३ ॥ त्यक्तेति । त्यक्तो धर्मो व्रतं च येन तम् । अनृतम् अनृतवादिनम् ॥९४॥ गुरुगौरवात् गुरुरिति गौरवात्, पूज्योऽपि उक्तदोषान्मत्तः पूजां नार्हति ॥९५॥ भ्रातुः संस्काराकरणे त्वां नृशंसं लोका वक्ष्यन्तीत्याशङ्क्य वदन्तु नाम त एव पुनस्तद्गुणं विचारयन्तो मां युक्तकारिणं वक्ष्यन्तीत्याह–नृशंस इति । संस्काराकरणे नृशंस इति मां कामं मनुष्या वक्ष्यन्ति । तस्य रावणस्य ।

त्यक्तधर्मव्रतं क्रूरं नृशंसमनृतं तथा । नाहमर्होऽस्मि संस्कर्तुं परदाराभिमर्शिनम् ॥९४॥ भ्रातृरूपो हि मे शत्रुरेष सर्वाहिते रतः । रावणो नार्हते पूजां पूज्योऽपि गुरुगौरवात् ॥९५॥ नृशंस इति मां कामं वक्ष्यन्ति मनुजा भुवि । श्रुत्वा तस्यागुणान् सर्वे वक्ष्यन्ति सुकृतं पुनः ॥९६॥ तच्छ्रुत्वा परमप्रीतो रामो धर्मभृतां वरः । विभीषणमुवाचेदं वाक्यज्ञो वाक्यकोविदम् ॥ ९७ ॥ तवापि मे प्रियं कार्यं त्वत्प्रभावाच्च मे जितम् । अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्वर ॥ ९८ ॥ अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः । तेजस्वी बलवान् शूरो संयुगेषु च नित्यशः ॥९९॥

अगुणान् दोषान् श्रुत्वा असंस्कुर्वता विभीषणेन सुकृतं शोभनं कृतमिति वक्ष्यन्तीत्यर्थः ॥ ९६ ॥ तच्छ्रुत्वेति । परमप्रीतः सत्यवचनकथनादिति भावः । अप्रीत इति वा छेदः ॥ ९७ ॥ दोषसद्भावेऽपि गुणबाहुल्यादयं संस्कारयोग्य इत्याह–तवापीत्यादिना । तव त्वया, मे प्रियमपि प्रियमेव कार्यम् । चो हेतौ । यस्मात्कारणात्, त्वत्प्रभावात् मे मया जितं तस्मान्मया त्वं क्षमं हितमेव वाच्यः । मत्प्रियत्वात् त्वद्धितत्वाच्च रावणसंस्कारः क्रियतामित्यर्थः । यद्वा तवापि मे प्रियं कार्यं मद्वैरिणो रावणस्यासंस्करणं नाम मम प्रियं तवापि कर्तव्यमेव । त्वत्प्रभावाच्च मे जितं पूर्वं च तस्य जयसाहाय्यरूपं प्रियं त्वया कृतम् । तथाप्यवश्यं तु क्षमं वाच्यः यदहं तत्र नियोजनीयोऽसीत्यर्थः ॥ ९८ ॥ दोषिणः कथमर्हत्वमित्याशङ्क्य गुणाधिक्यादित्याह–

श्रुतरामवाक्यो विभीषणः रावणस्य संस्कारः क्रियतामित्युक्तकरणं रामानुवृत्तिरिति बुद्ध्या विमृश्य रामानुवृत्त्यर्थमेव विमृष्टरूपं वचः प्रश्रितं यथा तथा मत्यभाषत प्रत्यपद्यतेत्यर्थः ॥९३–९५॥ भ्रातुः संस्काराकरणे लोकापवादो भवेदित्याशङ्कायामाह–नृशंस इति । भ्रातुः संस्काराकरणेन ये मनुजा मां प्रथमं नृशंस इति यथेच्छं वक्ष्यन्ति ते सर्वे मनुजाः पश्चात्तस्य रावणस्य अगुणान् क्रौर्यादीन् श्रुत्वा मां सुकृतं साधुकारिणमेव वक्ष्यन्तीत्यर्थः ॥ ९६ ॥ ९७ ॥ तव त्वया मे प्रियमपि कार्यं मया त्वं तु क्षममर्हमेव वाच्यः । कुतः ? त्वत्प्रभावाच्च मे जितमिति । अयमर्थः–त्वयाऽपि मत्प्रियमेव कर्तव्यम्, मयाऽपि त्वद्धितमेवोपदेष्टव्यम्, अतो मम प्रियः तव हितश्च रावणसंस्कार उपादिश्यत इति ॥ ९८ ॥ यद्यपि दोषवान्, तथापि गुणबाहुल्यात्संस्कार्य एवेत्यभिप्रायेणाह–अधर्मानृतेत्यादि ॥३३३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधर्मैत्यादिना ॥ ९९ ॥ संयुगेष्वपराजितत्वमुदाहरति–शतक्रत्विति ॥ १०० ॥ गुणबाहुल्येऽपि त्वद्वैरी कथं संस्कार्य इत्यत्राह–मरणेति । यथाऽयं तव बन्धुस्तथा ममापि त्वद्वत् बन्धुरेवायमित्यर्थः ॥ १०१ ॥ यशोभागिति । पापकारिणमपि संस्कृतवानिति यशस्तव भविष्यतीत्यर्थः ॥ १०२ ॥ राघवस्येति । अनुरूपेण यायजूकानुगुणेन । अत्र संस्कारारम्भात् स्त्रीनिवर्तनमर्थसिद्धम् ॥ १०३ ॥ चितामिति । चन्दनकाष्ठानां सम्बन्धिनीम् । पद्मक

शतक्रतुमुखैर्देवैः श्रूयते न पराजितः । महात्मा बलसम्पन्नो रावणो लोकरावणः ॥ १०० ॥ मरणान्तानि वैराणि निर्वृत्तं नः प्रयोजनम् । क्रियतामस्य संस्कारो ममाप्येष यथा तव ॥ १०१ ॥ त्वत्सकाशाद्दशग्रीवः संस्कारं विधिपूर्वकम् । प्राप्तुमर्हति धर्मज्ञ त्वं यशोभाग् भविष्यसि ॥ १०२ ॥ राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः । संस्कारेणानुरूपेण योजयामास रावणम् ॥ १०३ ॥ चितां चन्दनकाष्ठानां पद्मकोशीरसंवृताम् । ब्राह्म्या संवेशयाञ्चक्रू राङ्कवास्तरणावृताम् ॥ १०४॥ वर्तते वेदविहितो राज्ञो वै पश्चिमः क्रतुः । प्रचक्रू राक्षसेन्द्रस्य पितृमेधमनुक्रमम् ॥ १०५ ॥ वेदिं च दक्षिणप्राच्यां यथास्थानं च पावकम् । पृषदाज्येन सम्पूर्णं स्रुवं सर्वे प्रचिक्षिपुः ॥ १०६ ॥

मुशीरं च गन्धद्रव्यं प्रसिद्धम् । ब्राह्म्या वेदोक्तप्रक्रियया । रङ्कुः मृगविशेषः तत्सम्बन्धि चर्म राङ्कवं तदेवास्तरणं तेनावृतां चितां संवेशयाञ्चक्रुः योजयाञ्चक्रुः । रावणम्, ऋत्विज इति च शेषः ॥ १०४ ॥ पश्चिमः क्रतुः अन्त्येष्टिः । वर्तते अवर्तत चितानिर्माणानन्तरमान्तिमेष्टिं चक्रुरित्यर्थः । राक्षसेन्द्रस्य पितृमेधं पितृमेधसंस्कारं च, अनुक्रमं यथाक्रमं प्रचक्रुः ॥ १०५ ॥ सङ्ग्रहेणोक्तं संस्कारं प्रपञ्चयति–वेदिमित्यादिना । दक्षिणप्राच्यां चिताया आग्नेयभागे, वेदिं तत्र यथास्थानं पावकं च त्रेताग्निं च प्रचक्रुरित्यनुषज्यते । वेद्यां पश्चिमे गार्हपत्यं प्राच्यामाहवनीयं दक्षिणतो दक्षिणाग्निं च स्थापयामासुरित्यर्थः । पृषदाज्येन दधिमिश्रघृतेन । " पृषदाज्यं सदध्याज्यम् " इत्यमरः । संपूर्णं स्रुवं होमपात्रं प्रचिक्षिपुः प्रतिपत्त्यर्थं चितायामिति

श्लोकद्वयेन ॥ ९९ ॥ १०० ॥ तथापि तव वैरित्वादसंस्कार्य इत्यत्राह–मरणान्तानीति । एष रावणः तव यथा तथा ममापि प्रीतिविषय इत्यर्थः ॥ १०१ ॥ १०२ ॥ अनुरूपेण संस्कारेण राज्ञां यज्वनां महर्षीणाम् ॥ १०३ ॥ पद्मकं सुगन्धद्रव्यविशेषः । ब्राह्म्या वेदोक्तक्रियया । संवेशयाञ्चक्रुः, रावणमिति ऋत्विज इति च शेषः । अत्र ऋत्विजः कर्तारः । राङ्कवास्तरणावृतां रङ्कुर्मृगविशेषः । तत्सम्बन्धिचर्म राङ्कवम् ॥ १०४ ॥ पश्चिमः क्रतुः अन्त्येष्टिः ॥ १०५ ॥ दक्षिणप्राच्यां चितायाः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शेषः ॥ १०६ ॥ यज्ञपात्रान्तराणामपि प्रतिपत्तिं दर्शयति–पादयोरित्यादिना श्लोकत्रयेण । शकटं सोमराजानयनशकटम् । उलूखलं यज्ञीयव्रीह्यवहनन साधनम् । अन्यत् स्थाल्यादिकं दारुपात्रादिकं यथास्थानं दत्त्वा, शास्त्रदृष्टेन वेदविहितेन, महर्षिविहितेन स्मृत्युक्तेन विधिना क्रमेण तत्र चितासमीपे मेध्यं पवित्रं पशुं छागं हत्वा, हननं होमपर्यन्तस्याप्युपलक्षणम् । परिस्तरणिकां परिस्तरणानि । जात्येकवचनम् । समवेशयन् चिक्षिपुरित्यर्थः ॥१०७-१०९॥

पादयोः शकटं प्रादुरन्तरूर्वोरुलूखलम् । दारुपात्राणि सर्वाणि अरणिं चोत्तरारणिम् । दत्त्वा तु मुसलं चान्यद्यथा स्थानं विचक्षणाः ॥ १०७ ॥ शास्त्रदृष्टेन विधिना महर्षिविहितेन च । तत्र मेध्यं पशुं हत्वा राक्षसेन्द्रस्य राक्षसाः ॥१०८॥ परिस्तरणिकां राज्ञो घृताक्तां समवेशयन् ॥१०९॥ गन्धैर्माल्यैरलंकृत्य रावणं दीनमानसाः । विभीषण सहायास्ते वस्त्रैश्च विविधैरपि ॥११०॥ लाजैश्चावकिरन्ति स्म बाष्पपूर्णमुखास्तदा ॥ १११ ॥ ददौ च पावकं तस्य विधियुक्तं विभीषणः ॥११२॥ स्नात्वा चैवार्द्रवस्त्रेण तिलान् दूर्वाभिमिश्रितान् । उदकेन च संमिश्रान् प्रदाय विधि पूर्वकम् ॥११३॥ प्रदाय चोदकं तस्मै मूर्ध्ना चैनं नमस्य च । ताः स्त्रियोऽनुनयामास सान्त्वमुक्त्वा पुनः पुनः ॥११४॥

अथ शवालङ्कारमाह–गन्धैरित्यादिसार्धश्लोकमेकं वाक्यम् । अवकिरन्ति, चितामिति शेषः ॥ ११० ॥ १११ ॥ अथ संस्कारमाह–ददाविति । तस्य तस्मै रावणाय । विधियुक्तं मन्त्रयुक्तम् ॥ ११२ ॥ स्नात्वेत्यादि गम्यतामितीतिपर्यन्तं किञ्चिदधिकं श्लोकद्वयमेकान्वयम् । दूर्वोदकमिश्रितान् तिलान् प्रेतावाहनार्थं भूमौ प्रदाय तत्र तस्मै रावणाय उदकं दत्त्वा ताः स्त्रियः गम्यतामिति पुनः पुनः सान्त्वमुक्त्वा, अनुनयामास पुरीं प्रापया

आग्नेयभागे वेदिं यथास्थानं पावकं च चक्रुरित्यनुषज्यते । पृषदाज्येन दधिसहितघृतेन । " पृषदाज्यं सदध्याज्यम् " इत्यमरः । पृषदाज्यपूर्णां स्रुवं प्रचिक्षिपुः, अग्नाविति शेषः ॥ १०६ ॥ पादयोः शकटमित्यादिश्लोकत्रयमेकं वाक्यम् । अरणिं मथनारणिम् । शास्त्रदृष्टेन वेदविहितेन । महर्षिविहितेन स्मृत्युक्तेन यथास्थानं सर्वं दत्त्वा अनुस्तरणिकां घृताक्तां समवेशयन अनुस्तरणिकां राजगवीम्, राजगवीमालभ्य तच्चर्मणा यजमानमास्तृतवन्त इत्यर्थः । " यया मृतायानुस्तरणीं घ्नन्ति " इति श्रुतेः ॥ १०७–११२ ॥ स्नात्वेत्यादि । प्रदाय विधिपूर्वकं, स्थित इति शेषः ॥ ११३ ॥ ११४ ॥

For Private And Personal Use Only

मास ॥ ११३ ॥ ११४ ॥ ताः सर्वा इत्युत्तरवाक्यादि । रामपार्श्वमुपागम्येति । रणशिरसि हतत्वेन रावणस्याशौचाभावादागतः, अत एवोत्तरदिने राज्याभिषेकोऽयोध्यागमनं चानुष्ठितम् । प्रथमायां रावणसंस्कारः ॥ ११५ ॥ ११६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

गम्यतामिति ताः सर्वा विविशुर्नगरं तदा । प्रविष्टासु च सर्वासु राक्षसीषु विभीषणः । रामपार्श्वमुपागम्य तदाऽतिष्ठद्विनीतवत् ॥ ११५ ॥ रामोऽपि सह सैन्येन ससुग्रीवः सलक्ष्मणः । हर्षं लेभे रिपुं हत्वा यथा वृत्रं शतक्रतुः ॥ ११६ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

ते रावणवधं दृष्ट्वा देवगन्धर्वदानवाः । जग्मुः स्वैस्वैर्विमानैस्ते कथयन्तः शुभाः कथाः ॥ १ ॥ रावणस्य वधं घोरं राघवस्य पराक्रमम् । सुयुद्धं वानराणां च सुग्रीवस्य च मन्त्रितम् ॥ २ ॥ अनुरागं च वीर्यं च सौमित्रेर्लक्ष्मणस्य च । [पतिव्रतात्वं सीताया हनूमति पराक्रमम् ।] कथयन्तो महाभागा जग्मुर्हृष्टा यथागतम् ॥३॥ राघवस्तु रथं दिव्यमिन्द्रदत्तं शिखिप्रभम् । अनुज्ञाय महाभागो मातलिं प्रत्यपूजयत् ॥ ४ ॥

अथ विभीषणाभिषेकः—ते रावणवधमित्यादि । अत्र क्रियाभेदात्तच्छन्दद्वयम् ॥ १ ॥ शुभाः कथाः कथयन्त इत्यस्यैव विवरणम्—रावणस्य वधमित्यादि । मन्त्रितं मन्त्रम् । सौमित्रेरिति तन्मातुः श्लाघनव्यञ्जनाय, अस्य जननी हि भाग्यवतीति ॥ २ ॥ ३॥ इन्द्रदत्तम् इन्द्रप्रेरितम् । शिखिप्रभम्

गम्यतामिति । उक्ता इति शेषः ॥११५॥११६॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुर्दशोत्तरशततमः सर्गः ॥ ११४ ॥

त इति । स्वैः स्वकीयैः ॥ १ ॥ कथाप्रकारमेवाह—रावणस्येत्यादिश्लोकद्वयेन ॥ २ ॥ ३ ॥ अनुज्ञाय रथं, नयेति शेषः ॥ ४–६ ॥

स०–**शिखिप्रभम्** अग्नितेजसम् । ननु वनपर्वणि " दृष्ट्वा रामं तु जानक्या सङ्गतं शक्रसारथिः । उवाच परमप्रीतः सुहृन्मध्य इदं वचः ॥ देवगन्धर्वयक्षाणां मानुषासुरभोगिनाम् । अपनीतं त्वया दुःखमिदं सत्यपराक्रम ॥ सदेवासुरगन्धर्वा यक्षराक्षसपन्नगाः । कथयिष्यन्ति लोकास्त्वां यावद्भूमिर्धरिष्यति ॥ इत्येवमुक्त्वाऽनुज्ञाप्य रामं शस्त्रभृतां वरम् । संपूज्यापाक्रमत्तेन रथेनादित्यवर्चसा ॥" इति सीतासङ्गमनानन्तरं रथस्य समातलेः प्रेषणोक्तेरत्र पूर्वमेव तदुक्तेर्विरोध इति चेत् ? सत्यम्; भारतस्योत्तरत्वात्तदनुसारेण कथोद्धाप उत्तरत्रात्र कार्यः । मातलिना दृष्टसीतारामसङ्गमेन गमने सर्ववार्ताया इन्द्रं प्रति प्रतिवक्तुं सुशकत्वगुणलाभाच । अथवा सङ्कोचेन कथां कथयितुर्बादरायणस्य न निर्भरः पौर्वापर्यविषय इत्येवमुक्तिः । रावणहननानन्तरं सीतासङ्गत्यन्तरायस्यान्तराऽभावान्मातलिना स्वनाथं प्रति प्रतिबोधयितुं शक्यत्वाचेति वा समाविरवधेयः ॥४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अग्निप्रभम् । प्रत्यपूजयत् उपचचार ॥ ४–६ ॥ परिष्वज्येति । प्रचोदितः विज्ञातः । बलालयं शिबिरम् ॥७॥ सत्यसम्पन्नत्वादिविशेषणं यथोक्तकारित्व द्योतनाय ॥ ८ ॥ विभीषणमित्यादिश्लोकद्वयमेकान्वयम् । लङ्कायामभिषेचय लङ्कायां गत्वाऽभिषेचय । समुद्रतीर एव लङ्काराज्याभिषेके कृतेऽपि पुन

राघवेणाभ्यनुज्ञातो मातलिः शक्रसारथिः । दिव्यं तं रथमास्थाय दिवमेवारुरोह सः ॥ ५ ॥ तस्मिंस्तु दिवमारूढे सुरसारथिसत्तमे । राघवः परमप्रीतः सुग्रीवं परिषस्वजे ॥ ६ ॥ परिष्वज्य च सुग्रीवं लक्ष्मणेन प्रचोदितः । पूज्यमानो हरिश्रेष्ठैराजगाम बलालयम् ॥ ७ ॥ अब्रवीच्च तदा रामः समीपपरिवर्तिनम् । सौमित्रिं सत्यसम्पन्नं लक्ष्मणं दीप्ततेजसम् ॥ ८ ॥ विभीषणमिमं सौम्य लङ्कायामभिषेचय । अनुरक्तं च भक्तं च मम चैवोपकारिणम् ॥ ९ ॥ एष मे परमः कामो यदीमं रावणानुजम् । लङ्कायां सौम्य पश्येयमभिषिक्तं विभीषणम् ॥ १० ॥ एव मुक्तस्तु सौमित्री राघवेण महात्मना । तथेत्युक्त्वा तु संहृष्टः सौवर्णं घटमाददे ॥ ११ ॥ तं घटं वानरेन्द्राणां हस्ते दत्त्वा मनोजवान् । आदिदेश महासत्त्वान् समुद्रसलिलानये ॥ १२ ॥ इति शीघ्रं ततो गत्वा वानरास्ते महाबलाः । आगतास्तज्जलं गृह्य समुद्राद्वानरोत्तमाः ॥ १३ ॥ ततस्त्वेकं घटं गृह्य संस्थाप्य परमासने । घटेन तेन सौमित्रिरभ्यषिञ्चद्विभीषणम् ॥ १४॥

र्विधानं रावणसिंहासनेऽभिषेकार्थम् । अनुरक्तमित्यनेन मित्रकृत्यमुक्तम् । भक्तमित्यनेन दास्यकृत्यम् । उपकारिणमित्यनेनानुरागभक्त्योः कार्यपर्यवसान मुक्तम् । परमः काम इत्यनेन शरणागतविभीषणाभिमतपरिपूरणमेव विजयस्य प्रधानप्रयोजनमित्यवगम्यते ॥ ९ ॥ १० ॥ एवमिति । घटमिति जात्येक वचनम् ॥११॥ तमिति । आनये आनयने । हस्त इत्यत्रापि जात्येकवचनम्, वानरेन्द्राणामिति बहुवचनप्रयोगात् ॥१२॥ इतीति । आदेशाद्धेतोरित्यर्थः। "इति हेतुप्रकरणप्रकारादिसमाप्तिषु" इत्यमरः । वानरा वानरोत्तमा इति वचनं वानरोत्तमत्वेऽपि मानुषत्वव्यावर्तनाय । समुद्रात् समुद्रेभ्यः ॥ १३॥१४ ॥

बलालयं शिबिरमाजगाम । चैत्रशुक्लप्रतिपदि रावणसंस्कारबलालयप्रवेशौ ॥ ७-११ ॥ घटं हस्त इति जातावेकवचनम् ॥ १२–१८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लङ्कायामित्यादिसार्धश्लोक एकान्वयः। अनेन रामनिदेशानन्तरमेव लक्ष्मणो विभीषणादिभिः सह लङ्कां प्रविष्टवानित्यवगम्यते । मन्त्रदृष्टेन मन्त्रेषु वेदेषु दृष्टेन स्पष्टमवगम्यमानेन, विधिना प्रकारेण । शुद्धात्मानमित्यनेन रामाज्ञया अभिषेकमङ्गीकृतवान्। परमार्थस्तु रामकैङ्कर्य एवासक्तोऽभूदित्यव

लङ्कायां रक्षसां मध्ये राजानं रामशासनात् । विधिना मन्त्रदृष्टेन सुहृद्गणसमावृतम् । अभ्यषिञ्चत स धर्मात्मा शुद्धात्मानं विभीषणम् ॥ १५ ॥ तस्यामात्या जहृषिरे भक्ता ये चास्य राक्षसाः। दृष्ट्वाऽभिषिक्तं लङ्कायां राक्षसेन्द्रं विभीषणम् ॥ १६ ॥ स तद्राज्यं महत् प्राप्य रामदत्तं विभीषणः। प्रकृतीः सान्त्वयित्वा च ततो राममुपागमत् । ॥ १७ ॥ अक्षतान् मोदकान् लाजान् दिव्याः सुमनसस्तदा । आजह्रुरथ संहृष्टाः पौरास्तस्मै निशाचराः ॥ १८ ॥ स तान् गृहीत्वा दुर्धर्षो राघवाय न्यवेदयत् । मङ्गल्यं मङ्गलं सर्वं लक्ष्मणाय च वीर्यवान् ॥ १९ ॥ कृतकार्यं समृद्धार्थं दृष्ट्वा रामो विभीषणम् । प्रतिजग्राह तत् सर्वं तस्यैव प्रियकाम्यया ॥ २० ॥ ततः शैलोपमं वीरं प्राञ्जलिं पार्श्वतः स्थितम् । अब्रवीद्राघवो वाक्यं हनुमन्तं प्लवङ्गमम् ॥ २१ ॥ अनुमान्य महाराजमिमं सौम्य विभीषणम् ॥ २२ ॥ गच्छ सौम्य पुरीं लङ्कामनुज्ञाप्य यथाविधि । प्रविश्य रावणगृहं विजयेनाभिनन्द्य च ॥ २३ ॥ वैदेह्यै मां कुशलिनं ससुग्रीवं सलक्ष्मणम् । आचक्ष्व जयतां श्रेष्ठ रावणं च मया हतम् ॥ २४ ॥

गम्यते। आज्ञाकैङ्कर्यं हि कर्तव्यम् ॥ १५ ॥ १६ ॥ स इति । प्रकृतीः अमात्यप्रभृतीन्, सान्त्वयित्वा पुत्रमित्रादिविनाशजशोकापनोदनं कृत्वा। राममुपागमत्, लक्ष्मणेन सहेति शेषः ॥ १७ ॥ १८ ॥ स तानिति । मङ्गलमर्हतीति मङ्गल्यम्, मङ्गलप्रयोजनमित्यर्थः । मङ्गलं हरिद्रादिमङ्गलद्रव्यम् । सर्वम् उक्ताक्षतादिभिन्नम् । रामाय लक्ष्मणाय च न्यवेदयत् ॥ १९ ॥ कृतकार्यमिति। तस्यैव प्रियकाम्यया न तु स्वभोगेच्छया ॥२० ॥ २१॥ अनुमान्येत्यादिसार्धश्लोकत्रयमेकान्वयम् । विभीषणमनुमान्य लङ्कां गच्छ, विभीषणमनुज्ञाप्य रावणगृहं प्रविश्य विजयेन विजयकथनेन, अभिनन्द्य

स तानिति । मङ्गल्यं मङ्गलप्रयोजनम् । मङ्गलं मङ्गलवस्तुजातम् ॥ १९–२२ ॥ विजयेनाभिनन्द्य जयकथनेन नन्दयित्वा ॥ २३ ॥ २४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीतां तोषयित्वा, वैदेह्यै मां कुशलिनमाचक्ष्वेति संबन्धः। सन्देशं सीतावाचिकम् ॥ २२–२५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

प्रियमेतदुदाहृत्य मैथिल्यास्त्वं हरीश्वर। प्रतिगृह्य च सन्देशमुपावर्तितुमर्हसि ॥ २५ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चदशोत्तरशततमः सर्गः ॥ ११५ ॥

इति प्रतिसमादिष्टो हनुमान् मारुतात्मजः। प्रविवेश पुरीं लङ्कां पूज्यमानो निशाचरैः ॥ १ ॥ प्रविश्य च महातेजा रावणस्य निवेशनम्। ददर्श मृजया हीनां सातङ्कामिव रोहिणीम्। वृक्षमूले निरानन्दां राक्षसीभिः समावृताम् ॥ २ ॥ निभृतः प्रणतः प्रह्वः सोऽभिगम्याभिवाद्य च ॥ ३ ॥ दृष्ट्वा तमागतं देवी हनुमन्तं महाबलम्। तूष्णीमास्त तदा दृष्ट्वा स्मृत्वा प्रमुदिताऽभवत् ॥ ४ ॥

अथ हनुमत्सीतासंवादः—इति प्रतिसमादिष्ट इत्यादि। मारुतात्मज इत्यनेन वेगातिशय उच्यते। पूज्यमान इति। मार्गप्रदर्शनादिभिः पूज्यमानत्वम् ॥ १ ॥ प्रविश्येत्यादिसार्धश्लोक एकान्वयः। मृजया शरीरसंस्कारेण। सातङ्कां सग्रहपीडाम् ॥ २ ॥ निभृत इत्यर्धम्। अभिगम्य समीपं प्राप्य। अभिवाद्य स्वनाम सङ्कीर्त्य। प्रणतः कृतप्रणामः सन्। निभृतः निश्चलः। प्रह्वः प्रकर्षेण सङ्कुचितगात्रः, स्थित इति शेषः। आचार्यास्तु—करणत्रयेणापि निश्चलो बभूवेत्यर्थ इति प्राहुः ॥ ३ ॥ तं दृष्ट्वा विस्मृत्य प्रथमं तूष्णीमास्त। पुनर्दृष्ट्वा स्मृत्वा प्रमुदिताऽभवत्। यद्वा सामान्यतो दृष्ट्वा तूष्णीमास्त। ततो विशेषतो दृष्ट्वा स्मृत्वा हनुमानिति ज्ञात्वा प्रमुदिताऽभवत्। अथवा तं दृष्ट्वा स्मृत्वा प्रत्यभिज्ञाय प्रमुदिताऽभवत्। प्रमोदातिरेकेण

॥ २५ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां पञ्चदशोत्तरशततमः सर्गः ॥११५॥१ ॥ प्रविश्येति। मृजया शरीरसंस्कारेण ॥ २ ॥ निभृतः निश्चलः। प्रह्वः नम्रः, स्थित इति शेषः ॥ ३ ॥ दृष्ट्वेति। सामान्यतो दृष्ट्वा तूष्णीमास्त, ततो दृष्ट्वा स्मृत्वा हनुमानिति ज्ञात्वा ॥४–८॥

स० –दृष्ट्वा रामविजयादिकं दृष्ट्वैव समागतं न तु श्रुत्वा एतादृशं हनुमन्तं दृष्ट्वा तदा तूष्णीमास्त किं वदिष्यति वेति। स्मृत्वा रामानयनादिकं यथाप्रतिज्ञं तेन कृतं स्मृत्वा हृष्टा चाभवत्। एवमर्थाङ्गीकारादेव दृष्ट्वेत्यनेन–

For Private And Personal Use Only

स्तब्धा सती तूष्णीमास्तेत्यर्थः ॥ ४ ॥ सौम्यं निजदर्शनेन विकसितम् ॥ ५–९ ॥ रामसन्देशवाक्यमाह–प्रियमाख्यामीत्यादि श्लोकद्वयमेकान्वयम् । हे देवि ! ते प्रियमाख्यामि । त्वां तु भूयः भूयिष्ठम्, सभाजये प्रीणये । धर्मज्ञे पातिव्रत्यधर्मज्ञे ! त्वं दिष्ट्या जीवसि । अन्यथा मम जयो व्यर्थ एव स्यादिति भावः । मम जयेन मत्पराक्रमेण, नः संयुगे जयो लब्धः । गतव्यथा सती स्वस्था भवेति योजना ॥ १० ॥ ११ ॥ हे सीते ! तव निर्जये

सौम्यं दृष्ट्वा मुखं तस्या हनुमान् प्लवगोत्तमः । रामस्य वचनं सर्वमाख्यातुमुपचक्रमे ॥ ५ ॥ वैदेहि कुशली रामः सहसुग्रीवलक्ष्मणः । विभीषणसहायश्च हरीणां सहितो बलैः ॥६॥ कुशलं चाह सिद्धार्थो हतशत्रुररिन्दमः ॥ ७ ॥ विभीषणसहायेन रामेण हरिभिः सह । निहतो रावणो देवि लक्ष्मणस्य नयेन च ॥ ८ ॥ पृष्ट्वा तु कुशलं रामो वीरस्त्वां रघुनन्दनः । अब्रवीत् परमप्रीतः कृतार्थेनान्तरात्मना ॥९॥ प्रियमाख्यामि ते देवि त्वां तु भूयः सभाजये । दिष्ट्या जीवसि धर्मज्ञे जयेन मम संयुगे ॥ १० ॥ [तव प्रभावाद्धर्मज्ञे महान् रामेण संयुगे ।] लब्धो नो विजयः सीते स्वस्था भव गतव्यथा । रावणश्च हतः शत्रुर्लङ्का चेयं वशे स्थिता ॥ ११ ॥ मया ह्यलब्धनिद्रेण दृढेन तव निर्जये । प्रतिज्ञैषा विनिस्तीर्णा बद्ध्वा सेतुं महोदधौ ॥ १२ ॥

शत्रुहस्तात्तव विमोचने । दृढेन एकाग्रचित्तेन । अत एव अलब्धनिद्रेण मया महोदधौ सेतुं बद्धा, एषा प्रतिज्ञा रावणं हनिष्यामीति प्रतिज्ञा, विनि

कुशलं पृष्ट्वा रामस्त्वामब्रवीदिति सम्बन्धः ॥ ९ ॥ वचनप्रकारमेवाह–प्रियमाख्यामीत्यादि । प्रियमाख्यामीत्यारभ्य–अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः इत्ये तदन्तं रामसन्देशवाक्यम् । देवि ! ते प्रियमाख्यामि । त्वां तु भूयः भूयिष्ठम् । सभाजये प्रीणयामि । मम जयेन हेतुना मम जयं निश्चित्यैव जीवसीत्यर्थः । अत एव नः अस्माभिः संयुगे विजयो लब्धः स्वस्था भवेति योजना । यद्वा मम जयेन मत्पराक्रमेण जयो लब्धः, स्वस्था भवेति सम्बन्धः ॥१०॥११॥ तव निर्जये शत्रुहस्तात्तव विमोचने दृढेन एकाग्रचित्तेन अत एवालब्धनिद्रेण मया महोदधौ सेतुं बद्ध्वा एषा प्रतिज्ञा रावणं हनिष्यामीत्येवंरूपा विनिस्तीर्णेति सम्बन्धः ॥ १२ ॥

–नपौनरुक्त्यम् ॥४॥ [तव प्रभावात् त्वत्पातिव्रत्यमाहात्म्यात् । तत्स्तुतिकालत्वादेवमुक्तिः । तत्र त्वत्संम्बन्धिना रामेण । प्रभावात् स्वसामर्थ्यात् ।] अयं विजयो लब्ध इति वा । लब्धोऽयं विजय इति पाठः ॥११

स्तीर्णां प्रतिशालितेत्यर्थः ॥ १२ ॥ सम्भ्रमः व्यग्रता । वर्तन्त्या वर्तमानया ॥ १३ ॥ यस्मात् स्वगृहे परिवर्तसे तस्माद्विश्वस्ता सती आश्वसिहि विश्रान्ता भव, निवृत्तखेदा भवेत्यर्थः । अयं विभीषणः ॥ १४ ॥ समुत्पत्य हर्षेण समुत्थाय । अवरुद्धा अवरुद्धव्यापारा ॥ १५–१७ ॥ क्षणान्तरं

सम्भ्रमश्च न गन्तव्यो वर्तन्त्या रावणालये । विभीषणविधेयं हि लङ्कैश्वर्यमिदं कृतम् ॥ १३ ॥ तदाश्वसिहि विश्वस्ता स्वगृहे परिवर्तसे । अयं चाभ्येति संहृष्टस्त्वद्दर्शनसमुत्सुकः ॥ १४ ॥ एवमुक्ता समुत्पत्य सीता शशिनिभानना । प्रहर्षेणावरुद्धा सा व्याजहार न किंचन ॥ १५ ॥ अब्रवीच्च हरिश्रेष्ठः सीतामप्रतिजल्पतीम् । किं नु चिन्तयसे देवि किं नु मां नाभिभाषसे ॥ १६ ॥ एवमुक्ता हनुमता सीता धर्मे व्यवस्थिता । अब्रवीत् परमप्रीता हर्षगद्गदया गिरा ॥ १७ ॥ प्रियमेतदुपश्रुत्य भर्तुर्विजयसंश्रितम् । प्रहर्षवशमापन्ना निर्वाक्याऽस्मि क्षणान्तरम् ॥ १८ ॥ न हि पश्यामि सदृशं चिन्तयन्ती प्लवङ्गम । मत्प्रियाख्यानकस्येह तव प्रत्यभिनन्दनम् ॥ १९ ॥ न हि पश्यामि तत् सौम्य पृथिव्यामपि वानर । सदृशं मत्प्रियाख्याने तव दातुं भवेत् समम् ॥ २० ॥ हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च । राज्यं वा त्रिषु लोकेषु नैतदर्हति भाषितुम् ॥ २१ ॥

क्षणमात्रं निर्वाक्याऽस्मि, हर्षावरुद्धव्यापारत्वादिति भावः ॥ १८ ॥ निर्वाक्याऽस्मीत्यत्र हेत्वन्तरमाह–न हीत्यादि । सदृशं प्रत्यभिनन्दनं प्रतिप्रियवचनम् ॥ १९ ॥ सदृशं प्रदेयवस्त्वपि न पश्यामीत्याह–न हीत्यादिना । अत्र अपिशब्देन अन्तरिक्षस्वर्गौ समुच्चीयेते । त्रिष्वपि लोकेषु न पश्यामि । यत् मत्प्रियाख्याने विषये तव दातुं समम् अत्यन्तसदृशं भवेत् ॥२०॥ उक्तं विवृणोति–हिरण्यमिति । हिरण्यं रजतम् । "रजतश्हिरण्यम्"

सम्भ्रमः भयम् ॥ १३ ॥ अयं विभीषणः त्वद्दर्शनसमुत्सुकस्सन्नभ्येतीति सम्बन्धः ॥ १४–१७ ॥ क्षणान्तरं क्षणमात्रम् ॥ १८ ॥ न केवलं हर्षवशादेव निर्वाक्याऽस्मि किन्तु प्रियाख्यातुस्तव तत्सदृशप्रियवचनस्याभावादपीत्याह–नहीति । मत्प्रियाख्यानकस्य मत्प्रियाख्यातुस्तव प्रत्यभिनन्दनं प्रतिप्रियवाक्यं न पश्यामीति सम्बन्धः ॥ १९ ॥ सदृशं प्रियवचनं न पश्यामीत्युक्त्वा सदृशं प्रदेयं वस्त्वपि नास्तीत्याह–नहि पश्यामीत्यादिश्लोकद्वयेन । दातुं सदृशं यदस्ति तत्पृथिव्यामपि न पश्यामि, पातालस्वर्गयोरपीत्यपिशब्दार्थः ॥ २० ॥ हिरण्यं रजतम् । हिरण्यादि तत्सर्वमपि प्रियाख्यानसमत्वेन भाषितुं नार्हतीति सम्बन्धः ॥२१॥२२॥ ॥३३७॥

ति०–वर्तन्त्या वर्तमानया ॥ १३ ॥ स०–भवेदानीमभावेपि कालान्तरे देशान्तरे दीयतामित्यत आह–न हीति । पृथिव्यां नास्तीत्यनेन मम मातुर्गृहेऽप्यावेऽपि भर्तुर्गृहे सहभोगरूपमस्तीति सूचयति ॥२०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति श्रुतेः । त्रिषु लोकेषु राज्यं त्रिलोकविषयराजत्वम् । नैतदर्हति भाषितुम् । हिरण्याद्येतत्सर्वमपि प्रियाख्यानसमत्वेन भाषितुं नार्हतीत्यर्थः ॥ २१ ॥ प्रमुखे अग्रे ॥ २२ ॥ प्रतिप्रियवचनं न पश्यामीत्यस्योत्तरमाह–भर्तुरिति । एवंविधं स्निग्धं वाक्यं भाषितुं त्वमेवार्हसि नान्या । अनेन सर्वोत्तरं प्रीतिप्रियवचनं मह्यं दत्तमित्युक्तं भवति ॥२३॥ प्रियाख्यानसदृशं प्रदेयं वस्तु नास्तीत्यस्योत्तरमाह–तवेति । एतत् प्रत्यभिनन्दनं न पश्यामीत्येतत् । सारवत् प्रत्यभिनन्दनवचनराहित्यकथनेन मद्वचनस्य निरवधिकप्रीतिजनकत्वकथनान्महातात्पर्यवत् । स्निग्धं मयि प्रीतिपुरस्सरम् ।

एवमुक्तस्तु वैदेह्या प्रत्युवाच प्लवङ्गमः । गृहीतप्राञ्जलिर्वाक्यं सीतायाः प्रमुखे स्थितः ॥ २२ ॥ भर्तुः प्रियहिते युक्ते भर्तुर्विजयकाङ्क्षिणि । स्निग्धमेवंविधं वाक्यं त्वमेवार्हसि भाषितुम् ॥२३॥ तवैतद्वचनं सौम्ये सारवत् स्निग्धमेव च । रत्नौघाद्विविधाच्चापि देवराज्याद्विशिष्यते ॥ २४ ॥ अर्थतश्च मया प्राप्ता देवराज्यादयो गुणाः । हतशत्रुं विजयिनं रामं पश्यामि सुस्थितम् ॥२५॥ तस्य तद्वचनं श्रुत्वा मैथिली जनकात्मजा । ततः शुभतरं वाक्यमुवाच पवनात्मजम् ॥ २६ ॥ अतिलक्षणसम्पन्नं माधुर्यगुणभूषितम् । बुद्ध्या ह्यष्टाङ्गया युक्तं त्वमेवार्हसि भाषितुम् ॥ २७॥

एतद्वचनश्रवणेनैव मया सर्वोत्तरं वस्तु समुपलब्धमिति भावः ॥२४॥ पूर्वमेव लब्धदेवराज्यादिकस्य तत्प्रदानं निरर्थकमित्याशयेनाह–अर्थत इति । रामं विजयिनं पश्यामीति यत् अस्मात् अर्थतः प्रयोजनात् देवराज्यादयो गुणाः उत्कर्षाः प्राप्ताः । रामविजयदर्शनमेव राज्यादिकमित्यर्थः ॥२५॥२६॥ नानृग्वेदेत्यादिना राम इव स्वयमपि तद्वाक्यसौष्ठवं प्रशंसति–अतीति । अतिलक्षणसम्पन्नम् आकांक्षायोग्यतासन्निधिमत्पदवत्त्वरूपवाक्यलक्षणसम्पन्नम् । "बहुव्याहरताऽनेन न किंचिदपशब्दितम्" इत्युक्तशब्दसाधुत्वसम्पन्नम् । माधुर्यगुणभूषितम् "संश्रवे मधुरं वाक्यम्" इत्युक्तरीत्या श्रवणमात्रेण

स्निग्धं स्नेहोपेतम्, अशक्यप्रतिपादनमित्थंवंरूपं त्वमेव भाषितुमर्हसि नान्या, अतस्त्वया सर्वोत्तरं यदिदं वचनमुक्तं तदेव परमं प्रत्यभिनन्दनमिति शेषः ॥२३॥ प्रियाख्यानसदृशं प्रदेयं नास्तीत्यस्योत्तरमाह–तवेति । एतद्वचनं निस्समाधिकम् एतद्वचनश्रवणेनैव मया सर्वोत्तरं वस्तु लब्धमिति भावः ॥ २४ ॥ विजयिनं रामं पश्यामीति यत् अनेनैवार्थतः परमार्थतो देवराज्यादयो गुणाः श्रेयांसि प्राप्ता एवेत्यर्थः ॥२५॥२६॥ अतिलक्षणसम्पन्नम् आकांक्षायोग्यतासन्निधिमत्पदस्वरूपवाक्यलक्षणसम्पन्नम्, माधुर्यगुणभूषितं श्रवणमात्रेणानन्दजनकत्वं माधुर्यम् । अष्टाङ्गया "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः ॥"

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

आनन्दजनकत्वरूपमाधुर्यगुणभूषितम् । अष्टाङ्गया "ग्रहणं धारणं चैव स्मरणं प्रतिपादनम् । ऊहोऽपोहोऽर्थविज्ञानं तत्त्वज्ञानं च धीगुणाः॥" इत्युक्ताष्टाङ्गयुक्तया बुद्ध्या युक्तम्, तादृशबुद्धिपूर्वकमित्यर्थः ॥२७॥ न केवलं वाक्यतः, गुणतोऽपि श्लाघ्योऽसीत्याह—श्लाघनीय इत्यादिना श्लोकद्वयेन । अनिलस्य श्लाघनीयः पुत्रः, अनिलादपि सञ्जीवनकर इत्यर्थः । सञ्जीवनं चानृशंस्यधर्मादित्याह परमधार्मिक इति । बलं प्रयाससहिष्णुत्वम् । शौर्यं युद्धोत्साहः ।

श्लाघनीयोऽनिलस्य त्वं पुत्रः परमधार्मिकः । बलं शौर्यं श्रुतं सत्त्वं विक्रमो दाक्ष्यमुत्तमम् ॥ २८ ॥ तेजः क्षमा धृतिर्धैर्यं विनीतत्वं न संशयः । एते चान्ये च बहवो गुणास्त्वय्येव शोभनाः ॥ २९ ॥ अथोवाच पुनः सीतामसम्भ्रान्तो विनीतवत् । प्रगृहीताञ्जलिर्हर्षात् सीतायाः प्रमुखे स्थितः ॥ ३० ॥ इमास्तु खलु राक्षस्यो यदि त्वमनुमन्यसे । हन्तुमिच्छाम्यहं सर्वा याभिस्त्वं तर्जिता पुरा ॥ ३१ ॥ क्लिश्यन्तीं पतिदेवां त्वामशोकवनिकां गताम् ॥ ३२ ॥ घोररूपसमाचाराः क्रूराः क्रूरतरेक्षणाः । राक्षस्यो दारुणकथा वरमेतत् प्रयच्छ मे ॥ ३३ ॥ मुष्टिभिः पाणिभिः सर्वाश्चरणैश्चैव शोभने । इच्छामि विविधैर्घातैर्हन्तुमेताः सुदारुणाः ॥ ३४ ॥

श्रुतं शास्त्रज्ञानम् । "श्रुतं शास्त्रावधृतयोः" इत्यमरः । सत्त्वं शारीरः सारः । विक्रमः पराक्रमः । दाक्ष्यं सामर्थ्यम् । उत्तममिति सर्वविशेषणम् । तेजः पराभिभवनसामर्थ्यम् । क्षमा अपराधसहिष्णुत्वम् । धृतिः प्रभावः । धैर्यं क्षोभके सत्यक्षोभ्यत्वम् । विनीतत्वं विनयवत्त्वम् विशिष्टनीतिमत्त्वं वा । एते चान्ये च दयादयो बहवो गुणाः, त्वय्येव शोभनाः त्वामाश्रयमधिगम्य शोभमाना भवन्ति । न संशयः नाहमसतो गुणानारोप्य स्तौमीत्यर्थः॥२८–३०॥ इदं तु मे प्रियाख्यानपारितोषिकत्वेन देयमित्यर्थयते—इमा इत्यादिना । सार्धश्लोकद्वयमेकान्वयम् । क्लिश्यन्तीं पतिदेवतां त्वां प्रति या राक्षस्यो दारुणकथा अब्रुवन् । पुरा याभिस्त्वं तर्जिता इमा राक्षस्यः राक्षसीः, यद्यनुमन्यसे हन्तुमिच्छामि । एतद्वरं मे प्रयच्छेति सम्बन्धः ॥३१--३३॥ हननप्रकारं स्वक्रोधानु

इत्युक्ताष्टाङ्गयुक्तया बुद्ध्या युक्तम् ॥ २७ ॥ श्लाघनीय इत्यादि श्लोकद्वयमेकं वाक्यम् । बलम् आयाससहिष्णुत्वम् । शौर्यं युद्धोत्साहः । सत्त्वं शारीरस्सारः । तेजः पराभिभवनसामर्थ्यम् । विनीतत्वं चेत्येवमादयो बहवो गुणाः त्वय्येव सन्ति अत्र न संशय इत्यन्वयः ॥ २८ ॥२९॥ असम्भ्रान्तः स्तुत्या अविकृतचित्तः । विनीतवत विनीतार्हम् ॥ ३० ॥ राक्षस्यः राक्षसीः ॥ ३१ ॥ क्लिश्यन्तीमित्यादि सार्धश्लोकमेकं वाक्यम् ॥ ३२–३५ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

रूपं दर्शयति--मुष्टिभिरित्यादिना। श्लोकत्रयमेकान्वयम् । घातैः प्रहारैः । भक्षणैः खादनैः। लुञ्चनैः उन्मूलनैः। शुष्कमुखीभिः नखैः। दारणैः पीडनैः कपोलताडनैर्वा । लङ्घनैः उत्प्लुत्योपरिपातनैः। हतैः हस्तैस्ताडनैः । निपात्य भूमौ पातयित्वा मुष्ट्यादिभिर्हन्तुमिच्छामीत्यन्वयः ॥ ३४–३६ ॥ उक्तमर्थमावश्यकत्वज्ञापनाय पुनरपि सङ्ग्रहेण याचते–एवमिति ॥ ३७ ॥ एवमुक्तेति । धर्मसहितमिति क्रियाविशेषणम् ॥ ३८ ॥ राजेति । राजसंश्रयवश्यानां राजसेवापरवशानाम् । अत एव पराज्ञया कुर्वन्तीनां राजचोदितकार्यं कुर्वन्तीनाम्, विधेयानां चोदिताकरणे दण्डार्हाणाम्, रावणस्य

घातैर्जानुप्रहारैश्च दशनानां च पातनैः। भक्षणैः कर्णनासानां केशानां लुञ्चनैस्तथा ॥३५॥ नखैः शुष्कमुखीभिश्च दारणैर्लङ्घनैर्हतैः। निपात्य हन्तुमिच्छामि तव विप्रियकारिणीः ॥ ३६ ॥ एवंप्रकारैर्बहुभिर्विप्रकारैर्यशस्विनि । हन्तुमिच्छाम्यहं देवि तवेमाः कृतकिल्बिषाः ॥ ३७ ॥ एवमुक्ता हनुमता वैदेही जनकात्मजा। उवाच धर्मसहितं हनुमन्तं यशस्विनी ॥३८॥ राजसंश्रयवश्यानां कुर्वन्तीनां पराज्ञया । विधेयानां च दासीनां कः कुप्येद्वानरोत्तम ॥ ३९ ॥ भाग्यवैषम्ययोगेन पुरादुश्चरितेन च। मयैतत् प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ॥ ४० ॥ प्राप्तव्यं तु दशायोगान्मयैतदिति निश्चितम्। दासीनां रावणस्याहं मर्षयामीह दुर्बला ॥ ४१ ॥

दासीनां दासीभ्यः, कः कुप्येत् ॥ ३९ ॥ भाग्यवैषम्ययोगेन भाग्यविपर्यययोगेन, भाग्यस्यापरिपक्कतयेत्यर्थः। पुरादुश्चरितेन च पूर्वकृतदुष्कृतेन च, एतत्तर्जनभर्त्सनादिकं प्राप्यते। तत्र हेतुमाह स्वकृतमिति। हि यस्मात्। स्वकृतमुपभुज्यते स्वकृतकर्मफलं प्राप्यते लोकैः। अतो मयाऽपि भुज्यत इत्यर्थः ॥ ४० ॥ रावणस्य दासीनाम् एतत्तर्जनादिकं दशायोगात् अवस्थायोगात्, अनुभवयोग्यकालसम्बन्धादिति यावत् । प्राप्तव्यमिति मया निश्चितम्। दुर्बला पूर्वमेतादृशापन्निवारककर्मकरणाशक्ता । अतोऽहमिह राक्षसीविषये मर्षयामीति सम्बन्धः । दुर्बला कृपापरवशा वा। हते रावणे

शुष्कमुखीभिः नखैः। लङ्घनैः उत्प्लुत्यापतनैः ॥ ३६ ॥ एवमिति श्लोको भिन्नं वाक्यम् । राजसंश्रयवश्यानां राजसंश्रयात्परवशानाम् राजसंश्रयो राजसेवा, राजसेवापराणामित्यर्थः ॥ ३७–४० ॥ प्राप्तव्यमिति । दशायोगं, नपुंसकत्वमार्षम् । अयं दशायोगः एतादृशदुरवस्थाविशेषः मया प्राप्तव्य इति निश्चितः निश्चयः कृतः। कुतः? दुर्बला पूर्वमेतादृशानां निराकरणकर्मकरणाशक्ता अतः रावणस्य राक्षसीनामेतत्तर्जनादिकं मर्षयामि, असहमित्यर्थः। दशायोगादिति पाठे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दौर्बल्यान्तराभावात्, परदुःखसहिष्णुत्वमेव हि तदानीं दौर्बल्यम् ॥ ४१ ॥ राक्षसीनामपराधस्य राजाज्ञामूलकत्वमन्वयव्यतिरेकाभ्यां दर्शयति–आज्ञप्ता इति ॥ ४२ ॥ अथासां स्वातन्त्र्येणापकारकरणमभ्युपेत्य तथापि क्षन्तव्यमित्यत्र इतिहासं दर्शयति–अयमिति । पुरा किल कश्चिद्व्याधो व्याघ्रेणानुसृतो वृक्षमारूढः, वृक्षमूलगतो व्याघ्रो वृक्षोपरि स्थितमृक्षं 'वन्यमृगाणामस्माकं जात्या शत्रुरेषः, तस्मादेनं वृक्षात् पातय' इत्यब्रवीत् ।

आज्ञप्ता रावणेनैता राक्षस्यो मामतर्जयन् । हते तस्मिन्न कुर्युर्हि तर्जनं वानरोत्तम ॥ ४२ ॥

अयं व्याघ्रसमीपे तु पुराणो धर्मसंस्थितः । ऋक्षेण गीतः श्लोको मे तन्निबोध प्लवङ्गम ॥ ४३ ॥

न परः पापमादत्ते परेषां पापकर्मणाम् । समयो रक्षितव्यस्तु सन्तश्चारित्रभूषणाः ॥ ४४ ॥

एवमुक्तो भल्लूकः स्ववासस्थानगतमेनं न पातयिष्यामि, तथात्वे धर्महानिः स्यादित्युक्त्वा सुष्वाप । तदनन्तरं 'त्वां रक्षिष्यामि, सुप्तमृक्षं पातय' इति व्याघ्रेण चोदितः सन् व्याधस्तमृक्षमपातयत् । स त्वभ्यासवशेन शाखान्तरमवलम्ब्य नापतत् । तदनु कृतापराधमेनं पातयेति पुनः पुनर्व्याघ्रेणोच्यमानोऽपि भल्लूको बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी गाथा ॥ ४३ ॥ तत्रत्यं श्लोकं पठति–न पर इति । सुग्रीवं प्रति रामः कपोतोपाख्यानमिव हनुमन्तमुद्दिश्य देव्यपि स्वाभिप्रेतेऽर्थे ऋक्षगीतं प्रमाणयति स्म । परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वताम् । परः प्राज्ञः पुरुषः । पापं प्रत्यपकाररूपम् । नादत्ते नाङ्गीकरोति, न करोतीत्यर्थः । समयः आचारः अपकर्तृष्वपि प्रत्यपकार

रावणस्य दासीनामेतत्तर्जनादिकं दशायोगादवस्थायोगादनुभवयोग्यकालसम्भवादिति यावत् । मासङ्गमिति मया निश्चितम् । कुतः ? दुर्बला, अत एतत मर्षयामि, असहमित्यर्थः ॥ ४१ ॥ राक्षसीनामपकारस्य राज्ञो मूलत्वम् अन्वयव्यतिरेकाभ्यां दर्शयति–आज्ञप्ता इति ॥४२॥ अयमिति । कस्मिंश्चिदरण्ये व्याघ्रानुद्रुतः कश्चिद् व्याधो वृक्षमारूढः । वृक्षमूलं गतो व्याघ्रो वृक्षाग्रे स्थितमृक्षं मृगाणामस्माकमयं व्याधः जात्या शत्रुः वृक्षादेनं पातयेत्युवाच । भल्लूकः स्वस्थानगतमेनं न पातयिष्यामि, तथात्वे धर्महानिः स्यादित्युक्त्वा सुष्वाप । त्वां रक्षिष्यामि सुप्तमृक्षं पातयेति व्याघ्रेण चोदितस्सन् व्याधस्तम् ऋक्षमपातयत् । स त्वभ्यासवशेन शाखान्तरमवलम्ब्य नापतत् । तदनन्तरं कृतापराधमेनं पातयेति पुनः पुनर्व्याघ्रेणोच्यमानोऽपि भल्लूको बहुशः कृतापराधमप्येनं तुभ्यं न दास्यामीत्यभिधाय ररक्षेति पौराणिकी कथा ॥ ४३ ॥ तत्रत्योऽयं न पर इति श्लोकः । परेषां पापकर्मणां परानुद्दिश्य पापं कुर्वताम् । परः प्राज्ञः पुरुषः पापं प्रत्यपकाररूपं नादत्ते नाङ्गीकरोति, न करोतीत्यर्थः । समयः आचारः, अपकर्तृष्वपि प्रत्यपकारवर्जनरूपः रक्षितव्यस्तु रक्षितव्य एव, तथाहि सन्तः चारित्रभूषणाः । चारित्रभूषणैरिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वर्जनरूपः, रक्षितव्यस्तु रक्षितव्य एव। तथा हि, सन्तश्चारित्रभूषणाः । सद्भिश्चारित्रभूषणैरिति वा पाठः ॥ ४४ ॥ अथ देव्या अभयप्रदानश्लोकः– पापानामिति। पापानां वा शुभानां वा त्वदभिप्रायेण पापानां वा अस्मदभिप्रायेण शुभानां वा। तदेव ममोद्देश्यं 'दोषो यद्यपि तस्य स्यात्' इतिवत्। मलिनस्य हि स्नानमपेक्षितम्। तासां पापत्वादेवास्मदपेक्षा। किं शुभानामस्माभिः ? तत्पुण्यानामेव तद्रक्षकत्वात्। तस्मात्तत्पापमेवास्माकमुद्दे

पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम। कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥ ४५ ॥
लोकहिंसाविहाराणां रक्षसां कामरूपिणाम्। कुर्वतामपि पापानि नैव कार्यमशोभनम् ॥ ४६ ॥
एवमुक्तस्तु हनुमान् सीतया वाक्यकोविदः। प्रत्युवाच ततः सीतां रामपत्नीं यशस्विनीम् ॥ ४७ ॥
युक्ता रामस्य भवती धर्मपत्नी यशस्विनी। प्रतिसन्दिश मां देवि गमिष्ये यत्र राघवः ॥ ४८ ॥

श्यम्। ननु तर्हि 'दण्ड्या दण्डनीयाः नादण्ड्याः' इति धर्मशास्त्रं भवतीमासाद्य भज्येतेत्याशङ्क्य दुष्टोऽपि शरणागतो रक्षणीय इति विशेषशास्त्रं भवन्तमासाद्य किं भञ्जनीयमित्याह–वधार्हाणामिति। वधार्हाणामपीत्यर्थः। सप्तम्यर्थे षष्ठी। प्लवङ्गम अनभिलषितमेवाभिलषितवान् खलु भवान्। तेषु। आर्येण महता पुरुषेण। करुणं दया कार्यम्। तिष्ठतु पुण्यं पापं च इदानीमेतद्दयनीयदशां पश्य। यद्वा शुभानामिति दृष्टान्तार्थम्। शुभेषु वधार्हेषु यथा करुणं कार्यं तथा पापेषु वधार्हेष्वपि कार्यमित्यर्थः। सापराधादण्डनेऽतिप्रसङ्गः स्यादित्याशङ्क्याह न कश्चिन्नापराध्यतीति। सर्वोऽप्यपराध्यतीत्यर्थः ॥ ४५ ॥ रक्षसां स्वजातिप्रयुक्तहिंसादेरदोषावहत्वाच्छास्त्रोक्तदण्डविषयत्वं नास्तीत्याह–लोकेति। अशोभनं दण्डनम् ॥ ४६ ॥ ४७ ॥ रामस्य युक्ता, 'किं पुनर्मद्विधो जनः' इति स्वस्योत्तमशरणत्वं प्रतिपादितवतो रामस्य शरण्यत्वादिगुणवत्तया सदृशीत्यर्थः। अनेन सर्गेण सीताया दयालुत्वम्

पाठे–सद्भिस्समयो रक्षितव्य इति सम्बन्धः ॥ ४४ ॥ पापानामिति। पापानां वधार्हाणां वा पापजनेषु वधार्हेषु शुभजनेषु वधार्हेषु सत्स्वपि तेषु आर्येण सज्जनेन करुणं कारुण्यं कार्यम्, कर्तव्यमित्यर्थः। ननु सापराधिषु यथापराधं दण्डः कर्तव्य इत्याशङ्क्यातिप्रसङ्गेन परिहरति–नेति। न कश्चिदपि नापराध्यति सर्वोऽप्यपराध्यत्येव, अतः सर्वस्यापि वध्यत्वाद्दयाशालिनस्तूष्णींकरणमेव वरमिति भावः ॥ ४५ ॥ रक्षसां परहिंसनं स्वाभाविको धर्मः, अतोऽपि न वध्या इत्याह–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपराधसहिष्णुत्वं घटकत्वं चोक्तमिति ध्येयम् ॥ ४८ ॥ एवमिति । इच्छामीत्यत्र इतिकरणं द्रष्टव्यम् ॥ ४९-५२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

एवमुक्ता हनुमता वैदेही जनकात्मजा । अब्रवीद्द्रष्टुमिच्छामि भर्तारं वानरोत्तम ॥ ४९ ॥ तस्यास्तद्वचनं श्रुत्वा हनुमान् मारुतात्मजः । हर्षयन् मैथिलीं वाक्यमुवाचेदं महाद्युतिः ॥५०॥ पूर्णचन्द्राननं रामं द्रक्ष्यस्यार्ये सलक्ष्मणम् । स्थिरमित्रं हतामित्रं शचीव त्रिदशेश्वरम् ॥५१॥ तामेवमुक्त्वा राजन्तीं सीतां साक्षादिव श्रियम् । आजगाम महावेगो हनुमान् यत्र राघवः ॥५२॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे षोडशोत्तरशततमः सर्गः ॥११६॥

स उवाच महाप्राज्ञमभिगम्य प्लवङ्गमः । रामं वचनमर्थज्ञो वरं सर्वधनुष्मताम् ॥ १ ॥ यन्निमित्तोऽयमारम्भः कर्मणां च फलोदयः । तां देवीं शोकसन्तप्तां मैथिलीं द्रष्टुमर्हसि ॥ २ ॥ सा हि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा । मैथिली विजयं श्रुत्वा तव हर्षमुपागमत् ॥३॥ पूर्वकात् प्रत्ययाच्चाहमुक्तो विश्वस्तया तया । भर्तारं द्रष्टुमिच्छामि कृतार्थं सहलक्ष्मणम् ॥ ४॥ एवमुक्तो हनुमता रामो धर्मभृतां वरः । अगच्छत् सहसा ध्यानमीषद्बाष्पपरिप्लुतः ॥ ५ ॥ दीर्घमुष्णं विनिश्वस्य मेदिनीमवलोकयन् । उवाच मेघसङ्काशं विभीषणमुपस्थितम् ॥ ६ ॥

अथ सीतानयनम्—स उवाचेत्यादि ॥ १ ॥ यन्निमित्त इति । आरम्भः उद्योगः, कर्मणां सेतुबन्धादिव्यापाराणाम्, फलोदयः रावणविजयश्च यन्निमित्तः यस्याः सीताया लाभार्थः, तां द्रष्टुमर्हसि ॥ २॥३॥ पूर्वकात्पूर्वोत्पन्नात् । प्रत्ययाद्विश्वासात् ॥ ४ ॥ रामः ईषद्बाष्पपरिप्लुतः सन् सहसा ध्यानमगच्छत् । रावणभवनोषितसीतापरिग्रहे महान् लोकापवादो भवेत्, निर्दोषायास्तस्याः परित्यागे महान् दोषः स्यादित्येवं कार्यदौस्थ्यात् किं कर्तव्यमिति चिन्तयामासेत्यर्थः ॥ ५ ॥ निश्वासदैर्घ्येण चिन्तादैर्घ्यं गृह्यते । औष्ण्येन कथं क्लिष्टां तां पुनः क्लेशयिष्यामीत्यन्तस्तापो व्यज्यते । भूमिं समवलोकयन् इति लोकाद्भीतेति ॥ ४९-५२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां षोडशोत्तरशततमः सर्गः ॥ ११६ ॥

॥ १ ॥ यन्निमित्त इति । आरम्भः उद्योगः । कर्मणां सेतुबन्धनादिव्यापाराणां फलोदयः रावणजयश्च यन्निमित्तः यस्यास्सीतायाः लाभार्थः ॥ २ ॥ ३ ॥ पूर्वकात् प्रत्ययात् सन्देशकारणात् प्रत्ययात्, अतीव विश्वासादित्यर्थः ॥ ४ ॥ रामः ईषद्बाष्पपरिप्लुतस्सन् सहसा ध्यानमगच्छत्, रावणभवनोषितसीतापरिग्रहे महान्

For Private And Personal Use Only

चिन्तापारवश्याभिनयः । मेघसङ्काशमित्यनेन सीतानयने कृतत्वरत्वमुच्यते ॥६॥ दिव्याङ्गरागामिति । अलंकृत्यानयनादेशः उत्तरकालिकपरुषभाषणार्हताप्रतिपादनाय । नहि तादृशदशापन्नां दीनां परुषं भाषितुं युज्यते । तच्च तस्या न परित्यागार्थम्, किंतु चतुर्मुखादिदेवतामुखेन तस्याः पातिव्रत्यं ख्यापयितुम् । मा चिरम्, विलम्बो न कार्य इत्यर्थः ॥ ७ ॥ एवमित्यादिश्लोकद्वयमेकान्वयम् । स्वाभिः स्त्रीभिरचोदयत् निजस्त्रीमुखेनाचोदयत्॥८–१०॥

दिव्याङ्गरागां वैदेहीं दिव्याभरणभूषिताम् । इह सीतां शिरस्स्नातामुपस्थापय मा चिरम् ॥ ७ ॥
एवमुक्तस्तु रामेण त्वरमाणो विभीषणः । प्रविश्यान्तःपुरं सीतां स्वाभिः स्त्रीभिरचोदयत् ॥ ८ ॥
दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता । यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति ॥ ९ ॥
एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम् । अस्नाता द्रष्टुमिच्छामि भर्तारं राक्षसाधिप ॥ १० ॥
तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः । यदाह राजा भर्ता ते तत्तथा कर्तुमर्हसि ॥ ११ ॥

रामानु०–एवमुक्तस्तु रामेण त्वरमाणो विभीषणः । प्रविश्यान्तःपुरं सीतां स्वाभिः स्त्रीभिरचोदयत् ॥ दिव्याङ्गरागा वैदेहि दिव्याभरणभूषिता । यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति ॥ एवमुक्ता तु वैदेही प्रत्युवाच विभीषणम् ॥ इति पाठक्रमः । भर्ता त्वां द्रष्टुमिच्छतीति स्वाभिः स्त्रीभिरचोदयदिति सम्बन्धः ॥८–१०॥ तस्या इति । प्रत्युवाच, स्त्रीमुखेनेति शेषः । यथा

लोकापवादो भवेत् । निर्दोषायास्तस्याः परित्यागे महान् दोषः स्यादित्येवं कार्यदोऽध्यगत् किं कर्तव्यमिति चिन्तयामासेत्यर्थः ॥५॥६ ॥ दिव्याङ्गरागां शिरस्स्नातां सीतामुपस्थापयेत्यस्यायमाशयः–यदि सीतामविशोध्यैव ग्रहीष्यामि तदा जना एतादृशदिव्यसुन्दरीं दृष्ट्वा रावणः कथं तूष्णीं तिष्ठेदिति बहुविधापवादपङ्ककलङ्काङ्कितचित्तास्सन्तो निष्कलङ्कायां जगज्जनन्यामपि देव्यां किमप्याशङ्केयुरिति मन्वानो जगन्मर्यादास्थापनायावतीर्णः श्रीरामः " यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः " इति न्यायमनुसृत्य निष्कल्मषां देवीं स्वयं जानन्नपि लोकापवादनिवृत्तये तस्यां रुषित इव परुषोक्तिं वदन् तामग्निं प्रवेश्य पद्मभवभवेन्द्रमुखामरगणैस्संस्तुतः प्रार्थितो नित्यशुद्धां देवीमङ्गीकरवाणीति ॥ ७ ॥ ८ ॥ दिव्याङ्गरागेति । भर्ता त्वां द्रष्टुमिच्छतीति स्वाभिः स्त्रीभिरचोदयदिति पूर्वेण

स०–स्वाभिः स्त्रीभिरवादयत् इति पाठः । स्वाभिः स्त्रीभिः सरमात्रिजटादिभिः । सीतामवादयन्, राजस्त्रीत्वात्साक्षादसम्भाषणमिति ज्ञेयम् ॥ ८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियोगं कर्तव्यत्वे हेतुद्वयम् राजा भर्तेति ॥ ११ ॥ अङ्गीकारे हेतुद्वयं भर्तृदेवता भर्तृभक्तिव्रतेति ॥ १२-१४ ॥ ज्ञात्वाऽपि विभीषणागमनं विदित्वा ऽपि । अनेन चिन्तानुवृत्तिरुक्ता ॥ १५ ॥ रावणवधपूर्वकसीतागमेन हर्षः, रावणभवनोषितत्वेन दैन्यं रोषश्च । अत्र रोषो भाविशपथोपयोगित्वादारो

तस्य तद्वचनं श्रुत्वा मैथिली भर्तृदेवता । भर्तृभक्तिव्रता साध्वी तथेति प्रत्यभाषत ॥ १२ ॥ ततः सीतां शिरस्स्नातां युवतीभिरलंकृताम् । महार्हाभरणोपेतां महार्हाम्बरधारिणीम् ॥ १३ ॥ आरोप्य शिबिकां दीप्तां परार्ध्याम्बरसंवृताम् । रक्षोभिर्बहुभिर्गुप्तामाजहार विभीषणः ॥ १४ ॥ सोऽभिगम्य महात्मानं ज्ञात्वाऽपि ध्यानमास्थितम् । प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत् ॥ १५ ॥ तामागतामुपश्रुत्य रक्षोगृहचिरोषिताम् । हर्षो दैन्यं च रोषश्च त्रयं राघवमाविशत् ॥ १६ ॥ ततः पार्श्वगतं दृष्ट्वा सविमर्शं विचारयन् । विभीषणमिदं वाक्यमहृष्टं राघवोऽब्रवीत् ॥१७॥ राक्षसाधिपते सौम्य नित्यं मद्विजये रत । वैदेही सन्निकर्षं मे शीघ्रं समुपगच्छतु ॥ १८ ॥ स तद्वचनमाज्ञाय राघवस्य विभीषणः । तूर्णमुत्सारणे यत्नं कारयामास सर्वतः ॥ १९ ॥

पित इति द्रष्टव्यम् ॥ १६ ॥ सविमर्शं विचारयन् सवितर्कं चिन्तयन् । अहृष्टमिति क्रियाविशेषणं विभीषणविशेषणं वा ॥ १७ ॥ १८ ॥ उत्सारणे जन

सम्बन्धः ॥ ९-१४ ॥ ज्ञात्वाऽपि विभीषणानुगमनं ज्ञात्वाऽपि ॥१५॥ तामिति । हर्षः रावणवधपूर्वकसीतासमागमेन हर्षः, रावणभवनोषितत्वमेव दैन्यरोषयोर्हेतुः। तत्र रोषश्च भाविशपथोपयुक्तत्वादारोपित इति द्रष्टव्यम् ॥ १६ ॥ सविमर्शं सवितर्कं विचारयन्निति सम्बन्धः ॥ १७-२० ॥

स०—ननु महाभारते—" तां दृष्ट्वा चारुसर्वाङ्गीं यानस्थां शोककर्शिताम् । मलोपचितसर्वाङ्गीं जटिलां कृष्णवाससम् ॥ " इत्युक्तेः कथमत्रैवं कथनमिति चेत्, उच्यते—स्वच्छन्देनाङ्गशोधनाद्यभावेन भारते मलोपचितत्वाद्युक्तिः । अत्र तु रामाज्ञया तस्य जातत्वेन प्रतिकर्मणा संयुक्तामित्याद्युक्तिः । अथवा भारतवचनोत्तरार्धे हनुमद्वचनेन मलोपचितसर्वाङ्गीं संस्मरतो रामस्य तथैव दर्शनमिति पूर्वमेतादृशीमिति वाऽर्थाङ्गीकारेण वाऽविरोधोपपत्तेः ॥ १३ ॥ आरोप्य शिबिकां सीतां राक्षसैर्बहुनोचितैः इति पाठः । बहुनोचितैः राजावरोधयानवहनोचितैः । राक्षसैः वृद्धैरविन्ध्यादिभिः । उक्तं च भारते—" ततस्सीतां पुरस्कृत्य " इत्यारभ्य " अविन्ध्यो नाम सुप्राज्ञो वृद्धामात्यो विनिर्ययौ " इति ॥ १४ ॥ ॥३४१॥

निवारणे ॥ १९ ॥ कञ्चुकं वारबाणम् । उष्णीषं शिरोवेष्टनम् । वेत्रेण जर्जराः सदाऽवलम्बनजनितपारुष्याः पाणयो येषां ते ॥ २० ॥ उत्ससृजुः अपचक्रमुः ॥ २१ ॥ उद्वर्तमानस्य उज्जृम्भमाणस्य ॥ २२ ॥ दाक्षिण्यात् वानरेषु दाक्षिण्यात् । अमर्षात् उत्सारणासहनात् ॥ २३ ॥ चक्षुषा प्रदहन्निवेति

कञ्चुकोष्णीषिणस्तत्र वेत्रजर्जरपाणयः । उत्सारयन्तः पुरुषाः समन्तात् परिचक्रमुः ॥ २० ॥ ऋक्षाणां वानराणां च राक्षसानां च सर्वशः । वृन्दान्युत्सार्यमाणानि दूरमुत्ससृजुस्तदा ॥ २१ ॥ तेषामुत्सार्यमाणानां सर्वेषां ध्वनिरुत्थितः । वायुनोद्वर्तमानस्य सागरस्येव निस्वनः ॥ २२ ॥ उत्सार्यमाणांस्तान् दृष्ट्वा समन्ताज्जातसम्भ्रमान् । दाक्षिण्यात्तदमर्षाच्च वारयामास राघवः ॥ २३ ॥ संरब्धश्चाब्रवीद्रामश्चक्षुषा प्रदहन्निव । विभीषणं महाप्राज्ञं सोपालम्भमिदं वचः ॥ २४ ॥ किमर्थं मामनादृत्य क्लिश्यतेऽयं त्वया जनः । निवर्तयैनमुद्योगं जनोऽयं स्वजनो मम ॥ २५ ॥ न गृहाणि न वस्त्राणि न प्राकारास्तिरस्क्रियाः । नेदृशा राजसत्कारा वृत्तमावरणं स्त्रियाः ॥ २६ ॥ व्यसनेषु न कृच्छ्रेषु न युद्धेषु स्वयंवरे । न क्रतौ न विवाहे च दर्शनं दुष्यति स्त्रियाः ॥२७॥ सैषा युद्धगता चैव कृच्छ्रे च महति स्थिता । दर्शनेऽस्या न दोषः स्यान्मत्समीपे विशेषतः ॥ २८ ॥ [विसृज्य शिबिकां तस्मात् पद्भ्यामेवोपसर्पतु । समीपे मम वैदेहीं पश्यन्त्वेते वनौकसः ॥] तदानय समीपं मे शीघ्रमेनां विभीषण । सीता पश्यतु मामेषा सुहृद्गणवृतं स्थितम् ॥ २९ ॥ एवमुक्तस्तु रामेण सविमर्शो विभीषणः । रामस्योपानयत् सीतां सन्निकर्षं विनीतवत् ॥ ३० ॥

लोचनाभ्यां पिबन्निवेत्युक्तादरपात्रभूतस्य विभीषणस्यैवंविधदर्शनविषयताकरणं स्वजननिग्रहासहिष्णुत्वात् । सीताविषयसमारोपितरोषविशेषाद्वा ॥ २४ ॥ २५ ॥ तिरस्क्रियाः तिरस्करिण्यः । राजसत्काराः उत्सारणादिकम् । वृत्तम् आचारः ॥ २६ ॥ व्यसनेषु इष्टजनवियोगेषु । कृच्छ्रेषु राज्यक्षोभादिषु । युद्धे युद्धभूमौ ॥ २७ ॥ सैषेति । कृच्छ्रे वक्ष्यमाणाग्निप्रवेशे ॥ २८ ॥ २९ ॥ सविमर्शः कृच्छ्रशब्दप्रयोगात्साशङ्कः ॥ ३० ॥ ३१ ॥

ऋक्षाणामिति । उत्ससृजुः अपचक्रमुः ॥२१॥ वायुना हेतुना उद्वर्तमानस्य उज्जृम्भमाणस्य ॥२२॥ दाक्षिण्यात्, वानरेष्विति शेषः । तदमर्षात् तद्धर्षणासहनात्॥२३॥ ॥ २४ ॥ स्वजनो बन्धुजनः ॥ २५ ॥ निरस्क्रियाः निरस्करिण्यः ॥२६॥ व्यसनेष्विति । इष्टजनमरणजनितदुःखं व्यसनम् । कृच्छ्रेषु आपत्सु ॥२७–२९॥ सविमर्शः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यथायां हेतुमाह–कलत्रेति ॥ ३२ ॥ अवलीयन्ती सङ्कुचन्ती ॥३३॥३४॥ विस्मयात् अघटितरामपुनर्दर्शनाद्विस्मयः । प्रियस्य दर्शनेन प्रहर्षः । स्नेहः स्वाभाविकः । उदीक्षणकालिकमुखप्रसादमाह सौम्येति ॥ ३५ ॥ अथेति । उदितपूर्णचन्द्रेत्यनेन कोपरक्तत्वमुक्तम् । विमलशशाङ्केत्यनेन उत्तरकालिकक्षयः सूच्यते ॥ ३६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

ततो लक्ष्मणसुग्रीवौ हनुमांश्च प्लवङ्गमः । निशम्य वाक्यं रामस्य बभूवुर्व्यथिता भृशम् ॥ ३१ ॥ कलत्रनिरपेक्षैश्च इङ्गितैरस्य दारुणैः । अप्रीतमिव सीतायां तर्कयन्ति स्म राघवम् ॥३२॥ लज्जया त्ववलीयन्ती स्वेषु गात्रेषु मैथिली । विभीषणेनानुगता भर्तारं साऽभ्यवर्तत ॥ ३३ ॥ सा वस्त्रसंरुद्धमुखी लज्जया जनसंसदि । रुरोदासाद्य भर्तारमार्यपुत्रेति भाषिणी ॥३४॥ विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता । उदैक्षत मुखं भर्तुः सौम्यं सौम्यतरानना ॥ ३५ ॥ अथ समपनुदन्मनःक्लमं सा सुचिरमदृष्टमुदीक्ष्य वै प्रियस्य । वदनमुदितपूर्णचन्द्रकान्तं विमलशशाङ्कनिभानना तदानीम् ॥ ३६ ॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥

तां तु पार्श्वस्थितां प्रह्वां रामः सम्प्रेक्ष्य मैथिलीम् । हृदयान्तर्गतक्रोधो व्याहर्तुमुपचक्रमे ॥ १ ॥
एषाऽसि निर्जिता भद्रे शत्रुं जित्वा मया रणे । पौरुषाद्यदनुष्ठेयं तदेतदुपपादितम् ॥ २ ॥
गतोऽस्म्यन्तममर्षस्य धर्षणा सम्प्रमार्जिता । अवमानश्च शत्रुश्च मया युगपदुद्धृतौ ॥ ३ ॥

अथ रामपरुषोक्तिः–तां तु पार्श्वस्थितामित्यादि । प्रह्वां लज्जया नम्राम् ॥ १ ॥ एषेति प्रत्यक्षेण दर्शयति । भद्रे इत्यसम्बन्धनिवेदकसम्बोधनम् । पौरुषाद्यदनुष्ठेयं तदेव कृतम्, न तु त्वल्लाभाय यत्नः कृत इति भावः ॥ २ ॥ अन्तं फलम् । उद्धृतौ निर्मूलितौ ॥ ३ ॥ ॥१४२॥

सीताविषये स्वामिनश्चित्तं कीदृशमिति विचारः ॥ ३०–३४ ॥ विस्मयादिति । असम्भावितदर्शनं जातमिति विस्मयः । प्रियस्य दर्शनेन प्रहर्षः ॥ ३५ ॥ अथेति । समपनुदत् समपानुदत् ॥ ३६ ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायां सप्तदशोत्तरशततमः सर्गः ॥ ११७ ॥ १ ॥ २ ॥ अन्तं फलम् ॥ ३॥४ ॥

अद्येति । आत्मनः प्रभवामि स्वतन्त्रो भवामि ॥ ४ ॥ मया विरहिता या त्वं चलचित्तेन रक्षसा नीता । तया त्वया हेतुभूतया दैवसंपादितः दोषः अवमानः मानुषेण प्रमार्जितः, दैवकृतं पुरुषयत्नेन निवारितमिति भावः ॥ ५ ॥ धर्षणाया अमार्जने दोषमाह-सम्प्राप्तमिति । प्रमार्जति प्रमार्ष्टि ॥ ६ ॥ इदानीं हनुमदादिपौरुषस्यापि धर्षणावमार्जनहेतुत्वमाह-लङ्घनं चेत्यादिना । समुद्रस्य लङ्घनं लङ्कायाः अवमर्दनम् इत्येवंरूपं हनुमतः श्लाघ्यं

अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः । अद्य तीर्णप्रतिज्ञत्वात् प्रभवामीह चात्मनः ॥४॥ या त्वं विरहिता नीता चलचित्तेन रक्षसा । दैवसम्पादितो दोषो मानुषेण मया जितः ॥ ५ ॥ सम्प्राप्तमवमानं यस्तेजसा न प्रमार्जति । कस्तस्य पुरुषार्थोऽस्ति पुरुषस्याल्पतेजसः ॥ ६ ॥ लङ्घनं च समुद्रस्य लङ्कायाश्चावमर्दनम् । सफलं तस्य तच्छ्लाघ्यं महत् कर्म हनूमतः ॥७॥ युद्धे विक्रमतश्चैव हितं मन्त्रयतश्च मे । सुग्रीवस्य ससैन्यस्य सफलोऽद्य परिश्रमः ॥ ८ ॥ निर्गुणं भ्रातरं त्यक्त्वा यो मां स्वयमुपस्थितः । विभीषणस्य भक्तस्य सफलोऽद्य परिश्रमः ॥ ९ ॥ इत्येवं ब्रुवतस्तस्य सीता रामस्य तद्वचः । मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता ॥ १० ॥ पश्यतस्तां तु रामस्य भूयः क्रोधो व्यवर्धत । प्रभूताज्यावसिक्तस्य पावकस्येव दीप्यतः ॥ ११ ॥ स बद्ध्वा भ्रुकुटीं वक्त्रे तिर्यक्प्रेक्षितलोचनः । अब्रवीत् परुषं सीतां मध्ये वानररक्षसाम् ॥ १२ ॥

कर्म चाद्य सफलम् । धर्षणापरिमार्जनेन सफलमित्यर्थः ॥ ७ ॥ मन्त्रयतः चिन्तयतः ॥ ८ ॥ निर्गुणमिति । तस्येत्यध्याहार्यम् ॥ ९ ॥ तद्वचः नैराश्येनोक्तं वचः । तस्य ब्रुवतः तस्मिन् ब्रुवति सति ॥ १० ॥ पावकस्येति । पावकस्य क्रोधोऽतीव ज्वलनम् ॥ ११ ॥ तिर्यक्प्रेक्षितलोचनः तिर्यक्

मय। विरहिता या त्वं चलचित्तेन रक्षसा नीता त्वया हेतुभूतया दैवसम्पादितो दोषो मानुषेण मया जितः । मानुषेण पौरुषेणेति वा जितः प्रमृष्टः, दैवकृतं पुरुषयत्नेन निराकृतमिति भावः ॥ ५-९ ॥ इत्येवमिति । तद्वचः नैराश्यद्योतकं वचः, निशम्येति शेषः ॥ १० ॥ ११ ॥ तिर्यक्प्रेक्षितलोचनः तिर्यग्भूतं प्रेक्षितं

स०-पश्यतस्तां त्वित्यादिश्लोकद्वयस्य स्थाने-पश्यतस्तां तु रामस्य समीपे हृदयप्रियाम् । जनवादभयाद्राज्ञो बभूव हृदयं द्विधा ॥ ११ ॥ सीतामुत्पलपत्राक्षीं नीलकुञ्चितमूर्धजाम् । अवदद्वै वरारोहां मध्ये वानररक्षसाम् ॥ १२ ॥ इति श्लोकद्वयं पाठान्तरत्वेन दृश्यते ॥ हृदयप्रियां मनोहराम् । श्रीवत्साश्रितरमारूपत्वाद्वा । एतादृशदैन्यदर्शनं स्वीकारहेतुः । जनवादः जनापवादः । द्विधा ग्राह्या वा त्याज्या वेति ॥ ११ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रेक्षणं पुरतः सीतादर्शनासहिष्णुत्वकृतम् ॥ १२ ॥ यत्कर्तव्यमित्यादित्रिपादश्लोक एकान्वयः । हे सीते ! धर्षणां परिमार्जता । "मृजेरजादौ विभाषा वृद्धिः" इति वृद्धिः । मनुष्येण यत्कर्तव्यं तत् सकलं कृतम् । शत्रुहस्तादमर्षणादित्युत्तरशेषः ॥ १३ ॥ भावितात्मना ध्यातात्मस्वरूपेण, अगस्त्येन । इल्वलाक्रान्तत्वाज्जीवलोकस्य दुराधर्षा दुःसञ्चारा, दक्षिणा दिगिव अमर्षणात् अमर्षाद्धेतोः, शत्रुहस्तान्मया त्वं निर्जितेति संबन्धः ॥ १४ ॥

यत् कर्तव्यं मनुष्येण धर्षणां परिमार्जता । तत् कृतं सकलं सीते शत्रुहस्तादमर्षणात् ॥ १३ ॥ निर्जिता जीवलोकस्य तपसा भावितात्मना । अगस्त्येन दुराधर्षा मुनिना दक्षिणेव दिक् ॥ १४ ॥ विदितश्चास्तु ते भद्रे योऽयं रणपरिश्रमः । स तीर्णः सुहृदां वीर्यान्न त्वदर्थं मया कृतः ॥१५॥ रक्षता तु मया वृत्तमपवादं च सर्वशः । प्रख्यातस्यात्मवंशस्य न्यङ्गं च परिरक्षता ॥ १६ ॥ प्राप्तचारित्रसन्देहा मम प्रतिमुखे स्थिता । दीपो नेत्रातुरस्येव प्रतिकूलाऽसि मे दृढम् ॥१७॥ तद्गच्छ ह्यभ्यनुज्ञाता यथेष्टं जनकात्मजे । एता दश दिशो भद्रे कार्यमस्ति न मे त्वया ॥ १८ ॥ कः पुमान् हि कुले जातः स्त्रियं परगृहोषिताम् । तेजस्वी पुनरादद्यात् सुहृल्लेख्येन चेतसा ॥ १९ ॥

योऽयं रणपरिश्रमः सुहृदां वीर्यात्तीर्णः निर्व्यूढः, सः त्वदर्थं मया न कृत इति विदितोऽस्तु ॥१५॥ तर्हि किमर्थमेष परिश्रम इत्यत आह—रक्षतेति । अत्र मया रणपरिश्रमः कृत इत्यनुषज्यते । वृत्तं रक्षता, अपवादं न्यङ्गम् अयशस्यं च परिरक्षता परिहरता निवारयता मया रणपरिश्रमः कृतः ॥१६॥ प्राप्तेति । परगृहवासेन प्राप्तचारित्रसंदेहा त्वं नेत्रातुरस्य दीप इव प्रतिकूलाऽसि । अनेनोपमानेन वस्तुतः सीतायाः दोषो नास्ति । स्वसन्देहेनाहं प्रतिकूलीकरोमीति व्यज्यते ॥ १७ ॥ १८ ॥ कः पुमानिति । सुहृल्लेख्येन सुहृल्लेखा रणरणकम्, सुहृल्लेखामर्हतीति सुहृल्लेख्यं तेन रणरणकातिशययुक्तेनेत्यर्थः ॥ १९ ॥

प्रेक्षणं ययोस्तादृशो लोचने यस्य स तथोक्तः ॥ १२ ॥ शत्रुहस्तादमर्षणादित्युत्तरशेषः । सीते ! धर्षणां परिमार्जता मनुष्येण यत्कर्तव्यं तत्कृतमिति सम्बन्धः ॥१३॥ शत्रुहस्तादिति । जीवलोकस्येति निर्धारणे षष्ठी । प्राणिजातस्य मध्ये तपसा भावितात्मनः तपसा शुद्धचित्तेन अगस्त्येन दुराधर्षा दक्षिणा दिगिव अमर्षणात् क्रोधाद्धेतोः शत्रुहस्तान्मया त्वं निर्जितेति सम्बन्धः ॥ १४ ॥ सुहृदां वीर्यात्तीर्णो योऽयं रणपरिश्रमः स त्वदर्थं मया न कृत इति विदितश्चास्त्वित्यन्वयः ॥ १५ ॥ तर्हि किमर्थं कृत इत्यत्राह—रक्षतेति । अत्र मया रणपरिश्रमः कृत इत्यनुषज्यते । वृत्तं चारित्रम् । रक्षता पालयता । अपवादम् अयशस्यम्, न्यङ्गं न्यूनतां च परिरक्षता अपनयता च ॥ १६–१८ ॥ क इति । सुहृल्लेख्येन शोभना हृल्लेखा रणरणिका यस्य तत् सुहृल्लेख्यं तेन, रणरणिकायुक्तेनेत्यर्थः ॥ १९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

व्यपदिशन् कीर्तयन् ॥ २० ॥ तदर्थमिति । तदर्थं कुलार्थम्, अभिष्वङ्गः आसक्तिः, अनुरागो वा ॥ २१ ॥ इति प्रव्याहृतामित्यादिश्लोकद्वयमेकान्वयम् । अत्र लक्ष्मणादौ मनःकरणं नाम अनाथाया रक्षकत्वेन तत्तद्गृहे वर्तनम् । भर्त्रा परित्यक्तायाः स्त्रियो बन्धुगृहे वासविधानात् । "न स्त्री

रावणाङ्कपरिभ्रष्टां दृष्टां दुष्टेन चक्षुषा । कथं त्वां पुनरादद्यां कुलं व्यपदिशन् महत् ॥ २० ॥ तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया । नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यतामितः ॥ २१ ॥ इति प्रव्याहृतं भद्रे मयैतत् कृतबुद्धिना । लक्ष्मणे भरते वा त्वं कुरु बुद्धिं यथासुखम् ॥ २२ ॥ सुग्रीवे वानरेन्द्रे वा राक्षसेन्द्रे विभीषणे । निवेशय मनः सीते यथा वा सुखमात्मनः ॥ २३ ॥ न हि त्वां रावणो दृष्ट्वा दिव्यरूपां मनोरमाम् । मर्षयेत चिरं सीते स्वगृहे परिवर्तिनीम् ॥२४॥ ततः प्रियार्हश्रवणा तदप्रियं प्रियादुपश्रुत्य चिरस्य मैथिली । मुमोच बाष्पं सुभृशं प्रवेपिता गजेन्द्रहस्ताभिहतेव सल्लकी ॥२५॥ इत्यार्षे श्रीरामायणे० श्रीमद्युद्धकाण्डे अष्टादशोत्तरशततमः सर्गः ॥११८॥

एवमुक्ता तु वैदेही परुषं रोमहर्षणम् । राघवेण सरोषेण भृशं प्रव्यथिताऽभवत् ॥१॥ सा तदश्रुतपूर्वं हि जने महति मैथिली । श्रुत्वा भर्तृवचो रूक्षं लज्जया व्रीडिताऽभवत् ॥२॥ प्रविशन्तीव गात्राणि स्वान्येव जनकात्मजा । वाक्छल्यैस्तैः सशल्येव भृशमश्रूण्यवर्तयत् ॥ ३ ॥

स्वातन्त्र्यमर्हति" इति स्मृतेः । न त्वत्रान्यथामर्हीतुं युक्तम् । महापुरुषेण तादृशोक्त्ययोगात् ॥ २२–२४ ॥ सल्लकी गजभक्ष्यलताविशेषः ॥ २५ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥

अथ सीताग्निप्रवेशः–एवमुक्ता त्विति । स्पष्टम् ॥ १ ॥ जने महति महाजनमध्ये लज्जया व्रीडिता, अतिनम्रमुखी बभूवेत्यर्थः ॥ २ ॥ प्रविशन्तीवेति ।

व्यपदिशन् मख्यापयन् ॥ २० ॥ तदर्थं शत्रुहस्तगता सीता प्रत्याहृतेति यशस्सम्पादनार्थम् । अभिष्वङ्गः आसक्तिः ॥ २१ ॥ लक्ष्मण इति ' पुत्रसदृशेषु लक्ष्मणादिषु मध्ये यत्र कुत्रापि मनो निवेशय, आत्मभरणार्थमिति शेषः ॥ २२–२४ ॥ प्रियार्हश्रवणा प्रियश्रवणार्हा । गजेन्द्रहस्ताभिहता सल्लकी लता यथा क्षीरं मुञ्चति तथा बाष्पं मुमोचेत्यर्थः ॥२५॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टादशोत्तरशततमः सर्गः॥११८॥

॥ १ ॥ सेति । महति जने लज्जया व्रीडिताऽभवत्, लज्जयाऽतिनम्रमुखी बभूवेत्यर्थः ॥ २–४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गात्राणि प्रविशन्ती सङ्कुचन्तीत्यर्थः ॥३॥४॥ किमिति । असदृशं त्वया वक्तुं मया श्रोतुं चायोग्यम् । रूक्षं परुषम् अत एव श्रोत्रदारुणं श्रवणकटु ॥५॥ न तथेति । चारित्रेण, ममेति शेषः । ते तुभ्यम् । "श्लाघह्नुङ्स्थाशपाम्–" इति संप्रदानत्वम् । सुकृतेन शपमाना त्वां शापं ज्ञापयामीत्यर्थः ॥ ६ ॥ स्त्रीमात्रसाधारण्येन नाहं द्रष्टव्येत्याह–पृथक्स्त्रीणामिति । पृथक्स्त्रीणां प्राकृतस्त्रीणाम् । प्रचारेण आचारेण हेतुना । सर्वामपि स्त्रीजातिं तथात्वेन

ततो बाष्पपरिक्लिष्टं प्रमार्जन्ती स्वमाननम् । शनैर्गद्गदया वाचा भर्तारमिदमब्रवीत् ॥ ४ ॥ किं मामसदृशं वाक्य मीदृशं श्रोत्रदारुणम् । रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव ॥५॥ न तथाऽस्मि महाबाहो यथा त्वमवगच्छसि । प्रत्ययं गच्छ मे येन चारित्रेणैव ते शपे ॥६॥ पृथक्स्त्रीणां प्रचारेण जातिं तां परिशङ्कसे । परित्यजेमां शङ्कां तु यदि तेऽहं परीक्षिता ॥७॥ यद्यहं गात्रसंस्पर्शं गताऽस्मि विवशा प्रभो । कामकारो न मे तत्र दैवं तत्रापराध्यति ॥ ८ ॥ मदधीनं तु यत्तन्मे हृदयं त्वयि वर्तते । पराधीनेषु गात्रेषु किं करिष्याम्यनीश्वरा ॥ ९ ॥

शङ्कसे । अहं ते त्वया यदि परीक्षिता ज्ञातस्वभावा, तर्हीमां शङ्कां त्यज ॥ ७ ॥ त्वयि ज्ञातस्वभावायामपि रावणाङ्गस्पर्शलक्षणो दोषस्त्यागहेतु रित्याशङ्क्याह–यद्यहमित्यादि । यद्यपि अहं विवशा सती गात्रसंस्पर्शं गताऽस्मि, तथापि तत्र मे कामकारः स्वेच्छाचरणं नास्ति । तर्हि कस्यात्राप राध इत्यत्राह–दैवं तत्रेति ॥८॥ मदधीनं परैर्ग्रहीतुमशक्यम्, यद्धृदयं तत्तु तस्मिन्काले त्वयि वर्तते अवर्तत । पराधीनेषु परैर्ग्रहीतुं शक्येषु गात्रेषु विषये

किमिति । असदृशं त्वया वक्तुं मया श्रोतुं चायोग्यम्, रूक्षं परुषं च अत एव श्रोत्रदारुणं श्रोत्रकटु ॥ ५ ॥ यथा त्वमवगच्छसि दुष्टेयमिति तथा नास्मि । स्वेन चारित्रेण पातिव्रत्यलक्षणेन ते शपे शपथेन तव प्रत्ययं सम्पादयिष्ये, ततो मे प्रत्ययं गच्छ ॥ ६ ॥ स्त्रीमात्रसाधारण्येन नाहं द्रष्टव्येत्याह–पृथगिति । पृथक्स्त्रीणां दुष्टस्त्रीणां प्रचारेण व्यापारेण हेतुना सर्वामपि जातिं तां स्त्रीजातिं तथैवेति परिशङ्कसे, अहं ते त्वया यदि परीक्षिता तदा इमां स्त्रीजातिस्वभावशङ्कां परित्यज, तज्जातिस्वभावशङ्का मयि न कार्येत्यर्थः ॥७॥ सत्स्वभावत्वात्त्वयि शङ्काभावेऽपि ग्रहणसमये रावणाङ्गस्पर्शलक्षणो दोषस्त्यागहेतुरित्याशङ्क्याह–यद्यहमित्यादिश्लोक त्रयेण । विवशा सत्यहं गात्रसंस्पर्शं गताऽस्मि यद्यपि तथापि तत्र मे कामकारः स्वेच्छाग्रहणं नास्ति, ग्रहणेऽहमनुकूला नास्मीति यावत् । कुतः ? दैवमिति ॥ ८ ॥ ॥३४५॥
मदधीनं परैर्ग्रहीतुमशक्यम् पराधीनेषु परैर्ग्रहीतुं शक्येषु ॥ ९ ॥

स०–पृथक्स्त्रीणां मूर्खस्त्रीणाम् । पृथग्जनशब्दस्य मूर्खे प्रयोगदर्शनात् प्रयोगः । यद्वा स्त्रीणां पृथक्त्वं नाम पतिबुद्धिविरुद्धबुद्धिमत्त्वम् । विभिन्नयोरपि मत्यैक्येनैकव्यवहारदर्शनात् । तथा च स्वैरिणीनामिति फलितो ऽर्थः । प्रचारेण आचारेण । जातिं सर्वस्त्रीसमूहम् । यदि ते त्वयाऽहं परीक्षिता स्यां तदेमां शङ्काम् एकस्या यत्र क्वापि दुष्टत्वे सर्वा अपि तादृश्य इति विपरीतसम्भावनां त्यज त्यक्ष्यसि ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अनीश्वरा अस्वतन्त्रा अहं किं करिष्यामि किं कुर्याम् ॥ ९ ॥ स्वभावपरिज्ञानहेतुभूतसहसंवर्धनसंसर्गावपि प्रत्ययं यदि नोत्पादयतः तर्हि न किमपि ते प्रत्ययमुत्पादयितुं शक्नुयादित्याशयेनाह–सहसंवृद्धेति । सहसंवृद्धभावात् स्वभावपरिज्ञानहेतुना सहसंवर्धनेन संसर्गेण संश्लेषेण च यद्यहं ते न विज्ञाता । ततः मत्स्वभावाज्ञानेन शाश्वतम् अत्यर्थम्, हताऽस्मि ॥१०॥ प्रेषित इति । अवलोककः अवलोकितुम्, अन्वेष्टुमिति यावत् । "तुमुन्ण्वुलौ

सहसंवृद्धभावाच्च संसर्गेण च मानद । यद्यहं ते न विज्ञाता हता तेनास्मि शाश्वतम् ॥ १० ॥ प्रेषितस्ते यदा वीरो हनुमानवलोककः । लङ्कास्थाऽहं त्वया वीर किं तदा न विसर्जिता ॥ ११ ॥ प्रत्यक्षं वानरेन्द्रस्य तद्वाक्यसमनन्तरम् । त्वया सन्त्यक्तया वीर त्यक्तं स्याज्जीवितं मया ॥ १२ ॥ न वृथा ते श्रमोऽयं स्यात् संशये न्यस्य जीवितम् । सुहृज्जन परिक्लेशो न चायं निष्फलस्तव ॥ १३ ॥ त्वया तु नरशार्दूल क्रोधमेवानुवर्तता । लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतम् ॥ १४ ॥ अपदेशेन जनकान्नोत्पत्तिर्वसुधातलात् । मम वृत्तं च वृत्तज्ञ बहु ते न पुरस्कृतम् ॥ १५ ॥ न प्रमाणीकृतः पाणिर्बाल्ये बालेन पीडितः । मम भक्तिश्च शीलं च सर्वं ते पृष्ठतः कृतम् ॥ १६ ॥ एवं ब्रुवाणा रुदती बाष्पगद्गदभाषिणी । अब्रवील्लक्ष्मणं सीता दीनं ध्यानपरं स्थितम् ॥ १७ ॥

क्रियायां क्रियार्थायाम् " इति ण्वुल्प्रत्ययः ॥ ११ ॥ तदात्वे को विशेष इत्यत आह–प्रत्यक्षमिति ॥ १२ ॥ एवं कृते न केवलं ममैव व्यथाभावः तव त्वत्सुहृदां च जयार्थप्रयासोऽपि न स्यादित्याह–न वृथेति । जीवितं संशये न्यस्य कृतोऽयं श्रम इत्यर्थः ॥१३॥१४॥ अपदेशेन जनकात् जनकमपदिश्ये

सहसंवृद्धभावात् स्वभावपरिज्ञानहेतुभूतात्सहसंवृद्धत्वात् संसर्गेण संश्लेषेण च ते त्वया अहं सम्यङ्न ज्ञातेति यत् तेन मत्स्वभावापरिज्ञानेन । शाश्वतमित्युत्तर शेषः । हताऽस्मीति सम्बन्धः ॥ १० ॥ अवलोककः अवलोकितुम्, अन्वेष्टुमिति यावत् ॥ ११ ॥ तदात्वे को विशेष इत्यत आह–प्रत्यक्षमिति । तदैव जीवितत्यागे सति एतावन्तं कालं महती त्वद्वियोगव्यथा न स्यादिति भावः ॥ १२ ॥ एवं कृते न केवलं ममैव व्यथाभावः, किन्तु तव त्वत्सुहृदां सुग्रीवादीनां च प्राणसन्देह करः युद्धप्रयासश्च न स्यादित्याह–न वृथेति । जीवितं संशये न्यस्य कृतोऽयं वृथापरिश्रमस्ते न स्यात्, निष्फलोऽयं त्वत्सुहृज्जनपरिक्लेशश्च न स्यादित्यन्वयः ॥ १३ ॥ त्वया स्त्रीत्वमेव पुरस्कृतं दृष्टम्, न तु मम शीलमिति भावः ॥ १४ ॥ ममोत्पत्तिस्थानसच्चारित्रयोरपि विचार्यमाणयोरियं शङ्का न सम्भाव्यत इत्याह–अपदेशेनेति । जनकादपदेशेन वसुधातलादुत्पत्तिः जनकव्याजेन वसुधातलादुत्पत्तिः ते त्वया न पुरस्कृता न विचारिता । वृत्तं बाल्यात्प्रभृत्यनुवृत्तं सुचरित्रं च

For Private And Personal Use Only

 त्यर्थः॥१५-१७॥मिथ्योपघातः मिथ्यापवादः॥१८॥ अप्रीतस्येति। गुणैरप्रीतस्य विद्यमानैः पातिव्रत्यादिगुणैरपि अप्रीतस्य भर्तुः त्यक्ताया मे या गन्तुं क्षमा गतिः प्रत्ययजननार्थं या योग्या गतिः तं हव्यवाहनं प्रवेक्ष्य इति योजना॥१९॥ अमर्षवशं दैन्यवशम्॥२०॥ आकारः भूसंज्ञादिः। मते सिद्धान्ते,

चितां मे कुरु सौमित्रे व्यसनस्यास्य भेषजम्। मिथ्योपघातोपहता नाहं जीवितुमुत्सहे॥१८॥ अप्रीतस्य गुणै र्भर्तुस्त्यक्ताया जनसंसदि। या क्षमा मे गतिर्गन्तुं प्रवेक्ष्ये हव्यवाहनम्॥ १९॥ एवमुक्तस्तु वैदेह्या लक्ष्मणः परवीरहा। अमर्षवशमापन्नो राघवाननमैक्षत॥ २०॥ स विज्ञाय ततश्छन्दं रामस्याकारसूचितम्। चितां चकार सौमित्रिर्मते रामस्य वीर्यवान्॥२१॥ अधोमुखं तदा रामं शनैः कृत्वा प्रदक्षिणम्। उपासर्पत वैदेही दीप्यमानं हुताशनम्॥२२॥ प्रणम्य देवताभ्यश्च ब्राह्मणेभ्यश्च मैथिली। बद्धाञ्जलिपुटा चेदमुवाचाग्निसमीपतः॥२३॥ यथा मे हृदयं नित्यं नापसर्पति राघवात्। तथा लोकस्य साक्षी मां सर्वतः पातु पावकः॥ २४॥ यथा मां शुद्धचारित्रां दुष्टां जानाति राघवः। तथा लोकस्य साक्षी मां सर्वतः पातु पावकः॥ २५॥ कर्मणा मनसा वाचा यथा नातिचराम्यहम्। राघवं सर्वधर्मज्ञं तथा मां पातु पावकः॥ २६॥ आदित्यो भगवान् वायुर्दिशश्चन्द्रस्तथैव च। अहश्चापि तथा सन्ध्ये रात्रिश्च पृथिवी तथा। यथान्येऽपि विजानन्ति तथा चारित्रसंयुताम्॥ २७॥

स्थित इति शेषः॥२१॥ अधोमुखमिति। पतिव्रतायाः कथं निर्व्याजं प्रत्ययं पश्यामीति लज्जया मुखदर्शने दाक्षिण्यं भविष्यतीति बुद्ध्या चावनतमुखम्। शनैः रामानुभवेन मन्दं यथा तथा॥२२-२४॥ यथा मामिति। यथा शुद्धचारित्रामेव मामन्यायेन दुष्टां जानाति, तथा चेत् अदुष्टां दुष्टेति जानाति चेत् पावकः पातु, रामस्य मयि दोषज्ञानं यथार्थं चेत्पात्वित्यर्थः॥ २५॥ २६॥ आदित्य इत्यादिसार्धश्लोक एकान्वयः। आदित्यादयोऽन्ये च यथा मां

न पुरस्कृतमित्यर्थः। अपरित्यागहेतुत्वेन सर्वलोकसम्मतं पाणिग्रहणमपि पृष्ठतः कृतं न प्रमाणीकृतमित्यर्थः॥ १५-१७॥ चितामिति। मिथ्योपघातः मिथ्याभियोगः॥ १८॥ अप्रीतस्य भर्तुः भर्त्रा त्यक्ताया मे गन्तुं क्षमा गतिः प्रत्ययजननार्थं योग्यस्थानमित्यर्थः। ततो हव्यवाहनं प्रवेक्ष्य इति योजना॥ १९॥ २०॥ स इति। आकारसूचितं भ्रूभङ्गादिना सूचितम्॥ २१-२४॥ दुष्टां दुष्टत्वेन शङ्किताम्, मां शुद्धचारित्रां जानाति मां सर्वतः पातु। यद्वा राघवः यथा शुद्ध

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चारित्रसंयुतां विजानन्ति, तथा मां पातु पावक इति संबन्धः ॥ २७ ॥ रामानु०—आदित्य इत्यादि । एते यथा मां चारित्रसंयुतां विजानन्ति, तथा मां पातु पावक इत्यनुषक्तेन संबन्धः ॥ २७ ॥ परिक्रम्य प्रदक्षिणीकृत्य । निस्सङ्गेन शरीरे निराभिलाषेण, अन्तरात्मना मनसा । उपलक्षणे तृतीया ॥ २८–३० ॥ ददृशुरिति । आज्याहुतीमिवेत्यादिदृष्टान्तेन देव्याः परमपावनत्वं द्योत्यते ॥ ३१ ॥ वसोर्धारां सन्ततां घृतधाराम् । अनेनाभ्युज्जृम्भणं गम्यते ॥ ३२ ॥

एवमुक्त्वा तु वैदेही परिक्रम्य हुताशनम् । विवेश ज्वलनं दीप्तं निस्सङ्गेनान्तरात्मना ॥२८॥ जनः स सुमहांस्त्रस्तो बालवृद्धसमाकुलः । ददर्श मैथिलीं तत्र प्रविशन्तीं हुताशनम् ॥२९॥ सा तप्तनवहेमाभा तप्तकाञ्चनभूषणा । पपात ज्वलनं दीप्तं सर्वलोकस्य सन्निधौ ॥ ३० ॥ ददृशुस्तां महाभागां प्रविशन्तीं हुताशनम् । सीतां कृत्स्नास्त्रयो लोकाः पुण्यामाज्याहुतीमिव ॥ ३१ ॥ प्रचुक्रुशुः स्त्रियः सर्वास्तां दृष्ट्वा हव्यवाहने । पतन्तीं संस्कृतां मन्त्रैर्वसोर्धारामिवाध्वरे ॥ ३२ ॥ ददृशुस्तां त्रयो लोका देवगन्धर्वदानवाः । शप्तां पतन्तीं निरये त्रिदिवाद्देवतामिव ॥ ३३ ॥ तस्यामग्निं विशन्त्यां तु हाहेति विपुलस्वनः । रक्षसां वानराणां च सम्बभूवाद्भुतोपमः ॥३४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

देवाः स्वर्गवासिनः । गन्धर्वा भूलोकवासिनः । दानवाः पातालवासिनः । सकलभोगार्हरूपवत्याः सीतायाः अनलप्रवेशस्यानर्हत्वान्निरयपतनानर्हस्वर्गीयदेवतादृष्टान्तः ॥३३॥ तस्यामिति । अद्भुतोपमः अद्भुततुल्यः । रावणागमनमारभ्य एतावत्पर्यन्तं सीतायाः परमभागवतभूतलक्ष्मणापचारफलमुपपादितम् । वस्तुतः सीताया रावणागमनकाले अग्नौ प्रविष्टत्वात्तस्याः पुनरुद्गमनार्थं मायासीताया रावणगृहीताया अग्नौ प्रवेश इत्यप्याहुः ॥३४॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनविंशत्युत्तरशततमः सर्गः ॥ ११९ ॥

चारित्रामेव मामन्यायेन दुष्टां जानाति । तथा चेत पावको मां सर्वतः पातु, केशाम्बरादीन्यपि मा धाक्षीदित्यर्थः ॥२५–३१॥ प्रचुक्रुशुरिति । वसोर्धारां सन्ततां घृतधारामिव ॥३२॥ निरये दुःखभूयिष्ठे स्थाने ॥३३॥३४॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायण० युद्धकाण्डव्याख्यायाम् एकोनविंशत्युत्तरशततमस्सर्गः ॥ ११९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रामस्तवः—ततो हीत्यादि । दुर्मनाः दुःखितमनाः । दध्यौ मनसा ध्यानं कृतवान् ॥ १ ॥ तत इत्यादिश्लोकत्रयमेकं वाक्यम् ॥ २–४ ॥ तत इति । प्रगृह्य उद्धृत्य ॥ ५ ॥ कर्तेत्यादि । पूर्वं ब्रह्मणः अद्वारकं कर्तृत्वम्, अत्र सद्वारकं कर्तृत्वमिति न विरोधः । सर्वज्ञस्त्वं कथमज्ञ इवोपेक्षस इति भावः ।

ततो हि दुर्मना रामः श्रुत्वैवं वदतां गिरः । दध्यौ मुहूर्तं धर्मात्मा वाष्पव्याकुललोचनः ॥१॥ ततो वैश्रवणो राजा यमश्चामित्रकर्शनः । सहस्राक्षो महेन्द्रश्च वरुणश्च परन्तपः ॥ २ ॥ षडर्धनयनः श्रीमान् महादेवो वृषध्वजः । कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ ३ ॥ एते सर्वे समागम्य विमानैः सूर्यसन्निभैः । आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ४ ॥ ततः सहस्ताभरणान् प्रगृह्य विपुलान् भुजान् । अब्रुवंस्त्रिदशश्रेष्ठाः प्राञ्जलिं राघवं स्थितम् ॥ ५ ॥ कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां वरः । उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ॥६॥ कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ॥ ७ ॥ ऋतधामा वसुः पूर्वं वसूनां त्वं प्रजापतिः । त्रयाणां त्वं हि लोकाना मादिकर्ता स्वयम्प्रभुः । रुद्राणामष्टमो रुद्रः साध्यानामासि पञ्चमः ॥ ८ ॥

देवगणश्रेष्ठं ब्रह्मादिदेवगणश्रेष्ठम् ॥ ६ ॥ ७ ॥ आत्मस्वरूपमेवाह—ऋतधामेत्यादि श्लोकत्रयमेकं वाक्यम् । ऋतधामाख्यो वसुरित्यर्थः । प्रजापतिः प्रजा

तत इति । दध्यौ दारुणं कर्म कारितमिति चिन्तापरोऽभूदित्यर्थः ॥ १–४ ॥ प्रगृह्य उद्धृत्य ॥ ५–७ ॥ पूर्वं पूर्वस्मिन् कल्पे सृष्टेः पूर्वं वा । वसूनां मध्ये ऋतधामा नाम वसुः । त्रयाणाम् आदिकर्ता अण्डाधिपतिपर्यन्ताद्वारकसृष्टिकर्तेत्यर्थः । स्वयंप्रभुः स्वयं प्रभवतीति व्युत्पत्त्या अनियाम्यकत्वमुच्यते । रुद्राणामष्टमो रुद्रः रुद्राणामष्टमूर्तीनां मध्येऽष्टमो रुद्रः महादेवः । तदुक्तम्–" भवः शर्वस्तथेशानो रुद्रः पशुपतिस्तथा । उग्रो भीमो महादेव इत्यष्टौ मूर्तयः स्मृताः ॥ " इति । साध्यानां पञ्चमः वीर्यवान्नाम । तदुक्तं वायुपुराणे–" मनोऽनुमन्ता प्राणश्च श्वेतयानश्च वीर्यवान् । चित्तिर्जयो नयश्चैव हंसो नारायणस्तथा । प्रभवोऽथ

स०–मूलरूपावताररूपेषु भेदस्य " एकमेव नेह नानास्ति किञ्चन । पूर्णमदः " इत्यादिश्रुतिनिषिद्धत्वेन सर्वथा निर्विशेषत्वमेव मन्तव्यमित्याह–कर्तेति । अन्यथा दाशरथौ " कर्ता सर्वस्य लोकस्य " इत्याद्युक्तं स्यात् ॥ ६ ॥ इदानीं रामस्य विभूतिरूपाणि वक्तुं तद्विभूतीनां " नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप " इत्याद्युक्तरीत्याऽनन्तत्वेन सामस्त्येन वक्तुमशक्यत्वात्प्राधान्येनाह–ऋतधामेति । वसूनां मध्ये पूर्वं त्वम् ऋतधामा नाम वसुः । विभूतिरूपेण तत्र सन्निहित इत्यर्थः । एवमुत्तरत्र प्रजापतीनां मध्य इति पूरणीयम् । अष्टमः महादेवाख्यः कैलासवासी शङ्करोऽत्र विवक्षितः । पञ्चमो वीर्यवान्नाम ॥ ८ ॥ ॥३४६॥

स्वामीति वसुविशेषणम् । आदिकर्ता अण्डाधिपतिपर्यन्ताद्वारकसृष्टिकर्तेत्यर्थः । स्वयं प्रभवतीति स्वयम्प्रभुः, अनियाम्य इत्यर्थः । रुद्राणां मध्ये अष्टमो रुद्रः, तथा साध्यानामित्यत्रापि । अन्ते चेति । अन्ते प्रलये, आदौ सृष्टेः प्राक् च दृश्यसे । अनेनोत्पत्तिविनाशराहित्यमुक्तम् । एवं सर्वज्ञः सर्वशक्तिः सर्वेश्वरोऽपि सन् अज्ञ इव विदेहकुले प्रादुर्भूतां सीतां किमर्थमुपेक्षस इत्यर्थः ॥ ८--१० ॥ इत्युक्त इति । लोकपालैः लोकरक्षकैः ॥११॥ ब्रह्मादिभिः सामान्यतः स्तूयमानोऽपि सर्वदेवपूजनीयाच्चतुर्मुखात् स्वप्रभावं लोके प्रख्यापयितुं स्वसौशील्यं दर्शयति--आत्मानमिति । आत्मानं मानुषं

अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी । अन्ते चादौ च लोकानां दृश्यसे त्वं परन्तप ॥ ९ ॥ उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ॥ १० ॥ इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः । अब्रवीत्त्रिदशश्रेष्ठान् रामो धर्मभृतां वरः ॥ ११ ॥ आत्मानं मानुषं मन्ये रामं दशरथात्मजम् । योऽहं यस्य यतश्चाहं भगवांस्तद् ब्रवीतु मे ॥१२॥ इति ब्रुवन्तं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः । अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ॥ १३ ॥

मन्ये परत्वापेक्षया मानुषत्वाभिनय एव ममाभिमत इत्यर्थः । अत्रापि विशेषमाह राममिति । रामं रामनामकम् । ततोऽप्यतिशयमाह दशरथात्मजमिति । अवतारापेक्षया चक्रवर्तिपुत्रत्वमेव प्रियतममिति भावः । स्वस्य विष्ण्ववतारत्वं सुग्रीवादिभिरनवगतमिति तत्प्रतिपत्त्यर्थं स्वस्वरूपं पृच्छति योऽहमिति । योऽहमिति स्वरूपप्रश्नः । यस्येति सम्बन्धिप्रश्नः । यत इति प्रयोजनप्रश्नः । भगवान् तद्ब्रवीत्विति । चक्रवर्तिपुत्रत्वमेव ममात्यन्तप्रियतमम्, स्वयं सर्वज्ञतया ममानभिमतमपि परत्वं प्रकटयत्वित्यर्थः । आकारगोपनविवरणस्यानभिमतत्वेऽपि स्वयमनुमतिदानं रावणनिरसनेन निष्पन्नकार्यतया ॥ १२ ॥१३॥ तनि०--अत्र सम्प्रदायोदाहरणम्--'शङ्खचक्रगदापाणे' इत्युक्त्वा परत्वव्यञ्जकतया तत्रानादरेणाधःकृतमुखत्वम्, 'द्वारकानिलय' इत्यवतारोल्लेखनेन किञ्चिदुत्तानमुखत्वम्, ' गोविन्द पुण्डरीकाक्ष ' इति गोपालपुत्रत्वश्रवणेन परत्वापेक्षया वसुदेवपुत्रत्वमेवाभिमतमिति विकसिताक्षत्वं च व्यज्यत

विधिश्चेषु साध्या द्वादश जज्ञिरे ॥ " इति ॥ ८ ॥ विराड्रूपत्वं वर्णयति--अश्विनौ चेत्यादिना ॥ ९ ॥ १० ॥ लोकपालैः इन्द्रादिब्रह्मान्तैः पूर्वोक्तैः लोकस्य भूलोकस्येदानीं साक्षात्स्वामी राघवः रघुकुलजः ॥ ११ ॥ दिक्पालैः स्तूयमानोऽपि तैः पूजनीयात् चतुर्मुखादात्मस्वरूपगुणविभूतिं स्वजनेषु प्रख्यापयितुं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इति ॥ १२ ॥ स्वरूपप्रश्नोत्तरमाह–भवान्नारायण इति । नाराः अयनं यस्यासौ नारायणः । "आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः॥" इति मनुस्मरणात् । तेन जगत्कारणत्वमुक्तम् । "एको ह वै नारायण आसीन्न ब्रह्मा नेशानो नेमे द्यावापृथिवी" इति श्रुतेः । अवाप्तसमस्तकामस्य जगद्व्यापारानुपपत्तिं परिहरति देव इति । दीव्यतीति देवः क्रीडाप्रवृत्तः । लीलायाः प्रयोजनत्वात् । परिपूर्णस्यापि व्यापारः सम्भवतीति भावः । एवं परत्वासाधारणं नामधेयमुक्त्वा पत्नीविशिष्टत्वमाह श्रीमानिति । नित्यं श्रीरस्यास्तीति श्रीमान् । नित्य

भवान्नारायणो देवः श्रीमांश्चक्रायुधो विभुः । एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ॥ १४ ॥
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव । लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः॥ १५ ॥

योगे मतुप् । असाधारणमायुधमाह चक्रायुध इति । स्वरूपवैलक्षण्यमाह विभुरिति । व्यापक इत्यर्थः । फलितं रक्षकत्वमाह एकशृङ्गो वराह इति । प्रलयोदधिसम्प्लवे वराहरूपं कृत्वा भूमेरुद्धारक इत्यर्थः । "उद्धृताऽसि वराहेण" इति श्रुतेः । अनिष्टनिवर्तकत्वमाह भूतभव्यसपत्नजिदिति । भूताः सपत्नाः मधुकैटभादयः, भव्याः सपत्नाः शिशुपालादयः तान् जयतीति तथोक्तः ॥ १४ ॥ तनि०–श्रीमानिति नित्ययोगे मतुप् । भवान् श्रीमानिति "सीता लक्ष्मीर्भवान् विष्णुः" इत्युक्तश्रियःपतित्वं नित्यानपायित्वं च दर्शितम् । एकशृङ्गो वराहः "स वराहो रूपं कृत्वा" इति श्रुत्युक्तो वराहस्त्वम् ॥ १४ ॥ अथ सर्वविद्योपसंहारार्थमाह–अक्षरमित्यादि । न क्षरतीत्यक्षरम्, अश्नोति व्याप्नोतीति वा अक्षरम् । "एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" इति श्रुतेः । भवानित्यनुषज्यते । अक्षरं भवान् । एवमुत्तरत्राप्यनुषञ्जनीयम् । बृहति बृंहयतीति च ब्रह्म । "बृहति बृंहयति तस्मादुच्यते परं ब्रह्म" इति श्रुतिनिर्वचनात् । सत्यम् अविपर्यस्तम्, षड्भावविकारशून्यमित्यर्थः । अस्ति जायते परिणमते विवर्धते अपक्षीयते विनश्यतीति षड्भावविकाराः । मध्ये

सौशील्यं वर्णयति–आत्मानं मानुषमिति। योऽहं यत्स्वरूपः, यस्य यदीयः, यतः प्रयोजनाद्धेतोः उत्पन्नः ॥१२॥१३॥ स्वरूपप्रश्नस्योत्तरमाह–भवान्नारायण इति । नारायणः नराणां समूहो नारं तस्यायनं प्राप्यभूतः, देवः स्वयंप्रकाश इत्यर्थः। एकशृङ्गो वराहः आदिवराहः । तस्यैकशृङ्गता स्कान्दे दर्शिता–"दंष्ट्रया पर्वतेन्द्राणां चालनं कृतवान्महत् । ततस्तं तुष्टुवुर्देवा एकशृङ्गत्वसिद्धये । एकशृङ्गो वराहोऽभूत्तदाप्रभृति माधवः ॥" इति । भूतभव्यः भूतभव्यकालात्मकः । भूतभव्यः सपत्नजिदिति पाठः ॥१४॥ अक्षरं परं ब्रह्म "तदक्षरं यस्य योनिं परिपश्यन्ति धीराः" इति श्रुतेः । सत्यं तत्त्वभूतम् । लोकानां मध्ये अन्ते चकारादादावपि परो धर्मः ॥३४७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चान्ते चेति । चकारादादौ चेत्यर्थः । वर्तमानमिति शेषः । नित्यत्वमुक्तमनेन । लोकानां परो धर्मः सिद्धरूपो धर्मः, सर्वलोकश्रेयस्साधनीभूत इत्यर्थः । विष्वद्रीची सर्वगता सेना यस्य सः विष्वक्सेनः । सर्वस्वामीत्यर्थः । चतुर्भुजः युगपच्चतुर्विधपुरुषार्थप्रद इत्यर्थः ॥ १५ ॥ शार्ङ्गधन्वेति । शृङ्गविकारः शार्ङ्गं धनुर्यस्य स शार्ङ्गधन्वा । " धनुषश्च " इत्यनङादेशः । अनेन रक्षणोपकरणवत्त्वमुक्तम् । हृषीकाणाम् इन्द्रियाणाम् ईशः नियन्ता, सर्वेन्द्रियाकर्षकादिव्याविग्रह इत्यर्थः । पुरु सनोतीति पुरुषः । " षणु दाने " इत्यस्माद्धातोर्डप्रत्ययः । बहुप्रदः इत्यर्थः । यद्वा पुरि हृदयगुहायां शेत इति

शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः । अजितः खड्गधृद्विष्णुः कृष्णश्चैव बृहद्बलः ॥ १६ ॥
सेनानीर्ग्रामणीश्च त्वं बुद्धिः सत्त्वं क्षमा दमः । प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ॥ १७

पुरुषः । "पुरि शयं पुरुषमीक्षते इति" निर्वचनश्रुतेः । यद्वा येन जगत्पूर्णं स पुरुषः । " तेनेदं पूर्णं पुरुषेण सर्वम् " इति श्रुतेः । यद्वा पुरातनत्वात् पुरुषः । " पूर्वमेवाहमिहासमिति तत्पुरुषस्य पुरुषत्वम् " इति श्रुतेः । पुरुषेभ्यः क्षराक्षरेभ्यः उत्तमः पुरुषोत्तमः । " यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" इति हि गीयते । यद्वा पुरुषेषु उत्तमः पुरुषोत्तमः । "सप्तमी" इति योगविभागाद्गोत्तमादिवत् समासः । कैश्चिदपि न जित इत्यजितः, आश्रितसंरक्षणे कदाचिदपि भङ्गं न प्राप्नोतीत्यर्थः । खड्गं नन्दकाख्यं धरतीति खड्गधृत् । विष्णुः व्यापनशीलः । यो (यदाऽऽपदं) दयापदं प्राप्नोति तं तदा तत्रैव स्थितो रक्षतीत्यर्थः । कृष्णः भूनिर्वृतिहेतुः । " कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः " इति निर्वचनात् । बृहत् बलं धारणसामर्थ्यं यस्य सः बृहद्बलः ॥१६॥ सेनानीरिति । सेनां नयतीति सेनानीः, देवसेनानिर्वाहक इत्यर्थः । ग्रामं नयतीति

शमदमादिः शमदमादिप्राप्यत्वात्तथोच्यते । विष्वक्सेनः विष्वद्रीची सर्वगता सेना यस्य सः । चतुर्भुजः शत्रुनिरसनदक्षाश्चत्वारो भुजा यस्य सः ॥ १५ ॥ शार्ङ्गधन्वा कालरूपं शार्ङ्गं धनुर्यस्य सः । हृषीकेशः हृषीकाणां विषयेन्द्रियाणाम् ईशः । पुरुषः पुरूणि फलानि सनोति ददातीति तथा " षणु दाने " । यद्वा पुरि हृदयपुण्डरीके शेत इति वा पुरुषः । पूर्णत्वाद्वा पुरुषः । " तेनेदं पूर्णं पुरुषेण सर्वम् " इति श्रुतेः । पुरुषोत्तमः पुरुषशब्दवाच्यक्षराक्षराद्यपेक्षया उत्तम इत्यर्थः । " यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥" इति स्मृतेः । अजितः गुणैरैश्वर्येण च केनाप्यजितः । खड्गधृत् विद्यामयं नन्दकाख्यं खड्गं धारयतीति खड्गधृत् । विष्णुः व्यापकः । कृष्णः "कृषिर्भूवाचकश्शब्दो णश्च निर्वृतिवाचकः । तथा च तत्परं ब्रह्म कृष्ण इत्यभिधीयते ॥" इति वचनात् । बृहद्बलः बृहन्ति वानरबलानि यस्येति तथा ॥ १६ ॥ सेनानीः महतीं वानरसेनां नयतीति सेनानीः योध इत्यर्थः । ग्रामणीः ग्रामः भाणिवर्गः तं नयति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ग्रामणीः, दिव्यजनपदादिपालक इत्यर्थः। बुद्धिः सत्त्वं क्षमा दम इति बुद्ध्यादिप्रवर्तक इत्यर्थः। "न देवा यष्टिमादाय रक्षन्ति पशुपालवत्। यं हि रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥" इति वचनात्। "महान् प्रभुर्वै पुरुषः सत्त्वस्यैष प्रवर्तकः" इति श्रुतेश्च। प्रभवत्यस्माज्जगदिति प्रभवः उत्पत्तिस्थानम्, सर्वोपादानमित्यर्थः। अप्ययः सर्वजगल्लयस्थानम्। "कृष्ण एव हि भूतानामुत्पत्तिरपि चाप्ययः" इति श्रुतेः। उपेन्द्रः इन्द्रानुजत्वेन प्रथममवतीर्णः। मधुसूदनः वेदापहारकदैत्यसंहारी ॥ १७ ॥ तनि०–क्षमा क्षमानिर्वाहकः। "कीर्त्यां कीर्तिः क्षमाक्षमा" इत्युक्तत्वात्। दमः इन्द्रियजेता। प्रभवः उत्पत्तिमत्कार्यवर्गशरीरकः स्थूलचिदचिद्विशिष्टस्य कार्यत्वात्। "बहु स्याम्" इत्यादिश्रुतेः ॥ १७ ॥ इन्द्रकर्मेति। इन्द्रस्य कर्मेव कर्म यस्य सः

इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत्। शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ॥ १८ ॥
सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः ॥ १९ ॥

इन्द्रकर्मा। "तं विष्णुरन्वतिष्ठत" इति श्रुतेः। महेन्द्रः निरतिशयैश्वर्यसम्पन्नः। पद्मं नाभौ यस्य स पद्मनाभः, ममापि जनक इत्यर्थः। वक्ष्यति हि– "पद्मे दिव्येऽर्कसङ्काशे नाभ्यामुत्पाद्य मामपि। प्राजापत्यं त्वया कर्म सर्वं मयि निवेशितम् ॥" इति। रणे अन्तं शत्रुनाशं करोतीति रणान्तकृत्। शरण्यं शरणार्हम्, तदुचितज्ञानशक्तिदयादिसंपन्नमित्यर्थः। शरणं रक्षणोपायम्। "उपाये गृहरक्षित्रोः शब्दः शरणमित्ययम्" इति वचनात्। "सर्वस्य शरणं सुहृत्" इति श्रुतेः। महर्षयः अलौकिकतत्त्वसाक्षात्कारसमर्थाः। दिव्या महर्षयः सनकादयः। "यत्रर्षयः प्रथमजा ये पुराणाः" इत्युक्ता नित्यसूरयो वा। नित्यनिर्दोषा वेदा वा ॥ १८ ॥ तनि०–इन्द्रस्येव कर्म यस्य स इन्द्रकर्मा। वृत्रादिवधस्येन्द्रान्तर्यामिकर्तृकत्वात्। महर्षयः अलौकिकतत्त्वसाक्षात्कारसमर्थाः। तत्रापि दिव्या अवताररहस्यादिविशेषज्ञानवन्तो वाल्मीकिप्रभृतयः। यद्वा नित्यसूरयः। "तद्विप्रासो विपन्यवो जागृवांसः" इति श्रुतेः ॥१८॥ सहस्रशृङ्ग इत्यादिसार्धश्लोक एकान्वयः। सहस्रशृङ्गः सहस्रशाखारूपकशृङ्गः। शतजिह्वः अनेकविधवोदनारूपजिह्वः। ऋषभः कर्मणामालोचयिता। स्वकर्मफलं प्रापयतीति तथा। बुद्धिः अध्यवसायात्मिका। क्षमा आश्रितानामपराधसहिष्णुत्वम्। दमः इन्द्रियनिग्रहः। एतद्धर्मकत्वात्तदात्मना व्यपदेशः। प्रभवत्यस्माज्जगदिति प्रभवः। अप्येति लीयते जगदस्मिन्नित्यप्ययः। उपेन्द्रः वासवानुजः। मधुनामानमसुरं सूदयतीति मधुसूदनः ॥ १७ ॥ इन्द्रकर्मा इन्द्रस्य ईश्वरस्य कर्म ऐश्वर्यम्, तद्वानित्यर्थः। महेन्द्रः महतामीश्वराणामिन्द्रः। ईशिता सकलजगत्कारणमित्यर्थः। पद्मं नाभौ यस्य सः पद्मनाभः। रणान्तकृत् रणे शत्रूणां नाशकृत्। शरण्यमाश्रयणीयम्। शरणम् उपायभूतम् ॥ १८ ॥ सहस्रशृङ्गो वेदात्मा सहस्रशाखसामवेदस्वरूपः। "सहस्रं सामवर्त्म" इति प्रसिद्धेः। "वेदानां

For Private And Personal Use Only

"ऋष आलोचने" इति धातुः। महांश्चासावृषभश्च महर्षभः। एवंभूतो वेदात्मा त्वमित्यर्थः। आदिकर्ता समष्टिकर्ता। अनेन व्यष्टिकर्तुः स्वस्य व्यावृत्तिः। स्वयंप्रभुः अनन्यप्रेर्यः। 'न तस्येशे कश्चन' इति श्रुतेः। सिद्धानां मुक्तानां साध्यानाम् "यत्र पूर्वे साध्याः सन्ति देवाः" इत्युक्तानां नित्यानामाश्रयः साम्यभोगप्रदः। पूर्वजः आश्रितापेक्षायाः पूर्वं तद्रक्षणाय जनितः ॥ १९ ॥ २० ॥ तनि०—वेदात्मा वेदपुरुषान्तर्यामी। पूर्वजः "पूर्वमेवाहमिहासम्" इति श्रुतेः। हिर्हेतौ। आदिकर्तृत्वे पूर्वजत्वं हेतुरित्यर्थः। सिद्धाद्याश्रयत्वे चायमेव हेतुः ॥१९॥२०॥ सर्वकर्मसमाराध्यत्वमाह—त्वं यज्ञ इति। त्वं यज्ञः "यज्ञो वै विष्णुः"

त्वं त्रयाणां हि लोकानामादिकर्ता स्वयम्प्रभुः। सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ॥ २० ॥
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परन्तपः। प्रभवं निधनं वा ते न विदुः को भवानिति ॥ २१ ॥
दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च। दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ॥ २२ ॥

इति श्रुतेः। यज्ञनिर्वाहकपशुहविराज्यस्रुक्स्रुवादिशरीरको यज्ञाराध्येन्द्रादिशरीरकश्चेत्यर्थः। "ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम्" इति हि गीयते। वषट्कार इत्युपलक्षणम् "आश्रावयेति चतुरक्षरमस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पञ्चाक्षरम्" इत्युक्तानां सप्तदशाक्षराणाम्। तैराराध्य इत्यर्थः। तथोक्तम्—"चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च। हूयते च पुनर्द्वाभ्यां स नो विष्णुः प्रसीदतु ॥" इति। ओङ्कारः प्रणववाच्यः। "ओमित्येकाक्षरं ब्रह्म" इति श्रुतेः। परन्तपः उत्कृष्टतप इत्यर्थः, उत्कृष्टतपस्समाराध्य इति यावत्। ते प्रभवं निधनं वा न विदुः, वेदा वैदिकाश्च को भवानिति च न विदुः। अपरिच्छिन्नमहिमत्वात्। "क इत्था वेद यत्र सः" इति श्रुतेः॥ २१ ॥ सर्वान्तर्यामित्वमाह—दृश्यस इति। योगिभिरिति शेषः। अनेन सम्बन्धप्रश्नस्योत्तरमुक्तम् ॥ २२ ॥ तनि०—सर्वान्तर्यामित्वमाह—दृश्यस इति। पण्डितैरिति शेषः। "भूतानि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च। नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ॥" इति हि स्मर्यते ॥ २२ ॥

सामवेदोऽस्मि" इति स्मृतेश्च। शतजिह्वः नित्यनैमित्तिककाम्यरूपसामान्यविशेषचोदनारूपशताजिह्वः। शतशीर्ष इति वा पाठः। महर्षभः श्रेष्ठतमः ॥१९॥ आदिकर्ता ब्रह्मादीनामपि कर्ता। स्वयंप्रभुः अनन्यप्रेर्यः। साध्यन्ते आराध्यन्ते इति साध्याः तेषां सिद्धानां मुक्तानामप्याश्रयः प्राप्यः। पूर्वजः सृष्टेः पूर्वमपि स्थितः ॥२०॥ त्वं यज्ञ इत्यादि। न विदुः को भवानिति इदन्तया न विदुरित्यर्थः ॥ २१ ॥ सर्वात्मतया स्तौति—दृश्यस इति। सर्वभूतेषु ब्राह्मणेषु गोषु च अन्तर्यामितया दृश्यसे, गोब्राह्मणयोर्विश्वान्तर्वर्तित्वेऽपि पृथगभिधानं विशिष्टाविर्भावस्थानतया। एवं सर्वजङ्गमान्तर्यामितामभिधाय स्थावरान्तर्यामितामाह दिक्ष्विति ॥ २२ ॥

पुरुषसूक्तार्थमाह–सहस्रेति। अत्र शतशब्दः सहस्रवाचकः। "सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्" इति श्रुतेः। भूतानीति भूपतिरवस्याप्युप लक्षणम्। "ह्रीश्च ते लक्ष्मीश्च पत्न्यौ" इत्युत्तरनारायणोक्तेः। अथ सर्वाधारत्वमाह–त्वमिति। भूतानीति भुव्यतिरिक्तमहाभूतपरम्। अनेनाधाराधेयभावसम्बन्धः उक्तः ॥ २३ ॥ दैनन्दिनप्रलयवृत्तान्तमाह–अन्त इति। पृथिव्या अन्ते विनाशे। महानुरगः शेषो यस्य सः शेषशायी सन् धारयन् कुक्षौ धारयन् दृश्यसे, मार्कण्डेयादिभिरिति शेषः ॥ २४ ॥ अथ "अङ्गान्यन्या देवताः" इत्युक्तसर्वदेवात्मकत्वं

सहस्रचरणः श्रीमान् शतशीर्षः सहस्रदृक्। त्वं धारयसि भूतानि वसुधां च सपर्वताम् ॥ २३ ॥
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः। त्रीँल्लोकान् धारयन् राम देवगन्धर्वदानवान् ॥ २४ ॥
अहं ते हृदयं राम जिह्वा देवी सरस्वती। देवा गात्रेषु रोमाणि निर्मिता ब्रह्मणः प्रभो ॥ २५ ॥
निमेषस्ते भवेद्रात्रिरुन्मेषस्ते भवेद्दिवा। संस्कारास्तेऽभवन् वेदा न तदस्ति त्वया विना ॥ २६ ॥
जगत् सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्। अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षणः ॥ २७ ॥

दर्शयति–अहं त इत्यादिना। हृदयं वक्षः। ब्रह्मणः परब्रह्मणः। ते देवा गात्रेषु स्थिताः रोमाणीव स्थिताः तद्वदविनाभूताः ॥ २५ ॥ निमेष इति दिवा अहः। वेदाः संस्काराः निश्वसितभूता इत्यर्थः। "तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदः" इत्यादिश्रुतेः। किं बहुना सङ्क्षेपोच्यत इत्याह–न तदस्ति विना त्वयेति। यत्त्वया विनाभूतं त्वदनन्तर्यामिकम्, तन्नास्तीत्यर्थः ॥२६॥ एवं निषेधश्रुत्यर्थमुक्त्वा "सर्वं खल्विदं ब्रह्म। तत्त्वमसि" इत्यादिसामानाधिकरण्यश्रुत्यर्थमाह–जगदिति। सर्वं जगत् ते शरीरं तव नियमेन आधेयं विधेयं शेषभूतं चेत्यर्थः। इदमेव हि शरीरलक्षणम्। एवं जगतस्त्वच्छरीरत्वाच्छरीरगतविशेषणानि त्वद्विशेषणानीत्याह–स्थैर्यमिति। वसुधातलं वसुधातलस्थैर्यम्। "काठिन्यवान् यो बिभर्ति तस्मै भूम्या ॥३४९॥

पुरुषसूक्तादयोऽपि त्वामेव प्रतिपादयन्तीत्याह–सहस्रचरण इत्यादिना। सम्प्रत्यादिकूर्मात्मना स्तौति–त्वं धारयसीति ॥२३॥ इदानीं सङ्कर्षणात्मना स्तौति–अन्त इति। महोरगः सङ्कर्षण इत्यर्थः। अथ विराड्रूपतामाह–त्रीँल्लोकानित्यादिसार्धश्लोकद्वयेन। संस्कारास्तेऽभवन्वेदाः संस्क्रियन्ते बोध्यन्ते एभिर्लोका इति संस्काराः बोधकाः, प्रवृत्तिनिवृत्तिव्यवस्थापका इति यावत्। न तदस्ति त्वया विना, किं बहुना? सर्वं चिदचिद्वस्तुजातं त्वदात्मकमेवेत्यर्थः ॥ २४–२६ ॥ तदेवाह–जगत्सर्वं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

त्मने नमः" इति श्रीविष्णुपुराणोक्तेः। अग्निः अग्नितापः, त्रिआपः। सोमः सोमगतप्रसादः, ते प्रसादः त्वत्प्रसाद इत्यर्थः ॥२७॥ त्वयेति। त्वया त्रिविक्रमेण। पुराणे पूर्वकाले। लोकाक्रमणफलमाह–महेन्द्र इति। राजा कृतः त्रैलोक्यस्येति शेषः ॥ २८॥ तनि०–त्वया लोकात्रयः क्रान्ता इति। बलेः प्रतिग्रही तेत्यर्थः। एतेन वामनावतारो व्यञ्जितः। विक्रमैः पादविन्यासैस्त्रिभि क्रान्ता इति त्रिविक्रमावतारः कथितः। "इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्" इति श्रुतेः। पुराणे पूर्वकाले। महेन्द्रो राजा कृतः बलिना पदाच्चियोसित इन्द्रः ... राजा कृत इत्यर्थः ॥२८॥ प्रयोजनप्रश्नस्योत्तरमाह–वधार्थमिति ॥ २९–३१ ॥

त्वया लोकास्त्रयः क्रान्ताः पुराणे विक्रमैस्त्रिभिः। महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ॥२८॥ सीता लक्ष्मी र्भवान् विष्णुर्देवः कृष्णः प्रजापतिः। वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ॥२९॥ तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर। निहतो रावणो राम प्रहृष्टो दिवमाक्रम ॥ ३० ॥ अमोघं बलवीर्यं ते अमोघस्ते पराक्रमः। अमोघं दर्शनं राम न च मोघः स्तवस्तव ॥ ३१ ॥ अमोघास्ते भविष्यन्ति भक्तिमन्तश्च ये नराः ॥ ३२ ॥ ये त्वां देवं ध्रुवं भक्ताः पुराणं पुरुषोत्तमम्। प्राप्नुवन्ति सदा कामानिह लोके परत्र च ॥ ३३ ॥

तनि०–भगवदवतारेषु लक्ष्म्या अनुवृत्तिमाह–सीतेति। कृष्णः भविष्यत्कृष्णावतारश्च त्वमेवेत्यर्थः। प्रजापतिः प्रजापतिशब्दवाच्यस्त्वमेव। अवतारप्रयोजनमाह–वधार्थमिति। मानुषीं मनुष्यसंस्थानरूपाम्, तनुमभाकृतशरीरम् ॥ २९ ॥ ... –अमोघमिति। न च मोघः स्तवस्तवेति पाठः ॥ ३१ ॥ अमोघा इत्यर्धम्। अमोघाः अप्रतिबद्धफलाः ये त्वयि भक्तिमन्तः ते अविलम्बेन फलम... तारस्यैकं प्रयोजनम् ॥ ३२ ॥ इदमेव विवृणोति–य इति। त्वाम्, उद्दिश्येति शेषः। अनेन सर्वस्मादपि ... कामयन्त इति कामाः भोगोपकरणानि, इह लोके परत्र च प्राप्नुवन्ति। सदेत्यनेन यावच्छरीरपातं ... भगवान् मुक्ता शरीरावसाने परलोके सर्वान् कामान् प्राप्नुवन्तीत्यर्थः ॥ ३३ ॥

शरीरमिति ॥ २७ ॥ पुराणे पूर्वस्मिन् काले त्वया वामनात्मनाऽवतीर्णेन त्रिभिर्विक्रमैः त्रयो लोकाः भूर्भुवस्स्वस्स्वरूपाः क्रान्ताः ॥ २८ ॥ लक्ष्मीस्सीतारूपेणा वतीर्णेत्याह–सीता ... अवतारफलमाह भवान् विष्णुरित्यादिना ॥ २९ ॥ तत्र परमार्थमित्याह–तदिदं नः इति ॥ ३०–३१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ये रामभक्तिं कर्तुमदक्षास्तेषामिदं स्तोत्रमेव तादृशफलप्रदमित्याह–इदमिति । ऋषिः वेदः तत्संबन्ध्यार्षम् । अत एव पुरातनम् । पराभवः पुनरावृत्तिः ॥ ३४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

इममार्षं स्तवं नित्यमितिहासं पुरातनम् । ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ ३४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे विंशत्युत्तरशततमः सर्गः ॥ १२० ॥

एतच्छ्रुत्वा शुभं वाक्यं पितामहसमीरितम् । अङ्केनादाय वैदेहीमुत्पपात विभावसुः ॥ १ ॥ स विधूय चितां तां तु वैदेहीं हव्यवाहनः । उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ २ ॥ तरुणादित्यसङ्काशां तप्तकाञ्चनभूषणाम् । रक्ताम्बरधरां बालां नीलकुञ्चितमूर्धजाम् ॥३॥ अक्लिष्टमाल्याभरणां तथारूपां मनस्विनीम् । ददौ रामाय वैदेहीमङ्के कृत्वा विभावसुः ॥ ४ ॥ अब्रवीच्च तदा रामं साक्षी लोकस्य पावकः ॥ ५ ॥ एषा ते राम वैदेही पापमस्यां न विद्यते ॥ ६ ॥

एतच्छ्रुत्वेत्यादि । विभावसुः अग्निः ॥ १ ॥ विधूय चितां शिथिलीकृत्य । मूर्तिमान् मनुष्यविग्रहवान् ॥ २ ॥ तरुणादित्येत्यादिश्लोकद्वयमेकान्वयम् । तथारूपां प्रवेशकालिकरूपवतीम् । मनस्विनीं प्रसन्नमनस्कामित्यर्थः । अङ्के कृत्वा अङ्केनादायेत्यर्थः ॥ ३--५ ॥ एषेति । एषा या पूर्वं मयि प्रविष्टा

स्तोत्रपाठस्य फलमाह–इममिति । आर्षं वेदसिद्धम्॥३४॥ इति श्रीमहेश्वर० श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां विंशत्युत्तरशततमः सर्गः ॥१२०॥ ॥ १ ॥ २ ॥ तरुणेति । तथारूपाम् अग्निप्रवेशकाले यादृशवस्त्राङ्गरागस्रक्शोभायुक्ता तादृशसौभाग्ययुक्तामित्यर्थः ॥ ३–८ ॥

स०–ऋषिः वेदद्रष्टा, तद्दृष्टत्वादार्षो वेदः । तत्तुल्यं स्तवं स्तोत्रम् । इतिहासम् अनादिसिद्धकथाविषयत्वात् । पराभवः बाह्याभ्यन्तरशत्रुतिरस्करणं नास्ति ॥ ३४ ॥

स०–शुभं स्वाभिलषितसीतापुष्करसंयोगसाधनत्वात् । अङ्केन आरोपितकलङ्केन पतितां सीताम् आदाय स्वयं स्वीकृत्य । अङ्केन स्वदक्षिणोत्सङ्गेनादाय, तस्य पुत्रीभागत्वात् । यथोक्तम्–"भागो हि दक्षो दुहितुः स्नुषायाः" इति । अग्निपातानन्तरं जीवनेऽग्निजातत्वप्राप्त्या तत्पुत्रीत्वस्योचितत्वात् । अन्यथा अङ्केनेति व्यर्थम् । विभावसुः अग्निः ॥ १ ॥ मूर्तिमान् "चत्वारि शृङ्गा त्रयो अस्य पादाः" इत्याद्युक्तलक्षणशरीरवान् ॥ २ ॥ रक्ताम्बरधरां पूर्वं विद्यमानपीतवस्त्रं परित्यज्य विभावसुना दत्तरक्तवस्त्रधराम् ॥ ३ ॥ हे राम ! या पूर्वं रावणहरणकाले मयि प्रविश्य कैलासं गता सैषा ते त्वदीया निजपत्नी । अस्यां पापं त्वच्छङ्कितं न विद्यते । अत्र यद्वक्तव्यं तत्सर्वमारण्यकाण्डव्याख्यायां कूर्मपुराणाद्युदाहरणेनोक्तं पुरस्तात् ॥ ६ ॥

For Private And Personal Use Only

सैषेत्यर्थः । एतेन मायासीताऽग्निं प्रविष्टा साक्षात्सीताऽग्निना दत्तेति प्रत्युक्तम् । ते त्वदीयेत्यर्थः । एनां परिगृहाणेति शेषः ॥ ६ ॥ पापाभावमेवोपपादयति--नैवेत्यादिना । अनुध्यानात्सङ्कल्पात् । अत्यन्ताभिमतां देवीं निर्दोषां जानन्नपि स्ववृत्तावद्यत्वपरिहारार्थं वह्निं प्रवेशयदिति सन्तोषातिशयाद्वृत्तशौण्डीरेति संबोधनम् ॥ ७ ॥ एतत्संमतिं विना कथं रावणः समानीतवानित्यत्राह--रावणेनेत्यादि ॥ ८ ॥ विवशा नीतेत्यत्र लिङ्गं दर्शयति--रुद्धेति ।

नैव वाचा न मनसा नानुध्यानान्न चक्षुषा । सुवृत्ता वृत्तशौण्डीर न त्वामतिचचार ह ॥ ७ ॥ रावणेनापनीतैषा वीर्योत्सिक्तेन रक्षसा । त्वया विरहिता दीना विवशा निर्जनाद्वनात् ॥ ८ ॥ रुद्धा चान्तःपुरे गुप्ता त्वच्चित्ता त्वत्परायणा । रक्षिता राक्षसीसङ्घैर्विकृतैर्घोरदर्शनैः ॥ ९ ॥ प्रलोभ्यमाना विविधं भर्त्स्यमाना च मैथिली । नाचिन्तयत तद्रक्षस्त्वद्गतेनान्तरात्मना ॥ १० ॥ विशुद्धभावां निष्पापां प्रतिगृह्णीष्व राघव । न किंचिदभिधातव्यमहमाज्ञापयामि ते ॥ ११ ॥ ततः प्रीतमना रामः श्रुत्वैतद्वदतां वरः । दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १२ ॥ एवमुक्तो महातेजा द्युतिमान् दृढविक्रमः । अब्रवीत् त्रिदशश्रेष्ठं रामो धर्मभृतां वरः ॥ १३ ॥ अवश्यं त्रिषु लोकेषु न सीता पापमर्हति । दीर्घकालोषिता हीयं रावणान्तःपुरे शुभा ॥ १४ ॥

त्वयि चित्तं यस्याः सा त्वच्चित्ता । त्वमेव परायणमुत्तमगतिर्यस्याः सा त्वत्परायणा ॥ ९ ॥ १० ॥ विशुद्धभावामिति । विशुद्धभावां विशुद्धहृदयाम् । अभिधातव्यम्, मद्वचनस्योत्तरमिति शेषः ॥ ११ ॥ तत इति । दध्यौ न वृथैव सीता त्यक्तेत्यचिन्तयत् ॥ १२ ॥ १३ ॥ वस्तुतो निर्दोषत्वेऽपि

रुद्धा निरुद्धस्वच्छन्दगमनादिव्यवहारा । गुप्ता परिहृतस्वजनदर्शना । त्वयि चित्तं यस्यास्सा अत एव त्वत्परायणा त्वद्गतिः ॥९॥ तद्रक्षो नाचिन्तयत नागणयत् । तत्र हेतुरन्तरात्मनस्त्वद्गतत्वम् । एवञ्च यत्प्रतिबिम्बस्याप्येवं व्यवस्था तद्बिम्बस्य शुद्धत्वं किं वक्तव्यमिति भावः ॥१०॥ न किञ्चिदिति । मन्नियोगानन्तरं प्रतिग्राह्या न वेति सन्देहो न गृह्णामीति निषेधश्च न कर्तव्य इत्यर्थः । कुत एवम्? तत्राह आज्ञापयामि त इति । एवमुक्तिस्तु रामेण स्वस्वरूपाज्ञाननाटनात्तदनुसारेण रुद्रमूर्तेर्भगवतोऽग्नेरपीति मन्तव्यम् ॥ ११-१२ ॥ अवश्यमिति । रावणान्तःपुरे दीर्घकालोषिता सीता त्रिषु लोकेषु विषये पापं शोभनं नार्हतीति योजना । यद्वा अवश्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अपवादोऽस्तीत्याह--अवश्यमिति ॥ १४ ॥ अपवादपरिहारार्थमयं मम प्रयत्न इत्याह-बालिश इति । अविशोध्येति । परिग्रह इति शेषः ॥ १५ ॥ अनन्येति । अनन्यहृदयां मय्येव सक्तहृदयाम् । मच्चित्तपरिवर्तिनीम् मच्चित्तानुवर्तिनीम्, त्यक्तस्वव्यापारामित्यर्थः । जनकात्मजामिति हेतुगर्भं विशेषणम् । जनकपुत्र्याः किमाचारसंपत्तिर्वक्तव्येति भावः ॥ १६ ॥ तर्हि किमर्थमुपेक्षितवानसीत्यत्राह-प्रत्ययार्थमिति । प्रत्ययार्थं विश्वासजननार्थं

बालिशः खलु कामात्मा रामो दशरथात्मजः । इति वक्ष्यन्ति मां सन्तो जानकीमविशोध्य हि ॥ १५ ॥ अनन्यहृदयां भक्तां मच्चित्तपरिवर्तिनीम् । अहमप्यवगच्छामि मैथिलीं जनकात्मजाम् ॥ १६ ॥ प्रत्ययार्थं तु लोकानां त्रयाणां सत्यसंश्रयः । उपेक्षे चापि वैदेहीं प्रविशन्तीं हुताशनम् ॥ १७ ॥ इमामपि विशालाक्षीं रक्षितां स्वेन तेजसा । रावणो नातिवर्तेत वेलामिव महोदधिः ॥ १८ ॥ न हि शक्तः स दुष्टात्मा मनसाऽपि हि मैथिलीम् । प्रधर्षयितुमप्राप्तां दीप्तामग्निशिखामिव ॥ १९ ॥ नेयमर्हति चैश्वर्यं रावणान्तःपुरे शुभा । अनन्या हि मया सीता भास्करेण प्रभा यथा ॥ २० ॥ विशुद्धा त्रिषु लोकेषु मैथिली जनकात्मजा । न हि हातुमियं शक्या कीर्तिरात्मवता यथा ॥२१॥ अवश्यं तु मया कार्यं सर्वेषां वो वचः शुभम् । स्निग्धानां लोकमान्यानामेवं च ब्रुवतां हितम् ॥ २२ ॥ इतीदमुक्त्वा विदितं महाबलैः प्रशस्यमानः स्वकृतेन कर्मणा । समेत्य रामः प्रियया महाबलः सुखं सुखार्होऽनुबभूव राघवः ॥ २३ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

मित्यर्थः । सत्यसंश्रयः सत्यैकाश्रयः, यथा[illegible]प्रवर्तनाकाङ्क्षीत्यर्थः ॥ १७ ॥ एतादृशसुन्दरीं रावणः कथं नैक्षतेत्यत्राह-इमामपीति ॥ १८ ॥ दृष्टान्तान्तरमाह-न हीति । अप्राप्तां प्रधर्षणानर्हाम् ॥ १९ ॥ तथाप्येषा तादृशमैश्वर्यं कथं जह्यात्तत्राह-नेयमिति । रावणैश्वर्यं नेयमर्हति किंतु ममै श्वर्यमर्हतीत्यर्थः । तत्र हेतुमाह अनन्येति । मया अनन्या आभिन्ना, अविनाभूतेति यावत् ॥ २० ॥ अहमपि तया अनन्य इत्याह-विशुद्धेति ॥२१॥ सीतापरिग्रहे भवद्वचनं तु प्रधानहेतुरित्याह-अवश्यमिति । वचनकरणे स्नेहः सर्वपूज्यत्वं हितोपदेष्टृत्वं च हेतुरित्यर्थः ॥ २२ ॥ इतीति । विदितं स्वेन मित्यादि श्लोकद्वयमेकं वाक्यम् । रावणान्तःपुरे दीर्घकालोषिताऽपि परिशुद्धा इयं सीता पापं नार्हति यद्यपि तथापि रामस्तां जानकीमविशोध्य स्वीकृतवान् ततो

For Private And Personal Use Only

विदितम्, इदम् उक्तं वचनम् उक्त्वा स्वकृतेन कर्मणा करणेन महाबलैः कर्तृभिः प्रशस्यमानः प्रियया समेत्य सीतां स्वसमीपमानीयेत्यर्थः ॥ २३ ॥
इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकविंशत्युत्तरशततमः सर्गः ॥ १२१ ॥

एतच्छ्रुत्वा शुभं वाक्यं राघवेण सुभाषितम् । इदं शुभतरं वाक्यं व्याजहार महेश्वरः ॥ १ ॥ पुष्कराक्ष महाबाहो महावक्षः परन्तप। दिष्ट्या कृतमिदं कर्म त्वया शस्त्रभृतां वर ॥ २ ॥ दिष्ट्या सर्वस्य लोकस्य प्रवृद्धं दारुणं तमः। अपावृत्तं त्वया सङ्ख्ये राम रावणजं भयम् ॥ ३ ॥ आश्वास्य भरतं दीनं कौसल्यां च यशस्विनीम् । कैकेयीं च सुमित्रां च दृष्ट्वा लक्ष्मणमातरम् ॥ ४ ॥ प्राप्य राज्यमयोध्यायां नन्दयित्वा सुहृज्जनम् । इक्ष्वाकूणां कुले वंशं स्थापयित्वा महाबल ॥५॥ इष्ट्वा तुरगमेधेन प्राप्य चानुत्तमं यशः। ब्राह्मणेभ्यो धनं दत्त्वा त्रिदिवं गन्तुमर्हसि ॥६॥

देवकार्यस्य कृतत्वात्त्रिदिवमाक्रमेति ब्रह्मणोक्तत्वाल्लोके धर्मसंस्थापनपरं रामहृदयं जानन् रुद्रस्तदनुमन्यते—एतच्छ्रुत्वेत्यादि ॥ १ ॥ पुष्कराक्ष पुण्डरीकाक्ष ! अनेन " तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी " " पुरुषः पुण्डरीकाक्षः " इति श्रुतिस्मृतिभ्यामुदीरितस्य परब्रह्मासाधारणचिह्नस्य रामे रुद्रेण प्रतिपादनाद्रामत्वेनावतीर्णो विष्णुरेव वेदान्तवेद्यं परब्रह्मेत्युक्तम् । श्रीनिवासत्वेन महावक्षस्त्वम् । दिष्ट्या भाग्येन, अस्माकमिति शेषः ॥ २ ॥ उक्तमेव विवृणोति—दिष्ट्येति । सर्वस्य लोकस्य रावणजं भयमेव प्रवृद्धं तमः अपावृत्तं निरस्तम् ॥ ३ ॥ आश्वास्येत्यादिश्लोकत्रयमेकान्वयम् ।

रामो बालिशः कामात्मेति च त्रिषु लोकेषु सन्तो मां वक्ष्यन्तीति सम्बन्धः ॥१४–२३॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकविंशत्युत्तरशततमः सर्गः ॥१२१॥१॥२॥ दिष्ट्येति । सर्वस्य लोकस्य दिष्ट्या सर्वलोकभाग्येन रावणजं भयमपावृत्तमिति सम्बन्धः ॥ ३ ॥ ४ ॥ "दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके" इत्यवतारात्पूर्वं तत्कृतां प्रतिज्ञामनुसृत्याह—प्राप्य राज्यमित्यादिश्लोकद्वयेन । कुले वंशं सन्तानं

स०—राघवेणानुभाषितम् । ततः शुभतरम् इति पाठः। **अनुभाषितं** स्ववचनमनुसृत्य भाषितम् । **ततः** तदनन्तरम्, शुभतरं रामवाक्यस्य शुभत्वोक्तेः तद्दृष्ट्युत्पादकवाक्येन प्रकृतोपयोगिनाऽतिशुभेन भवितव्यमिति शुभतरमित्युक्तमिति भावः ॥१॥ **दीनं** पितृनाशेन त्वददर्शनेन च। कैकेयीं चाश्वास्य अनेन रामप्रावण्यस्येव तदमात्सर्यस्य च निस्सीमतया स्वानुभूतत्वेनैतदाश्वासनाशंसनं न मुधा माधवस्तनुयादिति द्योतयति ॥४॥ **तुरगमेधेन** अश्वमेधेन इष्ट्वा सम्पूज्य, स्वात्मानमिति शेषः । **अनुत्तमं** महत् **यशः** कीर्तिं अशेषम् "दिक्षु यामायशः प्रोक्तम्" इति छान्दोग्यभाष्योक्तेः । प्राप्य **त्रिदिवं** श्वेतद्वीपानन्तासनवैकुण्ठाख्यप्रकाशमानलोकत्रयम् अनुत्तमं यशः तन्नामकं प्रजापतिं स्वमेवेष्ट्वा । हे प्राप्य सर्वैः सर्वकर्मभिः प्राप्य राम ! शिष्टमविशिष्टम् "तस्य नाम महद्यशः" "प्रजापतिं वा एष ईप्सति । योऽश्वमेधेन यजते" इति श्रुतिभ्याम् ॥ ६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यशस्विनीमिति कैकेयीविशेषणम् । तन्मूलत्वाद्रावणवधस्य तस्या यशस्वित्वम् । लक्ष्मणमातरमित्यनेन सा लक्ष्मणस्नेहाद्विशेषतो वन्द्येत्युक्तम् । अयोध्यायां सुहृज्जनं नन्दयित्वेत्यन्वयः । वंशं पुत्रपौत्रादिपरम्पराम् । इक्ष्वाकूणां कुले इक्ष्वाकुकुलनिमित्तम्, स्थापयित्वा । प्राप्य चानुत्तमं यश इति तुरगमेधफलोक्तिः । आश्वास्येत्यादिना "दशवर्षसहस्राणि दशवर्षशतानि च । वत्स्यामि मानुषे लोके" इत्यवतारात्पूर्वं तत्कृतां प्रतिज्ञामनुसृत्य रुद्रेणोक्तम्

एष राजा विमानस्थः पिता दशरथस्तव । काकुत्स्थ मानुषे लोके गुरुस्तव महायशाः ॥ ७ ॥ इन्द्रलोकं गतः श्रीमांस्त्वया पुत्रेण तारितः । लक्ष्मणेन सह भ्रात्रा त्वमेनमभिवादय ॥ ८ ॥ महादेववचः श्रुत्वा काकुत्स्थः सहलक्ष्मणः । विमानशिखरस्थस्य प्रणाममकरोत् पितुः ॥ ९ ॥ दीप्यमानं स्वया लक्ष्म्या विरजोम्बरधारिणम् । लक्ष्मणेन सह भ्रात्रा ददर्श पितरं विभुः ॥ १० ॥ हर्षेण महताऽऽविष्टो विमानस्थो महीपतिः । प्राणैः प्रियतरं दृष्ट्वा पुत्रं दशरथस्तदा ॥ ११ ॥ आरोप्याङ्कं महाबाहुर्वरासनगतः प्रभुः । बाहुभ्यां सम्परिष्वज्य ततो वाक्यं समाददे ॥ १२ ॥ न मे स्वर्गो बहुमतः संमानश्च सुरर्षिभिः । त्वया राम विहीनस्य सत्यं प्रतिशृणोमि ते ॥ १३ ॥ अद्य त्वां निहतामित्रं दृष्ट्वा सम्पूर्णमानसम् । निस्तीर्णवनवासं च प्रीतिरासीत् परा मम ॥ १४ ॥

॥ ४–६ ॥ एष इत्यादिश्लोकद्वयमेकान्वयम् । देवदेहपरिग्रहेणापरिज्ञायमानत्वात् पुरःस्थितोऽप्येष इत्यङ्गुल्या निर्दिश्यते । मानुषे लोके गुरुरित्यनेन "पिता पुत्रेण पितृमान् योनियोनौ" इति श्रुतिरुपबृंहिता ॥ ७–१० ॥ हर्षेणेत्यादिश्लोकद्वयमेकान्वयम् । पुत्रं रामम् ॥ ११ ॥ १२ ॥ न मे स्वर्ग इति ।

स्थापयित्वा ॥ ५ ॥ ६ ॥ एष इति । देवदेहपरिग्रहं कृत्वा विमाने पुरःस्थितत्वादेष इत्यङ्गुल्या निर्देशः ॥ ७–१६ ॥

स०–मानुषे लोके लीलागृहीतमानुषदेहविषये तव पिता, मानुषे लोके मनुष्यलोक इति वा । किञ्चिद्व्यत्यस्ताकारतया एष इत्यङ्गुल्या निर्देश इति ज्ञेयम् । गुरुस्तवेति रामसम्बोधनम् । गुरुस्तव महदादिमहाजनस्तुत्य ! एतेन न गुर्विति तवेति चाधिकमिति मन्तव्यम् । गुरुस्तवमहायशा इति दशरथविशेषणं वा । गुरुस्तवेषु बहुभिः स्तुतेषु महायशाः तदपेक्षयाऽतियशस्वीनि वा । "जनिता चोपनेता च यश्च विद्यां प्रयच्छति । अन्नदाता भयत्राता पञ्चैते पितरः स्मृताः ॥" इति गुरुत्वस्य पितृपदार्थत्वानतिरेकात् ॥ ७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुरर्षिभिः संमानः देवर्षिभिः संमानोऽपि ॥ १३ ॥ १४ ॥ हृदये स्थितानि न विस्मरामीत्यर्थः । तेन दुःखितोऽभूवमिति सूचितम् ॥ १५ ॥ सलक्ष्मणमित्यनेन द्वितीयपरिष्वङ्गे लक्ष्मणोऽपि विषयीकृत इत्युच्यते ॥ १६ ॥ तारितोऽहं त्वयेति । कहोळो नाम ऋषिरष्टावक्रेण तारित इतीयं कथा भारतोक्ता ॥ १७ ॥ रावणस्य वधार्थं सुरेश्वरैरिदमभिषेकविधादिकं कर्म यथा विहितं तथा इदानीमेव जानामि । पुरुषोत्तमेत्यनेन भवान् विष्णुरेव रावणवधार्थं

कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर । तव प्रव्राजनार्थानि स्थितानि हृदये मम ॥१५॥ त्वां तु दृष्ट्वा कुशलिनं परिष्वज्य सलक्ष्मणम् । अद्य दुःखाद्विमुक्तोऽस्मि नीहारादिव भास्करः ॥१६॥ तारितोऽहं त्वया पुत्र सुपुत्रेण महात्मना । अष्टावक्रेण धर्मात्मा तारितो ब्राह्मणो यथा ॥१७॥ इदानीं तु विजानामि यथा सौम्य सुरेश्वरैः । वधार्थं रावणस्येदं विहितं पुरुषोत्तम ॥ १८ ॥ सिद्धार्था खलु कौसल्या या त्वां राम गृहं गतम् । वनान्निवृत्तं संहृष्टा द्रक्ष्यत्यरिनिषूदन ॥ १९ ॥ सिद्धार्थाः खलु ते राम नरा ये त्वां पुरीं गतम् । जलार्द्रमभिषिक्तं च द्रक्ष्यन्ति वसुधाधिपम् ॥ २० ॥ अनुरक्तेन बलिना शुचिना धर्मचारिणा । इच्छामि त्वामहं द्रष्टुं भरतेन समागतम् ॥ २१ ॥ चतुर्दश समाः सौम्य वने निर्यापितास्त्वया । वसता सीतया सार्धं लक्ष्मणेन च धीमता ॥२२॥ निवृत्तवनवासोऽसि प्रतिज्ञा सफला कृता । रावणं च रणे हत्वा देवास्ते परितोषिताः ॥ २३ ॥

मनुष्यत्वं गत इत्युच्यते ॥ १८ ॥ सिद्धार्था कृतार्था । मम स्वर्गसुखादपि तस्याः सुखमधिकमिति भावः ॥ १९ ॥ २० ॥ अनुरक्तेनेति । अवश्यं

तारितोऽहमिति । कहोलो नाम ऋषिः अष्टावक्रेण तारित इति या भारतकथा प्रसिद्धा साऽत्रानुसन्धेया ॥ १७ ॥ रावणस्य वधार्थं सुरेश्वरैरिदमभिषेकरूपं कर्म विहितमिति इदानीं विजानामीति सम्बन्धः ॥ १८–२२ ॥ निवृत्तेति । ते त्वया ॥ २३–२५ ॥

स०—अष्टावक्रेण तन्नामकपुत्रेण । जनकसभायां स्वपितृपराजयकारिणं बन्दिनं जित्वा कहोलो ब्राह्मणः तन्नामकोऽष्टावक्रपिता यथा तारितस्तथा । तदुक्तं भारते वनपर्वणि—"कहोल उवाच । इत्यर्थमिच्छन्ति सुतान्जना जनक कर्मणा । यदहं नाऽशकं कर्तुं तत् पुत्रः कृतवान्मम ॥ " इति ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

राम ! भरतं प्राप्नुहीति भावः ॥ २१-२४ ॥ कैकेय्या भरतस्य च कैकेय्यां भरते चेत्यर्थः । संबन्धसामान्ये षष्ठी । यस्मादुक्ता तस्मात् प्रसादं कुर्विति संबन्धः ॥ २५ ॥ स शाप इत्यर्धमेकं वाक्यम् । शापः संबन्धविच्छेदरूपः ॥ २६ ॥ २७ ॥ सीतया सह रामं शुश्रूषतेत्यन्वयः ॥ २८ ॥ स्वर्गे सुखम् ।

कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन । भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि । इति ब्रुवाणं राजानं रामः प्राञ्जलिरब्रवीत् ॥२४॥ कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च । सपुत्रां त्वां त्यजामीति यदुक्ता कैकयी त्वया ॥ २५ ॥ स शापः केकयीं घोरः सपुत्रां न स्पृशेत् प्रभो ॥ २६ ॥ स तथेति महाराजो राममुक्त्वा कृताञ्जलिम् । लक्ष्मणं च परिष्वज्य पुनर्वाक्यमुवाच ह ॥२७॥ रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया । कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते ॥ २८ ॥ धर्मं प्राप्स्यसि धर्मज्ञ यशश्च विपुलं भुवि । रामे प्रसन्ने स्वर्गं च महिमानं तथैव च ॥ २९ ॥ रामं शुश्रूष भद्रं ते सुमित्रानन्दवर्धन । रामः सर्वस्य लोकस्य शुभेष्वभिरतः सदा ॥ ३० ॥ एते सेन्द्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः । अभिगम्य महात्मानमर्चन्ति पुरुषोत्तमम् ॥३१॥ एतत्तदुक्तमव्यक्तमक्षरं ब्रह्म निर्मितम् । देवानां हृदयं सौम्य गुह्यं रामः परन्तपः ॥ ३२ ॥ अवाप्तं धर्मचरणं यशश्च विपुलं त्वया । रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ॥ ३३ ॥

लक्ष्मणस्यापि विष्णववतारत्वं न जानाति दशरथः । महिमानं महत्त्वम् ॥ २९ ॥ ३० ॥ रामस्य सर्वोत्तमत्वं शिष्टाचारेण दर्शयति--एत इति । अर्चन्तीति णिजभाव आर्षः । एत इति हस्तनिर्देशेन रुद्रोऽप्यन्तर्गतः ॥ ३१ ॥ देवानां हृदयं सर्वदेवान्तर्यामी । वेदानामिति पाठे--वेदतात्पर्यभूतम् उभयथाऽप्यग्नीन्द्रादिरूपेण सर्वकर्मसमाराध्यमित्यर्थः । गुह्यं साक्षादुपनिषद्वेद्यम् । अव्यक्तं भक्तिशून्यैर्दुर्ज्ञेयम् । अक्षरं षड्भावविकाररहितम् । तदेतत् ब्रह्म रामः ॥३५३॥

स इति । शापः सन्ततिच्छेदरूपः ॥ २६-३१ ॥ एतदिति । ब्रह्मनिर्मितं वेदप्रतिपादितम् । वेदानां हृदयं वेदतात्पर्यविषयभूतम् । गुह्यं रहस्यम् उक्तं, ब्रह्मादिभि
स०-रामे प्रसन्ने " किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने " इत्यादेः ॥ २९ ॥

For Private And Personal Use Only

रामरूपेण निर्मितं रामरूपेणावतीर्णमिति उक्तम्, ब्रह्मादिभिरिति शेषः ॥ ३२–३५ ॥ न त्वमिति । न समाधेया नोपदेष्टव्या ॥ ३६ ॥ ३७ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने द्वाविंशत्युत्तरशततमः सर्गः ॥ १२२ ॥

स तथोक्त्वा महाबाहुर्लक्ष्मणं प्राञ्जलिं स्थितम् । उवाच राजा धर्मात्मा वैदेहीं वचनं शुभम् ॥ ३४ ॥ कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति । रामेण त्वद्विशुद्ध्यर्थं कृतमेतद्धितैषिणा ॥ ३५ ॥ न त्वं सुभ्रु समाधेया पति शुश्रूषणं प्रति । अवश्यं तु मया वाच्यमेष ते दैवतं परम् ॥३६॥ इति प्रतिसमादिश्य पुत्रौ सीतां तथा स्नुषाम् । इन्द्रलोकं विमानेन ययौ दशरथो ज्वलन् ॥३७॥ इत्यार्षे० श्रीमद्युद्धकाण्डे द्वाविंशत्युत्तरशततमः सर्गः ॥१२२॥

प्रतिप्रयाते काकुत्स्थे महेन्द्रः पाकशासनः । अब्रवीत् परमप्रीतो राघवं प्राञ्जलिं स्थितम् ॥ १ ॥
अमोघं दर्शनं राम तवास्माकं परन्तप । प्रीतियुक्ताः स्म तेन त्वं ब्रूहि यन्मनसेच्छसि ॥ २ ॥

अथेन्द्रानुशासनम्—प्रतिप्रयात इत्यादि । काकुत्स्थे दशरथे । महेन्द्रः लब्धमहेन्द्रभावः ॥ १ ॥ अमोघमिति । तवास्माकं दर्शनम् अस्मत्कर्तृकं दर्शनं

रिति शेषः ॥ ३२–३४ ॥ कर्तव्य इति । इमं त्यागं प्रति "नास्ति मे त्वय्यभिष्वङ्गो यथेष्टं गम्यताम्" इत्युक्तम् एतत्त्यागरूपकार्यं प्रति ॥ ३५ ॥ यद्यपि भर्तृशुश्रूषां प्रति त्वं न समाधेया प्रार्थनापूर्वं न नियोज्या । तत्र ते स्वतः प्रवृत्तिसत्त्वात् । अथापि मया गुरुत्वादवश्यं वाच्यम्, तदेवाह—ते दैवतं परमिति ॥ ३६ ॥ ॥३७॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां द्वाविंशत्युत्तरशततमः सर्गः ॥१२२॥ महेन्द्रः तत्सहितो ब्रह्मेत्यर्थः ।

स०—महेन्द्रः पाकशासन इत्यत्र महेन्द्रशब्देन सर्वस्वामित्वेन ब्रह्मा ग्राह्यः । अत्रोत्तरश्लोकेषु च विद्यमानाः पाकशासनादयः शब्दाः अर्शआद्यजन्ताः । तथा च पाकशासनसहितो ब्रह्मोवाचेति लभ्यते । अतो न भारतादिविसंवादः । यथोक्तं भारते—"तमुवाच ततो ब्रह्मा देवैः शक्रपुरोगमैः । कौसल्यामातरिष्टांस्ते वरानद्य ददामि कान् ॥ वव्रे रामः स्थितिं धर्मे शत्रुभिश्चापराजयम् । राक्षसैर्निहतानां च वानराणां समुत्थितिम् ॥ ततस्ते ब्रह्मणा प्रोक्ते तथेति वचने तदा । समुत्तस्थुर्महाराज वानरा लब्धचेतसः ॥" इति । पाद्मे च—"पितामहवरात्तूर्णं जीवयामास तान्नृप" इति । ननु भ्रूविभ्रममात्रेण चराचरजगत्सृष्ट्यादिकर्तू रामस्य कथं ब्रह्मवराद्वानरोज्जीवनादिकमिति चेत् ? उच्यते—प्रादुर्भावेषु ब्रह्ममाननार्थं ब्रह्मणे दत्तस्य वरस्य रक्षणार्थं च तथा नटनस्याविरूपकत्वान्नेदमनुपपन्नम् । यथोक्तं शान्तौ मोक्षधर्मेषु—"मया सृष्टः पुरा ब्रह्मा" इत्यारभ्य "अनुशास्यस्त्वया ब्रह्मन्नियोज्यश्च सुतो यथा । एतांश्चान्यांश्च रुचिरान् ब्रह्मणेऽमिततेजसे । अहं दत्त्वा वरान् प्रीतो निवृत्तिपरमोऽभवम् ॥" इति भगवद्वचनम् । एतेन 'प्राञ्जलिं स्थितम्' इत्यादि समाहितम् ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

दशरथपुत्रकामेष्टिकालिकम्, अमोघं रावणवधपर्यन्तं जातमित्यर्थः । तेन प्रीतियुक्तत्वेन, यत् प्रत्युपकाररूपं कार्यमिच्छसि तद् ब्रूहि । केचित्तु त्वत्कर्तृकमस्मद्विषयं दर्शनमित्याहुः ॥ २–५ ॥ मत्कृत इत्यादिसार्धश्लोकमेकं वाक्यम् । मत्प्रियेषु अभियुक्ताः निरताः । समेयुरित्यत्र पुत्रैर्दारैश्चेत्या

एवमुक्तस्तु काकुत्स्थः प्रत्युवाच कृताञ्जलिः । लक्ष्मणेन सह भ्रात्रा सीतया सह भार्यया ॥३॥ यदि प्रीतिः समुत्पन्ना मयि सर्वसुरेश्वर । वक्ष्यामि कुरु ते सत्यं वचनं वदतां वर ॥ ४ ॥ मम हेतोः पराक्रान्ता ये गता यमसादनम् । ते सर्वे जीवितं प्राप्य समुत्तिष्ठन्तु वानराः ॥ ५ ॥ मत्कृते विप्रयुक्ता ये पुत्रैर्दारैश्च वानराः । मत्प्रियेष्वभियुक्ताश्च न मृत्युं गणयन्ति च ॥ ६ ॥ त्वत्प्रसादात् समेयुस्ते वरमेतदहं वृणे ॥७॥ नीरुजो निर्व्रणांश्चैव सम्पन्नबलपौरुषान् । गोलाङ्गूलांस्तथैवर्क्षान् द्रष्टुमिच्छामि मानद ॥ ८ ॥ अकाले चापि मुख्यानि मूलानि च फलानि च । नद्यश्च विमलास्तत्र तिष्ठेयुर्यत्र वानराः ॥ ९ ॥ श्रुत्वा तु वचनं तस्य राघवस्य महात्मनः । महेन्द्रः प्रत्युवाचेदं वचनं प्रीतिलक्षणम् ॥१०॥ महानयं वरस्तात त्वयोक्तो रघुनन्दन । द्विर्मया नोक्तपूर्वं हि तस्मादेतद्भविष्यति ॥ ११ ॥ समुत्थास्यन्ति हरयो ये हता युधि राक्षसैः । ऋक्षाश्च सहगोपुच्छा निकृत्ताननबाहवः । नीरुजो निर्व्रणाश्चैव सम्पन्नबलपौरुषाः ॥१२॥ समुत्थास्यन्ति हरयः सुप्ता निद्राक्षये यथा । सुहृद्भिर्बान्धवैश्चैव ज्ञातिभिः स्वजनैरपि । सर्व एव समेष्यन्ति संयुक्ताः परया मुदा ॥ १३ ॥

वर्तनीयम् ॥ ६ ॥ ७ ॥ नीरुजः निष्पीडान् ॥ ८ ॥ विमलाः विमलोदकाः ॥ ९ ॥ प्रीतिर्लक्ष्यतेऽनेनेति प्रीतिलक्षणं प्रीतिव्यञ्जकम् ॥ १० ॥ महानयं वर इति । वरस्य महत्त्वम् इतस्ततो विप्रकीर्णकरचरणपुच्छादिस्वस्वसंस्थानसन्धानलोकान्तरगतानयनादिरूपाघटितार्थघटितत्वम् । द्विर्मया

सत्यसङ्कल्पत्वस्य तस्मिन्नेव प्रसिद्धेः, वानराणां सङ्कल्पमात्रेणोत्थानस्य वक्ष्यमाणत्वात् । भारतेऽपि "ततस्ते ब्रह्मणा प्रोक्ते तथेति वचने तदा । समुत्तस्थुर्महाराज वानरा लब्धचेतसः ॥" इत्युक्तम् ॥ १–५ ॥ मत्कृत इति । समेयुः पुत्रैर्दारैरिति सम्बन्धः ॥ ६–१० ॥ महानयं वर इति । इतस्ततो विप्रकीर्णकरचरणपुच्छादि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नोक्तपूर्वमिति । उक्तवचनस्य विपरीतं वचनान्तरं नोक्तपूर्वमित्यर्थः ॥ ११–१३ ॥ अकाल इति । पुष्पशबलाः पुष्पैर्नानावर्णाः । सलिलायुताः सलिले व्याप्ताः ॥ १४ ॥ ये निहताः सव्रणास्तेषां निर्व्रणत्वमनुगृह्णाति—सव्रणैरिति । प्रथमं वरदानात्पूर्वं सव्रणैः, अथ निर्व्रणैः संवृत्तैः निर्व्रणीभूतैः गात्रैरुप

अकाले पुष्पशबलाः फलवन्तश्च पादपाः । भविष्यन्ति महेष्वास नद्यश्च सलिलायुताः ॥ १४ ॥ सव्रणैः प्रथमं गात्रैः संवृत्तैर्निर्व्रणैः पुनः ॥ १५ ॥ ततः समुत्थिताः सर्वे सुप्त्वेव हरिपुङ्गवाः । बभूवुर्वानराः सर्वे किमेतदिति विस्मिताः ॥ १६ ॥ ते सर्वे वानरास्तस्मै राघवायाभ्यवादयन् ॥१७॥ काकुत्स्थं परिपूर्णार्थं दृष्ट्वा सर्वे सुरोत्तमाः । ऊचुस्ते प्रथमं स्तुत्वा स्तवार्हं सहलक्ष्मणम् ॥१८॥ गच्छायोध्यामितो वीर विसर्जय च वानरान् ॥१९॥ मैथिलीं सान्त्वयस्वैनामनुरक्तां तपस्विनीम् । शत्रुघ्नं च महात्मानं मातॄः सर्वाः परन्तप ॥२०॥ भ्रातरं पश्य भरतं त्वच्छोकाद्व्रतधारिणम् । अभिषेचय चात्मानं पौरान् गत्वा प्रहर्षय ॥२१॥ एवमुक्त्वा तमामन्त्र्य रामं सौमित्रिणा सह । विमानैः सूर्यसङ्काशैर्हृष्टा जग्मुः सुरा दिवम् ॥२२॥ अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदशोत्तमान् । लक्ष्मणेन सह भ्रात्रा वासमाज्ञापयत्तदा ॥२३॥ ततस्तु सा लक्ष्मणरामपालिता महाचमूर्हृष्टजना यशस्विनी । श्रिया ज्वलन्ती विरराज सर्वतो निशा प्रणीतेव हि शीतरश्मिना ॥२४॥ इत्यार्षे० श्रीमद्युद्ध० त्रयोविंशत्युत्तरशततमः सर्गः॥१२३॥

लक्षिताः, वानरा भविष्यन्तीत्यनुकृष्य योजना ॥ १५ ॥ तत इति । अत्र क्रियाभेदात्सर्वशब्दद्वयम् । किमेतदिति । युद्धे मृतस्य कथमेवं जीवनमित्यर्थः ॥ १६--१८ ॥ रामानु०—त इति । राघवायाभ्यवादयन् राघवमभ्यवादयन्नित्यर्थः । व्यत्ययेन द्वितीयार्थे चतुर्थी । द्वितीयायां विभीषणाभिषेकसीताप्राप्तिदेवताप्रस्थापनानि ॥ १७ ॥ गच्छायोध्यामित्यादिसार्धश्लोकद्वयमेकान्वयम् । त्वच्छोकात् त्वद्वियोगशोकात् ॥ १९--२२ ॥ अभिवाद्येति । वासमाज्ञापयत्, वानराणामिति शेषः ॥ २३ ॥ ततस्त्विति । प्रणीता प्रकाशिता ॥ २४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

स्वस्थानसन्धानलोकान्तरगतानयनरूपाघटितार्थघटकत्वाद्वरस्य महत्त्वम् । द्वितीयायां विभीषणाभिषेकः, तृतीयायां सीताप्राप्तिः देवताप्रस्थापनं च ॥११–२४॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रयोविंशत्युत्तरशततमः सर्गः ॥ १२३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ रामस्य विभीषणसत्कारः–तां रात्रिमित्यादि । तां रात्रिम्, यस्मिन् दिने ब्रह्मादयो निर्जग्मुः तां रात्रिमित्यर्थः ॥ १ ॥ स्नानानीत्यादिसार्धश्लोकद्वयमेकान्वयम् । स्नानानि स्नानीयजलानि । अत्र सर्वत्रेमानीत्यनुषज्यते । अङ्गरागाणि कुङ्कुमादीनि । माल्यानि स्रजः । विधिवत् सोपचारमित्यर्थः ॥ २–४ ॥ हरीनिति । सुग्रीवमुख्यान् सुग्रीवप्रमुखानेव हरीन्, स्नानेन, स्नानेन हेतुना अभिनिमन्त्रय ॥ ५ ॥ त्वां विना तेषामामन्त्रणे किं कारण

तां रात्रिमुषितं रामं सुखोत्थितमरिन्दमम् । अब्रवीत् प्राञ्जलिर्वाक्यं जयं पृष्ट्वा विभीषणः ॥ १ ॥ स्नानानि चाङ्गरागाणि वस्त्राण्याभरणानि च । चन्दनानि च दिव्यानि माल्यानि विविधानि च ॥ २ ॥ अलङ्कारविदश्चेमा नार्यः पद्मनिभेक्षणाः । उपस्थितास्त्वां विधिवत् स्नापयिष्यन्ति राघव । प्रतिगृह्णीष्व तत् सर्वं मदनुग्रहकाम्यया ॥ ३ ॥ एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणम् ॥ ४ ॥ हरीन् सुग्रीवमुख्यांस्त्वं स्नानेनाभिनिमन्त्रय ॥ ५ ॥ स तु ताम्यति धर्मात्मा मम हेतोः सुखोचितः । सुकुमारो महाबाहुः कुमारः सत्यसंश्रवः ॥ ६ ॥ तं विना कैकयीपुत्रं भरतं धर्मचारिणम् । न मे स्नानं बहुमतं वस्त्राण्याभरणानि च ॥ ७ ॥ इत एव पथा क्षिप्रं प्रतिगच्छामि तां पुरीम् । अयोध्यामागतो ह्येष पन्थाः परमदुर्गमः ॥ ८ ॥

मित्यत आह–स त्विति । सः सर्वदा मनसि परिवर्तमानः धर्मात्मा ताम्यति । धर्माचरणेनैव ताम्यतीति भावः । मम हेतोः मल्लाभार्थमित्यर्थः । सत्यसंश्रवः "चतुर्दशे हि संपूर्णे वर्षेऽहनि रघूत्तम । न द्रक्ष्यामि यदि त्वां हि प्रवेक्ष्यामि हुताशनम् ॥" इति कृतप्रतिज्ञः ॥ ६ ॥ तं विनेति । तं विना स्नानोपकरणं विना, स्नानं कथं कार्यम् । कैकयीपुत्रं मध्यमाम्बा तस्मिन् यद्दुःखमकरोत् तत्किं मयाऽपि कर्तव्यम् ? भरतं राज्ञा मया च विरहितं राज्यं सम्यक् कृतवन्तम् । धर्मचारिणं मद्वियोगेन बहुव्रतपरे तस्मिन् कथं मया व्रतत्यागः कर्तुं युक्त इति भावः । न मे स्नानं बहुमतम् प्रथमं मे स्नानमेव नेष्टम् कथं तदनन्तरभावीनि वस्त्रादीनि ॥ ७ ॥ इत एवेति । अनेन पथा येनाहमागतस्तेनेत्यर्थः । एष इति हस्तनिर्देशपूर्वकमुच्यते । ॥३५५॥

तामिति । यस्मिन दिने ब्रह्मादयो जग्मुः तत्सम्बन्धिन्यां रात्र्यामित्यर्थः । सुखोत्थितं सुखमनुद्रम् । जयं पृष्ट्वा जयशब्दं प्रयुज्य ॥ १ ॥ स्नानानि स्नानोपकर

For Private And Personal Use Only

अयोध्याम् आगतः प्राप्तः अयमयोध्यामार्गः, तेन क्षिप्रं तां प्रतिगच्छामीत्यर्थः । परमदुर्गमः अतिदूरत्वादिति भावः ॥ ८ ॥ मार्गस्य परमदुर्गमत्व मात्रं परिहर्तुमाह–एवमुक्तस्त्विति ॥ ९ ॥ अह्ना त्वामित्यादिसार्धश्लोकत्रयमेकान्वयम् । किं रावणेन चौर्येणापहृतमित्यत्राह–आहृतं निर्जित्येति ॥१०॥ ॥ ११ ॥ तर्हि कुबेराय समागताय तत्किमर्थं न दत्तमित्यत्राह त्वदर्थं इति । त्वदर्थं त्वद्गमनार्थं । पालितामिति । न दत्तमित्यर्थः । यद्वा त्वदर्थं त्वत्पूजार्थं

एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः ॥ ९ ॥ अह्ना त्वां प्रापयिष्यामि तां पुरीं पार्थिवात्मज । पुष्पकं नाम भद्रं ते विमानं सूर्यसन्निभम् ॥ १० ॥ मम भ्रातुः कुबेरस्य रावणेनाहृतं बलात् । हृतं निर्जित्य सङ्ग्रामे कामगं दिव्यमुत्तमम् ॥ ११ ॥ त्वदर्थं पालितं चैतत्तिष्ठत्यतुलविक्रम । तदिदं मेघसङ्काशं विमानमिह तिष्ठति ॥१२॥ तेन यास्यसि यानेन त्वमयोध्यां गतज्वरः ॥ १३ ॥ अहं ते यद्यनुग्राह्यो यदि स्मरसि मे गुणान् ॥१४॥ वस तावदिह प्राज्ञ यद्यस्ति मयि सौहृदम् । लक्ष्मणेन सह भ्रात्रा वैदेह्या चापि भार्यया ॥१५॥ अर्चितः सर्वकामैस्त्वं ततो राम गमिष्यसि । प्रीतियुक्तस्य मे राम ससैन्यः ससुहृद्गणः ॥ १६ ॥ सत्क्रियां विहितां तावद्गृहाण त्वं मयोद्यताम् । प्रणयाद्बहुमानाच्च सौहृदेन च राघव । प्रसादयामि प्रेष्योऽहं न खल्वाज्ञापयामि ते ॥ १७ ॥

मेव । मेघसङ्काशमिति वेगे दृष्टान्तः ॥१२॥१३॥ स्नानाकरणे द्विरात्रं स्थितिं याचते–अहं त इत्यादिना । चतुःश्लोक्येकान्वया । गुणान् भक्त्यादि गुणान् ॥ १४ ॥ १५ ॥ सर्वकामैः भूषणादिभिः । विहितां मया कृताम् । उद्यताम्, इतः परं नोद्योगः कार्यः, येन विलम्बः स्यात्, किं तु पूर्वमेव समुद्युक्तामित्यर्थः । निर्बन्धदोषं परिहरति प्रणयादिति । प्रणयात् मद्वाक्यमवश्यं श्रोष्यतीति विस्रम्भात् । बहुमानात् त्वत्कृतलालनात् । सौहृदेन

णानि ॥ २–११ ॥ तदिदमिति । लङ्कायां वर्तमानस्यापि पुष्पकस्यात्युन्नतत्वेन बहिःस्थितैरपि दृश्यमानत्वादिदमिति प्रत्यक्षनिर्देशः ॥ १२–१६ ॥ विहितां शास्त्र

स०–प्रीतियुक्तस्य विहितो ससैन्यः ससुहृद्गणः । सत्क्रियां राम मे तावत् । इति पाठः । हे राम ! प्रीतियुक्तस्य पुरुषस्य शास्त्रविहितां मया उचतां कार्यतया उद्युक्तां सत्क्रियाम् । मे अव्ययम् । अतः गृहाण । मे ममेति वा । न च रामेत्यस्यामन्त्रितत्वेनाविद्यमानवद्भावेनापदत्वेन पदात्परत्वाभावात्कथं म इत्यादेशः इति वाच्यम्, सत्क्रियामितिपदात्परत्वेनादेशसम्भवात् ॥ १६ ॥ १७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भक्त्या । प्रसादयामि प्रार्थयामि ॥ १६ ॥ १७ ॥ उपशृण्वताम् उपशृण्वन्तु । भावलक्षणे षष्ठी ॥ १८ ॥ साचिव्येन साहाय्येन । चेष्टाभिः पौरुषैः । सर्वात्मना पूजित इत्यन्वयः ॥ १९ ॥ न खल्वेतदित्यादिश्लोकद्वयमेकान्वयम् । विभीषणवचनाकरणे हेतुमाह–तं त्विति । त्वरायां हेतुमाह–शिरसेति ॥२०॥२१॥ कौसल्यामिति । अत्रापि द्रष्टुं त्वरते मे मन इति संबध्यते । पौरांश्च तनयैः सहेत्यत्र पौरैरेव तनयशब्दोऽन्वेति॥२२॥उपस्थापयेति । द्वित्रादिन।

एवमुक्तस्ततो रामः प्रत्युवाच विभीषणम् । रक्षसां वानराणां च सर्वेषां चोपशृण्वताम् ॥ १८ ॥ पूजितोऽहं त्वया सौम्य साचिव्येन परन्तप । सर्वात्मना च चेष्टाभिः सौहृदेनोत्तमेन च ॥ १९ ॥ न खल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर । तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः । मां निवर्तयितुं योऽसौ चित्रकूटमुपागतः ॥ २० ॥ शिरसा याचतो यस्य वचनं न कृतं मया ॥ २१ ॥ कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीम् । गुरूंश्च सुहृदश्चैव पौरांश्च तनयैः सह ॥ २२ ॥ उपस्थापय मे क्षिप्रं विमानं राक्षसेश्वर । कृतकार्यस्य मे वासः कथं स्विदिह सम्मतः॥२३॥ अनुजानीहि मां सौम्य पूजितोऽस्मि विभीषण । मन्युर्न खलु कर्तव्यस्त्वरितं त्वाऽनुमानये ॥२४॥ राघवस्य वचः श्रुत्वा राक्षसेन्द्रो विभीषणः । तं विमानं समादाय तूर्णं प्रतिनिवर्तत ॥ २५ ॥ ततः काञ्चनचित्राङ्गं वैडूर्यमयवेदिकम् । कूटागारैः परिक्षिप्तं सर्वतो रजतप्रभम् ॥ २६ ॥

न्यत्र स्थातव्यमित्यस्योत्तरमाह–कृतेति । निर्वर्तितचतुर्दशवर्षप्रव्राजनस्य कृतकार्यस्य मे इह लङ्कायां वासः सम्मतः कथं स्वित् ? न सम्मत इत्यर्थः । अन्यथा भरतस्याग्निप्रवेशादिति भावः ॥२३॥ अनुजानीहीति । पूजितोऽस्मि, विमानप्रदानेनेति शेषः । प्रदत्तत्वेन स्वत्वादुत्तरत्र कुबेराय प्रेषयिष्यति । मन्युः दैन्यम्, कोपो वा । "मन्युर्दैन्ये क्रतौ क्रुधि" इत्यमरः । त्वरितम् उक्तप्रकारेण त्वरावन्तं मामिति सम्बन्धः । यद्वा त्वरितं यथा भवति तथा अनुमानये अनुमतिं कारये ॥ २४ ॥ राघवस्य वचः श्रुत्वेत्यादिश्लोकचतुष्टयमेकं वाक्यम् । प्रतिनिवर्तत प्रतिन्यवर्तत । काञ्चनचित्राङ्गम् काञ्चनमय ॥३५६॥

विधिना विहिताम् । उद्यताम् उद्धृतां सत्क्रियां मे मम सकाशात् गृहाणेति सम्बन्धः ॥ १७–२१ ॥ कौसल्यां चेति । अत्रापि द्रष्टुं त्वरते मन इत्यनुषज्यते ॥ २२–२६ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

चित्रावयवम् । कूटागारैः मण्डपैः, परिक्षितं व्याप्तम् । रजतप्रभम्, रजतशब्देन अत्र विशदत्वमुच्यते ॥ २५ ॥ २६ ॥ पताकाभिः केवलध्वजैः । ध्वजैः सचिह्नैः । हर्म्यैः अवान्तरराजगृहैः । हेमपद्मानि लम्बमानानि तैर्विभूषितम् । प्रकीर्णं व्याप्तम् । मुक्तामणिगवाक्षितं मुक्तामणिनिर्मितगवाक्षयुक्तम् । घण्टाजालैः परिक्षितं चतुर्षु पार्श्वेषु किङ्किणीजालयुक्तम्, कोणेषु घण्टाजालयुक्तम्, अत एव मधुरस्वनम् ॥ २७ ॥ २८ ॥ यन्मेर्वित्यादिश्लोकत्रयमेका

पाण्डुराभिः पताकाभिर्ध्वजैश्च समलंकृतम् । शोभितं काञ्चनैर्हर्म्यैर्हेमपद्मविभूषितम् ॥ २७ ॥ प्रकीर्णं किङ्किणी जालैर्मुक्तामणिगवाक्षितम् । घण्टाजालैः परिक्षिप्तं सर्वतो मधुरस्वनम् ॥ २८ ॥ यन्मेरुशिखराकारं निर्मितं विश्व कर्मणा । बहुभिर्भूषितं हर्म्यैर्मुक्तारजतसंनिभैः ॥ २९ ॥ तलैः स्फाटिकचित्राङ्गैर्वैडूर्यैश्च वरासनैः । महार्हास्तरणो पेतैरुपपन्नं महाधनैः ॥३०॥ उपस्थितमनाधृष्यं तद्विमानं मनोजवम् । निवेदयित्वा रामाय तस्थौ तत्र विभीषणः ॥ ३१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

उपस्थितं तु तं दृष्ट्वा पुष्पकं पुष्पभूषितम् । अविदूरस्थितो रामं प्रत्युवाच विभीषणः ॥ १ ॥ स तु बद्धाञ्जलिः प्रह्वो विनीतो राक्षसेश्वरः । अब्रवीत्त्वरयोपेतः किं करोमीति राघवम् ॥ २ ॥ तमब्रवीन्महातेजा लक्ष्मणस्योपशृण्वतः । विमृश्य राघवो वाक्यमिदं स्नेहपुरस्कृतम् ॥ ३ ॥

न्वयम् । मुक्तारजतसंनिभैः तद्वन्निर्मलैरित्यर्थः । स्फाटिकचित्राङ्गैः स्फटिकमयचित्रावयवैः । महाधनैः महामूल्यैः ॥ २९–३१ ॥ रामानु०-यन्मेरुशिखरा कारमिति पाठः ॥ २९ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥

अथ वानरसेनासम्माननम्–उपस्थितमित्यादि । तं दृष्ट्वा दर्शयित्वा । तत्कृत्वेति वा पाठः । प्रत्युवाच, विमानमागतमितीति शेषः । स त्विति द्वितीय श्लोकसङ्ग्रहो वाऽयं श्लोकः ॥ १ ॥ त्वरयोपेतः आदरोपेत इत्यर्थः । किं करोमीति । इतः परं किं करवाणीत्यर्थः ॥ २ ॥ लक्ष्मणस्योपशृण्वतः ॥ २७–३१ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां चतुर्विंशत्युत्तरशततमः सर्गः ॥ १२४ ॥ उपस्थितमिति । तं दृष्ट्वा तद्दर्शयित्वा । तत्कृत्वेति वा पाठः । अविदूरस्थितत्वादिविशेषणो विभीषणः पुष्पकमुपस्थितमासन्नं कृत्वा राममित्युवाच ॥ १ ॥ कथमुवाचेत्यत आह–

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लक्ष्मणसंमतिपूर्वकमित्यर्थः ॥ ३ ॥ प्रयत्नकर्म प्रयत्नसाध्यं कर्मेत्यर्थः । अर्थैः प्रयोजनैः, वस्त्रादिभिरित्यर्थः ॥ ४ ॥ अजिता पूर्वं सुरादिभिरप्यजिता । तव लङ्काराज्यप्राप्तिरिव तदधीनेत्यर्थः । हृष्टैः मयि प्रीतिमद्भिरित्यर्थः ॥ ५ ॥ ६ ॥ त इमे इत्यर्थोक्तं भङ्ग्यन्तरेणाह–धनरत्नेति ॥ ७ ॥ निर्वृताः सुखिताः । निर्वृत्ता इति पाठे–निष्पन्नाः, परिपूर्णा इति यावत् ॥ ८ ॥ अर्थव्ययेन खेदो मा भूदित्याह–त्यागिनमिति । संग्रहीतारं धनप्रदानेन मित्र

कृतप्रयत्नकर्माणो विभीषण वनौकसः । रत्नैरर्थैश्च विविधैर्भूषणैश्चापि पूजय ॥ ४ ॥ सहैभिरजिता लङ्का निर्जिता राक्षसेश्वर । हृष्टैः प्राणभयं त्यक्त्वा सङ्ग्रामेष्वनिवर्तिभिः ॥ ५ ॥ त इमे कृतकर्माणः पूज्यन्तां सर्ववानराः ॥ ६ ॥ धनरत्नप्रदानेन कर्मैषां सफलं कुरु ॥ ७ ॥ एवं संमानिताश्चैते मानार्हा मानद त्वया । भविष्यन्ति कृतज्ञेन निर्वृता हरियूथपाः ॥ ८ ॥ त्यागिनं सङ्ग्रहीतारं सानुक्रोशं यशस्विनम् । सर्वे त्वामवगच्छन्ति ततः सम्बोधयाम्यहम् ॥ ९ ॥ हीनं रतिगुणैः सर्वैरभिहन्तारमाहवे । त्यजन्ति नृपतिं सैन्याः संविग्नास्तं नरेश्वरम् ॥ १० ॥ एवमुक्तस्तु रामेण वानरांस्तान् विभीषणः । रत्नार्थैः संविभागेन सर्वानेवाभ्यपूजयत् ॥ ११ ॥

संग्रहकारिणमित्यर्थः । संग्रहार्थं त्यागित्वमुक्त्वा दयया त्यागित्वमाह–सानुक्रोशमिति । यशस्विनं त्यागकृतयशोवन्तम् । संबोधयामि न तु चोदयामीत्यर्थः ॥ ९ ॥ सैनिकसम्मानाकरणे दोषमाह–हीनमिति । नृपतिं स्वामिनमपि । रतिगुणैः प्रीतिकरैरौदार्यादिगुणैः, हीनम् । अभिहन्तारं हिंसनशीलम्, प्रसादं विना क्रोधैकनिरतमिति यावत् । तं नरेश्वरं सैन्याः संविग्नाः आहवे त्यजन्तीति योजना ॥ १० ॥ संविभागेन यथार्हमंशकल्पनया ।

स तु बद्धाञ्जलिरिति ॥ २ ॥ ३ ॥ कृतं प्रयत्नेन कर्म युद्धकर्म यैस्ते । अर्थैः विचित्रान्नपानवस्त्रादिभिः ॥ ४ ॥ एभिस्सह लङ्का निर्जितेत्यनेन तव लङ्काराज्यप्राप्तिरपि वानरपराक्रमाधीनेत्युक्तं भवति ॥ ५–८ ॥ त्वां तत्सत्कारसमर्थं तेषां च सत्कारमियत्वं ज्ञात्वैव त्वां तत्सत्कारे नियोजयामीत्याह–त्यागिनमिति । उचितविषये इति शेषः । संग्रहीतारं, यथान्यायं रत्नादेरिति शेषः ॥ ९ ॥ नृपतिं स्वामिनम् । सर्वैरपि गुणैः औदार्यादिगुणैर्हीनम्, अभिहन्तारं हिंसनशीलम्, प्रसादं विना क्रोधैकनिरतमिति यावत् । तं नरेश्वरं सैन्यास्संविग्नाः आहवे त्यजन्तीति योजना ॥ १० ॥ एवमिति । रत्नार्थैः रत्नैरर्थैश्च । संविभागेन यथार्ह ॥२५७॥

समतया प्रदाने अधिकानां कोपप्रसङ्गादिति भावः ॥११॥ तत इत्यादिश्लोकद्वयमेकान्वयम्। ततः पूजानन्तरम्। ततः पूजादर्शनादेव हेतोरिति ततः शब्दद्वययोजना। लज्जमानां सदस्यङ्कारोहणाय लज्जन्तीम्। रामेणाङ्कारोपणं च स्त्रीसहायराहित्यात्। धनुष्मता रामधनुर्धारिणा ॥ १२–१४ ॥

ततस्तान् पूजितान् दृष्ट्वा रत्नैरर्थैश्च यूथपान्। आरुरोह ततो रामस्तद्विमानमनुत्तमम् ॥ १२ ॥ अङ्केनादाय वैदेहीं लज्जमानां यशस्विनीम्। लक्ष्मणेन सह भ्रात्रा विक्रान्तेन धनुष्मता ॥ १३ ॥ अब्रवीच्च विमानस्थः पूजयन् सर्वं वानरान्। सुग्रीवं च महावीर्यं काकुत्स्थः सविभीषणम् ॥१४॥ मित्रकार्यं कृतमिदं भवद्भिर्वानरोत्तमाः। अनुज्ञाता मया सर्वे यथेष्टं प्रतिगच्छत ॥१५॥ यत्तु कार्यं वयस्येन सुहृदा वा परन्तप। कृतं सुग्रीव तत् सर्वं भवताऽधर्मभीरुणा ॥१६॥ किष्किन्धां प्रतियाह्याशु स्वसैन्येनाभिसंवृतः ॥१७॥ स्वराज्ये वस लङ्कायां मया दत्ते विभीषण। न त्वां धर्षयितुं शक्ताः सेन्द्रा अपि दिवौकसः ॥१८॥ अयोध्यां प्रतियास्यामि राजधानीं पितुर्मम। अभ्यनुज्ञातुमिच्छामि सर्वांश्चामन्त्रयामि वः ॥१९॥ एवमुक्तास्तु रामेण वानरास्ते महाबलाः। ऊचुः प्राञ्जलयो रामं राक्षसश्च विभीषणः ॥ २० ॥ अयोध्यां गन्तुमिच्छामः सर्वान्नयतु नो भवान्। उद्युक्ता विचरिष्यामो वनानि नगराणि च ॥ २१ ॥ दृष्ट्वा त्वामभिषेकार्द्रं कौसल्यामभिवाद्य च। अचिरेणागमिष्यामः स्वान् गृहान् नृपतेः सुत ॥ २२ ॥

अब्रवीच्चेत्यत्र संग्रहेणोक्तं विवृणोति–मित्रेत्यादिना। वानरान् प्रत्याह–मित्रेति ॥ १५ ॥ सुग्रीवं प्रत्याह–यत्त्वित्यादिना। सुहृदा शोभनहृदयेन। वाशब्द एवकारार्थः। अधर्मभीरुणेति च्छेदः ॥ १६ ॥ १७ ॥ विभीषणं प्रत्याह–स्वेति। स्वराज्ये वस। न तु परकीयं रावणवदाक्रमितव्यम्। अतो जनस्थानरक्षिणः समानेतव्या इति भावः ॥ १८–२० ॥ अयोध्यामिति। उद्युक्ताः सावधानाः, जनपदपीडामकुर्वन्त इत्यर्थः ॥ २१–२३ ॥

मंशं परिकल्प्येत्यर्थः ॥ ११–१५ ॥ यत्तु कार्यमिति। अधर्मभीरुणेति छेदः ॥ १६॥१७ ॥ न त्वां धर्षयितुं शक्ताः, त्वयि मत्प्रसादादिति भावः ॥ १८ ॥ अभ्यनुज्ञातुमिच्छामि, भवद्भिरिति शेषः ॥ १९–२१ ॥ अभिषेकार्द्रं त्वां दृष्ट्वा तथैव सर्वेषामस्माकं मातरं कौसल्यामभिवाद्य च ॥ २२ ॥ २३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रियात्प्रियतरमिति । सीतालाभः प्रियम्, भरतदर्शनं प्रियात्प्रियम्, भवद्भिः सह पुरप्रवेशः प्रियात्प्रियतरमित्यर्थः॥२४॥२५॥ तत इति । शीघ्रं शीघ्रग मिति विमानविशेषणम् । त्वरन्निति सुग्रीवविशेषणात्॥२६॥आसनं वाहनम्॥२७॥ ययाविति । हंसयुक्तेन प्रतिमारूपहंसयुक्तेन । प्रतीतः श्लाघितः॥२८॥

एवमुक्तस्तु धर्मात्मा वानरैः सविभीषणैः । अब्रवीद्राघवः श्रीमान् ससुग्रीवविभीषणान् ॥ २३ ॥ प्रियात् प्रिय तरं लब्धं यदहं ससुहृज्जनः । सर्वैर्भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥ २४ ॥ क्षिप्रमारोह सुग्रीव विमानं वानरैः सह । त्वमप्यारोह सामात्यो राक्षसेन्द्र विभीषण ॥ २५ ॥ ततस्तत् पुष्पकं दिव्यं सुग्रीवः सह सेनया । अध्यारोहत्त्वरन् शीघ्रं सामात्यश्च विभीषणः ॥ २६ ॥ तेष्वारूढेषु सर्वेषु कौबेरं परमासनम् । राघवेणाभ्यनुज्ञात मुत्पपात विहायसम् ॥ २७ ॥ ययौ तेन विमानेन हंसयुक्तेन भास्वता । प्रहृष्टश्च प्रतीतश्च बभौ रामः कुबेरवत् ॥ २८ ॥ ते सर्वे वानरा हृष्टा राक्षसाश्च महाबलाः । यथासुखमसम्बाधं दिव्ये तस्मिन्नुपाविशन् ॥ २९ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

ते सर्व इति । यथासुखमसम्बाधमिति पदद्वयेन दिव्यस्य पुष्पकस्य अपेक्षितावकाशप्रदत्वं गम्यते॥२९॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५ ॥

प्रियादिति । प्रियात्प्रियतरं कृतकृत्यस्य ममायोध्याप्रवेशः प्रियम्, तत्र स्वजनैः भरतादिभिः सहितो भवद्भिस्सह अभिषेकप्रीतिमनुभविष्यामीत्येतत्ततोऽपि प्रियतरमित्यर्थः ॥ २४-२७ ॥ हंसयुक्तेन अत्र हंसशब्देन हंसवद्ब्रह्मवाहकत्वाकारेण निर्मिता हंसा उच्यन्ते । प्रहृष्टः हृष्टरोमा । प्रतीतः प्रहृष्टचेताः ॥ २८ ॥ असंबाधमित्यनेन विमानस्य वैपुल्यमुक्तम् ॥२९॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायां पञ्चविंशत्युत्तरशततमः सर्गः ॥ १२५॥ ॥३५८॥

स०—खगतेन विमानेन इति पाठः । खगतेन आकाशगतेन । हंसयुक्तेन वाहकत्वेन निर्मितहंसप्रतिमायुक्तेन । सुन्दरकाण्डे राक्षसपिशाचादीनां तद्वाहकोक्तिस्तु लीलया रावणनियुक्तराक्षसादीनपेक्ष्य । वस्तुतस्तु तद्विमानदेवस्यैव तादृशशक्तिमत्त्वेन स्वेच्छयैवान्यनिरपेक्षेण गतिरिति ज्ञेयम् । प्रतीतः प्रसिद्धः ॥ २८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथ विलासेन सीतायै तत्तद्देशप्रदर्शनम्—अनुज्ञातं त्वित्यादि ॥ १॥ पातयित्वेति । मैथिलीं, राजपुत्रीत्वेन लालनीयत्वोक्तिः ॥ २ ॥ ३ ॥ एतदिति । आयोधनं युद्धभूमिम् । विशस्यन्तेऽस्मिन्निति विशसनम् । अधिकरणे ल्युट् ॥ ४ ॥ अत्रेति । दत्तवरः ब्रह्मणा दत्तवरः । प्रमाथी हिंसकः । शेते भस्म स्वरूपेणेत्यर्थः ॥ ५ ॥ रामानु०—अत्र दत्तवरः शेते इति पाठः । शेते अशयिष्ट ॥ ५ ॥ कुम्भकर्ण इति । प्रहस्तश्चेत्यत्र नीलेनेत्यध्याहार्यम् ॥ ६ ॥ विद्युन्मालीति ।

अनुज्ञातं तु रामेण तद्विमानमनुत्तमम् । उत्पपात महामेघः श्वसनेनोद्धतो यथा ॥ १॥ पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः । अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम् ॥ २ ॥ कैलासशिखराकारे त्रिकूटशिखरे स्थिताम् । लङ्कामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा ॥ ३ ॥ एतदायोधनं पश्य मांसशोणितकर्दमम् । हरीणां राक्षसानां च सीते विशसनं महत् ॥ ४ ॥ अत्र दत्तवरः शेते प्रमाथी राक्षसेश्वरः । तव हेतोर्विशालाक्षि रावणो निहतो मया॥५॥ कुम्भकर्णोऽत्र निहतः प्रहस्तश्च निशाचरः । धूम्राक्षश्चात्र निहतो वानरेण हनूमता ॥ ६ ॥ विद्युन्माली हतश्चात्र सुषेणेन महात्मना ॥ ७ ॥ लक्ष्मणेनेन्द्रजिच्चात्र रावणिर्निहतो रणे । अङ्गदेनात्र निहतो विकटो नाम राक्षसः ॥ ८ ॥ विरूपाक्षश्च दुर्धर्षो महापार्श्वमहोदरौ । अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः ॥ ९ ॥ अत्र मण्डोदरी नाम भार्या तं पर्यदेवयत् । सपत्नीनां सहस्रेण सास्रेण परिवारिता ॥ १०॥ एतत्तु दृश्यते तीर्थं समुद्रस्य वरानने । यत्र सागरमुत्तीर्य तां रात्रिमुषिता वयम् ॥ ११ ॥

पूर्वमनुक्तमपि अत्रानुवादात् ग्राह्यम् । एवं विकट इत्यत्रापि ॥ ७–१० ॥ रामानु०—अङ्गदेनात्र निहतो विकटो नाम राक्षसः इत्यनुक्तस्य विकटस्यात्र निहतत्वानुवादादन्येऽप्येतादृशा बहवो निहता इत्यवगम्यते ॥ ८ ॥ एतत्त्विति । तीर्थम् उत्तरणस्थानम् । यत्र तीर्थे । तां रात्रिं सागरतरणरात्रिम् ॥ ११ ॥

॥ १ ॥ पातयित्वा सञ्चार्य ॥ २ ॥ ३ ॥ आयोधनं युद्धस्थानम् । विशसनं विशसनवत् ॥ ४ ॥ दत्तवरः प्राप्तवरः रावणो मया निहतः शेते भस्मास्थिरूपेण वर्तते ॥ ५–७ ॥ अङ्गदेन विकटो हत इत्यनुवादात्तदपि जातमिति बोध्यम् ॥ ८–१० ॥ एतत्त्विति । यत्र तीर्थप्रदेशे तां रात्रिं यस्यामुत्तीर्णः सागरः तत्सम्बन्धिनीं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एष इति । सागरे सगरखानिते । सलिलेति क्षीरोदादिव्यावृत्तिः । एष सेतुः नलसेतुः नलबद्धः । "षिञ् बन्धने" इति धातुः । एतेन नलसेतुः सेतुरित्युक्त्या पूर्वकल्पकृतसेत्वन्तरं व्यावर्त्यते इति प्रत्युक्तम् । पूर्वमेव सेतुसत्त्वे पुनः सेतुकरणवैयर्थ्यात् ॥ १२ ॥ पश्येति । अपारं मध्ये द्वीपभूतपाररहितम् ॥ १३ ॥
रामानु०--शङ्खशुक्तिनिषेवितमित्यतः परं हिरण्यनाभमिति श्लोकः । अतः परम् एतत्कुक्षाविति श्लोकः । अतः परं सेतुबन्ध इति श्लोकः । अतः परम् अत्र पूर्वं महादेवः प्रसादमकरोद्विभुः

एष सेतुर्मया बद्धः सागरे सलिलार्णवे । तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः ॥ १२ ॥ पश्य सागरमक्षोभ्यं वैदेहि वरुणालयम् । अपारमभिगर्जन्तं शङ्खशुक्तिनिषेवितम् ॥ १३ ॥ हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि । विश्रमार्थं हनुमतो भित्त्वा सागरमुत्थितम् ॥ १४ ॥ एतत् कुक्षौ समुद्रस्य स्कन्धावारनिवेशनम् ॥ १५ ॥ एतत्तु दृश्यते तीर्थं सागरस्य महात्मनः । सेतुबन्ध इति ख्यातं त्रैलोक्येनाभिपूजितम् । एतत् पवित्रं परमं महापातकनाशनम् ॥ १६ ॥ अत्र पूर्वं महादेवः प्रसादमकरोत् प्रभुः ॥ १७ ॥

इत्येवं पाठक्रमः ॥ १३ ॥ हिरण्येति । हिरण्यनाभं मैनाकम् ॥ १४ ॥ एतदित्यर्धम् । कुक्षौ मध्ये । सेतूपरीति शेषः । स्कन्धावारनिवेशनं स्कन्धावारनिवेशनरूपस्थानम् । स्कन्धावारः शिबिरम् ॥ १५ ॥ एतत्त्वित्यादिसार्धश्लोकमेकं वाक्यम् । पूजितं पूजितुमर्हम् । पूर्वं सेतोर्दक्षिणकोटिरुक्ता, अत्रोत्तरकोटिरिति ज्ञेयम् । अनुगृह्णाति-एतदिति । पवित्रं पावनम्, महापातकनाशनं च, भविष्यतीति शेषः ॥ १६ ॥ एवं लङ्कामारभ्य सेतुबन्धपर्यन्तमुक्त्वा ततः उत्तरे दर्भशयनस्थानं निर्दिशति-अत्र पूर्वमिति । महादेव इति समुद्रराज उच्यते, औचित्यात् । प्रभुः समुद्रजलाधिष्ठाता । प्रसाद
रात्रिम् ॥ ११ ॥ एषः नलसेतुः सेतुनिर्माणे नलः कारणमिति कथनार्थं नलसेतुरित्युक्तम् ॥ १२ ॥ १३ ॥ हिरण्यनाभं हिरण्यनाभनामानं मैनाकम् ॥ १४ ॥ कुक्षौ मध्यप्रदेशे । स्कन्धावारनिवेशनं सेनानिवासस्थानम् ॥ १५ ॥ एतदिति । तीर्थं पुण्यक्षेत्रम् । सेतुबन्ध इति ख्यातं सेतुनिर्माणमूलपदेशत्वात्सेतुबन्ध इति प्रसिद्धम् ॥ १६ ॥ अत्र पूर्वमिति । महादेवः महदिति जलं तद्रूपो देवः महादेवः समुद्रः । तथा च वैजयन्ती-" स्नेहं स्निह्यं महच्छुद्धं वारुणं सर्वतोमुखम् " इति । यद्वा ॥३५९॥
स०-अत्र तीरे । पूर्वं सेतुबन्धप्रारम्भसमये महादेवः पूजितस्सन् प्रसादं निर्विघ्नं सेतुसमाप्तिशत्रुवधाद्युपयोग्यनुग्रहम् अकरोत् । तत्स्थलं सीतायै प्रदर्श्य विमानादवतीर्य तत्र लिङ्गस्थापनं रामश्चकार । क्षेत्रस्य त्रैनेत्रत्वात्प्राक्तनप्रार्थना युक्ता । अतः पूर्वमित्युक्तिरनुग्रहमात्रविषयिणी । नतु प्रतिष्ठापनपरेति मन्तव्यम् । यथोक्तमाग्नेयपुराणे एकोत्तराशीत्यध्याये-" धन्योऽस्मि कृतकृत्योऽस्मि पूज्योऽस्मि पुरुषोत्तम । यद् द्राक्षं सुदुर्दर्शं त्वद्रूपं योगिपुङ्गवैः ॥ त्वदाज्ञया मया पूर्वं त्वद्भक्तिविमुखं हरे । शैवं पाशुपतं लैङ्गमसच्छास्त्रं प्रवर्तितम् ॥ तदिदानीं महापापं दिव्यरूपस्य दर्शनात् । सर्वं विनष्टमेवेश तव राम प्रसादतः ॥ ततेयमेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मकरोत् 'सागरं शोषयिष्यामि' इति कुपितस्य मे प्रसादं प्रसन्नत्वम् अकरोत् । "प्रसादस्तु प्रसन्नता" इत्यमरः । न त्वत्र रुद्रो महादेवः । तेन पूर्वं प्रसादकरणानुक्तेः । पूर्वोक्तानामेव ह्यत्रानुवादः कृतः । न चाङ्गदेन विकटनिरसनस्य पूर्वमनुक्तत्वेऽपि यथाऽनुवादात्तत्सिद्धिः तथाऽत्रापि भविष्यतीति वाच्यम्, तद्वदत्राविरोधाभावात् । उपलभ्यते हि विरोधः । तथाहि—तत्र प्रसादः किं सेतुनिर्माणकाले वा, पुनरागमनकाले वा ? नाद्यः—प्रसादकरणहेतुरावणवधादेरभावात्, पूर्वसिद्धसमुद्रप्रसादेनैवोपपत्तेश्च, महादेवसमाख्यायाः समुद्रप्रसादश्रुत्या बाधितुं युक्तत्वाच्च । न द्वितीयः पूर्वशब्दविरोधात् । न च पूर्वमित्यस्य पूर्वकल्प इत्यर्थ इति वाच्यम्, "आत्मानं मानुषं मन्ये" इति वदता सुग्रीवादिसन्निधौ स्वस्य विष्ण्ववतारत्व द्योतकपूर्ववृत्तोद्घाटनानौचित्यात् । पूर्वकल्पकृतसेतुसद्भावे पुनस्तन्निर्माणवैयर्थ्यात् । किं च अत्रेतिपदस्य पूर्वश्लोकोक्तनलकारितसेतुपरामर्शित्वमेवोचितम्, न तु पूर्वकल्पकृतसेतुपरामर्शित्वम् । तस्य सद्भावेऽप्यन्तरितत्वसम्भवात् । ननु पुराणान्तरानुसारात्तदर्थपरत्वं युक्तम् । तथा हि कूर्मपुराणे—"सेतुमध्ये महादेवमीशानं कृत्तिवाससम् । स्थापयामास वै लिङ्गं पूजयामास राघवः ॥ तस्य देवो महादेवः पार्वत्या सह शङ्करः । प्रत्यक्षमेव भगवान् दत्तवान् वरमुत्तमम् ॥ ये त्वया स्थापितं लिङ्गं द्रक्ष्यन्तीह द्विजातयः । महापातकसंयुक्तास्तेषां पापं विनश्यति ॥ अन्यानि चैव पापानि तीरे तत्र महादेवाष्टमूर्तिष्वन्यतमत्वान्महादेवशब्देन समुद्र एवोच्यते । पूर्वं सेतुबन्धात्पूर्वम् । प्रसादमकरोत् जलोपरि सेतुधारणरूपं प्रसादमकरोत् । यद्वा प्रसादं सन्निधानरूपम् । "दर्शयामास चात्मानं समुद्रः सरितां पतिः" इत्युक्तत्वान्महादेवः समुद्र एव । अपारमभिगर्जन्तं शङ्खशुक्तिनिषेवितम् इत्यतः परं हिरण्यनाभमिति

स्नानाशं त्वन्नामस्मरणादहम् । तथा अनुगृहाण त्वं यथा स्यात्सन्ततं स्मृतिः ॥ रामः—रावणोऽयं महापापी गोब्राह्मणवधे रतः । नित्यं वै परदारार्थी वैदिकाचारदूषकः ॥ एतद्ब्रह्महत्यापापात्सकलापार्थे यदत्र प्रतिपद्यते । तदत्र सर्वतीर्थेषु स्नानेनापि न नश्यति ॥ अब्रह्मण्यस्य लुब्धस्य मूर्खस्याशास्त्रवेदिनः । भूमिराकम्प्यते येन सोऽपि स्यात्तादृशः क्षणात् ॥ स्वर्गेदेशं कृतयुगे त्रेतायां गृहमेव च । द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे ॥ एतद्देशविशुद्ध्यर्थमत्र सन्निहितस्सदा । मयाऽत्र स्थापिते लिङ्गे भुक्तिमुक्तिप्रदो भव ॥ श्रीकृष्णः—इति रामस्य सद्वाक्यं श्रुत्वा तत्त्वार्थसंयुतम् । कृताञ्जलिर्गिरीशोऽपि प्रहसन्परमेश्वरः ॥ श्रीमहादेवः—सर्वभक्तसर्वभूतस्थः सर्वात्मा सर्ववत्सलः । त्वमेव राम विश्वात्मन् विडम्बयसि लीलया ॥ त्वद्वाक्यमेव भाव्यं मे लगात्वार्गं महाविभो । यदुक्तं तत्तथैवास्तु त्वन्नाम्ना स्थापयेह माम् ॥ इत्युक्त्वा तं परिक्रम्य प्रणम्याथ ययौ हरः । सर्वे पश्यन्ति ये लिङ्गं रामनाथ इति श्रुतम् । ततः संसारिणो न स्युः सत्यं सत्यं वदाम्यहम् ॥ सेतुबन्धस्थितं लिङ्गं ये सेवन्ते सकृत्कलौ । महापातकलक्षाद्वा मुच्यते नात्र संशयः ॥ कुरुक्षेत्रे यजेद्यज्ञानश्वमेधादिकान्कृतम् । यत्फलं लभते तत् सेतुलिङ्गस्य दर्शनात् ॥ अमद्यपाश्यसमिद्धाग्नी योऽनग्निरमक्षो गृही । यो वनी च रिरंसुः स्यात् यतिर्योऽभिक्षुभुग्भवेत् ॥ एते सर्वे च पापिष्ठा दम्भात्स्वाश्रमदूषकाः । दृष्ट्वा रामेश्वरं लिङ्गं सद्यः पूता भवन्ति हि ॥ कावेर्यां तु तुलास्नानं यः कुर्याद्ब्रह्मसन्निधौ । भवेत्तस्य कृतार्थस्य रामेश्वरनिरीक्षणम् ॥" इत्यादि । कूर्मपुराणे चैकोनत्रिंशेऽध्याये—"सेतुमध्ये महादेवमीशानं कृत्तिवाससम् । स्थापयामास लिङ्गस्थं पूजयामास राघवः ॥ तस्य देवो महादेवः पार्वत्या सह शङ्करः । प्रत्यक्षमेव भगवान् दत्तवान् वरमुत्तमम् ॥ ये त्वया स्थापितं लिङ्गं द्रक्ष्यन्तीह द्विजातयः । महापातकसंयुक्तास्तेषां पापं विनश्यतु ॥ अन्यानि चैव पापानि स्नातस्यात्र महोदधौ ॥ दर्शनादेव लिङ्गस्य नाशं यान्ति न संशयः । यावत्स्थास्यन्ति गिरयो यावदेव च मेदिनी । यावत्सेतुश्च तावच्च स्थास्याम्यत्र तिरोहितः ॥ स्नानं दानं तपः श्राद्धं सर्वमत्राक्षयं महत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

महोदधेः । दर्शनादेव लिङ्गस्य नाशं यान्ति न संशयः ॥ यावत्स्थास्यन्ति तरवो यावदेव च मेदिनी । यावत्सेतुश्च तावच्च स्थास्याम्यत्र तिरोहितः ॥ स्नानं दानं जपः श्राद्धं भविष्यत्यक्षयं ततः । स्मरणादेव लिङ्गस्य दिनपापं प्रणश्यति ॥ इत्युक्त्वा भगवान् वाचं परिष्वज्य च राघवम् । सनन्दी सगणो रुद्रस्तत्रैवान्तरधीयत ॥" इति । पाद्मे पुराणेऽपि रामः पुष्पकादवरुह्य महादेवं प्रतिष्ठापितवान्, सोऽस्मै प्रसन्नोऽभूदित्युच्यते । एतादृशपुराणवचनानुसारेणायं श्लोको लिङ्गप्रतिष्ठां बोधयतीति । मैवम्–उक्तदोषाविस्तारात्, इतिहासो हि परिग्रहातिशयात्, ग्रन्थसौष्ठवाच्च "इतिहासपुराणं पञ्चमम्" इत्यादौ

श्लोकः । अतः परम् एतत्तु कुक्षौ इति श्लोकः । अतः परम् सेतुबन्ध इति श्लोकः । अतः परम् अत्र पूर्वं महादेवः इति श्लोकः । एवं पाठक्रमः ॥ १७ ॥ १८ ॥

स्मरणादेव लिङ्गस्य दिनपापं प्रणश्यति ॥ इत्युक्त्वा भगवान् साक्षात्परिष्वज्य च राघवम् । सनन्दी सगणो रुद्रस्तत्रैवान्तरधीयत ॥ " इति । स्कान्दे सेतुमाहात्म्ये त्रिचत्वारिंशोऽध्याये–"रावणस्य सदा विप्रा यत्पापं मयि विद्यते । तस्य मे निष्कृतिं ब्रूत रावणस्य वधस्य च । यत्कृत्वा तेन पापेन मुच्येयं मुनिपुङ्गवाः ॥ मुनय ऊचुः–सत्यव्रत जगन्नाथ जगद्रक्षाधुरन्धर । सर्वलोकोपकारार्थं कुरु राम शिवार्चनम् ॥ गन्धमादनशृङ्गेऽस्मिन्महापुण्ये विमुक्तिदे । शिवलिङ्गं प्रतिष्ठाप्य लोकसंग्रहकाम्यया । कुरु राम दशग्रीववधदोषापनुत्तये ॥ लिङ्गस्थापनजं पुण्यं चतुर्वक्त्रोऽपि भाषितुम् । न शक्नोति स तैर्वक्तुं किमुनर्मनुजेश्वराः ॥" इत्यारभ्य मध्ये हनुमत्प्रेषणादिप्रकारमुक्त्वा सुमुहूर्ते किञ्चिदवकाशमासादयति हनूमति चिरायति च " राम राम महाबाहो कालो याति हि साम्प्रतम् । जानक्या यत्कृतं लिङ्गं सैकतं लीलया विभो । तल्लिङ्गं स्थापयस्वाद्य महालिङ्गमनुत्तमम् ॥ इत्येवं सहितो रामः सीतया सह सत्वरम् । मुनिभिः सहितः प्रीत्या कृतकौतुकमङ्गलः ॥ ज्येष्ठमासे सिते पक्षे सप्तम्यां बुधहस्तयोः । होरान्ते च व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥ दशयोगे महापुण्ये गन्धमादनपर्वते । सेतुमध्ये महादेवं लिङ्गरूपधरं हरम् ॥ ईशानं कृत्तिवसनं गङ्गाचन्द्रकलाधरम् । रामो वै स्थापयामास शिवलिङ्गमनुत्तमम् ॥ लिङ्गस्थं पूजयामास राघवस्तं स ईश्वरम् । लिङ्गस्थः स महादेवः पार्वत्या सह शंकरः । प्रत्यक्षमेव भगवान् दत्तवान् वरमुत्तमम् ॥ सर्वलोकशरण्याय राघवाय महात्मने । त्वयाऽत्र स्थापितं लिङ्गं ये पश्यन्ति रघूद्वह ॥ महापातकयुक्ताश्च तेषां पापं प्रणश्यति । सर्वाण्यपि हि पापानि धनुष्कोटौ निमज्जनात् ॥ दर्शनाद्रामलिङ्गस्य पातकानि महान्त्यपि । विलयं यान्ति राजेन्द्र रामचन्द्र न संशयः । प्रादादेवं हि रामाय वरं पूर्णाय शङ्करः ॥ " इत्यादि । नागोजिभट्टस्तु पूर्वमागमनसमय एवाह भूतपतिप्रतिष्ठापनम् । 'अत्र सेतुमूले पूर्वं सेतुबन्धात्पूर्वं विभुर्महादेवः मम रामस्य प्रसादमकरोत् मत्स्थापितत्वेनात्र स्थितोऽभूत् । सेतोर्निर्विघ्नतासिद्ध्यै समुद्रप्रसादानन्तरं शिवस्थापनं रामेण कृतमिति गम्यते । अत्र स्थले महात्मनः सागरस्य तीर्थं सेतुनिर्माणमूलप्रदेशत्वात्सेतुबन्ध इति ख्यातं भविष्यतीति शेषः । ' इति । इदं तु पुराणानवलोकनमूलमित्युपेक्ष्यम् । तीर्थस्तु–' महदिति जलम्, तद्रूपी देवो महादेवः समुद्रः । तदाह वैजयन्ती–" गम्भीरं गहनं रत्नं गह्वरं शरणं वपुः । स्नेहः स्निग्धं महच्छुद्धं दारुणं सर्वतोमुखम् । पातालं स्वादु दिव्यं च तानि पञ्चदशाप्सु च । " इति । यद्वा महादेवमूर्तिरूपान्यतमत्वात्समुद्रस्य महादेवशब्देनात्र समुद्र एवोच्यते । पूर्वं सेतुबन्धात्पूर्वम् । प्रसादमकरोत् जलोपरि सेतुधारणरूपमकरोत् । यद्वा प्रसादं स्वसंनिधानरूपम् " दर्शयामास चात्मानं समुद्रः सरितां पतिः" इत्युक्तत्वात् महादेवः समुद्र एव' इति व्याचख्यौ । सोऽपि तद्वन्मानर्हीयः । केचित्तु–अत्रपूर्वं अत्रपु त्रपुभिन्नं त्रपुतदन्यत् सुवर्णं तद्वर्णो कुरू यस्याः सा तथा तत्संबुद्धिः, हे सीते ! अम्महादेवो वरुण इति व्याचक्षाणा नोदाहृतवैजयन्त्यवलोकाद्वाम्महादेव इत्येकपदोपरि परिदर्शितसाहसा उदाहृतबहुपुराणश्रवणविकला दुराग्रहग्रहगृहीतास्ततोऽप्यवभवकरुणकरुणापात्रतां सोढवाति राघवस्य सदाशिवप्रसादं स्वरसतः पदपदार्थातमवधूय विधुशेखरमवमन्यन्त इत्युपेक्ष्याः । " यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् । सेशं पुनात्यखिलमिदं यद्दर्शनाम्भः सद्यः पुनाति सहचन्द्रललामलोकान् ॥ " इत्यादिभागवतादुदाहृतपुराणेषु च " लोकसंग्रहकाम्यया " इत्याद्युक्तेश्च लीलेयं राघवस्येति सर्वं चतुरस्रम् ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अधिकाक्षरत्वेऽपि पूर्वप्रयोगेणाभ्यर्हितत्वाच्च पुराणेभ्यो गरीयानिति "वेदः प्राचेतसादासीत्" इति वेदमयत्वोक्त्या चतुर्मुखवरप्रदानमूलतया च प्रबलतरः। तद्विरोधे तामसपुराणवचनानि न प्रमाणानि। किंच पुराणं सर्गप्रतिसर्गादिष्वन्यपरमिति नेतिहासवत् पुरावृत्तकथने तात्पर्यवत्। अथवा अस्मिन् सर्गे श्लोकाः प्रायशो व्यत्यस्ता दृश्यन्ते इत्युडारिप्रभृतिभिरुक्तम्। तथा चेदमर्धम् "अत्र मण्डोदरी" इति श्लोकानन्तरं पठितव्यम्। तत्र च महादेवप्रसादः

अत्र राक्षसराजोऽयमाजगाम विभीषणः ॥ १८ ॥ एषा सा दृश्यते सीते किष्किन्धा चित्रकानना । सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः ॥ १९ ॥ अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम् । अब्रवीत् प्रश्रितं वाक्यं रामं प्रणयसाध्वसा ॥२०॥ सुग्रीवप्रियभार्याभिस्ताराप्रमुखतो नृप । अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम् । गन्तुमिच्छे सहायोध्यां राजधानीं त्वयाऽनघ ॥ २१ ॥ एवमुक्तोऽथ वैदेह्या राघवः प्रत्युवाच ताम् । एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः । विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह ॥ २२ ॥ ब्रूहि वानर शार्दूल सर्वान् वानरपुङ्गवान् । स्वदारसहिताः सर्वे ह्ययोध्यां यान्तु सीतया ॥ २३ ॥

स्वपितृदर्शनमेव। अत एव भरतं प्रति हनुमत्प्रेषणावसरे वक्ष्यति–"महादेवप्रसादाच्च पित्रा मम समागमम्" इति। पुराणान्तरं तु माहात्म्यप्रतिपादनपरं बोध्यमिति संक्षेपः ॥ १७ ॥ अत्र राक्षसराज इति । अत्र समुद्रराजप्रसादप्रदेशादुत्तरतः ॥ १८ ॥ एषेति । पम्पावनमधुवनाद्यपेक्षया चित्रकाननेत्युक्तिः ॥ १९ ॥ अथेति । प्रणयसाध्वसा प्रणययुक्तसाध्वसवती । प्रणतसाध्वसेति पाठे–उपनतसाध्वसा । सुग्रीवादिसन्निधानात् प्रणयसाध्वसेति प्रथमभाषणरूपत्वाद्वा ॥ २० ॥ सुग्रीवेत्यादिसार्धश्लोक एकान्वयः । अहं ताराप्रमुखतः ताराप्रमुखाभिः सुग्रीवप्रियभार्याभिः सह अन्येषां वानरेन्द्राणां स्त्रीभिश्च परिवृता सती त्वया सह अयोध्यां गन्तुम् इच्छे इच्छामीति संबन्धः । आत्मनेपदमार्षम् ॥ २१ ॥ एवमित्यादिसार्धश्लोक एकान्वयः । एवमस्त्विति सीतां प्रत्युवाच। अथ किष्किन्धां प्राप्य विमानं संस्थाप्य सुग्रीवं प्रेक्ष्योवाचेति संबन्धः ॥२२॥ ब्रूहीति । यान्त्वित्यत्र इतिकरणं द्रष्टव्यम् ।

चित्रकानना मधुवनादिदिव्यकाननोपेता ॥१९॥ प्रणयसाध्वसा प्रणययुक्तसाध्वसा । प्रणतसाध्वसा इति पाठे–प्रणेतुमुपनेतुं प्राप्तं साध्वसं यया सा ॥ २० ॥ सुग्रीवेत्यादि । ताराप्रमुखतः ताराप्रमुखीभिः सुग्रीवप्रियभार्याभिस्सह अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता परिवारिता त्वया सह अयोध्यां गन्तुमिच्छामीति सम्बन्धः ॥ २१ ॥ २२ ॥ ब्रूहीत्यादिश्लोकद्वयमेकं वाक्यम् । यान्त्वित्यत्रेतिकरणं द्रष्टव्यम् । सर्वे सीतया हेतुभूतया सीताप्रियार्थमित्यर्थः । स्वदारसहितास्सन्तः ॥ २३–२६ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सीतया निमित्तभूतया, सीताप्रियार्थमित्यर्थः ॥२३॥ तथा त्वमपीति । अत्र याहीति विपरिणामेन संबन्धः । अभित्वरस्व । किष्किन्धायां विलम्बो न कार्य इत्यर्थः ॥२४॥ एवमुक्त इति । सर्वैः समावृतो वानराधिपतिरुक्तः इत्यन्वयः ॥ २५ ॥ प्रविश्येति । अर्धमेकं वाक्यम् । प्रवेशः सुग्रीवस्यैव, न तु वानराणाम् । भाषत अभाषत ॥२६॥ नारीभिः स्त्रीभिः सह अनुज्ञाता, अयोध्यागमनं प्रतीति शेषः । त्वं च वानरस्त्रियश्चानुज्ञाता इत्यर्थः । नारीणामिति

तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल । अभित्वरस्व सुग्रीव गच्छामः प्लवगेश्वर ॥ २४ ॥ एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा । वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः ॥२५॥ प्रविश्यान्तःपुरं शीघ्रं तारामुद्वीक्ष्य भाषत ॥ २६ ॥ प्रिये त्वं सह नारीभिर्वानराणां महात्मनाम् । राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया ॥ २७ ॥ त्वर त्वमभिगच्छामो गृह्य वानरयोषितः । अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः ॥२८॥ सुग्रीवस्य वचः श्रुत्वा तारा सर्वाङ्गशोभना । आहूय चाब्रवीत् सर्वा वानराणां तु योषितः ॥ २९ ॥ सुग्रीवेणाभ्यनुज्ञाता गन्तुं सर्वैश्च वानरैः । मम चापि प्रियं कार्यमयोध्यादर्शनेन च ॥ ३० ॥ प्रवेशं चापि रामस्य पौरजानपदैः सह । विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च ॥ ३१ ॥

पाठे तृतीयार्थे षष्ठी ॥२७॥ गृह्य गृहीत्वा, आनीयेति यावत् । दर्शयिष्यामः द्रक्ष्यामः । दशरथस्त्रियः दशरथस्त्रियश्च ॥ २८ ॥ सुग्रीवस्येति । सर्वाङ्गशोभनेत्यनेन पूर्वं स्वयमलंकृतवतीति गम्यते ॥२९॥ सुग्रीवेणेत्यादिश्लोकद्वयमेकान्वयम् । सुग्रीवेण सर्वैर्वानरैः स्वस्वभर्तृभिर्वानरैः सह, अयोध्यां गन्तुमभ्यनुज्ञाताः, यूयमिति शेषः । न केवलं सुग्रीवानुज्ञामात्रं मत्प्रियार्थं च भवतीभिरागन्तव्यमित्याह--मम चापीति । अयोध्यादर्शनेन मम यत्प्रियं तद्भवतीभिः सहागत्य कार्यमित्यर्थः । रामस्य प्रवेशं च दशरथस्य स्त्रीणां विभूतिम् ऐश्वर्यं च, द्रक्ष्याम इति शेषः ॥ ३० ॥ ३१ ॥ रामानु०--सुग्रीवेणाभ्यनुज्ञाताः, प्रिये इत्यादि । वानराणां नारीभिस्सह त्वम् अभ्यनुज्ञाता अतः वानरयोषितः गृह्य गच्छामः अयोध्यां दशरथस्त्रियश्च दर्शयिष्यामः द्रक्ष्यामः,-त्वमभि

For Private And Personal Use Only

वयमिति शेषः । वानरैश्चाभ्यनुज्ञाताः, यूयमिति शेषः । मम चापि प्रियं कार्यमयोध्यादर्शनेन चेत्यत्र भवतीभिरिति शेषः ॥ ३० ॥ तारयेत्याद्यर्धत्रयमेकान्वयम् । नेपथ्यम् अलङ्कारम् । विधिपूर्वेण मङ्गलालम्भनादिविधिपूर्वकमित्यर्थः । अत्रालङ्करणाह्वानादिना दिनमेकं गतमित्याहुः । प्रदक्षिणं कृत्वा, विमानस्येति शेषः । प्रादक्षिण्येन गमनमात्रमत्र विवक्षितम् । अतिविपुलस्य तस्य सद्यः प्रदक्षिणासम्भवात् ॥ ३२ ॥ ताभिरिति । उत्थितमित्यनेन तारागमनपर्यन्तं भूमौ

तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः । नेपथ्यं विधिपूर्वेण कृत्वा चापि प्रदक्षिणम् । अभ्यारोहन् विमानं तत्
सीतादर्शनकाङ्क्षया ॥ ३२ ॥ ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः । ऋश्यमूकसमीपे तु वैदेहीं पुनरब्रवीत्
॥ ३३ ॥ दृश्यतेऽसौ महान् सीते सविद्युदिव तोयदः । ऋश्यमूको गिरिश्रेष्ठः काञ्चनैर्धातुभिर्वृतः ॥३४॥ अत्राहं
वानरेन्द्रेण सुग्रीवेण समागतः । समयश्च कृतः सीते वधार्थं वालिनो मया ॥३५॥ एषा सा दृश्यते पम्पा नलिनी
चित्रकानना । त्वया विहीनो यत्राहं विललाप सुदुःखितः । अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी ॥ ३६ ॥
अत्र योजनबाहुश्च कबन्धो निहतो मया ॥ ३७ ॥ दृश्यते च जनस्थाने सीते श्रीमान् वनस्पतिः । यत्र युद्धं महद्वृत्तं
तव हेतोर्विलासिनि । रावणस्य नृशंसस्य जटायोश्च महात्मनः ॥ ३८ ॥

विमानं स्थितमिति ज्ञायते ॥ ३३ ॥ ३४ ॥ समयः सङ्केतः ॥ ३५ ॥ विललाप । लिङ्व्यत्ययैकवचनम् ॥ ३६ ॥ ३७ ॥ दृश्यते चेत्यादिसार्धश्लोक

त्वरेति सम्बन्धः ॥ २७–३२ ॥ ताभिरिति । ताभिस्सहोत्थितमित्यनेन चतुर्थ्यां किष्किन्धायामुषित्वा पञ्चम्यां ततः प्रस्थानमित्यवगम्यते । उपरि पञ्चम्यां भरद्वाजाश्रमप्रवेशस्य वक्ष्यमाणत्वात् ॥ ३३–३५ ॥ एषेति । नलिनी पद्मिनी । विललाप व्यलपम् ॥ ३६ ॥ ३७ ॥ वनस्पतिः जटायुनिवासभूतो न्यग्रोधः ।

स०–अभ्यारोहन् । ननु पूर्वं रामस्य नागपाशबन्धनसमये रावणेनार्थं विमानेनानीतां सीतां प्रति तत्र पतिश्चेत् जीवति तर्हि नेदं विमानं त्वां वहेदिति सरमावाक्येन पुष्पकस्याविधवावाहकत्वनियमोऽस्याः कथमत्र ताराया विमानारोहणमिति चेत् ? उच्यते–सरमावाक्यं न सीताया विवक्षान्वयस्फुरणे विधवाया आरोहनिषेधपरम्, किन्तु दृश्यमानरामस्य मरणे तवाशुचित्वेन नेदं त्वामावहेदित्येवंपरम् । यद्वा उक्तनियमाङ्गीकारेऽपि न क्षतिः । तारया रामवाक्यात्सुग्रीवपतिकत्वेन वा विमानारोहसम्भवात् । " पुत्रिण्यविधवा " इति स्मृतेः पुत्रेण वा तस्याः अविधवात्वं बोध्यम् ॥ ३२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मेकं वाक्यम् । श्रीमान् वनस्पतिः जटायुनिवासभूतो वटः । तस्य श्रीमत्त्वं महात्मना जटायुषाऽधिष्ठितत्वात् ॥ ३८ ॥ खरश्चेत्यादिसार्धश्लोक एकान्वयः । तत् पञ्चवटीति प्रसिद्धम् ॥ ३९ ॥ ४० ॥ एषा गोदावरीति । अयमेव पाठः सम्यक् । एषा मन्दाकिनीति पाठे-अगस्त्याश्रमसमीपे मन्दाकिनीतिं काचिन्नद्यस्तीति ज्ञेयम् । एतच्छ्लोकात्पूर्वं पर्णशालेति श्लोकः पठनीयः ॥ ४१ ॥ रामानु०-एषा गोदावरी रम्येति पाठः सम्यक् । एषा मन्दाकिनीति पाठे अग

खरश्च निहतो यत्र दूषणश्च निपातितः। त्रिशिराश्च महावीर्यो मया बाणैराजिह्मगैः । एतत्तदाश्रमपदमस्माकं वरवर्णिनि ॥ ३९ ॥ पर्णशाला तथा चित्रा दृश्यते शुभदर्शना। यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात् ॥ ४० ॥ एषा गोदावरी रम्या प्रसन्नसलिला शिवा। अगस्त्यस्याश्रमो ह्येष दृश्यते पश्य मैथिलि ॥ ४१ ॥ दीप्तश्चैवाश्रमो ह्येष सुतीक्ष्णस्य महात्मनः ॥ ४२ ॥ वैदेहि दृश्यते चात्र शरभङ्गाश्रमो महान् । उपयातः सहस्राक्षो यत्र शक्रः पुरन्दरः ॥ ४३ ॥ अस्मिन् देशे महाकायो विराधो निहतो मया ॥ ४४ ॥ एते हि तापसावासा दृश्यन्ते तनुमध्यमे। अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरप्रभः । अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी ॥ ४५ ॥ असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रकाशते। यत्र मां केकयीपुत्रः प्रसादयितुमागतः ॥ ४६ ॥ एषा सा यमुना दूराद्दृश्यते चित्रकानना ॥ ४७ ॥ भरद्वाजाश्रमो यत्र श्रीमानेष प्रकाशते ॥ ४८ ॥ एषा त्रिपथगा गङ्गा दृश्यते वरवर्णिनि । नानाद्विजगणाकीर्णा सम्प्रपुष्पितकानना ॥ ४९ ॥ शृङ्गिवेरपुरं चैतद् गुहो यत्र समागतः ॥ ५० ॥

स्त्याश्रमसमीपे मन्दाकिनीसंज्ञा काचिन्नद्यस्तीत्यवगन्तव्यम् ॥ ४१ ॥ दीप्तश्चेत्यर्धम् ॥ ४२ ॥ वैदेहीति । पुराणि शत्रुशरीराणि शत्रुपुराणि वा दारयतीति पुरन्दरः ॥ ४३ ॥ अस्मिन्देश इत्यर्धम् ॥ ४४ ॥ एते हीत्यादिसार्धश्लोक एकान्वयः । तापसावासाः, अस्माभिर्दश वर्षाणि यत्रोषितमिति भावः । तापसी अनसूया ॥ ४५ ॥ ४६ ॥ एषा सेत्यर्धम्॥ ४७ ॥ भरद्वाजेत्यर्धम् । यत्र भरद्वाजाश्रमः, पूर्वं दृष्ट इति शेषः । श्रीमान् एष प्रदेशः प्रकाशते । अदूरवर्तितया सम्यक् दृश्यते ॥ ४८ ॥ एषा त्रिपथगेति । वरवर्णिनीति सीतासम्बोधनम् ॥ ४९ ॥ शृङ्गिवेरपुरमित्यर्धम् । यत्र गुहः समागतः तच्छृङ्गिवेर

यत्र वनस्पतिसमीपे ॥३८-४१॥ दीप्तश्चेति । वैदेहि दृश्यते इत्युत्तरेण सम्बन्धः । पुरन्दरः पुराणि शत्रुशरीराणि शत्रुपुराणि वा दारयतीति तथा ॥४२-४४॥ तापसी

For Private And Personal Use Only

पुरम् एतादित्यन्वयः ॥ ५० ॥ एषा सेति । यूपमालिनी इक्ष्वाकुभिस्तीरे यागानन्तरं कीर्त्यर्थं शिलाभिः कृतयूपवतीत्यर्थः ॥ ५१ ॥ एषा सेति । अयोध्यामिति, उद्दिश्येति शेषः । विमानस्याकाशगतत्वेन दूरस्था अपि गङ्गाशृङ्गिबेरपुरसरय्वयोध्या दृष्टा इति बोध्यम् । भरद्वाजाश्रमे हि तदा

एषा सा दृश्यते सीते सरयूर्यूपमालिनी । नानातरुशताकीर्णा सम्प्रपुष्पितकानना ॥ ५१ ॥ एषा सा दृश्यते ऽयोध्या राजधानी पितुर्मम । अयोध्यां कुरु वैदेहि प्रणामं पुनरागता ॥ ५२ ॥ ततस्ते वानराः सर्वे राक्षसश्च विभीषणः । उत्पत्योत्पत्य ददृशुस्तां पुरीं शुभदर्शनाम् ॥ ५३ ॥ ततस्तु तां पाण्डुरहर्म्यमालिनीं विशाल कक्ष्यां गजवाजिसङ्कुलाम् । पुरीमयोध्यां ददृशुः प्लवङ्गमाः पुरीं महेन्द्रस्य यथाऽमरावतीम् ॥ ५४ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥

पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः । भरद्वाजाश्रमं प्राप्य ववन्दे नियतो मुनिम् ॥ १ ॥

स्थितिः ॥ ५२ ॥ ५३ ॥ ततस्त्विति । पाण्डुरेत्यादिस्वभावोक्तिः ॥ ५४ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्ध काण्डव्याख्याने षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥ अथ भरद्वाजाश्रमवासः–पूर्ण इति । पूर्णे, चैत्रशुद्धपञ्चम्यामयोध्यातो निर्गमनम् । तदारभ्य चतुर्दशवर्षे पूर्णे सति पञ्चम्यां चैत्रशुद्धपञ्चम्याम । तथा हि–चैत्रशुद्धपञ्चम्यां निर्गमः । तद्रात्र्यां तमसातीरे निवासः । षष्ठ्यां शृङ्गिबेरपुरे । सप्तम्यां वन स्पतिमूले । अष्टम्यां भरद्वाजाश्रमे । नवम्यां यमुनातीरे । दशम्यां रामश्चित्रकूटं गमिष्यतीति गुहचारमुखेन विदितवृत्तान्तस्य सुमन्त्रस्य सायाह्ने अयोध्या

अनसूया ॥ ४५–५१ ॥ एषेति । प्रणामम्, अयोध्यां प्रतीति शेषः ॥ ५२–५४ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्ड व्याख्यायां षड्विंशत्युत्तरशततमः सर्गः ॥ १२६ ॥ " पूर्णे चतुर्दशे वर्षे पञ्चम्यां लक्ष्मणाग्रजः । भरद्वाजाश्रमं प्राप्य " इत्यनेनेदं प्रतिपाद्यते–फाल्गुनपूर्णिमायां सुवेलारोहणम् । अत्र प्रमाणम् " ततोऽस्तमगमत्सूर्यस्सन्ध्यया प्रतिरञ्जितः । पूर्णचन्द्रप्रदीपा च क्षपा समभिवर्तत " इति वचनम् । ततोऽपरेद्युः कृष्णपक्षप्रथमायां युद्धस्य प्रारम्भः, तस्यामेव रात्रौ नागपाशबन्धमोक्षौ । द्वितीयायां धूम्राक्षवधः । तृतीयायां वज्रदंष्ट्रस्य वधः । चतुर्थ्यां मकराक्षस्य वधः । वस्तुतस्तु दशम्यामेव

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

प्रवेशः । तद्रात्रावेव दशरथस्य निर्याणम् । एकादश्यां राज्ञस्तैलद्रोण्यां निक्षेपः । द्वादश्यां भरतं प्रति दूतप्रेषणम् । ते च दूता मार्गे त्रयोदशीं चतुर्दशीं चापनीय पौर्णमास्यां रात्रौ केकयनगरं प्रविविशुः । प्रतिपदि भरतस्यायोध्यां प्रत्यागमनम् । तत्र च मार्गे सप्त रात्रीरुषित्वा अष्टमे दिने त्वरातिशयेनाहोरात्रमागत्य नवम्यां सूर्योदये भरतस्यायोध्याप्रवेशः । तस्यामेव दशरथसंस्कारः । तद्दिवसारभ्य त्रयोदशादिने वैशाखशुद्धपञ्चम्यां तत्पूर्वदिने च भरतेन राज्ञः श्राद्धकर्मकरणम् । षष्ठ्यां तद्देशीयाचारसिद्धं दहनदेशशोधनम् । सप्तम्यां मार्गशोधनाय कर्मान्तिकप्रेषणम् । कर्मान्तिकैश्च दशमीपर्यन्तं चतुर्दिनं मार्गशोधनम् । एकादश्यां भरतस्य रामसकाशं प्रति गमनम् । तद्रात्रौ गङ्गातीरे निवासः । द्वादश्यां भरद्वाजाश्रमे । त्रयोदश्यां रामसमागमः । चतुर्दशीपौर्णमासीप्रतिपत्सु चित्रकूटे भरतस्य निवासः । वैशाखबहुलद्वितीयायां भरतस्यायोध्यां प्रति प्रयाणम् । चतुर्थ्यामयोध्याप्रवेशः । इत्येवं सार्धमासे गते वैशाखबहुलपञ्चम्यां रामस्य चित्रकूटान्निर्गमः अत्र्याश्रमप्रवेशश्च । एवमाश्रममण्डलवासेन सह सार्धमासेषु दशसंवत्सरेषु गतेषु अवशिष्टकाले पञ्चवटीवासे तत्र त्रयोदशवर्षेषु गतेषु ततश्चतुर्दशे वर्षे चैत्रमासे सीताहरणम् । वैशाखे सुग्रीवदर्शनम् । आषाढे वालिवधः । आश्वयुजे सैन्योद्योगः । फाल्गुने प्रायोपवेशः । फाल्गुनशुद्धचतुर्दश्यां लङ्कादाहः । फाल्गुनामावास्यायां रावणवधः । चैत्रशुद्धप्रतिपदि रावणसंस्कारादि । द्वितीयायां विभीषणाभिषेकः, सीताप्रातिर्देवताप्रस्थानानि च । तृतीयायां लङ्कातो निर्गमः । चतुर्थ्यां किष्किन्धायां वासः । पञ्चम्यां भरद्वाजाश्रमे वासः । अत्र वक्तव्योपपत्तयस्तत्र तत्र प्रदर्शिताः । अस्मिन् प्रकारे हनुमत्सांनिधाने, 'द्वौ मासौ रक्षितव्यौ मे' इति रावणवचनं सीतासान्त्वनपरम् । 'मासादूर्ध्वं न जीविष्ये' इति सीतावचनं तु सम्यक् संगच्छते । मासशब्दस्य वर्तमानमासपरत्वं चासकृदुक्तम् । रावणेन 'दश मासा गताः अवशिष्टौ द्वौ मासौ' इत्युक्तिर्मधुपानमत्ततया अविवेककृता । सीतायाः 'मासादूर्ध्वम्' इति वचनं तु वर्तमानमासपरमिति विवेकः । भरद्वाजाश्रमं प्राप्येत्यनेन महतां स्थानमपि प्राप्यमित्युक्तम् । नियतः

कुम्भनिकुम्भमकराक्षाणां वधः । एकादशीमारभ्य पुनरिन्द्रजितस्त्रिरात्रं युद्धम्, लक्ष्मणेन त्रयोदश्यामिन्द्रजिद्वधः । अत्र च प्रमाणम्–" अहोरात्रैस्त्रिभिर्वीरः कथंचिद्विनिपातितः " इत्येतद्वचनम् । चैत्रशुक्लप्रथमायां रावणस्य संस्कारः । द्वितीयायां विभीषणस्याभिषेकः । तृतीयायां देवीसमागमः । " तां रात्रिमुषितं रामम् " इत्युक्तत्वात् चतुर्थ्यां प्रतिप्रयाणं किष्किन्धाप्राप्तिश्च । पञ्चम्यां भरद्वाजाश्रमप्राप्तिरिति । अस्यां पञ्चम्यां चतुर्दशवर्षस्संपूर्णः । " चतुर्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम । न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् । तथेति च प्रतिज्ञाय संपरिष्वज्य सादरम् " इत्येतदत्र प्रमाणम् । षष्ठ्यां नन्दिग्रामं प्राप्य जटाविशोधनं कृत्वा अयोध्याप्राप्तिः । सप्तम्यां पुष्यनक्षत्रे श्रीरामचन्द्रपट्टाभिषेक इत्येवं क्रमो वेदितव्यः ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

नियतकरणत्रयः ॥१॥ स इत्यादिसार्धश्लोक एकान्वयः । सुभिक्षानामयम्, भिक्ष्यन्त इति भिक्षाः अन्नानि, भिक्षाणां समृद्धिः सुभिक्षम् । समृद्धावव्ययीभावः । आमयस्याभावोऽनामयम् । प्रसज्यप्रतिषेधेऽपि समासस्येष्टत्वात्साधुः । सुभिक्षं चानामयं चेति विग्रहः । अनामयम् आरोग्यम् । "अनामयं स्यादारोग्यम्" इत्यमरः । युक्तः प्रजापालने समाहितः ॥ २ ॥ प्रहृष्टवत् प्रहृष्टम् । क्रियाविशेषणम् । स्मितपूर्वम्, सर्वज्ञोऽप्यजानान इव पृच्छतीति

सोऽपृच्छदभिवाद्यैनं भरद्वाजं तपोधनम् । शृणोषि कच्चिद्भगवन् सुभिक्षानामयं पुरे । कच्चिच्च युक्तो भरतो जीवन्त्यपि च मातरः ॥ २ ॥ एवमुक्तस्तु रामेण भरद्वाजो महामुनिः । प्रत्युवाच रघुश्रेष्ठं स्मितपूर्वं प्रहृष्टवत् ॥ ३ ॥ पङ्कदिग्धस्तु भरतो जटिलस्त्वां प्रतीक्षते । पादुके ते पुरस्कृत्य सर्वं च कुशलं गृहे ॥ ४ ॥ त्वां पुराचीरवसनं प्रविशन्तं महावनम् । स्त्रीतृतीयं च्युतं राज्याद्धर्मकामं च केवलम् । पदातिं त्यक्तसर्वस्वं पितुर्वचनकारिणम् ॥ ५ ॥ सर्वभोगैः परित्यक्तं स्वर्गच्युतमिवामरम् । दृष्ट्वा तु करुणा पूर्वं ममासीत् समितिंजय ॥ ६ ॥

स्मितम् । यद्वा किं भरतः प्रजापालनसन्तुष्टो वर्तत इति प्रश्नसारं मत्वा परतन्त्रे तस्मिन् कथमित्थं संभवतीति स्मितकरणम् ॥ ३ ॥ अत एव तदनुरूपमुत्तरयति–पङ्केति । स्नानाभावात्पङ्कदिग्धत्वम् । स्नानाभावेऽपि नित्यानुष्ठानं दीक्षितवत् गौणस्नानेन । स्नानाभावे निमित्तमाह–जटिल इति । जटिलः जटावान् । पिच्छादित्वादिलच् । जटिलानां वारुणस्नानं निषिद्धमिति भावः । "कथं न्वपररात्रेषु सरयूमवगाहते" इत्याद्युक्तिस्तु कादाचित्कस्नानपरत्वेऽप्युपपद्यते । यद्वा सदा अनास्तृतभूमिशयनादिना वा तादृशत्वम् । एवं व्रतनिष्ठो भरतस्ते पादुके राज्याय पुरस्कृत्य त्वां प्रतीक्षते, त्वदागमनाकाङ्क्षया वर्तत इत्यर्थः । कच्चिच्च युक्तो भरत इत्यस्योत्तरमुक्त्वा, जीवन्त्यपि च मातर इत्यस्योत्तरमाह–सर्वं चेति । तव गृहे यद्यदस्ति तत्सर्वम्, कुशलं क्षेमयुक्तम् । जीवन्त्यपि चेति समुच्चाय्य पृष्टाः सर्वे मातृपरिवारकादयो जीवन्तीत्यर्थः ॥ ४ ॥ त्वां पुरेत्यादिश्लोकत्रयमेकं वाक्यम् । पुराचीर

स इत्यादि । सुभिक्षानामयं सुभिक्षम् अन्नानां समृद्धिः । समृद्धावव्ययीभावः । सुभिक्षं चानामयं चेति विग्रहः । युक्तः समाहितः । प्रजापालन इत्यर्थः ॥ २ ॥ एवमिति । स्मितपूर्वं प्रत्युवाच सर्वज्ञोऽपि भगवान् अजानन्निव मां पृच्छतीति स्मितकारणम् । प्रहृष्टवत् प्रहृष्टवान् ॥ ३–७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वसनं पुरातनचीरवसनम् । अतो न पूर्वपदेन पौनरुक्त्यम् । करुणा दुःखम् । परदुःखदुःखित्वं हि करुणा ॥ ५-७ ॥ साम्प्रतमिति । साम्प्रतम् इदानींतु त्वां समीक्ष्य, स्थितस्येति शेषः । प्रीतिः, जातेति शेषः । अनुत्तमेत्यनेन देवकार्यकरणहेतुत्वात् पूर्वमपि काचित् प्रीतिरासीदिति द्योत्यते ॥ ८ ॥ सर्वमित्यर्धम् । सुखं पञ्चवटीवासादिकृतम् । दुःखं सीताहरणजम् ॥ ९ ॥ यत्त्वयेत्यादिसार्धश्लोकषट्कमेकान्वयम् । ब्राह्मणार्थे ऋषिजनरक्षणार्थे,

कैकेयीवचने युक्तं वन्यमूलफलाशिनम् ॥ ७ ॥ साम्प्रतं सुसमृद्धार्थं समित्रगणबान्धवम् । समीक्ष्य विजितारिं त्वां मम प्रीतिरनुत्तमा ॥ ८ ॥ सर्वं च सुखदुःखं ते विदितं मम राघव ॥ ९ ॥ यत्त्वया विपुलं प्राप्तं जनस्थानवधादिकम् । ब्राह्मणार्थे नियुक्तस्य रक्षितुः सर्वतापसान् ॥ १० ॥ रावणेन हृता भार्या बभूवेयमनिन्दिता । मारीचदर्शनं चैव सीतोन्मथनमेव च ॥ ११ ॥ कबन्धदर्शनं चैव पम्पाभिगमनं तथा । सुग्रीवेण च ते सख्यं यच्च वाली हतस्त्वया ॥ १२ ॥ मार्गणं चैव वैदेह्याः कर्म वातात्मजस्य च । विदितायां च वैदेह्यां नलसेतुर्यथा कृतः ॥ १३ ॥ यथा वा दीपिता लङ्का प्रहृष्टैर्हरियूथपैः । सपुत्रबान्धवामात्यः सबलः सहवाहनः ॥ १४ ॥ यथा विनिहतः सङ्ख्ये रावणो देवकण्टकः । समागमश्च त्रिदशैर्यथा दत्तश्च ते वरः । सर्वं ममैतद्विदितं तपसा धर्मवत्सल ॥ १५ ॥ अहमप्यत्र ते दद्मि वरं शस्त्रभृतां वर । अर्घ्यमद्य गृहाणेदमयोध्यां श्वो गमिष्यसि ॥ १६ ॥

नियुक्तस्य तैर्याचितस्य । अत एव रक्षितुः खरादिवधमुखेन पालयितुः, तव भार्या हृता बभूवेति यत् तच्चेति योजना । हृता हर्तुमीप्सिता । आशंसायां क्तः । अतो न सीतोन्मथनमित्यनेन पौनरुक्त्यम् । वरः मृतवानरजीवनादिः ॥ १०-१५ ॥ रामानु०-यथा च निहतः सङ्ख्ये रावणो देवकण्टकः इत्यतः परम्, समागमश्च त्रिदशैरिति श्लोको द्रष्टव्यः ॥ १५ ॥ अहमिति । वरं दद्मि ददामि । अत्र आश्रमे अद्य अर्घ्यं पूजां गृहाणेति संबन्धः ॥ १६ ॥

साम्प्रतमिति । मम प्रीतिः, जातेति शेषः ॥ ८ ॥ ९ ॥ सर्वं ते सुखं दुःखं च विदितमित्येतत्प्रकाशयति-यत्त्वयेति । जनस्थानवासिना त्वया यद्विपुलं खरवधादिना दुःखं प्राप्तं तन्मया विदितम् ॥ १० ॥ मारीचदर्शनं, रावणस्य सीतापहारार्थमिति शेषः । सीतोन्मथनं सीताया राक्षसीभिर्लङ्कायां क्लेशनम् ॥ ११ ॥ १२ ॥ वातात्मजस्य कर्म समुद्रलङ्घनलङ्कादाहनादि ॥ १३ ॥ प्रहृष्टैर्हरियूथपैर्लङ्का दीपितेति यत इन्द्रजिद्वधानन्तरं कृतं तच्च विदितम् ॥ १४-२० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तस्येत्यादिसार्धश्लोकद्वयमेकान्वयम् । बाढमिति प्रतिगृह्य, तस्मिन् दिने तत्र पूजामङ्गीकृत्येत्यर्थः । धीमान् अद्यात्र स्थित्वा भरतं प्रति दूतप्रेषणमुचितमिति ज्ञानवानित्यर्थः । मधूनि स्रवन्तीति मधुस्रवाः । गच्छतः, ममेति शेषः । मयि गच्छति सतीत्यर्थः । भवन्तु, अत्रेतिकरणं बोध्यम् । इति वरमयाचतेति सम्बन्धः ॥ १७॥ १८॥ तथेति चेत्यादिसार्धश्लोकद्वयमेकान्वयम् । योजना योजनानि । "सुपां सुलुक्–" इत्यादिना पूर्वसवर्णादेशः । अत्यन्तसंयोगे

तस्य तच्छिरसा वाक्यं प्रतिगृह्य नृपात्मजः । बाढमित्येव संहृष्टो धीमान् वरमयाचत। अकाले फलिनो वृक्षाः सर्वे चापि मधुस्रवाः॥ १७॥ फलान्यमृतकल्पानि बहूनि विविधानि च। भवन्तु मार्गे भगवन्नयोध्यां प्रति गच्छतः॥ १८॥ तथेति च प्रतिज्ञाते वचनात् समनन्तरम् । अभवन् पादपास्तत्र स्वर्गपादपसन्निभाः ॥ १९॥ निष्फलाः फलिनश्चासन् विपुष्पाः पुष्पशालिनः । शुष्काः समग्रपत्रास्ते नगाश्चैव मधुस्रवाः ॥ २० ॥ सर्वतो योजना त्रीणि गच्छतामभवंस्तदा ॥ २१ ॥ ततः प्रहृष्टाः प्लवगर्षभास्ते बहूनि दिव्यानि फलानि चैव । कामादुपाश्नन्ति सहस्रशस्ते मुदाऽन्विताः स्वर्गजितो यथैव ॥ २२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

द्वितीया । गच्छतां वानराणां फलिनश्चासन्निति क्रमेणान्वयः । इदं चोत्तरदिनकार्यं सौकर्याय ऋषिणा दर्शितम् ॥ १९–२१ ॥ तत इति । ते प्रस्थिताः । स्वर्गजितो यथा स्वर्गिण इव ॥ २२ ॥ रामानु०–ते प्रसिद्धाः, स्वर्गजित इव प्रहृष्टास्ते प्लवगर्षभा इति तच्छब्दयोः संबन्धः ॥ २२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने सप्तविंशत्युत्तरशततमः सर्गः ॥ १२७ ॥

योजना त्रीणि " सुपां सुलुक्–" इत्यादिना पूर्वसवर्णादेशः ॥ २१ ॥ तत इति । ते उपाश्नन्तीति, ते स्वर्गजितो यथा ते स्वर्गजित इव प्रहृष्टाः प्लवगर्षभाः इति तच्छब्दद्वयस्य निर्वाहः ॥ २२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां सप्तविंशत्युत्तरशततमः सर्गः ॥१२७॥

For Private And Personal Use Only

अथ भरतं प्रति हनुमत्प्रेषणमष्टाविंशत्युत्तरशततमे–अयोध्यां त्विति । अर्धमेकं वाक्यम् । समालोक्य समालोच्येत्यर्थः । आश्रमस्थस्य तदवलोकनासम्भवात् । चिन्तयामास, कर्तव्यमिति शेषः ॥ १ ॥ जानीहीत्यर्धम् । नृपतिमन्दिरे जनः मात्रादिः ॥ २ ॥ गहनगोचरं वनचारिणम् ॥ ३ ॥ गुहाय निवेदनस्य प्रयोजनमाह–श्रुत्वा त्विति । विगतज्वरं मद्विश्लेषचिन्ताज्वररहितं यथा तथा भविष्यतीति क्रियाविशेषणम् । आत्मसमः हीनजातिमन

अयोध्यां तु समालोक्य चिन्तयामास राघवः । चिन्तयित्वा हनूमन्तमुवाच प्लवगोत्तमम् ॥१॥ जानीहि कच्चित् कुशली जनो नृपतिमन्दिरे ॥ २ ॥ शृङ्गिबेरपुरं प्राप्य गुहं गहनगोचरम् । निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥३॥ श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम् । भविष्यति गुहः प्रीतः स ममात्मसमः सखा ॥४॥ अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च । निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ ५ ॥ भरतस्तु त्वया वाच्यः कुशलं वचनान्मम । सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम् ॥ ६ ॥ हरणं चापि वैदेह्या रावणेन बलीयसा ॥ ७ ॥ सुग्रीवेण च संसर्गं वालिनश्च वधं रणे । मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया ॥ ८ ॥ लङ्घयित्वा महातोयमापगापतिमव्ययम् । उपयानं समुद्रस्य सागरस्य च दर्शनम् ॥ ९ ॥ यथा च कारितः सेतू रावणश्च यथा हतः । वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च ॥ १० ॥

वेत्स्य प्रेमातिशयेन गुहमिक्ष्वाकुकुलीनममन्यत ॥ ४ ॥ अयोध्यायाश्चेति । प्रवृत्तिं वृत्तान्तम् ॥५॥ भरतस्त्विति । सिद्धार्थं निर्व्यूढपितृवचनपरिपालनरूपप्रयोजनम् ॥ ६ ॥ हरणमित्यादिश्लोकपञ्चकमेकान्वयम् । रणे सुग्रीववालिनोर्युद्धे । वालिनो वधः इत्यर्थः । यथा चेति । महातोयम् अव्ययम्

अयोध्यां त्विति । समालोक्य भरद्वाजाश्रमे विमानादवतरणसमय इति भावः । सुग्रीवादीनां सम्यक् शिष्टाचारप्रदर्शनाय सुहृद्रूपतदाकारज्ञानाय च पूर्वं हनुमत्प्रेषणम् । अत एव पाद्मे पञ्चम्यामेव विसृष्टहनुमत्प्रवेशसमये भरतवर्णनमेवं कृतम्–'अग्निप्रवेशस्योद्योगकाले भ्रातुरनागमात् । न्यवेदयत्तदा तस्मै श्रीरामागमनोत्सवम् ॥" इति ॥१॥२॥ गहनगोचरं वनगोचरम् । कुशलं मदीयं मम वचनाद्ब्रूहीति सम्बन्धः ॥ ३–५ ॥ सिद्धार्थं निर्व्यूढपितृवचनपरिपालनरूपप्रयोजनम् ॥ ६ ॥ ७ ॥ यथा चाधिगता अस्खलितव्रता यथा दृष्टेत्यर्थः ॥ ८ ॥ उपयानं वानरसेनया समागमनम्, सागरस्य दिव्यरूपधारिणो दर्शनम् ॥९॥ वरदानमिति । ॥३६५॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir
For Private And Personal Use Only

आपगापतिं लङ्घयित्वा त्वया सीता यथा अधिगता तथा शंसेत्यन्वयः । समुद्रस्योपयानं समुद्रं प्रति गमनमित्यर्थः । सम्बन्धसामान्ये षष्ठी । समीपयानं वा । सागरस्य समुद्रराजस्य । ब्रह्मणा वरुणेन चेति सहार्थे तृतीया । अनेन महेन्द्रेण वानरसमुत्थापनरूपवरप्रदाने ब्रह्माद्यनुमतिरस्तीति द्योतितम् । पित्रा मम समागममित्येतदन्तस्य शंसेति पूर्वेण संबन्धः । उपयातमिति । अन्यथा चतुर्थ्यामेव चतुर्दशवर्षातिक्रमात् सोऽग्निं प्रविशेदिति भावः ।

महादेवप्रसादाच्च पित्रा मम समागमम् । उपयातं च मां सौम्य भरतस्य निवेदय ॥ ११ ॥ सह राक्षसराजेन हरीणां प्रवरेण च ॥ १२ ॥ एतच्छ्रुत्वा यमाकारं भजते भरतस्तदा । स च ते वेदितव्यः स्यात् सर्वं यच्चापि मां प्रति ॥ १३ ॥ जित्वा शत्रुगणान् रामः प्राप्य चानुत्तमं यशः । उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ १४ ॥ ज्ञेयाश्च सर्वे वृत्तान्ता भरतस्येङ्गितानि च । तत्त्वेन मुखवर्णेन दृष्ट्या व्याभाषणेन च ॥ १५ ॥ सर्वकामसमृद्धं हि हस्त्यश्वरथसङ्कुलम् । पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः ॥ १६ ॥

सौम्येत्यनेन मन्दं मन्दं कथय । अन्यथा हठान्मदागमनश्रवणे हर्षोऽस्य उन्मस्तको भवेदिति भावः ॥ ७–१२ ॥ त्वमेव राज्यं पालयेति मयोक्ते भरतस्तदङ्गीकरोति न वेति तदाकारस्त्वया ज्ञातव्य इत्याह–एतच्छ्रुत्वेति । एतत् उपयानम् । आकारं मुखप्रसादादिकम् । मां प्रति यत् इङ्गितचेष्टादिकम् ॥ १३ ॥ जित्वा शत्रुगणानित्यादिश्लोकद्वयमेकान्वयम् । एतच्छ्लोकान्ते इत्युक्त्वेत्यध्याहर्तव्यम् । ज्ञेया इति श्लोकेन पूर्वोक्तमेव विशेष्यते । तत्त्वेनेत्यस्य ज्ञेया इत्यनेन सम्बन्धः । अत्रापि पूर्ववद्राज्यं पालयेति मदुक्तिं भरतः किमङ्गीकरोतीति परीक्षस्वेति भावः । अन्यथा भरतप्रकृतेः रामप्रकृतेश्च विरुद्धं स्यात् । यावेवमूचतुः "न सर्वे भ्रातरस्तात भवन्ति भरतोपमाः" इति, "यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ । शिरसा धारयिष्यामि न मे शान्तिर्भविष्यति ॥" इति च ॥ १४॥१५ ॥ ननु किं परीक्षणीयं सर्वस्यापि राज्याधिपत्यकाङ्क्षित्वादित्याशङ्क्याह–सर्वेति । पितृपितामह

ब्रह्मणा वरुणेन चेति सहार्थे तृतीया । वरः वानरसमुत्थानरूपः । अतः ब्रह्मवरुणयोरपि वरदानकर्तृत्वाभिधानात् वरदानकाले ब्रह्माद्यनुमत्या महेन्द्रो वरं प्रादादित्यवगम्यते ॥ १०–१२ ॥ एतदिति । यम् आकारं खेदानन्दसूचकम् । ते त्वया ॥१३॥१४॥ ज्ञेया इति । तत्त्वेन याथातथ्येन वृत्तान्ता ज्ञेया इति सम्बन्धः ॥ १५ ॥ त्वयि तादृशसौहृदवतो भरतस्य भावपरीक्षणं न कर्तव्यमित्याशङ्क्य तादृशानामपि हृदयस्य प्रायशो राज्यश्रिया आकर्षणं सम्भाव्यत इत्याह–सर्व

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शब्दो कुलपरम्परोपलक्षकौ । पितृपितामहेभ्य आगतम् । उत्तरपदवृद्धिरार्षी । नावर्तयेत् नाकर्षेत् । कस्य भरतादन्यस्यैवेत्यर्थः ॥ १६ ॥ एवं भरतेङ्गिते ज्ञाते तव किं कर्तव्यमित्यत्राह–सङ्गत्येति । सङ्गत्या अस्मत्सङ्गत्या । यद्यपि पूर्वं सर्वात्मना न राज्यपालनमङ्गीकरोमीत्युक्तम् । तथापि चतुर्दशवर्षपर्यन्तं मद्विरहातुरतया मद्दर्शनजहर्षप्रकर्षातिरेकेण त्वमाभिषिक्तो भवेति मदुक्तिमङ्गीकरिष्यति किमिति भावः । भरतः मत्प्रीत्यर्थं पूर्वं राज्यभारमङ्गीकृतवान् खलु । स्वयं श्रीमान् स्वाभाविकपारतन्त्र्यश्रीमान् । भवेदित्याशंसायां लिङ् । प्रशास्तु वसुधां कृत्स्नाम्, तातो मदभिषेकसंभ्रमं

सङ्गत्या भरतः श्रीमान् राज्यार्थी चेत् स्वयं भवेत् । प्रशास्तु वसुधां कृत्स्नामखिलां रघुनन्दनः ॥ १७ ॥
तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर । यावन्न दूरं याताः स्म क्षिप्रमागन्तुमर्हसि ॥ १८ ॥
इति प्रतिसमादिष्टो हनुमान् मारुतात्मजः । मानुषं धारयन् रूपमयोध्यां त्वरितो ययौ ॥ १९ ॥

न लब्धवान् । अहं तु भरताभिषेकमहोत्सवमनुभवेयम् । अत एव ह्ययोध्याकाण्डेऽपि 'शनैर्जगाम सापेक्षः' इत्युक्तम् । भरताभिषेकदर्शनसापेक्ष इत्यर्थः । अखिलाम् खिलरहिताम्, समृद्धजनामित्यर्थः । कथमसौ भरणक्षम इत्यत्राह–रघुनन्दन इति । त्रैलोक्यभरणक्षमकुलोद्भूत इत्यर्थः ॥१७॥ रामानु०–सङ्गत्या आनत्या ॥ १७ ॥ तस्येति । बुद्धिं मत्सन्निधाने कथंचिद्राज्यमङ्गीकरिष्यतीति बुद्धिम्, व्यवसायं सर्वात्मना नाङ्गीकरिष्यतीति व्यवसायं च, ज्ञात्वा अङ्गीकरिष्यति चेदस्माद्देशाद्यावद्दूरं न याताः स्म तावदागन्तुमर्हसि । अन्यथा नागच्छेति भावः । अत एव हनुमानपि तस्य व्यवसायं ज्ञात्वा नागतवानिति ज्ञेयम् । केचित्तु भरतभावज्ञोऽपि रामः सर्वात्मना सुरक्तोऽपि राज्ञा परीक्षणीय इति लोके राजनीतिप्रवर्तनायैवमतिशङ्कावचनमुक्तवान् । वस्तुतः स्वस्य झटिति गमने भरतस्य हर्षं उन्मत्तको भवेदिति । तस्मात्सत्त्वाय हनुमन्तं प्रेषितवान् । तदाशयज्ञो हनुमानपि रामागमनमुक्त्वा भरतेन सहैवागतवानित्याहुः ॥ १८ ॥ इतीति । प्रतिसमादिष्टः प्रतिकूलं समादिष्टः । अहृदयं समादिष्ट इत्यर्थः । ययौ यातुमुद्युक्तः ॥ १९ ॥

कामेति । पितृपैतामहं पितृपितामहेभ्य आगतम् । नावर्तयेत नाकर्षेत् ॥ १६ ॥ तस्य राज्याकाङ्क्षा चेत् किं करिष्यसीत्याशङ्क्य तमेव स्थापयामीत्याह–सङ्गत्येति । सङ्गत्या चिरकालपरिचयेन राज्येनार्थी भवेत्तर्हि वसुधां प्रशास्त्विति सम्बन्धः ॥ १७–२० ॥ ॥९९६॥

स०–सङ्गत्या चिरकालपरिचयेन कैकेयीसङ्गत्या वा । यदि कैकेयीवत्स्वयमपि राज्येनार्थी भवेत्तर्हि स एव वसुधां शास्तु, वयं यत्र क्वापि तरसा कालं नेष्याम इति शेषः ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अथेति । अथ उद्योगानन्तरम् । वेगेन जिघृक्षन् इवेत्यन्वयः ॥ २० ॥ लङ्घयित्वेत्यादिश्लोकद्वयमेकान्वयम् । पितृपथं स्वपितृपथम्, वायुमार्गमित्यर्थः । भुजगेन्द्रालयमिति गङ्गायमुनासङ्गमविशेषणम् ॥ २१-२३ ॥ पञ्चमीं पञ्चमीसम्बन्धिनीम्, अद्य रजनीम् एतां रजनीम् उषित्वा । निर्गतमिति शेषः ।

अथोत्पपात वेगेन हनुमान् मारुतात्मजः । गरुत्मानिव वेगेन जिघृक्षन् भुजगोत्तमम् ॥ २० ॥ लङ्घयित्वा पितृपथं भुजगेन्द्रालयं शुभम् । गङ्गायमुनयोर्मध्यं सन्निपातमतीत्य च । शृङ्गिबेरपुरं प्राप्य गुहमासाद्य वीर्यवान् ॥ २१ ॥ स वाचा शुभया हृष्टो हनुमानिदमब्रवीत् ॥२२॥ सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः । सहसीतः ससौमित्रिः स त्वां कुशलमब्रवीत् ॥२३॥ पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः । भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यद्यैव राघवम् ॥ २४ ॥ एवमुक्त्वा महातेजाः सम्प्रहृष्टतनूरुहः । उत्पपात महावेगो वेगवानविचारयन् ॥ २५ ॥ सोऽपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा । गोमतीं तां च सोऽपश्यद्भीमं सालवनं तथा । प्रजाश्च बहुसाहस्राः स्फीतान् जनपदानपि ॥२६॥ स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः । आससाद द्रुमान् फुल्लान् नन्दिग्रामसमीपगान् ॥ २७ ॥ स्त्रीभिः सपुत्रैर्वृद्धैश्च रममाणैरलंकृतान् । सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् ॥ २८ ॥

भरद्वाजाभ्यनुज्ञातम् । प्रातरिति शेषः । अद्यैव अचिरेणैव ॥२४॥ सम्प्रहृष्टतनूरुहः । सकललोकानन्दकारिरामप्रत्यागमनं मया श्रावयितव्यं लब्धमित्यस्माद्धेतोरिति भावः । महावेगः महावेगस्वभावः । वेगवान् तादात्विकवेगवान् । अविचारयन् मार्गस्थवनगिरिनदीसौन्दर्यादिकमगणयन्निति भावः ॥२५॥ सोऽपश्यदित्यादिसार्धश्लोकमेकं वाक्यम् । रामतीर्थं परशुरामतीर्थम् । तां प्रसिद्धाम् । प्रजाः कोसलजनपदस्थाः ॥२६॥ स गत्वेत्यादिश्लोकद्वयमेकान्वयम् ।

लङ्घयित्वेत्यादि । पितृपथं वायुपथम् । विहगेन्द्रालयं पक्षीन्द्राणां सञ्चारस्थानम् । विहगेन्द्रालयं शुभम् इति पाठः । मध्यं मार्गमध्यस्थितम्, गङ्गायमुनयोस्सन्निपातं प्रयागम् ॥२१-२३॥ पञ्चमीमिति । पञ्चमीं पञ्चमीसम्बन्धिनीम् । अद्य रजनीम् एतां रजनीम् उषित्वा प्रातः भरद्वाजाभ्यनुज्ञातं समायान्तं रामम् अद्यैव अचिरेणैव द्रक्ष्यसीत्यर्थः ॥ २४ ॥ संप्रहृष्टतनूरुहः सकलजगदानन्दकारिरघुनाथप्रत्यागमनं मया श्रावयितव्यमित्यस्माद्धेतोरिति भावः । अविचारयन्, अध्वश्रममिति शेषः ॥ २५ ॥ २६ ॥ स गत्वेत्यादि श्लोकद्वयमेकं वाक्यम् । सुराधिपस्योपवने नन्दनवने । चैत्ररथे कुबेरोद्याने ॥ २७-३३ ॥

For Private And Personal Use Only

फुल्लान् फुल्लपुष्पान् । स्त्रीभिः सपुत्रैर्वृद्धैश्च, स्त्रीबालवृद्धाविशेषेण सर्वेषामानन्दकरत्वादिति भावः । सुराधिपस्य उपवने नन्दनवने, चैत्ररथे च स्थितान् द्रुमान् यथा तत्सदृशानित्यर्थः ॥२७॥२८॥ क्रोशमात्रे त्वित्यादिश्लोकपञ्चकमेकान्वयम् । क्रोशमात्रे घटिकाद्वयमात्रे, घटिकाद्वयगन्तव्यभूमौ । क्रोश लक्षणमुक्तं ज्योतिषदर्पणे–"यवोदरैरङ्गुलमष्टसङ्ख्यैर्हस्तोऽङ्गुलैः षड्गुणितैश्चतुर्भिः । हस्तैश्चतुर्भिर्भवतीह दण्डः क्रोशः सहस्राद्वितयेन तेषाम् ॥" इति । दीनं

क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम् । ददर्श भरतं दीनं कृशमाश्रमवासिनम् ॥२९॥ जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम् । फलमूलाशिनं दान्तं तापसं धर्मचारिणम् ॥ ३० ॥ समुन्नतजटाभारं वल्कलाजिनवाससम् । नियतं भावितात्मानं ब्रह्मर्षिसमतेजसम् ॥३१॥ पादुके ते पुरस्कृत्य शासन्तं वै वसुन्धराम् । चातुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात् ॥ ३२ ॥ उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः । बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः ॥३३॥ न हि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम् । परि भोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलम् ॥३४॥

रामादर्शनेन । दान्तं बहिरिन्द्रियनिग्रहशालिनम् ॥२९॥३०॥ समुन्नतजटाभारमिति । पूर्वं जटावत्त्वोक्तिः, अत्र तद्भारस्य समुन्नतत्वोक्तिरिति वैषम्यम् । वल्कलाजिनवाससमित्युत्तरीयोक्तिः । अतश्चीरकृष्णाजिनाम्बरमित्यनेन न पुनरुक्तिः । नियतं नियतवाचम् । भावितात्मानं ध्यातात्मानमिति मनो नियमोक्तिः ॥ ३१ ॥ ते पूर्वं रामेण दत्ते । चातुर्वर्ण्यस्य चतुर्वर्णरूपस्य । स्वार्थे ष्यञ् । लोकस्य जनस्य । युक्तैः सन्नद्धैः । " योगः सन्नहनोपायध्यान सङ्गतियुक्तिषु " इत्यमरः ॥ ३२ ॥ बलमुख्यैः बलाध्यक्षैः । काषायाम्बरधारिभिः " यथा राजा तथा प्रजाः " इति न्यायादिति भावः ॥ ३३ ॥ भ्रातृवियोगाद्भरतस्य वल्कलादिधारणमस्तु, अमात्यादीनां तत् किन्निमित्तमित्याशङ्क्य तत्र कारणमाह–न हीति । राजपुत्रं भरतं परि वर्जयित्वा भोक्तुं समीचीनवस्त्राभरणादीन्यनुभवितुम्, न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । " अपपरी वर्जने " इति परेः कर्मप्रवचनीयसंज्ञा । आचार्याः प्राहुः–परि परितो वर्तमाना अपि पौराः भरतं भोक्तुम् अनुभवितुम्, द्रष्टुमिति यावत् । न व्यवस्यन्ति व्यवसायं न कुर्वन्ति । तद्दर्शने निराशा भवन्तीत्यर्थः । तत्र हेतुमाह राजपुत्रमिति । रामविरहानन्तरक्षणे मृतस्य पुत्रः खल्वयम् । अद्य रामानागमने किमयमस्माभिर्लभ्यत इति भावः । ॥३६७॥

भ्रातृवियोगाद्भरतस्य वल्कलादिधारणमस्तु, अमात्यादीनां तु किंनिमित्तमित्याशङ्क्य तत्र कारणमाह–नहीति । अमात्यादयः धर्मवत्सलाः पौराः, तेन राजपुत्रं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

हेत्वन्तरमाह धर्मवत्सलम्, धर्मार्थतया स्वात्मत्यागे पितृसदृशमित्यर्थः । चतुर्दशे वर्षे पूर्णेऽपि रामागमनादर्शनात् प्राणत्यागे व्यवसितं भरतमालोकयतां पौराणां खेदातिशयोऽनेन श्लोकेन सूच्यते ॥२४॥ तामिति । देहवन्तमपरं धर्ममिव स्थितम् । द्वितीय इवशब्दो वाक्यालङ्कारे ॥२५ ॥ २६॥ प्रियमिति । सङ्गतः, भविष्यसीति शेषः । अत्रापरिचितत्वात् भरतं हनुमान् नावन्दत । यद्वा प्राञ्जलिरिति पदं वन्दनपूर्वकाञ्जलिपरम् । अथवा भरतदशादर्शनेन

तं धर्ममिव धर्मज्ञं देहवन्तमिवापरम् । उवाच प्राञ्जलिर्वाक्यं हनुमान् मरुतात्मजः ॥ ३५ ॥ वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम् । अनुशोचसि काकुत्स्थं स त्वां कुशलमब्रवीत् ॥ ३६ ॥ प्रियमाख्यामि ते देव शोकं त्यज सुदारुणम् । अस्मिन् मुहूर्ते भ्रात्रा त्वं रामेण सह सङ्गतः ॥ ३७ ॥ निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम् । उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ ३८ ॥ लक्ष्मणश्च महातेजा वैदेही च यशस्विनी । सीता समग्रा रामेण महेन्द्रेण यथा शची ॥३९॥ एवमुक्तो हनुमता भरतो भ्रातृवत्सलः । पपात सहसा हृष्टो हर्षान्मोहं जगाम ह ॥ ४० ॥ ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः । हनुमन्तमुवाचेदं भरतः प्रियवादिनम् ॥ ४१ ॥ अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य सम्भ्रमात् । सिषेच भरतः श्रीमान् विपुलैरास्रबिन्दुभिः ॥ ४२ ॥ देवो वा मानुषो वा त्वमनुक्रोशादिहागतः । प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम् ॥ ४३ ॥

प्रियाख्याने क्षणविलम्बेऽपि प्राणहानिशङ्कया 'सति कुड्ये' इति न्यायेन वन्दनोद्देश्यवस्तुनि शीर्यमाणे किं वन्दनेनेति तदुज्जीवकं प्रियाख्यानमेवाकरोत् । यद्वा तद्दशादर्शनेन स्वरूपं विसस्मार ॥३७॥ निहत्येति । समृद्धार्थः संपूर्णमनोरथः ॥३८॥ लक्ष्मणश्चेति । समग्रा संपूर्णमनोरथा, उपयात इति शेषः॥३९॥ एवमिति । हृष्टः पपात हर्षान्मोहं जगाम । हेत्यनेन वार्ताश्रवणमात्रेणैतादृशावस्थे भरते झटिति रामागमने काऽवस्था भवेदिति ऋषिर्विस्मयते ॥४०॥ ॥ ४१ ॥ अशोकजैरिति । भरतः कपिमालिङ्ग्य । अशोकजैः शोकजभिन्नैः । प्रीतिमयैः आनन्दजैरित्यर्थः । विपुलैः गुरुभिः ॥ ४२ ॥ देवो वेत्यादि

भरतं यदि भोक्तुं पारवर्जनार्थे । भरतं वर्जयित्वा भोक्तुं न व्यवस्यन्तीत्यर्थः ॥ ३४ ॥ तमिति । द्वितीय इवशब्दो वाक्यालङ्कारे ॥ ३५ ॥ ३६ ॥ रामेण सह सङ्गतः सङ्गतप्रायः ॥ ३७-४२ ॥ देव इत्यादि । प्रियं ब्रुवतः ते त्वत्सम्बन्धिनः । प्रियाख्यानस्य प्रियकथनस्य शतसहस्रसङ्ख्यादि गवादिकं ददामीति सम्बन्धः ॥४३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्लोकत्रयमेकान्वयम् । परिगृहीतमनुष्यदेहेऽपि हनुमति तेजोविशेषात् संशयः । अनुक्रोशात् दयया, प्रियं ब्रुवतस्ते, प्रियाख्यानस्य प्रियवचनस्य, पारितोषिकत्वेन गवादिकं ददामि । भार्याः भरणार्हाः । कन्याः अनूढाः स्त्रियः ॥ ४३–४५ ॥ निशम्येति । रामदिदृक्षया उपलक्षितो भरतः । अद्भुता उपमा यस्य तत् अद्भुतोपमम्, निरुपममित्यर्थः । तद्रामागमनम्, कपिप्रवीरस्य कपिप्रवरात्, निशम्य । नटस्य शृणोतीतिवत्पष्ठी ।

गवां शतसहस्रं च ग्रामाणां च शतं परम् । सुकुण्डलाः शुभाचारा भार्याः कन्याश्च षोडश ॥ ४४ ॥ हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः । सर्वाभरणसम्पन्नाः सम्पन्नाः कुलजातिभिः ॥ ४५ ॥ निशम्य रामागमनं नृपात्मजः कपिप्रवीरस्य तदद्भुतोपमम् । प्रहर्षितो रामदिदृक्षयाऽभवत् पुनश्च हर्षादिदमब्रवीद्वचः ॥ ४६ ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥

बहूनि नाम वर्षाणि गतस्य सुमहद्वनम् । शृणोम्यहं प्रीतिकरं मम नाथस्य कीर्तनम् ॥ १ ॥
कल्याणी बत गाथेयं लौकिकी प्रतिभाति मे । एति जीवन्तमानन्दो नरं वर्षशतादपि ॥ २ ॥
राघवस्य हरीणां च कथमासीत् समागमः । कस्मिन् देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः ॥ ३ ॥

प्रहर्षितोऽभवत् ॥ ४६ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने अष्टाविंशत्युत्तरशततमः सर्गः ॥१२८॥ बहूनीत्यादिश्लोकद्वयमेकान्वयम् । बहूनि वर्षाणि वनं गतस्येति संबन्धः । वर्षशतादपीत्यत्रेतिकरणं द्रष्टव्यम् । वर्षशतात्परमिति शेषः ॥ १ ॥ २ ॥ राघवस्येति । अत्र वानरसमागमप्रश्नेन पूर्वं भरतः सामान्यतो वानरसेनासन्नाहं श्रुतवानिति गम्यते । किमाश्रित्य किं प्रयोजनमवलम्ब्य ॥ ३ ॥

॥ ४४–४६ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् अष्टाविंशत्युत्तरशततमः सर्गः ॥ १२८ ॥
बहूनीत्यादि श्लोकद्वयमेकं वाक्यम् । बहूनि वर्षाणि वनं गतस्य मम नाथस्य प्रीतिकरं कीर्तनं यतः शृणोमि अतः जीवन्तं नरं वर्षशतादपि आनन्दः एतीत्येवं रूपा लौकिकी गाथा जनवार्ता मे मम कल्याणी सत्यार्था प्रतिभातीति सम्बन्धः ॥ १॥२ ॥ राघवस्य हरीणां च कथमासीत्समागम इत्यनेन देवो वा मानुषो वेति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

स इति । बृस्यां तपस्विसमुचितासने । "व्रतिनामासनं बृसी" इत्यमरः ॥४॥ वक्ष्यमाणवृत्तान्ते प्रामाण्यसिद्धये तत्पूर्ववृत्तं सङ्क्षेपेणानुवदति–यथेत्यादिना । अत्र यथेत्यस्य येन प्रकारेणेत्यर्थः । मातुः मात्रे । राज्येन निमन्त्रितः इत्यन्वयः । अमित्रकर्शनेत्यनेन राज्यकरणसामर्थ्ये स्वस्य सत्यपि ज्येष्ठानुवृत्त्यर्थं निमन्त्रित इति गम्यते ॥५–९॥ अपयात इति । समुद्भ्रान्तेति । अपूर्वपुरुषदर्शनेनेति भावः । परिद्यूनं परितप्तम् ॥१०॥ तदिति । तत् प्रसिद्धम् । हस्तिभिः

स पृष्टो राजपुत्रेण बृस्यां समुपवेशितः । आचचक्षे ततः सर्वं रामस्य चरितं वने ॥ ४ ॥ यथा प्रव्राजितो रामो मातुर्दत्तो वरस्तव । यथा च पुत्रशोकेन राजा दशरथो मृतः ॥ ५ ॥ यथा दूतैस्त्वमानीतस्तूर्णं राजगृहात् प्रभो । त्वयाऽयोध्यां प्रविष्टेन यथा राज्यं न चेप्सितम् ॥६॥ चित्रकूटं गिरिं गत्वा राज्येनामित्रकर्शन । निमन्त्रितस्त्वया भ्राता धर्ममाचरता सताम् ॥ ७ ॥ स्थितेन राज्ञो वचने यथा राज्यं विसर्जितम् । आर्यस्य पादुके गृह्य यथाऽसि पुनरागतः ॥ ८ ॥ सर्वमेतन्महाबाहो यथावद्विदितं तव । त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे ॥ ९ ॥ अपयाते त्वयि तदा समुद्भ्रान्तमृगद्विजम् । परिद्यूनमिवात्यर्थं तद्वनं समपद्यत ॥ १० ॥ तद्धस्तिमृदितं घोरं सिंहव्याघ्रमृगायुतम् । प्रविवेशाथ विजनं सुमहद्दण्डकावनम् ॥ ११ ॥ तेषां पुरस्ताद्बलवान् गच्छतां गहने वने । निनदन् सुमहानादं विराधः प्रत्यदृश्यत ॥ १२ ॥ तमुत्क्षिप्य महानादमूर्ध्वबाहुमधोमुखम् । निखाते प्रक्षिपन्ति स्म नदन्तमिव कुञ्जरम् ॥ १३॥ तत् कृत्वा दुष्करं कर्म भ्रातरौ रामलक्ष्मणौ । सायाह्ने शरभङ्गस्य रम्यमाश्रममीयतुः ॥ १४ ॥ शरभङ्गे दिवं प्राप्ते रामः सत्यपराक्रमः । अभिवाद्य मुनीन् सर्वान् जनस्थानमुपागमत् ॥ १५ ॥

वनगजैःमृदितम् ॥ ११ ॥ १२ ॥ तमिति । निखाते अवटे । प्रक्षिपन्ति स्मेति बहुवचनेन सीतयाऽपि तत्र किंचित्साहाय्यं कृतमिति गम्यते ॥१३–१५॥

प्रश्नस्यानन्तरं वानरेन्द्रस्य सुग्रीवस्य सचिवोऽहमिति प्रतिवचनं हनुमता दत्तमित्यवगन्तव्यम् ॥ ३ ॥ बृस्यां तपस्युचितासने ॥ ४–९ ॥ अपयाते त्वयि । परिद्यूनं परितप्तमिव ॥ १०–१२ ॥ निखाते गर्ते ॥ १३–१८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ततः पश्चादित्यर्धम् ॥ १६ ॥ तत इति । कर्णनासमित्यत्र प्राण्यङ्गत्वादेकवद्भावः ॥ १७ ॥ रामानु०-अभिवाद्य मुनीन् सर्वान् जनस्थानमुपागमदित्यनन्तरम्, ततः पश्चाच्छूर्पणखा रामपार्श्वमुपागता । ततो रामेण संदिष्टो लक्ष्मणः सहसोत्थितः । प्रगृह्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ इत्यनन्तरम्, चतुर्दश सहस्राणीत्येवं पाठक्रमोऽवगन्तव्यः । अन्यथा पाठे तु अविवक्षितः क्रम इति द्रष्टव्यः ॥ १९-१८ ॥ चतुर्दशेति । स्पष्टम् ॥ १८ ॥ एकेनेति । सङ्गताः पार्थक्येन विना सर्वे राक्षसाः परस्परं मिलिताः सन्तः

ततः पश्चाच्छूर्पणखा रामपार्श्वमुपागता ॥ १६ ॥ ततो रामेण सन्दिष्टो लक्ष्मणः सहसोत्थितः । प्रगृह्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ १७ ॥ चतुर्दश सहस्राणि रक्षसां भीमकर्मणाम् । हतानि वसता तत्र राघवेण महात्मना ॥ १८ ॥ एकेन सह सङ्गम्य रणे रामेण सङ्गताः । अह्नश्चतुर्थभागेन निरशेषा राक्षसाः कृताः ॥ १९ ॥ महाबला महावीर्यास्तपसो विघ्नकारिणः । निहता राघवेणाजौ दण्डकारण्यवासिनः ॥२०॥ राक्षसाश्च विनिष्पिष्टाः खरश्च निहतो रणे ॥ २१ ॥ ततस्तेनार्दिता बाला रावणं समुपागता ॥ २२ ॥ रावणानुचरो घोरो मारीचो नाम राक्षसः । लोभयामास वैदेहीं भूत्वा रत्नमयो मृगः ॥ २३ ॥ अथैनमब्रवीद्रामं वैदेही गृह्यतामिति । अहो मनोहरः कान्त आश्रमो नो भविष्यति ॥ २४ ॥ ततो रामो धनुष्पाणिर्धावन्तमनुधावति । स तं जघान धावन्तं शरेणानतपर्वणा ॥ २५ ॥ अथ सौम्य दशग्रीवो मृगं याते तु राघवे । लक्ष्मणे चापि निष्क्रान्ते प्रविवेशाश्रमं तदा ॥ २६ ॥

एकेन रामेण सह सङ्गम्य निःशेषाः कृता इत्यन्वयः । अह्नश्चतुर्थभागेनेत्यत्र अह्नश्चतुर्थो यामः । तस्य भागः त्रिंशद्घटिकान्यूनार्धांशः तेन । अन्यथा अर्धाधिकमुहूर्तेनेति पूर्वोक्तविरोधः प्रसज्येत ॥ १९ ॥ महाबला इति श्लोके तपसो विघ्नकारिण इत्युक्त्या राक्षसहननं तपोविघ्नशान्त्यर्थमिति दर्शितम् ॥ २० ॥ राक्षसा इत्यर्धम् ॥२१॥ तत इत्यर्धम् । बाला मूर्खा । "मूर्खेऽर्भकेऽपि बालः स्यात्" इत्यमरः ॥ २२ ॥ २३ ॥ अथैनमिति । एनं रामम् । गृह्यतां, मृग इति शेषः ॥ २४ ॥ २५ ॥ अथेति । निष्क्रान्त इति । क्रूरत्वान्निष्क्रान्तिकारणानुक्तिः । अत एवाह कामन्दकः-" प्रियं पथ्यं च तथ्यं ॥३६१॥

एकेनेति । अह्नश्चतुर्थभागेन, इदञ्च युद्धसन्नाहादिव्यापारापेक्षयेति ज्ञेयम् । "अर्धाधिकमुहूर्तेन" इत्यारण्यकाण्डेऽभिहितत्वात् ॥ १९-२१ ॥ बाला मूर्खा ॥२२॥२३॥ अथैनमिति । राममब्रवीत्, मृगं दृष्ट्वेति शेषः । तदेवाह-कान्तः अयं मृगो गृह्यताम्, ग्रहणेन आश्रमो मनोहरो भविष्यतीति सम्बन्धः ॥ २४-२७ ॥

For Private And Personal Use Only

च वदेद्धर्मार्थमेव च । अश्राव्यमयशस्यं च परोक्षे कटु चोत्सृजेत् ॥" इति ॥ २६ ॥ जग्राहेति । तरसा बलात्कारेण । ग्रहः अङ्गारक इति यावत् ॥ २७ ॥ २८ ॥ ततस्त्वित्यादिसार्धश्लोक एकान्वयः । अद्भुतसङ्काशाः अद्भुताकाराः ॥ २९ ॥ ३० ॥ तामिति । सुवर्णपरिक्रान्ते सुवर्णानुलिप्ते ॥ ३१ ॥

जग्राह तरसा सीतां ग्रहः खे रोहिणीमिव । त्रातुकामं ततो युद्धे हत्वा गृध्रं जटायुषम् ॥२७॥ प्रगृह्य सीतां सहसा जगामाशु स रावणः ॥ २८ ॥ ततस्त्वद्भुतसङ्काशाः स्थिताः पर्वतमूर्धनि । सीतां गृहीत्वा गच्छन्तं वानराः पर्वतोपमाः । ददृशुर्विस्मितास्तत्र रावणं राक्षसाधिपम् ॥२९॥ प्रविवेश ततो लङ्कां रावणो लोकरावणः ॥ ३० ॥ तां सुवर्णपरिक्रान्ते शुभे महति वेश्मनि । प्रवेश्य मैथिलीं वाक्यैः सान्त्वयामास रावणः ॥ ३१ ॥ तृणवद्भाषितं तस्य तं च नैर्ऋतपुङ्गवम् । अचिन्तयन्ती वैदेही अशोकवनिकां गता ॥ ३२ ॥ न्यवर्तत ततो रामो मृगं हत्वा महावने ॥ ३३ ॥ निवर्तमानः काकुत्स्थोऽदृष्ट्वा गृध्रं प्रविव्यथे ॥३४॥ गृध्रं हतं ततो दग्ध्वा रामः प्रियसखं पितुः । मार्गमाणस्तु वैदेहीं राघवः सहलक्ष्मणः । गोदावरीमन्वचरद्वनोद्देशांश्च पुष्पितान् ॥३५॥ आसेदतुर्महारण्ये कबन्धं नाम राक्षसम् ॥३६॥ ततः कबन्धवचनाद्रामः सत्यपराक्रमः । ऋश्यमूकं गिरिं गत्वा सुग्रीवेण समागतः ॥ ३७ ॥ तयोः समागमः पूर्वं प्रीत्या हार्दो व्यजायत ॥ ३८ ॥

तृणवदिति । तस्य रावणस्य भाषितं तृणवत्, मत्वेति शेषः । तं च नैर्ऋतपुङ्गवम् अचिन्तयन्ती वैदेही अशोकवनिकां गता । तत्रैव स्थितेत्यर्थः ॥ ३२ ॥ ३३ ॥ निवर्तमान इति । अदृष्ट्वेति च्छेदः । सीतामिति शेषः । सीतां गृध्रं चादृष्ट्वा प्रविव्यथ इत्यन्वयः ॥ ३४ ॥ रामानु°–निवर्तमानः काकुत्स्थोऽदृष्ट्वा गृध्रं प्रविव्यथे । गृध्रं हतं ततो दग्ध्वा रामः प्रियसखं पितुरिति पाठः ॥ ३४ ॥ गृध्रमित्यादिसार्धश्लोक एकान्वयः । ततो वैदेहीं मार्गमाणो राघवः पितुः प्रियसखं हतं गृध्रं दग्ध्वा गोदावरीं तद्वनोद्देशांश्चान्वचरत् । पुष्पितानित्यनेन पुष्पलोभेन किं सीताऽत्र गतेति मतिर्व्यज्यते ॥ ३५ ॥ आसेदतुरित्यर्धमेकं वाक्यम् । राघवाविति शेषः ॥ ३६ ॥ ३७ ॥ तयोरिति । तयोः रामसुग्रीवयोः, पूर्वं दर्शनात् प्रागेव, हार्दः समागमः मानसः संबन्धः व्यजायत, प्रगृह्येति । सहसा बलात्कारेण ॥ २८–३१ ॥ अचिन्तयन्ती अगणयन्ती ॥ ३२–३७ ॥ तयोरित्यर्धम् । तयोः रामसुग्रीवयोः । समागमात्पूर्वं दर्शनात्प्रागेव । हार्दः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मनसा परस्परं सख्यमाचकाङ्क्षाते इत्यर्थः ॥ ३८ ॥ सुग्रीवस्य कुतः सख्यापेक्षेत्यत्राह-भ्रात्रेति ॥ ३९ ॥ इतरेतरेति । इतरेतरसंवादात् अन्योन्य प्रयोजनकथनात् । प्रणयः प्रगाढः अतिशयितः अभूत् ॥ ४० ॥ रामस्येति । अत्र सुग्रीव इति शेषः । सुग्रीवः रामस्य बाहुवीर्येण वालिनं हत्वा स्वराज्यं प्रत्यपादयत् समपादयदिति सम्बन्धः ॥ ४१ ॥ सुग्रीव इति । राज्ये स्थापितः सुग्रीवः सर्ववानरैः सहितोऽभूत् ॥ ४२ ॥ रामायेति ।

भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा ॥ ३९ ॥ इतरेतरसंवादात् प्रगाढः प्रणयस्तयोः ॥ ४० ॥ रामस्य बाहुवीर्येण स्वराज्यं प्रत्यपादयत् । वालिनं समरे हत्वा महाकायं महाबलम् ॥ ४१ ॥ सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः ॥ ४२ ॥ रामाय प्रतिजानीते राजपुत्र्याश्च मार्गणम् ॥ ४३ ॥ आदिष्टा वानरेन्द्रेण सुग्रीवेण महात्मना । दश कोटयः प्लवङ्गानां सर्वाः प्रस्थापिता दिशः ॥ ४४ ॥ तेषां नो विप्रकृष्टानां विन्ध्ये पर्वतसत्तमे । भृशं शोकाभितप्तानां महान् कालोऽत्यवर्तत ॥ ४५ ॥ भ्राता तु गृध्रराजस्य सम्पातिर्नाम वीर्यवान् । समाख्याति स्म वसतिं सीताया रावणालये ॥ ४६ ॥ सोऽहं शोकपरीतानां दुःखं तज्ज्ञातिनां नुदन् । आत्मवीर्यं समास्थाय योजनानां शतं प्लुतः ॥४७॥ तत्राहमेकामद्राक्षमशोकवनिकां गताम् । कौशेयवस्त्रां मलिनां निरानन्दां दृढव्रताम् ॥ ४८ ॥ तया समेत्य विधिवत् पृष्ट्वा सर्वमनिन्दिताम् । अभिज्ञानं च मे दत्तमर्चिष्मान् स महामणिः ॥ ४९ ॥

सुग्रीव इति शेषः । प्रतिजानीते प्रतिज्ञातवान् ॥ ४३ ॥ आदिष्टाः मार्गणायादिष्टाः, दिशः प्रस्थापिताश्च ॥ ४४ ॥ तेषां प्रस्थापितानाम्, विप्रकृष्टानां बहुकालविलम्बितानाम् । यद्वा स्वयंप्रभाबिले प्रविष्टतया दूरं गतानाम् ॥ ४५ ॥ ४६ ॥ सोऽहमिति । ज्ञातिनामिति नकारान्तत्वमार्षम् । प्लुतः, समुद्रे इति शेषः ॥ ४७ ॥ तत्र रावणालये ॥ ४८ ॥ तयेति । अनिन्दितां सीतां सर्वं वृत्तान्तं पृष्ट्वा । प्रच्छिर्द्विकर्मकः । पृष्ट्वा स्थिताय मे मह्यम्,

मानससम्बन्धो व्यजायत मनसा परस्परं सख्यमाचकाङ्क्षाते इत्यर्थः ॥ ३८ ॥ सुग्रीवस्य रामसख्यापेक्षणे कारणमाह-भ्रात्रेति । यतो वालिना निरस्तः अतस्तयोः प्रणयः, आसीदिति शेषः ॥ ३९-४२ ॥ रामायेति । अत्र क्रमो न विवक्षितः, पूर्वमेव प्रतिज्ञातत्वात् ॥ ४३ ॥ आदिष्टाः नियुक्ताः, प्रस्थापिता इति सम्बन्धः ॥ ४४ ॥ विप्रकृष्टानां बिलप्रवेशानन्तरं निर्गममार्गमजानतामित्यर्थः ॥ ४५ ॥ ४६ ॥ सोऽहमिति । ज्ञातिनामित्यत्र दीर्घाभाव आर्षः ॥ ४७ ॥ ४८ ॥ विधिवत् ॥३७०॥

स०-रामः स्वबाहुवीर्येण इति पाठः । रामः स्वराज्यं स्वेन द्रव्येण सहितं च तद्राज्यं चेति तत् । राज्ञि मृते समरे स्वस्वामिकमिति स्वराज्यं वा । प्रत्यपादयत् दत्तवान् ॥ ४१ ॥

For Private And Personal Use Only

स प्रसिद्धः महामणिः अभिज्ञानं दत्तम् ॥ ४९ ॥ रामानु०—तयेति। मे मया। स महामणिः। रामदत्ताभिज्ञानस्याङ्गुलीयकरूपत्वेऽपि तद्युक्तमणिप्राधान्यान्मणिशब्दप्रयोगः ॥४९॥ अभिज्ञानमित्यर्थम् ॥ ५० ॥ मया चेति। क्रियाभेदान्मयाशब्दद्वयं प्रयुक्तम् ॥ ५१ ॥ श्रुत्वेति । जीवितमाशशंसे ततः पूर्वं जीविते निराशः स्थित इति व्यक्तम् । जीवितान्तं प्राप्तः, आतुरः अमृतं पीत्वा यथा जीवितमाशास्ते तथेत्यर्थः ॥ ५२ ॥ उद्योजयिष्यन्निति । उद्योगमुद्योजयिष्यन् उद्योगं

अभिज्ञानं मणिं लब्ध्वा चरितार्थोऽहमागतः ॥ ५० ॥ मया च पुनरागम्य रामस्याक्लिष्टकर्मणः । अभिज्ञानं मया दत्तमर्चिष्मान् स महामणिः ॥ ५१ ॥ श्रुत्वा तु मैथिलीं हृष्टस्त्वाशशंसे च जीवितम् । जीवितान्तमनुप्राप्तः पीत्वाऽमृतमिवातुरः ॥ ५२ ॥ उद्योजयिष्यन्नुद्योगं दध्रे कामं वधे मनः । जिघांसुरिव लोकान्ते सर्वाँल्लोकान् विभावसुः ॥ ५३ ॥ ततः समुद्रमासाद्य नलं सेतुमकारयत् । अतरत् कपिवीराणां वाहिनी तेन सेतुना ॥ ५४ ॥ प्रहस्तमवधीन्नीलः कुम्भकर्णं तु राघवः । लक्ष्मणो रावणसुतं स्वयं रामस्तु रावणम् ॥५५॥ स शक्रेण समागम्य यमेन वरुणेन च । महेश्वरस्वयम्भूभ्यां तथा दशरथेन च ॥५६॥ तैश्च दत्तवरः श्रीमानृषिभिश्च समागतः । सुरर्षिभिश्च काकुत्स्थो वराँल्लेभे परन्तपः ॥ ५७ ॥ स तु दत्तवरः प्रीत्या वानरैश्च समागतः । पुष्पकेण विमानेन किष्किन्धामभ्युपागमत् ॥ ५८ ॥ तं गङ्गां पुनरासाद्य वसन्तं मुनिसन्निधौ । अविघ्नं पुष्ययोगेन श्वो रामं द्रष्टुमर्हसि ॥ ५९ ॥

कुर्वन् । ओदनपाकं पचनीतिवत् । विभावसुः अग्निः ॥ ५३ ॥ तत इति । नलं सेतुमकारयत् नलेन सेतुमकारयत् ॥ ५४—५८ ॥ तमिति । पुनर्गङ्गामासाद्य मुनिसन्निधौ भरद्वाजसमीपे, अद्य वसन्तं तम् अविघ्नं यथा भवति तथा श्वः पुष्ययोगेन द्रष्टुमर्हसि, पुष्ययोगलाभार्थम् नीतिशास्त्रोक्तमार्गेण । महामणिः, रामदत्ताभिज्ञानस्याङ्गुलीयकत्वेऽपि तत्र खचितमणिप्राधान्यान्मणिशब्दप्रयोगः ॥ ४९–५१॥ उद्योजयिष्यन्निति । उद्युज्यते जयोऽनेनेत्युद्योगो बलं तदुद्योजयिष्यन् प्रोत्साहयिष्यन् ॥ ५३–५९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अद्य गङ्गातीरे रामः स्थित इति भावः ॥ ५९ ॥ तत इति । सत्यम् अविरुद्धभङ्ग्या सत्यत्वेन ज्ञातम् । मनोरथ इत्यनन्तरमितिकरणं द्रष्टव्यम् ॥६०॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥
श्रुत्वेत्यादि । परमानन्दं परमानन्दकरम्, वच इति शेषः ॥ १ ॥ दैवतानीति । चैत्यानि चतुष्पथमण्डपान् । अर्चन्तु अर्चयन्तु ॥ २ ॥ सूता इत्यादि

ततस्तु सत्यं हनुमद्वचो महन्निशम्य हृष्टो भरतः कृताञ्जलिः । उवाच वाणीं मनसः प्रहर्षिणीं चिरस्य पूर्णः खलु मे मनोरथः॥६०॥ इत्यार्षे श्रीरामायणे वाल्मीकीये० श्रीमद्युद्धकाण्डे एकोनत्रिंशदुत्तरशततमः सर्गः ॥ १२९ ॥
श्रुत्वा तु परमानन्दं भरतः सत्यविक्रमः । हृष्टमाज्ञापयामास शत्रुघ्नं परवीरहा ॥१॥ दैवतानि च सर्वाणि चैत्यानि नगरस्य च। सुगन्धमाल्यैर्वादित्रैरर्चन्तु शुचयो नराः ॥ २ ॥ सूताः स्तुतिपुराणज्ञाः सर्वे वैतालिकास्तथा । सर्वे वादित्रकुशला गणिकाश्चापि सङ्घशः। अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम् ॥ ३ ॥ भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा। विष्टीरनेकसाहस्राश्चोदयामास वीर्यवान् ॥ ४ ॥ समीकुरुत निम्नानि विषमाणि समानि च । स्थलानि च निरस्यन्तां नन्दिग्रामादितः परम् ॥ ५ ॥ सिञ्चन्तु पृथिवीं कृत्स्नां हिमशीतेन वारिणा । ततोऽभ्यव किरन्त्वन्ये लाजैः पुष्पैश्च सर्वशः ॥ ६ ॥

सार्धश्लोक एकान्वयः। सूताः स्तुतिशीलाः । वैतालिकाः वन्दिनः ॥ ३ ॥ रामानु०—गणिकाश्चापि सङ्घश इत्यतः परम्-राजदारास्तथाऽमात्याः सैन्याः सेनायणाङ्गनाः। ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः । अभिनिर्यान्तु रामस्य द्रष्टुं शशिनिभं मुखम्॥ भरतस्य वचः श्रुत्वा शत्रुघ्नः परवीरहा। विष्टीरनेकसाहस्राश्चोदयामास वीर्यवान ॥ इति पाठक्रमः। व्यत्ययस्तु लेखकप्रमादकृतः ॥ ३ ॥ भरतस्येत्यादिश्लोकपञ्चकमेकान्वयम् । विष्टीः भृतिं विना कर्मकरान् । नन्दिग्रामादितः परम्, अयोध्यापर्यन्तमित्यर्थः।
तत इति । मे मनोरथः पूर्ण इत्युवाचेति सम्बन्धः ॥ ६० ॥ इति श्रीमहेश्वरतीर्थ० श्रीरामायणतत्त्व० युद्धकाण्डव्याख्यायाम् एकोनत्रिंशदुत्तरशततमः सर्गः ॥१२९॥ श्रुत्वेति । परमानन्दं परमानन्दकरम्, वचनमिति शेषः ॥ १ ॥ दैवतानि कुलदैवतानि । नगरस्य चैत्यानि साधारणदेवतायतनानि ॥ २ ॥ स्तुतिपुराणज्ञाः इति सूतलक्षणरूपं सूतविशेषणम् । वैतालिकाः वंशावलीकीर्तकाः ॥ ३ ॥ विष्टीः भृतिकरान् ॥ ४ ॥ स्थूलानि इति पाठे—अत्युन्नतप्रदेशान् ॥ ५-८ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अन्ये पुरुषाः हिमवच्छीतेन वारिणा सिञ्चन्तु । ततः सेचनानन्तरम्, लाजादिभिः किरन्तु । रथ्याः समुच्छ्रितपताकाः, कुर्वन्त्विति शेषः । सूर्यस्योदयनं प्रति सूर्यस्योदयमारभ्य । यावत्सूर्योदयमिति वा । स्रजः मालिकाः तासां दामभिः पङ्क्तिभिः, मुक्तपुष्पैः असूत्रबद्धपद्मकुवलयादिभिश्च वेश्मानि शोभयन्तु । सुगन्धैः पञ्चवर्णकैः पञ्चविधवर्णद्रव्यचूर्णैः, राजमार्गं किरन्तु राजमार्गे वर्णद्रव्यचूर्णैः नानाविधलतापद्मादिचित्ररेखाः कुर्वन्त्वित्यर्थः ॥ ४-८ ॥

समुच्छ्रितपताकास्तु रथ्याः पुरवरोत्तमे । शोभयन्तु च वेश्मानि सूर्यस्योदयनं प्रति ॥ ७ ॥ स्रग्दामभिर्मुक्तपुष्पैः सुगन्धैः पञ्चवर्णकैः । राजमार्गमसम्बाधं किरन्तु शतशो नराः ॥ ८ ॥ राजदारास्तथाऽमात्याः सैन्याः सेनागणाङ्गनाः । ब्राह्मणाश्च सराजन्याः श्रेणीमुख्यास्तथा गणाः ॥ ९ ॥ धृष्टिर्जयन्तो विजयः सिद्धार्थो ह्यर्थसाधकः । अशोको मन्त्रपालश्च सुमन्त्रश्चापि निर्ययुः ॥ १० ॥ मत्तैर्नागसहस्रैश्च शातकुम्भविभूषितैः ॥ ११ ॥ अपरे हेमकक्ष्याभिः सगजाभिः करेणुभिः । निर्ययुस्तुरगाक्रान्तै रथैश्च सुमहारथाः ॥ १२ ॥ शक्त्यृष्टिप्रासहस्तानां सध्वजानां पताकिनाम् । तुरगाणां सहस्रैश्च मुख्यैर्मुख्यनरान्वितैः । पदातीनां सहस्रैश्च वीराः परिवृता ययुः ॥ १३ ॥

रामानु०-विष्टीः भृतिं विना कर्मकरान् । स्रग्दामभिः पुष्पमालापङ्क्तिभिः, वेश्मानि शोभयन्तु । सुगन्धैः पञ्चवर्णकैः मुक्तैः पुष्पैश्च राजमार्गं किरन्त्विति संबन्धः ॥ ४-८ ॥

अथ परेद्युः प्रातः रामभक्त्यतिशयेन सर्वेषां निर्गमनं दर्शयति-राजदारा इत्यादिना । श्रेणीमुख्याः श्रेणीमुखाः । तथा गणाः, श्रेणी श्रेणय इति यावत् । अत्र श्लोके निर्ययुरिति वक्ष्यमाणमनुषज्यते ॥ ९ ॥ अमात्यान्विशिष्य दर्शयति-धृष्टिरित्यादिना । सार्धश्लोकः एकान्वयः । अत्र धृष्ट्यादयो गजारूढा ययुरित्यर्थः ॥ १० ॥ ११ ॥ अपर इति । अपरे राजान्तरङ्गाः पुरुषाः करेणुभिर्निर्ययुः ॥ १२ ॥ शक्तीत्यादिसार्धश्लोक एकान्वयः । उक्तविशेषणानां तुरगाणां सहस्रैः पदातीनां सहस्रैश्च परिवृता वीरा ययुः ॥ १३ ॥ रामानु०-निर्ययुस्तुरगाक्रान्तै रथैश्च सुमहारथाः । इत्यस्यानन्तरम्-शक्त्यृष्टिप्रासहस्तानां सध्वजानां पताकिनाम् । तुरगाणां सहस्रैश्च मुख्यैर्मुख्यनरान्वितैः । पदातीनां सहस्रैश्च वीराः परिवृता ययुः । ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः । कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः । कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् । कृत्स्नं तु नगरं तत्तु नन्दिग्राममुपागमत् ॥ इति पाठक्रमः । व्यत्ययस्तु लेखकप्रमादकृतः ॥ १३ ॥

राजदाराः मातरः । सैन्याः राजभवनाद्वृतिमन्तोऽभ्यन्तराः । सेनागणा आटविकान्तसेनाभेदास्तथाऽङ्गनागणाः । श्रेणी नानाजातीयसङ्घः ॥ ९-१० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत इति । प्रमुखे अग्रे ॥ १४ ॥ कैकेय्येति । अत्र भरतेनोपेक्षयाऽनाहूतत्वात् पश्चान्निर्यत्य कैकेय्या नन्दिग्रामप्राप्तिकाले साहित्यमुच्यते ॥ १५ ॥ कृत्स्नमित्यर्धम् । अत्र नगरशब्देन तत्रत्यजना लक्ष्यन्ते ॥ १६ ॥ सञ्चचाल कम्पितेव ॥ १७ ॥ अथोक्तपरिवारैः सह भरतस्य नन्दिग्रामान्निर्गमं दर्शयति—द्विजातिमुख्यैरित्यादिभिः सार्धैश्चतुर्भिः श्लोकैः । ततो महात्मा भरतः सर्वैर्वृतः प्रत्युद्ययाविति वाक्यार्थः । सनैगमैः सवणिग्भिः ।

ततो यानान्युपारूढाः सर्वा दशरथस्त्रियः । कौसल्यां प्रमुखे कृत्वा सुमित्रां चापि निर्ययुः ॥ १४ ॥ कैकेय्या सहिताः सर्वा नन्दिग्राममुपागमन् ॥१५॥ कृत्स्नं च नगरं तत्तु नन्दिग्राममुपागमत् ॥१६॥ अश्वानां खुरशब्देन रथनेमिस्वनेन च । शङ्खदुन्दुभिनादेन सञ्चचालेव मेदिनी ॥ १७ ॥ द्विजातिमुख्यैर्धर्मात्मा श्रेणीमुख्यैः सनैगमैः । माल्यमोदकहस्तैश्च मन्त्रिभिर्भरतो वृतः ॥१८॥ शङ्खभेरीनिनादैश्च वन्दिभिश्चाभिवन्दितः । आर्यपादौ गृहीत्वा तु शिरसा धर्मकोविदः ॥ १९ ॥ पाण्डुरं छत्रमादाय शुक्लमाल्योपशोभितम् । शुक्ले च वालव्यजने राजार्हे हेमभूषिते ॥२०॥ उपवासकृशो दीनश्चीरकृष्णाजिनाम्बरः । भ्रातुरागमनं श्रुत्वा तत्पूर्वं हर्षमागतः । प्रत्युद्ययौ ततो रामं महात्मा सचिवैः सह ॥२१॥ समीक्ष्य भरतो वाक्यमुवाच पवनात्मजम् ॥२२॥ कच्चिन्न खलु कापेयी सेव्यते चलचित्तता । नहि पश्यामि काकुत्स्थं राममार्यं परन्तपम् । कच्चिन्न खलु दृश्यन्ते वानराः कामरूपिणः ॥ २३ ॥

"वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक्" इत्यमरः । मन्त्रिभिः वसिष्ठादिभिः । सचिवैः सुमन्त्रादिभिः । आर्यपादौ रामपादुके हेमभूषिते हेमदण्डभूषिते । तत्पूर्वं श्रवणादि हर्षमागतः, श्रवणात्पूर्वं तु नास्य हर्षोऽभूदित्यर्थः ॥ १८–२१ ॥ समीक्ष्येत्यर्धम् । समीक्ष्य समन्ताद्रामागमनं निरीक्ष्य ॥ २२ ॥ कच्चिदित्यादिसार्धश्लोक एकान्वयः । कच्चिदिति प्रश्ने । सेव्यते, त्वयेति शेषः । तत्र हेतुमाह—न हीति । रामस्य दूरागमनेऽपि नासीरचारिणः

द्विजातिमुख्यैरिति । सनैगमैः सवणिग्भिः । "वैदेहकस्सार्थवाहो नैगमो वाणिजो वणिक्" इत्यमरः ॥ १८ ॥ आर्यपादौ श्रीरामस्य पादुके ॥१९॥२०॥ भ्रातुरिति । तत्पूर्वं हर्षमागतः इत्यनेन श्रीरामागमनश्रवणात्पूर्वं हर्षो नासीदित्यवगम्यते ॥ २१–२२ ॥ कापेयी कपिसम्बन्धिनी चलचित्तता न सेव्यते कच्चित् नाप्यते कच्चित्,

For Private And Personal Use Only

कपयो दृश्येरन्, तेषां कामरूपित्वेन स्वरूपेणादर्शनेऽपि रूपान्तरेण वा दृश्येरन्, तदपि नास्तीत्यर्थः ॥ २३ ॥ अथेति। अर्थं विलम्बहेतुम् । "अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु" इति वैजयन्ती ॥ २४ ॥ सदेति। भरद्वाजप्रसादेन सदाफलानिति संबन्धः। प्राप्य, वानराः हृष्यन्तीति च शेषः ॥ २५ ॥ तस्य चेति । ससैन्यस्य रामस्य वासवेन एष वरो दत्तः अकालफलित्ववरो दत्तः, तथा सर्वगुणान्वितम्

अथैवमुक्ते वचने हनुमानिदमब्रवीत् । अर्थं विज्ञापयन्नेव भरतं सत्यविक्रमम् ॥ २४ ॥ सदाफलान् कुसुमितान् वृक्षान् प्राप्य मधुस्रवान् । भरद्वाजप्रसादेन मत्तभ्रमरनादितान् ॥२५॥ तस्य चैष वरो दत्तो वासवेन परन्तप । ससैन्यस्य तथाऽऽतिथ्यं कृतं सर्वगुणान्वितम् ॥२६॥ निस्वनः श्रूयते भीमः प्रहृष्टानां वनौकसाम्। मन्ये वानरसेना सा नदीं तरति गोमतीम् ॥ २७ ॥ रजोवर्षं समुद्भूतं पश्य वालुकिनीं प्रति ॥२८॥ मन्ये सालवनं रम्यं लोलयन्ति प्लवङ्गमाः ॥ २९ ॥ तदेतद्दृश्यते दूराद्विमलं चन्द्रसन्निभम् । विमानं पुष्पकं दिव्यं मनसा ब्रह्मनिर्मितम् ॥ ३० ॥ रावणं बान्धवैः सार्धं हत्वा लब्धं महात्मना ॥ ३१ ॥ तरुणादित्यसङ्काशं विमानं रामवाहनम् । धनदस्य प्रसादेन दिव्यमेतन्मनोजवम् ॥ ३२ ॥

आतिथ्यं मधुस्रवत्वरूपं भरद्वाजेन कृतम्, अतोऽकालफलित्वं मधुस्रवत्वं च वनस्य युक्तमित्यर्थः ॥ २६ ॥ एवं विलम्बहेतुमुक्त्वा समीपागमनचिह्नं दर्शयति—निस्वन इति। इदानीं वानरसेना गोमतीं नदीं तरतीति मन्ये, यस्मात् भीमो निस्वन इति भावः ॥ २७ ॥ ततोऽपि सन्निकर्षमाह—रज इति। समुद्भूतं रजोवर्षं पश्य । तस्माद्वालुकिनीं नदीं प्रति यातीति मन्ये ॥ २८ ॥ क्षिप्रं वानरसेनाया अनागमने हेतुमाह—मन्य इति । तस्मात्तस्याः विलम्बः ॥२९॥ विमानं तु दृश्यत इत्याह—तदेतादिति । पुष्पकं विमानं पुष्पकाख्यं विमानम् ॥ ३० ॥ ३१ ॥ तरुणेति । दिव्यं मनोजवं तरुणादित्यसङ्काशं राम त्वयेति शेषः ॥ ३१ ॥ अर्थं विलम्बहेतुं विज्ञापयन् । " अर्थः स्याद्विषये मोक्षे शब्दवाच्ये प्रयोजने । व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु ॥ " इति वैजयन्ती ॥ २४ ॥ हेतुमेवाह–सदाफलानित्यादि ॥ २५–२७ ॥ रज इति । वालुकिनीं नदीम् ॥ २८ ॥ २९ ॥ तदेतदिति । मनसा ब्रह्मनिर्मितं विश्वकर्मणा मनसा ब्रह्मार्थं निर्मितम् ॥ ३० ॥ ३१ ॥ तरुणेति । एतद्धनदस्य प्रसादेन ब्रह्मवरप्रसादेन, धनदस्य धनदसम्बन्धीत्यर्थः । " परेण तपसा लेभे यत्कुबेरः पितामहात् " इति

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

वाहनमेतद्विमानम्, प्रसादेन धनदस्य ब्रह्मप्रसादेन धनदस्य लब्धमित्यर्थः। "परेण तपसा लेभे यत्कुबेरः पितामहात्" इति सुन्दरकाण्डोक्तेः ॥ ३२ ॥ एतस्मिन्निति। आसत इति शेषः ॥ ३३–३५ ॥ प्राञ्जलिरिति। यथार्थेन स्वागतेन, चतुर्दशे वर्षे पूर्णे अवश्यमागमिष्यामीति प्रतिज्ञानुसारिणा स्वागमनेनेत्यर्थः। अपूजयत् अश्लाघयत् ॥ ३६–३९ ॥ रामानु०—मेरुस्थमिव भास्करमित्यस्यानन्तरं, ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम्। हंसयुक्तं महावेगं निष्पपात

एतस्मिन् भ्रातरौ वीरौ वैदेह्या सह राघवौ। सुग्रीवश्च महातेजा राक्षसश्च विभीषणः ॥ ३३ ॥ ततो हर्षसमुद्भूतो निस्वनो दिवमस्पृशत्। स्त्रीबालयुववृद्धानां रामोऽयमिति कीर्तिते ॥ ३४ ॥ रथकुञ्जरवाजिभ्यस्तेऽवतीर्य महीं गताः। ददृशुस्तं विमानस्थं नराः सोममिवाम्बरे ॥ ३५ ॥ प्राञ्जलिर्भरतो भूत्वा प्रहृष्टो राघवोन्मुखः। स्वागतेन यथार्थेन ततो राममपूजयत् ॥३६॥ मनसा ब्रह्मणा सृष्टे विमाने भरताग्रजः। रराज पृथुदीर्घाक्षो वज्रपाणिरिवापरः ॥ ३७ ॥ ततो विमानाग्रगतं भरतो भ्रातरं तदा। ववन्दे प्रयतो रामं मेरुस्थमिव भास्करम् ॥ ३८ ॥ ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम्। हंसयुक्तं महावेगं निष्पपात महीतले ॥ ३९ ॥ आरोपितो विमानं तद्भरतः सत्यविक्रमः। राममासाद्य मुदितः पुनरेवाभ्यवादयत् ॥ ४० ॥ तं समुत्थाप्य काकुत्स्थश्चिरस्याक्षिपथं गतम्। अङ्के भरतमारोप्य मुदितः परिषस्वजे ॥ ४१ ॥ ततो लक्ष्मणमासाद्य वैदेहीं चाभ्यवादयत्। अभिवाद्य ततः प्रीतो भरतो नाम चाब्रवीत् ॥४२॥ सुग्रीवं केकयीपुत्रो जाम्बवन्तं तथाऽङ्गदम्। मैन्दं च द्विविदं नीलमृषभं परिषस्वजे ॥४३॥ सुषेणं च नलं चैव गवाक्षं गन्धमादनम्। शरभं पनसं चैव भरतः परिषस्वजे ॥ ४४ ॥

महीतले ॥ इति पाठः। अयं श्लोकः केषुचित्कोशेषु लेखकप्रमादात्पतितः ॥ ३९ ॥ आरोपित इति। अत्र भरतस्य विमानारोपणं सर्वेषां प्रदर्शनार्थमिति बोध्यम् ॥ ४० ॥ ४१ ॥ तत इति। लक्ष्मणमासाद्य कृतनमस्कारं लक्ष्मणमालिङ्गनेन सम्भाव्य। इदं च लक्ष्मणस्य कनिष्ठत्वात्। लक्ष्मणेन चिकीर्षितो

सुन्दरकाण्डेऽभिहितत्वात ॥ ३२ ॥ राक्षसश्च विभीषणः इत्यनन्तरम् आसत इति शेषः ॥ ३३–४१ ॥ ततो लक्ष्मणमिति। लक्ष्मणमासाद्य कृतनमस्कारं लक्ष्मण

For Private And Personal Use Only

नमस्कारो रामसन्निधौ भरतेन प्रतिषेधित इति चाहुः। वैदेहीं चाभ्यवादयत्। चकारो रामनमस्कारं समुच्चिनोति।'न सङ्ख्ये भरतानुजः' इत्युक्तेः। "सीतामादाय गच्छ त्वमग्रतो भरताग्रज" इत्यत्र बहुव्रीहिरित्युक्तम्। न च वैपरीत्यं शङ्क्यम्। पुष्ये जातस्तु भरतः, सार्पे जातौ तु सौमित्री इति जन्मक्रमोक्तेः। पायसप्रदाने विवाहे च प्राथम्यं तत्र परिहृतम्। लक्ष्मणासादनानन्तरं सीतानमस्काराभिधानात् सीता तारादिभिः सह रामसमीप

ते कृत्वा मानुषं रूपं वानराः कामरूपिणः। कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा ॥ ४५ ॥ अथाब्रवीद्राजपुत्रः सुग्रीवं वानरर्षभम्। परिष्वज्य महातेजा भरतो धर्मिणां वरः ॥ ४६॥ त्वमस्माकं चतुर्णां तु भ्राता सुग्रीव पञ्चमः। सौहृदाज्जायते मित्रमपकारोऽरिलक्षणम् ॥ ४७ ॥ विभीषणं च भरतः सान्त्ववाक्यमथाब्रवीत्। दिष्ट्या त्वया सहायेन कृतं कर्म सुदुष्करम् ॥४८॥ शत्रुघ्नश्च तदा राममभिवाद्य सलक्ष्मणम्। सीतायाश्चरणौ पश्चाद्विनयादभ्यवादयत् ॥ ४९ ॥ रामो मातरमासाद्य विषण्णां शोककर्शिताम्। जग्राह प्रणतः पादौ मनो मातुः प्रसादयन् ॥५०॥

एव किञ्चिदन्यत्र स्थितेत्यवगम्यते ॥ ४२–४४ ॥ रामानु०—लक्ष्मणासादनानन्तरं देवीनमस्काराभिधानात्, "अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम्। गन्तुमिच्छे सहायोध्यां राजधानीं त्वया सह ॥" इति प्रार्थितप्रकारेण तारादिभिः परिवृता सती रामसमीप एव किञ्चिदन्यत्र स्थितेत्यवगम्यते ॥ ४२ ॥ त इति। मानुषं रूपं कृत्वा, स्थिता इति शेषः ॥ ४५–४९ ॥ राम इति। मनो मातुः प्रसादयन्निति पूर्वं त्वद्वाक्यं नाश्रौषमिति त्वया मनस्तापो न कार्य इत्येवं प्रसन्नामकरोदित्यर्थः॥५०॥

मालिङ्गनेन सम्भाव्य वैदेहीं चाभ्यवादयत, "अन्वेतुः पाञ्चजन्यात्मा कैकेय्यां भरतोऽभवत्। तदन्वेशुस्सुमित्रायामनन्तात्मा च लक्ष्मणः। सुदर्शनात्मा शत्रुघ्नो द्वौ जातौ युगपत् प्रिये॥" इति पार्वतीं प्रति शिवेनोक्तपाद्मपुराणवचनप्रकारेण रामायणोक्तप्रकारेण च भरतस्य ज्येष्ठत्वादेवं व्याख्यानं कृतम्। वैदेहीं चेति चकारेण रामनमस्कारं समवधत्तेति। परे तु यद्यपि लक्ष्मणो भरतात्कनिष्ठो वयसा, स्पष्टं चेदं जन्मप्रकरणे। तथापि ज्येष्ठानुवर्तनेन स्वापेक्षयाऽधिकगुणत्वेन स्वव्यवहारेण ज्येष्ठानुवृत्तिरेवं कर्तव्येति भरतं प्रत्युपदेशदानेन च गुरुत्वबुद्ध्या तस्य नतिरुचितैव। किञ्च कौसल्यायै प्रथमं दत्तपायसांशजत्वाल्लक्ष्मणस्य ज्येष्ठत्वम्। ततो हि कैकेय्यै पायसार्धदानम्। तदंशजश्च शत्रुघ्न इति स एव भरतात्कनिष्ठः, अत एव वैदेहीं चेति चकारस्स्वरसतस्सङ्गच्छते, अत एव च शत्रुघ्नकृतो लक्ष्मणनमस्कार उपपद्यते। तयोर्युगपदुत्पन्नत्वादित्याहुः ॥ ४२–५० ॥

अभिवाद्येति । यशस्विनीं, रावणजयस्य तन्मूलत्वात् सर्वैः प्रशस्यमानामित्यर्थः । पुरोहितं वसिष्ठम्, अभिवाद्येत्यनुषज्यते । अभिवाद्योपागमदित्यन्वयः ॥५१–५५॥ रामानु०–कैकेय्याः यशस्विनीमिति विशेषणं देवकार्यहेतुभूतत्वादृषिः प्रायुङ्क्त ॥५१॥ एतत्त इत्यादिसार्धश्लोकद्वयमेकान्वयम् । हे राजन् ! मया

अभिवाद्य सुमित्रां च कैकेयीं च यशस्विनीम् । स मातृश्च ततः सर्वाः पुरोहितमुपागतम् ॥५१॥ स्वागतं ते महाबाहो कौसल्यानन्दवर्धन । इति प्राञ्जलयः सर्वे नागरा राममब्रुवन् ॥ ५२ ॥ तान्यञ्जलिसहस्राणि प्रगृहीतानि नागरैः । व्याकोशानीव पद्मानि ददर्श भरताग्रजः ॥ ५३ ॥ पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् । चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित् । अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः ॥ ५४ ॥ एतत्ते रक्षितं राजन् राज्यं निर्यातितं मया । अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः ॥५५॥ यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् । अवेक्षतां भवान् कोशं कोष्ठागारं पुरं बलम् । भवतस्तेजसा सर्वं कृतं दशगुणं मया ॥५६॥ तथा ब्रुवाणं भरतं दृष्ट्वा तं भ्रातृवत्सलम् । मुमुचुर्वानरा बाष्पं राक्षसश्च विभीषणः ॥ ५७ ॥ ततः प्रहर्षाद्भरतमङ्कमारोप्य राघवः । ययौ तेन विमानेन ससैन्यो भरताश्रमम् ॥ ५८ ॥ भरताश्रममासाद्य ससैन्यो राघवस्तदा । अवतीर्य विमानाग्रादवतस्थे महीतले ॥५९॥ अब्रवीच्च तदा रामस्तद्विमानमनुत्तमम् । वह वैश्रवणं देवमनुजानामि गम्यताम् ॥ ६० ॥

रक्षितं न्यासत्वेन पालितम् एतद्राज्यं ते निर्यातितं तुभ्यं निवेदितम् । कोष्ठागारं धान्यशालाम् । दशगुणत्वं रामनिर्गमनकालिककोशापेक्षया ॥ ५५ ॥ ५६ ॥ तथेति । मुमुचुरिति । स्वकुलीनेष्वेतादृशभ्रातृवृत्त्यदर्शनादिति भावः ॥ ५७ ॥ तत इति भरताश्रमं नन्दिग्रामम् ॥ ५८ ॥ ५९ ॥ अब्रवीचेति । गम्यतामित्यनन्तरमितिकरणं बोध्यम् ॥ ६० ॥

कैकेयीं च यशस्विनीम्, अस्या मनोदाढर्येन राजा नरकात्तारितः, देवा ब्रह्मर्षयश्च परमं सुखं प्राप्ताः, रामस्य च यशोऽजायत, अतः एषा यशस्विन्येव॥५१॥५२॥ व्याकोशानि विकसितानि ॥ ५३ ॥ ५४ ॥ ते निर्यातितं तुभ्यं निवेदितम् ॥ ५५ ॥ ५६ ॥ विभीषणश्च बाष्पं मुमोच ईदृशा अपि भ्रातरस्सन्तीत्यानन्देन स्वस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तत इति । दिशमागम्य दिशमुद्दिश्य ॥ ६१ ॥ पुरोहितस्येति । आत्मसमस्य स्वानुरूपस्य, पृथगासने तेन सहैवोपविवेश, पृथगासने युगपदेवोप विविशतुरित्यर्थः ॥ ६२ ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

ततो रामाभ्यनुज्ञातं तद्विमानमनुत्तमम् । उत्तरां दिशमागम्य जगाम धनदालयम् ॥ ६१ ॥ पुरोहितस्यात्मसमस्य राघवो बृहस्पतेः शक्र इवामराधिपः । निपीड्य पादौ पृथगासने शुभे सहैव तेनोपविवेश राघवः ॥ ६२ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये श्रीमद्युद्धकाण्डे त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

शिरस्यञ्जलिमाधाय कैकेय्यानन्दवर्धनः । बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम् ॥ १ ॥
पूजिता मामिका माता दत्तं राज्यमिदं मम । तद्ददामि पुनस्तुभ्यं यथा त्वमददा मम ॥ २ ॥

एवं पुष्पकं धनदाय प्रेषयित्वा वसिष्ठेन च समागम्य भरतानुज्ञां विना नायोध्या प्रवेष्टव्येति तात्पर्येण नन्दिग्राम एवासनोपविष्टे रामे निविष्टेषु च पौर वर्गेषु सन्निहितासु च मातृषु तादात्विकसूक्ष्मेङ्गितदर्शननिपुणो भरतः स्वहृदयमग्रजाय निवेदयति–शिरस्यञ्जलिमित्यादिना । शिरस्यञ्जलिमाधाये त्यनेन पूर्वकृता प्रपत्तिः स्मार्यते । अनन्यगतिकत्वसूचिका मुद्रा ह्यञ्जलिः । कैकेय्यानन्दवर्धन इत्यनेन भरतवचने कैकेयीसन्तोषो मुखप्रसादादिनाऽव गम्यत इति द्योत्यते ॥ १ ॥ रामानु०–पूर्वसर्गे 'कुशलं पर्यपृच्छंस्ते प्रहृष्टा भरतं तदा' इत्यस्यानन्तरवर्ति 'अथाब्रवीत्त्वमस्माकम्' इति च श्लोकद्वयमत्र सर्गादौ केषुचित्कोशेषु प्रमादा लिखितम् । सर्गादिस्तु शिरस्यञ्जलिमाधायेति ॥ १ ॥ रामस्य राज्यपरिग्रहे अपरिहार्यं हेतुं दर्शयति–पूजितेति । मामिका मत्संबन्धिनी माता पूजिता, राज्यपरि त्यागपूर्वकवनवासाङ्गीकारेण त्वया तोषिता । अनन्तरमिदं राज्यम्, मम मयि, चित्रकूटे दत्तम् । तद्राज्यं त्वं यथा येन प्रकारेण ममाददाः तेन

तद्वैपरीत्यजशोकेन च ॥ ५७–६१ ॥ पुरोहितस्येति । आत्मसमस्य स्वानुरूपस्य पृथगासने तेन वसिष्ठेन सहैवोपविवेश, पृथगासने युगपदेवोपविविशतु रित्यर्थः ॥ ६२ ॥ इति श्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायां त्रिंशदुत्तरशततमः सर्गः ॥ १३० ॥

॥ १ ॥ पूजिता मामिका माता पूजिता राज्यपरित्यागपूर्वकवनवासाङ्गीकारेण त्वया तोषिता । अनन्तरं मम इदं राज्यं चित्रकूटे दत्तम्, तद्राज्यं त्वं यथा येन

For Private And Personal Use Only

प्रकारेण तुभ्यं ददामि । न्यासरूपेण मयि स्थापितं राज्यं न्यासरूपत्वाग्रहणेनैव पुनर्ददामीत्यर्थः ॥ २ ॥ अयोध्यायां राज्यभोगान् यथाकामं भोक्ष्ये राज्यं त्वमेव परिपालयेत्याकाङ्क्षायामाह–धुरमिति । यद्वा पुनरर्थनपर्यन्तं न्यासधारणे न दोष इत्याशङ्क्याह–धुरमिति । एकाकिना असहायेन, बलीयसा ऋषभेण न्यस्तां धुरं किशोरवत् बालवत्स इव गुरुं भारं वोढुं नोत्सहे ॥ ३ ॥ तर्हि कथमेतावत्पर्यन्तं सोढमित्यत आह–वारीति ।

धुरमेकाकिना न्यस्तामृषभेण बलीयसा । किशोरवद् गुरुं भारं न वोढुमहमुत्सहे ॥ ३ ॥ वारिवेगेन महता भिन्नः सेतुरिव क्षरन् । दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम् ॥ ४ ॥ गतिं खर इवाश्वस्य हंसस्येव च वायसः । नान्वेतुमुत्सहे राम तव मार्गमरिन्दम ॥ ५ ॥ यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने । महांश्च सुदुरारोहो महास्कन्धप्रशाखवान् ॥ ६ ॥ शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन् । तस्य नानुभवेदर्थं यस्य हेतोः स रोप्यते ॥ ७॥ एषोपमा महाबाहो त्वदर्थं वेत्तुमर्हसि । यद्यस्मान् मनुजेन्द्र त्वं भक्तान् भृत्यान्न शाधि हि ॥ ८ ॥

महता वारिवेगेन भिन्नः अत एव क्षरन् बहिर्निस्सरन् जलसेतुरिव इदं राज्यच्छिद्रं छिद्रवद्राज्यम्, असंवृतं संवरणरहितं सत् दुर्बन्धनं मन्ये, यथा महता वारिवेगेन भिन्नः क्षरन् सेतुर्वारिवेगाहतिनिरोधकतृणपूलशाखापुञ्जादिसंवरणं विना न बद्धुं शक्यते एवं बहुविधच्छिद्रं राज्यमपि मन्त्रगोपनादिराजगुणावरणं विना पालितुं न शक्यमिति भावः ॥ ४ ॥ अहमिव भवानपि लोकान् गुणैर्वशीकरोत्वित्यत्राह–गतिमिति ॥ ५ ॥ तर्हि ममैवोपोद्बलेन भवानेव राज्यं परिपालयत्वित्याशङ्क्य तर्हि तातेन भवत्पोषणं विफलं स्यादित्याह–यथा चेत्यादिश्लोकत्रयेण । अन्तर्निवेशने आरोपितः उप्तः,

प्रकारेण मम अदत्ताः तेन प्रकारेण पुनस्तुभ्यं ददामि न्यासरूपेण मयि स्थापितं राज्यं पुनर्ददामीत्यर्थः ॥ २ ॥ त्वमेव राज्यं परिपालयेत्याशङ्क्याह–धुरमिति । एकाकिना असहायेन बलीयसा ऋषभेण न्यस्तां धुरं किशोरीव वत्सतरीव गुरुं भारं वोढुम् अहं नोत्सहे इति योजना ॥३–५॥ वंशपरम्परागतराज्यपरिपालनार्थं दशरथेनोत्पाद्य संवर्धितस्य रामस्य सकलगुणसम्पन्नस्याप्यभिषेकपूर्वकप्रजापरिपालनरूपफलाप्रदर्शनात् फलाप्रदर्शकवृक्षोपम्यमाह–यथा चेत्यादिश्लोकत्रयेण ।

स० –यथा चारोपितः बीजावापादिद्वारा । अन्तर्निवेशने मूलस्य भूम्यन्तर्निवेशने जाते मूलप्रवेशने जाते वृक्षो महान् जातः, भाविसंज्ञा गृहीत्वेयमुक्तिः । महास्कन्धः प्रशाखवान् । “ शाखा वेदविभागे च पादपाङ्गेऽन्तिकेऽपि च ” इति विश्वात्प्रशाखावानिति यद्यपि वक्तव्यं तथापि ‘ अपि माषं मषं कुर्याच्छन्दोभङ्गं न कारयेत् ’ इत्युक्तेर्ह्रस्वः । यद्वा महास्कन्धः प्रकृष्टाः शाखा यस्य स प्रशाखः । महास्कन्धः तद्वान् जातः । पुष्पितः, तारकादित्वम् । यस्य हेतोः येन कारणेन आरोपितः ॥ ६ ॥

For Private And Personal Use Only

वृक्षः महान् जातः, सुदुरारोहो महास्कन्धप्रशाखवान् पुष्पितोऽपि भूत्वा फलानि न प्रदर्शयन् यथा शीर्येत अफलो भवति । यथा च यस्य फलस्य हेतोर्येन रोप्यते सः रोपयिता तस्य वृक्षस्य अर्थे तत्फलं नानुभवेत् । मनुजेन्द्र ! भक्तान् भृत्यान् अस्मान्न शाधि यदि महाबाहो ! एषोपमा त्वदर्थे युक्तेति वेत्तुमर्हसीति योजना । अत्र वृक्षरामयोरारोपयितृदशरथयोश्च उपमानोपमेयभावः । बीजावापस्य पुत्रोत्पादेश्च महास्कन्धस्य सभ्रातृकत्वस्य च

जगदद्याभिषिक्तं त्वामनुपश्यतु सर्वतः । प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम् ॥ ९ ॥
तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिस्वनैः । मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व राघव ॥ १० ॥
यावदावर्तते चक्रं यावती च वसुन्धरा । तावत्त्वमिह सर्वस्य स्वामित्वमनुवर्तय ॥ ११ ॥
भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः । तथेति प्रतिजग्राह निषसादासने शुभे ॥ १२ ॥

प्रशाखवत्त्वस्य सुग्रीवादिमित्रगणस्य च पुष्पाणां कल्याणगुणानां च राज्याकरणस्य फलाभावस्य च साम्यं द्योत्यते ॥ ६–८ ॥ भवतस्तु राज्यपरिपालने महती शक्तिरित्याह–जगदिति ॥ ९ ॥ सर्वभोगार्हस्त्वमेव भोगान् भुङ्क्ष्वेत्याह–तूर्येति । काञ्चीनूपुरनिस्वनैरित्यनेन प्रबोधकाललित नृत्यं गम्यते ॥ १० ॥ मध्ये स्वस्य राज्याशानुद्गमं द्योतयन्नाह–यावदिति । चक्रं ज्योतिश्चक्रमिति यावत् । यावती यावत्कालस्थितिः, तावत् तावत्कालम्, सर्वस्य राज्यस्य स्वामित्वमनुवर्तय । स्वामित्वानुवर्तनं हि पालनमेव ॥ ११ ॥ भरतस्येति । निषसादेति, भरत इति शेषः ॥ १२ ॥

अन्तर्निवेशने आरोपितः उप्तः वृक्षो महास्कन्धप्रवालवान् सुदुरारोहो जातः सन् पुष्पितो भूत्वा फलानि न प्रदर्शयन् शीर्येत शीर्येच्चेत् यस्य हेतोः यस्य फलस्य हेतोः येन रोप्यते स रोपयिता तस्य वृक्षस्यार्थे फलं यथा यथावन्नानुभवेत एवं हि यस्मात्कारणात् हे मनुजेन्द्र ! भक्तान् भृत्यान् अस्मान्न शाधि यदि तदा दशरथो वृक्षारोपकतुल्यः, दशरथस्य प्रजापरिपालनरूपफलाप्रदर्शनात्फलवृक्षतुल्यस्त्वमित्यर्थः । एतदुक्तं भवति–केनचित्कुटुम्बिना कुटुम्बार्थे समारोपितो वृक्षः पुष्पितो भूत्वा यदि न फलेत् तदा तस्य कुटुम्बस्य तद्वृक्षान्न प्रयोजनं भवेत् । एवं पित्रा जनितस्सर्वगुणसम्पन्नो यदि त्वं लोकं न रक्षेः तदा लोकस्य त्वया न प्रयोजनमिति ॥ ६–८ ॥ यदेवमत आह–जगदद्येत्यादि ॥ ९ ॥ १० ॥ यावदिति । चक्रं ज्योतिश्चक्रं यावदावर्तते परिभ्रमति । अनेन कालावधिरुच्यते । यावती यावत्कालस्थितिः, यावत्तिष्ठतीत्यर्थः ॥ ११–१५ ॥

तत इति । श्मश्रुवर्धकाः श्मश्रुकर्तकाः । "वर्धनं छेदनेऽथ द्वे आनन्दनसभाजने" इत्यमरः । सुशीघ्राः अभिषेकमुहूर्तातिलङ्घनं विना शीघ्रं कर्तुं समर्थाः । उपासत श्मश्रूण्यवर्धन्त । भरतलक्ष्मणापेक्षया श्मश्रुवर्धकानां बहुवचनम् । राघवमिति भरतलक्ष्मणयोः प्रदर्शनार्थम् ॥ १३ ॥ पूर्वमित्यादिश्लोकद्वय मेकान्वयम् । 'न मे स्नानं बहुमतं तं विना कैकयीसुतम्' इत्युक्त्या प्रथमं स्नानं भरतस्य, सुग्रीवस्यापि किष्किन्धानिर्गमनप्रभृति स्नानाभावादद्य स्नानम् ।

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः । सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत ॥ १३ ॥ पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले । सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥१४॥ विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः । महार्हवसनो रामस्तस्थौ तत्र श्रिया ज्वलन् ॥ १५ ॥ प्रतिकर्म च रामस्य कारयामास वीर्यवान् । लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥ १६ ॥ प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः । आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥१७॥ ततो वानरपत्नीनां सर्वासामेव शोभनम् । चकार यत्नात् कौसल्या प्रहृष्टा पुत्रलालसा ॥१८॥ ततः शत्रुघ्नवचनात् सुमन्त्रो नाम सारथिः । योजयित्वाऽभिचक्राम रथं सर्वाङ्गशोभनम् ॥ १९ ॥ अर्कमण्डल सङ्काशं दिव्यं दृष्ट्वा रथोत्तमम् । आरुरोह महाबाहू रामः सत्यपराक्रमः ॥ २० ॥

तथा विभीषणस्यापि लङ्कानिर्गमनप्रभृति स्नानाभावात् । शत्रुघ्नस्य स्नानाश्रवणमधिकर्तृत्वेन तदानीमवसराभावात् । पूर्वं व्रतग्रहणानुक्तेश्च । "नन्दि ग्रामे जटां हित्वा भ्रातृभिः सहितोऽनघः" इति संक्षेपोक्तेरत्रापि शत्रुघ्नस्नानमर्थसिद्धमित्याहुः । जटाशोधनं शुद्धकेशीकरणम् । स्नात इति कर्तरि क्तः । नानावर्णपुष्पयुक्तत्वेन चित्रमाल्यत्वम् । कुङ्कुमकर्पूरकस्तूर्यादिवस्तुभेदेन चित्रानुलेपनत्वम् । महार्हवसनं पीताम्बरम् । श्रिया अलङ्कारश्रिया । तत्र सिंहासने, ज्वलन् प्रकाशमानः तस्थौ ॥ १४ ॥ १५ ॥ प्रतिकर्मेति । प्रतिकर्म हाराद्यलङ्करणम् । इक्ष्वाकुकुलवर्धनः शत्रुघ्नः ॥ १६ ॥ प्रतिकर्मेति । ॥२७६१॥
आत्मनैव स्वयमेव ॥ १७ ॥ तत इति । शोभनं प्रतिकर्मेत्यर्थः ॥ १८-२० ॥

प्रतिकर्म अलङ्करणम् । इक्ष्वाकुकुलवर्धनः शत्रुघ्नः ॥ १६ ॥ आत्मनैव न सैरन्ध्रीहस्तेनेत्यर्थः ॥ १७ ॥ शोभनम् अलङ्करणम् ॥ १८ ॥ अभिचक्राम समीपमाज

सुग्रीव इति । दिव्यनिभैः दिव्यवस्त्रसदृशैः वस्त्रैः, उपलक्षिताविति शेषः ॥ २१ ॥ २२ ॥ अयोध्यायामिति । गत्वेति शेषः । मन्त्रयामासुः अभिषेकोपयोगिमङ्गलद्रव्यसंपादनार्थम् एवं कर्तव्यमिति मन्त्रयामासुः ॥ २३ ॥ उक्तमर्थं विवृणोति–अशोक इति । मन्त्रयन् अमन्त्रयन् ॥ २४ ॥ सर्वमित्यादिश्लोकद्वयमेकान्वयम् । अर्हथेति पूजायां बहुवचनम् ॥ २५ ॥ २६ ॥ हरीति । हरियुक्तं हरितवर्णयुक्ताश्वयुक्तम् ॥ २७ ॥ जग्राहेत्यादिश्लोकद्वयमेकान्वयम् । रश्मीन् जग्राह सारथ्यमकरोत् । लक्ष्मण इति । पुरतः स्थितो लक्ष्मणः व्यजनं तालवृन्तकं मूर्ध्नि सम्पर्यवीजयत् ॥२८॥ श्वेतं वालव्यजनं च जग्राह । "अहं सर्वं करिष्यामि" इति त्वरया उभयग्रहणम् । अपरं चन्द्रसङ्काशमित्यत्र जग्राहेत्यनुषज्यते ॥ २९ ॥

सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती । स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ॥ २१ ॥ वराभरणसम्पन्ना ययुस्ताः शुभकुण्डलाः । सुग्रीवपत्न्यः सीता च द्रष्टुं नगरमुत्सुकाः ॥२२॥ अयोध्यायां तु सचिवा राज्ञो दशरथस्य य । पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥२३॥ अशोको विजयश्चैव सुमन्त्रश्चैव सङ्गताः । मन्त्रयन् रामवृद्ध्यर्थमृद्ध्यर्थं नगरस्य च ॥ २४ ॥ सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः । कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् ॥ २५ ॥ इति ते मन्त्रिणः सर्वे सन्दिश्य तु पुरोहितम् । नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥ २६ ॥ हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः । प्रययौ रथमास्थाय रामो नगरमुत्तमम् ॥२७॥ जग्राह भरतो रश्मीन् शत्रुघ्नश्छत्रमाददे । लक्ष्मणो व्यजनं तस्य मूर्ध्नि सम्पर्यवीजयत् ॥ २८ ॥ श्वेतं च वालव्यजनं जग्राह पुरतः स्थितः । अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः ॥ २९ ॥

गाम ॥ १९ ॥ २० ॥ दिव्यनिभैः दिव्यकान्तिभिः वस्त्रैः युक्तौ जग्मतुः रथस्थं राममनुजग्मतुरित्यर्थः ॥ २१ ॥ २२ ॥ मन्त्रयामासुः अभिषेकोपयोगिमङ्गलद्रव्यसंपादनार्थमेव मन्त्रयामासुरित्यर्थः ॥ २३ ॥ अशोक इत्यादि श्लोकत्रयमेकं वाक्यम् । अशोकादयो रामवृद्ध्यर्थं सङ्गताः मन्त्रयन् मन्त्रयन्तः । महात्मनो रामस्याभिषेकार्थं यद्यत् तत्सर्वं मङ्गलपूर्वकं कर्तुमर्हथ । पूजायां बहुवचनम् । इति ते सर्वे मन्त्रिणः पुरोहितं सन्दिश्य रामदर्शनबुद्धयस्सन्तो नगरान्निर्ययुरिति सम्बन्धः ॥२४–२७॥ जग्राहेति । पुरतः स्थितो लक्ष्मणः व्यजनं तालवृन्तं तस्य मूर्ध्नि सम्पर्यवीजयत् । श्वेतं वालव्यजनं च जग्राहेति सम्बन्धः ॥ २८ ॥ २९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋषीति। समरुद्गणैः सवायुगणैः। रामस्य मधुरध्वनिः रावणनिरसनाद्यपदानकथनध्वनिः ॥ ३०–३२ ॥ शङ्खेति। शङ्खशब्दप्रणादैः शङ्खशब्दैः जनहर्षप्रणादैश्चेत्यर्थः ॥ ३३ ॥ ददृशुरिति। ये नगरं प्रविश्य वसिष्ठं पुरस्कृत्य रामाभिषेकममन्त्रयन् ते सुमन्त्रादयः ॥ ३४–३५ ॥

ऋषिसङ्घैस्तदाऽऽकाशे देवैश्च समरुद्गणैः। स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥ ३० ॥ ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम्। आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः ॥ ३१ ॥ नवनागसहस्राणि ययुरास्थाय वानराः। मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥ ३२ ॥ शङ्खशब्दप्रणादैश्च दुन्दुभीनां च निस्वनैः। प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम् ॥ ३३ ॥ ददृशुस्ते समायान्तं राघवं सपुरस्सरम्। विराजमानं वपुषा रथेनातिरथं तदा ॥ ३४॥ ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः। अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् ॥ ३५ ॥ अमात्यै र्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः। श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः ॥ ३६ ॥ स पुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः। प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः ॥ ३७ ॥ अक्षतं जातरूपं च गावः कन्यास्तथा द्विजाः। नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥३८॥ सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे। वानराणां च तत् कर्म राक्षसानां च तद्बलम्। विभीषणस्य संयोगमाचचक्षे च मन्त्रिणाम् ॥ ३९ ॥

अमात्यैरिति। प्रकृतिभिः पौरजनैः ॥३६॥ सेति। तूर्यैः तूर्यवादकैः। स्वस्तिको वाद्यविशेषः। मङ्गलानि प्रव्याहरद्भिः मङ्गलपाठकैः ॥ ३७ ॥ अक्षतमिति। हरिद्रया जातरूपमक्षतम्, वहद्भिरिति शेषः ॥३८॥ सख्यं चेत्यादिसार्धश्लोकमेकं वाक्यम्। सख्यं, जातमिति शेषः। मन्त्रिणां मन्त्रिभ्यः॥३९॥

स्तूयमानस्य रामस्य मधुरध्वनिः रावणनिरसनादिरामापदानरूपध्वनिरित्यर्थः ॥ ३०–३४ ॥ ते नागराः। वर्धयित्वा, आशीर्भिरिति शेषः ॥ ३५–४२ ॥

तिलकम्–शङ्खशब्देति। शङ्खशब्दप्रणादैः शङ्खशब्दैर्जनानां हर्षप्रणादैश्चेत्यर्थः। तदुक्तं पाद्मे–" आगतो रावणद्वेषी कुम्भकर्णखरान्तकः। अतिकायेन्द्रजिद्धन्ता महर्षिजनरक्षकः ॥ समस्तदेवताकार्यसंसिद्धो लक्ष्मणानुजः। सत्यैकनिरतश्शास्तापरदारसहोदरः ॥ सुग्रीवराज्यदो धन्वी रावणानुजराज्यदः। शरणागतसन्त्राता धर्मस्थापनतत्परः ॥ रामो दाशरथिः श्रीमान् भगवान् भरताग्रजः। शरण्यो राम इत्येवं शुश्रुवे काहलध्वनिः ॥ " इति ॥ ३३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रुत्वेत्यर्धम् । श्रुत्वा, सुग्रीवसख्यादिकमिति शेषः ॥ ४० ॥ ४१ ॥ तत इति । अभ्युच्छ्रयन् अभ्युदश्राययन्, उन्नम्य स्थापितवन्तः ॥ ४२ ॥ ऐक्ष्वाकेत्यर्धम् । राम इति शेषः ॥ ४३ ॥ अथाब्रवीदित्यादिश्लोकद्वयमेकान्वयम् । अथ रघुनन्दनः महात्मनः पितुर्भवनमासाद्य प्रविश्य च कौसल्या

श्रुत्वा तु विस्मयं जग्मुरयोध्यापुरवासिनः ॥ ४० ॥ द्युतिमानेतदाख्याय रामो वानरसंवृतः । हृष्टपुष्टजनाकीर्णा मयोध्यां प्रविवेश ह ॥ ४१ ॥ ततो ह्यभ्युच्छ्रयन् पौराः पताकास्ते गृहे गृहे ॥४२॥ ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ॥ ४३ ॥ अथाब्रवीद्राजसुतो भरतं धर्मिणां वरम् । अर्थोपहितया वाचा मधुरं रघुनन्दनः ॥ ४४ ॥ पितुर्भवनमासाद्य प्रविश्य च महात्मनः । कौसल्यां च सुमित्रां च कैकेयीमभिवाद्य च ॥ ४५ ॥ यच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत् । मुक्तावैडूर्यसङ्कीर्णं सुग्रीवाय निवेदय ॥ ४६ ॥ तस्य तद्वचनं श्रुत्वा भरतः सत्यविक्रमः । पाणौ गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ॥ ४७ ॥ ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च । गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ॥ ४८ ॥ उवाच च महातेजाः सुग्रीवं राघवानुजः । अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ॥ ४९ ॥ सौवर्णान् वानरेन्द्राणां चतुर्णां चतुरो घटान् । ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ॥ ५० ॥ यथा प्रत्यूषसमये चतुर्णां सागराम्भसाम् । पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥ ५१ ॥ एवमुक्ता महात्मानो वानरा वारणोपमाः । उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः ॥ ५२ ॥ जाम्बवांश्च हनूमांश्च वेगदर्शी च वानराः । ऋषभश्चैव कलशान् जलपूर्णानथानयन् ॥ ५३ ॥

प्रभृतीरभिवाद्य च भरतमब्रवीदिति योजना ॥ ४४ ॥ ४५ ॥ यच्चेति । साशोकवनिकम् अन्तःपुरोद्यानसहितम् ॥ ४६ ॥ ४७ ॥ तत इति । विविशुः, परिचारिका इति शेषः ॥ ४८–५० ॥ गमानु०—उवाचेति । दूतानाज्ञापय प्रभो इति पाठः ॥ ४९ ॥ यथेति । हे वानराः ! चतुर्णां सागराम्भसां चतुर्भिः

अथाब्रवीदित्यादि श्लोकद्वयमेकं वाक्यम् । पितुर्भवनमासाद्य कौसल्याद्या अभिवाद्य च भरतमब्रवीदिति पूर्वेण सम्बन्धः ॥ ४४–५० ॥ यथेति । हे वानराः ! चतुर्णां

For Private And Personal Use Only

सागराम्भोभिः पूर्णैर्घटैः उपलक्षिताः प्रत्यूषसमये यथा प्रतीक्षध्वं यथा अस्मान् प्रतीक्षिष्यध्वे तथा कुरुतेति योजना । सागरजलानयननियोगो नदीजला नयननियोगस्याप्युपलक्षकः ॥५१-५३॥ जलपूर्णानथानयन्नित्युक्तमेवार्थं विवृणोति-नदीशतानामिति ॥५४॥ एवं जाम्बवद्धनुमद्वेगदर्शर्षभैर्नदीजला

नदीशतानां पञ्चानां जलं कुम्भेषु चाहरन् ॥ ५४ ॥ पूर्वात् समुद्रात् कलशं जलपूर्णमथानयत् । सुषेणः सत्त्व सम्पन्नः सर्वरत्नविभूषितम् ॥५५॥ ऋषभो दक्षिणात्तूर्णं समुद्राज्जलमाहरत् । रक्तचन्दनशाखाभिः संवृतं काञ्चनं

॥ श्रीरामचन्द्रपरब्रह्मणे नमः ॥

श्रीरामस्य पट्टाभिषेकपट्टः ॥

घटम् ॥५६॥ गवयः पश्चिमात्तोयमाजहार महार्णवात् । रत्नकुम्भेन महता शीतं मारुतविक्रमः ॥ ५७ ॥ उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः । आजहार स धर्मात्मा नलः सर्वगुणान्वितः ॥ ५८ ॥ ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् । अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह । पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ॥ ५९ ॥

ततः स प्रयतो वृद्धो वसिष्ठो ब्राह्मणैः सह । रामं रत्नमये पीठे सहसीतं न्यवेशयत् ॥ ६० ॥

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः । कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ॥६१॥

अभ्यषिञ्चन् नरव्याघ्रं प्रसन्नेन सुगन्धिना । सलिलेन सहस्राक्षं वसवो वासवं यथा ॥ ६२ ॥

नयनमुक्त्वा सुषेणर्षभगवयनलैः सागरजलानयनं दर्शयति-पूर्वादिति ॥५५॥ ऋषभो दक्षिणादिति । अयं चर्षभः पूर्व स्मादन्यः॥५६-५८॥ तत इत्यादिसार्धश्लोक एकान्वयः । तत् प्रसिद्धम् । तज्जलं तेषां नदीसागराणां जलम्॥५९-६२॥

सागराम्भसां चतुर्भिस्सागराम्भोभिः पूर्णैर्घटैरुपलक्षिताः, प्रत्यूषसमये यथा प्रतीक्षिष्यध्वे तथा कुरुतेति योजना ॥ ५१-५८ ॥ तत इति । तत् प्रसिद्धम् वानर श्रेष्ठैरानीतं तज्जलं नदीसागराणां जलम् । श्रेष्ठाय पुरोहिताय वसिष्ठाय ॥ ५९ ॥ तत इति । प्रयतः यत्नवान् । रत्नमये पीठे रत्नसिंहासने सहसीतं रामं न्यवेशयत ॥ ६० ॥ वसिष्ठ इत्यादिश्लोकद्वयमेकं वाक्यम् । वसिष्ठादयः प्रसन्नेन निर्मलेन सकलवेदोक्तमन्त्राभिमन्त्रणादतिपवित्रेण सुगन्धिना सलिलेन नरव्याघ्रं श्रीराममभ्यषिञ्चन्निति सम्बन्धः ॥ ६१-६९ ॥ ॥२७८॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ऋत्विग्भिरिति । ते वसिष्ठादयः ऋत्विगादिभिः सहाभ्यषिञ्चन्निति योजना ॥ ६३ ॥ सर्वौषधिरसैरित्यत्रापि अभ्यषिञ्चंस्ते इत्यनुषज्यते ॥ ६४॥ ६५॥ मालामिति । शतपुष्करां शतपद्माम् ॥ ६६ ॥ सर्वेति । सर्वरत्नैः नवरत्नैः समायुक्तम् , मणिरत्नेन मणिश्रेष्ठेन नायकेन मध्ये विराजन्तम् मुक्ताहारं मुक्ताप्रचुरहारं ददौ । वायुरित्यनुषज्यते ॥ ६७ ॥ ६८ ॥ पूर्वं रामविश्लेषे " अपि वृक्षाः परिम्लानाः" इत्युक्तावस्थं वस्तुजातं रामसंश्लेषे तादृगवस्थां

ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा । योधैश्चैवाभ्यषिञ्चंस्ते सम्प्रहृष्टाः सनैगमैः ॥ ६३ ॥ सर्वौषधिरसै दिव्यैर्दैवतैर्नभसि स्थितैः । चतुर्भिर्लोकपालैश्च सर्वैर्देवैश्च सङ्गतैः॥६४॥[ब्रह्मणा निर्मितं पूर्वं किरीटं रत्नशोभितम् । अभिषिक्तः पुरा येन मनुस्तं दीप्ततेजसम् ॥ तस्यान्ववाये राजानः क्रमाद्येनाभिषेचिताः । सभायां हेमक्लृप्तायां शोभितायां महाजनैः ॥ रत्नैर्नानाविधैश्चैव चित्रितायां सुशोभनैः । नानारत्नमये पीठे कल्पयित्वा यथाविधि ॥ किरीटेन ततः पश्चाद्वसिष्ठेन महात्मना । ऋत्विग्भिर्भूषणैश्चैव समयोक्ष्यत राघवः ॥] छत्रं तु तस्य जग्राह शत्रुघ्नः पाण्डुरं शुभम् । श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ॥* अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः ॥ ६५ ॥ मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम् । राघवाय ददौ वायुर्वासवेन प्रचोदितः ॥ ६६ ॥ सर्वरत्नसमायुक्तं मणिरत्नविभूषितम् । मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः ॥ ६७ ॥ प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः । अभिषेके तदर्हस्य तदा रामस्य धीमतः ॥ ६८ ॥ भूमिः सस्यवती चैव फलवन्तश्च पादपाः । गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ॥ ६९ ॥

विहाय प्रहृष्टतममभूदित्याह–भूमिरिति ॥ ६९ ॥ रामानु०–पूर्वं रामविश्लेषे " विषये ते महाराज रामव्यसनकर्शिताः । अपि वृक्षाः परिम्लानाः सपुष्पांकुरकोरकाः । जलजानि च पुष्पाणि माल्यानि स्थलजानि च ॥ " इत्युक्तावस्थापन्नं वस्तुजातं रामसंश्लेषे तादृशीमवस्थां विहाय प्रहृष्टतममभूदितीममर्थं दर्शयति–भूमिः सस्यवतीति ॥ ६९ ॥

* अपरं चन्द्रसङ्काशं वालव्यजनमुत्तमम् । हृष्टो रामस्य जग्राह राक्षसेन्द्रो विभीषणः ॥ इति पाठान्तरम् ।

For Private And Personal Use Only

सहस्रशतमिति । धेनूनां नवप्रसूतिकानाम् । "धेनुः स्यान्नवसूतिका" इत्यमरः । पूर्वं हिरण्यदानादेः पूर्वम् । सुग्रीवादिभ्यः पूर्वं वा ॥ ७०॥७१ ॥ अर्करश्मीति । मणिविग्रहां मणिप्रचुराम् ॥७२॥ वैडूर्येति । धृतिमान् प्रीतिमान् ॥७३॥ मणिप्रवरेति । सीतायै प्रददौ हनुमते दातव्यमित्याशयेन ददौ ॥७४॥

सहस्रशतमश्वानां धेनूनां च गवां तथा । ददौ शतं वृषान् पूर्वं द्विजेभ्यो मनुजर्षभः ॥७०॥ त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः । नानाभरणवस्त्राणि महार्हाणि च राघवः ॥७१॥ अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम् । सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजर्षभः ॥७२॥ वैडूर्यमणिचित्रे च वज्ररत्नविभूषिते । वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ ॥७३॥ मणिप्रवरजुष्टं च मुक्ताहारमनुत्तमम् । सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् ॥७४॥ अरजे वाससी दिव्ये शुभान्याभरणानि च । अवेक्षमाणा वैदेही प्रददौ वायुसूनवे ॥ ७५ ॥ अवमुच्यात्मनः कण्ठाद्धारं जनकनन्दिनी । अवैक्षत हरीन् सर्वान् भर्तारं च मुहुर्मुहुः ॥ ७६ ॥ तामिङ्गितज्ञः सम्प्रेक्ष्य बभाषे जनकात्मजाम् । प्रदेहि सुभगे हारं यस्य तुष्टाऽसि भामिनि । पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि सर्वशः ॥ ७७॥ ददौ सा वायुपुत्राय तं हारमसितेक्षणा । हनुमांस्तेन हारेण शुशुभे वानरर्षभः । चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाऽचलः ॥ ७८ ॥ ततो द्विविदमैन्दाभ्यां नीलाय च परन्तपः । सर्वान् कामगुणान् वीक्ष्य प्रददौ वसुधाधिपः ॥ ७९ ॥

अरजे इति । अरजे निर्मले । अकारान्तत्वमार्षम् । अवेक्षमाणा, भर्तारमिति शेषः । स्त्रियाः स्वातन्त्र्याभावात् भर्त्रनुज्ञां काङ्क्षितवतीति भावः ॥ ७५ ॥ रामानु०—अरजे इति । अवेक्षमाणो वैदेहीं प्रददौ वायुसूनवे इति पाठः ॥ ७५ ॥ अवमुच्येति । हारं रामदत्तम् । सदसि मह्यं हारप्रदानं कस्मैचित् पारितोषिकतया दापयितुमिति निश्चित्य अयं हारः एषु कस्मै देय इत्याशयेनावैक्षतेत्यर्थः ॥ ७६ ॥ तामिङ्गितज्ञ इत्यादिसार्धश्लोक एकान्वयः । प्रदेहीति । यस्य यस्मिन् । पौरुषं बलं समुद्रलङ्घनेन । विक्रमो लङ्कादहनेन । बुद्धिः अशोकवनिकाप्रवेशेन । सर्वशः सर्वाणि, यस्मिन् सन्तीति यस्य सन्तुष्टाऽसि तस्मै देहीति योजना । अन्यथा अन्येषां निन्दोक्तिरेव स्यात् ॥ ७७ ॥ ७८ ॥ तत इति । कामगुणान् काम्यन्त इति कामाः प्रार्थनीयाः गुणाः येषां ते तान् ॥२७२॥
सहस्रशतमिति । धेनूनां नवप्रसूतानाम् " धेनुस्स्यान्नवसूतिका " इत्यमरः ॥ ७०-७८ ॥ ततो द्विविदेति । कामगुणाः काम्यन्त इति कामाः, गुणा अर्थनीयाः

आभरणादिवस्तुविशेषान् ॥ ७९ ॥ ८० ॥ विभीषणोऽथेति । अत्र सम्भावितपरिगणने प्रथमं कीर्तनाल्लब्ध्वा कुलधनमित्यनुवादाच्च आदावेव विभीषणः सम्भावित इति बोध्यम् ॥ ८१–८३ ॥ रामानु०–विभीषणोऽथ सुग्रीव इति । संभावितानुवादसमये विभीषणस्य प्रथमोपादानात् सुग्रीवात्पूर्वमेव विभीषणः संभावित इत्यव

सर्ववानरवृद्धाश्च ये चान्ये वानरेश्वराः । वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ॥ ८० ॥ विभीषणोऽथ सुग्रीवो हनुमान् जाम्बवांस्तथा । सर्ववानरमुख्याश्च रामेणाक्लिष्टकर्मणा ॥ ८१ ॥ यथार्हं पूजिताः सर्वैः कामै रत्नैश्च पुष्कलैः । प्रहृष्टमनसः सर्वे जग्मुरेव यथागतम् ॥ ८२ ॥ नत्वा सर्वे महात्मानं ततस्ते प्लवगर्षभाः । विसृष्टाः पार्थिवेन्द्रेण किष्किन्धामभ्युपागमन् ॥ ८३ ॥ सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम्* ॥ ८४ ॥ लब्ध्वा कुलधनं राजा लङ्कां प्रायाद्विभीषणः ॥ ८५ ॥ स राज्यमखिलं शासन्निहतारिर्महायशाः । राघवः परमोदारः शशास परया मुदा ॥ ८६ ॥ उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ॥ ८७ ॥

गम्यते ॥ ८१ ॥ सुग्रीव इत्यर्धम् । अत्रापि वचनव्यत्ययेन किष्किन्धामभ्युपागमदित्यनुषज्यते ॥८४॥ लब्ध्वेत्यर्धम् । कुलधनम् इक्ष्वाकुकुलधनम्, श्रीरङ्गविमानमिति सम्प्रदायः ॥८५॥ रामानु०–कुलधनम् इक्ष्वाकुकुलधनम्, श्रीरङ्गसंज्ञकं विमानमिति सन्तो वदन्ति । विभीषणकुलक्रमागतं लङ्काराज्यमिति केचित् ॥ ८५ ॥ स इति । गुणाः एतान् ॥ ७९–८४ ॥ लब्ध्वा कुलधनं राजा लङ्कां प्रायाद्विभीषणः इत्यत्र कुलधनशब्देन पूर्वमेव रामाभ्यनुज्ञातं राक्षसकुलधनं लङ्काराज्यं लब्ध्वेति ऋषिणाऽनुवादः क्रियते । केचित्तु–लब्ध्वा कुलधनमित्यत्र कुलधनशब्दस्यार्थम् इक्ष्वाकुकुलदैवतं श्रीरङ्गविमानमिति वर्णयन्ति । तन्नोपपद्यते । कुतः ? कुलधनमित्यत्र इक्ष्वाकुकुलधनस्याश्रूयमाणत्वात् । अवतारसमाप्तिसमये विभीषणाय इक्ष्वाकुकुलदैवतरङ्गविमानस्योत्तरश्रीरामायणे वक्ष्यमाणत्वाच्च । तथाहि विभीषणं प्रति श्रीरामवचनम् " किञ्चान्यद्वक्तुमिच्छामि राक्षसेन्द्र महाबल । आराधय जगन्नाथमिक्ष्वाकुकुलदैवतम् ॥ " इति । पाद्मपुराणे चावतारसमाप्तिसमये समागतं विभीषणं प्रति श्रीरामवचनम्–" यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावद्रामस्य राज्यस्थः काले मम पदं व्रज ॥ इत्युक्त्वा प्रददौ तस्मै स्वविश्लेषासहिष्णवे । श्रीरङ्गशायिनं स्वार्च्यमिक्ष्वाकुकुलदैवतम् । रङ्गं विमानमादाय लङ्कां प्रायाद्विभीषणः ॥" इत्यवतारसमाप्तिकाले श्रीरङ्गविमानदानश्रवणात् । कुलधनशब्देन राक्षसकुलधनं लङ्काराज्यमेवोक्तमिति वेदितव्यमिति ॥ ८५ ॥ स इति । शासन् दुष्टनिग्रहं कुर्वन् शशास पालयामास, धातूनामनेकार्थत्वात् ॥ ८६ ॥ ८७ ॥

* इतः परम्–पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम् । रामेण सर्वकामैश्च यथार्हं प्रतिपूजितः ॥ इति पाठभेदः केषुचित् पुस्तकेषु दृश्यते ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शासन् दुष्टनिग्रहं कुर्वन् । शशास बुभुज इत्यर्थः । धातूनामनेकार्थत्वात् ॥ ८६ ॥ ८७ ॥ "लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुन्धराम्" इति पूर्वाभिषेकारम्भे भरतासन्निधाने प्रतिज्ञानात् 'रामो द्विर्नाभिभाषते' इति नियमाल्लक्ष्मणमेव यौवराज्ये नियुङ्क्ते–आतिष्ठेति । पूर्वराजैः मन्वादिभिः अध्युपिताम् आतिष्ठ पालय । पितृभिः पितृपितामहप्रपितामहैः, या धृता तां धुरं मया तुल्यं यथा भवति तथा यौवराज्ये स्थित्वा उद्वहस्व ॥ ८८ ॥ सर्वेति ।

आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन । तुल्यं मया त्वं पितृभिर्धृता या तां यौवराज्ये धुरमुद्वहस्व ॥८८॥ सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् । नियुज्यमानोऽपि च यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ॥ ८९ ॥ पौण्डरीकाश्वमेधाभ्यां वाजपेयेन चासकृत् । अन्यैश्च विविधैर्यज्ञैरयजत् पार्थिवर्षभः ॥९०॥ राज्यं दश सहस्राणि प्राप्य वर्षाणि राघवः । शताश्वमेधानाजह्रे सदश्वान् भूरिदक्षिणान् ॥९१॥ आजानुलम्बबाहुः स महास्कन्धः प्रतापवान् । लक्ष्मणानुचरो रामः पृथिवीमन्वपालयत् ॥ ९२ ॥ राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् । ईजे बहुविधैर्यज्ञैः ससुहृज्ज्ञातिबान्धवः ॥९३॥ न पर्यदेवन् विधवा न च व्यालकृतं भयम् । न व्याधिजं भयं वापि रामे राज्यं प्रशासति ॥ ९४ ॥ निर्दस्युरभवल्लोको नानर्थः कश्चिदस्पृशत् । न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ॥९५॥ सर्वं मुदितमेवासीत् सर्वो धर्मपरोऽभवत् । राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम् ॥ ९६ ॥

यौवराज्ये नियुज्यमानः यौवराज्यमङ्गीकुरुष्वेति नियम्यमानः । पर्यनुनीयमानः पुनः पुनरनुनयेन पृच्छ्यमानः सन्नपि च । सर्वात्मना सर्वप्रकारेणापि । यदा योगं सम्मतिम् नोपैति, स्वशेषत्वविरुद्धत्वज्ञानाज्ज्येष्ठे भरते विद्यमाने स्वस्य तदनुचितत्वज्ञानाच्चेति भावः । तदा भरतम् अत्यन्तपरतन्त्रम्, यौवराज्ये अभ्यषिञ्चत् ॥ ८९ ॥ पौण्डरीकेति । अत्रोत्तरक्रत्वारम्भोक्तिर्वनवासात्परमग्न्याधानपूर्वकं पूर्वक्रतवोऽपि रामेण कृता इत्यस्योपलक्षणम् ॥ ९०–९२ ॥ राघव इति । चापीति निपातसमुदायोऽवधारणार्थोऽभिन्नक्रमः । ससुहृज्ज्ञातिबान्धव एवेत्यर्थः ॥ ९३ ॥ न पर्यदेवन्निति । न पर्यदेवयन्नित्यर्थः ॥ ९४ ॥ ९५ ॥ सर्वमिति । राममेवेति । अन्योन्यनिर्मूलनवैरे सत्यपि राममुखं म्लानं भविष्यतीति मत्वा परस्परं नाभ्यहिंसन् । परमधार्मिकं राम ॥१८०॥

बलेन पूर्वराजाध्युषितां पूर्वे राजानो मन्वादयः तैरध्युषिता इमाम् गां पृथिवीं पितृभिः पितृपितामहप्रपितामहैः । धृता या मया सह तुल्यं यथा भवति तथा यौवराज्ये धुरमुद्वह [illegible] । आत्मना सह वनवासदुःखानुभवात् राज्ये सह सुखानुभवार्थं लक्ष्मणं प्रति यौवराज्यप्रार्थनेति भावः ॥ ८८ ॥ सर्वात्मना पर्यनुनीयमानः

मेवानुचिन्तयन्तोऽन्योन्यवैरं प्रजहुरित्यर्थः ॥ ९६–१०२ ॥ अथ रामायणपठने फलं दर्शयति–धन्यमित्यादिसार्धश्लोकमेकं वाक्यम्। आर्षम् ऋषिः वेदः तत्संबन्धि, वेदोपबृंहणमिति यावत्। पुरा अवतारात्पूर्वम्। रामोत्तरतापनीयमूलत्वेन पुरातनमिति वाऽर्थः। यद्वा पुरा सर्वकाविभ्यः पूर्वम्, न त्ववतारात् पूर्वमित्यर्थः। "प्राप्तराज्यस्य रामस्य वाल्मीकिर्भगवानृषिः। चकार चरितं कृत्स्नं विचित्रपदमात्मवान् ॥" इति रामे प्राप्तराज्ये सति चकारेत्युपक्रमात्,

आसन् वर्षसहस्राणि तथा पुत्रसहस्रिणः। निरामया विशोकाश्च रामे राज्यं प्रशासति ॥ ९७ ॥ रामो रामो राम इति प्रजानामभवन् कथाः। रामभूतं जगदभूद्रामे राज्यं प्रशासति ॥ ९८ ॥ नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः। काले वर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः ॥९९॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः। स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः ॥ १०० ॥ आसन् प्रजा धर्मरता रामे शासति नानृताः। सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः ॥ १०१ ॥ दश वर्षसहस्राणि दश वर्षशतानि च। भ्रातृभिः सहितः श्रीमान् रामो राज्यमकारयत् ॥१०२॥ धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम्। आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम्। यः पठेच्छृणुयाल्लोके नरः पापाद्विमुच्यते ॥ १०३ ॥ पुत्रकामस्तु पुत्रान् वै धनकामो धनानि च। लभते मनुजो लोके श्रुत्वा रामाभिषेचनम् ॥ १०४ ॥ महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति। राघवेण यथा माता सुमित्रा लक्ष्मणेन च ॥ १०५ ॥

'रामः सीतामनुप्राप्य राज्यं पुनरवाप्तवान्' इति राज्यप्राप्तिपर्यन्तं भूततया निर्दिश्य ततः परं 'ब्रह्मलोकं प्रयास्यति' इत्येतदन्तं भविष्यत्तया निर्देशात्, 'कोन्वस्मिन् साम्प्रतं लोके' इत्यादौ साम्प्रतशब्दप्रयोगात्, 'रामभूतं जगदभूद्रामे राज्यं प्रशासति' इति सकललोकविदितरामविषयप्रश्नानुपपत्तेः सर्वथा परिहृतत्वात्। इतिहासं पुरातनमित्यस्य आदिकाव्यत्वात्सङ्गतेरन्येषामपि विरोधाभासानां सुपरिहार्यत्वाच्चायमेवार्थः ॥१०३॥ पुत्रकामास्त्वित्यादिसार्ध

इत्यनेन ज्येष्ठे भरते वर्तमाने अहं यौवराज्यानर्हः इति लक्ष्मणेन निषेधे कृते रामेण पुनःपुनरनुनयनं कृतमित्यवगम्यते ॥ ८९–१०२ ॥ धन्यमिति। आर्षम् ऋषिर्वेदः तत्सम्बन्धि, वेदोपबृंहितमिति यावत् ॥ १०३ ॥ पुत्रकाम इति। रामाभिषेचनं रामाभिषेकावधिकमित्यर्थः ॥ १०४–१०९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्लोकद्वयमेकं वाक्यम् । रामाभिषेचनं रामाभिषेकावधिकम् । अधितिष्ठति आक्रम्य तिष्ठतीत्यर्थः । माता कौसल्या । जीवपुत्राः, भवन्तीति शेषः ॥ १०४-१०७ ॥ शृणोति य इत्यादिश्लोकद्वयमेकान्वयम् । दुर्गाणि दारिद्र्यादीनि ॥ १०८ ॥ १०९ ॥ श्रवणेनेति । विनायकाः विघ्नकराः ग्रहाः

भरतेनेव कैकेयी जीवपुत्रास्तथा स्त्रियः । [भविष्यन्ति सदानन्दाः पुत्रपौत्रसमन्विताः] ॥ १०६॥ श्रुत्वा रामायणमिदं दीर्घमायुश्च विन्दति । रामस्य विजयं चैव सर्वमक्लिष्टकर्मणः ॥ १०७॥ शृणोति य इदं काव्यमार्षं वाल्मीकिना कृतम् । श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ ॥ १०८॥ समागमं प्रवासान्ते लभते चापि बान्धवैः । प्रार्थितांश्च वरान् सर्वान् प्राप्नुयादिह राघवात् ॥ १०९ ॥ श्रवणेन सुराः सर्वे प्रीयन्ते सम्प्रशृण्वताम् । विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य व ॥ ११० ॥ विजयेत महीं राजा प्रवासी स्वस्तिमान् व्रजेत् । स्त्रियो रजस्वलाः श्रुत्वा पुत्रान् सूयुरनुत्तमान् ॥ १११ ॥ पूजयंश्च पठंश्चेममितिहासं पुरातनम् । सर्वपापात् प्रमुच्येत दीर्घमायुरवाप्नुयात् ॥ ११२॥ प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात् । ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः ॥ ११३ ॥ रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा । प्रीयते सततं रामः स हि विष्णुः सनातनः ॥ ११४॥ आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः । [साक्षाद्रामो रघुश्रेष्ठः शेषो लक्ष्मण उच्यते] ॥ ११५ ॥ कुटुम्बवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च । श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिम् ॥ ११६ ॥ आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिकरं सुखं च । श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः ॥ ११७ ॥

॥ ११०-११२ ॥ रामानु०-श्रवणेनेति । संप्रशृण्वतामिति पाठः । विनायकाः विघ्नकारिणो भूतविशेषाः ॥ ११० ॥ ब्राह्मणवत् क्षत्रियस्यापि पाठप्राप्तौ नियममाह-प्रणम्येति । वैश्यादीनां कैमुतिकसिद्धं ब्राह्मणात् प्रणमनपूर्वकं श्रवणम् ॥ ११३-११६ ॥ आयुष्यमिति । सौभ्रातृकं सौभ्रातृकरम् । सुखं

श्रवणेनेति । संप्रशृण्वतां संक्षिप्य शृण्वताम् । विनायकाः विघ्नकारिणो भूतविशेषाः ॥ ११०-११९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

सुखकरम् ॥ ११७–११९ ॥ भक्त्येति । संहितातुल्यत्वात् संहितेति व्यपदेशः ॥ १२० ॥ इति श्रीगोविन्दराजविरचिते श्रीरामायणभूषणे रत्नकिरीटाख्याने युद्धकाण्डव्याख्याने एकत्रिंशदुत्तरशततमः सर्गः ॥ १३१ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

एवमेतत् पुरावृत्तमाख्यानं भद्रमस्तु वः । प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥ ११८ ॥
देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा । रामायणस्य श्रवणात्तुष्यन्ति पितरस्तथा ॥ ११९ ॥
भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् । लेखयन्तीह च नरास्तेषां वासस्त्रिविष्टपे ॥ १२० ॥

इत्यार्षे श्रीरामायणे वाल्मीकीये आदिकाव्ये चतुर्विंशतसहस्रिकायां संहितायां
श्रीमद्युद्धकाण्डे श्रीरामपट्टाभिषेको नाम एकत्रिंशदुत्तरशततमः सर्गः ॥ १३१ ॥

(यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् । तत् सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥)

इत्थं श्रीमच्छठारेश्चरणसरसिजद्वन्द्वसेवातिरेकादुद्भूतोद्दामबोधः कुशिकसुतकुलाम्पतेरोषधीशः ।
श्रीमान् गोविन्दराजो वरदगुरुसुतो भावनाचार्यवर्यप्रेम्णैव प्रेर्यमाणो व्यतनुत विपुलां युद्धकाण्डस्य टीकाम् ॥

श्रीमते रामानुजाय नमः ॥

भक्त्येति । ये ऋषिणा मुनिना कृतां रामस्य संहितां रामायणमित्यर्थः । संहितालक्षणसप्तकाण्डवत्सादृश्यादस्य संहितेति व्यपदेशः । लेखयन्ति, अन्यैरिति शेषः । चकाराल्लिखितं च । ते महात्मानः इह लोके परमैश्वर्यसम्पन्नाः दीर्घायुषस्सर्वैः पूजिता महात्मानो भवन्तीत्यर्थः ॥ १२० ॥ (अत्र फलश्रुतिश्लोकाः कतकव्याख्याने नोपलभ्यन्ते ।।) इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमन्नारायणतीर्थशिष्यश्रीमहेश्वरतीर्थविरचितायां श्रीरामायणतत्त्वदीपिकाख्यायां युद्धकाण्डव्याख्यायाम् एकत्रिंशदुत्तरशततमस्सर्गः ॥ १३१ ॥ महेशतीर्थरचिता रामपादसमर्पिता । युद्धकाण्डस्य टीकेयं समाप्ता तत्त्वदीपिका ॥

युद्धकाण्डं समाप्तम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीमद्वाल्मीकिरामायणे युद्धकाण्डम् ॥

श्रीभूषणादिव्याख्याचतुष्टयालंकृतं मुनिभावप्रकाशिका—सत्यतीर्थीयादिव्याख्योद्धृतटिप्पणीसंवलितं च ।

For Private And Personal Use Only